CC-0. In Public Domain. Digitization by eGangotri.



Almira 2
Shelf 2
8

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

8035

मञ्जूषा

श्रीगणेशाय नमः॥ नागेशभट्टविदुषा नत्वा साम्बशिवं लघुः॥ वैयाकरणसिद्धान्तमञ्जूषैषा विरच्यते॥ तत्र वाक्यस्फोटो मु-
ख्यः। लोके तस्यैवार्थबोधकत्वात्। तेनैवार्थसमाप्तेश्च। तदुक्तं न्यायभाष्यकृता। पदसमूहो वाक्यमर्थसमाप्ताविति॥ अत्र पदं
सुबन्तं तिङन्तं च। तेन तत्समूह इत्यर्थः। समाप्ताविति अस्य समर्थमिति शेषः। तत्र प्रतिवाक्यं संकेतग्रहासंभवात् तदन्वाख्या-
नस्य लघूपायेनाशक्यत्वाच्च कल्पनया पदानि विभज्य पदे प्रकृतिप्रत्ययविभागान् कल्पनयैव प्रविभज्य कल्पिताभ्यामन्व-
यव्यतिरेकाभ्यां तत्तदर्थविभागं शास्त्रमात्रविषयं परिकल्पयन्ति स्माचार्याः। एतदेवाभिप्रेत्य विभाषासुप इतिसूत्रे कैयटः। अ-
न्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययानामिह शास्त्रेऽर्थवत्तापरिकल्पनादित्याह॥ तत्तदवयववत्तत्तदर्थबोधनेन समुदायस्य समुदा-
यार्थस्य बोधने तात्पर्यमृषीणां। स्पष्टं चेदमर्थवत्सूत्रे भाष्यकैयटयोः। श्रुतिवाक्यादीनां बलाबलविचारकल्पनार्थं च तत्क-
ल्पनेति बोध्यम्। तत्र शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः। प्रकृतिप्रत्ययास्तु तदर्थस्य वाचका इति तदर्थः। उपसर्गनिपातधा-
त्वादिविभागोप्येवमेव काल्पनिकः। तस्यैवान्वाख्यानस्य लाघवेन निर्वाहाय स्थानिनो लादय आदेशास्तिबादयश्च कल्पिता ए-
व। तेषामर्था [illegible] नि नामर्था ऋषिभिः कण्ठत उक्ताः। आदेशानां च स्थान्यर्थाभिधानसमर्थस्यैवादेशते-
ति [illegible] नया बोधितेन तत्समुदायरूपे पदे वाक्ये वा लौकिकानां तत एव बोधात्। एतदेवा

CC-0. In Public Domain. Digitization by eGangotri

मि [illegible] नुवित्तिलक्षणेसतिप्रत्ययेभाववचनत्वंतद्वचनाच्चप्रत्ययइत्यन्योन्याश्रयमाशङ्
क्यअने [illegible] त्यत्वाच्छब्दानामित्युक्ते·पारमार्थिकंनाश्रीयते·कल्पितंत्वाश्रीयतएवेतिकैय
टः एवंचस्थानि [illegible] शाचेत्यादिविचारोनिष्फलएव।कल्पितवाचकत्वस्योभयत्रापिसत्त्वात्·व्याकर
णभेदेनस्थानिनांभेदेपिनक्षतिः लिपीनांभेदइवेतिदिक् तत्राप्तोपदेशरूपःशब्दःप्रमाणम्॥आप्तोनामानुभवेनव
स्तुतत्त्वस्यकार्त्स्न्येननिश्चयवान्।रागादिवशादपिनान्यथावादीयःसइतिचरकेपतञ्जलिः।तत्रागृहीतवृत्तिकस्यशाब्द
बोधादर्शनान्नहिगुडइत्युक्तेमधुरत्वंप्रकारतयागम्यतइतिसमर्थसूत्रभाष्याच्च तद्धर्मावच्छिन्नविषयकशाब्दत्वावच्छिन्ने
प्रतितद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टंज्ञानंहेतुः।यद्यपिगुडइत्युक्तेऽर्थप्रतीतौतद्गतंमधुरत्वंगम्यतेतथापिनतत्तच्छब्द
जन्यप्रतीतिविषयः किंतुमानान्तरजन्यप्रतीतिविषयः। यत्रतुगुडोमधुरइतिवाक्यार्थेगुडइत्येकदेशःप्रयुज्यतेतत्रा
पिमधुराभिन्नोगुडइत्येवबोधोनतुमधुरत्वप्रकारकोगुडविशेष्यकः। ध्वनितंचेदमनेनव्यञ्जनमितिसूत्रेभाष्ये·विशेष
णविशेष्यभावव्यत्यासेनगृहीतशक्तिकस्यपुंसोघटपदाद् घटत्वविशिष्टघटबोधवारणायतद्धर्मावच्छिन्नेति·ज्ञानेवृत्ति
वैशिष्ट्यंचस्ववृत्तिविषयकोद्बुद्धसंस्कारसामानाधिकरण्य स्वाश्रयपदविषयकत्वोभयसंबंधेनबोध्यमतोनागृहीत

Nepal Sanskrit University, Balmeeki Campus Collection

[illegible] म·
२

वृत्तिकस्य बोधो नापि विस्मृतवृत्तिकस्य नापि तत्तद्वाचकपदाद्ज्ञानवतो नापि घटपदादाश्रयत्वेनोपस्थिताकाशस्य जन
कतयोपस्थितत्वेनाद्देश्यबोधः। संस्काराजनकशक्तिग्रहसत्त्वे तेन शाब्दबोधजनने च न मानं· संस्कारकल्पिका च वृत्तिस्मृ
तिरेव शाब्दबुद्धिरेवेत्यन्यदेतत्॥ सा च वृत्तिस्त्रिधा· शक्तिर्लक्षणा व्यञ्जना च· तत्र शक्तिः कः पदार्थ इति चेद् स्माच्छ
ब्दादयमर्थो बोद्धव्य इत्याकारेदं पदमिममर्थं बोधयत्वित्याकारा वेश्वरेच्छा तस्याश्च यद्यपि विषयत्वलक्षणः संबन्धः पदेऽ
र्थे जन्यजनकभावबोधे च तथापि तस्यां बोधनिष्ठजन्यतानिरूपकजनकतावत्त्वेन विषयो वाचकस्तस्यां बोधविषयत्वेन वि
षयो वाच्य इति नातिप्रसङ्गः यद्यपि प्रथमं शक्तिग्रहो वाक्यएव· तथाप्यावापोद्वापाभ्यां शास्त्रकृत्कल्पिताभ्यां तत्तत्पदे शक्ति
ग्रह इति बोध्यम्· यद्वा तादृशबोधविषयको बोधएव सेति नैयायिकास्तन्न· प्रयोज्यप्रयोजकवृद्धव्यवहारं पश्यता बाले
न प्रयोज्यस्य प्रवृत्त्या तस्य ज्ञानमनुमाय ज्ञानस्य चोपस्थितत्वाच्छब्दमेव कारणत्वेन गृहीत्वाऽसंबद्धस्य कारणत्वानुप
पत्तिज्ञानपूर्वकं कल्प[illegible]स्वयमनुपपद्यमानत्वेन गृहीतजनकत्वघटितस्य ग्रहीतुमशक्यत्वात्। एतेन
बोधजनकत्वमे[illegible]स्यपास्तम्· विनिगमनाविरहेणेच्छाबोधयोरुभयोः शक्तित्वकल्पने गौरवाच्च।
किंचैव[illegible]वजनकत्वं स्यादिति बहूपप्लुवः॥ किंच प्रमाणानां जनकत्वतद्घटितसंबन्धा

राम
२

CC-0. In Public Domain. Digitization by eGangotri

त्तिरिक्तसंब [illegible] कत्वदर्शनेनेहतयोः सबन्धत्वानौचित्यम्। अन्यथा धूमाद्वह्ने र्ज्ञानंजायतामिती
च्छादिविषयत्वमेवो [illegible] नुसाध्ययोः संबन्धः स्यादितिव्याप्त्युच्छेदः॥ किन्त्विच्छाप्रजनकत्वस्यैवोभयवृत्ति
त्वाभावः इच्छाविषयबोधायाविषयतायाइच्छाप्रयत्ननियामकत्वाभावात् संबन्धोहिसंबधिभ्याभिन्नउभयाश्रितइति
द्विष्ठः संबन्धइतिचविशिष्टबुद्धिनियामकइतिचाभियुक्तव्यवहारात्· नहितत्रविषयइच्छावानित्यादिव्यवहारोस्ति।
बोधजनकतायाः पदेऽर्थेचसत्त्वेपितयोः परस्परंसंबन्धस्यदुरुपपादत्वात्· ज्ञानेविषयस्यकर्तुश्चकारणत्वेपितयोः प
रस्परंविशिष्टबुद्ध्यदर्शनात्· अर्थपदयोः संबन्धस्यदुरुपपादत्वात्· तस्मात्पदपदार्थयोः संबन्धान्तरमेवशक्तिः बोध्यबो
धकभावापरपर्याया· तद्ग्राहकेचेतरेतराध्यासमूलतादात्म्यम्· तच्चसंकेतः।तस्यापिपटनिष्ठशक्त्युपकारकत्वाच्छक्ति
रितिव्यवहारः तस्यसंबन्धत्वाभावात् तत्भेदाभेदरूपस्यतस्य तत्त्वासंभवात्· तद्घटकस्यभेदस्याभेदस्यवातत्त्वादर्श
नात्· अभेदस्यापितत्त्वंखण्डयिष्यते· तदुक्तंपातञ्जलेभाष्ये· संकेतस्तुपदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको
योयंशब्दः सोर्थोयोर्थः सशब्दइति· स्मृत्यात्मकइत्यनेनज्ञातस्यैवसंकेतस्यशक्तिबोधकत्वंदर्शितम्। किंचपाणिन्यादि
स्मार्त्तसंकेतस्यैववाचकतानियामकत्वंनत्वाधुनिकस्येत्याद्यपिदर्शितम्· एवंचाधुनिकसंकेतस्थलेह्यादर्शेन्हिकि

Nepal Sanskrit University Library, Digitized by eGangotri

ल॰म॰ ३

यमाणनामस्थले च लक्षणा। तत्र घट गोविन्दादिगुणाध्यारोपेण तन्मूलकतस्यवृत्तिनिमित्तारोपेण च बोधः। संबन्धश्च
स्वशक्तसंकेतविषयत्वम्· एतदर्थमेव संकेतोपयोगः। अत एव तस्य भाव इति सूत्रे भाष्ये· डित्थादिषु प्रकृत्यर्थ
व्यतिरिक्तप्रत्ययार्थाभावाद् भावप्रत्ययान्तवृत्तिर्न प्राप्नोति डित्थत्वमित्याशङ्क्य प्राथमकल्पिकडित्थे न कृतां क्रियां
गुणान्वा यः कश्चित् करोति स उच्यते डित्थत्वं त एवदेवं डित्थाः कुर्वन्ति प्राथमकल्पिकेन हिं कथं यथा तस्य कार्यं चित्कः
प्रयोगस्तथा वृत्तिरपीत्युक्तम्। तत्र शब्दस्वरूपस्यार्थे आरोपात् प्रकारमाश्रित्य यथा शब्दस्यार्थे प्रयोगस्तथा वृत्तिरपीत्य
र्थ इति कैयटः। न तु पक्षे कथंचित्तदस्य न तथा स्वारस्यमन्यत्राप्यारोपस्यानुपयोगश्चेत्यन्ये व्याचक्षते॥ व्यक्तावेव च श
क्तिस्तस्या एव च विषयता हृयेन भानमिति शक्तिग्रहप्रयोगयोरुपपत्तिस्तथात्वप्रत्ययस्यापीति एवं रीतेरन्यत्र क्वाप्य
दर्शनेनात्र पक्षे कथंचित्युक्तिरत्यन्तं समञ्जसेति बोध्यम्। अनादित्वात्संसारस्य ततोऽपि पूर्वतनडित्थादिगुणानाश्रित्य प्रयो
गादीति कश्चित्· तन्न तत्तत्संकेतज्ञानादेव बोधः। शक्त्याद्यभावेऽपीति तु न युक्तं वृत्त्यन्तरत्वापत्तेः वृत्तिजन्योपस्थितिं वि
नाशाब्दबोधविषय [illegible] शोन्हि पितानामकुर्यादिति श्रुत्या स्मृत्या वा नामत्वेन नाम बोधेऽपि तत्तद्रूपेण
म्बरेण संकेता [illegible] पपादत्वात्· अत्र नामपदेनाह्वानकरणीभूतो बोधकः शब्द उच्यते॥ ये तु

राम॰ ३

पदपदार्थ [illegible] रेवसंबन्धइतितन्न· शक्तेरपिकार्यजनकत्वे संबन्धस्यैवनियामकत्वात्· दीपगतप्रकाशकत्वश [illegible] स्तु प्रकाशकत्वंनान्यथेतिदृष्टत्वात्· तदुक्तंहरिणाः उपकारः सयत्रास्तिधर्मस्तत्रानुगम्यते· शक्तीनामप्यसौशक्तिर्गुणानामप्यसौगुणइति· उपकारः उपकार्योपकारकयोरुपकारस्वभावः संबन्धोयत्रास्ति तत्रधर्मः शक्तिरूपः कार्यंदृष्ट्वानुमीयते· असौसंबन्धः शक्तीनामपिकार्यजननेउपकारकः गुणानामपिद्रव्याश्रितत्वनियामकः संबन्धइतितदर्थइतिहेलाराजः। ससंबन्धः पदेवाक्येच। तदाहन्यायभाष्यकारः· समयज्ञानार्थंचेदंपदलक्षणायावाचोन्वाख्यानंव्याकरणंवाक्यलक्षणायावाचोर्थलक्षणमिति· अनेनहि· पदेष्विववाक्येष्वपिऐश्वरः समयइतिस्पष्टमेवोक्तंवाक्यविषयेसमयग्राहकमाकाङ्क्षाद्यपि· समयज्ञानार्थमित्यस्यसाधूनामित्यादिः एतेनपदार्थसंबन्धग्रहवत्स्वपिपदानिवाक्यार्थसमयग्रहानपेक्षाण्येवेतिवाक्यस्फोटोनैयायिकासंमतइतिपरास्तम्। एतच्चोपरिष्टाद्वक्ष्यामः। पदस्यैवार्थबोधकमवयवद्वाराव्याकरणमितिचसूचितम्। कः शब्दः कोर्थइतिप्रश्ने घटइत्ययंशब्दो घटइत्ययमर्थइत्येकाकारोत्तरदर्शनात्तयोरध्याससिद्धिः। घटइत्याकारकेज्ञानमितिव्यवहाराच्छब्दज्ञानयोरपिसः। इतिशब्दस्यशब्दस्वरूपपरतातात्पर्यग्राहकत्वात्· अतएवपद्यंश्रुतमथार्थंशृणुअर्थंवदतीत्यादिव्यवहारः॥ शब्दार्थयोरितरेतराध्यासादेववृद्धिरादैच् ओमित्येकाक्षरं

ल·मं· ब्रह्मेति शक्तिग्राहकश्रुतिस्मृत्योः सामानाधिकरण्येन प्रयोगः। तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्· अभेद
४ स्याव्यक्तत्वाच्च न तयोर्विरोधः तत्र भेदस्योद्भूतत्वविवक्षयास्यार्थस्यायं वाचकः उञः प्रगृह्यं तस्य वाचकः प्रणवः इत्यादौ
षष्ठी। अभेदस्य तत्त्वविवक्षया तु प्रथमा यथोक्तेषु· अत एवार्थे शब्दधर्मत्वव्यवहारः अत्यन्तभेदे च पुरुषयोरिव तद्व्यव
हाराभावात्· नाप्यत्यन्ताभेदे सः घटे स्वधर्मत्वव्यवहाराभावात्। अयमध्यास आदिव्यवहारकृदीश्वरकृत एव। एतच्च स्थि
तोऽस्य वाचकस्य वाच्येन सह संबन्धः संकेतस्तूक्तरूप ईश्वरस्य स्थितमेवार्थमभिनयति· यथावस्थितः पितापुत्रयोः सं
बन्धः संकेतेनावद्योत्यते· अयमस्य पिता· अयमस्य पुत्र इतीत्यादिना पातञ्जलभाष्ये एव स्पष्टम्। हरिरप्याह· इन्द्रियाणां स्व
विषयेष्वनादिर्योग्यता यथा· अनादिरर्थैः शब्दानां संबन्धो योग्यता तथा· संबन्धशब्दे संबन्धो योग्यतां प्रति योग्यता· समया ल·मं·
द्योग्यता संविन्माता पुत्रादियोगवत्· सति प्रत्ययहेतुत्वं संबन्धे उपपद्यते· शब्दस्यार्थे यतस्तस्मात्संबन्धोऽस्तीति गम्यत इति
अस्यार्थः यथा चक्षुरादीनां रूपादिविषयज्ञानजनने ऽनादिः पुरुषयत्नानपेक्षा योग्यता तज्जनकतावच्छेदकधर्मवत्त्वरूपा
तथा शब्दानामर्थै ताः तद्बोधजनकतावच्छेदको धर्मः संबन्धशब्दे योग्यतां प्रति बोधजनकतावच्छेद
कधर्म क्षणः संबन्धः स एव योग्यता· सा च स्वाभाविक्येवानादिवृद्धव्यवहारपरंपराप ४

र्यायाः र [illegible] न्नेश्चीयते। यथा मातापुत्रयोर्जन्यजनकभावस्य संबन्धस्य व्यवहारो निश्चा
यकस्तद्वत्· नतु ज [illegible] तज्जनने यं योग्य इति व्यवहारात्तदाहसतीति। यतः शब्दस्यार्थे संबन्धे सति तस्य
त्ययहेतुत्वमुपपद्यते तस्मादर्थान्वयः। अत एव एतदुपक्रमे। ज्ञानं प्रयोक्तुरर्थश्च स्वरूपं च प्रतीयते। शब्दैरुच्चरितैस्तेषां सं
बन्धः समवस्थित इत्यादिना शब्दार्थज्ञानानामभेदाध्यासस्योपपादनं कृतम्। अत्र तेषामित्यस्यात इत्यादिः। अयं सास्ना
दिमानर्थो गौरित्यर्थकारयं गौरित्येवं लोकानां व्यवहारादुक्ते तादात्म्यसंबन्ध इत्यर्थः। एतेन तयोरभेदे घटादिशब्दैर्मधुधारणा
द्यापत्तिरग्न्यादिशब्दोच्चारणे मुखदाहाद्यापत्तिरर्थे वर्णमालाद्यनुभवापत्तिश्चेति निरस्तं भेदाभेदोपपादनात्। वक्तृतो बो
द्धृत एवार्थः शक्यः पदमपि बोद्धृतयोरभेदः। न च बौद्धे दाहादिशक्तिमत्त्वमित्यग्रे निरूपयिष्यामः। अत एव पुरोवर्त्ति डित्थं प
श्यतो नामजिज्ञासया कोयमिति प्रश्ने डित्थोयमित्युत्तरे सन्निहितदेशं पिण्डमुद्दिश्य डित्थशब्दविधेयताप्रतीतिः संगच्छते
अस्यायमर्थोऽस्यार्थस्येदं पदमित्यादौ षष्ठ्यनुपपत्त्यातयोः स्वाभाविकयोगाङ्गीकाराच्च॥ असंबद्धानां घटपटादीनामेवं व्यव
हाराभावात्· अस्यायं वाचक इत्यादिव्यवहारोप्येवम्। अयं वाचक एतत्संबन्धी स्यादितदर्थात्· स्पष्टश्चेदमस्यायं वाचको
वाच्य इति षष्ठ्या प्रतीयते· योगः शब्दार्थयोरिति हरिकारिकाव्याख्यावसरे हेलाराजीये। समयः संकेत इति चाप्तोपदेश

वृद्धव्यवहारपर्यायो· अतएवन्यायभाष्यकृदादयः सामयिकः शब्दादर्थप्रत्ययइतिसूत्रेकः पुनरयंसमयः अस्यश॰
ब्दस्येदमर्थजातमभिधेयमिति· अस्येदंनामधेयमित्यादिनियोगरूपम्· अस्माच्छब्दादयमर्थोबोद्धव्यइत्यादिविनियो
गश्चेत्याहुः। नियोगश्चोपदेशएव। सामयिकः शब्दादर्थप्रत्ययइतिकणादसूत्रव्याख्यातृभिश्चनकुलदंष्ट्रास्पृष्टायाका
चिदोषधिः सासर्पविषहन्त्रीत्याप्तोपदेशस्यैवसमयत्वमुक्तम्। अयमयमितिनियोगोपिसमयइतिपातञ्जलाः। उक्तई
श्वरसंकेतएवशक्तिरितितुनयुक्तम्। अयमेतच्छक्योत्रास्यशक्तिरित्यस्यसंकेतस्यानापत्तेः ईदृशसंकेतस्यलोकेद
र्शनेनतादृशेश्वरसंकेतस्याप्यनुमानात्· अतएवन्यायवाचस्पत्येउक्तम्। सर्गादिभुवांमहर्षिदेवतानामीश्वरेणसा॰
क्षादेवकृतः संकेतस्तद्व्यवहाराच्चास्मदादीनामपिसुग्रहस्तत्संकेतइति। तथाचयोगवाचस्पत्येउक्तम्। सर्वेचशब्दाः स
र्वार्थाभिधानसमर्थाइतिसर्वैरर्थैः सर्वेषांशब्दानांसंबन्धः। ईश्वरसंकेतस्तत्प्रकाशकः। अतएवनित्यः शब्दार्थसंबन्धइति॰
तान्त्रिकाइति· सर्वैरर्थैः सर्वशब्दानांसंबन्धश्चयोगिज्ञानगम्यएव· तेषांयोगबलेनैवउभयरूपप्रत्यक्षात्· युक्तंचैतत्एक
स्यैवस्फोटस्यशब्द[illegible]र्थोभयोपादानत्वेनोभयरूपतयोभयोरपितत्कार्ययोरुभयरूपत्वात्· क्रियाश
क्तिप्रधाना[illegible]बिन्दुरूपिण्याः शब्दब्रह्माभवत्परेत्युक्तेः। नित्यत्वंतुयावत्सृष्टिस्थि ११

स्याद्व्यवहा[illegible]स्मा मर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिष्यन्दमानां तामन्येविदुरन्यामि
वचनानारूपामात्म[illegible]अभिष्यन्दमानाम्। तत्तद्रूपे आभिव्यक्ताम्। अन्यामिव भेदवतीमिव। आत्मनि।
चित्ते। प्राणापानान्तरे देवी वाग्वनित्यस्मतिष्ठति। स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।। वैखरी वाक् प्रयोक्तॄणां प्राणवृत्ति
निबन्धना। केवलं बुद्ध्युपादानक्रमरूपानुपातिनी।। प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते। अविभागा तु पश्यन्ती सर्वतः
संहृतक्रमा।। स्वरूपज्योतिरेवान्तः परा वागनपायिनीति भारते च। एतेच श्रुतिभारते हरिग्रन्थे स्पष्टे। हरिवंशेपि अक्षरा
णामकारस्त्वं स्फोटस्त्वं वर्णसंश्रय इति योग्यतालक्षणः संबन्ध इत्यादेः कैयटस्य कारणतावच्छेदकधर्मरूपः संबन्ध
इत्यर्थः। तत्त्वमस्यादिवाक्यस्याखण्डार्थे न शुद्धेनापि ब्रह्मणाध्यासिकं तादात्म्यम्। तद्ब्रह्मनेह नानास्ति इत्यादिनिषेध
वाक्यमनने सति शमदमादिसम्पन्नस्यातिशुद्धचित्तस्यैवेति न दोषः। ब्रह्मशब्दाद्धि शिष्टबोध एव। अखण्डार्थस्तु मानस
बोधविषय एव ब्रह्मनिषेधवाक्यसहकारेण धर्मोपलक्षिते शक्तिग्रहात्तदुपलक्षिताखण्डार्थस्यैव बोध इत्यादि द्रष्टव्यम्।
तादात्म्यमूलकस्य संबन्धत्वेऽर्थभेदात्तत्तादात्म्यापन्नशब्देषु भेदौचित्येनार्थभेदाच्छब्दभेद इत्युपपद्यते। समानाकार
त्वमात्रेण तु एकोयं शब्दो नानार्थ इति व्यवहारः तस्य निरूपकाश्रयभेदाभ्यां भेद इत्येके। अन्ये त्वेकत्वे वाप्रफलेरूपर॰

CC-0. In Public Domain. Digitization by eGangotri

ल·मं सगन्धादीनांभिन्नानांतादात्म्यवद् एकत्रैवशब्देऽनेकार्थनिरूपितानिभिन्नानितादात्म्यानीत्याहुः॥परेतुनिरूपकभेदेपिता
६ दात्म्यमेकमेवेतिशक्तेरैक्यमेवेत्याहुः।हलोनन्तराइतिसूत्रेसरूपसूत्रेचभाष्येसूचितमिदंपक्षत्रयम् सर्वजातीयैःसंकेतैर
स्यसंबन्धत्वेनैवज्ञानंतदेवचबोधसाधनमितिबोध्यम्।नचतयोस्तादात्म्यस्वीकारेसमव्याप्ततयाशब्दादनुमानमेव॰
स्यादर्थस्येतिप्रमाणान्तरत्वभङ्गः पक्षधर्मताज्ञानाद्यनपेक्षतयातस्यप्रमाणान्तरत्वात् सिद्धिसत्त्वेइच्छांविनापिबोधद
र्शनाच्च· किंचपदमात्रात्पदार्थप्रत्ययस्यजायमानस्यानुमितित्वासंभवः।पदेभ्यःस्मृतिरेवेतितुनयुक्तंतत्रानुल्लेखात्·
वाक्यादपितदापत्तेश्च· किंचशाब्दयामीत्यनुव्यवसायान्नस्मृतित्वमनुमितित्वंवातज्जन्यप्रत्ययस्य· किंचतस्यानुव्यवसा
यप्रयोजिकायाः शाब्दत्वजातेस्तदवच्छिन्नेआकाङ्क्षादिज्ञानहेतुत्वस्यचकल्पनावश्यकत्वे त हृत्यनुमितित्वस्यव्याप्ति रा·म·
स्मृत्यादेश्चकल्पनेगौरवम्· किंचसिद्धिसत्त्वेपिशाब्दबोधोदयेनानुमितेश्चानुदयेनसिद्धिप्रतिबध्यतावच्छेदककोटौशा॰
ब्दातिरिक्तत्वविशेषणदानेगौरवम्· नचतत्सत्त्वसादिज्ञाननाशादेवतत्रानुमितिः।अनुभवविरोधात्· सर्वत्रतथापत्तेश्चे
तिदिक्॥साचशक्तिःसा पिशक्तिग्राहकशिरोमणेर्व्यवहारस्यतुल्यत्वात्· व्यवहारदर्शनेनचपूर्वज
न्मानुभूतश स्यांचबोधः नहितेषांतदैवतत्संभवइत्यन्ये· नचसाधुस्मरणात्ततोबोधः ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तेसाधुत्वज्ञ [illegible] म्बेति यदा बालः शिक्ष्यमाणः प्रभाषते॥ अव्यक्तं तद्विदां तेन व्यक्ते भवति निश्चय
इति हर्युक्तेः। अनुमानेन [illegible] ज्ञानेन साधुविषयकस्मरणेनेत्यर्थः। तद्विदां साधुविदाम्। असाधोः साधुप्रकृतिकत्वात्सादृश्य
ल[illegible]ज्ञानमिति वाच्यम्। साधुस्मरणं विनापि बोधानुभवात्· तद्वाचकसाधुशब्दमजानतां बोधानापत्तेश्च॥ तदर्थज्ञाप
कत्वेन स्मरणं तु नार्थोपस्थापकम्। शक्ततावच्छेदकानुपूर्व्यग्रहात्· तद्वाचकसर्वनामस्मरणाननुभवाच्च· उच्चारित
स्यैव बोधकत्वेन स्मृतसाधुतो बोधासंभवाच्च· न च शक्तिभ्रमाद्बोधः पूर्वपूर्वभ्रमाच्चोत्तरोत्तरभ्रम इति पामराणां शक्त्यग्रहे
पितद्भ्रमोपपत्तिरिति वाच्यम्· घटत्वविशिष्टघटादिरूपार्थनिरूपिताया घटादिपदवृत्तित्वेन गृहीताया भिन्नानुपूर्वीकत्व
रूपविशेषदर्शनसत्त्वेन साधारणधर्मदर्शनाभावेन च गगरीपदादौ भ्रमानुपपत्तेः। यदि तु अशक्त्या केनचित् गगरीति प्रयु
क्ते बंबेत्यादाविव घट इति साधुशब्दस्मरणात्प्रयोज्यस्य बोधेन तटस्थस्य गगरीशब्दादेवास्य बोध इति भ्रमेणाद्यस्य श
क्तिभ्रमस्तन्मूलश्चान्येषामपि· तदुक्तं हरिणा· तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशका इति· इवशब्देन तदुपगमस्य भ्र
मत्वं सूचितम्। तादात्म्यस्य शक्तित्वं च स्पष्टमेवोक्तम्। जैमिनिना च तदशक्तिश्चानुरूपत्वादिति· तद्भाष्यकृता च तत्रोक्तरीत्या
शक्तिभ्रम उपपादित इत्युच्यते· तदा प्रत्येकं तत्तत्संस्कृतस्य तत्तदपभ्रंशेन विनिगमनाविरहात्तेषु शक्तिः न च सकलदेश

CC-0. In Public Domain. Digitization by eGangotri

शिष्टपरिगृहीतत्वं विनिगमकम्। शवतिर्गतिकर्मा कम्बोजेषु विकार एवैनमार्या भाषन्त इत्यादिभाष्यरीत्या तत्तद्देशनियत
संस्कृतेषु शक्तिसिद्ध्यनापत्तेः॥ वाचकस्य व्यञ्जकत्व आलंकारिकाणां प्राकृतभाषोदाहरणस्यासंगत्या –पत्तेश्च· तत्तद्देशी
यशिष्टानां तत्तद्भाषासु जायमानस्य निर्विचिकित्सशक्तत्वप्रत्ययस्य बाधकं विना भ्रमत्वायोगाच्च· अत एव स्त्रीशूद्रबाल
नां प्रयुक्ते साधौ अर्थसंशये तदपभ्रंशेन निर्णयः। आर्यम्लेच्छाधिकरणस्य तु इदं तात्पर्यम्· तत्र हि यद्यपि आर्या यवशब्दं दी
र्घशूके प्रयुञ्जते तमेव च बुध्यन्ते म्लेच्छास्तु प्रियंगौ प्रयुञ्जते। तमेव च बुध्यन्ते म्लेच्छपदेनानार्याः तथापि आर्यप्रसिद्धेर्बलव॰
त्वाद्दे दीर्घशूकपरतैवेति सिद्धान्तितम्· तत्र हि शवतिर्गतिकर्मेत्याद्युक्तभाष्याद् द्वयोरपि शक्तिग्रहाद्बोधेनोभयत्रापि साधु
त्वेन शक्तत्वेन च तृतीयस्य संदेहे विकल्पबोधे वा आर्यप्रसिद्धेर्बलवत्त्वाद्देतद्बोध एवोचित इति· एवञ्चानार्यैरपि यज्ञे यवा
एवोप[illegible]याः। पूर्वपक्षे तु अनार्यैः प्रियंगव एवोपादेया इति विशेषः॥ तदुक्तं हरिणा· शब्दतत्त्वविदः शिष्टाः शब्दार्थेषु व्यवस्थि
ताः इ[illegible]ः· आर्याणां शिष्टत्वात्तत्प्रसिद्धेर्बलवत्त्वमिति बोध्यम्· न तु अनार्यप्रसिद्धेऽर्थेऽशक्तत्वेऽसाधुत्वे वा तात्पर्यम्· जैमि
निरप्याह· तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यादिति यवशब्दे उभयथा शब्दार्थावगमाद्विकल्पः स्यादित्यर्थः ए
वं पूर्वपक्षे [illegible] न्निमित्तत्वादिति· यः शास्त्रस्थानां शिष्टानां स शब्दार्थो वेदे इति शेषः तेषामविच्छि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्ना स्मृतिः शब्देषु वेदा [illegible] कृतिस्मृतिधारणे निमित्तमित्यर्थः। यस्तु दीर्घशूकेषु प्रकृतः सद्भूयात् प्रियंगुषु प्र
युज्यते पूर्वस्य सापेक्षी पेण्डूयोरप्युत्पत्तेस्तत्त्वतयोः सादृश्यमिति शबरस्वामी। अत्र वदन्ति। तदा एकस्य गौणत्वमिति विक
ल्पे पूर्वपक्षासंगतिः किञ्च यदान्या ओषधयो म्लायन्तेऽथैते मोदमाना उत्तिष्ठन्तीति दीर्घशूकानप्यवान् दर्शयति वेद इति
भवदुक्तसंगतिः प्रियंगूणामपि तथैवोत्पत्तेः अन्यथा भवदुक्तसादृश्यासङ्गतिः वाक्यशेषोप्युक्तयुक्तिमूलक इति दिक्॥ १
न्यायभाष्यकारोपि। आप्तोपदेशः शब्द इति सूत्रेऽर्थसाक्षात्कारवानाप्तः स यथादृष्टार्थबोधयिषया यं प्रयुङ्क्ते स प्रमाणश
ब्द इति ऋष्यार्यम्लेच्छानां समानमाप्तलक्षणमित्याह। तत्र ऋषिर्वेदो म्लेच्छोपशब्दवक्ता ततः सूत्रकृता सामयिकः शब्दा
दर्थप्रत्यय इति प्रमाणत्वेन लक्षितशब्दमात्रजप्रत्ययस्य तुल्यमेव सामयिकत्वमुक्तम् सामयिकत्वं समयगृहीतसंबन्धजन्य
त्वमिति न ऋषीणां विरोधः काव्ये च्युतसंस्कृतिदोषस्य दूषकता बीजं तु साधुपदसमुदायमध्येऽसाधुपददर्शनेन विस्रम्भा
यानध्ये चण्डालदर्शनेनेव सहृदयोद्वेग एवेति बोध्यम्। साधुत्वं तु नापभ्रंशानां शिष्टैर्धर्मबुद्ध्या तदप्रयोगात्। न चैवं ततो बो
धानापत्तिरसाधुत्वनिश्चयस्य तत्प्रतिबन्धकत्वादिति वाच्यम्। तत्सत्त्वेपि ततो बोधदर्शनेन तस्य तदप्रतिबन्धकत्वात्। सा
धुत्वं व्याकरणव्यङ्ग्योऽर्थविशिष्टशब्दनिष्ठः पुण्यजनकतावच्छेदको जातिविशेषः तदुक्तमेकः पूर्वपरयोरिति सूत्रे भाष्ये।

एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवतीति सम्यग्ज्ञातः सम्यक्त्वेन साधुत्वेन ज्ञातः शास्त्रा
न्वितः शास्त्रव्युत्पादनमार्गेणानुसंहितः सुप्रयुक्तः शिक्षोच्चरीत्या प्रयुक्तः तस्य च शिष्टप्रयोगकोशव्याकरणाद्यनुमापकं
लाक्षणिकेष्वपि शक्यार्थमादायैव पदस्य साधुत्वम्· पदान्तरसंबन्धेऽन्वयाद्यनुपपत्त्याशक्यतावच्छेदकारोपेणैव लक्ष्या
र्थबोधात्· गोपीत्यादौ प्रक्रियादशायां गोपेति प्रातिपदिकस्य गोपत्वारोपेण तत् स्त्रीबोधकत्वानुमानं प्रयोगादाख्याया
मिति शास्त्रतः। लिङ्गं लिङ्ग परिज्ञाने सूत्रं प्रत्ययशासके सोऽयमित्यभिसंबन्धात् शब्दे ह्यभिधारितेति हर्युक्तेः अत एव वय्यदि
हपरिनिष्ठितेन तत्साध्वित्यर्थापत्तिलभ्यवाक्यात् साधुत्वबोधकं व्याकरणमिति भाष्यं सङ्गच्छते तद्बोधकं व्याकरणमद्यत्वे पा
णिनीयमेवेत्यपि भाष्ये स्पष्टम्· एवं च पाणिनीयव्याकरणव्युत्पत्तिज्ञानपूर्वकं साधुत्वेन ज्ञातसाधुशब्दप्रयोगाद्धर्म इति
बोध्यम्। अत एव समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियम इति भाष्ये उक्तम्· वाचकत्वाविशेषेपि
नियमः पुण्यपापयोरिति हरिणाप्युक्तं· किञ्च· अपभ्रंशे शक्त्यंशे कदाचिदपि कस्यापि व्यवहर्तुर्बाधादर्शनेन न तत्र शक्तिज्ञा
नस्य भ्रमत्वमसति बाधके प्रमात्वस्यैवौचित्यात्· किञ्चैवमृषीणामार्षज्ञानेन तदभावनिश्चयात्तेषां भ्रमासंभवेन त
तो बोधानापत्तिः लि [illegible] र्थबोधकत्वेन तेषामपि अर्थेन संबन्ध आवश्यकः अत एव गोरित्यस्य शब्द

CC-0. In Public Domain. Digitization by eGangotri

स्यार्थे बहवो गावी गो[illegible]लकेत्यादयोऽपभ्रंशा वर्तन्त इत्यर्थकं गोरित्यस्य शब्दस्य गाव्यादयोऽपभ्रंशा इति भाष्यं सामञ्जस्येन सङ्गच्छते· अत एव भाष्ये धर्माद्यर्थत्वं साधूनामुक्तम्। एतेनार्थाय ह्येते उच्यन्ते शब्दा न धर्मायेति शबरस्वाम्युक्तमपास्तम् जैमिनिसूत्रस्याप्ययमर्थः अपभ्रंशा अपि साधवः तेऽपि हि साधयन्त्यर्थमिति पूर्वपक्षः न्यायो नैकसाधुशब्दत्वमिति केचिदेव साधवो न सर्वे इति मनसि निधाय तर्हि साधौ प्रयोक्तव्ये साधूच्चारणं कथमित्याशङ्क्य शब्दे प्रयत्ननिष्पत्तेः अपराधस्य भागित्वमिति सूत्रेण प्रयत्नसाध्ये कार्ये प्रमादस्य दर्शनात्। यथा भुङ्क्ते पतिष्यामीति कर्दमे पतति तथा साधौ प्रयोक्तव्येऽसाधोः प्रयोग इत्युक्तम्। किञ्चैकस्यार्थस्यानेकसाधुशब्दत्वमन्याय्यम्। तस्मादेकोऽनादिरन्येऽपभ्रंशाः हस्तः करः पाणिरित्यादयोऽभियुक्तोपदेशात्सर्वे साधव इत्युक्त्वा तत्राभियुक्तोपदिष्टः साधुरित्युक्ते तन्नेदमाशङ्क्योत गोरिति प्रयोक्तव्ये गाव्यादीनामिव गगर्यादीनामपि प्रमादात्प्रयोगः कुतो नेति· तन्नेदं सूत्रम्· तदशक्तिश्चानुरूपत्वादिति तेषामेवाशक्त्योच्चारणमनुरूपत्वादर्थतोऽवयवतश्चानुरूपत्वादिति तदर्थः तत्रार्थतश्चानुरूप्याग्रहणे गोपादिशब्दानामपि उच्चारणं प्रसज्येत· एकदेशानुरूप्याच्च विभक्तिव्यत्ययेऽपि अश्मकैरागच्छामीति प्रयोगादश्मकेभ्य इत्यर्थावगतिर्भवति· तत्र यद्यप्यतदर्थे लौकिकः प्रयोगस्तदा न साधुर्वेदे तु साधुरित्यन्यत्· एवञ्च पतञ्जलिनैकवाक्यता भवति

CC-0. In Public Domain. Digitization by eGangotri

नन्वपभ्रंशानां शक्तत्वेर्थवत्वादर्थवत्सूत्रेण प्रातिपदिकसंज्ञापत्तिरिति चेदिष्टापत्तिः अत एव पस्पशायां· एवं हि श्रूयते य
र्वाणस्तर्वाणो नामऋषयो बभूवुस्ते तत्रभवन्तो यद्वानस्तद्वान इति प्रयोक्तव्ये यर्वाणस्तर्वाण इति प्रयुञ्जते याज्ञे कर्म
णि पुनर्नापभाषन्ते इति भाष्ये उक्तम्· तत्र यर्वाणस्तर्वाण इति णान्ताज्जसि यर्वाणस्तर्वाणो नामेति प्रयुक्तम् अतएव रुत्वो
त्वादि बभूवुरित्यनेन सामानाधिकरण्यं च। प्रकृतिप्रत्यययोरुभयोरपि शास्त्रविषयत्वे एव साधुत्वं न त्वन्यतरस्य गगरी
त्यादि च घट इति पदस्यैवापभ्रंश इति न ततः सुः गगरीमित्यादि प्रयुञ्जते चेति केचित् परे तु साध्वनुशासनेऽत्र शास्त्रे इ
ति भाष्योक्तेरर्थवत्त्वेन साधूनामेव संज्ञाविधावुद्देश्यत्वमिति नासाधुषु प्रातिपदिकसंज्ञा· यर्वाणस्तर्वाण इत्यादौ सुबप्य
साधुरेव· अत एव परश्चेति सूत्रे भाष्ये किमस्य हृयसमित्यसाधुः वृत्तिजसादृश्येऽप्यवृत्तिजत्वादित्युक्तम्· प्रकृत्युद्देशेने
व प्रत्ययानां विधानात्केवलानामसाधुत्वं बोध्यते· तत्र वृत्तिजसदृशत्वात्कश्चित्साधुरिति भ्राम्येदिति प्रत्ययः पर एवे
ति नियमेनाप्यसाधुत्वमुक्तं भाष्ये। अर्थतः शब्दतश्च यः प्रत्ययजातीयः स पर एवेत्यर्थेनासाधुत्वं बोध्यते· एवं च शास्त्र
विहितत्वाभावादमोप्यसाधुत्वमित्युक्तप्रायम्· अग्रेऽस्वशब्दस्यासाधुत्वमुक्तमन्यत्र· अत एव प्रकृतिपर एव प्रत्य
यः प्रत्ययपरैव प्रकृ[illegible]कारो दर्शितो भाष्ये· साधूनामेव प्रत्ययविधावुद्देश्यत्वेन प्रकृतित्वम्। स्वण्डसा·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धुत्वबोधनद्वा[illegible]व्याकरणमर्थवत्त्वबोधनवत्· एवञ्च भाषानुसारेण क्रियमाणानामोत्तरं विभक्तिर[illegible]साधुरित्याहुः। ननु साधुत्वस्य जातित्वेकत्वादिना सङ्कर इति चेन्न· ययोर्जात्योः परस्परासामानाधिकरण्येनैव सिद्धिः परस्परसमाश्रयभेदकता च लोकसिद्धा तयोः साङ्कर्यस्यैवदोषत्वात्· आश्रययोर्भेदभङ्ग एव हि साङ्कर्यदूषकताबीजम् तादृशजात्योर्यत्र साङ्कर्यप्रसङ्गस्तत्रोभयवैलक्षण्यं स्वीकार्यम्· यथा नृसिंहः स्वतरो वा· ययोस्तु सामानाधिकरण्येन सिद्धिस्तयोः साङ्कर्यस्य व्याप्यव्यापकभावान्न जात्योः साङ्कर्यस्यैवादोषत्वात्· एवं च साङ्कर्यमुपाध्योरपि दोषाय यदि तत्रापि आश्रयभेदभङ्गप्रसङ्ग इति स्पष्टम्· श्रीहर्षकृतखण्डने ननु साङ्कर्यस्य सर्वथा जात्यभावकल्पकत्वं मानाभावात्· एवं च भूतत्वमूर्तत्वे पृथिवीत्वशरीरत्वे च जातिरूप एव· क्रियासमवायिकारणतावच्छेदकतया मूर्तत्वादेरिव भूतादिपदशक्यतावच्छेदकतया भूतत्वादेरपि जातित्वात्· न हि कारणतावच्छेदकतयैव जातिसिद्धिर्न शक्यतावच्छेदकतयेति राजाज्ञास्तीति दिक्· देशभाषानुसारेण कृतानां कुर्चीमस्त्री अप्पिकोण्डेत्यादिनाम्नामसाधुत्वमेव। टिघुभादिसंज्ञानां तु शिष्टप्रयुक्तत्वात्साधुत्वमेव· सर्वशब्दानां सर्वार्थवाचकत्वेऽपि वृद्धिरादैजित्यादीनामज्ञातशक्तिज्ञापकसङ्केतरूपतया विधित्वमेव· यत्तु व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्नित्य एव तु संबन्धो डित्यादिघुगवादिवत्· वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्तः

CC-0. In Public Domain. Digitization by eGangotri

वच्छेदलक्षणः।अकृत्रिमोभिसंबन्धोविशेषणविशेष्यवदितितत्तुतत्रसङ्केतेकृतेतत्संकेतज्ञानरूपप्रकरणवशात्तस्यैवोपस्थि
तिर्नान्यस्येतिफलितनियमपरंतदेतद्विशेषणविशेष्यवद् इत्यनेनसूचितम्· यथानीलोघटइत्यनेनविद्यमानएवघटेनील
संबन्धःपुरुषेणबोध्यतेनतुतेननीलादियोगःक्रियतेनीलएवनपीतइतिनियमश्चफलतितद्वदित्यर्थात् पाणिन्युपदे
शादिरूपसङ्केतग्राह्यत्वात्तत्संज्ञात्वस्यसंज्ञानामनित्यत्वव्यवहारोपि· वाचकताबोधकत्वेपितद्वदुत्पादकत्वान्नशब्दा
र्थसम्बन्धनित्यताहानिःतेष्वेववृद्धिपदवाच्यत्वोपदेशेवक्त्रिच्छायाएवनियामकत्वाद्यदृच्छाशब्दत्वव्यवहारःस्वेच्छयासं
ज्ञाःक्रियन्त[illegible]चव्यवहारः। वेदमात्रप्रसिद्धशब्दभिन्नत्वरूपलौकिकत्वादुक्तरीत्यासाधुत्वाच्चतेषांशास्त्रविषयता·स्पष्टं
चेदंसर्वमृ[illegible]कसूत्रेभाष्ये· किंचसर्वेषांसर्वार्थवाचकत्वमस्माभिर्दुर्ज्ञेयंविशिष्यसकलार्थशब्दज्ञानाभावात्·सामान्यज्ञानंतु
नबोधोपयोगि· योगिदृष्ट्यातुतथाव्यवहारःशास्त्रे इत्यन्यत्रविस्तरः। देशभाषांनुसारेणक्रिय
माणानु[illegible]मैः सूक्तवाकादौसंकल्पादौचोल्लेखस्तुबर्बराणांभ्रान्त्यैव तस्माद्घोषवदाद्यन्तरन्तस्थंद्व्यक्षरंचतुरक्षरंवानाम
कृतंकुर्यान्नतद्धित[illegible]मेवसाधुनातदुचितम्· किंचाश्व्यादिनक्षत्रदेवताउक्तानक्षत्रदेवताएताएताभि
र्यज्ञकर्[illegible]जंस्मृतमितिवेदाङ्ग·ज्योतिषोक्तेननक्षत्रनामचतदुपयोगिनामकरणेनाक्षत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नामनक्षत्रपादाक्षरादि[illegible]गृह्यपरिशिष्टे चक्रचिन्तथैवोक्तम्। एतदेव नामकर्मप्रकरणे नाक्षत्रं नाम च निर्दि
शतीति तद्रहस्यं भवतीत्यापस्तम्बेनोक्तम्। तदेकवाभिवादनीयं च समीक्षेत तन्मातापितरौ विद्यातामोपनयनादित्याश्वलायनेनो
क्तमेवमेव नामकरणे वृद्धशिष्टानामाचारो लेखस्य· अतएव ज्योतिषे यज्ञकर्मणीत्युक्तम्· तत्तन्नक्षत्रवाचकेभ्यो जातार्थ
प्रत्यये निष्पन्नं तत्तन्नक्षत्रजं नामेति केचित्· तत्र पुत्रस्य नाम गृह्णाति रौहिणायतिष्यायेति बोधायनसूत्रं मूलम्· यस्त्व
सावसा।वित्वादिस्य नामानीत्याश्वलायनेनोक्तं तत्तु सन्दिग्धम्· यद्यपि देवत्रातेनानुराधो देवदत्त इति प्रयोक्तव्यमित्युक्त
म्· तत्र सूत्राक्षरानुग्रहश्चिन्त्यः। शाङ्खायनादयश्च ज्योतिषोक्तमेवाद्रियन्ते। इदानीमाश्वलायनदेवत्रातोक्त्या निर्दिशेद्य
जमानस्य नाम सांव्यवहारिकम्। नाक्षत्रं च यथा कृष्णशर्मा रौहिण इत्यपीत्याश्वलायनश्रौतकारिकोक्त्या च तथैवाचरन्ति
नामकरणेपि तदेव नाक्षत्रनामेति च वदन्ति· परन्तु बौधायनादिवाक्ये रौहिणादिपदं तत्तन्नक्षत्रजातत्वेन तत्तद्देवताना
मोपलक्षणम्। एवं हि ज्योतिषेण तेषामेकमूलकल्पनालाघवं भवति विकल्पस्यानौचित्याच्च· संज्ञापर्यायनामशब्देन पाचका
दिशब्दवत् केवलयौगिकश्रवणादिशब्दानां ग्रहीतुमनौचित्याच्चाभिवादनंप्रयोजनमस्येत्यर्थकाभिवादनीयशब्देन तस्य
वक्तुमशक्यत्वाच्च· तस्यसाधारणत्वादित्याहुः अत्र तत्त्वं महान्तो विदांकुर्वन्तु· यत्तु कुर्वीमन्वीत्याशीनांसाध्वसाधुबहिर्भू

CC-0. In Public Domain. Digitization by eGangotri

तत्वं शास्त्रविषयता चेति तन्न· तृतीयकोटेरभावात्· एवंविधेभ्योन्यत्र शास्त्रविषयेषु साध्वसाधुबहिर्भावस्य काप्यदृष्टत्वाच्च· अत एव ऋलृक्सूत्रे लृकारोपदेशे प्रयोजनं यदृच्छाशब्दे दध्लृतकाय देहीत्युक्त्वा न्याय्यस्य ऋतकशब्दस्याभावात्· तस्यैव संज्ञात्वं न्याय्यं न त्वस्येत्यादिनास्यासाधुत्वाच्छास्त्राविषयत्वेन परिहृतम्· न्याय्यस्येत्यस्य शास्त्रबोधितस्य शिष्टप्रयुक्तस्य चेत्यर्थः। यद्यपि समाने प्रवृत्तिनिमित्तेन्वाख्यातोनन्वाख्यातस्य निवर्तको भवति यथा देवदत्तशब्दो देवदिण्णशब्दं निवर्त्तयति न गाव्यादीनिति भाष्येण ऋतकस्य शास्त्रसिद्धत्वेपि क्रियाप्रवृत्तिनिमित्तकत्वेन लृतकशब्दस्य शब्दप्रवृत्तिनिमित्तकस्य भिन्नार्थकस्यास्य नासाधुत्वबोधनं लभ्यते· तथापि शिष्टाप्रयुक्तत्वेनैवास्यासाधुत्वं कैयटेनोक्तम् स्वीकृतं च [illegible]स्त्रान्विता नाम पिबन्तीत्यादीनां शिष्टप्रयुक्तत्वे न वासाधुत्वं सर्वैः। ततः पक्षान्तरैरपि परिहारा भवन्तीत्याशयेन त्रयी शब्दानां प्रवृत्तिर्न सन्ति यदृच्छाशब्दा इत्यादिना परिहारान्तरमुक्तं तत्रासाधुत्वशास्त्राविषयत्वं च स्पष्टमेव· एवं चैतत्पक्षे[illegible]वाक्यतया आद्येपि तत्त्वमेवोचितम्· एकस्यैव पक्षभेदेन शास्त्रविषयत्वतद्विषयत्वयोर्नवेति सूत्रे भाष्ये तिरस्काराच्च· किंचैवं सा[illegible]णव्यञ्जुतानापत्तिः साध्वनुशासने शास्त्र इत्यादिभाष्यासङ्गतिश्चेति दिक्· एवं च भाषाशब्दा[illegible]यवदप्रयोगाद्व्याकरणलक्षणाननुगमाच्चासाधुत्वेनार्थकत्वेपि न शास्त्रविषयत्वमिति न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्र प्रातिपदिकत्वमित्यन्यत्रावस्तरः। शक्तिस्त्रिधा· रूढिर्योगो योगरूढिश्च शास्त्रकृत् कल्पितावयवार्थाप्रतीतौ यदर्थ-
निरूपितं प्रकृतिप्रत्ययसमुदायमात्रे बोधकत्वं तत्पदे स्मातदर्थनिरूपिता रूढिः। यथा मणिनूपुरादौ॥ शास्त्रकल्पिताव-
यवार्थमात्रबोधे योगशक्ति यथा पाचकादौ· अश्वगन्धादिपदमौषधिविशेषबोधे रूढम् अश्वसंबन्धवत्तया वाजिशाला-
बोधे यौगिकमिदं यौगिकरूढमित्युच्यते· रूढिर्योगापहारिणीति तु प्रकरणाद्यभावे बोध्यम्· यत्र मण्डपपदादिभ्यो मण्डपा-
नकर्त्रादेरूढ्यर्थमण्डपादिगुणवत्त्वेन बोधस्तत्र प्रथमप्रतीतरूढिविषयमुख्यार्थत्यागेन योगाद्रूढिपूर्वकलक्षणा या-
बलवत्त्वेन लक्षणयैव बोधः· यत्र शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपितं समुदाये बोधकत्वं सा योगरूढिः। य-
था पङ्कजादिपदे तत्र पङ्कजनिकर्तृ पद्ममिति बोधात् पद्मस्यानुपपत्तिप्रतिसन्धानं संबन्धप्रतिसन्धानं च विना बोधान्न तत्र
लक्षणावसरः। क्वचित्तात्पर्यग्राहकवशात् केवलरूढ्यर्थस्य केवलयोगार्थस्य च बोधः· भूमौ पङ्कजमुत्पन्नं कल्हारकेरवमु-
खेष्वपि पङ्कजेषु इत्यादौ समृ[illegible]दिति सूत्रे भाष्ये सेषा शक्तिः संयोगादिभिर्नानार्थशब्दे तु नियम्यते· तदुक्तं हरिणा· सं-
योगो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिः
स्वरादयः। शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव इति· एते संयोगादयः शब्दार्थस्यानवच्छेदे सन्देहे तदपाकरणद्वारे

नृ॰ मं॰
१२

णविशेषस्मृतिहेतवो निर्णयहेतव इत्यर्थः। उपस्थितानामनेकेषामेकतरमात्रार्थतात्पर्यनिर्णयद्वारा तन्मात्रार्थवि
षयकान्वयबोधजनका इति भावः। संख्यासंज्ञासूत्रे भाष्ये पि स्फुटमेतत्। अत्र सामर्थ्यमेवैकं मुख्यं निर्णायकं संयो
गादयस्तद्व्यञ्जकप्रपञ्चरूपाः सामर्थ्यस्यैवाभिव्यक्तेरिति परे। सवत्सा धेनुरवत्सा धेनुरिति संसर्गविप्रयोगयोरुदाहरणे
रामलक्ष्मणावित्यादौ साहचर्येणोभयोर्युगपदेव नियमनमिति नान्योन्याश्रयः। साहचर्यं च सादृश्यं सदृशयोरेव सह
प्रयोगनियमात्। रामार्जुनगतिस्तयोरित्यत्र विरोधेन तद्ऽञ्जलिना जुहोति। अञ्जलिना सूर्यमुपतिष्ठत इत्यत्र जुहोत्या
दिपदार्थवशादञ्जलिपदस्य तत्तदाकाराञ्जलिपरत्वं। सैंधवमानयेत्यादौ प्रकरणेन तत्। अक्ताः शर्करा उपदधातीत्या
दौ तेजो वै घृतमिति वै घृतस्तुतिरूपाल्लिङ्गादक्ता इत्यस्य घृतसाधनाञ्जनपरत्वम्। रामो जामदग्न्यपदसन्निधानेन रामः पर
शुरामः। अभिरूपाय कन्या देयेत्यादौ अभिरूपतरायेति सामर्थ्यात्प्रतीयते। यश्च निम्बं परशुना इत्यादौ औचित्यात्परशुने
त्यस्य च्छेदनार्थत्वं भात्यत्र परमेश्वर इत्यत्र राजधानीरूपाद्देशात्परमेश्वरपदं राजबोधकं चित्रभानुर्भातीत्यादौ रात्राव
ग्नौ दिवा सूर्ये व्यक्तिः लिङ्गं मित्रो भाति मित्रं भाति। अत्राद्ये सूर्योऽन्ते सुहृत्। स्थूलपृषतीमित्यादौ स्वरात्तत्पुरुषबहुव्रीह्यर्थ
निर्णयः। आदिन [illegible] सुसिक्तमित्यादौ पूजार्थः सुः कर्मप्रवचनीयः सुषिक्तमित्यत्रोपसर्गोन्यार्थः। प्रणा

राम·
१२

यकेप्रणायनक्रियाकर्त्तणत्वात्· प्रनायकेप्रगतनायकदेशबोध इति पुञ्जराजः। क्वचित्लाक्षणिकार्थबोधोत्तरं वक्तृबोद्धव्यवै
शिष्ट्यप्रतिभादिसहकारेण द्वितीयार्थबोधोऽपि· यथाशालकादिप्रयुक्तात्स्मरभिमांसमित्यादेर्द्वितीयाश्लीलार्थबोधः। ननु स
र्वेषां सर्वार्थवाचकत्वलक्षणोच्छेद इति चेन्न· योगिनां सर्वार्थवाचकत्वज्ञानेऽपि अस्मदादीनां तदभावात्· किंचान्वयाद्यनुपप
त्तिज्ञानपूर्वकं शक्यत्वेन गृहीतार्थसंबन्धज्ञानेनोद्बुद्धशक्तिसंस्कारतो बोधे लक्षणेति व्यवहारः तच्छक्तिसंस्कारश्चेह शक्यस्थले ज
न्मान्तरीयोऽपि· वस्तुतस्तात्पर्यानुपपत्तिरेव बीजम्· अन्यथा गङ्गायां घोष इत्यादौ घोषादिपदे एव मकरादिलक्षणापत्तिस्ता
वताप्यन्वयानुपपत्तिपरिहारात्· एवं रूढिप्रयोजनान्यतरदपि तत्कारणमनुभवबलात्· अत्रेदम्बोध्यम्· शक्त्यार्थोपस्थितौ त
द्विषयकान्वयबोधे जाते तस्मिन् वक्तृतात्पर्याविषयत्वेनाप्रामाण्यग्रहे तदितरत्र वक्तृतात्पर्यग्रहे च सति लाक्षणिकार्थबोधः।
शक्यार्थान्वयबोधं विना तत्र तात्पर्याविषयत्वग्रहासंभवात्· संसर्गविषयकज्ञानस्यैवान्वयबोधत्वात्· प्रसिद्धनानार्थविषयक
बोधजनकत्वमेव नानार्थत्वमिति नातिप्रसक्तं नानार्थत्वम्· संबन्धज्ञानं तीरसंबन्धिप्रवाहबोधकमिदमिति गङ्गापदशक्यप्र
वाहसंबन्धितीरमिति वा· संबन्ध एव लक्षणेत्यन्ये· अत्र पक्षेऽपि संयोगसंयुक्तवृत्तित्वरूपसंबन्धद्वयरूपा एका लक्षणा लक्षणे
जातावेकवचनम्। एवञ्च लक्ष्यतावच्छेदकेऽपि लक्षणा भवत्येवेति बोध्यम्· विशेषणे संयोगारोपो वा· लक्ष्यतावच्छेदकेन ल

क्षणा· उभाभ्यामनारोपितैकसंबन्धासंभवात् विशेष्यगतसंबन्धज्ञानस्य लक्ष्यतावच्छेदकप्रकारकलक्ष्यबुद्धित्वं कार्यतावच्छेदकमित्यलक्ष्यस्यैव तस्य भानमित्यन्ये· तादृशसंबन्धज्ञानजन्या तदुपस्थितिरेव लक्षणा स्वविषयसंबन्धवाचकत्वे नैषा पदनिष्ठा· वृत्तित्वंतु शाब्दबोधजनकपदपदार्थसंबन्धत्वमिति परे· तन्मतेपि स्फुटमेव लक्ष्यतावच्छेदके लक्षणा-पदादपि शाब्दबोध एव नतु स्मृतिरिति तेषामाशयः। यत्र कमलानि कमलानीत्यादौ सौरभविशिष्टकमलबोधस्तत्रापि विशिष्टे लक्षणा· सा द्विधा· गौणी शुद्धा च· स्वनिरूपितसादृश्याधिकरणत्वसंबन्धेन शक्यसंबन्ध्यर्थप्रतिपादिका गौणी तदतिरिक्तसंबन्धेन तत्प्रतिपादिका शुद्धा· प्रकारान्तरेणापि सा द्विधाऽजहत्स्वार्था जहत्स्वार्था च· शक्यार्थापरित्यागेनेतरार्थलक्षणमाद्या· तदपरित्यागश्च शक्यार्थस्य येनकेनापि रूपेण लक्ष्यार्थान्वयिनान्वयित्वम्· तेन च्छत्रिणो यान्ति कुन्तान् प्रवेशय काकेभ्यो दधि रक्ष्यतामित्यादौ न दोषः अच्छत्र्यादिसाधारणरूपेण च्छत्र्यादेः कुन्तवद्विशेषणतया कुन्तानां दध्युपघातकतया काकादेश्च लक्ष्यार्थान्वयिक्रियाविशेषणत्वात् स्वार्थपरित्यागेनेतरार्थलक्षणमन्त्या· तत्परित्यागश्च· शक्यार्थस्य येनकेनापि रूपेण लक्ष्यार्थान्वयिनाऽनन्वयित्वमतो गां वाहीकं पश्येत्यादौ न दोषः। अत्र गोसदृशे लक्षणायामपि न गोस्तदन्वयिदर्शनक्रियान्वयित्वम्· एवं रीत्याऽन्येपि प्रकारा ऊह्याः त्वगादिशब्दानां त्वचाज्ञानमित्यादौ त्वगिन्द्रिये

निरूढलक्षणा· असति प्रयोजने शक्यार्थबाधप्रतिसन्धानपूर्वकं तत्संबन्ध्यपदार्थबोधे निरूढलक्षणेति व्यवहारोऽन्यथा॰
रूढिशक्तिरेवेति बोध्यम्· प्रयोजनवती तु कुन्ताः प्रविशन्तीत्यत्र भीतिपलायनान्वाक्ये कुन्तानां तात्पर्यविषयकुन्तिप्रवे
शः न्वयबाधात्कुन्तपदस्य तत्संयुक्तपुरुषे लक्षणा कुन्तगततैक्ष्ण्यप्रतीतिः प्रयोजनम्। गङ्गायां घोष इत्यत्र प्रवाहे घोषा
धिकरणत्वबाधात् गङ्गापदेन स्वसंबन्धितीरं लक्ष्यते। गङ्गागतशैत्यपावनत्वप्रतीतिः प्रयोजनम्। गौर्वाहीक इत्यत्र गोसा
दृश्यं लक्ष्यतावच्छेदकं गवाभेदप्रत्ययः फलम् व्यञ्जनाजन्यबोधे बाधज्ञानस्याप्रतिबन्धकत्वात्। एष चाहार्यः शब्दज
न्यभेदकधर्मोपस्थितिकालिकत्वात्। लक्ष्ये गङ्गायां घोष इत्यादौ च गङ्गागतशैत्यादिप्रतीतये मध्ये तीरादौ गङ्गाभेदप्र
तीतिः उपकृतं बहु नामेत्यादौ लक्ष्येऽपकारे उपकाराभेदप्रतीतिद्वारैव साधुत्वं व्यङ्ग्यम्। केचित्तु गौर्वाहीक इत्यादौ साधारण
धर्मोऽप्ययोजडादिर्जडत्वेन लक्ष्यस्तत्र गवाभेदप्रतीतिद्वारा गोवृत्त्यसाधारणजडत्वप्रतीतिः फलम्· न च गौर्वाहीको ज
ड इत्यादौ पौनरुक्त्यम्· लक्ष्यतावच्छेदकान्तरव्युदासे तस्य तात्पर्यात्· सदृशत्वेन लक्षणेति वादिनापि सादृश्यस्य विशि
ष्य साधारणधर्मप्रतीतिं विना पर्यवसानाभावेन प्रसिद्ध्यादिना तत्पर्यवसानं वाच्यमित्यन्यथानुपपत्त्या प्रस्तुतायां लक्षणा
याः साधारणधर्मविशिष्टे एवौचित्यात्· एतेन गौर्वाहीक इत्यादौ गोशब्देन स्वशक्यगतजाड्यादिगुणसदृशजाड्याद

CC-0. In Public Domain. Digitization by eGangotri

यएवलक्ष्यन्ते तैरस्वजातिशक्तिनये व्यक्तिलाभवत् स्वाश्रयव्यक्तिलाभ इतिपरास्तमित्याहुः।ग्रामो दग्धः पुष्पितं वनमित्या
दौदग्धादिपदानि अर्शआद्यजन्तानीत्यर्थवत्सूत्रभाष्योक्तेस्तत्रलक्षणैव नेति बोध्यम्· ईदृशेषुजहदजहल्लक्षणेत्यन्ये·के
चित्तु ज्ञाप्यसंबन्धेनोद्बुद्धशक्तिसंस्कारतो बोधे लक्षणा। गम्भीरायांनद्यांघोषइत्याद्यनुरोधात्· तथाहिनतावद्गम्भी
रपदं तीरलक्षकं नद्यामित्यनन्वयापत्तेः नहितीरंनदी· अतएववनदीपदेपि गम्भीरे पदार्थानन्वयात्· नहितीरं गम्भी
रम्· नचपदद्वये प्रत्येकंसाविशिष्टनदीतीराप्राप्तिप्रसङ्गात्· नचनदीपदे गम्भीरनदीतीरे लक्षके गम्भीरपदन्तात्पर्यग्रा
हकमितिवाच्यम् विनिगमनाविरहात्· नचनदीपदस्य द्रव्यवाचकतया साक्षात्संबन्धानुरोधेन तत्रैव सेतिवाच्यम्·गम्भी
रपदस्यापि नित्यगुणिवाचकतया तेनापि साक्षात्संबन्धस्यैवसत्वात्·अतः समुदाये साङ्गीकार्या अतएवार्थवादवाक्या
नांप्राशस्त्ये लक्षणासिद्धिः। अपभ्रंशेष्वपि लक्षणैव· अतएव लक्ष्यस्य व्यञ्जकतायां साहेत्तीलाद्युदाहरणंप्रकाश
कारैर्दत्तम् तस्यापि शक्तत्वाच्च ज्ञापकत्वं चार्थबोधकता पर्याप्त्यधिकरणत्वमिति न प्रत्येकं वर्णेषु सा· लक्ष्यतावच्छे
दकत्ववल्लक्षकतावच्छेदत्वस्यापि गुरुभूतायां पदघटितानुपूर्व्यां स्वीकारे बाधकाभावः ज्ञापकताशरीरे ज्ञानं च शा
ब्दबोधरूपमेवनिविष्टमिति न शब्दसमवायेन घटादिपदज्ञाप्याकाशस्य शक्तिं विनाप्युपस्थितस्य शाब्दविषयत्वम्।अत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवञ्छत्रिणो यान्तीत्यादौ छत्रिपदस्यैकसार्थवाहित्वेन छत्र्यच्छत्रिसमुदाये लक्षणेति समासादिवृत्तौ विशिष्टशक्तिमनङ्गीकुर्वन्तोपि वृद्धा आहुः। परे तु आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे व्यक्तिविशेषबोधे वा लक्षणेति व्यवहारः। छत्रिणो यान्तीत्यादावच्छत्रिषु सहचर्याच्छत्रित्वारोपः काकेभ्यो दधीत्यादावपि दध्युपघातकमात्रे काकत्वारोपः कमलानि कमलानीत्यादौ कमलत्वेनैव व्यक्तिविशेषबोधः त्वामस्मि वच्मीत्यादौ सम्बोध्यत्वादिनैवोपदेश्यत्वाद्यवस्थाविशिष्ट तत्तद्व्यक्तिविशेषबोधो लक्षणया· अत्र पौनरुक्त्याद्विशेषणानाधायकत्वाद्वा तात्पर्यानुपपत्तिः सामान्यविशेषभावः संबन्धः अत एव पुंयोगादाख्यायामिति सूत्रे भाष्ये गोपीत्यादौ गोपसंबन्धिस्त्रीत्वेन लक्षणायां तस्येदमिति शास्त्रेण तादृशोऽर्थेऽणप्रत्ययान्तस्यैव तादृशवाक्यस्यैव वा साधुत्वनियमाद साधुत्वापत्तिदूषणमभिसंधायनावश्यमयमेवाभिसंबन्धो भवति तस्येदमिति किंतु तन्मूलकः सोयमित्यप्यभिसंबन्धोऽस्तीतीत्युक्तं चतुर्भिः प्रकारैरतस्मिन् स इत्येतद्भवति तात्स्थ्यात्ताद्धर्म्यात्तत्सामीप्यात्तत्साहचर्यात् मञ्चा हसन्ति सिंहो माणवको गङ्गायां घोषो यष्टीः प्रवेशयेत्युक्तम्। सोयमित्यपीत्यादेः सोयमित्यपि विशेषणविशेष्यभावोस्तीत्यर्थः न च गङ्गायां घोष इत्यादावारोपितगङ्गात्वेन बोधेपि तस्य ज्ञानस्य भ्रमत्वाच्छास्त्रज्ञानवतां सर्वथा भ्रमत्वेन ग्रहाच्च तदुत्तरं गङ्गाग

ल· मं· तशैत्यपावनत्वादिप्रतीतिरूपं फलं न सिद्ध्येत्· अत एव शुक्तौ रजतज्ञाने भ्रमत्वज्ञानवतो न प्रवृत्तिरिति वाच्यम्· मध्ये
१५ व्यञ्जनया मुख्यगङ्गापदार्थाभेदस्यापि प्रतीतेः व्यञ्जनाजन्यज्ञाने च बाधज्ञानेन नाप्रामाण्यग्रह इत्यदोषात् वस्तुत
स्तु शक्त्यानुपपत्तिमूलकारोपितार्थबोधे बाधज्ञानेन नाप्रामाण्यग्रहो जन्यते· अत एव पचतीत्यादिजबोधेनाप्रा
माण्यग्रहः तथा सत्यनुपपत्तिपरिहाराभावादित्यग्रे निरूपयिष्यामः· कुन्ताः प्रविशन्तीत्यादौ कुन्तसंयोगविशिष्टपु
रुषाणां कुन्तत्वेन प्रतीतिरिति अजहत्स्वार्थत्वोपपत्तिः कैयटोक्ताहारोप्यते तादूप्यं न तु मुख्यं· गलेषु मञ्चत्वारोपा
न्मञ्चपदप्रवृत्तिर्हि सन्तीति पदान्तरप्रयोगाद्विज्ञायते इति शक्यादन्येन रूपेण ज्ञाने भवति लक्षणेति तु कस्यचित्समा
दोक्तिः यद्वा शक्यतावच्छेदकान्यरूपवत्त्वेन गृहीतेऽर्थे लक्षणा शक्यतावच्छेदकारोप इति तदर्थः यथा तीरत्वविशि राम·
ष्टस्य गङ्गात्वेन बोध इति· अत एव गङ्गायां मीनघोषौ स्त इत्याद्युपपद्यते अन्यथा द्वन्द्वाद्यर्थस्यैकधर्मावच्छिन्नेन्वयस्य
तादृशस्य द्वन्द्वार्थेन्वयस्यैवाजां ग्रामं नयति· अजाविधनौ देवदत्तयज्ञदत्तावित्यादौ यथासंख्यान्वये द्वन्द्ववारणाय पयः
पयो न सतीत्यादावेकशेषवारणाय चावश्यकत्वेन प्रतीत्यान्वमीनस्य तीरत्वावच्छिन्नेन्वयेन घोषस्य तीरत्वावच्छि
न्नेन्वयेन द्वन्द्वोः साधुः स्यात्· मम तु गङ्गात्वेनैव तीरबोधादेकधर्मावच्छिन्नेन्वयसत्त्वे न नक्षतिः युगपद्वृत्तिद्वयविरोधो १५

व्यत एव न दोषाय दूषकताबीजाभावाच्चान्वयानुपपत्त्या च युगपदेव गङ्गात्वेनैव नीरतीरयोरुपस्थितिः काकेभ्यो द
धीत्यादावप्येवमेवाग्रेतमोप्याह। सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मण
बालकटराजसक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावेपि तदुपचार इति तस्य भावः। तद्धर्मस्तदभावेपि तदुपचारः त
च्छब्दव्यवहार इत्यर्थः स च तद्धर्मारोपेण आरोपनिमित्तानि च सहचरणादीनि यष्टीः प्रवेशय मञ्चाः क्रोशन्ति वीरणेष्वा
स्तेऽयं राजा यमः प्रस्थः सक्तुः चन्दनं तुला गङ्गायां घोषः कृष्णः शकटः अन्नं प्राणाः अयं कुलस्य राजेत्युदाहरणानि क्र
मेण यष्टित्वारोपो ब्राह्मणे साहचर्यात्। मञ्चत्वारोपो बालेषु तात्स्थ्यात् कटेषु वीरणत्वारोपस्तादर्थ्यात्। राज्ञि यम
त्वारोपो वृत्तात् सक्तौ प्रस्थत्वारोपस्तन्मानकत्वात् चन्दने तुलात्वस्यारोपः। तद्धार्यत्वात् गङ्गायां तीरधर्माधार ८
त्वारोपस्तत्सामीप्यात् कृष्णगुणयोगाच्छकटे तद्धर्मकृष्णत्वारोपः। प्राणसाधनत्वादन्ने प्राणत्वारोपः कुलाधिप ८
त्येन पुरुषे राजत्वारोप इति तद्व्याख्यातारः। न्यायवार्त्तिककारोपि साहचर्येणामुं यष्टिकया सम्बन्धस्तत्संबन्धात्तु यष्टिकावा
नित्येतस्मान्नतु यष्टिकेति। यष्टिकावानिति तु मुख्य एव तस्मादुपचारबीजमन्यद्वक्तव्यम्। उच्यते। यष्टिकायां तावदयं यष्टिकाशब्दो यष्टि
कात्वजातिनिमित्तकस्तत्र संयुक्तसमवेतां जातिं ब्राह्मणे समवायेनाध्यारोप्य ब्राह्मणं यष्टिकेत्याहेत्याह। गौर्वाहीक इ ८८

मं· स्याद्वापि सा धारणधर्मजडत्वादिरूपेण निमित्तेन वाहीकस्यारोपितगोत्वेन बोधस्ततो व्यञ्जनया मुख्यगवाभेदप्र
१६ तीतिः प्रयोजनं। न तत एव चमत्कारः। आद्यबोधेन तु न चमत्कारः। तस्मिन् भ्रमत्वज्ञानात्। अत एव गौर्वाहीको ज
ड इत्यादौ न पौनरुक्त्यं लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणतेत्यस्य यद्गुणज्ञानपूर्वके वाहीके गोशब्दप्रयोगस्तेज्ञा
पमानगुणैर्योगात्तद्गुणारूपात्संबन्धादित्यर्थः। प्रकृत्यादित्वात्तृतीया। यत्तु प्रथमत एव तत्र नामार्थयोरभेदबोधो
बाधज्ञानस्यानुपपत्तिजलक्षणाजन्यशाब्दबोधेऽप्रामाण्यग्रहजनकत्वस्याभावात्। भावप्रधानो निर्देश इत्य
स्याप्ययमेवार्थः। घटादिपदप्रवृत्तिनिमित्तस्य घटत्वादेस्तत्रैवाभेदसंबन्धेनाहार्यारोपात्। घटत्वादिप्रकारकघट
त्वादिबोधो घटादिशब्दाल्लक्षणयेति। अन्नं प्राणाश्चन्दनं तुलेत्यादावाहार्यारोपस्यैव लक्षणत्वादिति बोध्यम्।
व्रीहीन्प्रोक्षतीत्यादावपूर्वसाधनीभूतव्यक्तीनामेव तात्पर्यवशाद्व्रीहिपदेन व्रीहित्वेन भानम्। एवं तत्प्रतिनि
धिष्वपि व्रीहित्वमारोप्य व्रीहित्वेनैव तात्पर्यवशादपूर्वसाधनीभूततत्प्रतिनिधिव्यक्तीनां भानेन तत्त्वपूर्वसाधन राम
त्वेन भानम्। अत्र सर्वत्र तत्तद्धर्मविशिष्टे शक्यतावच्छेदकधर्मारोपः। अत एव वकं चेतरस्य स्यति वदनमित्या
दौ कचत्वादिना राहुत्वादिविशिष्टस्य बोधात्तत्रासाध्वन्वयानुपपत्तिः। हरिरप्याह। एकमाहुरनेकार्थं शब्दमन्ये १६

परीक्षकाः। निमित्तभेदादेकस्य सार्वार्थ्यं तस्य भिद्यते· सर्वशक्तेस्तस्यैव शब्दस्यानेकधर्मणः प्रसिद्धिभेदाद्गौणत्वं मुख्य
त्वं चोपचर्यते इति· गौणमुख्यार्थबोधकः शब्द एक एव· युगपत्सर्वार्थप्रकाशनं तु न· प्रकरणादिरूपनिमित्तभेदात्· सर्व
शक्तेरित्यस्य व्याख्यानमनेकधर्मण इति· गोशब्दो गोजातौ प्रसिद्ध इति तत्र मुख्यः वाहीके त्वप्रसिद्ध्या तत्र गौण इति तद
र्थः। नन्वेवं शब्दार्थसंबन्धस्यानित्यत्वं स्यादत आह· गोत्वानुषङ्गो वाहीके निमित्तात्कैश्चिदिष्यते। अर्थमात्रं विपर्यस्तं शब्दः
स्वार्थे व्यवस्थित इति।। कैश्चित् शब्दार्थसंबन्धनित्यत्ववादिभिः। निमित्ताज्जाड्यादेः शब्दस्तु गोत्वमेवाभिधत्ते· गोरित्यत्र
मुख्यं गोत्वं वाहीके तूपचरितम्। शब्द एव प्रवृत्तिनिमित्तमिति पक्षे· स कदाचिद्गोजातावनुषज्जते कदाचिद्वाहीके इति तन्म
तेपि प्रसिद्ध्यप्रसिद्धिमूलको गौणमुख्यविभागः· अर्थोत्र विशेष्यभूतः स्वार्थे प्रवृत्तिनिमित्ते तदेव शब्दशक्यमिति एकार्थ ए
व शब्द इति तद्भावः· गौर्वाहीक इत्यादौ लक्षणाफलं तु सादृश्यप्रतीतिः मुख्यार्थसाक्षात्संबन्धमूलारोपाद् मुख्यार्थवृत्ति
गुणसमानगुणवत्त्वरूपपरंपरासंबन्धमूलारोपो जघन्य इति गौण्या अतिजघन्यत्वं बोध्यम्· गौण्यामेव च परंपरासंबन्धो
लक्षणाबीजं नान्यत्र· अत एव प्रयोजनं लक्ष्यं संबन्धाभावादि प्रकाशादावुक्तम्· एवं च गवादिशब्दानां व्यञ्जनया जाड्या
दिरूपगुणबोधकत्वाद्गुणवचनत्वेपि ततः प्राग्गुणवचनत्वाभावात्प्रकारे गुणवचनस्येति नि[illegible]मिति न तद्भाष्यविरोधः।

गङ्गायां घोष इत्यादौ गङ्गादिभिर्घोषस्यात्यन्तसामीप्ये गङ्गादौ तीरधर्माधारत्वारोपो गौतमोक्तः गङ्गादिना घोषस्याव्यव
हितसामीप्ये तीरे गङ्गात्वारोपः पतञ्जल्युक्तः आद्योपि स्वरितेनाधिकार इति सूत्रे पतञ्जल्युक्तः। यत्र तु प्रकृतिप्रत्यययो
र्लोपानुशासनं तत्रैवानू गर्गा इत्यादौ प्रकृतिगर्भेर्थे प्रत्ययस्य गर्गापत्यरूपेर्थे प्रकृतेः साधुत्वं लोपानुशासनबलादिति व
दन्ति॥ द्विरेफपदं तु रूढिशक्त्या भ्रमरबोधकमेव यथार्थप्रतीतिस्तु नास्त्येव रथन्तरादिवत्। यद्वा पदनिष्ठरेफद्वयस्या
र्थे आरोपात्संबन्धित्वेनैव भ्रमरबोधः अत एव भ्रमरपर्यायेषु द्विरेफपदस्य कोशेषु पाठः बाधप्रतिसन्धानं विनैव द्विरे-
फपदाद्भ्रमरबोधेन लक्षणेत्ययुक्तम्। किंच द्विरेफपदेन रेफद्वयसंबन्धित्वेन भ्रमरपदोपस्थितावपि भ्रमरेतिशक्ततावच्छेदका
नुपूर्वीरूपेणोपस्थित्यभावाद्बोधानापत्तेः। न च द्विरेफपदाल्लक्षणया तदुपस्थितिरत एवात्र लक्षितलक्षणेति व्यवहारः प्र
त्ययार्थान्वये च प्रकृतिप्रयोज्योपस्थितिः कारणमिति वाच्यम्· एवमपि तस्यानुच्चारितत्वेनोच्चारितस्यैव बोधकत्वेन ततो
बोधानापत्तेः उच्चारितस्यैव बोधकत्वमित्यणुदित्सूत्रे भाष्ये स्पष्टम्· पुस्तकदर्शनस्थलेपि मानसजप इव सूक्ष्मतरताल्वा
दिव्यापारेण सूक्ष्मतरं स्वोच्चारणमस्त्येवेति न दोषः जपे मंत्राणां त्रैस्वर्येणैव ज्ञानस्यावश्यकतया तस्य च तत्तत्स्थानेषूच्च
देशाद्युपलभ्यमानत्वरूपतया सूक्ष्ममुच्चारणमावश्यकमिदमेव च स्मृतिषु मानसमुच्चारणमित्युच्यते। तथा च भारद्वाजः स्व

तके मृतके कुर्य्यात्प्राणायाममन्त्रकम्· तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत्· गायत्रीं सम्यगुच्चार्य्य सूर्य्यायार्घ्यं निवेदयेदिति· किंच मानसजपलक्षणे धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम्· उच्चरेदर्थसंस्मृत्या स उक्तो मानसो जप इत्यस्मिन्नुच्चरेदित्युक्तम्· अतएव ऋगित्युक्ते तात्पर्यवशाद्विशिष्टसन्निवेशाया अग्निमीळे इत्यादिकायास्ततो बोधेपि ततो नार्थप्रत्ययः गामानयेत्याहेत्यादावनुकरणे नानुकार्यप्रतीतावपि न ततोर्थबोध इत्यनुभवः किंचातीतानागतानां पदानां वृत्त्यनाश्रयतया वृत्त्याश्रयत्वेन ज्ञानस्य दुरुपपादत्वात्पदेष्वतीतत्वादि चोच्चारणक्रियानाशादिना नष्टत्वमनुत्पन्नत्वं च· नष्टाभिव्यक्तिकत्वमनुत्पन्नाभिव्यक्तिकत्वं वा· यथा च घ्राणेन्द्रियगृहीतस्यैव गन्धस्य सुखादिजनकत्वं न स्मृतस्य यथा च महतः। पटहादिशब्दस्य कर्णपीडाजनकत्वं श्रुतस्यैव न स्मृतस्य तथा पदानां बोधजनकत्वं श्रुतानामेव न यथाकथंचित्प्रतीतानां यथा तत्र सुखादिजनकतावच्छेदकं वैजात्यं न तेषां नान्यतो ग्रहस्तथा प्रकृतेपि· अतएव परोक्षे लिडिति सूत्रे परोक्षे इति न धातोर्विशेषणम्· शब्दरूपस्य तस्य परोक्षत्वासंभवादिति भाष्यकैयटयोरुक्तम्· न च स्वबोध्यपदवाच्यत्वसंबन्धेन द्विरेफपदं लक्षणया भ्रमरं बोधयतीति युक्तम्· अनुपपत्तिप्रतिसंधानं विनापि बोधा[illegible]तिरिक्तः स्थले साक्षात्संबन्धस्यैव लक्षणाबीजत्वाच्चेति दिक्॥ इति लक्षणानिरूपणम्॥ मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्या

CC-0. In Public Domain. Digitization by eGangotri

र्थसंबन्धासंबन्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो व्यञ्जना। अतएव निपातानां द्योतकत्वं स्फोटस्य व्यञ्जकता च हर्यादिभिरुक्ता। द्योतकत्वं च क्वचित्समभिव्याहृतपदीयशक्तिव्यञ्जकत्वमिति वैयाकरणानामप्येतत्स्वीकार आवश्यकः। एषा च शब्दतदर्थपदपदैकदेशवर्णरचनाचेष्टादिषु सर्वत्र तथैवानुभवात्. वक्त्रादिवैशिष्ट्यादिज्ञानं च व्यङ्ग्यविशेषबोधे सहकारीति न सर्वत्र तदपेक्षेत्यन्यत्र विस्तरः॥ ननु कोसौ शक्त्या श्रव्यः शब्दः। न च वर्णाः प्रत्येकं तथा। द्वितीयादिवर्णोच्चारणवैयर्थ्यापत्तेः। नापि संहताः। उच्चरितप्रध्वंसित्वे न यौगपद्यासंभवात्। अभिव्यक्तेरुत्पत्तेर्वा क्षणस्थायित्वात्. क्षणशब्देन तदाधारः कालः मुख्यक्षणस्य प्रत्यक्षायोग्यत्वेन तदवच्छिन्नवर्णस्याप्यप्रत्यक्षत्वापत्तेः। उच्चरितप्रध्वंसित्वं चोच्चारणाधिकरणकालोत्तरकालवृत्तिध्वंसप्रतियोगित्वम्. एवं चायं पूर्वोऽयं पर इति प्रत्यक्षविषयेदंशब्दघटिताभिलापाभिलप्यमानपौर्वापर्यज्ञानस्यैकोयणाचीसाद्युपयोगिनोऽसंभवः। न ह्यस्य प्रत्यक्षविषयेदमापरामर्शायोगात्. पदप्रत्यक्षस्याप्येवं क्रमावगाहिन एव परः सन्निकर्ष इति सूत्रोक्तरीत्याभाव्यक्तेरनुभवसिद्धस्यानुपपत्तिः। न च पूर्ववर्णस्थितिकाले द्वितीयवर्णोत्पत्तिः। पूर्ववर्णनाशोत्तरं यत्नान्तरेण वर्णान्तरोत्पत्तेः। या च ककारे वाग्वर्तते न तावदौकारे इति येनैव यत्नेनैको वर्ण उच्चार्यते तेनैवविच्छिन्ने तस्मिन्वर्ण उपसंहृतं यत्नमन्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यत्नमुपादाय द्वितीयः प्रवर्त्तते इति च तत्रैव सूत्रे भाष्ये उक्तत्वात्। न चोत्तरवर्णप्रत्यक्षकाले संस्कारवशादव्यवहितो
त्तरत्वसंबन्धेन पूर्ववर्णवत्त्वं तदुत्तरवर्णे गृह्यते· एवं तत्तदुत्तरवर्णप्रत्यक्षकाले उपस्थितविशिष्टतत्तद्वर्णवत्त्वं तत्तदु·
त्तरवर्णे गृह्यते इति तज्ज्ञाने सकलभम्। सरोरस इत्यादौ विशेषश्च। यद्वा पूर्वपूर्ववर्णजाः शब्दाः शब्दजशब्दन्यायेन चरम
वर्णप्रत्यक्षपर्यन्तं जायमाना एव सन्तीति न पदप्रत्यक्षानुपपत्तिरिति वाच्यम्। आद्येऽयं पर इत्यभिलापासंभवात्· नष्टविद्य
मानयोः संबन्धिनोरव्यवहितोत्तरत्वस्य संबन्धतया वक्तुमशक्यत्वाच्च। एवं पदप्रत्यक्षोपपादनेपि पदस्याविद्यमान
त्वेन तदवृत्त्याश्रयत्वग्रहानुपपत्तेश्च। अविद्यमाने आश्रयत्वाद्यङ्गीकारे नष्टो घटो जलवानित्यादेरापत्तेः। अविद्यमानयो
रपि जलघटयोराश्रयतानिरूपकस्याश्रयत्वस्य च तद्रीत्याबाधाभावात्। तज्ज्ञानस्य प्रमात्वापत्तेः॥ किंचैवं पदवाक्ययोर·
भावेन शब्दार्थसंबन्धस्यैव हानिः। तदुक्तम्। अशाब्दो यदि वाक्यार्थः पदार्थोपि तथा भवेदिति पदसमुदायात्मकवाक्यस्ये
व वर्णसमुदायरूपपदस्याप्यभावादुभयोरप्यर्थासंबन्धादिति तदर्थः। किंचैकं पदमिति बुद्धेस्तदेवेदं कृष्णपदमिति बु
द्धेश्चानुपपत्तिः पक्षद्वयेपि। न चैकजातीयबुद्धिविषयत्वोपाधिकी च सेति वाच्यम्। तज्जातीयमिदं पदमिति व्यवहा
रस्याप्यापत्तेः। तदेवेदं पदमिति नियमेन व्यवहाराच्च। एतेन पूर्वनरवादिनाशोत्तरं पुनरुत्पन्नेन रवादौ न देवेदं नरवं तत एवे

क्यैकबुद्धिविषयत्वोपाधि २

३० क्र क्षै प

१९ मेकेशाइतिवत्साहृश्येनप्रत्यभिज्ञेत्यपास्तम्।अवयवैरेवैकैकबुद्धिविषयैरेकः परइत्यादिबुद्ध्युपपत्तावयविनोप्यतिरि
क्तस्यतवसिद्ध्यनापत्तेश्च।किंचैवमुच्चारणभेदाद्भिन्नेषुशक्तिग्रहासंभवः।व्यक्तिवादइवानन्त्यव्यभिचारात्।व्यभिचारस्य गृ
हीतशक्तिस्यैवैकवबोधकत्व सिसिसवेसिद्धेनियमेबोध्यः।आनुपूर्वीतुतत्तत्कालघटितत्वेनाव्यवहितत्वोत्तरत्वानुगमात्सत्स्वच्चा
रणंभिन्नेतितस्याअपिशक्ततावच्छेदकत्वेसैवदुरवस्था।तादृशाव्यवहितोत्तरत्वेनानुगमोपितादृशत्वस्यदुर्ज्ञेयत्वाद्यु
क्तएव·व्यवधानाभावेसतिघज्ञानध्वंसविशिष्टज्ञानविषयटत्वमेवानुपूर्वीतत्परिच्छेदस्त्वमनसैवेतिपक्षेपिज्ञानव्यक्ति
भेदेनानुपूर्व्यनन्त्यैव।नचचरमवर्णज्ञानव्यङ्ग्यास्ततत्पदटृत्तयोनन्ताजातयःशक्ततावच्छेदकत्वेनकारणतावच्छेदकत्वे राम·
नचकल्प्यन्तइतिनदोषइतिवाच्यम्।अनन्तजातिकल्पनेगौरवादुक्तरीत्याशृस्याश्रयत्वासंभवाच्च।प्रलानामसत्त्वेनतत्रजा
तेरप्यसंभवाच्चेतिचेत्।अत्रोच्यते।प्रलयेनियतकालपरिपाकानांसर्वप्राणिकर्मणामुपभोगेनप्रलयाल्लीनसर्वजगत्कामा
यात्वेतनईश्वरेलीयते।लयश्चापमपुनःप्रादुर्भावफलकोनात्यन्तिकोनाशः-उत्तरसर्गानुपपत्तेः।नापिसर्वथाऽभानम्।प्रति
भासमात्रशरीरस्यमिथ्यावस्तुनोनवभासेतदभावस्यैवापत्तेः।किंतुसुप्तेवतिष्ठति।कार्यप्रवृत्त्यभावात्-स्वप्रतिष्ठेश्वरप्र
काशस्यास्यन्तनिर्विकल्पकतयातद्रूलाज्ञसमानाप्यभातप्रायैव।ततोऽपरिपक्वप्राणिकर्मभिःकालवशात्सपरिपाकैः १९

स्वफलप्रदानाय भगवतोऽबुद्धिपूर्विका सृष्टिर्गया पुरुषौ प्रादुर्भवतः। ततः परमेश्वरस्य सिसृक्षात्मिका माया वृत्तिर्जायते। ततो बिन्दुरूपमव्यक्तं त्रिगुणं जायते। इदमेव शक्तितत्त्वम्। तस्य बिन्दोश्चिदंशो बीजम्। चिदचिन्मिश्रोंशो नादः। चिदंशो बिन्दुरिति। अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्योच्यते। अस्माद्बिन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते। एतज्जगदुपादानमेव रवपरादिशब्दैर्व्यवह्रियते। बिन्दोस्तस्माद्भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत् स एव श्रुतिसंपन्नैः शब्दब्रह्मेति गीयत इत्युक्तेः। एतत्सर्वगतमपि प्राणिनां मूलाधारे संस्कृतपवनचलनेनाभिव्यज्यते। ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थपवनस्य संस्कारः तदभिव्यक्तशब्दब्रह्मस्वप्रतिष्ठतया निष्पन्दपरा वागित्युच्यते। तदुक्तं हरिणा। अनादिनिधनं ब्रह्मशब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत इति। तदेव नाभिपर्यन्तमागच्छता तेन वायुनाभिव्यक्तं मनोविषयः पश्यन्तीत्युच्यते। एतद्द्वयं सूक्ष्मतमसूक्ष्मतरमीश्वराधिदैवं योगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषय इत्युच्यते। ततो हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशेऽभिव्यक्तं तत्तदर्थविशेषतत्तच्छब्दविशेषोल्लेखिन्या बुद्ध्या विषयीकृता हिरण्यगर्भदैवत्या परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा मध्यमा वागित्युच्यते। स्वयं तु कर्णपिधाने सूक्ष्मतरवाय्वभिघातेनोपांशुशब्दप्रयोगे च।

श्रूयमाणा सेत्याहुः। एतदवस्थात्रयमपि सूक्ष्मतमसूक्ष्मतरस्थूलप्रणवरूपम्· सैव चास्यपर्यन्तमागच्छता तेन वायुना कण्ठदेशं गत्वा मूर्द्धानमाहत्य परावृत्य तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या विराडधिदैवत्या वैखरी वागित्युच्यते। प्रणव एव व्यानोदानाभ्यां सह वैखरीरूपं प्रतिपद्यते। अतएव हरिणा व्याकरणस्य त्रिविधा वाग्विषय इत्युक्तम्। वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्। अनेकतीर्थभेदायास्त्रय्या वाचः परं पदमिति। एतद्व्याकरणम्। अनेकतीर्थेति· श्लिष्टव्यक्तवर्णरूपाऽसाधुसाधुभावाः पक्षेदुन्दुभिवेणुवीणादिशब्दरूपा चेत्यर्थः। तत्र मध्यमायां यो नादांशस्तस्यैव स्फोटात्मनो वाचकत्वेनाप्तेः सच यद्यप्येकोऽखण्ड एकैकवर्णेनाप्यभिव्यज्यते। तथाप्यन्त्यवर्णाभिव्यक्तो बोधहेतुः। अतोनैकवर्णाभिव्यक्त्युत्तरमर्थप्रत्ययः। तत्र च व्यञ्जकरूपप्रतिबिम्बनात्तद्रूपरूषितैव तदभिव्यक्तिरित्येकोपि नानात्वमिवापन्नः। यथा जलचाञ्चल्येनेन्दुप्रतिबिम्बस्य चलत्वेन ग्रहणं यथा च स्फटिकादेर्जपाकुसुमाद्युपाधिवशात्तद्रूपरूषितत्वस्य भाने यथा च मुखे मणिकृपाणदर्पणाद्यभिव्यञ्जकवशाद्दैर्घ्यवर्तुलत्वादिभानं तद्वत्। प्रतिबिम्बसमर्पकाश्च संस्कारास्ते च स्थिरा एव। नचैवमनेककालिकतत्तद्वैखर्यभिव्यक्तेऔपाधिकनानात्वात्तथाप्यनुगमाय जातिरावश्यकी। सहस्रदीपाभिव्यक्तघटस्येवानेकजपाकुसुमाभिव्यक्तस्फटिकस्येव च नानात्वाभावात्· उपाधिभिन्नव्यञ्जकाभावाच्च क

तोपि वर्णराहित्येन तत्प्रत्यक्षम्। येनक्रमेण च चित्ते संस्कारास्तेनैव क्रमेण व्यञ्जकरूपरूषितता तस्येति स्वीकारान्न सरोर
स इत्यनयोरविशेषः। तत्र च तदुत्तरत्वग्रहश्चित्तभित्तौ दैशिक एव। तदुपरागनाशिका च न तद्ध्यार्थाकारवृत्तिरेव। अयं चा
न्तरं स्याच्छ्रोत्रग्राह्यो वैखरीसंस्कृतान्तःकरणग्राह्य एव। व्यञ्जकरूपरूषितस्य तस्यैवार्थे संकेतग्रहः। अतो घटकलशादिपर्या
या[illegible] स्फोटे गृहीतशक्तिकस्य पुंसोऽप्रसिद्धपदश्रवणेनार्थबोधः। वैखरी तु वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते। के
श्चिद्दर्शनभेदोत्र प्रवादेष्वनवस्थित इति हर्युक्तेः पातञ्जलभाष्ये व्यासेनापि तथोक्तेः पूर्वाख्यानोपयोग इति सूत्रे पतञ्जल्युक्ते
श्च वाय्वादिपरिणामरूपा कण्ठताल्वाद्यभिघातजन्यैवेति बोध्यम्· वायोः प्राणादिरूपस्य अणूनां शब्दतन्मात्रादिरूपपरमा
णूनाम्। अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणव इति हर्युक्तेः छायातपतमांस्यप्येवम्। अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः।
छायातपतमःशब्दभावेन परिणामिन इति तदुक्तेः। ज्ञानस्य वक्तृज्ञानस्य पराशक्तिसाहित्येन च तत्तत्परिणाम इति बोध्यम्। केचि
दित्यनेन पराशक्तेरेव मध्यमावत् परिणामविशेषोन्येषां मते वैखरीति सूचितम्· तदाह· प्रवादेषु· शास्त्रेषु· अत्रविषये दर्शनभेदः।
सिद्धान्तभेदोऽनवस्थित इति· आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते· विवक्षया· मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्· सोदीर्णो मू
र्ध्न्यभिहतो वक्त्रमापद्य मारुतः वर्णाञ्जनयते इति शिक्षाया अपि पराद्याख्यमन्तःस्थितं शब्दं वर्णत्वेनाभिव्यनक्तीत्यर्थः। मरुत

CC-0. In Public Domain. Digitization by eGangotri

ल॰म॰ वनाभेरूर्ध्वमुद्यन्मूर्ध्न्यभिहतो न्येन पुनरुद्यतो ऽभिहन्यमान आत्मानं तत्त्वेनाभिव्यनक्तीत्यर्थो वा।आत्मान्तःकरणं संस्काररू-
२१ पेण स्वगतानर्थान्बुद्ध्या स्ववृत्त्या समेत्यैकबुद्धिविषयीकृत्य तद्बोधनेच्छायुक्तमनो ऽभिहतकायाग्निप्रेरितो वायुर्मूर्द्धपर्यन्तं-
गतस्ततः प्रतिनिवृत्तो वक्त्राभिघातेन वर्णान्जनयतीत्यक्षरार्थः।तदुक्तं परः सन्निकर्ष इति सूत्रे भाष्ये । उच्चरितप्रध्वंसिनां स-
न्निकर्षः पौर्वापर्येणानुपपन्नमित्याशङ्क्य बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्त्ता धीरःस्तन्वन्नीतिः शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ कु-
र्यात्पौर्वापर्यम् । बुद्धिविषयमेव शब्दानां पौर्वापर्यं य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति।अस्मिन्नर्थे ऽयं शब्दः प्रयोक्त-
व्यो ऽस्मिंश्च शब्दो ऽयं तावद्वर्णस्ततो ऽयं ततो ऽयमिति तन्वन्नीतिः सकलविषयव्यापिबुद्धिः धीरः पण्डितः कर्त्ता बुद्धौ अन्तःक-
रणे चेष्टाः कण्ठाद्यभिघातव्यापारजन्यशब्दान्प्रतिबिम्बितान्कृत्वा शब्देन सहितांस्तद्वाच्यानर्थान्बुद्धिरूपे देशे दृष्ट्वा तत्रै- र॰म॰
व पौर्वापर्यं व्यवहारं कुर्यादित्यर्थः।बुद्धिविषयमित्यस्य बुद्धिस्थशब्दविषयमेवेत्यर्थः। तत्र वक्तृदेशेनैव शास्त्रप्रवृत्तेस्त-
स्यैव धर्मफलश्रवणाच्च वक्तृबुद्धिस्थत्वमुपपादयति य इति।अस्मिन्नर्थे इति। एतदर्थमेव बुद्धावर्थदर्शनमप्युक्तम्।श्लो-
के पौर्वापर्यमित्युपलक्षणम्।अयमिति बुद्ध्युपारूढस्वमात्रश्रव्यसूक्ष्मोच्चारणव्यङ्ग्यशब्दपरामर्शः।अन्यथेदमः प्रत्य-
क्षपरामर्शकत्वादेतदनुपपत्तिः।शब्दः प्रयोक्तव्यः परप्रत्याययोग्यस्थूलोच्चारणरूपेण प्रयोगेणाभिव्यक्तव्यः।अस्मिं- २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्नाब्देइत्यस्यव्यञ्जनीयेइतिशेषः।यत्तुबुद्धिगतपौर्वापर्यस्यवर्णेष्वारोपइत्येतद्भाष्यार्थइति·तन्न।तद्वदेवतद्बु
द्धौनामप्युत्पन्नविनाशितयाप्रत्यक्षपरामर्शेकेदमादिघटिताभिलापाभिलप्यमानस्यपौर्वापर्यस्यतत्राप्यसंभ
वात्।प्रकृतिविकृतिभावोप्यन्तःकरणस्थैकारबुद्धिमपहाययकारबुद्धिकरणादुपपद्यतइतिस्थानिवत्सूत्रेभा
ष्येस्पष्टम्।अयंचशब्दस्तत्तत्प्राणिहृदयदेशावच्छिन्नाकाशदेशस्थः सर्वसमष्टेर्विराजोहृदयरूपबाह्याकाशदेश
स्थश्च।सचलाघवादेकएवविभुः।यथैकत्रस्थेतद्द्रव्येरूपव्यापकं तथास्याप्याकाशदेशस्यतथात्वमुचितम्।एक
इन्द्रशब्दःक्रतुशतेप्रादुर्भूतोयुगपत्सर्वयागेष्वङ्गंभवतीतिसरूपसूत्रेभाष्यात्।प्रादुर्भूतोभिव्यक्तःसएवकत्वादि
नाभिव्यक्तःश्रोत्रग्राह्यःपदादिरूपेणतुबुद्धिग्राह्यइत्यणुदित्सूत्रेभाष्येस्पष्टम्।अत्रहिश्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः
प्रयोगेणाभिज्वलितआकाशदेशःशब्दइत्युक्तम्।तत्रश्रोत्रोपलब्धित्वंकत्वादिनाभिव्यक्तस्यपदादिरूपेणतुबुद्धिनिर्ग्रा
ह्यत्वम्।सचप्रयोगेणवैखरीरूपेणाभिज्वलितःस्वरूपरूषितःकृतइत्यर्थः।अन्यथाकदम्बमुकुलादिन्यायेनानन्तश
ब्दजशब्दानांतत्प्रागभावध्वंसानांचतत्त्वस्यक्षानुपपत्त्याकल्पनेगौरवंस्यात्·नचकिंचिद्दूरदेशपर्यन्तमुत्पत्तिवद्
मस्याभिव्यक्तिरपितावद्दूरपर्यन्तमेवेतिनदोषः।अतएवकर्णशष्कुल्यवच्छिन्ननभोरूपश्रोत्रेणतद्रु[illegible]ध्वंससमवेतश

ब्दस्यैव तेन ग्रहणात्। नन्वाकाशदेशः शब्द इत्यसंगतम्। आकाशसत्त्वे मानाभावात्· नच शब्दगुणितया तत्सिद्धिः। शब्दस्याकाशगुणत्वासिद्धेः। स्पर्शवद्द्रव्यविशेषगुणत्वस्यैव शब्देऽङ्गीकारात्। नच यावद्द्रव्यभावितयाश्रयादन्यत्रानुपलम्भापत्तिः। तादृशनियमानङ्गीकारात्। तवाप्यन्यदेशावच्छिन्नाकाशाश्रयस्य कर्णशष्कुल्यवच्छिन्नउपलम्भात्· नच द्रव्यग्राहकेन्द्रियग्राह्यविशेषगुणयोगित्वमेव स्पर्शवतामिति वाच्यम्। तस्य नियमस्य स्ववासनाकल्पितत्वात्। अतएव भाष्येप्याकाशदेशइत्येवोक्तं नत्वाकाशगुणइतीति चेन्न· आधारशक्तिः प्रथमा सर्वसंयोगिनामयम्· इदमत्रेति भावानामभावानांच कल्प्यते। व्यपदेशस्तमाकाशनिमित्तंतुप्रचक्षते· कालात्क्रिया विभज्यन्ते आकाशात्सर्वमूर्तयः। एतावानेव भेदोयसमभेदोपनिबन्धन इति हरिणैव समाधानात्। इदंनस्त्रचक्रमत्र तिष्ठति अत्रैतदभावइति निर्दिष्टेउक्ते विषये पृथ्व्यादेराधारत्वासंभवेन तदाधारस्यैवाकाशसंज्ञकत्वात्। एवंच पृथ्व्यादीनामपि परमाणुद्वारा सर्वाधारइति सर्वभावानामाधारशक्तिराकाशाश्रया· आधारशक्तिरयमिति तु शक्तिशक्तिमतोरभेदादुक्तम्। एवं चाधारशक्त्यैवान्यथानुपपन्नयाकाशसद्भावावगमः इदमाकाशस्याधारत्वं सिद्धस्वभाववस्तुविषयम्· साध्यस्वभावक्रियाविषयं तु कालस्याधारत्वमित्याह· कालादिति। जन्मस्थितिनिरोधेषूपकुर्वन् कालः क्रियाधार

इति।एतच्चोपरिष्टात्स्फुटिभविष्यति।मूर्त्तिपदंक्रियातिरिक्तसर्वपदार्थबोधकम्।अयंभेदःआकाशःकालइतिभेदःए
तावतैव-व्यावहारिकएव।ननुकिंतर्ह्ययंनिर्निबन्धनएवेत्याह।अभेदइति-भेदरहितंयद्ब्रह्मतदुपनिबन्धनंवस्तु
भूतंयस्यसइत्यर्थः।ईश्वरएवतत्तदाधारत्वविशिष्टस्तत्तत्संज्ञांलभतेइतितात्पर्यम्।अखण्डःकालइतिमतेतस्येश्वरा
तिरिक्तत्वखण्डनमिदंबोध्यम्।एवंचसर्ववस्त्वाधारदेशत्वेनशब्दस्यापितद्देशत्वंश्रोत्रोपलब्धिगुणेनभाष्येउक्तम्।क
र्णशष्कुल्यवच्छिन्ननभसएवश्रोत्रत्वेनेन्द्रियाणामसंबद्धविषयाग्राहकतयातत्तद्भूतसंबद्धगुणस्यैवतत्तदिन्द्रियग्राह्य
तयाचाकाशदेशस्थत्वमेवशब्दस्येत्याशयात्॥केचित्तुतन्नश्रोत्रेतस्यछिद्रेनित्यतयारोगादिनानाशासंभवेनबाधिर्या
नापत्तेः।नचधर्मविशेषविशिष्टंनभःश्रोत्रं-तस्यचधर्मस्यारोगादिनाभिभवऔषधेनचतदुद्भवइतिवाच्यम्।लाघवेननभो
धिष्ठानकधर्मविशेषस्यैवाहंकारिकस्यश्रोत्रत्वौचित्यात्।एवमन्यान्यपिघ्राणादीनितदैकरूप्यायपृथिवीजलवायुते
जोधिष्ठानकान्याहंकारिकाण्येव।अतएवयोगीन्द्रियाणामत्यन्तदूरदेशस्थविषयोपलब्धिजनकत्वम्।पृथ्व्यादिवि
काराणांतावद्दूरगमनासंभवात्।अहंकारस्यत्वन्तःकरणपरिणामत्वादन्तःकरणस्यचाधुनापिबहुदूरदेशगमनानुभवा
त्।तद्विकाराहंकारविकाराणांतत्संभवात्।योगस्तुप्रतिबन्धकतमोनिवर्तकएवेत्यग्रेनिरूपयिष्यामः।तत्तद्भूतस्यगुणा

CC-0. In Public Domain. Digitization by eGangotri

ल·म
२३

धिष्ठानानिचतानिभूतानितेषुचगुणाअनुद्भूतास्तत्तद्गुणासामानाधिकरण्यात्पृथ्व्यादिगतगुणग्रहणमिन्द्रियैः।एवंचश्रोत्रमे
वचित्तवृत्तिसहकृतस्ववृत्तिपरंपरयाशब्ददेशमागतंशब्दंगृह्णाति।अतएवतत्तद्देशवर्तित्वेनशब्दप्रतीतिः।यद्वाणूनांसर्व
शक्तिनासर्वदेशव्यापितयातेजोनभआदिपरमाणूनांविषयदेशपर्यन्तंतत्तदिन्द्रियस्यतत्तद्विषयोन्मुखत्वेतत्तदिन्द्रियरू
पेणपरिणामात्तत्तद्देशेप्रत्यक्षमितिवदन्ति॥तन्मतेप्युक्तयुक्त्याकाशदेशत्वमेव।किंचानन्तश्रोत्रवृत्तिकल्पनापेक्षयानन्तपर
माणपरिणामकल्पनापेक्षयाचतस्यैकस्यकल्पनेलाघवम्।तत्तद्देशव्याप्याभिव्यक्तिमात्रस्यतेनग्रहणमिति तत्तद्देशवर्त्तित्वानुभवे
नंविरुद्धः।यथाचैकस्याप्याकाशस्यघटाकाशमठाकाशइत्यौपाधिकोभेदोयथाचैकस्यैवचेतनस्यौपाधिकोजीवेश्वरभेदोजीवा
नांचपरस्परभेदएवमौपाधिकंभेदंलोकसंमतमाश्रित्याकृतिग्रहणात्सिद्धमितितत्सूत्रेभाष्येउक्तम्।किंचजातिरपिमास्तु
रूपसामान्यादेवस्थूलकृशाल्पमहद्ध्रस्वदीर्घगोघटादिषुगौरित्यादिवत्सर्वत्रैकाकारव्यवहारः।अन्यथासंस्थानभेदा
दनुमेननसंस्थानव्यङ्ग्याजातिरपितत्रनस्यादित्याशयेनरूपसामान्याद्वासिद्धमितितत्रैवभाष्येउक्तम्।रूपसादृश्यादितित
दर्थः।एतेनवर्णानांगृहीतसंकेतानांव्यञ्जकत्वमगृहीतसंकेतानांवा।आद्येतैरेवोपपत्तौकिंतेन·नान्त्यः·सर्वस्याप्यर्थबो
धापत्तेः·तदुक्तंसांख्यसूत्रे·प्रतीत्यप्रतीतिभ्यांनस्फोटात्मकःशब्दइति·यदिवर्णसमुदायेनतत्प्रतीतिस्तदोक्तरीत्यातद्वै

राम·
२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यर्थ्यम्॰ अथ न प्रतीयते तदाऽज्ञातस्यार्थाः प्रत्यायकत्वाद्यर्थानत्कल्पनेति तदर्थ इति सांख्योक्तं तद्युसाद्युपवर्षोक्तं च॰ स्फोटखण्डनमपास्तम्। अगृहीतसंबन्धैरपि तस्य व्यञ्जनमस्त्वेव। अत एवागृहीतार्थकेपीदमेकं पदमित्यनुभवः। अत एव वाचस्पतिमिश्रास्तत्त्वबिन्दौ गकारादतिरिच्यमानमूर्त्तेः ककारस्याभावादिति स्फोटवादिमतमुपन्यास्यन्नित्यलम्॥ परेत्ववर्णादीनामेकत्वं नित्यत्वं विभुत्वं च॰ तदवयवकपालादेरपि तत्त्वम्। कण्ठताल्वाद्यभिघातस्तद्व्यञ्जकः। देशभेदेपि पटादीनां देशघटितसन्निवेशाभेदवत्कालभेदेपि तद्घटितानुपूर्व्या अभेदः। प्रत्यक्षप्रत्यभिज्ञानाद्वर्णैकत्वं प्रतिष्ठितम्॰ वर्णात्मकं पदं तच्च तदभेदान्नभिद्यत इत्युक्तेः। दिनान्तरानुभूतेऽधुनानुभूयमानस्य सोयमिति प्रत्यभिज्ञया तावत्कालं स्थिरत्वे सिद्धे तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यतीति न्यायात्। पराभिमताशुविनाशित्वव्यतिरेके स्थिद्धे नित्यत्वपर्यवसानम्। सर्वदेशेषु तदुपलम्भाद्विभुत्वं लाघवाच्चैकत्वम्। आनुपूर्वी घटकमव्यवहितोत्तरत्वं चैतत्स्वे उत्पत्त्यनवच्छिन्नस्वज्ञानाधिकरणकालोत्पत्तिकज्ञानविषयत्वम्। यथात्यन्तरागवतः कामिनीसाक्षात्कारस्थले ज्ञानधाराकल्पने गौरवादेकत्वं तद्वज्ज्ञानानामप्येतद्विषये स्थिरत्वम्। शब्दबुद्धिकर्मणां क्षणिकत्वमिति तु न युक्तम्। इदानीं जानामि उच्चारित इति व्यवहारात्। अन्यथा क्षणस्यातीन्द्रियतयेदानीमिति ज्ञानासंभवः। परस्य तूत्पत्त्यादीनां भेद॰

मे व्याख्यानांविरोधिनांसत्त्वेनप्रत्यभिज्ञानुसत्यापत्तिः। नचगत्वाद्यवच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः। द्वयोर्घटयोः-
४ सोयमितिप्रत्यभिज्ञापत्तेः। प्रत्यभिज्ञायाव्यक्तिविषयत्वेबाधकाभावाच्च। नचककारउत्पन्नइतिप्रतीतिर्बाधिका। श्यामो
नष्टोरक्तउत्पन्नइतिप्रतीतेरूपगतोत्पत्तिविनाशारोपेणपरंपरासंबन्धेनचोत्पत्तिवद्ध्वनिनिष्ठोत्पत्तेरारोपेणपरंपरासं
बन्धेनवातदुपपत्तेः। वर्णोच्चारणस्थलेपितत्तत्स्थानेजिह्वायाईषदन्तरपातेवर्णानुपलब्धेर्ध्वन्युपलब्धेश्चानुभवेनह
सितरुदितादौजिह्वाभिघातवायुकण्ठसंयोगादेस्तज्जनकत्वावश्यकत्वेनचवर्णोत्पत्तौतदनङ्गीकारेप्रतिबध्यप्रतिबन्धक॰
भावकल्पनागौरवेणतत्सत्त्वावश्यकत्वात्। अतएवबहुषुशब्दमुच्चारयत्सुमहाध्वनिःश्रूयतइतिप्रतीतिः। यदितुसएवा
यंशङ्खध्वनिरित्यादिप्रत्यभिज्ञयाध्वनीनामपिनित्यत्वंतर्हितज्ज्ञानकारणीभूतवायुसंयोगनिष्ठतत्त्वारोप्यतेपरंपरया
बुध्यतइतिवाबोध्यम्। एवमेवशब्दंकुर्वित्यादिव्यवहारः। उच्चारयेतितदर्थोवा। लोहितःस्फटिकइत्यादावारोपएवनतुप
रंपरयातत्प्रतीतिः। उक्तेस्वसमवायिसंयुक्तत्वसंबन्धःस्फटिकस्यलौहित्यमित्यत्रस्वसंयुक्तसमवेतत्वंसंबन्धइत्युभयोः राम
संबन्धत्वकल्पनेगौरवात्। वस्तुतःसर्वत्रारोपएवोचितः। रसोरूपवानित्याद्यप्रतीत्यापरंपरासंबन्धस्यविशिष्टबुद्ध्यनि
यामकत्वात्। एवमुदात्तत्वादिकमपितन्निष्ठमेवतत्रारोप्यतइतिनोदात्तादिगुणभेदादनेकत्वंवर्णानाम्। किंचप्रागनुप २४

लभ्यमानत्वेसतिउपलभ्यमानत्वादिरूपेणोत्पन्नविनष्टसादृश्येनतत्रोत्पत्तिविनाशयोरारोपः।किंचप्रागसत्त्वेसतिसत्त्वरूपायाउत्पत्तेर्नवर्णेष्वनुभवः।वर्णमुच्चारयतीत्येवप्रत्ययात्।उच्चारितत्वंचकण्ठताल्वाद्यभिघातजन्याभिव्यक्तिविशिष्टत्वम्।स्त्रीशुकाद्यनुमापकंतज्जन्यतावच्छेदकवैजात्यंचध्वनिनिष्ठंवायुसंयोगनिष्ठंवावर्णेष्वारोप्यतइतितदुपपत्तिः।तारत्वाद्यपिसन्निष्ठमेव।अतएवभामत्यांतारत्वादिवायुनिष्ठंवर्णेष्वारोप्यतइतिदेवताधिकरणेभिहितम्।यद्वातारत्वादयोगुणाःशब्दनिष्ठाः।तदाश्रयत्वाच्छब्दस्यद्रव्यत्वम्।आकाशरूपद्रव्याश्रयत्वाद्गुणत्वंच।कस्यचित्कश्चिद्वायुसंयोगस्तारत्वव्यञ्जकोऽपरस्यतुमन्दत्वव्यञ्जकस्तयोर्विरोधव्यवहारोपियेनवायुसंयोगेनयंप्रतितारत्वंव्यज्यतेतंप्रतिमन्दत्वाव्यञ्जनमूलकः।परैस्तुकण्ठताल्वाद्यभिघातोत्पन्नस्यकेनचिन्मन्दत्वेनग्रहणंकेनचित्तारत्वेनग्रहणमित्यत्रबीजंनिर्वक्तुमशक्यम्।एतदुच्चैरुदात्तइत्यत्रभाष्येस्पष्टम्।शुकसारिकानवनाद्युच्चारणव्यङ्ग्येषुतत्तदुच्चारितत्वानुमापकानिवैजात्यान्यपिवर्णनिष्ठानिविजातीयवायुसंयोगव्यङ्ग्यान्येव।प्रकृतिविकारभावस्तुबुद्धिपरिणामेनैवोक्तरीत्यानिर्वाह्यः।अन्यगतोत्पत्त्यादेरन्यत्रारोपेबीजंतुअन्तःकरणस्यरागादिदोषएव।सेयंदीपकलिकेत्यादौमानान्तरेणनाशसिद्धेःसेयमित्यंशेभ्रमत्वम्।नचनित्यत्वेवायुसंयोगादेःककारादिप्रत्यक्षत्वंकार्यतावच्छेदकंवाच्यम्।ममतु

कत्वमेवेति लाघवमिति वाच्यम्। अनन्तप्रागभावध्वंसादिकल्पनापेक्षया लघुत्वात्तस्य सत्वावच्छिन्नविषयतयाकत्वस्यै ककार्यप्रावच्छेदकत्वाच्च। नचैवं घटाद्यपि नित्यं स्यात्· कपालसंयोगादिकं च व्यञ्जकं भविष्यतीति वाच्यम्। वर्णवदत्र तदग्रहविपरीतग्रहयोरभावेनोत्पत्तिप्रतीतेर्विना बाधकं भ्रमत्वायोगात्। किंचैतत्कुलालव्यापारानन्तरमनुभूयमानस्य तद्व्यापारतः प्रागननुभूतेन घटेन नाभेदप्रत्यभिज्ञा। अत्र त्वेतत्कण्ठताल्वादिव्यापारानन्तरमनुभूयमानस्य ततः प्रागनुभूतेनेनाभेदप्रत्यभिज्ञेति विशेषात्। नित्यत्वं चैषां सृष्ट्याद्यकालोत्पत्तिकत्वं प्रलयकालनाश्यत्वं चेत्येतावदेव। अत एवौत्पत्तिकस्तु शब्देनार्थस्य सम्बन्ध इत्युक्तं जैमिनिना। औत्पत्तिकशब्देनेदमेव नित्यत्वं वक्तुं शक्यं नान्यादृशम्। एवमत्राधिकरणउक्तेन शब्दार्थसंबन्धनित्यत्वेन वेदस्य निरपेक्षबोधकत्वरूपं प्रामाण्यं समर्थ्य शब्दार्थसंबन्धनित्यत्वमयुक्तं शब्दानामनित्यत्वादिति तदाक्षेपसमाधानाय शब्दनित्यतासिद्धान्तकं शब्दाधिकरणमारब्धम्। तच्च वाचकनित्यतापर्यन्तं तात्पर्यमवगमयति न तु वर्णनित्यतामात्र इति बोध्यम्। अत एवानेककर्तृकोच्चारणविषयेप्येकमिदं घटपदमिति प्रत्ययः। एक इन्द्रशब्दोनेकेषु क्रतुष्वाविर्भवतीत्यादिना सरूपसूत्रभाष्ये स्फुटमेतत्। नहीयमेकत्वधीर्वर्णविषया· तेषामनेकत्वात्। वनराश्याद्यप्यतिरिक्तमेव। नचैकार्थबोधहेतुत्वेनैकत्वम्। तेनैकत्वमेकत्वे नचैकार्थधीहेतुतेत्यन्योन्याश्रयापत्तेः।

किंचार्थबोधाभावेपिएकंपदमित्यादेरप्रसिद्धार्थपदश्रवणेदर्शनात्। एकबुद्धिविषयत्वेनतुनतत्त्वम्। सर्वोच्चारणविषयेन्त्यशब्दानामेकज्ञानविषयत्वासंभवात्। नचैकजातीयबुद्धिविषयत्वम्। विषयैक्येबुद्धीनामेकजातीयत्वंतदेकजातीयत्वेनचविषयैक्यमित्यन्योन्याश्रयात्। किंचैवमेकः पटइतिव्यवहारस्याप्येकबुद्धिविषयतत्समूहेनैवोपपत्तौतत्राप्यतिरिक्तावयव्यसिद्ध्यापत्तिः। यदितत्रैकइतिव्यवहारात्तत्सिद्धिस्तर्हिप्रकृतेपिसमम्। नचैकइन्द्रशब्दइत्यस्यैकजातीयइत्यर्थः। तावच्छब्दकल्पनंतत्रचैकजातिकल्पनमित्यपेक्षयातदेकत्वस्यैवौचित्यात्। घटत्वजात्यैक्येनदशसुघटेष्वेकोघटइतिप्रतीत्यापत्तेश्च। एकजातीयइन्द्रशब्दइत्यव्यवहाराच्च। तच्चेदंपदंप्रकृतिप्रत्ययविभागवत्। प्रकृत्यादिकमपिनित्यमेव। यद्वाःखण्डमेवतत्। अन्यथावर्णानामपितस्यादितइतिशास्त्रबलादृकारादिषुचरेफलकाराकारेकारोकारादिभागानामनुभवसिद्धत्वाच्च। भागवत्त्वेभागानामपितुल्यन्यायादवयवकल्पनायांपरमाणुतुल्यानामवशेषः स्यादितिएवघटादीनामवयवसमुदायरूपत्वेदुरवस्थासैवात्रापि। एवंचपदपदार्थव्यपदेशरहितंनिरीहमेवजगत्स्यात्सावयवत्वेनित्यताभङ्गश्चेतिवाक्यमपिपदविभागरहितमखण्डमेव। वाक्यादपोद्धृत्यपदान्यन्वाख्यायन्तइतिभाष्यात्। तत्रक्वचिद्वाक्यस्यैवविभज्यान्वाख्यानंक्वचित्पदस्यैवेतिलक्ष्यानुरोधाद्व्यवस्था। नचवर्णेषुनावयवास्तदवभास

स्कुतत्तदुच्चारणविशेषव्यङ्ग्यतत्तद्वर्णसमानाकारक्रमिकध्वनिविशेषोपरागोपाधिरितिवाच्यम्। पदेवर्णाविभासस्यवाक्ये
पदाविभासस्याप्येवमेवोपपत्तेः। शास्त्रंतुरेखागवयन्यायेनेत्याहुः। तन्न। अनेकवर्णध्वनिकल्पनेमानाभावात्। अव
र्णानामैक्यमवर्णककारादीनांचानेकत्वमित्यर्द्धजरतीयस्यान्याय्यत्वाच्च। तस्मादुक्तरीत्याकाशवृत्तिरेकःस्फोटएवश्रो
त्रग्राह्यः। अतएवचैकोगकारइतिप्रत्ययः। कत्वादिकंचाभिव्यञ्जकवायुनिष्ठंतत्तत्स्थानाभिघातव्यङ्ग्यम्। कत्वादिवैजा
त्याक्रान्तैःस्वरूपरूषितस्यभानंतदनाक्रान्तैस्तद्ध्वनिरूपेण। ककारउत्पन्नइत्यादिप्रत्ययस्तुप्राग्वदेवज्ञाननिष्ठो
त्पत्त्याद्यारोपेण। नचवायुनिष्ठकत्वादेःश्रोत्रेणग्रहेयेनयस्यधर्मोगृह्यतेतेनतदपीतिन्यायेनवायूनामपिश्रोत्रेणग्रहणा
पत्तिरितिवाच्यम्। यद्वृत्तितयाधर्मग्रहणंतस्यैवधर्मिणस्तेनग्रहणस्यचसुरादौक्लृप्तत्वात्। स्फोटवृत्तितयाचश्रोत्रेणग्रह
णंनवायुवृत्तितया। रसनादौरसादिमात्रग्राहकतायादृष्टत्वाच्च। व्यञ्जकगतवैजात्यमादायैवककारखकारयोर्भेदव्य
वहारः। अद्वैतसिद्धान्तेविषयसंबन्धजन्यवृत्तिवैचित्र्येणव्यङ्ग्यस्वरूपसुखेभेदव्यवहारवद्विशेष्यांशमादायाभेदे
पितत्प्रतीतिर्नापाद्या। उपाध्यनालिङ्गिततत्प्रतीत्यभावात्। देशकालभेदप्रत्ययोप्यौपाधिकएव। सएवचपदादिरूपेणा
पिव्यङ्ग्यइतिबोध्यम्। अत्रापिकाल्पनिकःप्रकृतिप्रत्ययविभागःपदेवाक्येचपदविभागः। भेदेनकल्पिताअपितेपद

वदेव नित्याः। तदुक्तमाद्यन्तौ।। यत्त्वत्र भाष्ये नित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमिति। वर्णशब्देन प्रकृतिप्रत्ययागमादयः। यद्वाऽखण्डान्येव पदानि वाक्यानि च-रेखागवयन्यायेन तदन्वाख्यानार्थं कल्पिते पदादौ प्रकृत्यादिविभागकल्पना पदविभागकल्पना च। इदमप्याद्यन्तावित्यत्र भाष्ये। स्फोट एवकत्वादिना व्यज्यत इत्ये ओङिति सूत्रे भाष्ये ध्वनितम्। तत्र हि नरसिंहवज्जात्यन्तरत्वाद्वर्णैकदेशानां वर्णग्रहणेनाग्रहणमिति पक्षे कॢप्त इत्यत्र कृपो रो ल इति लत्वाप्राप्तिमाशङ्क्याथवोभयतः स्फोटमात्रं निर्दिश्यते रश्रुतेर्लश्रुतिर्भवतीत्युक्तम्। तस्यायं भावः। वस्तुतो रत्वादिमान्न कश्चित्। किंतु अन्यगततत्तद्रूपेण स्फोटस्यावभासमात्रम्। एवं च कल्प्यत इत्यादावप्यस्या प्रवृत्तिः स्यादतो रेफावभासिस्फोटप्रसङ्गे लकारावभासस्फोट इत्यर्थः। एवं च सर्वत्र सिद्धम्। कृपावपि रेफावभाससत्त्वात्। आकारादौ तु नैवं ह्रस्वावभास इति न तत्र ह्रस्वाकारावभासप्रयुक्तकार्यम्। यत्तु कैयटेनान्तर्भूतानन्तर्भूतसाधारणी जातिर्निर्दिश्यत इति व्याख्यातम्। तन्न। तादृशजातिसत्त्वे मानाभावात्। नरसिंहवद्वर्णान्तरमिति स्वोक्तिविरोधाच्च। सादृश्यात्तु प्रत्यभिज्ञेत्यादिस्वोक्तसंगतेश्च। श्रुतिपदास्वारस्याच्च रजातेर्लजातिरित्यनुक्तेश्च। तादृशजातिसत्त्वे वर्णैकदेशानामपि तज्जातिमत्त्वेन वर्णग्रहणेन ग्रहणमिति पक्षस्यैव सिद्ध्या ग्रहणपक्षमुक्त्वाऽथवा न गृह्यन्त इति पक्षे तत्समाधानपरभाष्यासंगतेश्च। अत एवाष्टमे रषा

स्यादितिसूत्रे कैयटः। यथा च नरसिंहावयवानां नरत्वसिंहत्वजातियोगाभावात्पुरुषमृगराजाभ्यामेकाकृतियोगाभाव एवं वर्णवर्णैकदेशयोरपीति। स्फोटपरस्य च तत्तद्वर्णपदादिरूपेण ताल्वाद्यभिघाताज्ज्ञानविषयो मध्यमावस्थोर्थ इत्यलम्॥ किं चैवं द्रुतमध्यविलम्बितासु प्रयत्नभेदेन चिराचिरकालोच्चारणजन्यत्वाद्भिन्नकालत्वभेदयोरापत्तौ ह्रस्वाकारस्यापि भेदे भिन्नकालत्वे चान्यतमवृत्तौ तपरकरणेन्यतमवृत्तावतोभिस ऐसो नापत्तेः। स्फोटाङ्गीकारे तु न दोषः। तदभिव्यक्त्यनन्तरं जायमानेन चिरकालेन वैकृतध्वनिना तस्य चिरकालमुपलब्धावपि स्फोटे कालभेदाभावात्। तमेवायं द्रुतमुच्चारितवानन्यो विलम्बितमिति प्रत्यभिज्ञासत्त्वाद्ध्रस्वदीर्घादौ तु नैवमभेदप्रत्यभिज्ञा। एतेन ह्रस्वदीर्घप्लुतैरभिव्यक्तस्फोटे तदुपरागवशाद्यथा तावत्तावत्कालत्वारोपस्तथात्रापि स्यादिति परास्तम्। ह्रस्वदीर्घादीनां परस्परमैक्यप्रत्यभिज्ञाभावेन तत्कालारोपेप्युच्चारयित्रालस्यादिकृतस्यास्य वैकृतगतस्य कालस्योपलब्धिचिरचिरत्वकरस्यारोपे मानाभावात्। आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति न्यायात्। अतएव तिसृषु वृत्तिष्वपि ह्रस्वोयमकार इत्यनुभवः। जन्यत्वे तु वर्णानां क्षणस्थायित्वाभ्युपगमात्कस्य चिरमुपलब्धिः स्यादिति बोध्यम्। तदुक्तं तपरसूत्रे भाष्यकृता· वृत्त्यन्तरे ऐसो नापत्तिः। न च वृत्तिजनकयत्नभेदेन वर्णानां भिन्नकालत्व

स्थिवौवित्यादित्य।शङ्‌·कथं वताह स्फोटः शब्दो ध्वनिः शब्दगुणः। कथं यथा भेर्याहन्ता भेरीमाहत्य कश्चिद्विंशतिपदा
नि गच्छति कश्चित्त्रिंशत्कश्चिच्चत्वारिंशत्स्फोटस्तावानेव·ध्वनिकृता वृद्धिः।ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु
लक्ष्यते· अल्पो महांश्च केषांचिदुभयं तत्स्वभावत इति। स्फोटः शब्द इति। श्रोत्रेन्द्रियग्राह्यः स्फोटनामा पदार्थः शब्दः
ध्वनिस्तदभिव्यञ्जनार्थं जायमानो वैकृतध्वनिरूपः। शब्दस्य चिराचिरोपलब्धिकरत्वाद्गुण उपकारकः। भेरीमाहत्ये
त्यस्यत शब्दमुपलभमान इति शेषः। ध्वनिरूपेणापि स्फोट एव गृह्यते। इति दृष्टान्तदार्ष्टान्तिकोभयसाधारणमाह· स्फो
टस्तावानेवेति। ध्वनिकृता वैकृतध्वनिकृता ध्वनिः स्फोटश्च स्तु इति शेषः। शब्दानां संबन्धी ध्वनिर्वैकृतध्वनिस्तु केषां
चिदल्पोल्पकालमुपलब्धिजनकः केषांचिन्महान्बहुकालोपलब्धिजनको लक्ष्यते। तत्र प्रमाणमाह। उभयं तत्स्व
भावतः। सिद्धमिति शेषः। तदुक्तं हरिणा। स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः। स्वभावतस्तु नित्यत्वाद्ध्रस्व·
दीर्घप्लुतादिषु। प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते। अभिन्नकालत्वोपपादकं स्वभावतस्तु नित्यत्वादिति· प्रा
कृतध्वनिशब्देन स्फोटव्यञ्जकमत्रोच्यते स्फोटस्य ग्रहणे हेतुः प्राकृतो ध्वनिरिष्यते। ग्रहणेऽभिव्यक्तौ। स्थितिभेदे निमि
त्तत्वं वैकृतः प्रतिपद्यते। स्थितिभेदे चिराचिरोपलब्धिविशेष। शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः। ध्वनयः स

ल·म· सुपोहन्तेस्फोटात्मातैर्नभिद्यतेइति।शब्दस्याभिव्यक्तेरूर्ध्वंवैकृताध्वनयोजायन्तइतिशेषः।तेतुवृत्तिभेदेद्रुतादिवृत्तिभेदे
२८ समुपोहन्तेतत्रकारणंभवन्ति।स्फोटस्तुतैर्नभिद्यतइतितदर्थः।वैकृतत्वंचैषामालस्यादिकृतत्वात् कैयटेप्यत्रव्यञ्जक
शब्दोवैकृतध्वनिपरः तस्याप्युपलब्धिजनकत्वेनव्यञ्जकत्वव्यवहारादितिदिक्॥एवंचपदादिरूपआन्तरस्फोटोवाचकइति
सिद्धम्॥एवंशाब्दोर्थोपिबुद्धिसत्तासमाविष्टएव।नतुबाह्यसत्ताविष्टः।घटइत्यतएवसत्तावगमेनघटोस्तीतिप्रयोगेगता
र्थत्वादस्तीतिप्रयोगानापत्तेः।सत्तायाविरोधाद्घटोनास्तीत्यस्यानापत्तेश्च।ममतुबुद्धिसतोबाह्यसत्तातदभावबोधना
यास्तिनास्तीतिप्रयोगः.किंचशशशृङ्गंनास्तिअङ्कुरोजायतेइत्यतोबाधानापत्तेः ममतुबुद्धिसन्नङ्कुरोबाह्यरूपेणजायतइत्य
र्थः।सासत्तापिशब्दवाच्येतितद्भावः।किंचेच्छादीनामन्तःकरणनिष्ठतयातत्रविषयस्यसामानाधिकरण्येनैवकारणत्वौ
चित्येनबौद्धपदार्थसत्तावश्यकी॥यत्तुवैशेषिकाद्यनुसारिणोविषयतासंबन्धेनज्ञानंप्रतितादात्म्येनविषयःकारणमिति
वदन्ति।तन्न।तदीयतादात्म्यस्यवृत्त्यनियामकतयासामानाधिकरण्यानिर्वाहकत्वात्।अतीतानागतस्थलेसतोरेवसं राम
बन्धनैवंसंबन्धस्यवक्तुमशक्यत्वाच्चघटादिसामग्र्याअप्यवच्छेद्यावच्छेदकभावसमानाधिकरणदैशिकविशेषणतयादेश
विशेषेसामानाधिकरण्यंदुष्पन्यम्।शिरसिमेवेदनात्रघटइत्यादिव्यवहाराद्याधारतानियामकत्वम्:अवच्छेदकत्वंसम् २८

स्यर्थइतितुचिन्त्यमेव-अनुशासनाभावात्।सुब्विभक्तौलक्षणाभावस्यभवदीयसंमतत्वाच्च।द्रव्यरूपादीनामपिद्रव्य
देशएवदेशइतिबोध्यम्।भ्रमेऽधिष्ठानत्वमपिबोद्धस्यवनबाह्यस्येतिसर्वंसमञ्जसम्।अतएवोपदेशेऽजनुनासिकइ
तिसूत्रेभाष्यउक्तम्।कोदेवदत्तइतिप्रश्नेऽङ्गदीकुण्डलीव्यूढोरस्कोवृत्तबाहुरीदृशोदेवदत्तइति।तद्वत्त्वेकव्यक्तौभेदाभा
वादीदृशइत्यस्यासङ्गतिः।ममतुएतैःशब्दैर्यादृशोर्थोबुद्धौप्रतिभासतेतादृशोबाह्यइत्यर्थः।अत्रेदृशतादृशशब्दाभ्यां
तत्वेनप्रत्यभिज्ञाविषयत्वमुपलक्ष्यतइतिबोध्यम्।हेतुमतिचेतिसूत्रेपङ्क्तिविंशतीतिसूत्रेमतुप्सूत्रेचभाष्यकैयटयोःस्पष्ट
मिदम्।गौतमोप्यसतउत्पत्तिकर्तृत्वंकथमित्याशङ्क्यसूत्रितवान्।बुद्धिसिद्धंतुतदसदिति।तत्कार्यमुत्पत्तेःप्राग्नाशोत्तरंचा
सदपिबुद्धिविषयतयासिद्धमितितदर्थः।जन्मादिसूत्रेवाचस्पतिरप्याह।चेतनोहिनामरूपेबुद्ध्यावालिख्यघटइतिनाम्नाकम्बु
ग्रीवादिनाचरूपेणचबाह्यंघटंनिष्पादयति।निर्वर्त्यस्यापिघटस्यान्तःसंकल्पात्मनासिद्धस्यकर्मकारकत्वंघटंकरोतीत्यादौ।
यदाहुर्बुद्धिसिद्धंतदसदितीति।तथाहि।चित्तस्यद्रव्यरूपोवृत्त्याख्यःपरिणामइन्द्रियप्रणाल्यानिर्गत्यविषयेणसंयुज्यस्व
स्मात्तस्यारूपविषयवासनावशात्तत्तद्विषयाकारेणपरिणमतेनतुतस्यांसंयुक्तोबाह्यविषयप्रतिबिम्बः।स्वप्नादौबाह्य
विषयासंयोगेनतत्प्रतिबिम्बासंभवात्।तथाचस्मृतिः।विषपृथ्व्यादिचित्तस्थंनबहिष्ठंकदाचन-स्वप्नभ्रममदाद्येषु

CC-0. In Public Domain. Digitization by eGangotri

संनिकृष्टज्ञानाकारं विहाय १

ल·म· सवैरेवानुभूयइतिभ्रमेज्ञानाकारस्यैवविषये आरोपइतिसिद्धान्तात् सन्निकृष्टदूरस्थरजताद्यारोपेमानाभावात्। तदाह
२९ ष्टमधुनानास्तीतिस्वरूपतोबाधानुभवस्यानुपपत्तेश्च। चाकचिक्यादिविषयदोषवशाच्चचित्तवृत्तेस्तथापरिणामः। ए
तेनज्ञानलक्षणसन्निकर्षेणहट्टेऽनुभूतरजतधर्मप्रकारिकाशुक्तिप्रतीतिरित्यपास्तम्। अन्यथोपपत्तेः। तत्तदनुयोगि
ताप्रतियोगिताऽविशिष्टसंबन्धस्यकदाप्यनुभवाभावाच्च। संबन्धत्वस्यद्विष्ठत्वस्वरूपतया तत्तदनुयोगिकत्वाद्विरहितसं
बन्धभानस्यायुक्तत्वात्। तत्तदनुयोगिकत्वादिविशिष्टेनज्ञातस्यैवप्रवृत्त्याद्युपयोगित्वाच्च। वस्तुतोज्ञानलक्षणाप्रत्या
सत्तिरेवनाविद्यमानस्यप्रत्यासत्तित्वायोगात्। नचज्ञानविषयत्वंप्रत्यासत्तिः। ज्ञानविषयोभयस्वरूपाविषयतेतिमते
ज्ञाननाशेतस्यावक्तुमशक्यत्वात्। तस्मात्स्मृताविवसंस्कारएवप्रत्यासत्तिः। एवंचमदुक्तएवपर्यवसानम्। सुरभिचन्द
नंसोयमित्यादिचसंस्कारचक्षुःसन्निकर्षाद्युभयजन्यंज्ञानान्तरमेवेतिनस्मृतित्वानुभवत्वयोस्तत्रसंकरः। अतएव
स्त्रियामितिसूत्रेखड्गादौस्तनकेशाद्यदर्शनेनलिङ्गाभावाद्वापोऽनुपपत्तिमाशङ्क्यासत्तुमृगतृष्णावद्गन्धर्वनगरंयथा राम·
। असत्तुखड्गवृक्षयोर्लिङ्गंद्रष्टव्यम्। कथंपुनरसल्लिङ्गंशक्यंद्रष्टुंमृगतृष्णावत्। तद्यथामृगतृषिताअपांधाराःपश्य
न्तिनचताःसन्तियथागन्धर्वेनगराणिदूरतोदृश्यन्तेउपसृत्यचनोपलभ्यन्तेइतिभाष्येउक्तम्। अमे हिस्पष्टमेवभ्रमेव २९

एवमुद्दा[illegible]आदिकन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हि स्वदेशे असत्त्वएवभानमुक्तम्। हरिणाप्युक्तम्। यथासलिलनिर्भासो मृगतृष्णासु जायते जलोपलब्धेऽनुगुणाद्बीजाद्धि जलेः सति इति। बीजं पूर्वपूर्वमिथ्याज्ञानजन्यवासनेति तद्व्याख्यातारः। व्यवहारदशायां कदापि केनापि तत्त्वमात्रैर्बाधाननुभवाद्रूप्यतो लिङ्गस्य भानमित्येतन्निराकृतमित्यन्यत्। भ्रमेयावद्विशेषदर्शनं बहिः सत्त्वेन प्रतीतिस्तत आधिष्ठानगतसत्त्वारोपात्। अतएव सदसत्ख्याति बाधाबाधाभ्यामिति सांख्यसूत्रेउक्तम्। यावद्विशेषदर्शनमबाधस्तदुत्तरं च बाधोस्ति। प्रपञ्चोप्येवमेव मृगतृष्णादिदृष्टान्तेन प्रपञ्चस्य शास्त्रे वर्णनात्। तदुक्तं परमार्थसारे शेषनागेन। मृगतृष्णायामुदकं शुक्तौ रजतं भुजङ्गमो रज्ज्वां मृतै तिमिरिकचन्द्रयुगवद्भ्रान्तमखिलं जगद्रूपमिति भ्रान्त्तं भ्रमविषयइत्यर्थः। व्यासोपि मायामात्रं तु कार्त्स्न्येनानभिव्यक्तेरिति स्वप्नप्रपञ्चस्य मायामात्रत्वं न तु बाह्यसर्गतुल्यत्वमाह। तत्रैव यद्यपि जाग्रत्प्रपञ्चस्यापि तदनन्यत्वमारम्भणशब्दादिभ्य इति सूत्रेण मायामात्रत्वमुक्तं तथापि प्राग्ब्रह्मात्वदर्शनाद्वियदादिप्रपञ्चो व्यवस्थितः स्वाप्रस्तु प्रतिदिनं बाध्यत इति विशेष इति भाष्ये उक्तम्। तस्य प्रपञ्चस्यान्यवस्तुत्वाभावः। वाचारम्भणं विकारो नामधेयमिति श्रुतेरिति सूत्रार्थः। वाचैव केवलमारभ्यते यतो नाममात्रं न तु वस्तुत इति श्रुत्यर्थः। अतएव चानन्यत्वेपि कार्यस्य कारणात्मत्वं न तु कारणस्य कार्यात्मत्वमिति न तु दृष्टान्ताभावादिति सूत्रे भाष्ये। कार्यस्य वस्तुत्वा

सं·
३०

भावादिति तदाशयः। मायामात्रमिति मात्रपदेनानिर्वचनीयोत्पत्तिवादमपि निराकरोति। न च न तत्र रथा न रथयोगा न प
न्थानो भवन्ति· अथ रथान् रथयोगान्पथः सृजत इत्ति स्वप्नविषयश्रुत्युक्तसृष्टस्य संगतिरिति वाच्यम्। उपक्रमे रथाद्य
भावः श्रुत्योक्त इति सृष्टिवचनं भाक्तमिति भाष्येणैव समाधानात्। किंच तास्य रथादिग्रहणाय चक्षुरादीनि सन्ति र
थादिनिर्वर्तने वा कुतो निमेषमात्रेण सामर्थ्यं दारूणि च न सन्ति। तस्मान्मायामात्रं स्वप्नदर्शनमिति तादृशमपीष्टानिष्टसू
चकमिति च भाष्ये स्पष्टम्। अत्रान्तःकरणपर्यन्तनष्टवृत्तिकत्वाच्चक्षुरादीनि न सन्तीत्युक्त्या विशिष्टज्ञानाध्यासो दर्शि
तः। सामग्रीव्यतिरेकाच्चानुत्पत्तिं वदता शुक्तिरजतादिस्थलेप्यनुत्पत्तिः सूचिता। तथा च तुर्येपि भाष्ये· मृत्पिण्डा
दिदृष्टान्तैर्हि सतो ब्रह्मण एकस्य सत्यत्वं विकारस्य चानृतत्वं प्रतिपादयति शास्त्रमतः सृष्टिवाक्यानि नोत्पत्त्यादिप
राणि किं त्वैकात्म्यावगमपराणीति· सत इत्यस्याद्यन्तयोः सत्वेन मध्येपि सत्त्वानुमानेन कालत्रयाबाध्यत्वरूपं सत्य
त्वम्। प्रपञ्चस्य त्वाद्यन्तयोरसत्वेन मध्येपि असत्वानुमानेन कालत्रयबाध्यत्वरूपमनृतत्वमित्यर्थः। मध्ये कदाचि राम
त्सत्वेन प्रतीतिस्तु भ्रम एवेति तदाशयः। उत्पत्त्यादीनां भ्रमविषयाणामेव तत्रानुवाद इति वि[illegible]रत्वादिप्रतीतिरपि भ्रम
एवेति न तत्तात्पर्यम्। मृत्पिण्डादिदृष्टान्तस्य चायमर्थः। एकेन मृत्पिण्डेन परमार्थतो मृदात्मना वि[illegible]तेन सर्वं मृन्मयं घट ३०

शरावादिमृदात्मकमितिविज्ञातंभवतीति यथाचतत्रोभयथेतिसूत्रेपिभाष्येस्वाप्नोविकारोवासनामयएवनतुपारमार्थिको
स्तीति।यथातन्त्रान्तरेघटादिप्रपञ्चस्यपारमार्थिकत्वंतथातत्रापिनस्वाप्नस्येत्यर्थः।अस्माकंतुव्यावहारिकोपिप्रपञ्चोदी
र्घस्वप्नएवेतिबोध्यम्।तदनन्यत्वमितिसूत्रेभाष्यम्। यथाचमृगतृष्णोदकादीनामूषरादिभ्योनन्यत्वंदृष्टनष्टस्वरूपत्वात्
एवमस्यप्रपञ्चस्यब्रह्मव्यतिकेणाभावइति।सर्वव्यवहारस्यप्रागब्रह्मात्मविज्ञानात्सत्यत्वंस्वप्नव्यवहारस्येवप्राक्प्रबोधा
दितिचाविभागोपिपरमात्मनिमिथ्याज्ञानप्रतिबद्धोपिभागव्यवहारःस्वप्नवद्व्याहतइतिचान्यत्रभाष्ये।।यस्त्वनिर्वचनीयंस
दसद्विलक्षणंजलादिमृगतृष्णादावुत्पद्यते।एवंब्रह्मणिप्रपञ्चोमृदादौघटादिःस्वाप्नश्चेति।तन्न।तादृशानिर्वचनीयस्याप्रसि
द्ध्यातद्धेतस्यवक्तुमशक्यत्वात्।किंचतस्यसद्भिन्नत्वादसत्त्वमसद्भिन्नत्वात्सत्त्वमापततीतिउभयरूपत्वमेवायातितत्रसत्त्व
मारोपितमितिभेदाभेदयोरिवतयोर्नविरोधः।धर्मद्वयानाक्रान्तस्यलोकव्यवहारेऽभावाच्च।तदुक्तंसांख्यसूत्रे।नासतःख्या
तिर्नृशृङ्गवत्।नानिर्वचनीयस्यतदभावात्।नान्यथाख्यातिःस्ववचोव्याघातादिति।असतःख्यातौनृशृङ्गवच्छुक्तिरजता
देरप्यभानापत्तिः।नचनृशृङ्गमित्यादिशब्दतोबोधात्तद्वासनावश्यकत्वेनतत्रतेषामपिसत्त्वेनमत्पक्षापत्तिः।नह्यासनाथाः
फलबलेनशाब्दबोधमात्रजनकत्वेननतदापत्त्यभावात्।नानिर्वचनीयस्येत्यस्यार्थउक्तएव।यद्यप्यन्यथाख्यातिःसौत्रान्ति

कस्यवाह्यशुक्त्यादौज्ञानधर्मरजतादेरध्यासइतितेनाङ्गीकारात्तथापिहट्टस्थरजतादेरारोपइतिरीत्यावैशेषिकैःस्वकीयैःसाऽऽहृता।ननुभयमपिन
तत्रतदसत्त्वेनतद्रूपस्यसन्निकर्षाभावेनासन्नभासत्वेसन्निकर्षाभावादितिस्वसिद्धान्तव्याघातात्।किंचविशेष्यविशेषणानुयोगिकत्वप्रतियोगिकत्वविशिष्टसंबन्धस्यत्वयाप्यसतएवभानाङ्गीकारात्तदग्रहेऽसंसर्गाग्रहएवपर्यवसानमितिविशिष्टभ्रमवाचकस्या
न्यथाख्यातिरितिवचसोव्याघातात्।किंचज्ञानस्यार्थव्यभिचारित्वेज्ञानेनार्थसिद्धिरितिस्ववचोव्याघातादितिदिक्॥परमार्थ
सारेपि।त्रिगुणाचैतन्यात्मनिसर्वगतेवस्थिताखिलाधारे।कुरुतेसृष्टिमविद्यासवोत्मास्पृश्यतेनयानात्मा।सृष्टिंतद्भ्रममित्य
र्थः।तदप्युक्तंतन्त्रेव·रज्ज्वांभुजङ्गहेतौप्रभवविनाशौयथानस्तः।जगदुत्पत्तिविनाशौनचकारणमस्तितद्वदिहेतिभुजङ्गहेतौ·भुज
ङ्गभ्रमहेतौनचकारणमस्तीतिकिंत्वन्यथाभानात्मिकाऽविद्यैवसेत्यर्थः।किंचानिर्वचनीयोत्पत्तौघटादिनामृदादेरिवब्रह्मणोपिवि
कारित्वापत्तिः।भ्रमविषयेणतुनविकारित्वंकामुककृतैःकान्ताविषयैःस्मृताकिंनुमृतानुकिमनसिमेलीनाविलीनानुकिमितिविक
ल्पैःकान्तायाविकारित्वाभावात्।वस्तुतोमृदादिघटादिविकारोभ्रमएवनतुकोपिपदार्थइतितदनन्यत्वश्रुतिसूत्रेणोक्तम्।किंचभ्रमसि
द्धसामग्रीव्यतिरेकेपियथासामग्र्याशुक्त्यादौरजताद्युत्पत्तिस्तथासामग्र्याविषयासत्त्वेपितदसन्निकर्षेज्ञानाङ्गीकारेपिनबाध
कम्।किंचानिर्वचनीयोत्पत्तौतस्यतस्यताहृशरजतत्वाद्याश्रयत्वेनतज्ज्ञानस्यभ्रमत्वानापत्तिः।तस्य[illegible]दृशी[illegible]धर्मप्रकारकत्वाभा
[illegible]एवमुद्[illegible]

वात्। नचरजतत्वमेवानिर्वचनीयमाश्रयस्तुशुक्तिरेवेति न दोषः। त्वयापि ज्ञातेर्वारंवारमुत्पत्त्यनङ्गीकारात्। किंच ज्ञातेरिव तदाश्र
यत्वस्यापि तादृशस्य शुक्तौ सत्त्वेन पूर्वोक्तदोषतादवस्थ्यम्। तदुक्तं योगसूत्रे विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठमिति। विपर्यय
इति लक्ष्यं मिथ्याज्ञानमिति लक्षणं तद्विवरणमतद्रूपेति तद्रूपप्रतिष्ठत्वाभाववत्। यज्ज्ञानप्रतिभासिस्तुरजतत्वादि तदाश्रयत्वा
भाववद्विशेष्यकमित्यर्थ इति मिश्राः। व्यासस्यापीदमेव च मिथ्याज्ञानमभिप्रेतं तेनान्यतल्लक्षणानुक्तेः। सांख्यदूषितानिर्व
चनीयख्यातेरपि तत्सूत्रानारूढत्वाच्च। तेन सांख्योक्तसदसत्ख्यातेरेव तदभिमतत्वं लक्ष्यते। किंच शक्तिरजतस्थलेऽधिष्ठान
ज्ञानेन तन्नाशो वाच्यः। न च ज्ञानस्य वस्तुनाशकता दृष्टा अतएव गौतमादिभिरुत्पत्तिस्तत्र नोक्ता। अन्यथा घटादिवत्तत्राप्युत्पत्ति
मेव वदेयुः। शुक्त्यादि समवायिकारणं चाकचिक्याद्यसमवायिकारणं दोषो निमित्तकारणमिति व
क्तुं शक्यत्वात्। अन्यथाख्यातिरित्येव चोक्तं तदीयैः। अन्यथाख्यातिरित्यनेन प्रकारस्यान्यत्र सत्त्वं सूचितम्। तत्संबन्धोप्येव
मेव तदनुयोगिकत्वमप्येवमेवेति सूचितम्· संयोगसमवाययोः संबन्धत्वस्यानुयोगित्वादिभाननियतत्वात्। बुद्धिसद्धा तद्भ्र
मप्रकारत्वमेव मिथ्यात्वम्। रजतं पश्यामीत्यनुव्यवसायोपि दोषवशाच्चाक्षुषत्वांशे भ्रम एव। न च दोषस्य रजतज्ञानत्वत्वया
कार्यतावच्छेदकं वाच्यं तद्वरं रजतत्वमेव लाघवात्तथोचितमिति वाच्यम्। उत्पत्तिनाशकल्पनापेक्षया भ्रमास्थले क्लृप्तस्य तस्ये

ल·सं ३२

वतत्त्वौचित्यात्.अतएवब्रह्मदृष्टिरुत्कर्षादित्यधिकरणेभाष्येप्रसेत्येवहिकेवलंशुक्तिकारजतमस्तीत्युक्तम्।मुग्धेऽर्धसंपत्तिरिति
सूत्रेभाष्येपिनहिस्वच्छस्फटिकोऽलक्तकसंयोगाद्रक्तोभवतिभ्रमत्वाद्रक्तस्थत्वाभिमानमात्रस्येत्युक्तम्।नव्यावहारिकप्रा
तिभासिकयोः सदसद्विलक्षणत्वाविशेषेणभेदस्यवक्तुमशक्यत्वात्. विशेषदर्शनबाध्यत्वमपितुल्यम्।तदुक्तंपरमार्थसारे।ज्व
लनाम्बुमोद्गतिभिर्विविधाकृतिरम्बरेयथाभाति. तद्वद्विष्णोः सृष्टिःस्वमाययाद्वैतविस्तराभातीति।अत्रभातीत्येवोक्तंनतूत्पद्यतइ
ति।आकाशेजलरेखावच्छिलायामङ्कुरवद्विविधाकृतेस्तत्रस्वरूपायोग्यत्वेनासंभवात्।स्वमाययाचात्मनास्वरूपया।श्रीहर्षे
णाप्युक्तम्।परकीयरीत्येदमुक्तमनिर्वचनीयत्वंविश्वस्यपर्यवस्यतीति।वस्तुतस्तुवयंसर्वप्रपञ्चसत्त्वासत्त्वव्यवस्थापननिवृत्ताः
स्वतःसिद्धेचिदात्मनिब्रह्मतत्त्वेकेवलेभारमवलम्ब्यचरितार्थाःसुखमास्महे।येतुस्वपरिकल्पितसाधकदूषणव्यवस्थयावि॰
चारमवतार्यतत्त्वंनिर्णेतुमिच्छन्तितान्प्रतिब्रूमोनसाध्वीयंभवतोविचारव्यवस्था।भवत्कल्पितव्यवस्थयैवव्याहतत्वादिति।
सत्त्वासत्त्वव्यवस्थेति. तदन्यतरव्यवस्थेत्यर्थः।भारंप्रातिभासिकप्रपञ्चभारम्।अनिर्वचनीयत्वंनिर्धार्यसत्त्वासत्त्वान्यत
ररूपेणानिर्वचनीयत्वंननुसदसद्विलक्षणत्वमितितद्व्याख्यातारः॥अतएवभागवतेउक्तम्।ऋतेऽर्थंयत्प्रतीयेतनप्रतीयेतचा
त्मनितद्विद्यादात्मनोमायांयथाभासोयथातमइति।यद्धिविनाप्यर्थमात्मन्यधिष्ठानेप्रतीयेत. सच्चात्म[illegible]नप्रतीयेततदसत्यया

राम ३२

प्रत्ययरूपमात्मनो मायां विद्यात्· यथा आभासो द्विचन्द्रादिः। यथा च तमो राहुर्ग्रहमण्डले सन्नपि न प्रतीयते इत्यर्थः। असदर्थप्र
काशनस्यैव मायात्वादेवमेव युक्तम्। तदुक्तं बृहद्भारतीये। नासद्रूपा न सद्रूपा माया नैवोभयात्मिका· अनिर्वाच्या ततो ज्ञेया मिथ्या
भूता सनातनीति। तस्यायमर्थः। व्यवहारकाले सत्त्वेन प्रतीतेर्न केवलमसद्रूपा प्रतिक्षणं परिणामितया म[illegible]र्बाधदर्शनाद्वि
शेषदर्शनबाध्यत्वाच्च न केवलं वास्तवसद्रूपा· अत एव वास्तवोभयरूपापि न विरोधाच्च। अत एवानिर्वाच्या सत्त्वे वा सत्त्वे वेति निर्धा
र्यैव वक्तुमशक्या तर्हि किमुभयविलक्षणा नेत्याह मिथ्याभूता प्रतिभासमात्रविषयत्वात् सनातनी ब्रह्मपरंपराजनकपरंपराक
वासनारूपेणेति तस्मात्क्षरोऽपि तं सत्त्वं परमार्थतत्त्वसत्त्वमित्येव युक्तम्। तदुक्तं च तत्कारणमव्यक्तं नित्यं सदसदात्मकमिति। ई
श्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये इति भाष्यस्याप्ययमेवार्थः। अविद्याऽवासनारूपा।
प्रकृतैतावत्त्वं हि प्रतिषेधतीति सूत्रे अथात आदेशो नेतीति श्रुतिव्याख्यावसरे पूर्वप्रतिषेधो भूतराशिं प्रतिषेध इति उत्तरो वासनाराशि
मिति भाष्योक्तेः। ईश्वरस्यात्मभूते इत्यनेनारोपितसत्त्वेत्युक्तम्। अविद्याकल्पिते इत्यनेनासत्त्वमुक्तम्। एवमेवाविद्याकल्पितेन नामरूपलक्ष
णेन भेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्म परिणामादिसर्वव्यवहारास्पदं पारमार्थिकेन रूपेण सर्वव्यवहारा
तीतमिति भाष्यमपि व्याख्येयम्। तत्राविद्यापूर्वतनसंस्काररूपा· व्याकृते स्थूलमव्याकृते तज्जन्यसंस्कारः। अस्थूलं तदन्त

ल॰ मं॰ रप्रतिपत्तौ रंहति संपरिष्वक्तः इति सूत्रे भाष्यं जीवो मुख्यप्राणसचिवः सेन्द्रियः समनस्कोऽविद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं वि
२३ धाय देहान्तरं प्रतिपद्यत इति। तत्र पूर्वप्रज्ञाशब्देन प्रतिपत्तव्यदेहविषयउद्बुद्धसंस्कारः। वक्ष्यति तत्रैव कर्मोपस्थितप्रतिपत्त
व्यदेहविषयभावनादीर्घीभावमात्रं जलूकयोपमीयते इति। कर्मोपस्थापितः स्वकृतोद्बुद्धेसंस्कारेण बुद्धिविषयः कृतमित्यर्थः
। एवमेव एवंजातीयकमन्यदपि भाष्यं व्याख्येयम्। कौर्मेपि विश्वपृथ्व्यादि चित्तस्थं न बहिःस्थं कदाचन। स्वप्नभ्रममदाद्येषु सर्वैरेवा
नुभूयते इति। अत्र न कदाचनेत्युक्त्या व्यवहारदशायामपि तथात्वमेवोक्तं चित्तशब्देन ईश्वरोपाधिरपि। नेह नानास्ति किंचने
त्याद्या श्रुतिरपि बहिः सर्वप्रकारसत्तामनारोपितां निषेधति॥ अत एव वाचस्पतिमिश्रा अपि अध्यासभाष्यव्याख्यायामाहुः।
मृगतृष्णाजलादि न सत् नासत् नापि सदसत् विरोधादित्यनिर्वाच्यमेव मरीचिषु तोयमास्थेयम्। अध्यस्तं च परमार्थतोयमिव
भासते। अत एव पूर्वदृष्टमिव तत्त्वतस्तु न तोयं न च पूर्वदृष्टं किं त्वनिर्वाच्यमनृतं देहादिप्रपञ्चोऽप्यनिर्वाच्यः। पूर्वोऽपि मिथ्याप्रत्ययो
पदर्शित एव चिदात्मन्यध्यस्यते चिदात्मा तु श्रुत्यादिगोचरः सत्त्वेनैव निर्वाच्य इति। अस्यार्थः। न सत् बाधयोगात्। नासत् अस राम॰
तश्शाशृषाद्यनुभवविषयत्वाभावात्। नापि सदसत् अनारोपितोभयात्मकम्। अनारोपितोभयसत्त्वस्य विरुद्धत्वात्। अ
निर्वाच्यमेव। आरोपितसत्त्वादन्यतरधर्मेण निर्धार्य वक्तुमशक्यं तद्देहाद्यनृतमनिर्वाच्यमिति। अत्र[illegible]म मत्। अनिर्वाच्यत्व २३

[illegible] एवमुदा[illegible]ध्यादिकम

सुक्तरीत्यानृतत्वेनैवनिर्धार्यंवक्तुमशक्यत्वात् यदध्यस्यते तदनृतमनिर्वाच्यमित्यर्थः।अपूर्वः ज्ञानात्पूर्वमविद्यमानः नदाहमि
थ्याप्रत्ययोपदर्शित एवेति मिथ्याप्रत्ययशब्देन तज्जन्यः संस्कारः।अतएवाध्यस्य तद्दत्वे वोक्तेन त[illegible]धते इति।अध्यस्यतइ
त्यस्येत्युच्यत इति शेषः।उपदर्शनस्यैवाध्यासत्वात्। निर्धार्यवाच्यत्वाभाव एवानिर्वाच्यत्वमिति ध्वनयन्नाह।सत्वेनैव निर्वाच्य
इतीनि।सदसद्विलक्षणत्वस्यानिर्वाच्यत्वपदार्थत्वे तदुत्पत्त्यङ्गीकारे चापूर्व इत्युक्तस्य संगतिः।अत्रैवकाराधिक्यं च।एवं चासत
एवारोपितसत्त्ववतः पुरोवर्तिनि कल्पनात्संनिकर्षोपितादृशः सूपपादः।सन्निकर्षादिनाचित्तादिदोषवशाज्ज्ञानमित्युपपादितम्।
एवमध्यासोपि अनिर्वाच्य एव।तदुक्तं तैरेव तं केचिदन्यत्रान्यधर्माध्यास इति भाष्यावतारणे स चायमध्यासोऽनिर्वचनीयः सर्वेषा
मेव संमत इति।नानिर्वचनीयस्य ख्यातिरिति सांख्योक्तं तत्खण्डनं तु सदसद्विलक्षणमुत्पद्यतेः निर्वचनीयमिति बाह्यैकदे॰
शिमतसिद्धस्य न तूक्तानिर्वचनीयवादस्य।इदमेवानिर्वचनीयत्वं सदसत्ख्यातिशब्देन तेनोक्तमिति बोध्यम्।।परमार्थसारेऽपि·
सत्यमिव जगदसत्यं मूलप्रकृतेरिदं कृतं येन· तं प्रणिपत्योपेन्द्रं वक्ष्ये परमार्थसारमिदमिति·प्राणाद्यनन्तभेदैरात्मानं संवित
त्येन्द्रजालमिव संहरति वासुदेवः स्वविभूत्या क्रीडमान इवेति च· कृतमित्यस्य दर्शितमित्यर्थः।संवितत्येत्यस्य दर्शयित्वे
त्यर्थः।अन्यथात्मनो विकारित्वापत्तिः। स्वविभूत्या वासनारूपया सत्यमिवेतीवेन तस्यारोपितत्वं स्पष्टमेवोक्तम्। यद्वापूर्व

CC-0. In Public Domain. Digitization by eGangotri

पूर्ववासनावशात्तत्त्वेनापि प्रतीतिः। व्यवहारकालमात्रे तत्प्रतीतेः सत्यमिवेत्युक्तम्। एतेनासतो भाने बौद्धमतप्रवेश इत्यपा
स्तम्। तेन तत्रारोपितसत्त्वस्याप्यनङ्गीकारात्। आत्मनस्तेनानित्यत्वाङ्गीकाराच्च। परमार्थसारेऽपि-अमलः सकृद्विभातश्चैत
न्यात्मा खवद्व्यापी· सर्वविकल्पनहीनः शुद्धो बुद्धोऽजरोऽमरः शान्त इत्यात्मस्वरूपमुक्तम्। श्रुतिषु च स्पष्टमेव तथोक्तम्· विकल्प
नं नाम स्वरूपे इदमुपलक्षणम्। उत्पत्तिविनाशबहिष्ठादिकमपि सत्यत्वेनारोपितमीश्वरेण· तस्य सत्यसंकल्पत्वात्सृष्ट्याद्यकाले
चैष संकल्पस्तस्य। यद्वा तत्तत्सामग्रीभ्रमस्तत्तद्विषयभ्रमे कारणमिति तत्कृतकार्यकारणभावस्य तद्विषये नादिवासनावशादारोपि
तावेवोत्पत्तिनाशावारोपितत्वमपलप्य काणादसांख्याभ्यामुक्तौ· तत्र सांख्यस्यापि सूक्ष्मतन्मात्रेभ्यः परमाण्वादिक्रमेणैव
स्थूलभूतोत्पत्तिरभिप्रेतेति योगवृत्तौ स्पष्टं निरूपितम्। तस्माद्भ्रमरूपाः स्थूलाऽविद्यावासनारूपाच्चाव्यक्तपदवाच्यात्सूक्ष्माः वि
द्या व्यवहारकाले स्थूलाविद्यायाः सा कारणमिति तस्या एव कारणत्वेन निर्देशो व्यक्तम् कारणमित्यादौ। एतत्स्पष्टो तज्जन्मानुप
लम्भात्तस्य नित्यत्वोक्तिर्नेया। उपनिषद्भाष्येऽजामिति मन्त्रे अजामित्यस्य यौगिकत्वेन जन्माभावपरतया व्याख्यानमप्येवमेवने
यम्। संस्काराणामपि त्रिगुणत्वात् लोहितशुक्लकृष्णा गुणत्वं तस्याः समूहाभिप्रायेण चैकवचनं बोध्यम्। वासनारूपैव च सा मूल
प्रकृतिरित्युच्यते। अनिर्वच [illegible] त्वादिभिरपि स्वसमानाधिकरणस्वावच्छिन्नवृत्तिकान्यात्यन्ताभावस्य प्रतियोगित्वरूपं मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

थ्यात्वंवद्भिः स्वीकृतमेववस्तुनोऽसत्त्वम्। अन्यथाऽभावपदेविरोध्यर्थत्वान्नञः प्रतियोगिसामानाधिकरण्यंतस्यवक्तुमशक्यम्.
प्रतियोग्यसामानाधिकरण्यस्यैवतत्रविरोधपदार्थत्वात्। ममतुस्वप्रतिभाससमानाधिकरणेत्याद्युक्तमेवभ्रमविषयत्वंमिथ्या
त्वम्. ध्वनितंचेदंदेवताधिकरणेकल्पतरुणाभ्रमात्संस्कारतोऽप्यन्यामण्डूकमृदुदाहृतेः। अविद्यानादिभावात्मामतावाचस्पते
रिहेत्यनेन। अत्रवाचस्पतेर्मतेत्यनेनसूत्रभाष्यकृतोर्भ्रमतत्संस्काररूपैवाविद्येतिमतंसूचितम्। इहदेवताधिकरणेऽनेनवाच
स्पतेरप्यन्यत्रतत्पक्षाभिनिवेशःसूचितः। वस्तुतोयथामण्डूकामृदोनिःसरन्तीत्युदाहरणमपिवासनासमूहस्याविद्यात्वे
नसमूहादेकैकस्यनिःसरणेनोपपन्नम्। सनत्सुजातीयभाष्येभगवत्पादैरप्युक्तंमोहोमृत्युरितिपद्येमोहोमिथ्याज्ञानमना
त्मन्यात्माभिमानः। अनेनाग्रहणान्यथाग्रहणात्मिकाऽविद्यासूचितेति। अग्रहणमात्मस्वरूपाग्रहणंतन्मूलकमिथ्याज्ञाना
त्मिकेत्यर्थः। द्युभ्वाद्यायतनाधिकरणेचदेहादिष्वनात्मसुअहमस्मीत्यात्मबुद्धिरविद्येतिभाष्येउक्तम्। अध्यासभाष्येऽपिविष
यविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौसिद्धायांतद्धर्माणामपिसुतरामितरेतरभावानुपपत्तिरि
त्यतस्तयोरध्यासोमिथ्येतिभवितुंयुक्तमित्यनेनमिथ्याभूतेनालीकेनाध्यासेनसकललोकशास्त्रव्यवहारानुपपत्तिरितिपूर्वपक्षं
कृत्वा तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननि

मित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोयं लोकव्यवहार इति सिद्धान्तितम्। तस्यैव चाध्यासस्य प्रहाणायाध्या
त्मशास्त्रमिति तदर्थः। एतच्चाग्रे भाष्ये एवोपपादितम्। अध्यस्येत्यस्यैव विवरणं सत्यानृते मिथुनीकृत्येति। सत्यं ब्रह्म· नञ्कृतम
नृतमसत्· एतत्पदार्थमात्रे तत्र सत्यं विशेष्यमनृतमुपाधयो विशेषणम्। ऐतरेयोपनिषदि सर्वाण्येवैतानि प्रज्ञानस्य नामधेया
नि भवन्ति एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि चेत्यादिना यच्च स्थावरमित्यन्तेन स्पष्टमेवैतदुक्तम्। एष प्रज्ञानात्मे
ति व्याख्यातम्। विशेष्यांशस्यैव च नामधेयं भवति न हि घट इति घटत्वस्य नामेति कश्चिदभ्युपैति· श्रुत्यन्तरेपि भोक्ता भोग्यं प्रे
रितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्म चैतदित्यत्र भोग्यजडवर्गस्य ब्रह्मत्वमुक्तं तच्चोक्तरीत्यैव तदनन्यत्वमिति सूत्रेपि भाष्येउ
क्तम्। प्राक्चात्मावगतेरव्याहृतः सर्वो लोकव्यवहारः सत्यानृतविषय इति· इदं च मिथ्याज्ञाननिमित्त इति प्रतीके मिथ्याज्ञानम
ध्यास इति व्याचक्षाणैर्लोकव्यवहार इति प्रतीके लोकानां व्यवहारः स चायमहं ममेदमिति च व्याचक्षाणैर्वाचस्पतिमिश्रैः स्पष्टी
कृतम्। सर्वानर्थमूलत्वादिदं ममाहमिदमित्येव व्यवहारः साक्षादुक्तः स च व्यवहारमात्रस्योपलक्षणम्। नैसर्गिक इत्यनेन पू
र्वपूर्वभ्रमजन्य उत्तरोत्तरः संस्कारस्ततश्चोत्तरोत्तरभ्रम इति सूचितम्। तत्र देहादावहमित्यध्यासः शुद्धविषय एव जडचेतनयो
र्विषयविषयिणोरन्योन्यस्मिन्नन्योन्यात्मकतामध्यस्येति भाष्योक्तेः। न चाध्यस्यमानस्य मिथ्यात्वेन ब्रह्मणोपि मिथ्यात्वाप

त्तिः। अध्यासविषयस्य मिथ्यात्वमित्येव नियमात्। सच क्वचिदध्यस्यमानस्य क्वचिदधिष्ठानस्य तत्त्वेनोपपन्नः। यत्त्वेतद्दोष
भियासंसृष्टात्माध्यासइति केश्चिदुक्तं तन्न। उक्तभाष्यासारस्यात्। यत्तुअध्यासः किंनिमित्तकस्तत्राह मिथ्याज्ञाननिमित्त इति·
मूलकारणाविद्यारूपभावपदार्थनिमित्तकइत्यर्थः। तच्च लोकव्यवहार इत्यस्य विशेषणम्· लोक्यते मनुष्योहमिति मन्यत इ
तिज्ञानोपसर्जनोऽर्थाध्यासः तद्विषयो व्यवहारः अध्यस्यमानार्थविषयो व्यवहार इति ज्ञानाध्यासोऽत्र व्यवहारः। सचोक्ताऽवि
द्यानिमित्तकइति साचाविद्यासंस्कारकालकर्मादिरूपेण परिणताध्यासनिमित्तमिति। तन्न। त्रयाणामप्यध्यासपदार्थत्वेना
ध्यस्य मिथुनीकृत्येति क्त्वाप्रत्ययानुपपत्तेः। नच वस्तुतोऽभेदेप्यपौर्वापर्येपि विशेषणभेदेन वस्तुभेदं परिकल्प्य तत्प्रतिपत्ति
क्रमेण पौर्वापर्यं च परिकल्प्य तदुपपत्तिरिति वाच्यम्· भेदकविशेषणानुपलम्भात्। प्रतिपत्तिक्रमाननुभवाच्च· रूढेर्योगा
पहारकत्वेन लोकव्यवहारपदयोर्यथाकथंचित्स्वाभिमतयोगेनाध्यासपरतया व्याख्यानस्यानौचित्याच्च·। तादृशव्याख्यानं वि
नाभाष्यानुपपत्तेरभावाच्च। किंच ज्ञानाध्यासो यथा प्रतिमादौ देवताद्यध्यासो यथा वाऽसन्निकृष्टे पर्वतादौ भ्रमात्मकवन्ह्यनु
मितौ विषयस्यासत्त्वेन योध्यास इति वदन्तिनव्याः। तर्हि सर्वत्र तथैवास्तु किमनेन द्वैविध्येन। किंचातिरिक्ताविद्याया अपि सं
स्कारादिरूपेण परिणामद्वाराकारणत्वेन लाघवात्· क्लृप्तसंस्कारादृष्टैरेवोपपत्तौ नत्कल्पने मानाभावाच्च· मिश्रव्याख्याने

तु अध्यस्यैनेनानन्तर्यलाभेपि तस्य निमित्तत्वालाभात् तदुक्तिः। भ्रमरूपाध्यासेन कथं व्यवहार इति शङ्कापनयनाय च
तदुक्तिः। मिथ्याज्ञानविषयेण रज्जुसर्पादिना भयपलायनादिव्यवहारवत् सर्वोपि व्यवहारस्तन्निमित्तक इत्याशयः। किं
च सर्वसंमताध्यासविषयकोयमध्यासो नाम स्मृतिरूपः परत्र पूर्वदृष्टावभास इति प्रश्नोत्तरवत् सर्वसंमताविद्याविषये प्र
श्नोत्तरानुपलम्भेन सा न भाष्यसंमता। पूर्वदृष्टस्य परस्यावभास इत्यर्थः। परत्रेत्युक्तेः परस्येति लब्धम्। अवसन्नाभासोऽ
वभासः। उत्तरकालिकबाधेन तस्यावसादात्। पूर्वदृष्टत्वं च संस्कारद्वारोपयोगितच्च जन्मान्तरीयमपि तदाह स्मृतिरूप इ
ति। स्मृतिसदृश इत्यर्थः। संस्कारजन्यत्वेन च तत्सादृश्यं न तु स्मृतिरेव पूर्वानुभूतत्वस्फुतत्वानुल्लेखात्। एतच्च विवेचयिष्य
ते। अनेन च संस्कारोध्यासनिमित्तमित्युक्तमेवेति तदाकाङ्क्षाभावेन तदंशेपि प्रश्नोत्तराभावः। अथ चाध्यासातिरिक्ताऽवि
द्या न काचिदिति सूचयितुमेव तमेतमेवं लक्षणमध्यासं पण्डिता अविद्येति ब्रुवत इत्युक्तम्। भावरूपायाः कारणाविद्याया अ
तिरिक्ताया भाष्यसंमतत्वेऽध्यासमपीति ब्रूयात्। तमेतमेवंलक्षणमित्यक्षरस्वारस्येनात्राहं ममेत्यध्यास एवाविद्या। वासुदे
वः सर्वमिति विद्यायां तस्यैव विरोधित्वात्। रागद्वेषमोहादिवासनास्तु वासनापदेनैव वाच्याः। मायात्वं तु साधारणम्। त
त्राप्यविद्यापदप्रयोगस्तु अन्यान्वसामान्याङ्गेण इति लभ्यते। अत एवोपपद्यते चोपलभ्यते चेति सूत्रे भाष्ये उक्तम्। ई

श्वरस्यवैषम्यकारणत्वमित्यर्थः।नचाविद्याकेवलावैषम्यकारणम्।तस्याएकरूपत्वात्।रागद्वेषवासनाक्षिप्तकर्मापेक्षत्वे
तुतस्याईश्वरस्यापितदपेक्षत्वाद्वैषम्यहेतुत्वमुपपन्नमिति।एकरूपत्वादित्यस्याहंममेत्यध्यासरूपाविद्यायाःसर्वेषामेकरू
पत्वादित्यर्थः।तत्तत्प्राणिकर्मवशाद्बीजाङ्कुरन्यायेनानादिपूर्वपूर्ववासनयैवघटादिभ्रमरूपांसृष्टिंसाकरोतीतिबोध्यम्।किं
चतत्तुसमन्वयादितिसूत्रेसाध्यश्चेन्मोक्षोऽभ्युपगम्येततअनित्यएवस्यादितिभाष्येउक्तम्।तत्रानित्यत्वंनाश्यत्वमेव।तवतुअजन्या
याअविद्यायानाश्यत्ववज्जन्यस्यापिमोक्षस्याविनाशित्वेकिंबाधकंजन्यत्वनाश्यत्वयोःपरस्परव्याप्तेरेवलोकेदृष्टत्वाच्च।एवंच
जन्याऽविद्यानाश्याचेत्युक्तमेव।योगसूत्रेप्युक्तम्।अनित्याशुचिदुःखानात्मसुनित्यशुचिसुखात्मख्यातिरविद्येतिव्याससूत्रेपि
एतद्विलक्षणाविद्यानुक्तेस्तस्यापीदमेवसम्मतमितिलक्ष्यते।अतएवपञ्चवृत्तिर्मनोवद्व्यपदिश्यतइतिसूत्रेपरमतमप्रतिषिद्ध
मनुमतंभवतीतिन्यायेनयोगशास्त्रप्रसिद्धाःप्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपामनसःपञ्चवृत्तयःपरिगृह्यन्तेइतिभाष्ये
उक्तम्।परमार्थसारेपि।रज्ज्वांनास्तिभुजंगःसर्पभयंभवतिहेतुनाकेन।तद्वद्द्वैतविकल्पभ्रान्तिरविद्यानसत्यमिदम्।एतत्त
द्स्यकारंयदनात्मन्यात्मभ्रान्त्यानविदन्तिवासुदेवंसर्वात्मानंजनामूढाइति।एतद्भ्रान्तिरूपम्।उत्तरार्द्धेननविदन्त्यनये
तिअविद्यापदव्युत्पत्तिर्दर्शिता।एवंचसिद्धंभ्रमस्तत्संस्काररूपाचाविद्येतिसाचजत्येवेतिनैकविज्ञानेनसर्वविज्ञानप्रतिज्ञाभङ्गः॥

कृ.म.
३७

परमार्थसारेप्युक्तम्। हिमफेनबुद्बुदादिवज्जलस्य धूमोद्गमो यथा वह्नेः। तद्वत्स्वभावभूता मायैषा कीर्त्तिता विष्णोः। एतां द्वैतविकल्पभ्रमस्वरूपां विमोहिनीं मायामिति। स्वभावभूता तज्जननस्वभावत्वात्तस्य जलादेः फेनादिजनकत्वस्वभाववत्। आध्यासिकसंबन्धेन तस्यानित्यसंबद्धत्वाद्विष्णौ तत्स्वभावारोप इति बोध्यम्। विमोहिनीमुपाधिस्वस्यस्वस्यात्तदुक्तं तत्रैव विमोहयतीवात्मानं स्वमायया द्वैतरूपया देव इति भ्रान्तस्तवमोहाभावादिवेति। तेनारोपित एव मोह इति बोध्यम्। अत एव तृतीये सामान्यात्त्विति सूत्रे भगवत्पादैरुक्तम्। न हि ब्रह्मातिरिक्तं किंचिदजं संभवति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यवधारणादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानाच्चेति। अत एव न वियदश्रुतेरित्यधिकरणे वियदादीनामजन्यत्वे प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्य इति सूत्रेणैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्ग आपादितः। मृत्पिण्डादिदृष्टान्तेन कारणज्ञानेन कार्यस्यासत्यत्वज्ञानमिति हि ततो लभ्यते। तदुक्तमव्यतिरेकाच्छब्देभ्य इति शब्दाच्च प्रकृतिविकृतिन्यायेनाव्यतिरेकात्प्रतिज्ञासिद्धिरवगम्यत इति तदर्थः। एतेनाकाशस्याजन्यत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्गापादनमभ्युच्चयः। अविद्यानुरोधेन सर्वपदसंकोचस्यावश्यकत्वेनाकाशातिरिक्तपरत्वेनापि तत्संकोचादिरप्यपास्तम्। किंच तत्रैव यावद्विकारं तु विभागो लोकवदिति सूत्रेण कार्यत्वस्य भेदव्याप्यत्वबोधकेना[illegible]स्यैवाविद्याया अतत्त्वबोधनात्। विकारः कार्यं विभागो भेदः। अस्ति त्वाकाशे पृथ्व्यादिभेदः।

राम
३७

एवमविद्यायांसुतरांब्रह्मभेदसत्त्वे[illegible]कार्थत्वमापततिब्रह्मणितुनकिंचिन्निरूपितोभेदः।अधर्मकत्वेनवैधर्म्यसंभावनाभावात्।
एषएववह्निभेदोभेदहेतुर्वायद्वैधर्म्यमितिप्रकाशाकाशाद्युक्तेः।नचाजन्यंसद्यद्विनाशितदन्यत्वरूपमत्रकार्यत्वंसाध्यंपराधी
नसत्ताकत्वरूपंवाकार्यत्वंसाध्यम्।अविद्यायाअजन्यत्वेपिब्रह्मण्यध्यस्तत्वेनपराधीनसत्ताकत्वंविनाशित्वाद्याद्यमपित
त्रेतिवाच्यम्।सामान्यप्रवृत्तसूत्रस्यसंकोचेनव्याख्यानेमानाभावात्।अविद्यायाअजन्यत्वबोधकसूत्रान्तराभावाच्च।आका
शस्याप्यध्यस्तत्वेनान्यैस्तत्रापिजन्यत्वंनसिद्ध्येत्।अजामेकामितिश्रुतिरविद्यायाअनादित्वबोधिका।अनादिमाययासुप्तो
यदाजीवःप्रबुध्यते।अजमनिद्रमस्वप्नमद्वैतंबुध्यतेतदाइतिभाष्योक्तासंप्रदायविदुक्तिश्चतस्याअजन्यत्वेनमानम्।आद्याया
रूपकेणोपपत्तेः।अतएवाजामेकामितिश्रुतौतेजोऽबन्नानामव्याकृतनामरूपाप्रागवस्थाजारूपकेणनिर्दिष्टेतिभाष्योक्तम्।अ
नादित्वमपिपरंपरानादित्वेनेतिवक्ष्यामः।अक्षरात्परतःपरइतिश्रुतावविद्यायाअक्षरत्वश्रुतेश्च।तद्यदियथाकथंचित्तत्त्व
ज्ञानात्प्रागनिवृत्तेः।तर्हिअनादित्वमपितथैवास्तु।नचतस्याजन्यत्वेमूलकारणेनवस्थापत्तिः।ब्रह्मणस्तूपाधिसहकारंवि
नानजनकत्वम्।अतएवपरमाण्वादीनांनित्यत्वंपरैःस्वीकृतमितिवाच्यम्।वासनारूपाविद्यासहकारेणस्थूलाविद्याया
स्तत्सहकारेणचसूक्ष्माविद्यायाब्रह्मजन्यत्वेनानवस्थापत्त्यभावात्।अतएवप्रकाशादिवन्नैवंपरइतिसूत्रेभाष्येमूलमह

ल·मं· त्यनभ्युपगमेः नवस्थाप्रसङ्गाद्यामूलप्रकृतिरभ्युपगम्यते तदेव नो ब्रह्मेत्युक्तम्। तवत्वजन्याविद्यायामपि तत्सत्त्वात्तदेव नो ब्र
३८ ह्मेत्यस्याः संगतिः स्पष्टैव। अत्र कार्यत्वमात्रं साध्यं न तु यद्भेदस्तत्कार्यत्वम्। तेन घटानां परस्परं कार्यत्वाभावेपि परस्परं भेदव्यव
हारोपपत्तिः। आरोपितधर्मवति भेदो विकारत्वं चास्त्येव। रज्जूरगस्थले आरोपितोरगत्वे नैव रज्जुर्विकारत्वव्यवहारात्। किंच सर्व
शक्तिमयोत्थात्माशक्तिमण्डलताण्डवैः। संसारं तन्निवृत्तिं च करोत्यविरतोदयमिति स्मृतौ शक्तिमण्डलत्वेन मायोक्ता। मायां तु प्र
कृतिं विद्यान्मायिनं तु महेश्वरम्। अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् इति श्रुतौ चाविद्यायाः सावयवत्वमुक्तम्। तेन जन्यत्वं
मावश्यकम्। घटादिवत्। अस्यावयवेत्यत्र संधिरार्षः। यद्वास्य महेश्वरस्य मायावयवानामेव च तदवयवत्वम्। तद्विशिष्टस्यैव महे
श्वरत्वात्। किंच सत्तास्फूर्त्यनुरोधेन तस्या ब्रह्मकार्यत्वमावश्यकम्। वासनासमूहरूपाविद्याया अपि योगिनां सत्त्वेन स्फूर्तिसत्त्वात्।
किंच चतुर्थपादस्याद्याधिकरणे तद्धेदं तर्ह्यव्याकृतमासीदिति श्रुतेः। इदं व्याकृतं नामरूपविभिन्नं जगत्। प्रागवस्थायां परित्यक्त
व्याकृतनामरूपं बीजशक्त्यवस्थमित्यर्थं दर्शयित्वा परमेश्वराधीनात्त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते। अर्थवती राम·
च सा। न तया विना परमेश्वरस्य स्रष्टृत्वं संभवति शक्तिहीनस्य प्रवृत्त्यनुपपत्तेः। अविद्यात्मिका हि सा बीजशक्तिः परमेश्वराश्रये
तिभाष्ये उ[illegible]ानन्त्येपि बीजशक्तिरित्येकवचनं जात्यभिप्रायेण। अनेन हि वासनानामेवाविद्यात्वस्य ३८

रूपमेवोक्तम्। प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणोऽविद्यासर्वशक्तियोगः सर्वज्ञं सर्वशक्तियोगं महामायं च तद्ब्रह्मेत्यन्यत्रोक्तम्। अत्राविद्ययेत्यस्य पूर्वैर्नाद्विधमिथ्याज्ञानजन्यवासनयेत्यर्थः। शक्तिसमूह एव च महामायेति बोध्यम्। एतेनाविद्याऽजन्या कश्चिद्भावपदार्थो वासनाश्रय इत्यपास्तम्। अतिरिक्ततत्कल्पने मानाभावात्। अत एव प्रपञ्चस्यैककारणकत्वप्रवादनिर्वाहः। स्वजन्यातिरिक्तसहकार्यनपेक्षत्वात्। यत्तु प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति सूत्रे भाष्ये च ब्रह्मैवोपादानकारणं निमित्तकारणं चेत्युक्तम्। तस्य स्वसमकक्षनिमित्तकारणाभावे तात्पर्यम्। इतोऽपि अविद्यायाजन्यत्वमावश्यकम्। अन्यथा प्रतिज्ञादृष्टान्तोपरोधः स्यादेवेति बोध्यम्। अत एव विष्णुपुराणे प्रजापतिपतिं विष्णुमनन्तमपराजितं प्रधानपुंसोरजयोः कारणं कार्यभूतयोरिति स्मर्यते। अजयोरिति रूपकस्यानन्वयनिरासाय न तद्ध्वनयनायैव कारणं कार्यभूतयोरित्युक्तम्। यद्वा एतत्सृष्टेतज्जन्मानुपलम्भादजत्वं पूर्वकल्पान्ते जन्यत्वमादाय कार्यभूतयोरित्युक्तम्। यत्तत्सूक्ष्ममविज्ञेयमिति प्रकृत्य तस्माद्व्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तमेति। अव्यक्ते पुरुषे ब्रह्मन्निर्गुणे संप्रलीयते इति च भाष्योदाहृतस्मृत्यन्तरविरोधश्च। एतदुपबृंहणेन सूत्रस्वरसेन चोक्तजातीयश्रुतीनां मदुक्तव्याख्यैवोचिता। तदुक्तं चरके पतञ्जलिना। आदिर्नास्त्यात्मनः क्षेत्रपारंपर्यमनादिकमिति। प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव चेति प्रघट्टके गीतायां वासनासमूहरूपाविद्याया अव्यक्तशब्देन क्षेत्रत्वोक्तेः। किं च ब्रह्मा

ल·मं·
३९

ण्डपुराणे तस्या ब्रह्मणि लय उक्तः। स्थूलं विलाप्य करणे करणं निलाने तत्कारणे करणकारणवर्जिते च। इत्थं विलाप्य यमिनः प्रवि
शन्ति यत्र तं त्वां हरिं विमलबोधघनं नमामीति। करणं महदादि निलानं प्रकृतिः। तत्करणं प्रकृतिरूपकारणम्। करणकारणव
र्जिते ब्रह्मणि। अनेनापि तदतिरिक्तस्य करणकारणसाहित्यं सूचितम्। विलाप्येत्यनेन समूलमुन्मूलनमुक्तं न तु प्रलय इवावि
भागेनावस्थानम्। अत्र ब्रह्मणि लयोक्त्या तस्य तदुपादानत्वमुक्तम्। उपादानकारणे एव लयस्य यतो वा इमानि भूतानि जा
यन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्तीति श्रुत्या बोधनात्- यस्य हि यत उत्पत्तिस्तस्य तत्र लयो न्याय्यो मृदीव श
रावस्य न च मनसो वायुरुत्पद्यत इति शांकरभाष्याच्च। किंचानुत्पत्तिकत्वे तस्यालाशानापत्तिः। तदुक्तं न्यायभाष्ये वात्स्यायने
न। न चानुत्पत्तिधर्मकं किंचिद्व्ययधर्मकं प्रति ज्ञातुं शक्यमिति। प्रागभावस्यापि न नाशः। उत्पत्त्यनन्तरं तत्प्राक्कालाभावेन त
द्व्यवहाराभावोपपत्तेः। एवं जीवानामप्युपाधिवैशिष्ट्येन जन्यत्वमावश्यकम्। अतएव श्रुतौ लोहस्याग्नेर्विस्फुलिङ्गा इव जीवा
इत्युक्तम्। परमार्थसारेऽपि। एतस्मात्सर्वज्ञाद्ब्रह्मः सेतरजातयो जाताः लोहस्थादिव दहनात्समंततो विस्फुलिङ्गकणा इत्यु
क्तम्। सेतरोत्पत्तिरेव तदुत्पत्तिरिति तद्व्याख्यातारः। विशेषांशमादाय तेषां नित्यत्वोक्तिरपि। किंबहुना घटादेरप्येवमेव ज
न्यत्वं तत्त [illegible] घटादित्वात्। तदुक्तं परमार्थसारे। यद्वद्दिनकर एको विभाति सलिलाशयेषु सर्वे

राम·
३९

पुनरुक्ता [illegible] परमात्मेति। भातिविशेष्यतयेत्यर्थः। अतएवद्रव्यंनित्यमितिमहाभाष्येउक्तमित्युपरिष्टाद्व
क्ष्यामः। उपाधिसन्निवेशादिशब्दैश्चब्रह्मैव। पूर्वपूर्ववासनावशात्परमात्मनएवोपाध्यादिरूपेणतद्वैशिष्ट्येनभानात्। अतएव
सर्वशब्दानांब्रह्मैववाच्यंवाचकंचेतिहरिणासिद्धान्तितंसंगच्छते। अतएवहिरण्यगर्भस्यकार्यब्रह्मेतिव्यवहारः। तथाचसा
मीप्यात्तुतद्व्यपदेशइतिसूत्रेब्रह्मसामीप्यादपरब्रह्मण्यपिब्रह्मशब्दः कार्यमेवहिब्रह्मविशुद्धोपाधिसंबद्धंक्वचित्कैश्चिद्विका
रधर्मैर्मनोमयत्वादिभिरुपासनायोपदिश्यमानमपरमितिस्थितिरितिभाष्येउक्तम्। अविद्यायाजन्यत्वादेवसर्वंखल्विदंब्रह्मत
ज्जलानितिश्रुतिर्हिरण्यगर्भाब्रह्मातिरिक्तसर्वत्वावच्छिन्नविषयेएकरूपाभवति। विष्णुपुराणेपि· ज्ञानमेवपरंब्रह्मज्ञानंबन्धाय
चेष्यते। ज्ञानात्मकमिदंविश्वंनज्ञानाद्विद्यतेपरम्। विद्याविद्येचमैत्रेयज्ञानमेवोपधारयेति। निरुपाधिब्रह्मैवविद्यासोपाधित
देवाविद्येतितदर्थः। तदुक्तमाचार्यैः द्विरूपंहिब्रह्मावगम्यतेनामरूपविकारभेदोपाधिविशिष्टंतद्विपरीतंचसर्वोपाधिविवर्जि
तमिति। अत्रावगम्यतइत्युक्त्याव्यवहारमात्रेब्रह्मणोविशेष्यत्वमुक्तम्। अन्त्येतुयोगिभिः समाधाववगम्यतइतिबोध्यम्।
परमार्थसारेपि। विज्ञानान्तर्यामिप्राणविराड्देहजातिपिण्डान्ताः। व्यवहारस्थस्यात्मनएतेऽवस्थाविशेषाः स्युरिति। यद्यपि
विज्ञानंब्रह्मैवतथापिनामवैशिष्ट्येनावस्थात्वमुक्तम्। विपरीतंज्ञानंमायापिविज्ञानमत्रएतेविज्ञानादयआत्मनोऽभ्रमरूपाः

CC-0. In Public Domain. Digitization by eGangotri

ल॰ मं॰
४०

प्रतिभासमात्रविषयाअवस्थाइत्यर्थः। अनेनसर्वोपाधीनांतद्विशेष्याणांच ब्रह्मरूपत्वमुक्तम्। तदप्युक्तंतत्रैव- रज्ज्वांनास्तिभुजंगः
सर्पभयंभवतिहेतुनाकेन। तद्वद्द्वैतविकल्पभ्रान्तिरविद्यानसत्यमिदमितितदुत्तरार्धया। इदंविज्ञानादि- अविद्यावासनारूपा वि-
द्यामूलकं वासनारूपसूक्ष्मोपाधिवैशिष्ट्येनापिब्रह्मभानंमननादिपरिपाकवतामस्त्येव। अविद्यायाश्चाध्यासिकसंबन्धेनपर-
मात्मैवाश्रयस्तद्व्यतिरिक्ताविद्यायाइव। तदप्युक्तंतत्रैव- त्रिगुणाचैतन्यात्मनि इतिपूर्वोक्तार्थया। भ्रमाधिष्ठानत्वमेवतद्विशेष्य-
त्वरूपविवर्तोपादानत्वम्। अतएवरज्जौभुजंगोजातइत्यप्रत्ययः। रज्जौभुजंगभ्रमोजातइत्येवचप्रत्ययः। अनादिनिधनंब्रह्मे-
त्याद्यश्लोके हरिग्रन्थेपिस्पष्टमेतत्- तत्त्वादप्रच्युतस्यवस्तुनोभेदानुकारेणासत्याविभक्तान्यरूपोपग्राहिताविवर्त्तः स्वप्नविष-
यप्रतिभासवदित्यादिना। तत्त्वात् स्वस्वरूपादसत्यंवस्तु बहिरसत्त्वात्- अविभक्तमधिष्ठानेनअन्यद्वैधर्म्योपलम्भात् तादृश-
रूपोपग्राहितातद्रूपप्रकारकज्ञानविशेष्यता तदाहस्वप्नविषयेतीति तद्व्याख्यातारः। पयसोदधित्तुनविवर्तः। तत्त्वात्प्रच्युतेः
स्वर्णादेः कुण्डलादिस्तु विवर्त्त एव। तदुक्तं परमार्थसारे- यद्वद्देहावयवा मृद्देवपार्थाविकारजातमपश्च। तद्वत्स्थावरजङ्गममद्वैतं
द्वैतवज्ञातीति। अवयवातिरिक्तोवयवीयथा। सन्मृद्विकाराश्चयथा। सन्तोभान्तितथानामरूपवत्त्वमसदेवभातीति तदर्थः। द्वै-
तशब्दे [illegible] तंद्वीतंतस्यभावोद्वैतमिति व्युत्पत्त्यानामरूपेउच्येतेतद्रहितंचाद्वैतशब्देन। एवंचद्वैतस-
तत्त [illegible]
[illegible] ता एवमुदापाआदिकन

राम॰
४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्वेनप्रदिश्यमानत्वंव्यपदेशात्क्षियकत्वमानमित्यपिबोध्यम्। श्रुतिरपिविकारोनामधेयंमृत्तिकेत्येवसत्यमितिनाममात्रंव्यवहारमा
त्रंनतुतन्त्रान्तरेष्विववस्त्वस्तीतितदर्थः। चेतनसन्निधानमात्रेणदेहेन्द्रियमनःसुक्रियादर्शनात् तस्यप्रेरकत्वाद्यारोपितमेवज
नकत्वादि च। तदुक्तंभाष्ये जीवेश्वरयोरैक्यात्स्ववर्त्यप्रवर्त्तकत्वमनुपपन्नंनअविद्याप्रत्युपस्थापितनामरूपरूपमायावशेनत
दुपपत्तेः॥ अविद्यासंस्काररूपा। मायास्थूलरूपा। नचसन्निधिमात्रेणप्रवर्त्तकत्वेसन्निधिनित्यत्वात्प्रवृत्तिनित्यत्वप्रसङ्ग इति
वाच्यम्। सन्निधिनित्यत्वेपिमायिकत्वेनपरिहारादिति नतुदृष्टान्तभावादितिसूत्रेपिभाष्येउक्तम्। यथास्वयंप्रसारितमायया
मायावीकदापिनसंस्पृश्यतेऽवस्तुत्वादेवंपरमात्मापिनसंसारमायया संस्पृश्यतेमायामात्रंह्येतद्यत्परमात्मनोऽवस्थात्रया
त्मनाऽवभासमानंरज्ज्वादुवसर्पादिभावेनेति। अत्रावस्थात्रयेत्युपलक्षणम्। अनेनहिसर्वस्यजनकत्वादेरवभासएवनवस्तुकिं
चिदस्तीतिस्पष्टमेवोक्तम्। अनादिवासनावशाद्भ्रमविषयमेवतद्यतोवेत्यादिश्रुतयोऽनुवदन्ति। यतोवेतिश्रुत्यासर्वस्यजन
कत्वपालकत्वलयस्थानत्वैस्ताटस्थैरेवब्रह्मणस्तटस्थलक्षणंबोध्यते। कालत्रयसत्ताप्रतिपादनेनसद्बोधितकालत्रयाबाध्य
त्वरूपंस्वरूपलक्षणमपिबोध्यते। सत्यंज्ञानमानन्दमित्यादिश्रुतयोपिशुद्धचित्तंप्रतिनेहनानास्तीत्यादिश्रुतिसहकारेण
धर्मत्यागेनाद्वैतंशुद्धंब्रह्मबोधयन्ति। कणादादयोपिमायिकत्वेनमिथ्याभूतत्वेनब्रह्मरूपत्वेनचस्वज्ञातस्यप्रपञ्चस्यबोध

Nepal Sanskrit University, Balmeeki Campus

नीयशिष्याधिकारानुसारेणमायिकत्वाद्युपलब्ध्यब्रह्मस्वरूपत्वेनज्ञातपरमाण्वादिभ्यः सृष्टिंसमवायादीनांपदार्थत्वंचातीन्द्रियदृष्ट्याज्ञात्वोक्तवन्तस्तत्रतदुक्तपदार्थानांशुष्कतर्कबलेनान्यथाकरणंतेषांखण्डनंचायुक्तमेव।असत्कभासमानेष्वर्थेषुऋष्यनुसारेणैवकल्पनायाऔचित्यात्।तदुक्तंपरमार्थसारे।यद्यत्सिद्धान्तागमतर्कादिषु[illegible]न्याः।अनुमोदामस्तत्ततेषांसर्वात्मवादधियेति।सिद्धान्तप्रतिपादकेषुपाञ्चरात्राद्यागमादिषुभ्रमन्ति।अयमेवसिद्धान्तःसमीचीनइतिभ्रमन्तिचित्तस्वास्थ्यंचनलभन्तेतत्तत्तेषांमतंसर्वमात्मेतिवाद्वेषाधीस्तयानुमोदामइतितदर्थः।नचैवंरीत्यासर्वस्यचेतनत्वेसर्वत्रचेतनकार्यंकुतोनेतिवाच्यम्।चेतनसन्निधानेनतत्तत्कार्यजननीयेसेन्द्रियद्रव्यस्यकारणत्वात्।तदुक्तंचरकेपतञ्जलिना।सेन्द्रियंचेतनंद्रव्यंनिरिन्द्रियमचेतनमिति।अत्रग्रन्थेअग्रेपश्चात्क्वचिदाधुनिकग्रन्थानुसारेणास्तिलिखितमितिनपूर्वापरविरोधोऽचेत्यलंप्रसक्तानुप्रसक्त्या॥प्रकृतमनुसरामः।चित्तस्यविषयाकारपरिणामरूपावृत्तिश्चेन्द्रियेणसहैव।अतएवरसनेन्द्रियगतपित्तान्वयेनगुडःकटुरितिनयनगतपित्तान्वयेनचशङ्खःपीतइत्याद्युपपद्यते।साचभ्रमप्रमोभयरूपापुरुषेप्रतिबिम्बतइतिपुंसोविद्यमानवृत्तिग्राहकत्वम्।प्रतिबिम्बोत्रपुरुषस्यतदवच्छेद्यत्वमेवनत्वादर्शादाविवप्रतिबिम्बः।उभयो[illegible]पुरुषोपिवृत्तिसंबन्धात्तद्गतविषयाकारताभाक्।वृत्तिश्चतत्संबन्धात्तत्स्वरूपप्रकाशभाक्।

[illegible]

यपदिश्यमानत्वंव्यपदेशानिष्पक
स्वभावात्। तथा। पपतञ्जलः सू३ तदा द्रष्टुः स्वरूपेऽवस्थानम्· तदा समाधौ· वृत्तिसारूप्यमितरत्रेति। व्युत्थाने याश्चित्तवृत्तयस्त
द्विशिष्टवृत्तिः पुरुष इति तद्भाष्यम्। पुरुषस्य वृत्तिस्ववृत्त्यवच्छिन्नः पुरुष एव वृत्तिसारूप्यात्तत्र वृत्तित्वव्यवहारः। तत्सारूप्या
त्पुरुषोऽपि दुःखादिमानिव कर्त्तापि कर्त्तेवा भोक्तापि भोक्तेव पद्भवति स एव पुरुषस्य भ्रमात्मको भोगः। तद्धानिरेव च मोक्ष इति
भावः। अवच्छेदकस्थले प्रतिबिम्बव्यवहारस्तु प्रतिबिम्बसादृश्यात्। यथार्क्यादिप्रतिबिम्बं सोपाधिजलादिधर्मान् चाञ्च
ल्यादीन् गृह्णातीव तथाऽवच्छेद्यमपि तदन्तर्भावात्तद्धर्मानिति। तथा च तृतीये द्वितीयपादे व्याससूत्राणि· अत एव चोपमा
सूर्यकादिवत्· अम्बुवदग्रहणात्तु न तथात्वं वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवमिति। अत एव यतोयमात्माचै
तन्यस्वरूपो निर्विशेषो वाङ्मनसातीतोऽतस्तस्योपाधिनिमित्तामपारमार्थिकीं विशेषवत्तामाश्रित्य श्रुतिषु प्रतिबिम्बोप
मोपादीयत इत्यर्थः। नन्वेवमपि प्रतिबिम्ब एवास्त्वत आह। अम्बुवदिति। जलवदुपाधौ [illegible] विप्रकृष्टदेशानां ग्रहणाभा
वेन न तत्र प्रतिबिम्बत्वमित्यर्थः। केन तर्हि धर्मेण तदुपमा तत्रेत्यत आह। वृद्धिह्रासेति। जलगतं हि रव्यादिप्रतिबिम्बं जलवृद्धौ
वर्द्धत इव तद्ध्रासे ह्रसतीव तच्चलने चलतीव तद्भेदे भिद्यत इवेति जलधर्माननुविधायि तत्तु परमार्थतः सूर्यस्य तथात्वमेव प
रमार्थतोऽविकृतमेकरूपमपि देहाद्युपाध्यन्तर्भावाद्भजत इवोपाधिधर्मान् वृद्धिह्रासादीनित्येवमुभयोर्दृष्टान्तदार्ष्टान्ति

कयोः सामञ्जस्याद्विशेषः प्रतिबिम्बत्वेनापिब्रह्मणउपाधिषुव्यवहारइत्यर्थः। वृत्तिजन्यंफलंचवृत्तिद्वाराशुद्धचेतनेतस्यप्रति
बिम्बनमेतदेवप्रकटता· तत्संबन्धाच्चपरसमवेतक्रियाफलाश्रयत्वाद्विषयस्यकर्मत्वम्· अन्तःकरणद्वारापुरुषस्यवृत्त्याश्रय
त्वात्कर्तृत्वम्। जानातेश्चवृत्तिविशेषएवशक्तिः। तत्रदण्डीतिज्ञानेवृत्तिस्थदण्डाकारेणयःपुरुषस्यसंबन्धःसाप्रकारताद
ण्डत्वनिष्ठश्चसोःवच्छेदकत्वाख्यप्रकारतासंयोगनिष्ठःससांसर्गिकविषयतापुरुषनि[illegible]ताविशेष्यतातासांपरस्परमव
च्छेद्यावच्छेदकभावश्चपरेषामिवास्माकमपि। विषयतात्वंचवृत्त्यनुयोगिकचेतनसंबन्धविशेषनिष्ठसंबन्धविशेषत्वम
खण्डंयत्संप्रतिपन्नंतदेव। न्यायनयेतुतत्तद्विषयविशिष्टज्ञानंविशेष्यतादिरूपम्· अतिरिक्तमेववातत्। विषयतात्वंतु
त्रितयसाधारणमाद्येप्यतिरिक्तंस्वीकार्यम्। तत्रवृत्त्यारूढाकारस्यबाह्यघटाद्याकाराविभागेनैवज्ञानविषयता तादृ
शाकारकत्वमेवज्ञानेइच्छादौचविषयिता। एवंपुरुषोपिवृत्त्यारूढःपुरुषेप्रतिबिम्बतइत्यहमितिज्ञानोपपत्तिः। आत्मा
नमात्मनाजानामीत्याद्युपपत्तिश्च। अहमितिजानामीत्याद्युपपत्तिश्च। बिम्बप्रतिबिम्बयोर्वास्तवभेदाभावात्स्वातिरिक्ता
प्रकाश्यत्वरूपंस्वप्रकाशत्वंपुरुषस्योपपन्नम्· एतत्सर्वंसाक्षिभास्यमितितन्निष्ठप्रकारकत्वावच्छिन्नतद्विशेष्यकत्वरू
पंप्रामाण्यमपि[illegible]स्यास्वतो[illegible]मेवऔत्तरकालिकबाधेतुतदंशेभ्रमत्वकल्पनम्। यथाचप्रदीपोरूपादिकंप्रकाशयन्ना

त्त्वा।अव्यपदिश्यमानत्वंव्यपदेशाविषयत्वं।प्रकाशयदात्मानमपिप्रकाशयति।एवंशब्दोपिज्ञानशब्दप्रदीपानांत्रयाणामपिस्वप्रकाशत्वात्
।अतएवः।शब्दविषयकत्वेन[illegible]नवेतिसंशयस्यनजानामीतिविपर्ययस्यचाननुभवः।अनुव्यवसायस्यज्ञानग्राहकत्वेऽनवस्था·घटं
जानामीतिवज्ज्ञानंजानामीत्यनुभवाभावाच्च।अभेदेपिकर्मकर्तृभावस्यविषयविषयिभावस्यचस्वप्रकाशइत्यादिव्यवहारा
नुरोधेनस्वीकारेबाधकाभावादित्यन्यत्रविस्तरः।एवंव्याप्याकारवृत्तिप्रतिबिम्बरूपव्याप्यज्ञानोत्तरं शब्दाकारवृत्तिप्रतिबिम्ब
रूपशब्दज्ञानोत्तरंच जायमानबौद्धव्यापकशब्दार्थरूपतत्तदर्थाकारवृत्तिप्रतिबिम्बनमेवानुमितिः शाब्दबोधश्च·शशशृङ्गा
लीकादिशब्दानांप्रातिपदिकत्वसिद्धिरपिबौद्धार्थरूपतत्तदर्थवत्त्वेनैवोपपद्यते·परः सन्निकर्षइतिसूत्रेस्थानिवत्सूत्रेचभा
ष्येस्पष्टमेतत्।ईदृशानामप्यन्तःकरणेवासनासत्त्वेशब्दाद्बोधएवमानम्।पूर्वपूर्वबोधैर्वासनाजननाच्च।अनादित्वाच्चव्यवहा
रस्यनदोषः।तदुक्तंहरिणायोवार्थोबुद्धिविषयोऽबाह्यवस्तुनिबन्धनः।सबाह्यंवस्त्वितिज्ञातःशब्दार्थःसम्यगिष्यतइति।अ
बहीरूपोपिबहीरूपतयाऽध्यस्तइतिपुञ्जराजः।अध्यासेबीजंचान्तःकरणस्यरागादिदोषएव।अतएवबाह्यार्थानयनमुपप
न्नम्।यत्रत्वाभ्यन्तरार्थस्यबाह्यार्थेनसंवादःसशब्दःप्रमाणंविसंवादेत्वप्रमाणमितिव्यवस्था।एवमेवायंशब्दःप्रमाणंनवे
त्यादेरिदंज्ञानंप्रमानवेत्यादेश्चोपपत्तिःनलादिपदेभ्योपिबौद्धाकारविषयकएवबोधः।सचबौद्धआकारःसामान्यरूपएवावय

वसंस्थानगतविशेषस्याग्रहात्। तेषां शक्तिग्रहोपि वक्तृमुखात्तदीयगुणसमृद्ध्यादिश्रवणानन्तरं तादृशगुणसमृद्ध्यादिविशिष्टे
सामान्यतो बुद्ध्या गृहीते आकार एव· हेतुमति चेति सूत्रभाष्ये कं संघातयतीत्येतद्व्युत्पादनावसरे तेषामुत्पत्तिप्रभृत्या विनाशाद्द
द्धीर्व्याचक्षाणाः सतो बुद्धिविषयान्प्रकाशयन्तीत्युक्तेः। तदुक्तं हरिणा· शब्दोपहितरूपांश्च बुद्धेर्विषयतां गतान्· प्रत्यक्षमिव कं
सादीन्साधनत्वेन मन्यते। बुद्धिप्रवृत्तरूपं च समारोप्याभिधातृभिः। अर्थेषु शक्तिभेदानां क्रियते परिकल्पनेति। प्रत्यक्षमिति मननक्रि
याविशेषणम्। इन्द्रियजज्ञानाभावादिवेति। अर्थेषु बाह्येषु बौद्धमेवैकस्य शक्तिनानात्वं बाह्येऽध्यस्यते दृश्यज्ञानविषययोरभेदा
ध्यासात्। अत एव देशान्तरस्थे देवदत्तं काश्यां शृण्वतस्तं च तत्रापश्यतोपि देवदत्तोत्र नास्तीत्यतो धीः। सामान्येन बौद्धाकारेण
स्य विजातीयतया संमुग्धत्वेनाग्रहात्। अयं स देवदत्त इत्युपदेशोत्तरं सामान्यरूपोपि बौद्ध आकारो विशेषरूपेण विवर्तते। एतेना
तीतनलादिभाविचैत्रादिवर्तमानप्रसिद्धासन्निकृष्टवस्तुगोचराः संस्कारा अनादयो धारारूपेण विशिष्य बोधान्यथानुपपत्त्या
कल्प्यन्ते तैः स्मृतेष्वर्थेषु शक्तिग्रहो बोधश्चेति नैयायिकनव्योक्तमपास्तम्। विशिष्य बोधरूपहेतुत्वासिद्धेः। विशिष्य गृहीतसंग
ति[illegible]तेश्च। पदप्रकारकबोधस्यैवानुभवाच्च। अतएवाज्ञातार्थकेष्विदमेकं पदमिति ज्ञाते पुन
[illegible]ति प्रश्न उपमानतल्लक्षणाकथनादिना प्रतिवचनं च दृश्यते। अत एव सादृश्याद्युपाये
[illegible]ता एवमुदाहरणादिक

त्वा।अव्यपदिश्यमानत्वंव्यपदेशाविषयत्वं
नशयः।शब्दविषयकत्वेनप्र[illegible]पदसामानाधिकरण्यात् तद्बोधकतयाकोशस्यप्रामाण्यंव्युत्पादयन्ति।नलत्वादिनाबो
धस्तत्तेनरूपेणनायंतत्ग्रहासंभवादसंभवी।एतेनप्रमेयत्वादिरूपेणसर्वानुभवसत्वात्तत्रप्रमेयत्वांशस्यानुद्बुद्धसंस्कारत्वेनमो
षेप्रथमतस्तत्तज्जात्यादिविषयंनिर्विकल्पकेस्मरणं ततोज्ञानलक्षणयाविशिष्टतत्तत्पदार्थोपस्थितौतत्रशक्तिग्रहोबोधस्य।
ज्ञानलक्षणाच्चमनःसंयुक्तात्मवृत्तिसंस्कारविषयत्वस्यफलबलकल्प्योद्बोधकवशात्स्मृतेःक्वाचित्कत्वकादाचित्कत्वनिय
मेननसार्वज्ञ्यापत्तिरित्यपास्तम्।अनुभवविरुद्धतादृशस्मृतिकल्पनेमानाभावाच्च।सर्वत्रस्मरणेऽनुभवसमानाकारत्वस्यैव
दर्शनात्।किंचतद्देशमोषेपिकदाचिद्द्विशिष्यजातानुभवानामेवतथाज्ञानंभवति

नतुकदाचिदपितथाननुभूतानांतथाज्ञानंज्ञानलक्षणासहकारेणापि।अनुभवविरोधात्।अन्यथाब्रह्मणोपि
तथास्मरणेज्ञानलक्षणयातथानुभवेचकृतकृत्यतापत्तिरित्यलम्।यत्रतुनगुणसमृद्ध्यादि[illegible]वर्णनंतत्रपदमात्रविषयकमेव
ज्ञानम्।अतएवपदंतुश्रुतमर्थंनजानामीतिव्यवहारस्तत्रगुणादिश्रवणोत्तरंतुश्रुतोस्तिसनदृष्टइतिव्यवहारः।अस्यकश्चि
दर्थोभविष्यतीतितुपदत्वहेतुकमनुमानमेव।बोद्धार्थस्यबोद्धेनशब्देनाविभागात्तन्मूलाभेदाध्यवसायेनशब्दादर्थाकारवृ
त्तौजायमानायांस्वाकारस्यापिसमर्पणमितिशब्दस्यापिविषयता।अतएवशब्देग्राह्यत्वग्राहकत्वरूपशक्तिद्वयस्वीकारः।त

CC-0. In Public Domain. Digitization by eGangotri

ग्रतात्पर्यवशाद्द्विधाशब्दप्रकारकोबोधः।अर्थेबाधेतुगौणीत्ययमाहेत्यादावनुवादेशब्दविशेष्यकः।अनुकरणेतुशब्दमात्रविषयक।एवमर्थेनापिस्वाकारसमर्पणेततएवशब्दाकारस्यापिसमर्पणमितिसर्वज्ञानंशब्दानुविद्धम्।तदुक्तंनसोस्तिप्रत्ययोलोकेयःशब्दानुगमादृते।अनुविद्धमिवज्ञानंसर्वंशब्देनभासतेइति।उत्तरार्द्धेनानुव्यवसायः प्रमाणंदर्शितम्।अतएवचक्षुषादृश्यमानमप्यज्ञातबोधकंपदार्थंकिमिदमितिनजानामीतिव्यवहरन्तितदुपदेशेचज्ञातमिदमितिव्यवहरन्ति।एतेनमणिभ[illegible]ादिन्यायेनतत्तत्पदवाच्यत्वग्रहोविशेषधर्मप्रकारेणज्ञाने तथाव्यवहारेऽनुव्यवसायेचहेतुरितिनैयायिकनव्योक्तमपास्तम्।मणिकृतः क्वादिन्यायेनकारणत्वकल्पनापेक्षयास्मदुक्तस्यैवौचित्यात्।तद्ग्रहेसतिस्मृतस्यतस्यभानेबाधकाभावात्तत्तदर्थप्रतिबन्धककल्पनेगौरवमनुभवविरोधश्च।किंचपिकपदशक्तिग्रहवतोऽयंकोकिलइत्यनुव्यवसायापत्तिस्तवपिकत्वकोकिलत्वयोरभेदात्।ममतुतत्तत्पदभानान्नदोषोऽतएवकणादसूत्रवृत्तिकृद्भिःकीर्त्तिदिङ्नागादिभिर्नामसंसर्गविषयकत्वंसविकल्पकलक्षणमुक्तम्।पातञ्जलानामपीत्थमेवसविकल्पकलक्षणंसंमतम्।एतेनज्ञानंशब्दाननुविद्धमेवार्थज्ञानस्यवाचकशब्दाभावादर्थव[illegible]ेनघटइतिजानामीतितद्व्यवहारइत्यपास्तम्।इन्द्रियार्थसन्निकर्षोत्पन्नंज्ञानमव्यपदेश्यमव्य[illegible]त्यक्षलक्षणेऽव्यपदेश्यत्वंविशेषणंवदतागोतमेनशाब्दज्ञानेशब्दभानस्याङ्गीका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्वा। अव्यपदिश्यमानत्वं व्यपदेशाविषयकत्वं व्यपदेशश्चार्थवाचकः शब्द इति तद्भाष्ये स्पष्टम्। एवं चान्यत्र तद्भानाग्रहो मुधेति पातञ्जला ना
माशयः। शब्दविषयकत्वेन प्रत्यक्षस्य शाब्दत्वापत्तिरिति वदता वात्स्यायनेन शब्दजबोधस्य शब्दविषयकत्वमुक्तप्रायमेव। शब्दविषय
कत्वमेव च शाब्दत्वं न तु शब्दजन्यत्वमिति तत्रैव वाचस्पतिमिश्रैरुक्तम्। स्वरूपमिति सूत्रे भाष्येपि स्पष्टमेतत्। तत्र हि नवा
एतद्वक्तव्यं किंकारणं शब्दपूर्वको ह्यर्थे संप्रत्ययः आतश्च शब्दपूर्वो योपि ह्यसौ नाम्नाः ह्वयते नाम च यदा तेन नोपलभ्यं भव
ति तदा पृच्छति किं भवानाहेति शब्दपूर्वकस्यार्थस्य संप्रत्ययः इह शास्त्रे शब्देसंभवादर्थेः संभवादर्थस्य निवृत्तिरित्युक्तम्
शब्दपूर्वको हीत्यस्यार्थो तु शाब्दज्ञानपूर्वकोर्थप्रत्यय इति लोके प्रसिद्धमित्यर्थः। अन्वयमुक्त्वा व्यतिरेकमाह तस्येति प्रकारा
न्तरमाह। शब्दपूर्वकस्येति। शब्दविशेषणक इत्यर्थः। तेनार्थेऽसंभवेन कारणत्वेन विशेषणत्वेन चोपस्थिते शब्दे कार्यमिति भा
वः। चकारेणास्य युक्त्यन्तरत्वमेवोचितम्। मन्त्रे यजुषीति च यदुच्यते तत्र मन्त्रशब्दादौ कार्यासंभवेन मन्त्रादिसहचरितेर्थे भ
विष्यतीति भाष्यप्रतीके कैयटेन स्पष्टमेवोक्तम्। साहचर्यं च शब्दानुविद्धस्यैवार्थस्यावगमादिति। किंच [illegible]दावपि विषय
ताभाननियमनिर्वाहाय पद्भानमावश्यकं यज्ज्ञानं यत्पदादिविषयं तत्तज्जन्यबोधीयविषयतासमानविषयताकमिति निय
मात्। सन्निकर्षादिभिस्तु न व्यवस्था घटो रूपवानिति ज्ञानवद् घटस्य रूपमिति रूपविशेष्यकज्ञानस्यापि तेन सन्निकर्षेण जनना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्। घटरूपोभयविषयकज्ञानस्यतत्संस्कारस्यवापूर्वसत्त्वेनयदायज्ज्ञानंपूर्वंतदातस्यविशेषणतेत्यप्ययुक्तम्। विशेषणज्ञानस्ये
वविशेष्यतावच्छेदकरूपेणविशेष्याग्रहदशायांतदनुत्पत्त्याविशेष्यज्ञानस्यापिविशिष्टबुद्धिकारणत्वात्। अन्यथाकिंचिद्रूपवदि
त्येवस्यान्ननुघटइत्यादि। किंचयथाविशिष्टस्यवैशिष्ट्यमितिबुद्धौविशेषणतावच्छेदकप्रकारकनिश्चयस्यकारणत्वेपिलाघवा
द्विशिष्टज्ञानंप्रतिविशेषणज्ञानंकारणमितिकल्प्यते। अतएवनिर्विकल्पकसिद्धिः तथाविशिष्टेवैशिष्ट्यमितिविषयतावगाहिबु
द्धौविशेष्यतावच्छेदकप्रकारकविशेष्यनिश्चयस्यकारणतायाः सर्वेषामावश्यकत्वेनविशिष्टबुद्धित्वमेवविशेष्यज्ञानस्यलाघवा
त्कार्यतावच्छेदकमुचितंघटइत्यादिविशिष्टबुद्धावपिविशेषणज्ञानवन्निर्विकल्पकंविशेष्यज्ञानमपिसुलभम्। अतएवघटघटत्वे
इतिनिर्विकल्पकाकारमाहुः। येतुनिर्विकल्पकंनेच्छन्तिविशेषणज्ञानादिकारणत्वंचनेच्छन्तिसन्निकर्षेणैववविशिष्टज्ञानमिच्छन्ति
तेषांत्वनुपपत्तिरेव। घटादिपदजबोधेविषयताभानेतुघटादिपदानांघटत्वविशिष्टेशक्तिरितिशक्तिग्रहोनियामकः। घटत्वनिष्ठप्रका
रतानिरूपितविशेष्यत्वावच्छिन्नेशक्तिरितितदर्थः। अतएवविषयताविषयकोऽनुव्यवसायःस्वरूपतोविषयेविद्यमानपदार्थ
स्यानुव्यवसायेभानेतुआम्रफलादिविषयकज्ञानानुव्यवसायेमाधुर्यादीनामपिविषयतापत्तिः। कुब्जखञ्जःखञ्जकुब्जइत्या
दौविषयताभाने[illegible]बोधविशेषणयोपपादयितुमशक्यत्वाच्च। संबन्धस्यस्वरूपसंबन्धेनैवभानवद्विषयतानांस्वरूपतएवभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेनकयापिविषयतयेतिनानवस्था।नचविषयतानांकार्यकारणभावबलादेवबोधः।तद्बोधकारणतानियामकत्वेनशक्तिकल्पनाव
श्यकत्वात्।समर्थसूत्रेभाष्येचजहत्स्वार्थवृत्तिव्युत्पादनावसरेराजपुरुषइत्यादौवाक्येराजपदार्थेविद्यमानविशेष्यत्वरूपस्वार्थ
स्यत्यागइत्युक्तम्।एवंचकृष्यनुभवसिद्धंविषयताभानंतच्छक्यत्वंच।अतएवव्यक्त्याकृतिजातयस्तुपदार्थइतिसूत्रेन्यायवार्त्ति
ककृतोक्तंतुशब्दोविशेषणार्थः किंविशेष्यतेप्रधानोपसर्जनभावस्यानियमेनपदार्थत्वमिति।प्रज्ञापनीयधर्मविशिष्टोधर्मीसा
ध्यइतिप्रस्तावेपिन्यायवार्त्तिककृतोक्तम्।अनित्यःशब्दः कृतकत्वादित्यनुमानेशब्दस्यसिद्धत्वेनसाध्यत्वंनभवतीतिप्रज्ञाप
नीयेत्यादिनापिशब्दः नित्यत्वंसाध्यंकृतकत्वेनहेतुनासाध्यस्ययोगाभावात्।अनेनपरंपरासंबन्धानामसंबन्धत्वंदर्शयति।
किंचानित्यत्वमपिघटादौसिद्धम्।तस्मादन्यधर्मत्वेनप्रज्ञातस्यानित्यत्वस्यधर्मिणाशब्देनयोविशेष्यविशेषणभावः सम[illegible]
सचोभयाश्रयः धर्मीविशेष्योधर्मोविशेषणमिति।अनेनज्ञानेविषयताभानेस्पष्टमेवोक्तमित्यन्यत्रविस्तरेणनिरूपितम्।सर्वत्र
शब्दमानमित्ययमर्थः।अथगौरित्यत्रकः शब्दइत्यनेनापिसूचितइत्यग्रेनिरूपयिष्यते।शब्दार्थयोरविभागादेवप्रश्नस्यगायामथ
गौरित्यत्रकः शब्दइतिप्रश्नः।किंचतत्रप्रघट्टकेजात्यादीनांशब्दत्वमाशङ्कितंतद्धिविक्तशब्दतत्त्वाज्ञानात्।नचैवमपिगुणा
दीनांगोशब्दत्वाशङ्काकथंतेनशब्देनतेषांतादात्म्याभावादितिवाच्यम्।निरन्तरत्वरूपायुतसिद्धत्वरूपावयवविशेषानुगत

Jammu Sanskrit Library ... Balmeeki Collection ...

सामान्यविशेषरूपगुणसमूहस्यैवद्रव्यत्वात्स्त्रियामितिसूत्रेद्रव्येचभवतःकःसंप्रत्ययोगुणसमुदायोद्रव्यमितिभाष्यात्।किंच
प्रत्यवयवोगुणःसमुदायंप्रतीतिसंख्यायाअवयवइतिसूत्रेभाष्याच्च।अयुतसिद्धावयवविशेषानुगतःसमूहोद्रव्यमितिपतञ्जलि
रितिपातञ्जलभाष्याच्च।गुणपदेनावयवाधर्माश्च।अतएवव्रीहिषुप्रोक्षणजन्यसंस्कारस्यांशत्वावयवत्वादिनाव्यवहारःसमन्वयसू
त्रेभामत्यांसमुदायसमुदायिनोश्चपरस्परंभेदाभेदाभ्युपगमः।अतएवमृद्घटोमृदिघटइत्याद्युपपद्यतेगुणगुण्याद्योर[illegible]।अतएव
घटःशुक्लोघटेरूपंगन्धःस्पर्शइत्याद्युपपद्यते।अतएवगुणाश्रयोद्रव्यमितिपरेवदन्ति।अयुतसिद्धावयवविशेषानुगतइत्युक्तेर्व
नादीनांनातिरिक्तद्रव्यत्वम्।निरन्तरत्वरूपायुतसिद्धत्वाभावात्।विजातीयावयवविभागएवतन्नाशकः।भूयोऽवयवावच्छेदेन
चक्षुःसंयोगश्चतत्प्रत्यक्षेकारणंतदतिरिक्तोऽवयवीतुनोपलभ्यतेग्रावसमुदायस्थलइव।किंचतस्यातिरिक्तत्वेरूपगुरुत्वा
देर्द्वैगुण्यस्योपलम्भापत्तिः।अवयविनोरूपराहित्येऽप्रत्यक्षत्वापत्तिः।नचान्त्यावयवपरमाणूनामतीन्द्रियत्वेनतदाश्रितगु
णाप्रत्यक्षत्वापत्तिरितिवाच्यम्।रथाङ्गानांप्रत्येकंकार्यासामर्थ्येऽपिविलक्षणसमुदायभावेकार्यकरत्ववदुपपत्तेः।एवंचगोश
ब्देतत्समूहाभेदेतत्समूह्यभेदोऽपिसिद्धएवेतिभावेनगुणादीनांगोशब्दत्वाशङ्कालिङ्गसंख्याद्यन्वयिद्रव्यंसर्वनामपरामर्श
योग्यंद्रव्यमितितुस्वशास्त्रव्यवहारोपयोगीतिबोध्यम्।गुणोनामसइत्यन्तराशयस्तुगोशब्दस्याद्भूतभेदावयवानुगतस

त्।एवमुदा[illegible]

मूहेनैव तादात्म्यं न तु तद्वयवैरपीति तत्र भेदः प्रतिभासमात्रकल्पितत्वेनाध्यस्तो राह्वोः शिर इतिवत्- अभेदस्तु व्यावहारिक एवेति वाचस्पतिमिश्राः। अन्ये तूभावपि व्यावहारिकौ। स्वर्णं कुण्डलं स्वर्णस्य कुण्डलमिति च व्यवहारात्। एतद्व्यवहारान्यथानुपपत्त्यैव तयोः क्वचिद्विरोधस्याप्यङ्गीकारात्। अन्यथानुपपत्तिश्चेदस्ति वस्तुप्रसाधिका· पिनष्टि दृष्टं वैमत्यं सैव सर्वबलाधिकेति श्रीहर्षोक्तेः। किंच स्वर्णत्वरूपेणाभेदस्य कुण्डलत्वरूपेण भेदस्य स्थितिरित्यविरोधः। सामानाधिकरण्यं चैकार्थबोधकत्वमेव। प्रकारविशेषानपेक्षो भेदस्तु भेदेन विरुद्धः प्रतिभासकल्पितत्वेपि यावद्व्यवहारदर्शनं ब्रह्मज्ञानतः प्राक् शुक्तिरजतवत् तद्व्यवहारा[illegible]पगमेन व्यर्थपरिश्रमत्वात्। राह्वोः शिर इत्यत्रानेकावस्थायुक्तराह्वोरेकावस्थायुक्तशिरसोऽवयववत्त्वेन तत्रापि व्यावहारिकभेद एव। वस्तुतस्तत्र विकल्पात्मकमेव ज्ञानं शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति तल्लक्षणं पतञ्जल्युक्तम्। शब्दज्ञानजन्यो वा ह्यवस्तुशून्यो विकल्प इति तदर्थः। किंच शब्दप्रयोगं तज्जन्यं ज्ञानं —— चानुपतति। तज्जनको बाह्यवस्तुशून्यो वृत्तिविशेषो [illegible]धाबाधकालाविशेषेण सदैव जायमानो विकल्प इत्यर्थः। अनेन वक्तुः शब्दप्रयोगजनकमानसज्ञानस्यापि विकल्पत्वमु[illegible]। विपर्यये तु बाधोत्तरं शब्दप्रत्यययोरभावान्न तेन गतार्थता। हरिणाप्युक्तम्। अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हीति। अत्यन्तेत्यस्य बहिरित्यादिः ज्ञानमवष्टभ्य शब्दः स्वप्रयोगं करोतीत्यपि तदर्थः। अत एव पुरुषस्य चैतन्यमिति तदुदाहरणं पातञ्जलभाष्ये दत्तं न हि तस्मा

दस्यकश्चिद्विशेषः।व्यपदेशिवदित्यस्यायमर्थः।मुख्यव्यवहारविषये यथा शास्त्रीयं कार्यं तद्वन्मुख्यसंबन्धाद्यभावेपि कार्यमिति। स्वर्ण
कुण्डलस्थले देशकालैक्येपि न्यूनाधिकमूल्यदर्शनेन व्यावहारिकभेदोप्यवश्यं स्वीकार्यः। नहि प्रातिभासिके न तदुपपत्तिः शुक्तौ
प्रातिभासिकरजते सर्वथा मूल्याभावादित्यपि कश्चित्। राहोः शिर इत्यादाववस्थाकल्पितोऽवयवावयविभाव इति तु न युक्तम्
बोद्धृणामनेकावस्थाविशिष्टस्य तत्त्वेन राहुपदाद्बोधात्‌ अतएवैयायेत्यादाविकारस्य प्रथमावयवत्वं कथमित्याशङ्क्य लोकवि
ज्ञानात्सिद्धमित्युक्तं भाष्ये। लोकवदेव शास्त्रेऽविचारितरमणीयो व्यवहारः। किंचास्य विकल्पात्मकज्ञानजनकत्वे वस्त्वसिद्ध्यनापत्तिः
।विषयभेदे न विषयताङ्गीकारे तु अन्त्यः।केचित्तु शब्दाभेदेपि विकल्पेन व्यवहारः शास्त्रीयकार्यनिर्वाहश्च यथाऽद्यतनेप्यनद्यतनोस्तीति
लङ्विधायके भाष्ये प्रयुक्तमिति तदाशय इत्याहुः। केचित्तु तदभिन्नाभिन्नस्य तदभिन्नत्वमित्याशयेन शङ्का।अयं च न्यायो मूलकार
णोपादानककार्योपादानके कार्ये मूलकारणाभेदस्यापि व्यवहारेण सिद्धः। यथा तन्मात्राद्युपादानकेपि प्रकृत्याद्युपादानकत्व
म्। गुणो नाम स इत्युक्ताशयस्तु यत्र स्वाभिन्नवस्तुद्वारकः स्वस्वरूपानुगमस्तद्विषय एवोक्तन्याय इति। स्वर्गनरकयोस्तु नैक्यं य
दन्तःकरणावयवपरिणामः सुखं तदतिरिक्तावयवपरिणाम एव दुःखमित्यङ्गीकारात्‌। येनोच्चारितेन सास्नालाङ्गूलककुदखु
रविषाणिनां सं[illegible]भवति स शब्द इति भाष्याशयस्तु यथा चिज्जडयोस्तादात्म्यावभासेपि चित एव भासकत्वं जडस्यावभा

स्यत्वमेवस्वभावात्। तथा स्वभावादेव शब्दस्य भासकत्वमर्थस्यावभास्यतेति वदन्ति। तस्माद् ध्रुवच्छिन्नाकाशधर्मोपयान्तरः स्फो
टोऽर्थश्च बौद्ध एव ज्ञानविषयः शक्तिग्रहविषयश्च ज्ञानं च वृत्तिरूपं बुद्धिधर्म एवेति। एकदेशस्थत्वात् तेषामितरेतराध्यासः शब्दार्थ
प्रत्ययानामितरेतराध्यासात् संकरस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानमिति योगसूत्रोक्तमुपपन्नः। स चानादिवासनावशा
दनादिरेव। एवं शब्दार्थधर्मयोरिति न कुतर्कावसरः। अतएव निकारोऽग्रे पस्वाहूनमहहभोस्तद्धि निधनम्। रामेति द्व्यक्षरं नाम मा
नभङ्गः पिनाकिनः। गर्वभङ्गो भार्गवस्य शौर्यभङ्गश्च वालिनः। हिरण्यपूर्वं कशिपुं प्रचक्षत इत्यादि संगच्छते। अन्ये तु हिरण्यक
शिपुनामानमिति प्रतीतेरनुभवसिद्धत्वात्। अतएव कथितपदत्वदोषोऽपि क्वचिन्न दोषः। उदेति सविता ताम्रस्ताम्र एवास्तमे
ति च। संपत्तौ च विपत्तौ च महतामेकरूपतेत्यत्र ताम्रपदं विना न तादृशो बोधः। पदप्रकारकबोधादिति प्रकाशकृतः। तदुक्तं हरि
णा- यदन्तः शब्दतत्त्वं तु नादैरेकं प्रकाशितं। तदाहुरपरे शब्दं तस्य वाक्ये तथैकता। अर्थभागैस्तथा तेषामान्तरोऽर्थः प्रकाशत इ
ति। एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थिताविति च। अन्तस्तथास्थितावपि बहिर्भेदेन भासेते। तस्यैव शक्तिभेदात्। अक्रमे
तस्मिन् क्रमभासोऽपि तच्छक्तिवशादेवेत्यपि तत्रैव स्पष्टम्। किंच बौद्धपदार्थानङ्गीकारे सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्
। वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे इति स्मृतेः स भूरिति व्याहरन्त्स भूमिमसृजतेति श्रुतेश्च सृष्टेः प्राक् भूः शब्दादिभ्य

ल·मे· स्तदर्थज्ञानपूर्वकंसृष्टिरितिलाभेनतदाबाह्यभुवोऽभावाद्भूःशब्दस्यशक्तिग्रहपूर्वकंकस्यार्थस्यबोधःस्यात्।नचजातेर्नित्य
५८ त्वात्तत्रशक्तिग्रहइतिवाच्यम्। अद्वैतिनांजातेरप्यनित्यत्वेनतस्याअपिकेनचिद्वैदिकशब्देनैवज्ञानपूर्वंब्रह्मणानिर्माणेतत्राप्य
स्याएवदुरवस्थायाःसत्वात्। निराश्रयजातिसत्त्वेमानाभावाच्च· तत्तद्व्यक्त्यवच्छिन्नब्रह्मसत्तायाजातित्वेप्यवच्छेदकाभावा
त्तस्यास्तदाजातित्वाभावात्। किंचतत्तद्व्यक्त्यवच्छिन्नाब्रह्मसत्ताजातिरितिगौरवान्नयुक्तमित्यग्रेवक्ष्यते। अपागादग्नेरग्नित्व
मितिश्रुत्यातन्नाशस्यैवकथनाच्च। तस्मात्सर्वज्ञत्वाद्भगवदनुग्रहाच्चवेदलाभवत्तदैवस्वबुद्धिवर्तिपदार्थस्यस्थूलरूपेणभान
म्। तत्तत्संबन्धग्रहोबोधश्चहिरण्यगर्भस्येतिबोध्यम्। सचायंस्फोटआन्तरप्रणवरूपएव। ओंकारएवसर्वावाक्सैषास्पर्शोष्मभि
र्व्यज्यमानाबह्वीनानारूपाभवतीतिश्रुतेः। बह्वीवाक्यपदादिरूपानानारूपाघटपटादिरूपाच। अकारएवेतिश्रुत्यन्तरेपाठः। [illegible]
प्यवयवद्वाराप्रणवोपलक्षणत्वम्। द्वादशस्कन्धेभागवतेप्रणवस्यस्फोटत्वंस्फुटमेवोक्तम्। तत्रहिसमाहितात्मनोब्रह्मन्ब्रह्मणः
परमेष्ठिनः। हृद्याकाशादभून्नादोवृत्तिरोधाद्विभाव्यते १ हृद्गताकाशादित्यर्थः। यःकर्णपुटपिधानेनश्रोत्रवृत्तिनिरोधादस्माभिरपि राम·
विभाव्यतेश्रूयते। ततोभूत्त्रिवृदोंकारोयोऽव्यक्तप्रभवःस्वराट्। यत्तल्लिङ्गंभगवतोब्रह्मणःपरमात्मनः २ त्रिवृत्त्रिमात्रः·अव्यक्ते
ईश्वरःप्रभवोयस्यसः। अतएवाहभगवतोलिङ्गं·गमकः कोसौपरमात्मातत्राह। शृणोतियइमंस्फोटंसुप्तश्रोत्रेचशून्यदृक्। येनवा ५८

CC-0. In Public Domain. Digitization by eGangotri

ऽव्यज्यते यस्य व्यक्तिराकाश आत्मनः ३ सुप्ते श्रोत्रे कर्णपिधानादिवृत्तिके इमं प्रणवरूपं स्फोटं स्थूलस्वरूपेण परिणतमपि यः शृणोति परमात्मा जीवस्य तु करणाधीनज्ञानत्वात् करणस्य चावृत्तिकत्वान्न तदा श्रोतृत्वम्। ईश्वरस्य यतः शून्ये पीन्द्रियवर्गे दृग्ज्ञानं यस्य तादृश इति श्रोतैव जीवस्य तदुपलब्धिस्त्वीश्वरद्वारिकैव। यथा निद्राकाले लीनेन्द्रियमपि जीवं परमात्मैव शब्दं श्रुत्वा प्रबोधयति तद्वत्। येन प्रणवेन वाग्बृहती व्यज्यते यस्य च हृदयाकाशे आत्मनः सकाशाद्व्यक्तिः ३ स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः। स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम्। ४ स्वधाम्नः स्वकारणस्य। किंच स तदंशभूतसमस्तदेवतानां वाचकोपीत्याह। स प्रणवः सर्वमन्त्राणामुपनिषद्वेदस्य सूक्ष्मं रूपम्। यतो वेदकारणं तत्कारणत्वेपि न विकारित्वं यतः सनातनं सदेकरूपम्। तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह। धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तयः ४ अकाराद्या अकारोकारमकाराः। तस्येत्यवयवावयविभावे षष्ठी। यैरकाराद्यैस्त्रयस्त्रित्वसंख्यायुक्ता भावा धार्यन्ते तत्कारणत्वात्। गुणाः सत्त्वरजस्तमांसि। नामानि ऋग्यजुःसामलक्षणानि। अर्था भूर्भुवः स्वर्लोकाः। वृत्तयो जाग्रत्स्वप्नसुषुप्तयः। अनेन तस्यैव सर्वप्रपञ्चकारणतोक्ता ५ ततोऽक्षरसमाम्नायमसृजद्भगवानजः। अन्तःस्थोष्मस्वरस्पर्शदीर्घह्रस्वादिलक्षणम्। ६ ततोऽकारादिभ्योऽन्तःस्थादयो लक्षणं यस्य तम्। ६ तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः। सव्याहृतिकान्सोंकारांश्चातुर्होत्रविवक्षया ७ असृजदित्यनुषज्यते च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श·मे·
४१

त्वारो होत्रुपलक्षिता ऋत्विजश्चतुर्होतारस्तैरनुष्ठेयं होत्राध्वर्यवादिकं कर्म चातुर्होत्रं तल्लिङ्ग वशायेत्यर्थकमुक्तमिति। निरुक्तभाष्येऽपि उक्तरीत्या पदसत्ताभावाशङ्कोत्तरभूतं व्याप्तिमत्त्वात्तु शब्दस्येति प्रतीकमादायोक्तम् अभिधानाभिधेयरूपा बुद्धिर्हृदयाकाशप्रतिष्ठिता परबोधनेच्छया पुरुषेणोदीर्यमाणा कण्ठादिषु वर्णभावमापद्य बाह्याकाशस्थं शब्दं स्वस्वरूपं कृत्वा श्रोत्रद्वारेण तत्र स्थितां श्रोतुर्बुद्धिमनुप्रविश्य सर्वार्थं सर्वाभिधानरूपां तत्तद्बुद्धिं व्याप्नोति पुरुषयत्नजा वक्त्रोद्गताः परं नश्यन्ति न शब्दः स च तदनुव्यक्तोऽर्थप्रत्ययं जनयति इति तत्रत्यपदत्वादिकं वक्त्रो ह्या तेष्वारोपयन्ति तद्गतनाशादि च तस्मिन् पुरुषबुद्ध्यवस्थस्यैव चार्थस्य प्रत्ययमादधाति शब्दस्तेनैव तस्य संबन्धादिति। स च शब्दो वस्तुत एकोऽपि तत्तद्वर्णसंस्कारैः प्रतिबिम्बिततत्तद्रूपोऽनन्तपदरूपतामिवापन्न इति सर्वपदरूपः सर्वार्थाभिधानशक्तिः। सा शक्तिश्च योगिप्रत्यक्षगम्या नास्मज्ज्ञानगम्या यत्रैवं व्यवहारादिना तज्ज्ञानेन तस्यैवास्माकं बोध इति मर्यादा। एवमेकैकवर्णोऽपि सहकारिवर्णान्तरसंबन्धादनन्तपदरूप इति सोऽपि तच्छक्तिरिति गकारौकारविसर्जनीया गोर्वाचका इति लोकस्याविचारितरमणीयेन तत्समूहे वाचकत्वग्रहस्तादृशस्यैव च शास्त्रेणान्वाख्यानं तद्दृष्ट्या बोध्यम्। तदुक्तं भाष्ये अथवा प्रतीतपदार्थको लोके ध्वनिः शब्द इति लोकेऽर्थबोधकत्वेन गृहीतो ध्वनिर्वर्णात्मकस्तत्समूहः शब्द इति तदर्थः। अथ गौरित्यत्र कः शब्द इति प्रश्ने इदमुत्तरम्। अखण्डोऽपि स्फोटो गकाराद्यवस्थाभ्यो भिन्नः। भिन्नश्च चरमावस्थया विसर्जनीयादिरूपया पदादिरूपेण व्यज्यत इति वर्णेषु तत्त्वव्यवहारोपपत्तिर्लोकस्ये

शम·
४२

तिबोध्यम्। एवं सर्वपदेषु पदान्तरसहकारेण नानावाक्यभवनशक्तित्वं तत्तद्वाक्यार्थबोधजननशक्तिमत्त्वं च। यद्यपि परस्य बुभुक्षितार्थप्रत्यायनाय शब्दप्रयोगः परस्य तु प्रवृत्त्यादिविषय एव प्रायेण बुभुक्षितः स च वाक्यार्थ एवेति सर्वे शब्दास्तत्परा एव। यत्रापि केवलं वृक्ष इति प्रयुज्यते तत्राप्याकाङ्क्षातात्पर्यादिवशादस्ति चलति छिद्यते वेति पदान्तरार्थो नामध्याहारः क्रियाविशेषतात्पर्यानवधारणेऽप्यस्तीत्यध्याहारः। बुद्धिसत्तायाबोधविषयबौद्धपदार्थेष्वव्यभिचारात्। लोकेऽस्त्यर्थं विना शुद्धपदार्थानवगतेश्च। एवं क्रियापदादिमात्रप्रयोगे सर्वकारकाद्यध्याहारः। चैत्रोऽग्निना तण्डुलान् पचतीत्यादिप्रयोगस्तु कारकान्तरनिवृत्त्यर्थः क्रियान्तरनिवृत्त्यर्थो नियमायेति स्पष्टमर्थवत्सूत्रे भाष्ये। तथापि यौगिकेषु अन्वाख्यानलाघवाय पदानि तत्र प्रकृतिप्रत्ययभागास्तत्तदर्थाश्च कल्प्यन्ते तद्द्वारा पदार्थबोधनं वाक्यार्थबोधनं च शास्त्रफलम्। केवलरूढेषु तु वर्णसाजात्यादिनावयवकल्पनम्। स्पष्टं चेदं निरुक्ते। यत्र तु वाक्यस्यैव शास्त्रेण संस्कारस्तत्र नैव पदात्पदार्थबोधः। यथा षट्सन्त इत्यादौ। अत एव ङसीति सूत्रे भाष्ये धुडादयः पूर्वान्ता एव किं न क्रियन्त इत्याशङ्क्य पूर्वान्ते रुत्वाद्यापादनेन समाहितम्। अन्यथा तकारविशिष्टस्य सत्पदाद्यर्थबोधकत्वाय पदादित्वमेवावश्यकमिति तद्विचारासंगतेर्निर्दलत्वात्। मम तु वाक्यार्थबोधे भेदाभावान्न दोषः। एतेन पदात्पदार्थज्ञानपूर्वक एव वाक्यार्थबोध इत्यपास्तम्। वस्तुतः सर्ववाक्यमखण्डमेव · पदान्यसत्यान्येव · पदात्पदार्थबोध इत्यङ्गीकारे चैत्रादिपदानां सकलक्रियासाधारणेऽर्थे गृहीतशक्तिकानां तत्तदर्थान्वितविशेषबोधाय लक्षणापत्तौ शक्त्याबोधक

उ·मं· त्वभङ्गः। सामान्यरूपेणविशेषबोधेपिलक्षणेतिस्पष्टं काव्यप्रकाशे। किंचपदानांसत्यत्वेराजानंराज्ञाराजनीत्यादौराजरूपार्थप्रस्था
५० यकस्यानियतत्वंनस्यात्। सत्यस्यानियतत्वात्। ह्वैराजपुरुषेत्यत्रराजेतिक्रियापदार्थप्रतीत्यापत्तिश्च। अतएवभाष्येनलक्षणेनपदकारा
अनुवर्त्याइत्यादिनाऽऽशितः कर्त्तेत्यादौपदानामसत्यत्वंदर्शितम्। सत्यत्वेतुलक्षणेनतदननुवर्त्तनासंगतिः। पदप्रकृतिःसंहितेत्यत्रतुष
ष्ठीसमासः। तथाचतत्रैवकैयटः संहितैवापौरुषेयीपदानितुपौरुषेयाणीति। किंचतेषांसत्यत्वेऽश्वकर्णादावश्वाद्यर्थप्रतीत्यापत्तिः। इदं
रूढमिदंयौगिकमिदंयोगरूढमित्याद्यपिशास्त्रकृत्कल्पनैवविशिष्टार्थबोधार्था। बुद्धेचतत्रप्रयोजनसंपत्तेरुपाय[illegible]रित्यागः। अतएव
व्याकरणभेदेनोपायाअनियताः। तदुक्तमुपादायापियेहेयास्तानुपायान्प्रचक्षते। उपायानांचनियमोनावश्यमवतिष्ठतइति। ननुपदा
नामसत्यत्वेप्रतिनिध्युच्छेदः। तथाहिव्रीहिभिर्यजेतेत्यादौयागेनसकलद्रव्याक्षेपेव्रीहिश्रुतिर्नियमार्थाव्रीहिभिरेवनान्यैरिति। तत्रव्रीह्य
भावेनित्यकर्मणः प्रारब्धकाम्यस्यच लोपोमाभूदितिप्रतिनिधिरुपादीयते। तत्रव्रीहित्वस्यशक्त्युपलक्षणत्वात् प्रतिनिधेरपिश्रौतत्व
मित्यग्रेनिरूपयिष्यामः। तत्रप्रतिनिध्युपादानेपितद्वाक्याखण्डार्थस्यानुष्ठानान्नित्यादेर्विलयः। नीवारकरणकक्रियायाअन्यत्वात् राम·
।एवंचक्रियानप्रतिनिधीयतेद्रव्यंतुप्रतिनिधीयते एवेतिन्यायोच्छेदः। किंचवनात्पिकआनीयतामित्युक्तेकः पिकइतिप्रश्नानुपपत्तिः।
अपिचश्वेतंछागमालभेतेत्यादौक्रियायाश्छागद्रव्येणश्रौतः संबन्धः द्वितीयाश्रुत्यासाक्षात्प्रापितत्वात्· श्वेतगुणस्यतुतत्सामान ५०

धिकरण्याहवनीयः। निर्गुणद्रव्यस्य निरधिकरणगुणस्य चाभावात् तस्य छागेन संबन्धपूर्वकमेव क्रियमासंबन्धात्। तत्र श्रुतिप्रापितद्र
व्यादृतवाक्यप्राप्तगुणस्य दुर्बलत्वात्। श्वेतच्छागाभावेऽन्यवर्णश्छाग आलभ्यते न तु श्वेतगुणयुक्तो मेषः श्रुतिबाधापत्तेरिति सिद्धान्तः।
अखण्डार्थत्वे सर्वस्यैकरूपत्वात्के[illegible]कस्य बाधः। अपि च पदार्थनिबन्धनवाक्यीयसकलमीमांसान्यायासिद्धिरिति चेन्न। अखण्डादे
व वाक्यात्तदर्थाद्विकल्पनया शास्त्रे पदपदार्थापोद्धारेण तमादाय सकलेष्टसिद्धेः। एवं च कल्पितपदपदार्थाश्रयैर्मीमांसान्यायैस्तादृशा
खण्डार्थबोधनम्। किंच पदैः पदार्थबोधैरेवद्ध्यानयेत्यादौ संहितयापदस्वरूपनाशाद्र्थबोधानापत्तिः। किंच राजपुरुषादौ पृथगुप
स्थितस्य पृथगुपस्थितौ विरुद्धे आपद्येताम्। पदानां पृथगुपस्थापकत्वस्वभावत्वात्। वृत्तेस्तद्विपरीततया हूतौजस्त्वार्थत्वादिविक
ल्पोऽपि वाक्यादेव वृत्तिनिष्पत्तिरिति मन्यमाना नबुधाभ्रान्तिकल्पनैव। एवमुत्तरपदार्थप्राधान्याद्यपि श्वेतो धावतीत्यादावखण्डमे
व वाक्यं तन्त्रेणोभयार्थबोधकम्। एवं च सकलशास्त्रव्यवहारस्तदनुसारिलोकव्यवहारश्चापोद्धाराश्रयेणैव बोध्यः। प्रकृतिप्रत्य
यविभागोऽप्येवमेव। तदुक्तं धात्वादीनां विशुद्धानां लौकिकोऽर्थो न विद्यते। कृत्तद्धितानामर्थश्च केवलानामलौकिकः। प्राग्विभक्तेस्तदन्त
स्य तथैवार्थो न विद्यत इति। अत एव प्रकृतिप्रत्ययोभयार्थं क्वचिदन्यतर एवाभिधत्ते। यथेयानिति। अहनिति च। तथा क्वचित्समस्तय
द्रूपेन कर्त्राद्यर्थबोधो यथा पचतीति। क्वचिदेकेनैव यथात्तीति। किंत्वयेकस्मिंश्चिद्व्याकरणे प्रत्ययार्थत्वेनोक्तास्तेऽन्यत्र प्रकृत्यर्था

त्वेनोक्ताः। तस्मात्पदपदार्थाद्यसत्यमेव। शास्त्रमप्यसत्यव्युत्पादकमेव। तदुक्तं शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते। उपायाः शिक्ष्यमाणानां बालानामुपलालनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहत इति। अनादिमिथ्याभूतशास्त्राभ्यासानुसारेणैव शब्दाः शास्त्रज्ञलोकेनार्थप्रत्यायकतया गृह्यन्ते केनचित्। यथा घटादिकं परिच्छिन्नं दृष्ट्वा सर्वोपि विश्वप्रपञ्चः परिच्छिन्नत्वेन गृह्यते। भावानामुत्पादं दृष्ट्वा च शाश्वतमपि ब्रह्मोत्पादवदिति मन्यते लोकेन तद्वत्। तदुक्तं घटादिदर्शनाल्लोकः परिच्छिन्नोवसीयते समारम्भाच्च भावानामादिमद्ब्रह्म शाश्वतमिति। लोके विश्वप्रपञ्चः समारम्भ उत्पत्तिः। किंच त्वं ग्राममश्वः अश्वो गच्छति अजापयः शत्रून् अजापयः पिबेत्यादीनामाख्या तस्मादृष्ये वाक्यार्थादेव पश्चात्पदपदार्थनिर्णय इत्यखण्डमेव वाक्यं बोधकमखण्डार्थस्येत्युचितम्। तदुक्तम्- यथैवानर्थकैर्वर्णैर्विशिष्टोर्थोभिधीयते। पदैरनर्थकैरेव विशिष्टोर्थोभिधीयते। नहि किंचित्पदं नाम रूपेण नियतं क्वचित्। पदानामर्थरूपं च वाक्यार्थादेव जायत इति। वाक्ये खण्डत्वं चापृथगुपस्थितिजनकत्वम्। अपृथगुपस्थितिविषयत्वं चार्थे खण्डत्वम्। पदानां केवलानां पृथगुपस्थापकत्वं वृत्तिघटकानामपृथगुपस्थापकत्वमिति तु शास्त्रकृत्कल्पनैव। यदपि केवलं पदं सदित्यादि प्रयुज्यते। तदप्यन्तर्नीतक्रिया[illegible]र्थबोधकमिति तदपि वाक्यमेव। साधनस्य साध्यक्रियाकाङ्क्षत्वात् साध्यक्रियायाश्च साधनाकाङ्क्षत्वात्। एवमर्थेपि येवादिनो नानापक्षास्तेपि तत्तच्छास्त्रवासनावशात्कल्पिता एव। यथाऽभिहितान्वयोन्विताभिधानमिति।

संसर्गो वाक्यार्थः संसृष्टाः पदार्थाः सङ्घ इति जातिः पदार्थो व्यक्तिर्वेत्यादि। अतएव घट इति प्रयुक्ते वैशेषिकोऽतिरिक्तमवयविनं बुध्यते। सांख्यो गुणसमूहं बौद्धादिः परमाणुसमूहं। यद्यपि ऋषीणां दर्शनं तत्त्वविषयं भवति तथापि तत्त्वभूतेन वस्तुना व्यवहारासंभवाद्व्यवहारकाले ते व्यदृष्टतत्त्वसदृशा नानाप्रकारैर्विहरन्तीति न तद्वचसापि पदपदार्थसत्यत्वं मन्तव्यम्। अत्र वाक्यार्थस्यापेक्षिकं सत्यत्वं द्रष्टव्यम्। सर्वव्यवहारस्यासत्यविषयत्वात् वाक्यार्थश्च प्रतिभामात्रविषयः। प्रतिभा च जन्मान्तरसंस्कारजापि। यथा मधौ पिकस्य पञ्चमस्वरविरावो जन्मान्तरसंस्कारजः। अतएव शशशृङ्गं नास्तीत्यादितोऽपि सः। प्रतिभाविषयत्वाच्च प्रतिभा वाक्यार्थ इति व्यवहार इत्यलम्। ननु पदतदर्थकल्पनायामपि देवदत्त गामभ्याज शुक्लां दण्डेनेत्यादौ क्रियाकारकभावसंबन्धस्य विभक्त्यैवोक्तत्वेन को वाक्यार्थः। संबन्धसंबन्धस्य तु भानेन मानमनवस्था चेति चेन्न। पदार्थानां परस्परविशेष्यविशेषणभावरूपान्वयस्य वाक्यार्थत्वात्। यद्यपि विभक्तिप्रकृत्यर्थगतविशेषणत्वमपि विभक्तिशक्यमेव तथापि विशेष्यनिष्ठमितरपदार्थनिष्ठविशेषणतानिरूपितविशेष्यत्वं वाक्यशक्यमिति बोध्यम्। एतच्चोपपादयिष्यते। ननूक्तान्वयरूपवाक्यार्थस्य तद्घटकपदार्थोपस्थितत्वेनापूर्वत्वात्तत्र शक्तिग्रहासंभवस्तयोपस्थितत्तद्विषयकशक्तिग्रहे च तस्यापूर्वत्वहानिरिति चेन्न वृद्धव्यवहारदर्शनसहकृतमनसोपस्थितविशिष्टे तद्ग्रहसंभवात्। क्वचित्तु पदेशेन तद्ग्रहसंभवाच्च। क्वचिदाकाङ्क्षावशात्तदैव तत्र शक्तिग्रहे बोधस्तत्पश्चाच्चास्तु तत्कस्मिन्नान्वयव्यतिरेकाभ्यां तत्तत्पदार्थे तत्तत्सदृशत्वेऽव्यव

स्थितायामर्थाद्वाक्येउक्तान्वयविषयाशक्तिरवतिष्ठते।सर्वथाऽज्ञातस्यसंबन्धस्यभानंत्वनुभवविरुद्धम्।इदंचार्थवत्सूत्रेभाष्येस्पष्टम्।तआप्रातिपदिकार्थसूत्रेषष्ठीशेषइतिसूत्रेचभाष्ये।तत्रहिवीरःपुरुषइत्यादौविशेषणविशेष्यभावरूपंयदाधिक्यंसवाक्यार्थइत्युक्तम्।तत्राधिक्यमितिस्वार्थेष्यञ्।तच्चनान्यस्यप्रवृत्तिनिमित्तम्।तदुक्तम्·वाक्यरूपस्यवाक्यार्थेवृत्तिरन्यानपेक्षयेति।नन्वाकाङ्क्षादिसहकारेणपदैरेवोक्तसंसर्गस्यापिभानोपपत्तौनवाक्यस्यशक्तिकल्पनेमानाभावोगौरवंचाकाङ्क्षाचवक्ष्यतइतिचेन्न।तत्तत्समभिव्याहारेऽर्थसंबन्धेबोधजनकत्वानुपपत्त्यासंबन्धावश्यकत्वात्।पदेषुतत्तदर्थसंबन्धवत्।तदुक्तंभट्टपादैः।नविमुञ्चन्तिसामर्थ्यंवाक्यार्थेऽपिपदानिनः।वाक्यार्थेलक्ष्यमाणोहिसर्वत्रैवचदृश्यतेइति·हियतःसर्वत्रैवएकपदप्रयोगेपिप्रविशपिण्डीमित्यादौ।एतदर्थश्चाग्रेवक्ष्यते।एवंचवाक्यार्थत्वंस्पष्टमेवोक्तम्।तत्रप्रत्येकंपदस्यसामर्थ्यमितिनयुक्तम्·विनिगमनाविरहात्।पदानांतद्विषयसामर्थ्यात्यागेयुक्त्यन्तरमप्युक्तंतैः।साक्षाद्यद्यपिकुर्वन्तिपदार्थप्रतिपादनम्।वर्णास्तथापिनैतस्मिन्पर्यवस्यन्तिनिष्फले।वाक्यार्थमितयेतेषांप्रवृत्त्यानान्तरीयकम्·पाकेज्वालेवकाष्ठानांपदार्थप्रतिपादनमिति।एवंचपदतात्पर्यविषयतावाक्यसंबद्धत्वंचस्पष्टमेव।एवंचपदवृत्तिःकेवलपदार्थबोधिकावाक्यवृत्तिस्तुविशिष्टार्थस्यैवबोधिकेतिबोध्यम्।यत्तुपदैःपदार्थोपस्थितौपदार्थानांपरस्पराकाङ्क्षादिवशादन्वयबोधोनतुसवाक्यसंबन्धः।वाक्यार्थइत्यस्यचवाक्यप्रयोजनमित्यर्थइतितन्न।अन्वयस्यशब्दासंबद्धत्वेतद्विषयकबोधस्यशाब्दयामीत्यनुव्यवसायानापत्तेः।धूमपदोपस्थि

त धूमेन जातवन्त्यनुमितेरपि शाब्दत्वापत्तेश्च। किंच शब्दानामर्थह्वारकसंबन्धस्यैवाङ्गीकारेण वाक्यानां च तदभावात्परस्परमिमे वाक्ये सं
बद्धे इत्यादिव्यवहारानापत्तेः। न च प्रयोजनभूतबोधविषयह्वारक एव तयोः संबन्ध इति वाच्यम्। ईदृशस्यापि संबद्धत्वव्यवहारप्रयो
जकत्वे मधुरापाटलिपुत्रयोरपि सं[illegible]त्वव्यवहारापत्तेः स्वसंयुक्तावयवकदेशसंबद्धत्वादित्यलम्। यत्तु बोधजनकत्वानुपपत्त्या
न संबन्धकल्पना किंतु स्मृतिरूपपदार्थो[illegible]स्थित्यनुपपत्त्या सा ह्येकसंबन्धिज्ञानादपरसंबन्धिस्मरणविधयेति तत्कल्पना। बालोऽपि वा॰
क्यार्थज्ञानकारणत्वेन पदार्थस्मृतिं कल्पयित्वा तदनुपपत्त्यैव शक्तिं कल्पयतीति तन्न। पदार्थस्मृत्यनुपपत्त्या कल्प्यमानशक्तेः पदेष्वेव
कल्पनौचित्येन प्राथमिकशक्तिग्रहस्यैव पदविषयत्वसिद्धावन्वयव्यतिरेकाभ्यां पश्चात्तत्तत्पदशक्तिग्रह इति सर्वतन्त्रसिद्धान्तविलया
पत्तेः। किंचैवमितरान्विते शक्तिरित्यादिपक्षाणां विलय एव। किंच पदार्थोपस्थितेर्न स्मृतित्वम्। तत्ताया अभानात्। त[illegible]च पूर्वानुभूततैव
। अत एवानुभवविषयासंप्रमोषः स्मृतिरिति पातञ्जलसूत्रम्। अनुभवस्य यौ विषयौ वृत्तितदारूढविषयरूपौ तयोर[illegible]प्रमोषोऽनपहर
णं यत्र सा वृत्तिः स्मृतिरित्यर्थः। तदुक्तं पातञ्जलभाष्ये· वृत्तिग्राह्यविषयं ज्ञानं ग्राह्यविषयग्रहणस्त्युभयाकारप्रतिबिम्बवच्चैतन्यरूपं स्व
बिम्बाश्रये तज्जातीयमेव संस्कारमारभते। तस्य च संस्कारस्य स्वाभिव्यञ्जककालाद्युद्बुद्धस्य स्वसमानाकारग्राह्यग्रहणोभयविषय
स्मृतिजनकत्वमिति। अनुभवसंस्कारस्मृतीनां समानाकारत्वेनैव कार्यकारणभावादेवमेव युक्तम्। न च तत्तांशोउद्बोधकासमवधाना॰

त्तदभानम्। दृश्यते हि समूहालम्बनात्मकनानापदार्थानुभवेऽपि कस्यचिदेव स्मरणमिति वाच्यम्। न तद्विषयांशोद्बोधकस्यैव नियमेन तद्विषयकज्ञानांशोद्बोधकत्वेन तदंशे प्रमोषासंभवात्। किंतु ग्राह्यांशे एव सः॥ तत्तद्देशकालवृत्तित्वरूपतत्तायास्तु न भानं स्मृतावुचितम्। कालादेस्तदनुभवेऽभानात्। न च दोषवशात्तत्प्रमोषः। नियमतस्तादृशदोषकल्पने गौरवात्। क्लृप्तस्य भ्रमजनकदोषस्य तन्मोषकत्वे तु विनष्टरजतस्य रागान्धस्य शुक्त्यादिदर्शने तद्रजतविशिष्टमिदं रजतमिति तत्तांशोल्लेखिभ्रमानापत्तिः। दोषस्य विद्यमानत्वात्। किंच पदजपदार्थज्ञाने स्मरामीति नानुभवः शाब्दयामीत्यनुभवश्च। पदजपदार्थज्ञाने उद्बुद्धशक्तिग्रहजसंस्कारस्य हेतुत्वं फलबलात्। यथा नववाक्यार्थबोधजनकत्वग्रहजसंस्कारस्योद्बुद्धस्य वाक्यार्थबोधहेतुत्वम्। किंच पदार्थानुभवस्य शक्तिग्रहात्मकतया तत्र च शक्तिविशेषणतयैव तज्ज्ञानेन तद्विशेषणकस्मृतिरेव स्यान्न तु तद्विशेष्यिका त्वदभिमता। किंच पदार्थोपस्थितिर्न शाब्दे कारणं किंतु पदज्ञानोद्बुद्धः पदार्थविषयसंस्कार एव तत्र कारणं स शक्तिविषयोपीत्यन्यत्। वाक्यशक्तिसत्त्वादेव समासग्रहणं वाक्ये प्रातिपदिकसंज्ञातिव्याप्तिवारणार्थमिति भाष्ये संगच्छते। तत्र केषांचिद्विशिष्यैव तत्तद्वाक्यस्य तत्तद्वाक्यार्थे शक्तिग्रहः। अत एव समुदायतो विशिष्टबोधेऽपि पदविभागसामर्थ्याभावो दृश्यते तेषाम्। एतेन विशिष्टशक्तिग्रहे पदशक्तिग्रहः कारणमित्यपास्तम्। कस्यचित्कारकत्वादिज्ञानतः कारकपदधातुघटितपदयोर्विशिष्टयोः कारकविशिष्टक्रियाशक्तत्वमिति सामान्यत एव ततः पदविशेषसमभिव्याहारज्ञाने सति तात्पर्यवशात्पदार्थविशेष

विशिष्टक्रियाबोधः।सामान्यशक्तिग्रहोपितत्तत्पदार्थनिष्ठप्रकारतानिरूपितातत्तत्संसर्गनिरूपितायातत्तत्पदार्थनिष्ठविशेष्यतातद्रू
त्यर्थसमुदायःशक्तइत्येवंविशेष्यविशेषणभावापन्नेऽर्थएवेतिनविपरीतोविशेष्यविशेषणभावः।यत्तुसर्वस्यसामान्यतःशक्तिग्रहएवबो
धकइतितन्न।कारकत्वधातुत्वाद्यजानतस्तथाशक्तिग्रहासंभवात्।एतेनप्रातिपदिकार्थप्रकारकशाब्दबोधेतदर्थकपदोत्तरसार्थकप्रत्य
यतदर्थबोधकपदनिपातान्यतमजन्योपस्थितिर्हेतुरित्याद्यपास्तम्।कर्मत्वंघटःअम्घटइत्येतत्समभिहारव्युत्पन्नानांतवस्तथाबोधेव्य
भिचारात्।नचस्वाव्यवहितोत्तरोत्पत्तिकत्वस्वसामानाधिकरण्योभयसंबन्धेनतत्तद्व्युत्पत्तिविशिष्टबोधेतत्तद्व्युत्पत्तिःकारणमितिनदो
षइतिवाच्यम्।अनन्तकार्यकारणभावापत्तेः।यत्तुवाक्यशक्त्यङ्गीकारेपदार्थानामिववाक्यार्थस्यापिस्मरणमेवस्यान्नत्वनुभवः।संबन्धि
ज्ञानतयैवपदज्ञानवत्तदुपयोगादितितन्न।पदार्थानामपिस्मरणाभावस्योपपादनात्।किंचवाक्यार्थमतीतेर्नानुभवत्वम्।स्वर्गनरकादि
कंशृण्वतस्तदनुभवामीत्यप्रतीतेः।तस्माच्छाब्दत्वेज्ञानत्वव्याप्यजातिविशेषएवनानुभवत्वव्याप्यमित्यलम्।तत्रसंबन्धस्यसंबन्धि
द्वयनिरूपितत्वेनैवबोधाद्वाक्यतोनपृथक्तद्बोधः।तदुक्तंहरिणा।नाभिधानंस्वधर्मेणसंबन्धस्यास्तिवाचकम्।अत्यन्तपरतन्त्रत्वात्ष
ष्ठ्येवास्यतुवाचिकेति।षष्ठ्येवसंबन्धस्यवाचिकानतुसंबन्धशब्दादीतितदर्थः।अभिधानम्।पदंसंबन्धिनोःसंघटनस्वभावत्वेननित्यप
रतन्त्रत्वात्षष्ठीपदंविभक्तीनांवाक्यस्यचोपलक्षणम्।पदानांतुपृथक्स्वार्थबोधकत्वमपि।यत्तुमीमांसकैकदेशिनोवाक्यार्थेवाक्यस्य

लक्षणेतितन्न। वाक्यबोध्यान्वयस्यसंबन्धरूपत्वेनतत्रवाक्यबोध्यस्यसंबन्धस्यपदार्थस्यवा संबन्धग्रहानुभवेनवाक्यबोध्यनिरूपितसंबन्धमूलिकायास्तद्रूपायावातस्याअसंभवात्। अनुपपत्तिप्रतिसंधानंविनापितद्बोधेनतदगसराच्च। नचतात्पर्यविषयीभूतवाक्यार्थानुपपत्तिस्तद्बीजम्। नियमतःपूर्वंतात्पर्यज्ञानस्यापिकल्पनापेक्षयाशक्तिकल्पनस्यैवौचित्यात्। नविमुञ्चन्तिसामर्थ्यंवाक्यार्थेपिपदानिनइतिपूर्वार्द्धोक्तेःऽर्थेहेतुत्वेनोपन्यस्तायांवाक्यार्थोलक्ष्यमाणोहिसर्वत्रैवचदृश्यतेइतिभट्टकारिकायांलक्ष्यमाणइत्यस्यप्रतीयमानइत्यर्थः। दृश्यतइत्यस्यप्रतीतिविषयत्वेनानुभूयतइत्यर्थः। सर्वत्रैवहिवाक्यार्थोलक्ष्यएवेतिचस्थितिरितिपाठेलक्ष्यइत्यस्यप्रतीतिविषयइत्यर्थकस्यास्तीतिशेषः। सर्वत्रैववाक्यार्थःप्रतीयमानोस्त्येवेतिस्थितिः। वक्ष्यमाणरीत्यावाक्यैकदेशान्यार्थेनेत्यर्थः। अतएवकेवलपदप्रयोगेपीत्यर्थकंसर्वत्रैवेतिसार्थकमित्याहुः। यत्तुपदानामेवान्वितेशक्तिःपदैरेवतदर्थप्रतीत्युपपत्तौवाक्येपिशक्तिकल्पनेमानाभावात्। तदुक्तम्। एवंहिसंबन्धग्रहणमयमर्थोनेनशब्देनाकाङ्क्षितसन्निहितयोग्येतरान्वितःसोभिधीयतइति। पदानांसामान्यतइतरान्वितेशक्तावपिविशेषाविषयसामान्यबुद्ध्यावासमभिव्याहारविशेषकारणत्वरूपाकाङ्क्षाज्ञानबलात्तत्तत्पदार्थविशेषनिरूपितान्वयविशेषबोधसिद्धिः। अतएवपदप्रयोगेप्यन्वयविशेषजिज्ञासोपपत्तिः। तस्याअन्वयसामान्यज्ञानपूर्वकत्वनियमात्। विशेषतःपदार्थान्तरघटितस्यतदन्वयविशेषरूपवाक्यार्थस्यप्रागनुपस्थितावपिअन्वितत्वादिसामान्यधर्मप्रकारेणोपस्थितेशक्तिग्रहःसुलभः। इतरान्विते

शक्तिरितितुनयुक्तम्-इतरस्यपदान्तरलभ्यत्वात्।पदान्तरसमभिव्याहारेएवतच्छक्त्युद्बोधइतिघटइत्येतन्मात्रान्नान्वयधीः।ततोघटमात्रबोधस्तुशक्तिभ्रमात्।विशिष्टविषयायाःशक्तेस्तन्मात्रविषयत्वमपीतिभ्रमः।यद्वापदैकदेशन्यायेनविशिष्टेएकदेशेचपदानांशक्तिग्रहइत्यदोषः।एतेनकार्यान्वितेशक्तिःपदानामित्यपास्तम्।कार्यत्वस्यापिलिङादिलभ्यत्वात्।लिङादिसमभिव्याहारेएवतद्बोधानुभवात्।आनयनाद्यर्थकपदसमभिव्याहारेएवचानयनादिबोधवदिति।नन्व।अन्वयेशक्तिस्वीकारेपिविशेषबोधायसमभिव्याहारस्यतद्बोधकारणत्वस्वीकारेतथाकारणत्वाग्रहवतोबोधवारणायतद्ग्रहस्यापिकारणत्वस्वीकारे समभिव्याहारेतदसंबद्धेतद्बोधजनकत्वानुपपत्त्यासमभिव्याहारेपितत्संबन्धाङ्गीकारेविपरीतगौरवापत्तेः।अन्यलभ्यत्वरूपतर्केणकार्यत्वाद्यंशत्यागवदेतस्यागस्याप्यौचित्यात्।नचोपजीव्यविरोधः।उपजीव्यत्वेमानाभावात्।देवाद्विमथ्यसंनकृतंनतुपदशक्तिग्रहेतस्यहेतुत्वम्।मातापित्रादिभिश्चन्द्रोगौरित्यादिशब्देषुचन्द्राद्यभिमुखाङ्गुलीदर्शनपूर्वकमुच्चार्यमाणेषुबालस्याद्यशक्तिग्रहेव्यभिचारात्।पश्चात्तनान्यथासिद्धनयोपजीव्यत्वंसिद्धंयथायागस्यस्वर्गजनकतानिर्वाहायकल्पितेऽपूर्वेतत्रतदेवकारणमस्तुनयागइतिशङ्कायांसदूषणंनचैवंप्रकृते।नचप्राथमिकत्वेनबलवत्त्वात्तेनपश्चात्तनस्यबाधः।यथादर्पणेचैत्रमुखंनास्तीतिपूर्वप्रत्यक्षेणचैत्रमुखसन्निधानानन्तरभाविनोदर्पणेचैत्रमुखप्रत्यक्षस्यभ्रमत्वकल्पनमितिवाच्यम्।इदंरजतमितिग्रहस्यपाश्चात्त्येननेदंरजतमित्यनेनबाधात्।नचसर्वैःप्रथमेप्रतीयमानत्वेनबलवत्त्वम्।सर्वेषांशरीरात्मप्रत्ययेचन्द्रताराल्पत्वप्रत्ययेचव्यभिचारात्।उक्तेमाना

दिनिर्दिष्टचन्द्रादौ बालीयाद्यशक्तिग्रहे व्यभिचाराच्च। तस्माल्लोके प्रवृत्तिसंवादादिना वेदे तदर्थनिर्णायकन्यायेन यद्बलवत्तद्बाधकमितरद्बा
ध्यमिति व्यवस्था। तत्र परेण पूर्वस्य भ्रमत्वप्रत्यायनमेव बाधः पूर्वेण तु परस्य सोपाधिकज्ञानस्थले भ्रमत्वप्रत्यायनम्· क्वचित्तूत्पत्तिप्रतिबन्धः
। यथा श्रौतविनियोगेन लैङ्गिकस्य तस्य बाधः। जिज्ञासापि फलविशेषदर्शने रसविशेषजिज्ञासावदुपपन्ना। ननु तद्वदेव तात्पर्येऽपि जिज्ञासा नि
यमेन स्यादिति चेदिष्टापत्तेः। न चानयोः संसर्गविशेषज्ञानं मे भवत्वितीच्छायां तादृशज्ञानधर्मिकेष्टसाधनताज्ञानस्य हेतुत्वेन तद्घटकतया वि
शेषज्ञानस्यापि सिद्ध्या जिज्ञासोच्छेद इति वाच्यम्· विशेषधर्मत्वेन ज्ञानेऽपि तत्तद्रूपेण जिज्ञासोपपत्तेः। किं च सिद्धिर्न स्वरूपतः प्रतिबन्धिका किं
तु सिद्धत्वप्रकारकज्ञानमेव तथा। अत एव वस्तुत्वसिद्धावपि तत्सिद्धत्वज्ञाने नेच्छानिवृत्तिः। वस्तुतः पदज्ञाने तादृशजिज्ञासैवासिद्धा किं त्वन्व
यिजिज्ञासैवेत्यलम्। क्वचित्तु पदैरितरान्वितस्वार्थबोधनमस्त्येव। यथा प्रविशपिण्डीमित्यादौ। तथा हि। यथा भीमादयः पदैकदेशाः पदस्या
र्थे प्रयुज्यन्ते। विशिष्टशक्तिग्रहकालेऽनुनिष्पाद्यवयवानामपि तत्र शक्तिग्रहात्। भीमसेनपदं दृष्ट्वा प्रयुज्यमानेन तदवयवपदं च भीमसेने शक्त
मिति शक्तिग्रहः। न च सेनपदादपि तद्बोधापत्तिः। तत्र तदस्य तदर्थे शिष्टप्रयोगाभावेन शक्तिग्रहे तद्विषयकत्वांशेऽप्रामाण्यकल्पनेन ततो बोधा
नुदयात्। अप्रामाण्यज्ञानानास्कन्दितशक्तिग्रहस्यैव बोधजनकत्वात्। शक्तिभ्रमाद्बोधोऽपि भ्रमत्वेनाज्ञानादेव। एवं वाक्यस्यापि तत्तत्पदा
र्थालिङ्गिते विशेष्यविशेषणभावे शक्तिग्रहकाले तदवयवानां प्रविशपिण्डीमित्यादीनामपि तत्तद्वाक्यार्थे शक्तिग्रहणेन प्रविशेत्यादिपद

देवतत्तद्वाक्यार्थबोधः। अनेककारकाणां क्रियाणां च संभवेपि योग्यतावशात्तात्पर्यवशाच्च तत्तदर्थबोधस्तवतत्तत्पदाध्याहारवत्। तदुक्तं समर्थसूत्रे भाष्ये निष्कौशाम्ब्यादौ क्रान्तादिपदाभावेनासामर्थ्यात्समासाभावमाशङ्क्य तदर्थगतेः सिद्धम्। सोर्थस्तदर्थस्तत्कृतेः। योर्थः कौशाम्ब्यासमर्थः स निसोच्यते इति। उक्तरीत्या विशिष्टोर्थो निसोच्यत इति तदाशयः। अतएव लुपि युक्तवदिति सूत्रे एकवचनाद्यवयववचनशब्दः पारिभाषिक इत्युक्तम्। तदुक्तम्। वाक्यं तदपि मन्यन्ते यत्पदं चरितक्रियम्। आख्यानशब्दे नियतं साधनं यत्र गम्यते। तदप्येकं समानार्थं वाक्यमित्यभिधीयते इति। ग्रामं प्रविश पिण्डीं भक्षयेत्यादि तु शब्दान्तराण्येव। तान्यपि लौकिके प्रयोगलाघवानादरात्प्रयुज्यन्त एव। यत्तु पदावयवेन पदस्मरणमेवं वाक्यैकदेशेनापि वाक्यस्मरणमयमेवाध्याहार इति तन्न। भीमादिपदात्तत्स्मरणाननुभवात्। किंचैवं सत्युच्चारितपदस्य वृत्त्यार्थबोधकत्वाभावेनाप्रातिपदिकत्वात्तदुत्तरं विभक्त्युत्पत्त्यनापत्तेः। न च पदैकदेशस्य तत्तत्पदार्थे लक्षणा। बाधप्रतिसंधानाभावेपि शक्यसंबन्धज्ञानाभावेपि बोधानुभवात्। किंचैकदेशेन भिन्नस्वरूपस्य संघातस्य कथं स्मरणं सादृश्याभावात्। स्मृतस्यानुच्चारितत्वेन तत्तो बोधानापत्तेश्च। तदुक्तम्। एकदेशात्स्मृतिर्भिन्ने संघाते जायते कथम्। कथं प्रतीयमानः स्यात्शब्दोर्थस्याभिधायक इति। तदेतदभिप्रेत्योक्तमिग्यणः संप्रसारणमिति सूत्रे भाष्ये दृश्यन्ते हि वाक्येषु वाक्यैकदेशान्प्रयुञ्जानाः पदेषु पदैकदेशान्। प्रविश पिण्डीं प्रविश तर्पणं देवदत्तो दत्तः सत्याभामा सत्यभामेनीति। वाक्येष्वित्यादेर्वाक्यार्थेष्वित्यादिरर्थः। अणुदित्सूत्रे भाष्ये चोच्चारितस्यैव शब्दस्य प्रत्यायकत्वमुक्तम्।

अन्यथाज्ञानमात्रेशब्दभानाच्छाब्दधारापत्तिस्तत्रतन्निवृत्तयेप्रतिबन्धककल्पनेतुगौरवम्।नचलिपिस्मृतशब्दादर्थबोधानापत्तिरनुच्चा

रणादिनिवाच्यम्।तत्रचेष्टावल्लिपेरेवार्थबोधकत्वेनास्मृतेः।अतएवलिपौशब्दत्वभ्रमोबालानाम्।तच्छक्तिग्रहस्यशब्दसंकेतग्रहाधी
नइत्यन्यत्।लिपौशब्दत्वभ्रमवतांतत्स्मरणानुपयोगाच्च।अतएवलिपावयंककारइत्यादिव्यवहारःपण्डितानांलिपौशब्दत्वबाधज्ञानव
तामप्यनादिसिद्धारोपात्।अन्तःकरणादावात्मप्रत्ययेभ्रमत्वज्ञानवतांपण्डितानांव्यवहारनिर्वाहस्यैवमेवोपपाद्यत्वात्।यद्वातत्रापि
सूक्ष्मतरताल्वोष्ठपुटव्यापारात्सूक्ष्मतरमुच्चारणमस्त्येवमानसजपस्थलइवनिरूपितंचैतस्माकू।तस्माच्छब्दसत्ताज्ञानंशाब्दबोध
कारणम्।अतएवान्यस्मिन्शब्दउच्चारितेतत्रान्यशब्दत्वभ्रमदशायांनदर्थबोधानुभवः।उच्चारितःशब्दइत्यस्योच्चारितत्वेनगृहीतइ
त्यर्थोबोध्यः।एतेनप्रविशपिण्डीमित्यादौकारकक्रियाशब्दमनुमायततोबोधइतिपरास्तम्।किंचकिंशब्देनशब्दस्याक्षेपउतार्थेन।नाद्यः
स्वार्थप्रतिपादनव्यग्रेणतेनान्यानाक्षेपात्।नान्त्यः।तस्यार्थस्यशब्दान्तरेणसंबन्धाभावात्।एतेनशब्देनार्थाक्षेपइत्यप्यपास्तम्।अस्य
शब्दस्यशब्दान्तरार्थेनसंबन्धाभावात्।यथाकथंचित्परंपरासंबन्धसत्त्वेपितस्यनानुमितिप्रयोजकत्वंलक्षणाप्रयोजकत्वाभाववत्।
अर्थेनार्थानुमानेपितस्यशाब्दत्वंनस्यात्।तस्मादर्थेनार्थान्तरस्यैवतद्वाच्यतानुमानमेवोचितम्।नचपिण्डीमित्येतन्नामसिद्धार्थकंक
र्थंसाध्यक्रियाबोधकमितिवाच्यम्।नामसरूपभिन्नमेवेदमित्यदोषात्।नामसारूप्यादेवद्वितीयाद्यन्तताव्यवहारः।नचाख्यातत्वस

णस्यात्रातिव्याप्तिः। शास्त्रबोधितक्रियार्थकघटितत्वे सतीति विशेषणदाने नादोषात्। पिपठीषतीत्यादेरनेकक्रियार्थत्वेपि प्रकरणान्निर्णयः प
दानामानर्थक्येपि क्रियाप्रधानमाख्यातं सत्त्वप्रधानानि नामानि चत्वारि पदजातानीत्यादिशास्त्रकृत्कल्पनामात्रमेव। यथाऽसत्येनाप्यर्थेन म
रीचिकाजलेनेदं जलमानयेत्यादिव्यवहारो लोकानां दृश्यते तद्वत्सर्वत्रापि पदेर्थव्यवहार इति स्पष्टं न लोके प्रतिपत्तॄणामर्थयोगात्प्रसिद्धं यद्यस्या
क्षिनाहरिग्रन्थे। प्रसिद्धयः शास्त्रे तु विशेषः। एतेनोच्चारितं पदममुकार्थान्वयित्वेन स्वार्थबोधेच्छया वक्त्रोच्चारितमिति तात्पर्यग्रहे कस्यचित्पदा
ध्याहारेण कस्यचिदर्थाध्याहारेण बोध इति यथानुभवं व्यवस्था शब्दं विनापि गुडादिशब्दैर्माधुर्यादिरूपार्थस्याक्षिनिकोचादिना चार्थस्य बो
धस्य दर्शनादिति स्पष्टमन्तेन्वयज्ञानमिति सूत्रे भाष्ये। अर्थस्यापि तत्तत्पदविशिष्टस्याध्याहारः। एतेनार्थाध्याहारे चैत्र ओदनमित्यत्र तृतीया
पत्तिः प्रत्ययेन कर्तुरनभिधानात् शब्दानुविद्धं सर्वं ज्ञानमिति नियमभङ्गश्चेति परास्तम्। अनभिहितत्वस्य कर्त्रादेरनभिहितत्वस्य समभिव्याहृ
तेन पदेन समभिव्याहृतज्ञानविषयीभूतार्थविशेषणीभूतपदेन वाभिधानयोग्यत्वाभावरूपस्य विवक्षणेनादोषात्। उपस्थितपदात्पदार्थबोधा
नङ्गीकारेण चार्थाध्याहारव्यवहारो बोध्यः। अध्याहारश्च मानसं ज्ञानमित्यपास्तम्। क्रियार्थोपपदस्य च कर्मणि स्थानिन इत्येतदुदाहरणे फलेभ्यो याती
त्यादौ तुमुन्नन्ताप्रयोगे तादृशवाक्यैकदेशप्रयोग एव चतुर्थीसाधुर्न तु तस्य योगे। स्थानिनद्युक्तेः। स्पृहेरीप्सित इत्युदाहरणे पुष्पेभ्यः स्पृहयतीति सं
पूर्णवाक्यप्रयोगे तदेकदेशप्रयोगे च चतुर्थ्याः साधुत्वम्। ल्यब्लोप इत्यादिच ल्यबन्तरहितवाक्यैकदेशप्रयोग एव प्रवर्तते शास्त्रबलाल्लोकव्य

बहुमाचास्यपञ्चम्यन्तघटितवाक्यैकदेशस्यैव विशिष्टेऽर्थे शक्तिकल्पनमिति बोध्यम्। सुप्यसुपपदे इति सूत्रे स्थानिन्यपीति तूपपदग्रहणा
न्तत्पदसत्ताया एव निमित्तत्वभ्रमवारणाय। स्थानिनीत्युक्ते तत्पदप्रयोगे न स्यादत्तोपीति। उपपदे इति तु वैचित्र्यायैवाचार्याः स्थलान निव
र्तन्त इति न्यायात्। एतेनैतत्स्थलात्स्थानिपदमज्ञायमानार्थकं तेन सुप्रदाद्यर्थाध्याहारेपि नोपपदोच्चारणेन तदध्याहारे च मध्यमादिफले
भ्यो यातीत्यादिवार्थाध्याहारे एव साधुन पदाध्याहारे पुष्पेभ्य इत्यादिपदाध्याहारे एव साधुनार्थाध्याहार इत्यपास्तम्। एकस्यैव पक्षभेदेन सा
धुत्वासाधुत्वयोर्नवेति सूत्रे भाष्यकृता तिरस्कारात्। किंचैतत्पदाज्ञानं पदज्ञानं च वक्तृनिष्ठं साधुत्वनियामकमुत श्रोतृनिष्ठम्। नाद्यः। अर्थस्य
बुद्धिस्थत्वेन तद्वाचकपदस्यापि तद्बुद्धिस्थताया आवश्यकत्वात्। नान्त्यः। इग्यण इति सूत्रभाष्योक्तन्यायेन पुष्पेभ्य इत्येकदेशस्यापि तादृश
वाक्यार्थे शक्तिग्रहसत्त्वे ततः पदज्ञानं विनापि बोधेन तत्र पदज्ञानस्य दुर्लभत्वात्। पदानालिङ्गितार्थाध्याहारासंभवेन फलेभ्यो यातीत्यादा
वपि श्रोतुः पदाज्ञानस्य दुर्लभत्वाच्च। परः सन्निकर्ष इति सूत्रभाष्योक्तरीत्या वक्तृज्ञानस्यैव साधुत्वनियामकत्वाच्च। वाक्यत्वं कारकाद्यन्वि
तक्रियाबोधकत्वमेवेति वक्ष्यते। तत्र प्रकृतिप्रत्ययनिपातानामेकवर्णानामर्थवत्त्वदर्शनादित्यादिना प्रत्याहाराह्निके भाष्ये उक्तः प्रकृतिप्रत्यय
योर्वाचकत्वमित्येवंरूपो वर्णस्फोटः शास्त्रीयप्रक्रियोपयोग्येव न वास्तवः वस्तुतस्त्वे विकल्पायोगेन प्रातिपदिकार्थे विषये एकं द्विकं त्रिकं चतु
ष्कं पञ्चकमित्यादिविवादविकल्पानुपपत्तेः। काल्पनिके तु यथेच्छमिति तत्संभवः। अतएवातिशायने तमबिति सूत्रे शुक्लादयो गुणाः एकेन च

शुक्लतर इति प्रकर्षप्रत्ययानुपपत्तिः। तेषां सावयवत्वेनाल्पत्वमहत्त्वकृतविशेषेण तदुपपत्तेः। अथवा एके निरवयवा नैर्मल्यादिगुणान्तरमिश्रणात् प्रकर्षः। यथा जात्युत्पलादिवासितायां मल्लिकायां गन्धप्रकर्षः। अथवा नानाशौक्ल्यस्थिति भाष्ये उक्तम् अनेन त्वेकत्र वस्तुनि अनेकपक्षोपन्यासेन व्यवहारोपपादकपदार्थानामवास्तवत्वं सूचितम्। किंच तस्यैव वास्तवत्वे कर्तरि क्तादित्यस्यास्मदादीन् प्रत्यबोधकत्वापत्तिः। कर्तृपदस्याप्यवयवशात्तथैव बोधकत्वे नैतद्वाक्यार्थबोधात्प्राकृतन शक्तिग्रहासंभवेनात्माश्रयापत्तेः। यदि तस्य मानान्तरेण शक्तिग्रहस्तदान्येषामपि तेनैव शक्तिग्रहसंभवेनास्य वैयर्थ्यापत्तिः। शक्तिग्रहाभावे शक्यसंबन्धरूपा तन्मूलिका वा लक्षणापि वक्तुमशक्या। एवं चेदृशे विषये समुदायशक्त्यैव बोधकत्वमस्मदादीन् प्रत्यावश्यकम्। गौतमोऽपि प्रकृतिप्रत्ययार्थस्यावास्तवत्वं ध्वनयन् ते विभक्त्यन्ताः पदमिति पदं पदार्थमुक्त्वा जात्याकृतिव्यक्तयस्तु पदार्थ इत्याह। विभक्तिपदेन सुप्तिङादिनि तद्धार्त्तिककारस्तन्न। जातिः प्रवृत्तिनिमित्तोपलक्षणम्। आकृतिपदेन रूपक्रियादिविशिष्टमवयवसंस्थानं जातिलिङ्गमेव। अत एव गां लिखेत्यादौ लेखनकर्मत्वोपपत्तिः। व्यक्तिपदेन च संख्यादिविशिष्टा व्यक्तिः। अत एव गौरिति विज्ञाने प्रतिभासमानेषु वस्तुषु कः शब्द इति प्रश्ने सास्नादिविशिष्टस्यार्थस्य क्रियाया गुणस्य जातेश्च शब्दत्वं किं यत्तत्सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्दः। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितं स शब्दः। यत्तर्हि तन्न शुक्लो नीलः कपिलः कपोत इति स शब्दः। ततर्हि भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्द इत्येतद्ग्रन्थेनेति शब्दबलात्तदिति नपुंसकवशाच्च शुक्लसुरभ्यादिविशेषशब्दैर्व्यवह्रियमाणं वस्तु रूपगन्धस्पर्शादिकं लिङ्ग-

संख्यादिकंचशब्दइत्याद्यर्थकेनाशङ्क्यनेत्याह।वक्ष्यमाणगुणाश्रयोद्रव्यंनामतत्‌क्रियानामसाउक्तद्रव्यगुणोनामसआकृतिर्नामसेत्येवंतेषांतत्त्वाभावमुपपाद्ययेनोच्चारितेनसास्नालाङ्गूलखुरककुदविषाणिनांसंप्रत्ययोभवतिसशब्दइत्युत्तरितंपतञ्जलिना।अतएवकैयटेनाथगौरित्यत्रकःशब्दइतिप्रश्नस्यगौरितिविज्ञानेप्रतिभासमानेषुवस्तुषुकःशब्दइत्याशयमुक्त्वातान्येववस्तूनिक्रमेणनिर्दिशतीतिकिंयत्तत्सास्नाइत्यादिभाष्यमवतारितम्।येनेत्यादिसिद्धान्तभाष्येविषाणस्योपलक्षणत्वाद्गुणक्रियाजातिग्रहणम्।अतएवचाम्रफलादौश्रुतेरसविशेषादिजिज्ञासाविशेषजिज्ञासायाःसामान्यज्ञानपूर्वकत्वाच्चक्षुरादिभिरपिसामान्यतोरसादिग्रहणंभवत्येवविशेषस्तुरसनादितत्तदिन्द्रियग्राह्यएव।अतएवआम्रफलेदृष्टेरसविशेषादिजिज्ञासा।अथगौरित्यत्रेत्यत्रगौरित्यनेनाविशेषाज्ज्ञानमात्रस्यग्रहणेनज्ञानमात्रेशब्दगुणक्रियादिसामान्यभानस्यभाष्यकृताध्वननात्।अतएवकम्बुग्रीवादिमान्नास्तीत्याहितोघटत्वावच्छिन्नाभावप्रतीतिरुक्तान्यायविद्भिः।जातेरपितत्पदार्थत्वात्।आकृतेर्घटपदार्थत्ववत्।तत्रजातिरनुगताकारप्रतीत्यास्वरूपतएकत्वेनचसिद्धा।अतएवसरूपसूत्रेभाष्येकथंपुनर्ज्ञायतएकाकृतिरितिप्रख्याऽविशेषात्।नहिगौरित्युक्तेविशेषःप्रख्यायतेशुक्लानीलेत्यादिप्रख्याबुद्धिस्तस्याअविशेषएकरूपतातेनतद्विषयस्यार्थस्यैक्यंप्रतीयतेद्वितिकैयटः।इयमेवानुगताकारप्रतीतिशब्देनोच्यते।एकाकारप्रतीतिशब्देनच।अतएवप्राणप्रदत्वंजातेरुक्तंप्रकाशेयावत्स्थितिसंबन्धित्वंचतत्त्वमितितद्व्याख्यातारः।यावत्स्थित्येकाकारप्र

CC-0. In Public Domain. Digitization by eGangotri

तीतिर्हिभ्राणः तस्माद्दत्वं हि जातेरेव न पाचकत्वादेरिति स्पष्टमेव। पाकक्रियाणामाश्रयभेदेन भेदात्स्वगतजात्यैव तासामेकाकारप्रतीतिजन
कत्वमित्यन्ये। अतएव कणादेनापि सामान्यविशेष इति बुद्ध्यपेक्षमित्युक्तम्। अनुवृत्तिबुद्धिजनकत्वं सामान्यलक्षणं व्यावृत्तिबुद्धिज
नकत्वं विशेषलक्षणमिति तद्व्याख्यातारः। तथा सदिति यतो द्रव्यगुणकर्मसु सा सत्तेत्युक्तम्। इतीत्यस्य व्यवहारप्रत्ययाविति शेषः।
अनेनेदमेव सर्वजातिषु मानमिति सूचितम्। तथाभावोऽनुवृत्तेरेव हेतुरिति सामान्यमेव भावः। सत्तानुवृत्तेरेव हेतुरिति सामान्यमेव द्रव्यत्वादि
तु अनुवृत्तेरितरव्यावृत्तिबुद्धेश्च हेतुरिति सामान्यं विशेषश्च यावत्स्थित्यैकाकारप्रतीतिरनुवृत्तिरिति तद्व्याख्यातारः। यावत्स्थितीत्यस्या
भावे पाचकत्वादेरपि जातित्वापत्तिः। कादाचित्कैकाकारप्रत्ययहेतुत्वाद्भाव्येभिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नमि त्यनेनोपलक्षितनित्यत्वे
नापीदं सूचितम्। गौतमोऽपि समानप्रसवात्मिका जातिरित्याह। यावत्स्थितिरेकाकारबुद्धिजननस्वभावेत्यर्थः। आकृतिर्जातिलिङ्गाख्येति
चाह। जातिलिङ्ग.मिति आख्या यस्या इत्यर्थः। रूपादिष्वपि रूपत्वादिजातिव्यञ्जकं यत्साऽऽकृतिरिति तदाशयः। व्यक्तिस्तु आकृतिविशे
षसमवायिकारणमेव मृत्कयाचिदाकृत्यायुक्तापिण्डो भवति स्वर्णकयाचिदाकृत्यायुक्तं पिण्डो भवतीति पस्पशायां पतञ्जल्युक्ते। तत्राकृ
तेरनित्यत्वाद्धि शिष्टेऽनित्यत्वं विशेष्यांशमादाय नित्यत्वमपि नमादाय गौतमीये व्यक्तिः पृथग्गृहीतेति। चरकेऽप्युक्तम्। सामान्यमेकत्वकरं
विशेषश्च पृथक्त्वकृदिति। एकत्वकरत्वमेकत्वबुद्धिकरत्वम्। यदनेकासु गवादिव्यक्तिषु अयं गौरयं गौरित्येवमाद्येकाकारबुद्धिरेकं सामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्यं विनानाभ्रान्ता भवति। एवं च तदेकत्वालम्बना सत्यपि व्यक्तिभेदे एकत्वबुद्धिर्यत्कैव तदेव गोत्वमश्वादिभ्यो व्यावृत्तिबुद्धिजनकतया विशेष इति तदर्थः। एतद्बीजमप्युक्तं तन्नैव तुल्यार्थता हि सामान्यं विशेषश्चाविपर्यय इति तुल्यार्थता तुल्यानामर्थानां भावः। अर्थेषु तुल्यत्वं चैकाकारप्रतीतिजनकधर्मवत्त्वम्। एवं च तेषां भावः सधर्मत्व। एवं चैकाकारप्रतीतिजनकं यतः सामान्यमतस्तदेकत्वकरं यथा सकलगवीनां गोत्वम्। विपर्ययः अतुल्यार्थता अनेकाकारप्रतीतिजनको धर्मः स यतो विशेषोऽतः पृथक्त्वकृन्मतः। यथा गवाश्वयोर्गोत्वाश्वत्वे इति तदर्थ इति तद्व्याख्यातारः। एवं च पाचकत्वमपि सामान्यं भवत्येव जातित्वं तु यथा न तथोक्तम्। अतिशायने इति सूत्रे भाष्येऽपि जनने याप्राप्यते सा जातिरित्युक्तम्। अनेनापि तस्या नित्यत्वं बोधितम्। एतच्च लक्षणमद्वैतिमते। ब्रह्मातिरिक्तस्य सर्वस्य तन्मते जन्यत्वात्। अविद्यादेरपि जन्यत्वमुक्तम्॰ जीवानामप्युपाधीनां जन्यत्वेन विशिष्टानां जन्यत्वमेव। ब्रह्मणस्तु निर्धर्मकत्वात्तत्र जात्यभाव एव। अन्यथा न्यायादिनये परमाण्वादीनामजन्यत्वेन परमाणुत्वादिजात्यव्यापकत्वमस्य लक्षणस्य स्यात्। सरूपसूत्रे भाष्ये तु भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं जातिरित्युक्तम्। तन्निष्कर्षस्तूक्तः। एतेन कारणतावच्छेदकत्वादिनैव जातिसिद्धिरित्यपास्तम्। सखण्डोपाधावपि तत्तद्रोगनाशत्वादौ तत्तच्चूर्णत्वादौ च तस्य सत्त्वेन कारणतावच्छेदकत्वादिना जातेरन्वयव्यतिरेकयोरुभयोरपि व्यभिचारेण कारणतावच्छेदकत्वादिना जातित्वसाधनासंभवात्। बाधकाभावे इत्यादिविशेषणदाने तु गौरवम्। किं च घटत्वशरावत्वाद्यनेकधर्मपुरस्कारेणानेककार्यकारणभावस्वीकारापेक्ष

CC-0. In Public Domain. Digitization by eGangotri

यासर्वानुगतंयत्किंचित्सखण्डधर्ममवच्छेदकीकृत्यैककार्यकारणभावेलाघवेनकार्यतावच्छेदकत्वादिनानजातिसिद्धिरित्यलम्।शानशोपिगो
रित्युक्तेशुक्लत्वादिविशेषानवगमपूर्वंसामान्यस्यशब्दतोऽवगतेः।साशब्दशक्याद्द्रव्यस्यैवशक्यत्वेतुतस्यगुणसमूहरूपत्वेनशुक्लत्वादिवि
शेषावगतिप्रसङ्गः।अतिरिक्तद्रव्यवादेपिद्रव्यस्यविशेषणालिङ्गितस्यबोधाभावेनसएवदोषः।उक्ताकृतेरपिशब्दवाच्यत्वाच्च।तत्रेरूप
क्रिया—दिसामान्यरूपेणैवभासते।यद्यपिप्राथमिकशक्तिग्रहोविशेषालिङ्गितव्यक्तिविशेषेएवतथाप्यावापोद्वापन्यायेनपुरुषान्तरान् गा
मानयेत्यत्रतत्श्रवणोत्तरमेवव्यक्त्यन्तराण्यानयतोदृष्ट्वाविशेषेगृहीतामपिशक्तिंतज्जात्याश्रयमात्रेव्यवस्थापयति।कारणत्वादिग्रहस्य।
लेप्येवमेवेतिनकश्चित्सामान्यलक्षणोपयोगः।यथागोसदृशोगवयइतिशक्तिग्रहेनव्यक्तिविशेषभानंतद्वत्।तदुक्तंसरूपसूत्रेभाष्येऽव्यप
वर्गगतेश्चमन्यामहे आकृतिरभिधीयतेनहिगौरित्युक्तेव्यपवर्गोगम्यतेशुक्लानीलेत्यादीतिव्यपवर्गोविशेषः।तस्यागतिरप्रतीतिरित्यर्थः।
ननुप्रख्याःविशेषाःव्यपवर्गगत्योःकोविशेषइतिचेन्न।अनभिधीयमानापिजातिःसन्निधिमात्रेणप्रख्यायाअविशेषेनिमित्तंभवतिप्रख्या
याअविशेषस्तदेवेदंज्ञानमितिप्रत्यभिज्ञाविषयत्वंतेनैकत्वेजातिपदार्थेचसिद्धेपिअभिधानासिद्धेः।तथावनमितिसर्वविशेषाभ्यन्तरीकृ
रणेनाव्यपवर्गगतावपिप्रख्यायाअविशेषोनास्तिभिन्नवृक्षालम्बनत्वाद्वनमितिप्रत्ययस्य यथाअवनंपलाशवनमित्यादिज्ञानेषुतदे
वेदंज्ञानमितिप्रत्यभिज्ञाभावादितिकैयटेनैवसमाधानात्।अतएवसामान्यशक्तात्पदाद्विशेषव्यक्तिबोधेलक्षणेतिवृद्धाः।साचशब्दत।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्मात्रस्यैवपरिणामविशेषआकाशवद्विभुः। साचजातिः सर्वत्रआकाशजातिसमवायादेरप्यौपाधिकानेकत्वात्। तदुक्तंहरिणा। संयोगिद्रव्यभेदेनदेशेचपरिकल्पिते· तेषुदेशेषुसामान्यमाकाशस्यापिविद्यतेइति। आकाशेत्वुपलक्षणम्। अर्थजात्यभिधानेपिसर्वेजात्यभिधायिनः। व्यापारलक्षणायस्मात्पदार्थाः समवस्थिताइतिच। जात्यभिधायिनः जातिविशिष्टवाचकाव्यापारलक्षणाः प्रयोजनज्ञाप्याः शब्दस्यान्वयिरूपमनवच्छेदकीकृत्याप्रत्यायकत्वात्। एवंचनिःसामान्यानि सामान्यानिइत्यनादेयं सामान्यानीत्यस्यशब्दस्याबोधकत्वात्। किंचब्रह्मणएवप्रमाणसिद्धतयासर्वेभावाब्रह्मणः शक्तिभूता नतुततोभिन्नास्तत्रयथाव्यवहारंशक्तिकल्पनेतिसर्वत्रजातिद्रव्यविभागः। आकाशत्वंघटत्वमित्यादिव्यवहारस्यतुल्यत्वात्। नत्तत्कर्णशष्कुल्यवच्छिन्ननभसएवनतच्छ्रोत्रत्वमितिमते श्रोत्रत्वजातिवत्। साचजातिरुत्पत्तेः प्राक्नाशेचसूक्ष्मरूपेणाश्रयेष्ववतिष्ठतेइति नित्यत्वंतस्याः· अनुगताकारज्ञानजनकंव्यक्तीनांयत्किंचिद्रूपंतत्सर्वंजातिः। एवंचजातिरूपाधिरिति पर्यायाविति हेलाराजः सर्वजातीनांव्यापकत्वेपिपदार्थानांविचित्रशक्तिकत्वात्कांचिदेवजातिंकेश्चित्पदार्थोभिव्यनक्तिनसर्वांसर्वः। साचकदाचित्स्त्रीत्वयुक्तेनपिण्डेनव्यज्यते कदाचित्तुंस्त्वयुक्तेन कदाचिदेकाधारस्थाकदाचिदनेकाधारस्थेतिबोध्यम्। तस्याः प्राधान्येपिस्वाश्रयसमवेतत्वेनसंख्यादेस्तत्रबोधात्। तत्रलिङ्गवचनोपपत्तिर्गुणवचनशब्दवदिति सरूपसूत्रेभाष्येस्पष्टंसाचनित्येत्युक्तम्। अतएवभाष्येसिद्धेशब्दार्थसंबन्धेइतिवार्तिकेसिद्धेशब्देर्थेचेतिविग्रहः कंप

दार्थमत्वेतिप्रश्ने आकृतिमित्याह। आकृतिर्हि नित्या द्रव्यमनित्यम्। अत्राकृतिपदेन जातिसंस्थाने च उभयमपि नित्यमनयोर्यथा नित्यत्वं
तथाग्रे वक्ष्यते। अथवा द्रव्य एव पदार्थ एष विग्रहो न्याय्यः सिद्धे शब्देऽर्थे संबन्धे चेति द्रव्यं हि नित्यमाकृतिरनित्या। एवं हि दृश्यते लोके
मृत्कयाचिदाकृत्या युक्ता पिण्डः पिण्डाकृतिमुपमृद्य घटिका इत्यादि। अत्र कैयटः तत्तदाकारं तद्ब्रह्मजातिरूपं वा सत्यमुपाधिमाश्रित्य त
दवच्छिन्नं ब्रह्मैव द्रव्यम्। एतेन मृदोऽप्यनित्यत्वाद् द्रव्यं नित्यमित्ययुक्तमित्यपास्तम्। मृदोऽप्याकारमात्रतया ब्रह्मण्येव पर्यवसानात्। वाचारम्भणं
विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतिवत्। आकृतिः संस्थानं तस्यानित्यत्वेन ब्रह्मजातिरप्यनित्येति एतत्तात्पर्यम्। आकृतावपि पदार्थे
एष विग्रहो न्याय्यः। ननु चोक्तमाकृतिरनित्येति नैतत्। नित्या आकृतिः कथं न क्वचिदुपरतेति कृत्वा सर्वत्रोपरता भवति द्रव्यान्तरस्था तूपल
भ्यत इति। अत्राकृतिशब्देन जातिः। उपरमोऽनभिव्यक्तिः। आविद्यकः पदार्थो जातिर्यावद्व्यवहारं ध्रुवत्वात् कूटस्थत्वादविचालितत्वादनपायो
पजनविकारित्वाद्वारं वारमुत्पत्त्याद्यभावेनानुत्पत्त्यवृद्ध्यव्यययोगित्वान्नित्येनेतञ्ज्ञावः। एतदेवाभिप्रेत्य भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नमि
ति जातिरूपसामान्यलक्षणमुक्तम्। अथावयवसंस्थानरूपाया आकृतेरुक्तहेत्वभावात्प्रकारान्तरेण नित्यत्वमाह। अथवा यस्मिंस्तत्त्वं न
विहन्यते तदपि नित्यं तस्य भावस्तत्त्वम्। आकृतावपि तत्त्वं न विहन्यत इति। अवयवसंस्थानरूपाया आकृतेः प्रवाहाविच्छेदात्तद्धर्मस्याऽवि
घातादिति आशयेनानेन प्रवाहनित्यतोक्ता। प्रवाहनित्यतां न्यायवार्त्तिककारोऽप्याह- नित्या वर्णा नित्या वेदा इति च संप्रदायाविच्छेदात्॥

नित्यापृथिवीनित्याः पर्वताइतिवत्। तान्येववेदवाक्यानिमन्वंतरचतुर्युगान्तरेष्वपिसंप्रदायाविच्छेदेनप्रवर्त्तन्ते। एतन्मन्वादिवाक्येष्वपि
तुल्यमिति। व्याससूत्रमपिसमाननामरूपत्वाच्चावृत्तावप्यविरोधइति। वेदस्यतदर्थानांचनामरूपप्रवाहानुच्छेदएवनित्यत्वमितित
दर्थः। उपाधिसन्निवेशादिशब्दैश्चोपाधीनामपितदात्मकत्वाद्ब्रह्मैववाच्यम्। यत्तुअविद्याशब्देनापिविच्छिन्नप्रकाशंब्रह्मैवविच्छेदोपि
नदूषणश्चेतिनाद्वैतहानिरिति, अत्रवदन्ति· विच्छेदस्यब्रह्मरूपत्वेतत्वज्ञाननिवर्त्यतानापत्तिरिति। वस्तुतस्तुविच्छेदोऽसत्यएवरज्जूर
गवत्सर्वोपिप्रपञ्चएवमेवतत्तद्भोगप्रापकप्राण्यदृष्टवासनासहकारेणब्रह्मणस्तथाविवर्त्तः। एवंचतन्नाश्यतोपपन्नेतीतिप्रपञ्चि
तंपूर्वत्रपरमार्थसारविवरणेचास्माभिः। यथास्वप्नेएकस्यैवान्तःकरणस्यविरुद्धानेकपदार्थरूपत्वंतथाजागरेमायासहकारेणब्रह्मण
स्तथात्वंयथाचजागरेऽप्रतीयमानत्वात्स्वाप्नस्यमिथ्यात्वंतथातुरीयदशायामननुवृत्तेरस्यप्रपञ्चस्यमिथ्यात्वंसंविदश्चसत्यत्वमु
पाधिवैशिष्ट्येनतदेवसर्वव्यवहारास्पदम्। निरुपाधिकंतुसर्वव्यवहाराविषयइतिहेलाराजः। आकृतिस्तुयत्रसंभवतितत्रैवगौतमी
येजात्याकृतिव्यक्तयःपदार्थइतिसूत्रेव्यक्तिपदेनचसंख्यादिविशिष्टाव्यक्तिः पिष्टकमय्योगावइत्यादावाकृतिरेव। वस्तुतस्तत्रापिजा
तिःप्राण्याश्रितत्वेनाभिव्यक्तातुपुण्यपापसाधनम्। तदुक्तंहरिणा। चित्रादिष्वप्यभिव्यक्तिर्जातीनांकैश्चिदिष्यते। प्राण्याश्रितास्तुताःप्रा
तौनिमित्तंपुण्यपापयोरिति। चित्रादिइत्यादिनाप्रतिमाःप्राण्याश्रिताइतिप्राणिपदंतुतदेवतावाहनप्रतिमोपलक्षणम्। विसर्जनेतुस

CC-0. In Public Domain. Digitization by eGangotri

तेनपुण्यपापसाधनम्।ब्राह्मणत्वादयोभावाःसर्वत्रैवचतेस्थिताः·अभिव्यक्ताःस्वकार्याणांसाधकाइतिचस्मृतिरितिचयत्रैवोपदेशादिनाभिव्यक्तास्तत्रैवस्वकार्यसाधकाःप्रतिनियतव्यञ्जकव्यङ्ग्यत्वादितिभावः।सरूपसूत्रेभाष्येध्वनितंसर्वमेतत्।स्वर्गापूर्वदेवताशब्दादौनाकृतिर्बोध्या।दर्शनाभ्याससहकारेणैवतद्बोधात्।नव्यनैयायिकग्रन्थेप्रकृतिप्रत्ययार्थविचारस्तुव्याकरणवासनावासितान्तःकरणतयातत्रैववास्तवत्वभ्रमेणेतिबोध्यम्।अनन्तावर्णाउत्पादविनाशशालिनस्तत्समूहश्चपदंबोधकमितिपक्षेतुपदानामानन्त्याच्छक्तिग्रहासंभवेनानुगताकारप्रतीत्यासिद्धायास्तत्तत्पदगतघटपटत्वादिजातेर्वाचकत्वम्·अर्थगतजातेःशक्यत्ववत्।यथाचभ्रमणत्वादिजातिश्चरमक्रियाप्रत्यक्षव्यङ्ग्या।एवमेषापिचरमवर्णप्रत्यक्षव्यङ्ग्या।क्रियासमुदायेबोद्धेभ्रमणत्ववदेषापितादृशेवर्णसमुदायेव्यासज्यवृत्तिः।तदुक्तमनेकव्यक्त्यभिव्यङ्ग्याजातिःस्फोटइतिस्मृतेति।यद्वाशक्यतावच्छेदकेशक्तेरिवशक्ततावच्छेदकेपितस्याःसत्त्वमितितस्याःस्फोटत्वव्यवहारः॥ ॥इतिजातिस्फोटनिष्कर्षः॥

॥परेतुयथाऽद्वैतिनामात्मभेदऔपाधिकोमायाकृतश्चेतनस्यैकत्वेप्यस्यैवातत्रानुगमार्थजातिकल्पनाचदृश्यतेतथैकस्यैवतत्तत्कालतत्तद्वर्णानुरागरूपोपाधिभेदेनानन्त्यात्तत्पक्षेपिअनुगतशक्तिग्रहायजातिरावश्यिकापरंतेषांतत्तदुपाध्यवच्छिन्नःस्फोटोव्यक्तिपदभाक् तत्तदुपाध्युपलक्षितश्चजातिपदभाक् पूर्वमतेतुजातिःपदार्थान्तरम्।यत्तुसर्वत्रव्यक्तिरनित्यातत्तद्व्यक्त्युपहितंब्रह्मैवजातिरितितन्न।आविद्यकानन्तव्यक्तिकल्पनापेक्षयाजात्यादेरेवतत्त्वकल्पनेलाघवात्।अतएवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्नेरग्नित्वमपागादित्यादिश्रुतौ धर्मस्यैवंनाशउक्तः। अतएवच सिद्धे शब्दार्थसंबन्धेनिवार्तिके आविद्यकः पदार्थोजातिर्यावद्व्यवहारनित्याप्र
वाहमित्याचेतिद्धे धैवाकृतेर्नित्यत्वमुक्तं तच्चोपपादितमित्याहुः॥ ॥इतिवाच्यवाचकशक्तीनांनिर्णयः॥ ॥वाक्यसमयग्राहिकाचाकाङ्क्षा
।सा चैकपदार्थज्ञाने तदर्थान्वययोग्यार्थस्य यज्ज्ञानं तद्विषयेच्छा।अस्यान्वय्यर्थः कइत्येवंरूपापुरुषनिष्ठैव तथापि तस्या आकाङ्क्षाविषयेर्थे
आरोपः। एतदेवाभिधानापर्यवसानमित्युच्यते।अयमर्थोर्थान्तरमाकाङ्क्षतइतिव्यवहारात्।पदेत्वनारोपःमानाभावात्। अर्थबोधोत्तरमेवजि
ज्ञासोदयाच्च। पदंसाकाङ्क्षमितितुसाकाङ्क्षार्थबोधकमित्यर्थकम्।तदुक्तं समर्थसूत्रेभाष्ये परस्परव्यपेक्षा सामर्थ्यमेके।का पुनः शब्द
योर्व्यपेक्षा न ब्रूमः शब्दयोरिति किं तर्हि अर्थयोः इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते ममाय मिति पुरुषो राजानमपेक्षते ऽहमस्येतीति।
ईदृशजिज्ञासोत्थापकं चैकपदार्थैः परपदार्थव्यतिरेकप्रयुक्तस्यान्वयबोधाजनकत्वस्य ज्ञानमिति तद्विषयेत्तादृशान्वयबोधाजनकत्वेप्या
काङ्क्षेतिव्यवहारः।एतज्ज्ञानस्य बोधहेतुत्वादेकवारमन्वयबोधेजाते तदजनकत्वज्ञानाभावान्नपुनरन्वयबोधः कार्यसहवर्तित्वेनैव
तस्यहेतुत्वान्नसर्वत्रबोधद्वयम्।अन्यथाप्रथमबोधहेतोस्तज्ज्ञानस्य द्वितीयबोधात्पूर्वमपिसत्त्वेन तद्दुर्वारंस्यात्।अन्वयबोधश्चत
दाकाङ्क्षितसकलक्रियाकारकादिविषयोविवक्षितः।एतेनतस्यहेतुत्वेखण्डवाक्यार्थबोधोत्तरंमहावाक्यार्थबोधोनस्यादित्यपास्तम्।
खण्डबोधस्यक्रियातद्विशेषणकारकतद्विशेषणेतदन्यतरमात्रविषयकत्वात्। अतएवसुरतक्रीडापिकीनांरवःकङ्कणक्वाणःप्रेम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोक्तुवोनक्यवोलास्यापवेणुस्वनइत्यादौसमाप्तपुनरात्तस्यदोषतोक्तालंकारिकैः।क्रियाकारकभावेनान्वयबोधकसकलपदोच्चयनन्तरं
तान्वयकयत्किंचिदन्वयिविशेषणोपादानंहिसमाप्तपुनरात्तम्।यद्यपिसतितात्पर्येआवृत्त्याबोधद्वयमिष्टमेवतथापिसैवात्रदूषकताबी
जम्।एवन्मूलिकैवसकृदुच्चरितःशब्दःसकृदर्थंगमयतीतिव्युत्पत्तिः।किंचउक्तस्यान्वयबोधाजनकत्वज्ञानस्यवक्ष्यमाणसमभि॰
व्याहारकारणताज्ञानमूलकत्वात्तथाप्याकाङ्क्षाअतस्तत्समभिव्याहारस्तादृशानादृशान्वयबोधजनकइतिज्ञानंकारणंतदज्ञानताय
बोधाच्च।अतएवयस्ययादृशसमभिव्याहारेयादृशान्वयबोधकत्वग्रहस्तस्यततस्तादृशान्वयबोधइत्यनुभवसिद्धंससमभिव्याहा
रस्तत्तदन्वयबोधजनकइत्यन्वयमेववाक्यविषयेऐश्वरःसमयःतत्परिपालिकाचमीमांसा ।अतएवघटःकर्मत्वमानयनंकृतिरित्यतो
विपरीतव्युत्पन्नस्यबोधःसद्व्युत्पन्नस्यचाबोधउपपद्यते।सद्व्युत्पन्नत्वंचव्याकरणशास्त्रोक्तप्रकृतिप्रत्ययविभागतत्तदर्थविभा
गतत्तदन्वयबोधविषयकज्ञानवत्त्वम्।अन्वयानुभवश्चस्वरूपसन्तत्तत्समभिव्याहारजन्यान्वयबोधान्तरेप्रतिबन्धकस्तन्मूलक
मन्वयबोधाजनकत्वज्ञानमपिवाहेतुरितितन्मूलिकैवसकृदुच्चरितइतिव्युत्पत्तिः।तादृशबोधेच्छयोच्चरितत्वरूपतात्पर्यज्ञानेसत्य
पितत्तत्समभिव्याहारेतत्तज्जनकत्वज्ञानाभावेबोधादर्शनान्नतात्पर्येणास्याअन्यथासिद्धिःसत्पदस्यतात्पर्येःबोधकमितिव्यव॰
हारश्च।तत्रायंव्युत्पन्नस्यक्रियाकारकादिपदघटितःसामान्यतएवेत्युक्तम्।व्युत्पन्नस्याश्रुतवाक्यादपिबोधदर्शनात्प्रतिवाक्यंतथाग्रह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यासंभवाच्च। पदभेदेनव्युत्पत्तिभेद इत्यस्य च नामपदद्वयनामाख्याताख्यातनिपातनिपातनामादिभेदेन तत्तत्पदसमुदायव्युत्पत्तिभेद इत्येवार्थः सचायेतत्रतत्रवक्ष्यते· उत्थापकताविषयतान्यतरसंबन्धेनोभयसंबन्धेनवा जिज्ञासाविशिष्टः साकाङ्क्ष इत्युच्यते। तत्रान्त्यपचतितण्डुलंदेवदत्तइतिक्रियाकारकयोर्द्वयोरपिपरस्परंतदुत्थापकत्वात्तद्विषयत्वाच्च। आद्यं पश्य मृगोधावतीति। अत्रपश्यार्थस्यकारकधावनाकाङ्क्षोत्थापकत्वंधावनंतुनतद्विषयएवईदृशस्थलेक्रियाकारकसंबन्धोवाक्यशक्यएव। अतएवविभाषासाकाङ्क्षइतिसूत्रभाष्येस्त्यस्मिन्नाकाङ्क्षेतिचसाकाङ्क्षमितिउक्तम्। अस्मिन्नितिविषयसप्तमीत्यलम्। यत्तुअर्थनिष्ठायोग्यतापिशाब्दबोधेकारणंसाचतात्पर्यविषयीभूतसंसर्गवृत्तिधर्मेसंसर्गतावच्छेदकाख्येसंबन्धिनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावः। तेनविशिष्टाभावादिक्रमादायनदोषः। तज्ज्ञानंकारणंसंसर्गज्ञानंतुतात्पर्यविषयतयाकाङ्क्षाज्ञानविषयतयावासुलभम्। यद्वाप्रतियोगितावच्छेदकत्वरूपायोग्यतानिश्चयोबोधप्रतिबन्धक इतितन्न। शाब्दप्रयोज्येबोधेबाधज्ञानस्याप्रतिबन्धकत्वात् तदभावज्ञानस्याकारणत्वाच्च। सत्यपिबाधनिश्चयेऽस्यश्रोणिपतेःपरार्धपरसालक्ष्मीकृताःसंख्ययाएषवन्ध्यासुतोयातीत्यादितोबोधदर्शनात्। किंचैवंवह्निनासिञ्चतीत्यतोबोधाभावेनहिवाक्यप्रयोक्तुरद्वेषेणवह्निनाकथंसेकंब्रवीषीत्युपहासःश्रोतृभिःक्रियमाणःसंगतःस्यात्। एतदर्थकद्रविडभाषाश्रवणोत्तरंपाश्चात्यस्येवमूकताऽस्यस्यात्। किंचैवंप्रतिवादेप्रतिवादिशब्दस्याबोधकत्वेतत् खण्डनकथोच्छेदः। नचैतादृशेषुनान्वयबोधः किंतुपदार्थ

CC-0. In Public Domain. Digitization by eGangotri

बोधमात्रमिति वाच्यम्। सर्वत्रैवमेवापत्तेः। न च प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वानुरोधेन शाब्दविशिष्टज्ञानसिद्धिरिति वाच्यम्। दुःखद्वेषेच्छासुखा
दावपि तुल्यरीत्या तद्धेतुत्वेन सत्यपि बाधनिश्चये मिथ्याभिशापगालिदानरूपकादिकाव्यजदुःखद्वेषेच्छासुखाद्यनुरोधेन तत्रापि तदावश्य
कत्वात्। अन्यथा व्युत्पन्नानां मुखत्वमाश्रयश्चन्द्रत्वमाश्रय इत्यतोपि मुखं चन्द्र इत्यादितद्वच्चमत्कारापत्तिः। विभक्त्यर्थस्यैवान्वयतया न द्वो
धो नेत्यस्यात्यन्तमसंगतत्वाच्च। दैववशसंपन्नात्कलहादिसदृशशब्दात्पुनर्दुःखं तादृशवक्तृतात्पर्याभावज्ञानात् नेदं रजतमिति भ्रमवत
स्ततो निवृत्तावाप्ते नेदं रजतमेवेति प्रयुक्ते बाधज्ञानकाल एव ततो बोधात्प्रवृत्तिदर्शनाच्च। एतेनासंसर्गाग्रहमात्रेण तत्सिद्धिरित्यपास्त
म्। किंचासंसर्गाग्रहो नामासंसर्गाभावग्रहाभावस्तथा सति बाधज्ञानाभावेन विशिष्टबुद्धेरापत्त्या एवं वक्तुमनौचित्यात्। किंच येन दोषेण वि
द्यमानस्यासंसर्गस्याग्रहस्तेनाविद्यमानसंसर्गग्रहस्यैव वक्तुं शक्यत्वात्। किंच विशिष्टज्ञानस्य कारणत्वे संभवति अभावरूपस्यासंसर्गा
ग्रहस्य तत्कारणत्वकल्पने गौरवम्। यत्तु काव्यादौ विभावादीनां सहृदयतासहकृतव्यञ्जनया संबन्धिविशेषीयत्वेनाप्रतीतौ प्रतीति
रूपासाधारण्येन प्रतीतिस्तत्र विशिष्टज्ञानस्यानुभवविरुद्धतया स्वीयत्वासंसर्गाग्रहमात्रेण स्वीयत्वसंसर्गग्रहप्रयोजनं स्वनिष्ठस्याप्यभि
व्यक्तिरित्यन्यत्। न चैवं वह्निना सिञ्चेदित्यादितः प्रवृत्तिरपि स्यात्। बाधज्ञानेन जायमानज्ञाने प्रामाण्यशङ्काया जननात् तच्छून्यज्ञा
नस्यैव प्रवृत्त्युपयोगित्वेनाक्षतेः। बोद्धस्यैव सर्वत्र बोधविषयत्वेन बाधस्यैवाभावाच्च। तदुक्तमत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·मं· नि।वस्तुतोबाधज्ञानंनक्वापिज्ञानेप्रतिबन्धकंतत्कालेपिहिसत्यांसामग्र्यांजायतएवज्ञानंतत्रस्वस्वसामग्रीवशाद्द्वयोरपिज्ञानयोर्जातयोर्यत्र
६४ ज्ञानेसदोषसामग्रीजन्यत्वग्रहस्तत्राप्रामाण्यग्रहइत्येवमर्यादाज्यायसीऽन्यथागेहेघटोस्तिगेहेघटोनास्तीतिपरस्परविरुद्धेद्वाभ्यांप्रयुक्ते।
किंचाशुसंचारादलातचक्रेप्रत्यक्षेणादृश्यतेअनेकदिक्कस्यरूपसहचारिणःस्पर्शस्ययुगपद्ग्रहणाद्धेतोरनुमानाद्गम्यतेनैतदस्तीति।अ
नन्यथासिद्धानुमानाच्चतदभावज्ञानेतेनपूर्वज्ञानस्यभ्रमत्वंकल्प्यतइतिलटःशत्रितिसूत्रेभाष्यकैयटयोरुक्तम्।एवंचबाधज्ञानका
लेप्यनुमितिःस्वीकृता।अत्रदृश्यतेगम्यतइतिवर्त्तमाननिर्देशाभ्यामुभयोरेककालिकतासूचिता।अनेकदिक्कस्पर्शस्ययुगपद्ग्रहण
रूपहेतोर्भ्रमइत्येवतस्मिन्संभवाच्चप्रत्यक्षस्यप्रबलत्वेत्वनुमितौभ्रमत्वकल्पनम्।एवंचबाधस्यहेत्वाभासत्वमप्युपपन्नमनुमितौ
तेनाप्रमाण्यग्रहस्यजननात्।वस्तुतःसाध्यबाधोनहेत्वाभासःसर्वसाधारणबाधबुद्धिप्रतिबन्धकतयैवनिर्वाहेणतस्यविशिष्यहेत्वा
भासेषुग्रहणानौचित्यात्।किंतुहेतुबाधज्ञानस्यैवतत्त्वमुचितम्।उक्तंचन्यायभाष्यवार्तिककाराभ्यांतथैव।किंचेदंरजतमितिभ्रमो
त्तरंजायमानस्यनेदंरजतमितिबाधज्ञानस्यरजतज्ञाननिष्ठाप्रामाण्यज्ञानंप्रतिकारणतावश्यंवाच्या।एवंस्फटिकेरक्तत्वाभावज्ञानस्य राम·
सोपाधिकतद्रक्तत्वज्ञानेतत्कारणतावश्यंवाच्या।एवंचसर्वत्रतथैवास्तुकिंद्वयकल्पनेन।यत्रतुलोकप्रसिद्धोऽर्थस्यबाधितत्वज्ञानंतत्र
तेनैवजायमानज्ञानेप्रामाण्यग्रहोयथावह्निनासिञ्चतीत्यादौ।नचगालिदानादिस्थलेपिबाधज्ञानेनतत्राप्रामाण्यग्रहेदुःखाद्यनुपपत्ति ६४

CC-0. In Public Domain. Digitization by eGangotri

रितिवाच्यम्। तन्नोदुःखाभावेऽपिव्यञ्जनयाजायमानेनतत्तद्दुष्टत्वादिज्ञानेनतदुपपत्तेः। व्यञ्जनाजन्यज्ञानेतुनबाधज्ञानेनाप्रामाण्यज्ञानमिति स्पष्टंकाव्यप्रकाशादौऽज्ञाततन्त्रतमउद्रेकेणप्राथमिकबोधेऽपिनाप्रामाण्यग्रहः। एवंचयोग्यताज्ञानंप्रवृत्त्याद्युपयोगियोग्यतासंदेहादिनाप्रसक्ताप्रामाण्यज्ञानाभावविशिष्टबोधजनकविशेषणीभूताभावप्रतिबन्धकतयेतिबोध्यम्। लक्षणामूलमपिशक्यार्थबोधेविषयबाधज्ञानजन्यमप्रामाण्यज्ञानमेवेत्यलम्। परेत्वन्वयप्रयोजकरूपंसमभिव्याहृतकार्यशक्तिमत्त्वंयोग्यता। साचशाब्दबोधेभासते। तएवघटेनजलमाहरेत्यादौसच्छिद्रेतरस्यैवजलाहरणशक्तिमत्त्वेनसच्छिद्रेतरत्वप्रकारकोबोधः। अतएवप्रतिनिधेःश्रौतत्वोपपत्तिः। यथाखादिरेबध्नातीत्यादावस्वातन्त्र्यफलकसंयोगविशेषरूपबन्धनसमर्थखादिरालाभेन्यःप्रतिनिधिरूपादीयते। तत्तत्रतादृशबन्धनसामर्थ्यवत्त्वेनखादिरबोधोऽवश्यमभ्युपेयः। एवंचखादिरबोधेऽपितत्सामर्थ्यत्यागेमानाभावात्तदुपपत्तिः। अन्यथाखादिरस्यासामर्थ्येबन्धनलोपएवस्यात्। सर्वत्रप्रवृत्तिनिमित्तंस्वाश्रयनिष्ठसमभिव्याहृतकार्यशक्तेरप्युपलक्षणमितितस्याअपिप्रवृत्तिनिमित्तसामानाधिकरण्येनबोधेभानम्। एवंचोपलक्षकजात्यवच्छिन्नस्याशक्ततयात्यागेऽप्युपलक्ष्यशक्तित्यागस्यानौचित्यादन्यगतासागृह्यतत्साहश्येननतापिनत्त्वबुद्धेः। किञ्चघटत्वेनसच्छिद्रेतरव्यक्तिविशेषस्यैवभानमित्यङ्गीकारेलक्षणापत्तिः। सामान्यरूपेणविशेषबोधेपिलक्षणेत्यर्थस्यत्वामस्त्विवचीत्युदाहरणेकाव्यप्रकाशकृतास्पष्टमुक्तत्वात्। तदुक्तंहरिणा· केषांचित्साहचर्येणजातिःशक्त्युपलक्षणम्। खादिरादिप्रशक्तेषुजातिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·मं· प्रतिनिधीयते। अस्वातन्त्र्यफलो बन्धः प्रमाणादौ चशिष्यते। अतो जात्यभिधानेपि शक्तिहीनं न गृह्यतेद्वृति केषांचिज्जातिशक्तिवादिनाम्· प्रमाणं
६५ हिंसा· शुद्धव्यक्तिशक्तिवादेपि वस्तुगत्या जातिशक्तिविशिष्टा केवलाव्यक्तिः शक्येति न दोष इति बोध्यमित्याहुः। आसत्तिरपि मन्दस्याविल
म्बेन शाब्दबोधे कारणम्। सा चान्वयप्रतियोगिपदार्थानां तद्बोधकपदानां चाव्यवधानेन प्राथमिकोपस्थितिरूपा। काव्ये न्यत्र च सर्वा॰
न्प्रति प्रायेण तादृशबुद्धेरेव वक्तुरुद्देश्यत्वात्। अनासन्नस्थले योजनावाक्यान्मन्दस्य बोधेपि विलम्बोस्त्येव। न चास्मात्पद्यादयमर्थो बुद्ध
इत्यनुभवो विरुध्येतेति वाच्यम्। योजनावाक्यसंपादनद्वारा तस्यापि बोधे उपयोगेनादोषात्। अमन्दस्य तु आसत्त्यभावेपि पदार्थोपस्थि
तौ आकाङ्क्षाज्ञानवतो बोधोऽविलम्बेनैव भवतीति न तद्बोधे तस्याः कारणत्वम्। ध्वनितं चेदं न पदान्तेति सूत्रभाष्ये। वस्तुतो योजनावा॰
क्यकल्पना व्यर्था तत्कल्पकाकाङ्क्षादिना अर्थयोजनाकल्पनस्यैवोचितत्वात्। परं तु मन्दस्य सा विलम्बेनामन्दस्य तु साक्षात्प्रमित्येवोचित
म्। यत्तु तत्र तत्र वाक्ये घटमानयेत्यादौ घटकर्मकानयनबोधेच्छयोच्चारितत्वाभावज्ञानेऽन्यबोधनेच्छयोच्चारितत्वज्ञाने वा तथा
बोधानुदयेन तयोः प्रतिबन्धकत्वकल्पने गौरवेण लाघवात्तथाबोधदं वाक्यमेतदर्थप्रतीतीच्छया वक्त्रोच्चरितमित्याकारस्ता नाप·
त्पर्यग्रहो हेतुर्नानार्थपदस्थले पदविषयोपि सन् तथा न ग्राहकं च प्रकरणादिकम्। अतएव प्रकरणादिज्ञानाभावे इदमेतदर्थकमेतदर्थकं
वेति संदिह्यते मौनिलिखितवाक्यस्थलेपि तस्य सूक्ष्ममुच्चारणमस्त्येवेति तन्न। शुकादिवाक्याद्देवताप्रसादेन पूर्वजन्मसंस्कारेण वा मू ६५

सर्वबाल्कुकल्पतोत्तमकाव्याद्युक्ततात्पर्यव्यतिरेकनिश्चयेपि बोधोदयेन तस्य बोधे हेतुत्वासंभवात् तद्व्यतिरेकनिश्चयश्च वक्तुस्ततस्तद्यो
बोधात्। नन्वैश्वरं तत्र तात्पर्यम्। अत एव वेदवाक्यतो बोध इति चेन्न। तस्य फलैकोन्नेयत्वेन प्राग्दुर्ज्ञेयत्वात्। लाघवादिन्यायगृही
ततत्तदर्थबोधकत्वज्ञानस्य वेदजन्यबोधे तद्गतप्रामाण्यनिश्चये वा हेतुत्वान्मीमांसोपयोगः। किंचास्माद्दर्थद्वयविषयको बोधो जाय
तेतात्पर्यं तुक्केति न जानीम इति सर्वजनानुभवविरोधान्न तस्य हेतुत्वम्। अत एव पय आनयेत्युक्तेः प्रकरणज्ञस्य दुग्धं जलं वाऽऽनेयमि
ति प्रश्नः संगच्छते· स्पष्टं चेदं सर्वसंख्यासंज्ञासूत्रे भाष्ये। तत्र पदार्थोपस्थितिरेवेत्याद्युक्तरीत्या खण्डनीयम् तात्पर्यनिर्णयोपयोग
स्तु तज्ज्ञाने प्रामाण्यनिश्चयद्वारा प्रवृत्तौ क्वचिदनेकपदार्थस्यान्वययोग्यत्वे कस्याध्याहार इत्यत्र चेति बोध्यम्। न चाश्वतात्पर्यक
त्वेन निर्णीताद्देहे सैन्धवमस्तीति वाक्याद्देहे लवणमस्ति न वेति संशयोच्छेदापत्तिरिति वाच्यम्। एकतरविषयकज्ञाने प्रामाण्यनिश्च
येतदितरविषयकज्ञानेऽप्रामाण्यबुद्ध्युदयेन तदनुच्छेदात्। तत्परभावज्ञानतदन्यपरत्वज्ञानयोरपि तद्बोधेऽप्रामाण्यग्रहजनकते
व॰ तथा तत्तद्वाक्यार्थप्रामाण्यग्रहे तत्तद्वाक्ये आप्तोक्तत्वज्ञानं हेतुः। आप्तत्वं च भ्रमप्रमादविप्रलिप्साशून्यत्वम्· तज्ज्ञानं चायं
प्रकृतविषये दृशाप्तत्ववान् आप्तत्वविरोधिधर्मानधिकरणत्वादित्यनुमानेन। तत्र भ्रमो वाक्यार्थभ्रमः। प्रमादोन्यार्थकशब्दभ्रमः।
विप्रलिप्सा प्रतारणाप्रतीतविपरीतप्रतिपिपादयिषा। वेदस्याकर्तृकत्वे तु अनाप्तोक्तत्वाभावज्ञानं हेतुः। तच्चाप्तोक्तत्वज्ञानात्। अ

ल॰म॰ नुक्तत्वनिर्णयाद्वित्यन्यत्। वस्तुतः सर्वः शब्दः प्रमाणमेव। अनाप्तोक्तत्वज्ञानं तु तज्जन्यज्ञानेऽप्रामाण्यग्राहकमित्यग्रे निरूपयिष्यामः।
६६ अत्र श्रौततावत्पदार्थज्ञानानामाकाङ्क्षादिज्ञानानां च न हेतुत्वेऽपि तेषां समूहालम्बनस्मरणात्तत्संस्काराद्वान्वयबोधः। अयमेव खले
कपोतन्यायेन बोधः। यदा तु क्रमेणैव बोद्धा बोधकसमवधानात्तत्तत्खण्डवाक्यार्थबोधोत्तरं पूर्वपूर्वस्मरणात्तत्संस्काराद्वा महावाक्यार्थबोध
स्तदा राजपुरप्रवेशन्यायेन बोध इत्यन्यत्र विस्तरः॥ ॥इत्याकाङ्क्षादिविचारः॥ ॥श्रीकृष्णाय तुभ्यं नमः॥ श्रीरस्तु ॥ ७ ॥ ॥

गग

CC-0. In Public Domain. Digitization by eGangotri

॥ अथधात्वर्थवादः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः॥ अथ सकलशब्दमूलभूतत्वाद्धात्वर्थो निरूप्यते॥ तत्र फलानुकूलो यत्नसहितो व्यापारो धात्वर्थ इति सिद्धान्तः॥ यत्तु फलं धात्वर्थो व्यापारः प्रत्ययार्थ इति तन्न॥ लः कर्मणि चेत्यादिसूत्रविरोधात्॥ नहि तेन व्यापारस्य प्रत्ययार्थता लभ्यते॥ किंच पचति पक्ष्यति पक्ववानित्यादौ फूत्कारादीनां प्रतीतये नानेकप्रत्ययानां शक्तिकल्पनापेक्षयैकस्य धातोरेव शक्तिकल्पनोचिता॥ किंच फूत्कारादेः प्रत्ययार्थत्वे गच्छतीत्यादावपि तत्प्रतीतिवारणाय तद्बोधे पचिसमभिव्याहारस्यापि कारणत्वकल्पने गौरवम्। किंच सकर्मकाकर्मकव्यवहारोच्छेदः॥ न च प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वं तत्समानाधिकरणफलवाचकत्वं चाकर्मकत्वं। जानातावपि व्यापारतावच्छेदकसमवायसंबन्धेन व्यापारानधिकरणवृत्तित्वरूपवैयधिकरण्यस्य विषयतया फले सत्त्वेन न क्षतिः॥ अन्यथा यत्किंचित्संबन्धेन सर्वेषामेव व्यापारसमानाधिकरणफलवाचित्वेन बहूपप्लवापत्तिः॥ प्रत्ययार्थव्यापाराश्रयत्वं च कर्तृत्वम्॥ घटं भावयतीत्यादौ णिजर्थव्यापारव्यधिकरणफलाश्रयत्वेन घटादेः कर्मत्वमिति वाच्यम्। अभिधानानभिधानव्यवस्थोच्छेदापत्तेः॥ न च व्यापारेण स्वाश्रयाक्षेपात्कर्तुरभिधानम्। कर्माख्याते प्रधानेन फलेन स्वाश्रयाक्षेपात् कर्मणोऽभिधानमिति वाच्यम्। जात्याक्षिप्तव्यक्तेरिवाश्रयस्य प्राधान्यापत्तौ क्रियाप्रधान [illegible] यास्कविरोधापत्तेः॥ किंच फलस्य धातुना तदाश्रयस्य चाक्षेपेणैव लाभसंभवेन लः कर्मणीत्यस्य वैयर्थ्यापत्तिः॥ कर् [illegible] वाचकत्वे गौरवाच्च॥ किंच भावविहितघञादीनां व्यापारावाचकत्वे ग्रामो गमनवानित्याद्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पत्तिः॥तद्वाचकत्वेतेनापिस्वाश्रयाक्षेपेकर्तुरभिधानापत्तिः॥किंचगुरुःशिष्याभ्यांपाचयतीत्यादौहेतुमतिचेतिसूत्रबलात्प्रयोजकव्यापारस्य
णिजर्थत्वेस्थितेप्रयोज्यव्यापारआख्यातार्थोवाच्यः॥एवंचसंख्यायाःस्ववाचकाख्यातार्थव्यापारान्वयित्वेनान्वयाच्छिष्याभ्यामितिद्विव
चनानापत्तिः॥पाचयतीत्येकवचनानापत्तिश्च॥गुरोरनभिधानेनतत्रप्रथमायाअनापत्तेश्चशिष्यशब्दात्तदापत्तेश्चेत्यन्यत्रविस्तरः॥यदपि
धातोःकेवलव्यापारएवशक्तिःफलतुकर्मप्रत्ययार्थइतितन्न॥ग्रामंगच्छतीत्यत्रविभागस्यत्यजतीत्यत्रसंयोगस्यबोधापत्तेः॥संयोगभाने
गम्यादिसमभिव्याहारस्यविभागभानेत्यजादिसमभिव्याहारादेःकारणत्वकल्पनेतुगौरवम्॥त्यागोगमनमित्यापत्तेश्च॥तत्रफलावच्छि
न्नव्यापारवाचित्वेसर्वत्रैवश्रैवोचितम्॥किंचगत्यर्थकर्मणिद्वितीयाचतुर्थ्यौत्यब्लोपेकर्मणिपञ्चम्याःक्तस्येन्विषयस्यकर्मणिसप्तम्यावि
धानेनानेकेषांसुपांतिङांचफलेशक्तिकल्पनापेक्षयाफलविशेषबोधेतत्तद्धातुसमभिव्याहारस्यकारणत्वकल्पनापेक्षयाचधातोरेवफले
पिशक्तिकल्पनोचिताकर्मकर्तृप्रयोगेफलस्यतद्वापिधातुवाच्यत्वावश्यकत्वाच्च॥त्यजतिगच्छत्योःपर्यायताभ्रमदशापन्नाभ्यामविलक्षण
बोधोत्पत्त्यातत्तत्समभिव्याहारस्यफलविशेषबोधनियामकत्वासंभवाच्च।कार्यतावच्छेदककोटौपुरुषविशेषीयत्वनिवेशेतुगौरवम्
।यत्त्वीदृशेस्थलेसामग्रीप्रतिबध्यप्रतिबन्धकभावेलाघवगौरवविचारकरणम्तत्तुतादृशसामग्रीप्रतिबन्धकताज्ञानस्यानुपयोगेनानु
मितिपरामर्शकार्यकारणभावादिलाघवगौरवविचारकरणवत्काकदन्तविचारकरणम्।किंचशाब्दानुमितिसामग्र्योर्ज्ञानघटितत्वेनयुग

CC-0. In Public Domain. Digitization by eGangotri

पज्ज्ञानानुत्पत्तेर्मनोलिङ्गतयाच तयोराञ्जस्येनानुभवसिद्धः समावेशएवदुर्घटइति बोध्यम्। किंच त्वया कर्मत्वं धात्वर्थान्वितप्रत्ययार्थफलवत्त्वं प्रत्ययार्थफलव्यधिकरणव्यापारवाचित्वं च सकर्मकत्वं वाच्यं तच्च भावयत्येधयत्यादिण्यन्तसकर्मकेषु तत्कर्मणि चाव्याप्तम्।। नत्र फलस्य धात्वर्थत्वेनान्यलभ्यतया प्रत्ययार्थत्वासंभवादित्यन्यत्र विस्तरः।। अत्र फलव्यापारयोः पृथक्शक्तिः।। एकपदोपस्थाप्ययोरपि परस्परमन्वयो व्युत्पत्तिवैचित्र्यात्।। परेषां कृतीष्टसाधनत्वयोरिव।। अन्यथा कर्मप्रत्ययसमभिव्याहारे व्यापारावच्छिन्नफलबोधेन तथा शक्तेरप्यावश्यकत्वेन गुरुशक्यतावच्छेदकशक्तिद्वयकल्पनापत्तिः।। तत्र फलव्यापारावन्तरङ्गत्वात्परस्परविशेषणतामनुभूयैवार्थान्तरान्वयिनौ।। अतएव गमनं न व्यापार इति न। फलांश उत्सर्गतो व्यापारविशेषणं जन्यजनकभावः संसर्गः।। क्वचित्तु विषयत्वं संसर्गः।। यथा आस्यादेस्तत्पूर्वकाध्यवसायादौ वृत्तौ।। पत्येशेत आस्त इत्यादौ पत्युद्देश्यकं शयनाद्यध्यवस्यतीत्यर्थः।। फलत्वं च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम्।। जन्यता चारोपिता नारोपिता चेत्यन्यत्। विभागजन्यसंयोगादिरूपे पतत्याद्यर्थे विभागसंयोगयोः फलत्ववारणायोभयम्। कर्मप्रत्ययसमभिव्याहारे तु फलस्य विशेष्यता। परे तु तयोः पृथक्शक्तौ फलव्यापारयोरुद्देश्यविधेयभावेनान्वयापत्तिः पृथगुपस्थितयोस्तथान्वयस्यौत्सर्गिकत्वात्। तथान्वये धातुजतत्तद्बोधस्य प्रतिबन्धकत्वकल्पने गौरवम्। तस्मात्फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिः कर्तृक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्थोर्थकतत्तत्प्रत्ययसमभिव्याहारस्य तत्तद्बोधे नियामकः। गौरवं च प्रामाणिकत्वान्न दोषावहम्। किंचैकपदे व्युत्पत्तिद्वयकल्पनेतिगौरवम्। तथा
हि। फलविशेषणकव्यापारबोधे कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणं व्यापारविशेषणकफलबोधे कर्मप्रत्ययसमभि
व्याहृतधातुजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयकल्पनं धातोरर्थद्वये शक्तिद्वयकल्पनं बोधजनकत्वस्य विषयासंबद्धेरुपप
त्त्यात्तत्तत्समभिव्याहारविशिष्टधातौ विशिष्टनिरूपितसंबन्धद्वयकल्पना चेत्यतिगौरवम्। अन्यथा पदशक्तेरुच्छेद एवमन्यत्रापि पृथक्शक्ति
कल्पना निरसनीयेत्याहुः। सर्वकारकाणां धात्वर्थेऽन्वयः। अयमेव च क्रिया। यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात्सा
क्रियेत्यभिधीयते। गुणभूतैरवयवैः समूहः क्रमजन्मनां बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यत इति। भूवादिसूत्रस्थभाष्यार्थप्रतिपाद
कहरिग्रन्थात्। क्रमजन्मनामेषां व्यापाराणां समूहं प्रति गुणभूतैस्तत्तद्रूपेण भासमानैरवयवैर्युक्तः संकलनात्मिकयैकत्वबुद्ध्या प्रकल्पिता
भेदरूपः समूहः क्रियेति व्यवह्रियत इति द्वितीयकारिकार्थः। अत्रावयवाश्रयं पौर्वापर्यं समुदायाश्रयमेकत्वम्। एतेन पूर्वापरीभूतक्षणसमू
हस्य युगपदसंनिधानादेका क्रियेति भाष्यासंगतमित्यपास्तम्। क्षणनश्वराणामवयवानां वस्तुभूतसमुदायाभावादुक्तोस्तुक्तम्। पचति पक्ष्य
तीत्यादावसिद्धमपाक्षीदित्यादौ सिद्धं वा साध्यत्वेन तत्प्रकारेणाभिधीयमानं क्रिया आश्रितेति योगप्रदर्शनं क्रियते ऽवयवानां क्रमेणोत्पत्त्या।
अत एवाश्रितक्रमरूपा क्रियेत्याद्यर्थः। एकैकावयवेऽपि समूहरूपारोपादधिश्रयणकालेऽपि पचतीति व्यवहारः। आरोपे च प्रतीतिरेव बलम्।

अध्यासगृहीतयैव क्रियया ख्यातस्य संबन्धग्रहो बोध्यः। न चैवं धात्वर्थस्य गौणत्वापत्तिः। तदतिरिक्तमुख्यार्थप्रसिद्ध्या तस्य गौणत्वाभावात्। थस्य हि मुख्योऽन्योर्थोस्ति तत्रैवेदृशस्य गौणत्वात्। यद्वा तादृशानेकव्यक्तिवृत्तिजातिरेव क्रिया। व्यक्तिद्वारकं च तस्याः साध्यत्वम्। स्फोटवदस्याः क्रमवद्भिरपि क्रियाक्षणैरभिव्यक्तिः फलस्यापि स्वजनकव्यापारगतपौर्वापर्यारोपेण तथैव भानम्। अत एव तन्मात्रवाचकस्य धातुत्वसिद्धिः। अत्र केचित् सिद्धत्वं क्रियाकाङ्क्षोत्थापकतावच्छेदकं यद्वैजात्यं तद्रूपम्। साध्यत्वं च पूर्वापरीभूतावयवत्वसमानाधिकरणं कारकान्वयादियोग्यतावच्छेदकं क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं च यद्वैजात्यं तद्रूपम्। हिरुगाद्यव्ययानां क्रियाप्रधानत्वव्यवहारस्तु क्रियामात्रविशेषणत्वात्। स्वरादीनां तु स्वः पतिरित्यादौ नामार्थेप्यन्वयः। अत एव न हिरुगाद्यर्थे कारकाणामन्वयः। तेषां क्रियान्तराकाङ्क्षासत्त्वात्। तत्र सिद्धत्वं पाक इत्यादौ घञादिबोध्यम्। साध्यत्वं तु सर्वत्रैव धातुप्रतिपाद्यम्। न च धातुतः क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकवैजात्ये नोपस्थितौ कृष्णं नमेच्चेत्सुखं यायादित्यादावाकाङ्क्षाभावेनान्वयो न स्यादिति वाच्यम्। चेच्छब्दसमभिव्याहारेणाकाङ्क्षोत्थानादित्याहुः। वस्तुतः साध्यत्वं निष्पाद्यत्वमेव तद्रूपेणैव च बोधः स्पष्टं चेदमुपपदमतिङ् सुट्कात्पूर्व इत्यादौ भाष्ये ध्वनित उपसर्गवादे निरूपयिष्यामः। यद्यपि घटं करोतीत्यादौ घटस्यापि साध्यमानत्वं प्रतीयते। तथापि पदान्तरसमभिव्याहारात्तथा। स्वतस्तु घटादिपदाद्द्रव्यं सिद्धत्वेनैव प्रतीयते। सिद्धत्वं च सूक्ष्मरूपेण बोध्यम्। यद्यपि क्रियापि तथा तथापि शब्दशक्तिस्वभावात्स्थूलरूपेण साध्यत्वेनैव तस्याः प्रतीतिः। द्रव्य

स्यात्सूक्ष्मरूपेण [illegible] पः।पचतिभवतिभुङ्क्तेत्यादौ भवतिभुङ्क्तेत्यादीनां क्रियाकाङ्क्षादर्शनेन तादृशवैजात्येनाभानात्कार
कान्वयानापत्तिर्धातुत्वानापत्तिश्च।एवंलक्षणो न मे चेदित्यादौ चेत्पदेनापि तथाकाङ्क्षायां तद्वैजात्येनाभानाद्दोषएव।हिरुगित्यादेश्च
नसाध्यत्वेनभानमितिनकारकान्वयइतिदिक्।तत्रफलानुकूलः फूत्कारादिर्व्यापारः समूहरूपकः फूत्कारत्वाधःसंतापनत्वादितत्तद्रूपे
णैववाच्यः प्रागुक्तहरिकारिकाभ्यांतत्तद्रूपेणैवबोधलाभात्।अतएवदेवदत्तःपचतीत्युक्ते सफूत्कारादिमान्नवेतिसंदेहोन।नानार्थ
त्वमिष्टमेव।तत्रयदायोवक्तुर्बुद्धिस्थस्तदासवाच्यः।अतएवकाष्ठानिपचन्तीतिसिद्धम्।तद्व्यापारस्यधात्वर्थत्वाविवक्षायांकाष्ठैःपच
तीति।शक्ततावच्छेदकंतुपचित्वादिकम्।धातुत्वंतुनअतिप्रसक्तत्वात्।धातुत्वाद्यजानतोपिबोधाच्च।एतेनधातुत्वेनधातुमात्रस्य
क्रियात्ववतिशक्तिस्तत्तद्रूपेणचतत्तद्रूपावच्छिन्नबोधकत्वमित्यपास्तम्।गौरवात्।तादृशशक्तिग्रहस्यादृष्टमात्रार्थत्वाच्च।फूत्कारेए
वगृहीतशक्तिकस्यव्यञ्जनेनवह्निप्रज्वालनदशायां पचतीतिनेष्टमेव।फूत्कारातिरिक्तेविक्लित्त्यनुकूलत्वाग्रहेतवापितन्नेष्टमेव।या
गद्गच्छामिज्ञानेवेतिवादिविप्रतिपत्तिरपिस्वीयस्वीयतादृशबोधानुसारादेवोपपन्ना।धातूनामनेकार्थत्वात्कदाचित्क्रियात्वेनबोधोपि
फूत्कारस्यातीतत्वमात्रेणापाक्षीदितितुनभूतत्वादेःसमुदायएवान्वयात्।अस्तिभवतिविद्यतीनामर्थःसत्ताऽनेककालस्थायिनीति
कालगतपौर्वापर्येणक्रमवतीतितस्याःक्रियात्वम्।तदुक्तंहरिणा।आत्मभूतःक्रमोप्यस्यायत्रेदंकालदर्शनम्।पौर्वापर्यादिरूपेणप्रवि

भक्तमिवस्थितमिति। अस्याः क्रियायाः। यत्र क्रियायां कालदर्शने कालगतपौर्वापर्यस्य तत्रारोप इति हेलाराजः। यद्वा सत्ताविषयव्यापारार्थक त्वेन क्रियावाचकत्वनिबन्धनधातुत्वसिद्धिः। सत्तायाः। षष्ठाद्भावविकारादनुस्यूतं यद्रूपं सदिति प्रत्ययवेद्यं तत् तद्विषयव्यापारश्चात्म मरणस्वरूपधारणपदाभ्यामुच्यते। आत्मस्वरूपे च सत्तैव। सा चात्र स्थूलस्वरूपात्मिका। म्रियतीत त्यागानुकूलव्यापारस्यैवात्र तद्रूप रीत्येन तद्धारणानुकूलव्यापारस्य प्रतीतेः। स्पष्टं चेदं भूवादिसूत्रे भाष्ये। तदुक्तं निरुक्ते। षड्भा — वविकारा भवन्तीति वार्ष्यायणिर्जायते अस्ति विपरिणमते वर्द्धते अपक्षीयते विनश्यतीति। जायत इति पूर्वस्यादिमाचष्टे नापरं भावमाचष्टे न प्रतिषेधति अस्तीत्युत्पन्नस्य सत्त्व स्यावधारणमिति। भावस्य निरुपपदभावशब्दवाच्यस्य जगत्कारणस्य सत्तारूपब्रह्मणो निष्क्रियस्यापि षडेते विकारा इव विका रामायासहकारेण क्रियारूपा विवर्ताः। अन्यत्र प्रधानादिषु प्रधानभाव इत्यादिरीत्या सोपपदभावशब्दप्रयोगः। दृश्यते च भारते याज्ञव ल्क्यं प्रति रविवाक्ये प्रयोगः। कृत्स्नं शतपथं चैव वत्स्त्वं प्रणेष्यसि वै द्विज। तस्यान्ते च पुनर्भावे बुद्धिस्तव भविष्यतीति। जायत इति च षड्भा वेषु पूर्वस्य जनेरादिमित्युपलक्षणमुपक्रमप्रभृत्यपवर्गपर्यन्तं जात इति व्यवहारं यावद्भावमाचष्टे तदापरं भावमस्त्याख्यमप्रसतो जन्माद्योगाद्द्रियमानमपि नाचष्टे शब्दशक्तिस्वभावात्। नापि प्रतिषेधति निरालम्बनं जायत इत्यनापत्तेः। अस्तीति चोत्पन्नस्य सत्त्व स्य सत्तावत्त्वात् [illegible] प्रातबन्धके [illegible] णो धारणमाचष्टे इति तद्भाष्यकृतः। भावनाफलयोरेकनिष्ठत्वाच्च गच्छतीत्यादाविव नस्पष्टं

प्रतीतिः। आसन्नवि[illegible]करोतीति प्रश्ने सतीत्युत्तराच्च तस्य व्यापारवाचकत्वम्। अन्धतमसस्थतया निश्चिते किं करोतीति प्रश्नः पाकादिगोचर एवेति निर्णयादस्तीति नोत्तरम्। किंच व्यत्यसुषते इत्यत्र कर्तरि कर्मव्यतिहारे इत्यात्मनेपददर्शनात्तस्य क्रियावाचकत्वम्। कर्मव्यतिहारश्चात्र क्रियाव्यतिहार इत्युपसर्गधातुभ्यामिति सूत्रे भाष्ये स्पष्टम्। घटो भवतीत्यादावुत्पत्त्यनुकूलव्यापारोऽर्थः। स व्यापारश्च साध्यत्वेनाभिधीयमानाश्रयतैव पावञ्ज्वलनये सर्वपदार्थानामवस्थाद्विरूपेण प्रतिक्षणपरिणामितयानत्तत्परिणामविशिष्टोत्पत्तिनिरूपितानामाश्रयतानामनेकतया पूर्वापरीभूतावयवकत्वात्सत्तेः। सत्तायामपि वा कालगतपौर्वापर्यारोपेण वा। यद्वा सत्कार्यवादे कारणात्मना सदेव यावत्स्थूलं रूपं न प्रतिपद्यते तावज्जायत इत्युच्यते। नत्वतिपत्तौ त्वस्तीति नत्वत्र तत्स्थापकव्यापाररूपारोपात्तस्याः क्रियात्वम्। अस्तीत्यस्य च सत्तां भावयतीत्यर्थ इति बोध्यम्। ज्ञानं ब्रह्मेत्यादौ जानातेर्भावे ल्युट्। न च तस्या खण्डत्वेन नित्यत्वेन च पूर्वापरीभूतावयवकत्वेनाभानात्कथं तत्कृते जानातेर्धातुत्वमिति वाच्यम्। वृत्त्यभिव्यक्तज्ञाने वृत्तिधर्मारोपेण तत्रतीत्यात्रापि तदारोपेण तत्त्वोपपत्तेः। ब्रह्मणो निर्विकारत्वनिर्धर्मकत्वादिश्रुतिभिश्च तस्यारोपितत्वमेवोचितम्। शुद्धचित्तस्य तु अन्यत्रेवात्रापि निषेधवाक्यसहकारेणाखण्डार्थबोधः। निषेधवाक्यैरेव वासः। एवमेव ब्रह्मेत्यादौ नपुंसकत्वाद्युपपत्तिरित्यन्यत्र विस्तरः। सकर्मकत्वं च व्यापारव्यधिकरणफलवाचकत्वम्। तत्समानाधिकरणफलवाचकत्वमकर्मकत्वम्। यद्वा व्यापारव्यधिकरणफलवाचकत्वाभावोऽकर्म

ता·मे· कत्वम्। सत्त्वक्रियासामानाधिकरण्यात्। यथोत्तिष्ठतीत्यादौ। अन्यथोर्ध्वदेशसंयोगस्य विद्यमानत्वे उत्थित इति प्रयोगानापत्तिः। मम तु त
५ त्समानाधिकरणस्य तदनुकूलव्यापारस्यातीतत्वात्तस्य विद्यमानत्वेपि तदुपपत्तिः। अत एव परिपन्थं च तिष्ठतीत्यादौ क्रियाविशेष
णत्वात्कर्मत्वेन द्वितीयान्तत्वमिति संगच्छते। क्वचित्फलांशाभावानत्वम्। एवं चास्त्यादौ केवलसत्ताद्येवार्थः। निरुक्ते उत्पन्नस्य सत्त्व
स्य द्रव्यस्य स्वरूपधारणरूपां सत्तामाचष्टे इत्यर्थः। तस्या अपि क्रियात्वमुपपादितमेव। यज्ञातूच्चारणे कर्माकाङ्क्षा नियता स सकर्मक इति
तु न युक्तम्। गच्छत्यादिषु तदाकाङ्क्षाभावात्। क्वेत्येव हि तत्राकाङ्क्षा। अकर्मकभिन्नत्वं सकर्मकत्वमित्यपि न। सकर्मकाणामप्य
र्थान्तरेऽकर्मकत्वेनासंभवापत्तेः। एतेन सकर्मकधात्वन्यतमत्वं सकर्मकत्वमित्यप्यपास्तम्। वस्तुतस्त्वेतच्छास्त्रीयकर्मसंज्ञका
र्थान्वय्यर्थकत्वं सकर्मकत्वम्। तदनन्वय्यर्थकत्वमकर्मकत्वम्। तेनाध्यासिता भूमय इत्यादिसिद्धिः। अत्राधिशीङ्स्थासामित्यनेना
धारस्य कर्मत्वम्। अन्वयश्च पृथग्बुद्धेन संसर्गरूपः। अन्वयपदस्य तत्रैव व्युत्पत्तेः। तेन जीवत्यादिषु न दोषः। तत्र प्राणादिरूपकर्मणो धा
त्वर्थात्पृथगबोधात्। स्पष्टं चेदं सुप आत्मन इत्यत्र भाष्ये। पूर्वसकर्मकलक्षणे त्वेतदर्थे फलाश्रयावाचकत्वे सतीति विशेषणदाने गौर राम·
वम्। अत्र सकर्मकलक्षण एव तात्पर्यमकर्मकलक्षणं त्वर्थलब्धम्। यत्तु पूर्वसकर्मकलक्षणे फलेः विवक्षाविरहविशिष्टेति विशेषणाद्वि
वक्षितकर्मसु नाति[illegible]र्मका भिन्ना एव धातव इति अविवक्षितकर्मसु फलवाचकत्वाभावादेव नातिव्याप्तिरिति वाच्यम्। ५

सकर्मकपदेधातूनामन्यपदार्थत्वेनक्वचिदपिकर्मसंबन्धदर्शनेनसारूप्यात्तएवैनेद्इतितत्त्वप्रत्ययविषयाणामेकत्वेनाविवक्षितकर्मणांधातूनामकर्मकव्यपदेशासंभवात्।स्पष्टंचेदंगतिबुद्धीतिसूत्रेकैयटेइति तन्न।मातुःस्मर्यतेइत्यत्राविवक्षितकर्मतयाभावेलइत्यधीगर्थेतिसूत्रस्यभाष्यविरोधापत्तेः।नत्रहिफलांशसत्त्वएवसंबन्धसामान्येनान्वयोनतुतदविवक्षायाम्।धातोरर्थान्तरेवृत्तेर्धात्वर्थेनोपसंग्रहात्।प्रसिद्धेरविवक्षातःकर्मणोऽकर्मिकाक्रियेतिअभियुक्तोक्तकर्मकसंग्रहकारिकायामविवक्षातइत्यस्यपृथगुपादानवैयर्थ्यापत्तेश्च।भेवद्रीत्याफलस्यधात्वर्थत्वाविवक्षायांधातोरर्थान्तरेवृत्तेरेवसंपत्तेः।किंचविशेषणदानेपिक्वचिदविवक्षाविरहविशिष्टफलवाचकत्वेनतत्त्वप्रत्ययभिन्नयातिव्याप्तिर्दुर्निवारैव।यदित्वर्थभेदाच्छब्दभेदइतिसधातुर्भिन्नएवेत्युच्यतेतदोक्तरीत्याविशेषणदानेव्यर्थमेव।किंचकर्मणासहेत्यर्थकसकर्मकपदस्यनेदंप्रवृत्तिनिमित्तम्।ततःशाब्दमर्यादयाऽलाभात्।लक्षणत्वेपितेनरूपेणलःकर्मणीत्यादौसकर्मकपदाद्बोधानापत्तिः।शक्त्यग्रहात्।नयाबोधानुभवेनतत्करणानुपयोगाच्च।तस्माच्छब्दमर्यादयालब्धंमदुक्तमेवोचितम्।कारिकायामविवक्षानामयेनरूपेणान्वयविवक्षयायस्यकर्मसंज्ञातेनरूपेणान्वयविवक्षाभावः।सचक्वचिद्विशेष्याभावकृतोयथानेहपच्यतेइत्यादौ।क्वचिद्विशेषणाभावकृतोयथामातुःस्मर्यतेइत्यादौ।कार्यप्रवृत्तिवेलायामविवक्षापश्चाद्विवक्षेत्यपिक्वचित्।यथाकृतपूर्वीकटमित्यादौकृतपूर्वीत्यादिवृत्तिविषयएवेदंनान्यत्र।धातोरर्थान्तरेवृत्त्यायथानदीस्यन्दतइत्यर्थकेनदीवह

CC-0. In Public Domain. Digitization by eGangotri

नीत्यादौ। प्रसिद्धेरित्यस्य प्रसिद्ध्याञ्झटित्यध्याहारेण तल्लाभात्तत्प्रयोगाभाव इत्यर्थः। ननु तत्राकर्मकत्वप्रयुक्तकार्यं भाष्येऽनुक्तत्वात्त शास्त्रेऽकर्मकपदस्थकर्मपदेन कालभावाध्वदेशभिन्नानामेव ग्रहणम्। गतिबुद्धीतिसूत्रे सजातीयापेक्षसकर्मकविषयनियमेन सिद्धेः कर्मकग्रहणसामर्थ्यादिति गतिबुद्धिकालाध्वनोरित्यत्र भाष्ये स्पष्टम्। तेन मासमास्यत इति भावे लादिसिद्धिः। पचेर्विक्लित्त्यनुकूलव्यापारोऽर्थः। स चानेकविध इत्युक्तम्। नश्यतेरदर्शनानुकूलव्यापारोऽर्थः। स च ध्वंससामग्रीरूपो व्यवधानाद्यनुकूलव्यापाररूपश्च उत्पतिते काके नष्टं तद्दृहं भवतीति निष्ठासंज्ञासूत्रे भाष्यप्रयोगात्। त्वत्तेन नष्टं चलम्यत इति स्मार्तप्रयोगाच्च। तत्र व्यापारे कालान्वयः। एतेन नाशस्य नित्यत्वात्सर्वदा नश्यतीत्यापत्तिरित्यपास्तम्। ध्वंसश्चातिरोभावावस्था। कारणे शक्तिरूपेणावस्थानं च प्रागभावः। ततः प्रच्युताभिव्यक्तिलक्षणम् धर्मप्राप्ताभिव्यक्तिर्जायत इत्युच्यते। तिरोभावावस्थैव लब्धक्रमा नश्यतीत्यनेनोच्यत इत्यन्ये। जानातेर्विषयतासाज्ञानं फलमात्ममनःसंयोगो व्यापारः। अत एव मनो जानातीत्युपपद्यते। आत्मान्तःकरणंप्रक्षेपितवृत्तिविशेषरूपम्। तत्रोभयोरपि सावयवत्वादवच्छेदकांशसंभवेन संयोग उपपद्यते। मनो निरवयवमात्मापि ज्ञानाश्रयो निरवयव इति नयेऽवच्छेदकांशासंभवेन संयोगानुपपत्तेः। तदभ्युपगमेऽपि उपयन्नपयन्धर्मो विकरोति हि धर्मिणमिति न्यायेन ज्ञानाश्रयत्वस्य संयोगस्य चात्मनाश एव पर्यवसानान्नित्यत्वमनुपपन्नम्। एवमाकाशस्यापि सावयवत्वम्। तदुक्तं खण्डनकृता। संयोगोऽव्याप्यवृत्तित्वादेकदेशेऽस्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संमतः। तदेकदेशदेशस्य भ्रमे संयोग एवकः। तस्मात्। अणौ निरंशे नितरां कल्पिते कल्पितं जगदिति। निरंशेप्यणौ संयोगकल्पना॰
यां सर्वथा जगतः कल्पितत्वमेवेति तद्भावः॥ कणादः पारिमाण्डल्यसंयोगाद् द्व्यणुकक्रमाज्जगदुत्प्रेक्षयन्मायावादसादरमान॰
सद्वृत्तिप्रघट्टकान्तरे तदुक्तेः। यत्त्वावरणभङ्गो विषयता वा फलं विषयतायां यथा फलत्वम् तथा कारकेनिरूपि व्याप्यो व्यापारस्तु ज्ञा
नमेवेति तन्न। कर्मस्थक्रियकत्वापत्तेः। न ह्यवस्थाचेत्थमुक्ता हरिणा। विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता। क्रियाव्यवस्था त्व
न्येषां शब्दैरेव प्रकल्पितेति। अस्यार्थः। यत्र कर्मणि कर्त्तरि वा क्रियाकृतो विशेषः कश्चिद् दृश्यते तत्र क्रिया व्यवस्थितेत्युच्यत इति शे
षः। नन्वेवं पच्यादिकर्त्तर्यपि श्रमादिरूपविशेषस्य दर्शनादिदमयुक्तम्। किंच चिन्तयति पश्यतीत्यादीनां कर्त्तृस्थभावकत्वानुपपत्तिः
। कर्त्तरि क्रियाकृतविशेषाभावादतोन्येषामिति। मत इति शेषः। यत्र कर्तृकर्मसाधारणधर्मरूपं फलं शब्देन प्रतिपाद्यते स कर्तृस्थ
भावकः। यथा पश्यति घटं ग्रामं गच्छति सहतीत्यादौ। तत्र विषयता समवायाभ्यां ज्ञानमुभयनिष्ठं संयोगश्चोभयनिष्ठः। एवं ह्रासो
पि। नच वि तावरणभङ्गावेवम्। यत्र तु कर्मवृत्तिधर्मरूपं फलं स कर्मस्थभावकः। यथा भिनत्तीत्यादौ। नहि द्विधाभवनादिकथमपि
कर्तृनिष्ठं प्रतिपन्तीति हेलाराजः। अतएव कर्मवदिति सूत्रे भाष्य उक्तं। नच कर्तृस्थभावकानां कर्मणि क्रियायाः प्रवृत्तिरस्तीति।
तेषां धातूनां वाच्यायाः फलरूपक्रियायाः कर्ममात्रे प्रवृत्तिर्नास्तीत्यर्थः। कारिका पूर्वश्लोक्तार्थपरत्वे जानात्यादिकर्तर्यपि क्रियाकृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषानुपलम्भेनचिन्तयतिगच्छतीत्याद्युपपन्नम्यकर्तृस्थभावकानामित्युक्त्यसंगतेः।एवमिच्छतेरिच्छानुकूलंज्ञानमर्थः।अतीतानागतयोरपि
बुद्ध्युपारोहात्फलशालित्वम्।आत्मानंजानातीत्यादावन्तःकरणावच्छिन्नःकर्ताशरीरावच्छिन्नःकर्मेतिकर्मवत्सूत्रेभाष्येस्पष्टम्।ब्रह्मजानाति
सविताप्रकाशतइत्यादौविषयोपहितज्ञानस्यतदुपहितप्रकाशस्यचजन्यत्वान्नकर्तृत्वंब्रह्मसवित्रोः।पतिर्गमिवत्सकर्मकेनरकंपतित
इत्यादिप्रयोगात्।विभागजन्यसंयोगमात्रपरत्वेऽकर्मकत्वंबोध्यम्।छन्नउत्पत्तिव्यधिकरणस्तदनुकूलव्यापारोऽर्थः।यत्नमात्रार्थकत्वेऽक
र्मकत्वापत्तिर्यतिवत्।किंचकर्मस्थभावकत्वाभावात्कर्मकर्तृरिकर्मवद्भावानापत्त्यायगाद्यनापत्तिः।कृतिरित्यादौधातूनामनेकार्थत्वाद्यत्न
मात्रेपिवृत्तिः।यद्वाकृतियत्नशब्दयोरपिव्यापारसामान्यवाचितैव।अतएवस्थालीस्थेयत्नेकथ्यमानेइतिकारकइतिसूत्रेभाष्येप्रयुक्तमित्यल
म्।अनुभूयतेसुखंसाक्षात्क्रियतेगुरुरित्यादौनिपातानांद्योतकत्वेनानुभवसाक्षात्काररूपफलयोर्धात्वर्थत्वेनसकर्मकत्वम्।एतेननिपातस्यै
वतदर्थकत्वमित्यपास्तम्।कर्मसंज्ञकार्थान्वय्यर्थकत्वंसकर्मकत्वमितिमतेपिफलाश्रयतयाकर्मसंज्ञकस्यधात्वर्थफलेएवान्वयौचित्येनद्योत
कत्वमेवावश्यकम्।द्योतकत्वंचसमभिव्याहृतगतवृत्त्युद्बोधकत्वंप्रायेण।क्वचित्तुक्रियाविशेषाक्षेपकत्वंतत्।यथाप्रादेशंविलिखतीत्यादौविर्विमा
नक्रियाक्षेपकः।प्रादेशंविमायलिखतीत्यर्थावगमात्।क्वचित्तुसंबन्धपरिच्छेदकत्वम्।यथाकर्मप्रवचनीयानाम्।अथशब्दानुशासनमित्यत्राथश
ब्दस्यप्रारम्भक्रियाक्षेपकत्वंकैयटादावुक्तम्।एवमन्यदप्यूह्यम्।विशिष्टस्यतुनधातुत्वम्।अपाठात्।अडाद्यव्यवस्थापत्तेश्च।एतेनोपसर्गाणांद्योतकत्वंनदि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तश्च निपातानां वाचकत्वम्। साक्षात्प्रत्यक्षतुल्ययोरिति कोशात्। नमःपदेन नमस्कारार्थत्वस्य लोकसिद्धत्वाच्च। सकर्मकत्वं च स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचित्वम्। कर्मत्वमप्येतादृशफलाश्रयत्वमेवेति न कर्मणि लकारानुपपत्तिरित्यपास्तम्· वैषम्ये बीजाभावात्। अनुभूयते इत्यस्य साक्षात्क्रियते इत्यनेन समत्वात्। कर्मसंज्ञाकार्थान्वय्यर्थकत्वं तत्त्वमिति निष्कृष्टमते उक्तरीत्या द्योतकतां विना गत्यभावाच्च। लः कर्मणी त्यादौ तेन रूपेण बोधस्य दुर्लभत्वाच्च। अन्यतरत्वस्यातिगुरुत्वाद् दुर्ज्ञेयत्वाच्च। यत्तु उपसर्गो द्योतकः। उपसर्गत्वादित्यनुमानेन परेणोपसर्गाणां तत्त्वसाधने शक्तिसंबन्धेन निपातपदवत्त्वरूपमखण्डं वा निपातत्वं पक्षतावच्छेदकीकृत्य निपातत्वेनैव हेतुना वाचकत्वाभावसाधनं युक्तम्। प्रमाणानां सामान्ये पक्षपातादिति तन्न। ततोपि सामान्यधर्मान्वयत्वावच्छेदेनैव तत्सिद्ध्यापत्तेः। निपातत्वं द्योतकताग्रहेवच्छेदकमिति तु न युक्तम्। तत्तदर्थनिरूपितद्योतकत्वस्य तत्तन्निपातवृत्तितया तद्वृत्त्यसाधारणधर्मस्यावच्छेदकत्वावश्यकतया सामान्यधर्मस्यावच्छेदकत्वे मानाभावात्। निपातत्वाद्यजानतोपि बोधाच्च। यदपि निपातानां वाचकत्वे शोभनः समुच्चय इतिवच्छोभनश्चेत्यस्यापत्तिः। घटस्य समुच्चय इत्यस्य स्थाने घटस्य चेत्यस्याप्यापत्तिरिति तन्न। शब्दशक्तिस्वाभाव्येन नित्यपरतन्त्रतया निपातैः स्वार्थस्य परविशेषणत्वेनैव बोधेन विशेषणान्वयाप्रसङ्गात्। षष्ठ्यप्राप्तेश्च। किंच घटं पटं चेत्यादौ घटमित्यस्य क्रियायामेवान्वयः। अत एव ततो द्वितीया। घटं समुच्चयवन्तं पटं पश्येति बोधः। तत्र समुच्चयस्य प्रतियोग्याकाङ्क्षायां सन्निहितत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इष्टस्यप्रतियोगित्वम्।पदेतुसमुच्चयस्यभेदेनान्वयोनतुपदस्यसमुच्चयेइतिक्कषष्ठ्यापादनम्।नामार्थयोरभेदान्वयव्युत्पत्तिस्तुनि
पातातिरिक्तविषया।वस्तुतोऽव्ययेषुनामत्वमेवनेत्यग्रेवक्ष्यामः।अतएवसमुच्चेयानन्तरंचादिप्रयोगइतिवृद्धाः।यद्वासमुच्चित
श्चार्थःस्वभावतश्चाद्युपस्थाप्यस्यासत्त्वभूतत्वम्।तदुक्तम्।समुच्चिताभिधानेचव्यतिरेकोनविद्यतेइति।धर्म्यंशेशक्तिकल्पनागो
रवंप्रामाणिकत्वान्नदोषाय।निपातानामर्थवत्त्वमपिद्योत्यार्थमादायैवशक्तिलक्षणाद्योतकतान्यतमसंबन्धेनबोधकत्वस्यैवार्थवत्त्वात्।
नञ्समासेउत्तरपदार्थप्राधान्यमपिद्योत्यार्थापेक्षयैव।प्रतिष्ठतइत्यत्रनिवृत्तिरेवधातूनामनेकार्थत्वाद्गतिवाची।प्रशब्दस्तुतदर्थकत्व
स्यतद्गत्यादित्वस्यचबोधकइतिभूवादिसूत्रेभाष्येस्पष्टम्।यद्यपिलोकेविशिष्टादेवविशिष्टबोधइतिविशिष्टएवक्रियावाचीतथाप्य
डादिव्यवस्थार्थंधातूपसर्गयोःपृथक्कल्पनम्।एवंचान्तरङ्गउपसर्गयोगः।अतएवोपास्यतेगुरुरितिकर्मणिलकारः।एतन्मूलकएवपू
र्वंधातुरुपसर्गेणयुज्यतइतिप्रवादः।बाह्यश्चसाधनयोगः।अतएवसंचस्कारेत्यादौपूर्वंसुट् ततःसाधनप्रयुक्तकार्यम्।अध्ययन
मित्यादौप्रत्ययइत्यादिनिर्देशेनक्वचित्प्रत्ययनिमित्तकार्यात्प्रागुपसर्गनिमित्तकार्यप्रवृत्तेर्ज्ञापनेनादोषः।एतन्मूलकमेवपठ्यते
पूर्वंधातुःसाधनेनयुज्यतेपश्चादुपसर्गेणेतीतिनव्याः।वस्तुतस्तुसुट्कात्पूर्वोगतिर्गतावित्यत्रभाष्येउक्तम्।धातूपसर्गयोःकार्यमन्त
रङ्गम्·कुतएतत्·पूर्वंहिधातुरुपसर्गेणयुज्यते·पश्चात्साधनेनेति।उपसर्गेणतत्संज्ञकेन।साधनेन·तत्प्रयुक्तकार्येणेतितदर्थः।इत

र आह नैतत्सारम्। पूर्वं हि धातुः साधनेन युज्यते पश्चादुपसर्गेण। साधनं हि क्रियां निर्वर्त्तयति तामुपसर्गो विशिनष्टि इति। साधनेन तत्सम्प्रयुक्तकार्येण
हि यतः साधनं क्रियां निर्वर्त्तयति साध्यत्ववैशिष्ट्येन बोधयति। अतः पूर्वं तत्सम्प्रयुक्तं कार्यमिति भावः। तदुक्तं भूवादिसूत्रे कैयटेन। साधनसंब
न्धेनावसीयमानसाध्यरूपेति। निश्चीयमानसाध्यत्वेत्यर्थः। जातेन रूपेणाबुद्धाम्। उपसर्गस्तत्संज्ञकः शब्दः। विशिनष्टि स्वद्योत्यविशे
षणवैशिष्ट्येन बोधयति साध्यत्वेन ज्ञानं विना क्रियायोगे विहितोपसर्गसंज्ञकशब्दैर्योगाज्ज्ञानादिति तदर्थः। क्रियायोगश्च क्रियाविशेष
णीभूतार्थद्योतकत्वमेव। इतरस्त्वाह। सत्यमेवमेतत्। यस्त्वसौ धातूपसर्गयोरभिसंबन्धस्तमभ्यन्तरं कृत्वा धातुस्साधनेन युज्यते।
अवश्यं चैतदेवं विज्ञेयं यो हि मन्यते पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति तस्यास्यते गुरुणेत्यकर्मकः उपास्यते गुरुरिति केन स
कर्मकः स्यादिति। सत्यमेवमेतत्। धातुः पूर्वं साधनेन युज्यते इति यदुक्तं तत्सत्यमेव। तत्संबन्धं विना साध्यत्वेनाप्रतीतेरपर्यवसानात्
कथं तर्ह्युपसर्गकार्यस्यान्तरङ्गत्वम्। तत्राह। यस्त्वसाविति यस्त्व धातूपसर्गसंबन्धकृतत्वेनाभिमतोऽर्थस्तमुपसर्गसंज्ञक
संबन्धमन्तरेणापि धातुरभ्यन्तरं कृत्वार्थत्वेनाङ्गीकृत्य साधनेन युज्यत इत्यर्थः। अयं भावः। वक्ता धातोरेव विशिष्टमर्थं बुद्धौ कृत्वा
साधनसंबन्धकार्यप्रत्यययोगेन तत्र साध्यत्वावगतौ श्रोतृबोधाय क्रियायोगनिमित्तोपसर्गसंज्ञकशब्दयोगं करोति। अन्यथा केवल
धातुनः सर्वत्राप्रतीयमानतया श्रोतुस्तत्तद्बोधो न स्यादिति। तदुक्तं भूवादय इति सूत्रे कैयटेनानेकार्थत्वाद्धातूनां विशिष्टोऽर्थो धातो

रिवोपसर्गस्तुबोद्धारंप्रतितदर्थद्योतकइति।एवंचपूर्वमुपसर्गेणयोगोनामतदर्थसंबन्धः।ततउपसर्गशब्दयोगात् पूर्वंसाधनकार्ययो
गस्ततउपसर्गशब्दयोगइतिपरिभाषाद्वयार्थः।तदुक्तंहरिणा।धातोःसाधनयोगस्यभाविनःप्रक्रमाद्यथा।धातुत्वंकर्मभावश्चतथा
न्यदपिदृश्यताम्।बुद्धिस्थादभिसंबन्धात्तथाधातूपसर्गयोः।अभ्यन्तरीकृतोभेदःपदकालेप्रकाशतेइति।अस्यार्थः।यथाभाविसा
धनसंबन्धाश्रयणेनक्रियावाचित्वमाश्रित्यधातुसंज्ञोच्यते।यथाच।भावीषिकर्मत्वमाश्रित्योपक्रमएवेषिकर्मत्वमुक्तम्।तथा
भाव्युपसर्गसंबन्धादुपक्रमएवविशिष्टक्रियावचनत्वं दृश्यतांधातूपसर्गयोःसंबन्धंबुद्धिविषयीकृत्योपसर्गार्थकृतोविशेषो
धातुनैवाभ्यन्तरीकृतःपदप्रयोगकालेउपसर्गसंबन्धेसतिप्रकाशतेश्रोतृणामितिशेषः।तथा।प्रयोगार्हेषुसिद्धः सन्भेत्तव्योर्थो
विशेषणैः।प्राक्तुसाधनसंबन्धात्क्रियानैवोपजायतइतिच।प्रयोगार्हत्वंचप्रत्ययोत्पत्त्यनन्तरंतेषुशब्देषुसिद्धःसन्नेवविशेष
णैर्भेत्तव्योविशेष्यः।श्रोतृबोधार्थमितिशेषः।यद्यप्यडादीनांव्यवस्थार्थंपृथक्त्वेनप्रकल्पनंधातूसर्गयोःशास्त्रेधातुरेवतुनादृ
शइतितादृशएवविशिष्टएवतुधातुःक्रियावाचीत्यर्थः।क्रियाविशेषाःसंघातैःप्रक्रम्यन्तेतथाविधाः।कार्याणामन्तरङ्गत्वमेवं
धातूपसर्गयोः॥साधनैर्यातिसंबन्धंतथाभूतैवसाक्रियेतिचेत्यप्युक्तंहरिणा।तथापिभाष्यसंमतत्वादाद्यमेवयुक्तम्।धातूप
सर्गकार्यस्यान्तरङ्गत्वंतुपूर्वोपस्थितान्तर्भूतार्थकनिमित्तकत्वात्।बाह्यसाधनकार्यप्रत्ययनिमित्तंतुद्धित्वादिबहिरङ्गमितिभा

वः।इदमेवाभिप्रेत्यसंप्रसारणाच्चेतिसूत्रेभाष्येउक्तम्।अद्यआऊढाअद्योढेत्यत्रधातूपसर्गकार्यत्वेनान्तरङ्गत्वाद्गुणेद्यशब्देनपररूपंकथंतत्कार्यमन्तरङ्गम्।पूर्वमुपसर्गस्यहिधातुनायोगोभवतिधातोस्तदर्थान्तर्भावेणबोधजनकत्वस्यतत्संबन्धंविनाअभावात्।अद्यशब्देनतुनाङोयोगः।धात्वर्थक्रियापेक्षत्वादाधारस्य।किमर्थंतर्ह्यद्यशब्दःप्रयुज्यते।आङस्त्वविशिष्टस्यापिअधातुत्वेनानन्वयात्।अद्यशब्दस्यापिसमुदायेनयोगोभवति।आङोद्योतकत्वेनविशिष्टस्यधात्वर्थत्वादितितेनैतद्बोधयति पूर्वंधातोः साधनकार्ययोगः।ततउपसर्गसंज्ञकशब्दसंबन्धः।ततोभिन्नपदवाच्यकारकसंबन्धइति।एवंचसाध्यत्वंनिष्पाद्यत्वरूपमेवभासतइतिभाष्यसंमतम्।किंचोपसर्गाणांद्योतकत्वमेवभाष्यसंमतम्।अतएवोपपदमतिङितिसूत्रेधातूपसर्गयोःसमासमाशङ्क्यपूर्वंधातुःसाधनेननयुज्यतेइतिपूर्वंतिङ्विशिष्टेनैवसामर्थ्यंस्यात् नत्वातिङितिनिषेधान्नतिङन्तेनैकार्थीभावइतिसमाहितम्।पूर्वंधातोरुपसर्गसंबन्धेउपसर्गस्यवाचकत्वेचतत्रसमासोवारयितुमशक्यएव।नचलकारमात्रोत्पत्त्यापिसाधनसंबन्धोजातएवेतितदासमासोदुर्वारः।नचतस्यकाल्पनिकमर्थवत्त्वम्।विभक्तीनामपितादृशार्थकत्वस्यार्थवत्सूत्रेभूवादिसूत्रेचभाष्यकैयटयोःस्पष्टत्वादितिवाच्यम्।साधनस्यसंख्यावैशिष्ट्यनियमेनसंपूर्णतदाकाङ्क्षानिवर्तकतिङामुत्पत्त्यैवतदाकाङ्क्षानिवृत्तेः।तिङ्पदेनतिङ्भाविनोपिग्रहणाच्च।नचैवमपिपरमगार्ग्यस्यापत्यमित्यर्थेपरमगार्ग्यायणइत्यादौपरमसंसृष्टस्यापि

गार्ग्यस्य केवलस्याप्यपत्येनैकार्थीभावाद्गार्ग्यशब्दादेव फक्। अतएव पकाराकारस्य न वृद्धिरिति येन विधिस्तदन्तस्येति सूत्रे भाष्ये स्पष्टम्। तद्रीत्यात्रापि समासो दुर्वारः। तिङर्थराहित्येनापि सामर्थ्यस्य सुवचत्वादिति वाच्यम्। वक्ष्यमाणरीत्या तिङां कर्त्रादिद्योतकत्वेन विशिष्टस्य धात्वर्थत्वात्तस्य वक्तुमशक्यत्वात्। तत्राप्युपसर्गार्थोन्तरङ्गः। नहि शिष्टस्य साधनाकाङ्क्षत्वात्। द्योत्योपि कर्त्रादिर्बहिरङ्गः। अपि पठितवतीत्यादौ समानकर्तृकादित्युक्तेः सनर्थसाधनेनैव प्रकृतेरपि तदाकाङ्क्षाशान्तेः। सनैकार्थीभावात्तद्विशेषणत्वाच्च प्रकृत्यर्थस्य तदुत्तरं प्रादियोग इति न समासः। इतोप्युपसर्गाणां वाचकत्वं निरस्तम्। विशिष्टाया एव क्रियाया इषिकर्मत्वस्य प्रतिपाद्यतया सापेक्षत्वेनासामर्थ्यात्सनुत्पत्त्यनापत्तेः। नेर्विंशइत्यादेर्नेः परत्वयोग्याद्विशेरित्यर्थः। संपृचेत्यादेरपि संपूर्वत्वयोग्यात्पृचेरित्यादिक्रमेणार्थः। गोसंदाय इत्यादावपि संद्योत्यार्थविशिष्टाद्दातोः कर्मणि उपपदे बुद्धिस्थेपि ततः समायोगे गतिसमासे उपपदसमासो बोध्यः। यद्यप्युपसर्गे क्रम्यस वाचको विशेषाणां संभवाद्द्योतकोपि चेत्युक्तं हरिणा। यथा प्रतिष्ठत इत्यत्र गतिनिवृत्तिवाचको धातुरुपसर्गो गतिवाचक इति पुञ्जराजमते। तथापि तिष्ठतेर्धातुत्वेन यज्यादिवदनेकार्थत्वाद्धातोरेव गतिरर्थः। प्रशब्दस्तु द्योतक एवोपसर्गत्वात्। प्रपचतीत्यादिस्थ प्रशब्दवदित्यर्थिकया स्थादिभिः केवलैर्यच्च गमनादिर्न गम्यते। तत्रानुमानाद्धि विधात्तद्धर्मा प्रादेरुच्यत इति कारिकया क्वचित्संभाविनो भेदाः केवलैरनिदर्शिता। उप

सर्गेणसंबन्धेव्यज्यन्तेप्रपरादिनेत्यनयाच। द्योतकत्वमेवोपसर्गाणांसिद्धान्तितम्। नन्वर्थद्योतकत्वधर्मोक्वचित्। पचत्यादौ यत्रतुभावेप्रत्ययस्तत्राप्यन्तरङ्गत्वादिनापदोपात्तकर्त्रादिनासाधनांशेनिराकाङ्क्षत्वेउपसर्गयोगइति तत्रापिनसमासः। अनएवणेरध्ययनइत्यादिसंगच्छते। अध्यागच्छतिपर्यागच्छतीत्यादावागच्छतीत्यस्मादेवगमनस्यावगत्यालौकिकेशब्दव्यवहारेलाघवानादरात्स्पष्टार्थमेवाधिपर्योःप्रयोगइतिसंभूयार्थबोधकत्वात्समुदायएवविशिष्टार्थबोधकइतिउपसर्गस्यानर्थकत्वमर्थान्तराबोधकत्वादितिबोध्यम्। क्वचित्तुक्रियागतविशेषबोधकातिरिक्तनिपातानांवाचकत्वमपि। अतएवनेत्यतोभावबोधःकस्येतिजिज्ञासाचदृश्यतेअभावशब्दइव। किंचपर्वतादाइत्यादौपर्वतादर्वागित्याद्यर्थप्रतीतेस्तत्रवाचकत्वमेवेतिनिरुक्तेस्पष्टम्। द्योत्यत्वेहिपञ्चमीनस्यात् तस्यविशेषणताचस्यात्। अतएवस्त्रियामितिसूत्रेस्त्रीत्वस्यप्राधान्येवचनानुपपत्तिमाशङ्क्यद्योतकतापक्षेणसमाहितम्। अतएवचहेतुमतिचेतिसूत्रेभाष्येद्योतकतापक्षेहेतुमतीत्यस्यप्रकृत्यर्थविशेषणत्वमुक्तम्। स्त्रियामितिसूत्रेचस्त्रियाःप्रकृतिविशेषणत्वादित्यनेनस्त्रीशब्दार्थस्यप्रकृत्यर्थविशेषणत्वादित्यर्थकेनद्योतकतापक्षउक्तः। नदुक्तंहरिणा। निपाताद्योतकाःकेचित्पृथगर्थाभिधायिनः। आगमाइवकेपिस्युःसंभूयार्थस्यवाचकाइति। केचिदित्युभयान्वयिकेचित्पृथगर्थाभिधायिनोवाचकाः केचिदनर्थकाएवेत्याहागमाइवेतीतितदर्थः। प्रातिशाख्येपि। नामाख्यातसुपसर्गोनि

प्रकृतश्चत्वार्याहुः पदजातानि शब्दाः। तन्नाम येनाभिदधाति सत्त्वं तदाख्यातं येन भावं स धातुः। उपसर्गा विंशतिरर्थवाचकाः सहेतराभ्यां वृत्ते निपाताः क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्। सत्त्वाभिधायकं नाम निपातः पादपूरणा इति। स धातुरित्यत्र तृतीयार्थे प्रथमा इतराभ्यां नामाख्याताभ्यां सहाऽर्थवाचका इत्यस्य मध्यमणिन्यायेन संबन्धः इतरे। नामाख्यातोपसर्गेभ्योऽन्ये निपातास्तथा ज्ञेयाः। उपसर्गो विशेषकृदित्यनेन तेषां द्योतकत्वं दर्शयति। पादपूरणाः पादपूरणा अपीत्यर्थ इति तज्ज्ञाः। यथा लूजातीयड्केनोत्पन्नस्वार्थिकाः। ननु नेमकृतेः प्रकारवद्वृत्तित्वद्योतकाः प्रत्ययं विनापि योऽहरिः सहरिः सिंहो माणवक इत्यादौ प्रकृतिमात्रात्तदर्थबोधात्। अतएवैषां नित्यत्वं नोक्तमाकरे। एतेन तत्र द्योत्यार्थस्य विशेष्यतास्त्वेवेति द्योत्यत्वे विशेषणतापत्तिरित्ययुक्तमित्यपास्तम्। जात्यन्ताच्छ बन्धुनीति च्छस्तु आश्रयरूपबन्धुवाचक एव प्राग्दिश इत्यारभ्य स्वार्थिकत्वं तु प्रायेणेति बोध्यम्। एवं देवतान्तात्तादर्थ्ये यदित्यादेरपि न तत्र कृतवचनेन मयडित्यत्राकरे स्पष्टमिदम्। शरीरस्थैरिवोदीच्यानुद्धरिष्यन्नूरसानिवेत्यादौ तु द्योतकता। अन्यथोक्तसदृशस्य करणत्वेऽप्युक्तस्याकरणत्वादुक्तपदोत्तरतृतीयानैरर्थक्यमसाधुत्वं च स्यात्। इवशब्दात्तृतीयाभावेन सदृशस्य करणत्वालाभश्च स्यात्। इवशब्दोत्तरं सर्वविभक्तिलुक् सत्त्वेऽपि न ताः स्वार्थिकाः। भाष्यकृतोऽपि पस्पशायामधिपरी अनर्थकावित्यत्र नञ्सूत्रेऽव्ययं विभक्तीति सूत्रे च द्योतकत्वं वाचकत्वं चेत्येव स्वरसः। अत एव निर्मक्षिकमित्यादौ पूर्वपदार्थप्राधान्यं भाष्योक्तं संगच्छते। अत एव च संकटमुद्भूतमित्यादावुत्तमादेरुक्तसंगतरूप

क्रियाविशिष्टसाधनवाचकनोक्ताभाष्ये। ननु शूरैरुस्रैरिवेत्यादौ द्योतकत्वेपि उस्रसदृशैः शूरैरित्यर्थ उस्रपदोत्तरं तृतीयानुपपत्तिस्तदवस्थोस्राणां करणत्वाभावात्। उपमानोपमेययोः समानविभक्तिकत्वमिति वचनाभावात्। यद्यपि उस्रसदृशरूपोउस्रपदार्थस्य करणरूपशूरैरभेदान्वयात्सा सुलभा तथापि सदृशस्योक्तरीत्याविशेष्यत्वानापत्तिरितिचेद्दिशापत्तेः। तथाहि इवादीनां स्वसमभिव्याहृते उपमानताद्योतकत्वमुपमानत्वेन प्रतीतेस्तादृशधर्मवदुपमेयप्रतीतिं विनानुपपत्त्योभयत्रापि साधारणधर्मसंबन्धबोधे तात्पर्यग्राहकत्वम्। उपमानत्वं च साधारणधर्मवत्त्वेनेषदितरपरिच्छेदकत्वम्। तद्धर्मवत्तया परिच्छेद्यत्वं चोपमेयत्वम्। इदमुपमानानीति सूत्रे भाष्ये स्पष्टमित्यन्यत्र निरूपितम्। उभयत्रापि साधारणधर्मान्वय इति लिङ्गभेदाद्युपमादूषणनिरूपणावसरे दशमशेषे काव्यप्रकाशादौ स्फुटम्। एवं च चन्द्र इव मुखमाल्हादकमित्यादावाल्हादकोपमानभूतचन्द्राभिन्नमाल्हादकं मुखमित्यादिरीत्या बोधः। एवं चोपमानस्योपमेयेन समानविभक्तित्वेनाभेदान्वयात् साधारणधर्मसंबन्धस्य विशेषणतया क्वचित्। यथोदाहृते। क्वचिद्विशेष्यतया यथा चन्द्र इव मुखमाल्हादयतीत्यादौ। अत्र त्वुपमानचन्द्रकर्तृकाल्हादाभिन्नो मुखकर्तृकआल्हाद इति बोधः। येत्वत्र चन्द्रसादृश्यप्रयोजको मुखकर्तृकआल्हाद इति बोधं वदन्ति तेषां तयोः समानविभक्तिकत्वं दुर्लभम्। वचनं तु तादृशं न व्याकरणे उपलभ्यते। तत्र यद्यपि चन्द्रमुखयोस्तत्त्वेन भेदस्तथापि विशेषणतया प्रतीतसाधारणधर्मनिमित्ताभेदोपचारे

भेदः। अत एव भेदाभेदप्रधानोपमेति वृद्धाः। चन्द्रमुखयोः सादृश्यप्रतीतिस्त्वार्थ्येवेति बोध्यम्। इदमेवयुक्तं घनश्यामइत्यादौ विग्रहे
समासेच घनशब्दस्य न सदृशपरत्वे उपमानानि सामान्यवचनैरित्यनेनोपमानत्वेन बोधकानि सामान्यधर्मविशिष्टोपमेयवचनैः
समानाधिकरणैः समस्यन्त इत्यर्थकेन समासानापत्तेः। घनपदस्याप्युपमेयपरत्वेनोपमानवाचकत्वाभावात्। न च भूतपूर्वगत्या
तत्त्वम्। तद्धि ग्रहवाक्ये प्रयुक्तरीत्या तत्त्वाभावात्। घनेन तुल्य इत्यत्र तथात्वेऽपि तस्य विग्रहत्वाभावात् प्रत्यासत्त्या तत्र गृहीतौ ते हि ग्रहवा॰
क्ये चोपमानवाचकत्वस्य ग्रहणौचित्यात्। न स्यात् तद्धि ग्रहत्वे मृगचपलेत्यादौ पुंवत्त्वानापत्तिः। वृत्तौ विग्रहे च सामानाधिकरण्य एव त
त्प्रवृत्तेः। एतेन पूर्वावस्थाश्रयेण शस्त्र्या उपमानवाचित्वमिति कैयटः परास्तः। केवलशस्त्रीपदप्रयोगे तु सर्वथोपमानवाचित्वं दुरु
पपादम्। एवं मृग्यादेः सादृश्यसंबन्धेनान्वयेऽपि तदनुपपत्तिः। किं च श्यामशब्दस्योपमेयपरतया घनेन तदन्वयाभावेन तस्य साधा
रणधर्मवैशिष्ट्येनेतरपरिच्छेदकत्वरूपोपमानत्वाभावः। ननूक्तं भाष्ये यदि शस्त्रीव श्यामा देवदत्तेति विग्रहस्तदा शस्त्रीश्यामे
त्येतदपेक्ष्यं स्यात्। यदि यथा शस्त्री श्यामा तद्वद्देवदत्तेति विग्रहस्तदा देवदत्ता या श्यामेत्येतदपेक्ष्यं स्यादिति। कैयटेऽपि न च श॰
ब्दस्यावृत्तिरस्ति येनोभयगतश्यामत्वं प्रतिपादयेदिति। एको हि श्यामाशब्द एकगतगुणस्यैव प्रतिपादकः। न हि तस्य शाब्दान्वयं वि
नोक्तमुपमानत्वमिति तद्भावः। श्यामेत्यस्योपमेयपरत्वाभावे तु साधारणधर्मविशिष्टोपमेयपरत्वरूपसामान्यवचनत्वाभावा

वा
त्समासोनस्यात्।अतएवभाष्येशस्त्रीशब्दःशस्त्र्यामेवश्यामाशब्दोदेवदत्तायामेवेतिपक्षेसामानाधिकरण्याभावात्समासपुंवद्भा
वौनप्राप्नुतइत्युक्त्वा।एवंतर्हितस्यामेवोभयंवर्ततेइतियुक्तमित्युक्तम्।तत्रतस्यामेवेत्यस्योपमेयायामेवेत्यर्थःउपमानशब्दोपिसा
दृश्यमूलाभेदाध्यवसायात्तत्रेतितद्भावः।तत्रसादृश्यनिर्वाहायास्यैवतन्व्यादिनोपमानेपिसंबन्धोवश्यंवाच्यः।तदुक्तंकैयटेन
।यदादेवदत्तायांशस्त्रीत्वमारोप्यतेसादृश्यात्तदाकंगुणमाश्रित्यतयोःसादृश्यमित्याशङ्क्ययद्यपिचन्द्रमुखीत्यादौचन्द्रेऽनेकगु
णसत्त्वेपितात्पर्यवशात्प्रियदर्शनत्वमनिर्दिष्टोपिगुणोवृद्धव्यवहारादुपमानिमित्तंतदोपमेयेश्रुतःसन्निधानात्कथमुपमानं
नस्मस्यतीति।अतएवैतदुत्तरंशस्त्रीशब्देनाभिसंबध्यमानत्वाच्छ्यामाशब्दस्यसामान्यवचनत्वाभावइत्याशङ्कितम्।श
स्त्रीशब्देनाप्यभिसंबध्यमानत्वादितितदर्थः।बहूनांयःसामान्यमाहसएवसामान्यवचनइत्याशयेनशङ्का।ततःसिद्धा
न्तिनोक्तंश्यामत्वस्योभयत्रशस्त्र्यांदेवदत्तायांचभावात् उभयगतगुणवाचकत्वाच्चश्यामाशब्दस्यसामान्यवचनत्वंनाव
श्यंसएवसामान्यवचनोयोबहूनांसामान्यमाह द्वयोरपियःसामान्यमाह सोपिसामान्यवचनइति।अत्रोभयगतगुणवाच
कत्वादित्यनेनोभयोःसाधारणधर्मसंबन्धःशब्दइतिसूचितम्।अतएवसामान्यैरितिनोक्तम्।सामान्यवचनैरितिचोक्त
म्।नत्वोभयान्वयित्वेनोभयगतधर्मवाचकत्वबोधनार्थम्।श्यामशब्दस्यद्विगतधर्मवाचकत्वेनैवसामान्यवाचकत्वंबोध्यम्

CC-0. In Public Domain. Digitization by eGangotri

एवं चोपमानश्यामघनाभिन्नः श्यामो देवदत्त इति बोध इति भाष्यस्वरसः। काव्यप्रकाशस्वरसोप्येवमेव। तत्र त्वेवमुक्तं यथेववाशब्दा यत्परास्तस्यैवोपमानताप्रतीतिरिति। यद्यप्युपमानविशेषणानि ते तथापि शब्दशक्तिमहिम्नाश्रुतस्यैव षष्ठीवत् संबन्धं प्रतिपादयन्तीति तत्तद्भावे श्रौती उपमा तेन तुल्यमित्यादौ प्रतौ तु तुल्यतोपपत्तये साधर्म्यस्यार्थत्वादार्थीति। यत्पर इत्यस्य यदनन्तरमुपात्तादित्यर्थः। उपमानताप्रतीतिश्च शाब्द्येव। तेषां शब्दानामुपमानविशेषणार्थप्रतिपादकत्वे स्यादिति नाहेतुत्वेनोपादानात्। उपमानविशेषणानीति बहुव्रीहिरिति तु न युक्तम्। पुंस्त्वापत्तेः। उपमानविशेषणा एते इति पाठस्तु प्रदीपादिविरुद्ध इत्यन्यत्र विस्तरः। न चैवं पुरुषो व्याघ्र इव शूर इत्यादौ भवदुक्तरीत्या बोधे विशेषणस्य व्याघ्रस्यापि सविशेषणत्वेनासामर्थ्यात्समासो न स्यादिति वाच्यम्। उपमानत्वेन बोधकस्य तस्य साधारणधर्मांशे नित्यसापेक्षत्वेनादोषात्। साधारणधर्मवत्त्वेन परिच्छेदकत्वं हि तत्त्वम्। तच्च तत्त्वेन ज्ञातस्यैव। यद्यप्युपमेयत्वं तद्रूपत्वेन परिच्छेद्यत्वमेव तस्य च तत्त्वे विधेयमिति न तन्नित्यसापेक्षम्। तथापि प्रधानस्य सापेक्षत्वे भवत्येव समासः। प्रधाने नैकविशेषणसंबन्धसंभवात्। देवदत्तो धनी सुन्दरश्चेतिवत्। अत एव सामान्याप्रयोग इति चरितार्थम्। अस्तु वोपमेयस्यापि नित्यसापेक्षत्वम्। परं तु तत्त्वं न समासप्रयोजकं किं तु गमकत्वमेवेति समासवादे वक्ष्यते। तस्य तत्त्वं च बहुशो दृष्टमिति। अत्रापि समासः स्यादिति तद्वारणाय सामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्याप्रयोग इति। इदमेवतत्त्वगमकत्वबोधकमितिबोध्यम्। एवं चेवादियोगे साधारणधर्मसंबन्धरूपोपमावाच्या सादृश्यप्रतीतिरार्थी सदृशादिपदयोगे सादृश्यप्रतीतिः शाब्दी उपमात्वार्थी सादृश्यं तु साधारणधर्मसंबन्धप्रयोज्यं सदृशादिपदशक्यतावच्छेदकतया सिद्धं सदृशदर्शने संस्कारोद्बोधकत्वस्य सर्वसंमतत्वेन तत्कारणतावच्छेदकतया च सिद्धमखण्डमतिरिक्तः पदार्थः। न चातिरिक्तपदार्थत्वे गौतमकणादोक्तपदार्थसंख्याविरोध इति वाच्यम्। प्रमेयपदार्थे गौतमोक्ते ऽन्तर्भावात्। किंच पदार्थसंख्यावन्धनमुपलक्षणमेव। तदुक्तं गौतमेन। संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्यामिति। पदार्थगतसंख्यानियमस्यासिद्धिः कारणस्य प्रमाणस्यानुपपत्तेः। उपपत्तौ न तन्नियमः साधनस्य साध्यातिरेकादिति तदर्थं तद्व्याख्यातार आहुः। किंचाकर्तरि च कारके इति सूत्रे भाष्ये नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगतिः। नञ्युक्तमिवयुक्तं चान्यस्मिंस्तत्सदृशे कार्यं विज्ञायते तथा ह्यर्थो गम्यते तद्यथा ऽब्राह्मणमानयेत्युक्ते ब्राह्मणसदृशपुरुषमानयति नासौ लोष्ठमानीय कृती भवति। एवमिहाप्यकर्तरीति कर्तृप्रतिषेधादन्यस्मिन्नकर्तरि कर्तृसदृशे कार्यं विज्ञायते। किंचान्यदकर्तृ कर्तृसदृशं कारकमिति उक्तम्। एवं च सूत्रे कारकग्रहणप्रत्याख्यानम्। कर्तृप्रतिषेधादित्यस्यारोपितकर्तृबोधादित्यर्थः। अनेन हि भाष्येणाभेदे पि सादृश्यमिति सूच्यते। अन्यथान्यस्मिन्नित्यस्य वैयर्थ्यापत्तिः। तथेवयोगेपि भेदसादृश्ये गम्ये न तु तद्वाच्ये द्योत्ये चेति प्रतीयते। इव

युक्तोदाहरणमिवेप्रतिकृतावित्यधिकारेशाखादिभ्यो यइतियेसोम्यइत्यादि। नत्रसोमसदृशस्तद्भिन्नः प्रतीयतेनतुसोम
एव। एतेनभेदनियतंसादृश्यमित्यपास्तम्। अस्यामुखसदृशमस्यामुखमित्यादावभेदेपिसादृश्यप्रतीतेश्च। नचाभेदेसाधारण
धर्माभावात्कथंतत्रयोज्यंसादृश्यमितिवाच्यम्। अनेकवृत्तिधर्मस्यैवसाधारणधर्मत्वेननत्रावृत्त्या एकस्याप्यनेकत्वात्। अत
एवअइउण् सूत्रेभाष्येएकांकपिलांसहस्रमृषयस्वैकैकशोदत्वातयासर्वेतेसहस्रदक्षिणाःसंपन्नाइतिश्रौतेनस्मार्तेनवाव्यवहा
रेणैकस्यापिआवृत्त्यानेकत्वंसूचितम्। अतएवसप्तदशसामिधेन्योभवन्तीतिश्रुतौपठितत्रयोदशसामिधेनीमन्त्राणांप्रथमान्त्यमन्त्र
योस्त्रिरावृत्त्यासप्तदशत्वमुक्तंश्रौतसूत्रे। अतएवएकएवाकारइतिपक्षेघटिकइत्यादावावृत्तिकृतद्व्यच्कत्वेननौद्व्यचःष्ठन्निति
ष्ठन्नुक्तोभाष्ये। एतेनायंव्यवहारोगौणइतिपरास्तम्। मुख्यद्व्यचिचारितार्थ्येनात्राप्रवृत्त्यापत्तेः। उत्तरसंख्ययापूर्वसंख्याबाधा
त्। घटेनेत्यादौसावेकाचइतिस्वरोनस्यादितिचोक्तम्। एवंचैकस्यैवब्राह्मणस्यावृत्त्याभोजनदानेदशादिब्राह्मणभोजनसंकल्पः
सिध्यतीतिबोध्यम्। एवंप्रकृतेपिमुखस्यानेकत्वेनैकस्यापिधर्मस्यसाधारणधर्मत्वम्। नचैकस्यैवावृत्त्यानेकत्ववत्कालादिभे
देनभेदंप्रकल्प्यमुखमिवमुखमित्यादावुपमैवास्त्वितिवाच्यम्। तस्यभेदस्यशब्देनासंस्पर्शात्। अतएवोपमानानीतिसूत्रेभा
ष्येयद्देवोपमानंतद्देवोपमेयंकइहोपमार्थः। गौरिवगौरिति। उपमानोपमेयभावद्योतकेवशब्दप्रयोगेकिंप्रयोजनंकर्मकरणरू

पोपमानोपमेयभावस्यैकत्रासंभवात्। इवस्यार्थान्तराभावात्। नच द्वितीयसदृशव्यवच्छेदप्रतीतिः फलम्। गोसदृशो गौरित्यनेनापि तत्संभवात्। अभेदेपि सादृश्याङ्गीकारेण तस्य बोधकत्वाद्बोधके तत्प्रयोगो न स्यात्। एवं चोपमालंकारस्यास्य सूत्रस्य चोक्तिसंभवाभाव इत्याशयमुक्त्वा तस्माद्यत्र किंचित्सामान्यं कश्चिच्च विशेषस्तत्रोपमानोपमेये भवत इति सिद्धान्तितम्। तत्र भिन्नगोव्यक्त्योस्तद्बोधनार्थं आरोपितभेदवतोस्तद्बोधनार्थो वा तत्रैव शब्दप्रयोग इत्याशङ्क्य कैयटेनोक्तं तस्य भेदस्य शब्देनासंस्पर्शात्सामान्यमुखेन द्व्यावसायादिति भाव इति। अत्र पक्षे घन इव श्याम इत्यादेः संभवेनोपमालंकारस्य सूत्रस्य चोक्तिसंभवः। गौरिव गौरित्यादौ तूपमानत्वाद्यप्रतीत्यानन्वयालंकार एवेति बोध्यम्। तस्माद्भेदेपि साधारणधर्मसंबन्धस्तत्प्रयोज्यं सादृश्यं चावश्यं स्वीकार्यं काव्यप्रकाशकृतापि भेदे साधर्म्यमुपमेति वदता। भेदे साधारणधर्मसंबन्धस्याङ्गीकारात्। यत्र साधारणधर्मेण सामान्यरूपता प्रतीतिः प्रत्येकरूपेण शब्दतो विशेषरूपता प्रतीतिस्तत्रोपमानत्वादिप्रतीतिरिति सिद्धान्तार्थो भाष्ये। एतेन रामरावणयोर्युद्धं रामरावणयोरिवेत्यादौ कल्पभेदेन भिन्नयोर्युद्धयोरुपमैवेति परास्तम्। तस्य भेदस्य शब्देनासंस्पर्शादिमुखवत्सदृशं मुखमित्यादावव्याप्त्या गौरिव गौरित्यादौ शाब्द्या उपमाया अप्रतीतेरार्थः शाब्दस्त्वानन्वयः। उपमासंबन्धाभाव एवानन्वयः। तत्र यतो मर्यादाभेदे सदृशादिशब्दप्रयोगे आर्थी उपमा गम्यस्योपमानोपमेयभावस्य प्रतीतेः। अभेदे तत्र

योगे तु अनन्वयः। सर्वथा तदप्रतीतेः तत्र भेदसमानाधिकरणसादृश्यमुपमाव्यञ्जकमिति बोध्यम्। अनन्वयालंकारे एकस्यैवोप
मानोपमेयत्वमिति व्यवहारस्तु न तत्सादृश्यात्। अत एवोकाल इति सूत्रे भाष्ये ऊ अजित्येव सामर्थ्यादूकारसदृशोऽजित्यर्थे नैव
सिद्धे कालग्रहणं श्रूयमाणेनैवोकारेण कालं विशेषयितुमिति द्विमात्रादीनां न ह्रस्वसंज्ञेत्युक्तम्। भेद एव सादृश्यमिति वदतां मते तू
कारस्य ह्रस्वसंज्ञा दुर्लभा स्यादुद्देश्याभावादित्यलम्। सादृश्यस्यातिरिक्तत्वादेवानेनायं सदृश इत्युक्ते केन धर्मेणानयोः सादृश्यमित्ये
व जिज्ञासा ननु को धर्मोऽनयोः सादृश्यमिति। अत एव क्षमया पृथ्वीसदृशो धर्मतः सादृश्यमित्याद्याख्यानस्यैवोपपद्यते तच्च व्यञ्जकध
र्मभेदाश्रयभेदान्निरूपकभेदाच्च भिन्नम्। अत एवोभयोरुभयं वर्तते सादृश्यमूलाभेदाध्यवसायेनोपमानस्योपमेयेऽभेदान्व
य इति सिद्धान्तपक्षे एवमपि सादृश्यनिमित्तं गुणो न निर्दिष्ट इति शङ्कासंनिधानात् श्यामत्वमेव गुण इति समाधानं च भा-
ष्ये संगच्छते। साधारणधर्मसंबन्धस्यैव सादृश्यरूपत्वे तदसंगतिः स्पष्टैव। मम तु प्रतीयमानं सादृश्यं किंधर्ममूलकमिति शङ्-
का। उपात्तधर्ममूलकमेवेत्युत्तरमिति न दोष इत्यलम्। मातेव हितकारिणीमित्यादौ त्विवस्य सादृश्यवाचकत्वादिवशब्दार्थसादृश्ये
च मातुरन्वय इति प्रातिपदिकार्थे प्रथमैव। न च षष्ठ्यापत्तिः प्रतियोगिविशिष्टसादृश्यवत इवार्थत्वेन तदेकदेशे प्रतियोगिमातुरभे
देनान्वयात् षष्ठ्यप्राप्तेरिति कश्चित्। असाध्वेवेदं क्रियान्वये एव प्रथमायाः साधुत्वादत एव तिङ्समानाधिकरणे प्रथमा अभिहिते

प्रथमेति वार्तिकं प्रथमायाः कारकविभक्तित्वपरं भाष्ये च संगच्छते इत्यन्ये। तत्र गमकसत्त्वे द्योतकता। अन्यथा वाचकतैव वृत्तिद्वयक
ल्पनागौरवात्। न च तस्य वाचकत्वे इवास्तीत्याद्यपि साध्वयमस्तीत्यादिवत्स्यादिति वाच्यम्। तथा शिष्टप्रयोगाभावेनोपमानादिपदो
पसंदानेनैव प्रयोगे तेषां साधुत्वाङ्गीकारात्। घटो नास्तीत्यादावभावस्य विशेष्यतया बोधान्नञो वाचकत्वम्। नानूयाजेष्वित्यादौ
सप्तम्याः साधुत्वार्थं द्योतकत्वमपि। आरोपितानूयाजेषु यजतिष्विति तदर्थः। भेदे प्रतियोगित्वेनान्वयेनानूयाजभिन्नेष्वित्यर्थे स
प्तम्यनुपपत्तिः। आरोपविषयत्वं तत्र नञ्द्योत्यम्। अत एवाघट इत्यादौ नञ्तत्पुरुषस्योत्तरपदार्थप्राधान्यं संगच्छते। अभा
वस्य तु प्रतियोगिनिरूपितविशेष्यतयैव भानस्य सर्वसिद्धत्वात्तदनुपपत्तिः स्पष्टैव। अत एवास इत्यादौ सर्वनामकार्यम्। अ
न्यथा गौणत्वात्तन्न स्यात्। इतरविशेषणत्वेनोपस्थितिविषयत्वस्यैव गौणत्वात्। यद्वा नञ्समभिव्याहृतघटादिशब्दाना
मारोपितप्रवृत्तिनिमित्तबोधकत्वेन तात्पर्यग्राहकः। यथा सिंहो माणवक इत्यादौ माणवकादिपदानि सिंहादिपदस्यारोपित
सिंहत्वबोधकत्वे। अनुदरा कन्येत्यादावप्यल्पत्वादिनोदराभावमारोप्य नञ्समभिव्याहारे आरोपितोदरबुद्ध्या तन्मूला
ल्पत्वादौ विश्रमः। अद्विज इत्यादौ च तद्भेदमूलकमारोपितप्रवृत्तिनिमित्तकत्वमिति भेदे विश्रान्तिः। अधर्म इत्यादौ च विरो
धिनि। आरोपितत्वस्य नञ्वाच्यत्वे तु तस्य ब्राह्मणादिपदशक्ये अनारोपितब्राह्मण्यवति संबन्धो दुरुपपादः। तत्र प्रसिद्धार्थे

CC-0. In Public Domain. Digitization by eGangotri

परित्यागोः प्रसिद्धार्थपरिग्रह इत्युभयंद्योतकत्वमितिनञ्सूत्रेभाष्येस्पष्टम्। इदमेवनञोद्योतकत्वंनाम· एतावतैवतत्रैका
र्थीभावव्यवहारः। विशिष्टान्तु पूर्व्वार्थद्योत्यार्थान्तर्भावेणशक्ततावच्छेदकत्वाद्विशिष्टस्यार्थवत्त्वंसमासविधायकशास्त्रबलादत्रैव
मेवकल्पनोचिता। प्रजयतीत्यादौतुनैवम्। अडादिव्यवस्थार्थमन्यथातत्रकल्पनात्। लोकस्यतुतत्रापिविशिष्टशक्त्यैवबोधः।अव
यवशक्तिबोधनद्वाराविशिष्टस्यविशिष्टेशक्तिबोधकमेवव्याकरणमितिदिक्· असंदेहइत्यादौचारोपितःसंदेहइतिबोधः।भेदसं
बन्धेनारोपितत्वज्ञानाच्चतदत्यन्ताभावप्रतीतिः।असमस्तोत्वभावोनञर्थः।सद्विधा।अत्यन्ताभावोभेदश्च।तत्रतादात्म्येतरसंब
न्धाभावआद्यः।तादात्म्याभावोऽन्त्यः।तादात्म्यमतिरिक्तंतद्वृत्त्यसाधारणधर्मरूपंवेत्यन्यत्।समनियताभावस्थलेएकस्थाने
कप्रतियोगिकत्ववदनयोर्घटादिप्रतियोगिकत्वमपि।नञाद्यस्तिङन्तार्थक्रियान्वय्येव।असमस्तनञर्थात्यन्ताभावविशेष्यकबो
धेतिङ्समभिव्याहृतधातुजन्योपस्थितेर्हेतुत्वात्।अतएवाहंनास्मित्वंनासिघटोनास्तीत्यादौपुरुषव्यवस्थाघटौनस्तोघटान
सन्तीत्यादौवचननियमश्चोपपद्यते।युष्मदादेस्तिङ्सामानाधिकरण्यात्· त्वद्भावोस्तीत्याद्यन्वयेचसनस्यात्। आख्यातार्थ
संख्यान्वयित्वस्यतुनसामानाधिकरण्यपदार्थत्वम्। किंचतिबादिविधिनाद्व्येकयोरित्यस्यैकवाक्यतयैकत्वेनिबित्यादिवाक्येकस्मै
कत्वेइत्याद्याकाङ्क्षायांप्रत्यासत्यानिबाद्यर्थान्वयिनइत्यस्यैवलाभेनअभावप्रतियोगिन्यनन्वयाद्घटसत्ताभावबोधेसमनै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यत्यादेवनियमेनघटाभावबोधोपीतिननतद्विषयसंदेहादि।एवंसमनियतभावयोरपिएकज्ञानेनियमेनापरज्ञानंबोध्यम्।अतए
वघटज्ञानेतत्सत्तासंदेहादि न।समनियतानामैक्यमेव।नचप्रतीतिभेदेजाग्रतिएवंकथनस्यनकश्चिदुपयोगः।लाघवात्पदा
र्थएकएवधर्मभेदात्प्रतीतिभेदइत्यस्यवक्तुंशक्यत्वात्।घटत्वाभावघटभेदयोरिवघटत्वतदवच्छिन्नभेदाभावयोरिवचस
निसमनैयत्येभावयोरपितत्त्वमुचितमेव।हेतोःसमत्वादितिकेचित्तन्न।एकएवधर्मीतत्रैवधर्मभेदकल्पनेनव्यवहारभेदोप
पत्तौधर्मिभेदस्यन्यायादिनयेपिविलयापत्तेः।तद्रूपतद्रसादेरप्यैक्यापत्तेश्च।तत्रभासमानतावच्छेदकरूपत्वादिनानसमनैय
त्यंतद्रूपंभासतइत्यादेरूपत्वादिनाव्यक्तिविशेषोभासतइत्येवार्थः क्रियायाःकारकविशेषानालिङ्गितायाअभावस्यचप्रतियो
गिविशेषानालिङ्गितस्याभानात्तत्रैनैवंवक्तुंशक्यमितिकेचित्।एतेनाधिकरणानालिङ्गिताभावबुद्धेरभावादिहघटोनास्ती
त्यादावेतदधिकरणकाभावप्रतियोगिघटकर्तृकासत्तेनिबोधइत्यपास्तम्।वक्ष्यमाणरीत्याप्रतियोग्यधिकरणस्यैवाभावा
धिकरणत्वेनतस्यपृथगधिकरणाकाङ्क्षाऽभावात्।अधिकरणकारकस्यक्रियान्वयेक्रियान्वयिकर्तृकर्मान्वयेवासाधुत्वे
नासाधुतापत्तेश्च।अत्यन्ताभावार्थकनञःप्रतियोगिभूतक्रियान्वयनियमाच्च।एतेनभूतलेनघटइत्यादौतात्पर्यवशात्क
दाचिद्भूतलादौघटाद्यभावःकदाचिच्चघटादौभूतलवृत्तित्वाद्यभावःप्रतीयते।अन्यथेहघटोनास्तीत्यादितोबोधानुपप

लमं· त्तिः। तथाहि। पदार्थानांक्रमेणान्वयेनघटसत्तारूपोर्थः प्रथमंबुद्धौनञानिवर्तयितुमशक्यः सतोनिषेधायोगात्।अस
१७ तस्त्वसत्वादेवनिवृत्तिसिद्धौनञोवैयर्थ्यम्। तदुक्तम्।सतांचननिषेधोस्तिसोऽसत्सुचनविद्यते।जगत्यनेनन्यायेननञ
र्थः प्रलयंगतइति।नचघटास्तिपदाभ्यांयाघटविषयास्तिबुद्धिर्जातासानञानिवर्त्यतइतिवाच्यम्।बुद्धेः शब्दावाच्य
त्वेननञातन्निषेधायोगात्।एतेनतस्याबुद्धेर्मिथ्यात्वंनञाक्रियतइत्यप्यपास्तम्।घटाभावाद्यनवगतिप्रसङ्गाच्च।कणा
दसूत्रेपिनास्तिघटोगेहइतिसतोघटस्यगेहसंसर्गस्यप्रतिषेधइत्युक्तम्।अतःसत्त्वेनबुद्धस्य।एवंचघटकर्तृकसत्ताभावो
बोधयितुमशक्यइतिविशेषणीभूतगेहसंसर्गाभावप्रतीतिरितितदर्थः।नचाव्ययीभावस्यनित्यत्वाद्भूतलेनघटइतिवा
क्यंदुर्लभमितिवाच्यम्।अर्थाभावशब्देनञोघटकतयासूत्रगृहीताव्ययत्वेननञाव्ययीभावाभावात्। अतएवपूर्वपदा
र्थप्रधानोनञ्तत्पुरुषइतिपक्षेतत्पुरुषेणाव्ययीभावस्यबाधप्राप्त्याव्ययीभावासिद्धिरूपंदूषणंभाष्येनोपन्यस्तम्।अत
एवतत्रपक्षेऽवर्षाऽहेमन्तइत्यादौलिङ्गसंख्यायोगोनस्यात् पूर्वपदार्थस्याव्ययार्थत्वेनासत्त्वभूतत्वादित्याशङ्क्यशब्द राम·
शक्तिस्वभावेनपरिहृतम्।अत्रतुपक्षेऽनेकमित्यादावेकवचनासिद्धिमनसिनिधायोत्तरपदार्थप्रधानत्वंसिद्धान्तितम्।
असंहितमितितुसंधानरूपसंहितापरपर्यायभावसाधनक्तान्तनपुंसकसंहितशब्देननञ्तत्पुरुषेबोध्यम्।सूत्रवार्तिक १७

प्रामाण्यादुभयलिङ्गः संहितशब्दः। अतएवञ्जात्यवद्भूतथावान्तावितिप्रातिशाख्यव्याख्यानेसंहितवदितितद्भाष्येप्रयुक्तमित्यन्यत्रप्रपञ्चितमित्यपास्तम्। सत्त्वेननिश्चितस्यनिषेधाभावेपिसंभावितस्यनिषेधसंभवाच्च। नञ्समभिव्याहारएवचतस्यतत्त्वेप्रयोजकः। कणादसूत्रेतुसमनियताभावानामैक्यंबोधयितुंनञोक्तिः। गेहसंसर्गस्यापिप्रतिषेधइत्यर्थादितिदिक्। पृथिव्यांगन्धोनजलेइत्यादौप्रतीतेरेकविशेष्यकत्वानुभवस्तुस्ववासनाकल्पितइतिदिक्। नेक्षेतोद्यन्तमादित्यमित्यादौनस्यब्रह्मचारिणोव्रतमित्यनुष्ठेयवाचिव्रतशब्दोपक्रमादभावस्यचाननुष्ठेयत्वादीक्षतेर्नञ्समभिव्याहारादीक्षणाभावसंकल्पबोधकतेतिबोध्यम्। यत्त्वत्रपर्युदासस्तत्राभावस्याननुष्ठेयत्वाद्व्रतशब्दोपक्रमाच्चतद्भिन्नक्रियायाःसामान्यतःप्राप्त्याचानीक्षणसंकल्पेलक्षणेति तन्न। ईक्षणभिन्नसंकल्पेतात्पर्याभावात्। तथाशिष्टाचाराभावाच्च। नेक्षिष्यामीतीक्षणाभावसंकल्पस्यैवसर्वैराचरणाच्च। किंचयत्रनञसमभिव्याहारेपदार्थस्याभेदेनान्वयेआकाङ्क्षा। तत्रैवनञ्समभिव्याहारेभेदप्रतीतिर्नान्यत्र नचप्रकृतेतथा। अतएवनपचतितिष्ठतीत्यादौनभेदबोधः। अतएवतिङन्तसमभिव्याहृतनञोत्यन्ताभावार्थकत्वमेव। अयमेवप्रसज्यप्रतिषेधइत्युच्यते। प्रसज्यविधायविहितस्यप्रतिषेधइतितदर्थः। नञ्सूत्रेभाष्येतुप्रसज्यक्रियागुणौततःपश्चान्निवृत्तिंकरोतीत्युक्तम्। तेनगुणाभावबोधेपिप्रसज्यप्रतिषेधइतिलभ्यते। नास्माकमेकंप्रियमि

स्युदाहरणम्। अत्रहिएकप्रियप्रतिषेधे बहुप्रियप्रतीतिः नसंदेहइत्यादौचसंदेहाभावप्रतीतिः संदेहस्यगुणत्वात् सर्वत्र
क्रियाप्रतिषेधेहिगुणपदोपादानंभाष्येऽनर्थकंस्यात्। प्रसज्यप्रतिषेधोऽसौक्रिययासहयत्रनञित्यत्रक्रियाग्रहणंगुणस्याप्यु
पलक्षणमितिवृद्धाः। अन्योघटःपटोनेत्यादौ। यत्तत्रभेदोनञर्थस्तत्रप्रतियोगितासंबन्धेनपटस्यान्वयः। नचगृहस्यो
च्चैरित्यादाविवषष्ठ्यापत्तिः। एवंतर्हिपटपदंपटप्रतियोगिकपरंतस्यभेदेऽभेदान्वयः। भेदस्याश्रयतयाघटेऽन्वयः। अभेदा
न्वयव्युत्पत्तिस्तुनिपातातिरिक्तविषया। यद्वाभेदवान्नञर्थः। भेदवतिलक्षणेतितुनयुक्तम्। निपातानामनेकार्थत्वेनलक्ष
णानवसरात्। केवलभेदस्यक्वाप्यबोधाच्चेतितन्न। नब्राह्मणैरेतैरुपद्रुतमित्यादौभेदाश्रयभेदप्रतियोगिनोः समानविभक्ति
कत्वस्यदुरुपपादत्वात्। समासवाक्ययोस्तुल्यार्थत्वौचित्याच्च। तस्मादत्रापिआरोपितपटाभिन्नोघटइतिबोधः। नञ्
द्योतकएव। एवंचसमानविभक्तिकत्वंसिद्धम्। घटभेदबोधस्त्वार्थः। तत्समनियतत्वात्। घटत्वाभावबोधोपितत्रार्थः।
यद्यपिभेदोनिरूपयितुमशक्यः। तथाहि घटःपटाद्भिन्नइतिभेदज्ञानंभिन्नत्वेनगृहीतधर्मिप्रतियोगिज्ञानपूर्वकंतत्र सभेदो
ऽयमेवचेदात्माश्रयः। भेदान्तरंचेत्तदपिभिन्नयोरेवधर्मिप्रतियोगिनोर्ज्ञातव्यम्। सचेत्पूर्वभेदएवतदान्योन्याश्रयः। तृतीयो
भेदोऽन्यश्चेच्चक्रकापत्तिः। भेदपरंपरास्वीकारेऽनवस्था। अन्तिमभेदासिद्ध्यामूलभूतभेदपर्यन्तमसिद्धेर्मूलक्षयात्। अत

एवभेदस्यासत्सामान्यशब्देनकैयटादौव्यवहारः।असत्त्वमुत्करीत्यासामान्यत्वंकेवलान्वयित्वात्।तथाप्यविचारितरमणीयेनैवमायिकेनभेदेनव्यवहाराद्व्यावहारिकस्यैवसत्त्वेनाक्षतिः।घटाद्यर्थस्यघटादिपदवाच्यत्ववत्।अन्यथाघटत्वाश्रयत्वेनायंघटः घटवृत्तित्वेनचेदंघटत्वमित्यन्योन्याश्रयात्पदार्थमात्रस्याविचारितरमणीयस्यानिर्वचनीयस्यैवव्यवहारप्रयोजकत्वात्।अत एवोक्तंश्रीहर्षेण।समस्तलोकशास्त्रैकमत्यमाश्रित्यनृत्यतोः।कान्तवास्तुगतिस्तर्कैर्वस्तुधीव्यवहारयोः।उपपादयितुंतैस्तैर्मतैरशक्नीययोः।अनिर्वक्तव्यतावादपादसेवागतिस्तयोः।यथासतोजनिर्नैवमसतोपिजनिर्नच।जन्यत्वमेवजन्यस्यानिर्वाच्यत्वसमर्पकमिति।तथा।भेदसत्यपरस्तर्कोभेदमायापरो।परः।भेदसत्यपरस्तर्कोत्यसन्वेदविरोधतः।एकविज्ञाननिगमान्नेहनानेतिचश्रुतेरितीत्यलम्।एवमघटस्यदर्शनमित्यादौसर्ववाक्यंसावधारणमितिन्यायेनघटभिन्नस्यैवदर्शनमित्यर्थाद्घटस्यदर्शनाभावोपिआर्थः प्रतीयते।अघटदर्शनमित्युक्तेतुन।तद्भिन्नदर्शनेपितद्दर्शनाभावाभावात् तयोःसमनैयत्याभावात्।एवकारान्तर्भावेणवृत्तौतुनमानम्।एतच्चतस्यभावोनञ्गुणप्रतिषेधइत्यादिसूत्रेव्याकरेस्पष्टम्।नञ्द्योत्योभेदोविशेषणंभेदप्रतियोगीघटइत्यर्थइतितुनयुक्तम्।अघटमानयेत्युक्तेयत्किंचिन्निष्ठभेदप्रतियोगिनोयत्किंचित्प्रतियोगिकभेदवतोवाघटस्यैवानयनापत्तेः। अतएवोत्तरपदार्थप्रधानत्वेनञ् तत्पुरुषस्याब्राह्मणमानयइत्युक्तेब्राह्मणमात्रस्यानयनंप्र

ग्नोतीत्याशङ्क्यनञः प्रयोगान्नञर्थविशिष्टस्यानयनं भविष्यतीत्युक्ताकः पुनरसौ नञर्थविशिष्ट इति प्रश्ने निवृत्तपदार्थक इति
भाष्ये उक्तम्। निवृत्तः पदार्थोऽस्य ब्राह्मण्यं यस्मिन्सक्षत्रियादिरित्यर्थः सादृश्यादिनाऽध्यारोपितब्राह्मण्यो नञ्द्योतिततदव
वस्थ इत्यर्थ इति कैयटः। यत्तु निवृत्तेति भावे क्तः निवृत्तमभावः पदार्थो यस्येति एतल्लाभ्यार्थ इति तल्लाभान्यैवेति स्पष्टं भाष्यविदाम्
।किंच प्रतियोग्यभावेन तुल्ययोगक्षेमावितिनाग्निकोक्तेर्नञ्वाच्यभेदस्य विशेषणतानयुक्ता। यत्र प्रतियोगिनः प्रकारतानत्रैव तदभा
वस्यापि सा यत्र तस्य विशेष्यता तत्रैव तदभावस्यापि सेति तदर्थः। बाधबुद्धिप्रतिबन्धकतापि यथानुभवं कल्प्येति न तदनुरोधेन
क्लृप्त्यनुभवसिद्धबाधान्यथाभाव उचितोऽनेनैव न्यायेन प्रतियोग्यधिकरणमेवाभावाधिकरणमिति बोध्यमिति दिक्। यत्तुना
नूयाजेष्वित्यादौ पर्युदास एव न प्रसज्यप्रतिषेधः शास्त्रीयविहितप्रतिषिद्धत्वाद्विकल्पापत्तेर्वाक्यभेदापत्तेश्च। तथाहि। क्रिया
याः कारकाकाङ्क्षत्वेन विनिगमनाविरहात्सकलकारकविशिष्टां भावनां प्रतियोगिभूतामुद्दिश्याभावस्य विधिस्तत्र वाच्यः।
एवं चोद्देश्यस्य प्रतियोगिनः प्रसिद्ध्यर्थं प्राप्तिसापेक्षता प्रतिषेधस्य। प्राप्तिश्च क्वचिद्रागतो यथा न कलञ्जं भक्षयेदिति। तत्र हि रा
गेण कलञ्जभक्षणादेरिष्टसाधनत्वावगत्या प्रसक्तायाः कलञ्जभक्षणभावनाया निषेधशास्त्रेण निवृत्तिविषयत्वेऽवगतेऽर्थात्त
द्विषयकलञ्जभक्षणादेरनिष्टसाधनत्वाक्षेपान्नित्यं ततो निवृत्तिः। प्रकृते च येयजामहे शास्त्रत एव सा। सा च प्रमारूपेत्युपजीव्ये

स्वीकृताप्रामाण्यपरित्यक्तप्रामाण्योपादानम् व्रीहिशास्त्रे च नियतस्य अत्यन्तबाधायोगाद्विकल्प एव प्राप्तो निर्विकल्पे च प्रथमं व्रीह्यनुष्ठाने यवशास्त्रस्य प्रामाण्यस्वीकारात् प्रतीतप्रामाण्यपरित्यागो वेदे विपर्यासरूपाप्रमितिजनकत्वासंभवात्। ततः प्रयोगान्तरे यवोपादाने यवशास्त्रस्य स्वीकृतप्रामाण्यपरित्यागरूपः प्रतीताप्रामाण्यस्वीकारः पुनस्तृतीयप्रयोगे व्रीह्युपादाने व्रीहिशास्त्रस्य स्वीकृताप्रामाण्यपरित्यागात्त्यक्तप्रामाण्यस्वीकार इति चत्वारो दोषा यथाकथंचिद्भेदारोपेणाष्टौ वा दोषा इति तन्न। निषेधशास्त्रानालोचने सामान्यशास्त्रालोचनमात्रेण भ्रमात्मकप्रतियोगिप्रसिद्ध्याऽभावबोधसंभवेन विकल्पाप्राप्तेः। ननु निषेधशास्त्रस्यैव प्रथममालोचने विशेषदर्शनसत्त्वेन सामान्यशास्त्रतो भ्रमानुपपत्त्या तादृशप्रतियोगिनः प्रसिद्धौ तदुद्देश्यकप्रमानुपपत्तिरिति चेन्न। निषेधशास्त्रस्य प्रथममालोचनं नाम तद्वाक्यज्ञानमुत तदर्थज्ञानम्। नाद्यः। तावन्मात्रेण विशेषदर्शनासंभवात्। नान्त्यः। प्रतियोग्यप्रसिद्ध्या तदसंभवात्। किंच निषेधस्य प्रथममालोचने बाधबुद्धेः सत्त्वेन विधिवाक्यतः प्रमानुत्पादेन विकल्पापत्त्युक्त्यसंभवः। यद्वा तादृशे विषये आहार्यभ्रमात्मिका प्रतियोगिप्रसिद्धिरस्तु। एवमेव हि नान्तरिक्षे जुहोति ह्रदे वह्निर्नास्तीत्यादौ प्रतियोगिप्रसिद्धिः सर्वैरुपपाद्या। प्रतियोगिज्ञानस्याभावधीहेतुत्वेऽपि तत्कारणतावच्छेदककोटावनाहार्यत्वनिवेशे मानाभावात्। ससंबन्धिकपदार्थज्ञाने संबन्धितावच्छेदकप्रकारकज्ञानकारणत्वेन विशेषणतावच्छेदकप्रकारकज्ञानकारणत्वेन वा प्रतियोगिज्ञानकारणतेति पक्षेऽप्याहार्यानाहार्यसाधारणज्ञानत्वेन

वहेतुता। आहार्यतज्ज्ञानादाहार्यएवसङ्गत्यनेनैवातिप्रसङ्गभङ्गात्। आहार्यःशाब्दबोधोनेतित्वश्रद्धेयमेव। ह्रदवृत्तित्वाभाव
बोधोवन्हावित्यादित्वधिकरणकारस्यकर्तृकर्मद्वाराक्रियान्वयनियमादयुक्तम्। प्रसक्तंनिषिध्यतइत्यस्यप्रसञ्जनार्हमि
त्यर्थः। यदिनिषेधोनस्यात्स्यादेवसामान्येनप्रसक्तिरितिबोध्यम्। किंचविध्युपमर्दकत्वेनोपजीव्यादपितस्मान्निषेधोबलवा
न्। एतदेवाभिप्रेत्यनिषेधाश्चबलीयांसइतिभाष्यकृतः। किंचोपजीव्यविरोधोविकल्पवादिनोपि। तथाहि। यागत्वावच्छेदेनये
यजामहकर्मकभावनारूपवाक्यार्थोनिषेधस्योपजीव्यः तस्यचयत्रानुयाजेतदकरणंतदंशेविरोधोऽवच्छेदकावच्छेदेनप्रती
तेरप्रामाण्यंच। अनूयाजवाक्येत्वेकवाक्यतालोभेनपर्युदासइतितत्त्वम्। अतएवद्वन्द्वेचविभाषाजसीत्यादीनांचारितार्थ्यम्।
अतएवसुडनपुंसकस्येत्यादौभाष्येपर्युदासप्रसज्यप्रतिषेधयोःफलाविशेषउक्तःसंगच्छते। एतदेवसकलमभिसंधायो
क्तंनवेतिसूत्रेभाष्येनवेत्यखण्डनिपातार्थस्यनिषेधस्यविभाषासंज्ञित्वेयद्यप्यप्राप्तविभाषाविषयेनिषेधकल्पितविधेरचा
रितार्थ्येनविकल्पःसिध्यतितथापिप्राप्तविभाषायांकृतसामर्थ्योविधिरितिप्रतिषेधएवस्यात् नविकल्पइति। अपितुवाक्यशे
षत्वादितरपर्युदासःस्यात्प्रतिषेधेविकल्पःस्यादितिजैमिनिसूत्रेप्रतिषेधेविकल्पःस्यादित्यभ्युच्चयः। युक्तिसिद्धपतञ्जलि
वाक्यविरोधात्। वाक्यशेषत्वादित्यस्यएकवाक्यत्वलाभादित्यर्थः। ननुतत्तच्छास्त्रैःसाधुत्वविकल्पएकस्यैवशब्दस्यसाधु

धर्मजनकताअसाधुत्वेनत्वधर्मजनकत्वेनेतिविरुद्धमापद्येतेतिननह्विकल्पइतिनवेतिसूत्रेभाष्येसिद्धान्तितम्।एवंचातिरात्रेषोडशि
नंगृह्णातीतिग्रहणवाक्येनतस्यधर्मजनकताबोध्यतेनातिरात्रेषोडशिनंगृह्णातीत्यनेननिषेधेनतस्याधर्मजनकतेतिविरुद्धस्वीकारःकथमि
तिचेत्सत्यम्।उभयत्रापिसंकल्पलक्षणयासंकल्पद्वयस्यापिधर्मत्वबोधनात्।तयोरन्यतरस्यचेच्छयापरिग्रहः।एवंसर्वत्रस्मार्त्तेवैदिक
विकल्पस्थलेबोध्यम्।अतएववैकल्पिकेष्वादितोवधारणमित्युद्घोषइतिदिक्।नञ्प्रतिषेधेद्वयीगतिः।प्रतिषेधंदृष्ट्वापश्चादुत्सर्गस्यतद्विष
यत्वाभावज्ञानेप्रामाण्यग्रहइत्येका०एवमुत्सर्गापवादस्थलेपि।तदुक्तंहरिणा।ब्राह्मणाना श्रुतिर्दध्निप्रक्रान्तामाठरंविना।माठरस्तक्रसेवन्यात्तत्रा
त्वेष्टयथार्थतामिति।दधिब्राह्मणेभ्यइत्यादौमाठरवर्जमेवदधिदानमुपक्रान्तम्।उत्तरकालंतक्रंमाठरायेत्येतत्तस्ययथार्थ
त्वंगमयतीतिभिन्नवाक्यतायामप्राप्त्यनुमानंबाधइतिपुञ्जराजः।उत्सर्गस्यापवादनियमनिषेधानामेकवाक्यतेत्यपरा।त
दुक्तम्।अनेकाख्यातयोगेपिवाक्यंन्यायापवादयोः।एकमेवेष्यतेकैश्चिद्भिन्नरूपमिवस्थितम्।नियमःप्रतिषेधश्चविधि
शेषस्तथासतीति।न्याय्यउत्सर्गः।आपाततोभिन्नवाक्यत्वावभासेपिसर्वस्याप्युत्सर्गस्यविशेषविधिनियमनिषेधविध्या
काङ्क्षानियमेनतल्लाभेवाक्यैकवाक्यतातयोः।तदलाभेतुस्वार्थएवपर्यवसानम्।एकवाक्यताचेत्थं यतोमाठरायतक्र
मतस्तदतिरिक्तेभ्योदधीत्येवेतीत्यलम्।नचात्यन्ताभावार्थकनञःक्रियाभावबोधकत्वे।नक्रोधोनचमात्सर्यंनलोभोनाशु

आमतिः। भवन्तिकृतपुण्यानांभक्तानांपुरुषोत्तमे। इत्यादावनेकनञांवैयर्थ्यमनन्वयश्चेतिवाच्यम्। प्रत्येकंतद्भवनाभा
वस्यसमुदितानांचभवनाभावस्यबोधनायानेकनञांभवन्तीतिबहुवचनस्यचसत्वात्। तत्रप्रत्येकंभवतीत्यध्याहारः। भ
वन्तीत्यत्रचैतेनेत्यस्यानुकर्षः। एतेन। नतंविरिञ्चोनभवोनलक्ष्मीर्नधनाधिपः। दातुमर्हन्तिविभवंविष्णोराराधनेनयद्
इत्यपिव्याख्यानम्। समुदितानांबलवत्त्वेपिदानयोग्यत्वाभावप्रतिपादनायबहुवचनंसमुदितानांवैमत्येनादातृत्वेपिप्र
त्येकंदातृत्वाभावबोधफलकंनञनेकत्वमित्यदोषात्। मैत्रस्येदंनचैत्रस्येत्यादौआरोपितचैत्रस्वामिकत्ववदिदंमैत्रसंब
न्धीतिबोधः। यत्त्वत्रस्वत्ववान्षष्ठ्यर्थः। चैत्रस्वत्ववद्भिन्नमितिबोधइतितन्न। यन्निरूपितेर्थेयन्निष्ठेर्थेवायाविभक्तिस्तद
र्थस्यतेनैवतत्रैवान्वयौचित्येनविभक्त्यर्थस्यप्रतियोगितयानञर्थेःनन्वयात्। अन्यथाएकत्वाभाववन्तौपाककर्तारौचै
त्रावित्यर्थेनपचतिचैत्रावित्यस्यापत्तिः। एकोनद्वावितिवत्। किंचचैत्रस्येत्यादेःसंबन्ध्यन्तराकाङ्क्षायाविशेषाकाङ्क्षा
यावानियमतःसत्वेनतत्संबन्धंविनानञर्थस्यप्रतियोग्याकाङ्क्षयातत्संबन्धोवक्तुमशक्यः। स्वाकाङ्क्षानिवृत्त्युत्तरमेवा
न्याकाङ्क्षापूरणस्यौचित्यात्। एवंचकृतिर्व्यापारसामान्यंवातिङर्थइतिचिन्त्यमेव। नपचतीत्यादितस्तदभावबोधाना
पत्तेः। प्रथमान्तार्थनिष्ठस्यनियमतस्तदाकाङ्क्षस्यचकृत्यादेरेवतवप्रत्ययार्थत्वात्। अन्वयितावच्छेदकावच्छिन्नप्रतियो

गिताकत्वंचाभावेव्युत्पत्तिबललभ्यम्। नीलघटवत्यत्र घटोनास्तीत्यव्यवहारात्। पीतघटोनास्तीतिव्यवहाराच्च। ध्वनितंचेदंविरामोवसानमित्यत्र भाष्ये। अतएववायौरूपंनास्तीतिप्रतीत्यासामान्याभावसिद्धिः। विशेषाभावकूटस्यततोबोधासंभवात्। अन्वयितावच्छेदकशब्देननञर्थान्वयिविशेषणमुच्यते। यथापीतघटइत्यत्रपीतरूपम्। प्रतियोगितावच्छेदकंचतत्रापिघटत्वमेव। विशिष्टबोधेविशेष्यवृत्तिधर्मस्यैवप्रतियोगित्वादाववच्छेदकत्वात् तदवच्छिन्नाप्रतियोगिताचपीतेत्यादिविशेषणबलात्पीतघटव्यक्तिनिष्ठैव। विशिष्टंचप्रधानान्नात्यन्तमतिरिक्तम्। सर्वथातिरिक्तत्वेतुवैशेषिकाणांपदार्थविभागन्यूनतापत्तिः। अतएवाभियुक्तैरन्वयितावच्छेदकेत्युक्तंनतुप्रतियोगितावच्छेदकेति। यथाघटपदादीनांघटत्वादिनाशक्तावपिप्रकरणादिनाकासांचिदेवव्यक्तीनांबोधस्तथाप्रकृतेविशेषणबलात्। एवमाधारतावच्छेदकावच्छेदेनाभावान्वयः। घटेपीतघटत्वाभावइत्यव्यवहारात्। एवंनीलघटोनघटइत्यपिन। आरोपितघटत्वस्यतत्राभावात्। अज्ञानशब्दः धर्मशब्दइवविरोध्यर्थकोनञ्। तेनभावपदार्थएवससविषयइत्यन्यत्रविस्तरः। अभावपदेचविरोध्यर्थकएवसः। भावविरोधीत्यर्थः। एवंचाभावस्यभावप्रतियोगिकत्वमेव। भावाभावइत्यादिव्यवहारोवर्वराणामप्रामाणिकएव। घटाभावोनास्तीत्यादौतत्कर्तृकसत्तायास्वाभावप्रतियोगित्वम्॥ एवमेवनासहस्रंदरस्तत्रास्तेइत्यादावपिबोध्यम्। येननाप्राप्तेनाऽविष्णुःपृथिवीपतिरि

स्यादौ नञ्द्वयस्य प्रकृतार्थगतदार्ढ्यद्योतकत्वम्। तदुक्तं विनञ्भ्यामिति सूत्रे भाष्ये द्वौ प्रतिषेधौ प्रकृतमर्थं गमयतः न नसह सहैवेति। यद्वाऽविष्णुः पृथिवीपतिर्न भवतीत्यन्वयः मथ्नामि कौरवशतं समरे न कोपादित्यादौ काकुसहकारेण नञा मथनादिगतं निश्चितत्वं द्योत्यते। तदेवाभिलप्यते मथ्नाम्येवेति। शशशृङ्गं नास्तीत्यादौ बौद्धप्रतियोगिप्रसिद्धेः सत्त्वान्न दोषः। वन्हित्वेन घटो नास्तीत्यादावप्रसिद्धप्रतियोगिकाया अप्यभावबुद्धेः सोन्दडादिभिः स्वीकाराच्च। अत्रेदं बोध्यम्। प्रतियोग्यारोपोऽभावज्ञाने तद्व्यवहारे च हेतुः प्रतियोग्यनालिङ्गिताभावबुद्धेरभावात्। सर्षपे सुमेरुभेदतदत्यन्ताभावयोर्व्यवहाराभावाच्च। न च न नेत्यत्र तदनालिंगिताभावबोधो भाष्ये स्वीकृत इति वाच्यम्। तादृशभाष्याप्रसिद्धेः। नञ्सूत्रे न न एकं प्रियमिति भाष्ये प्रयुक्तम्। तस्य च नोऽस्माकमेकं प्रियं नेत्यर्थः कैयटे नोक्त इति प्रतियोग्यालिङ्गितैव तत्राभावबुद्धिः। तथा आबाधे चेति सूत्रे भाष्ये ननेति द्वित्वे उदाहृतं तदपि न न जागर्ति इत्येकदेश इति कैयटेन व्याख्यातम्। एवमन्यदपि भाष्ये यद्दृश्यते तदा तदप्येवमेव व्याख्येयमिति सूचितम्। किंच विपरीतं नञ्सूत्रे भाष्ये नेत्युक्ते संदेहः स्यात्कस्य पदार्थो निवर्तत इति ग्रन्थेन नित्यं प्रतियोग्याकाङ्क्षैव दर्शिता। एतदेवाभिप्रेत्य नञ्सूत्रे भाष्ये उक्तं ब्राह्मणदृष्टगुणस्य गौरत्वादेर्दर्शनाद्दुष्टोपदेशाद्वा अब्राह्मणे पूर्वं ब्राह्मणोयमित्यध्यवस्यति ततः पश्चादुपलभते नायं ब्राह्मणस्ततोऽब्राह्मणोयमिति प्रयुङ्क्ते। आतश्च तद्दृष्टगुणदर्शनाद्दुष्टोपदेशाद्वा।

ब्राह्मणत्वाध्यवसायपूर्वकमेवायंनब्राह्मणइतिज्ञान नह्ययंकालवर्णमापणेआसीनंदृष्ट्वाध्यवस्यतिब्राह्मणोयमितियथास्थितंवस्तुतत्त्वंतस्यनिर्ज्ञातंभवतीतितदारोपाभावान्नतदभावज्ञानंतत्रेतिब्राह्मणाब्राह्मणशब्दयोरुभयोरपितत्रप्रयोगाभावइत्यर्थकम्।एतेनप्रतियोग्यारोपस्यान्वयव्यतिरेकाभ्यांस्पष्टमेवाभावज्ञानेकारणतोक्ता।एतदेवाभिप्रेत्यारोपितरजतत्वायामेवशुक्तौनेदंरजतमितिप्रतीतिरिति लीलावत्युपायेउक्तम्।अतएवप्रतियोग्यधिकरणाभ्यामभावोनिरूप्यतेइतिवृद्धाः।अधिकरणपदेनचसन्निधानात्प्रतियोग्यारोपाधिकरणमेव।तदेवच्चाभावाधिकरणम्।आरोपस्यैवशब्दप्रयोगकारणत्वाद्द्वयोरपितदारोपविषयस्यैवप्रतीतेरारोपितत्वमेवनञर्थइतियुक्तम्।अत्रब्राह्मणोनास्तीत्यादावपि एतद्देशाधिकरणिकारोपिताब्राह्मणकर्तृकासत्तेस्यैवबोधः।आर्थस्तुतदभावबोधः।अतएवतत्रतत्सदृशेतरसत्ताप्रतीतिः।अतएवनननएकंप्रियमित्यादौस्वसंबन्ध्येकप्रियनिषेधेनैकप्रियप्रतीतिरितिभाष्येउक्तम्।एवंचयत्रतादात्म्यारोपस्तत्रारोपितत्वंनामार्थगतम्।यत्रसंसर्गारोपस्तत्रक्रियागुणगतंतदितिव्यवस्था।इदमेवयुक्तम्।अन्यथानकलञ्जंभक्षयेदित्यादावनुपपत्तेः।यदिकलञ्जभक्षणाभावःप्रेरणाविषयइतिबोधस्तदाप्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभङ्गः तस्मादारोपितंकलञ्जभक्षणंप्रेरणाविषयइतिबोधः। अनिष्टसाधनत्वंबुध्यतेइतितुविधिवादेदूषयिष्यते।अतएव।तत्सादृश्यमभावश्चतदन्यत्वंतदल्पता।

अप्राशस्त्यंविरोधश्चनञर्थाःषट्प्रकीर्तिताइत्यभियुक्तवाक्येसादृश्याद्यार्थिकार्थेषुअभावभेदयोर्गणनमितिदिक्।यत्तुप्रमायांगुण
स्यकारणत्वानुरोधेनप्रतियोग्यारोपस्याभावप्रमायांहेतुत्वमितितन्न।प्रमायागुणजन्यत्वेमानाभावात्।चक्षुर्गतपित्तदोषाभावेश
ङ्खेश्वैत्यप्रमातत्सत्त्वेन।तद्वत्मण्डूकवसाञ्जनाभावेवंशप्रमातत्सत्त्वेनेत्यन्वयव्यतिरेकाभ्यांतत्तत्प्रमायांतत्तद्दोषस्यप्रतिबन्ध
कतायाएवकल्पनात्।सत्यांसामग्र्यांकार्यविरोधित्वमेवप्रतिबन्धकत्वम्।आरोपेगुणत्वाभावाच्च।प्रत्यक्षेनिर्दुष्टेन्द्रियसन्निक
र्षादेःशाब्देआप्तोक्तशब्दज्ञानस्यगुणस्यसत्त्वाच्च।यत्तुअघटइत्यादौसमासेषष्ठ्यापत्त्याद्यभावाद्घटभिन्नइत्येवबोधः।अ
वर्षाहेमन्तोनर्थःस्त्रीत्यादौहेमन्तादिगतलिङ्गंतुन।लोकाश्रयत्वाल्लिङ्गस्य।आसइत्यादौसर्वनामकार्यंत्वएतत्तदोःसुलोपोको
रनञ्समासामासइतिज्ञापकेनपूर्वपदार्थप्राधान्येप्युत्तरपदार्थप्राधान्यप्रयुक्तकार्यज्ञापनात्।अतएवात्वंभवसीत्यादौपुरुषव्यवस्था
अनेकमन्यपदार्थेइत्येकवचनंतुविशेष्यभूतसुबित्यस्यैकवचनान्तत्वात्।सेव्यतेनेकयेत्यत्रापियोषयेतिविशेष्यानुरोधादेकवच
नम्।अतएवपतन्त्यनेकेइत्यादौबहुवचनमपि।नञोद्योतकत्वेनभिन्नोपितच्छब्दाद्यर्थइतितुनयुक्तम्।द्योत्यार्थस्यविशेषणता
याएवभाष्यसंमतत्वादितितन्न।ताभ्यांभिन्नोस्तीत्यर्थकेऽतौस्तइतिप्रयोगेद्विवचनानापत्तेरेकवचनापत्तेश्च।किंचविशेष्यानुरो
धादनेकमित्यादावेकवचनेऽवर्षाहेमन्तइत्यादावप्येकवचनापत्तेः।स्वगतान्यसंख्यासत्त्वेविशेष्यगतसंख्ययावचनंभवती

त्यनुशासनाभावाच्च।पतन्त्यनेकेइत्याद्यसाध्वेव।एकेनैवानेकशब्देनसकलार्थप्रतीतेरनेकानेकशब्दप्रयोगाप्राप्त्याऽनेकोऽर्थोगजोऽश्वइत्यर्थादेकशेषेणबहुवचनमित्यपास्तम्।किंचविशेष्यबोधकरथादिपदानापृथग्विभक्तित्वेएकस्यैवानेकपदस्यावृत्त्यान्वयइत्येकशेषानुपयोगः।तेषांद्वन्द्वनिर्देशेपिसमुदितएकस्यैवान्वयसंभवात्तदनुपयोगएव।एतदेवाभिप्रेत्यभाष्यइदंखल्वपिभूयउत्तरपदार्थप्राधान्येसंगृहीतंकिमनेकमित्यत्रैकवचनम्।आरोपितैकत्ववद्बोधाद्बहूनांसंप्रत्ययइतिउक्तम्ः अनेकस्तिष्ठतीतिभाष्योदाहृतविशेष्यादर्शनाच्च।अनेकोजनाआगताइत्यस्यसाधोरसाधुतापत्तेश्च।अनञ्समासेइत्यनेनोत्तरपदार्थप्राधान्यस्यैवज्ञापयितुमुचितत्वाच्चेतिदिक्।नक्वचिदस्तीत्यादौनक्वाप्यस्तीत्यर्थः।पूर्वनञ्समभिव्याहृतक्वचिदादिपदान्तर्गतचिदित्यस्याप्यर्थ त्वात्।अतएवनङिसंबुद्ध्योरितिसूत्रेभाष्येनक्वचिन्ङिलोपेनलुप्यतेइत्यस्यसर्वत्रलुमतेवलुप्यतइतिप्रतिनिर्देशःकृतः क्वचिन्नेत्यादौतुनिर्द्धारितविशेषावच्छिन्नैकस्मिंश्चिदेवाभावःप्रत्याय्यते।स्रजंनकाचिद्विजहौजलाविलामित्यत्रापिकापिनविजहावितिप्रतीतौसर्वानविजहुरितिविरुद्धप्रतीत्यादुष्टत्वम्।जलक्रीडावर्णनेकस्याश्चिदेकस्याएवतथावर्णनेकवितात्पर्यात्॥एवकारोऽवधारणे।एवेचानियोगइतिवार्त्तिकेनियोगोऽवधारणमितिकैयटाद्युक्तेः।अस्यादेवासंभवाद्यपितदर्थः।अवधारणंज्ञानविशेषः।सचैवकारद्योत्यएवसमभिव्याहृतेविशेषणम्।तच्चपार्थएवधनुर्धरइत्या

ोविशेष्यसंगतेस्वातिरिक्तावृत्तित्वेनगृहीतसमभिव्याहृतपदार्थप्रकारकज्ञानरूपंपार्थेविशेषणम्।अवधारणविशेष्यःपा
ोधनुर्द्धरइतिबोधः।साधारण्येनधनुर्द्धरत्वज्ञानवन्तंप्रतितद्भ्रमनिरासायैवंप्रयोगात्।तदन्योनधनुर्द्धरइतितुफलति।क
चित्स्पष्टत्वार्थंतत्प्रयोगोपियथात्वन्मुखेनैवतुल्यंनान्येनकेनचिदिति॥आर्थ्यावृत्त्यालब्धस्यशब्देनप्रतिपादनेपौन
रुक्त्याभावस्यालंकारिकैरुक्तत्वात्।लवणमेवासौभुङ्क्तेइत्यादौप्राचुर्याद्यर्थकस्यघटएवप्रसिद्धइत्यादावप्यर्थकस्यके
ोक्ष्यसेइत्यादावसंभवार्थकस्यचतस्यसत्त्वेनतदर्थकत्वव्यावृत्तयेतदुक्तेश्च।शङ्खेपाण्डुरत्वमेवेत्यादौस्वातिरिक्तरू
नाश्रयत्वेनगृहीतसमभिव्याहृतप्रकारकज्ञानरूपमवधारणंशङ्खेऽनेकरूपवत्त्वज्ञानवन्तंप्रत्ययंप्रयोगः।एवमग्रे
ूह्यम्।शङ्खः पाण्डुरएवेत्यादौविशेषणसंगतेस्वातिरिक्तरूपानाश्रयसमभिव्याहृतपदार्थविशेष्यकज्ञानरूपंतत्।
वधारणप्रकारपाण्डुराभिन्नःशङ्खइतिबोधः।क्रियासंगतेचैत्रोहसत्येवेत्यादौस्वातिरिक्तबुद्धिस्थक्रियानाश्रयसम
व्याहृतपदार्थप्रकारकज्ञानरूपंतत्।नरोदितीतिप्रतिनिर्देशात्।नीलंसरोजंभवत्येवेत्यादौनीलभवनाद्यभावानधिक
समभिव्याहृतप्रकारकज्ञानरूपंतत्।नभवतीतिनेतिप्रतिनिर्देशात्।ज्ञानमर्थंगृह्णात्येवेत्यादाववच्छेदकावच्छेदेना
हणाद्यभावानधिकरणज्ञानादिप्रकारकज्ञानरूपंतत्।नगृह्णातीतिनेतिप्रतिनिर्देशात्।ज्ञानकर्तृकमर्थकर्मकमव

धारणविषयोग्रहणमितिबोधः। शीतएवस्पर्शोजलेइत्यादौशीतान्यस्पर्शाद्यनधिकरणसमभिव्याहृतपदार्थप्रकारकज्ञानरूपं तत्। नान्यः स्पर्शोजलइतिप्रतीतिनिर्देशात्। चैत्रेणैवायंदृश्यतइत्यादौचैत्रान्याकर्तृकसकलकारकविशिष्टदर्शनादिक्रियाविशेष्यकबोधरूपंतत्। घटत्वंपृथिवीवृत्त्येवेत्यादौपृथिव्यन्यावृत्तित्ववद्घटत्वविशेष्यकज्ञानरूपंतत्। नान्यवृत्तीतिप्रतीतिनिर्देशात्। अवधारणविषयपृथिवीवृत्तित्ववद्घटत्वमित्यादिप्रकारेणबोधः। ऋतौभार्यामुपेयादेवेत्यादौस्वाभावानाश्रयकारकप्रकारकज्ञानरूपंतत्। नोपेयादितिनेतिप्रतीतिनिर्देशात्। एवंचऋतुकालाधिकरणकंस्वभार्याकर्मकमवधारणविषयोगमनंप्रेरणाविषयइतिबोधः। तेनतस्यप्रत्यवायाभावरूपेष्टसाधनत्वलाभः। इष्टस्यप्रत्यवायाभावरूपत्वंतु। ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति। घोरायांभ्रूणहत्यायांपच्यतेइत्यादिवचनैकवाक्यतयाबोध्यम्। तेनऋतुकालाधिकरणकस्वभार्यागमनाभावस्यप्रत्यवायसाधनत्वंलभ्यते। सकलसाधारणमवधारणत्वमखण्डोपाधिः तेनैवरूपेणशक्तिर्बोधश्चेतिबोध्यम्। पञ्चपञ्चनखाभक्ष्याइत्यादौअवधारणविषयबुद्धिस्थवृत्तिपञ्चत्वसंख्यावतिपञ्चपदस्यलक्षणा। अवधारणंचात्रस्वातिरिक्तसंख्याधिकरणासंबन्धिसमभिव्याहृतप्रकारकज्ञानरूपम्। तेनान्येऽभक्ष्याइतिफलति। एवकारस्यतदर्थलक्षणायावाफलंतुप्रापकप्रमाणबोधितस्यतदतिरिक्तविषयत्वाभावकल्पनमितिसिद्धिः। यत्तुएवकारार्थोन्ययोगव्यवच्छेदः पृथिव्यामेवगन्धइत्यादौपृ

थिव्यामित्यस्यएवकारार्थेऽन्यत्वेगन्धेचान्वयः। पृथिव्यन्यावृत्तिः पृथिवीवृत्तिर्गन्धइत्यादिक्रमेणबोधः। विभक्त्यर्थरहितस्यापि पृथिवीपदार्थादेरन्वयोव्युत्पत्तिवैचित्र्यादितितन्न। अनेकव्युत्पत्तिवैचित्र्यकल्पनस्यान्याय्यत्वात्। तादृशेर्थेविभक्तेः साधुत्वमात्रार्थिकायाः शास्त्रेणानन्वाख्यानाच्च। विभक्तिंविनातन्त्रेणोच्चारणासंभवाच्च। पृथिवीवृत्तित्वस्यमानान्तरेणालाभाच्च। अतएवएवकारसमभिव्याहृतेतेनविधेयतायांतात्पर्यंकिंत्वाश्र्यामन्यनिवृत्तावेवेतितान्त्रिकाः। एवंचएवकारसमभिव्याहारेपि आर्थ्यैवपरिसंख्या। साचोपात्तातिरिक्तेसमभिव्याहृतपदार्थाभावप्रत्ययरूपा। यथापार्थएवधनुर्धरइत्यादौनान्योधनुर्धरइति। सचनैवकारघटितवाक्यार्थः किंतुआर्थएवउक्तरीतेः। शाब्दीतुत्वन्मुखंवत्वन्मुखेनैवेत्यादौपञ्चपञ्चनखाभक्ष्याइत्यादावप्युक्तरीत्याआर्थ्यैवपरिसंख्या। अतएवयुष्मद्युपपदेइत्यादौनियमार्थोयमारम्भः। युष्मदिमध्यमएव युष्मद्येवमध्यमइतिचेतिभाष्येउक्तं तेनहिनियमशास्त्राणामेवकाराभावेपितदर्थान्तर्भावेणबोधकत्वंसूचितम्। यत्तुपञ्चपदस्यपञ्चातिरिक्तेलक्षणाभक्ष्यपदंभक्ष्यत्वाभाववतितेनपञ्चातिरिक्ताभक्ष्यत्वाभाववन्तइतिबोधइतितन्न। पदद्वयेलक्षणापेक्षयाउक्तप्रकारस्यैवन्याय्यत्वात्। किंचैवंशास्त्रप्राप्तस्यशास्त्रीयनियमेविकल्पवारणायसामान्यविशेषन्यायेनविधेस्तद्विषयत्वाभावकल्पनमित्यतिगौरवम्। किमासेव्यंपुंसांसविधमनवद्यंद्युसरितइत्यार्थपरिसंख्योदाहरणमितिप्रकाशादिग्रन्थासंगतेश्च। त्वद्दी

त्याहिद्युसरित्सविधांतिरिक्तसनासेव्यमितिबोधेनतस्याःशाब्दत्वात्।अतएवशाब्दपरिसंख्यायांकिंभूषणंसुदृढमत्रयशो
नरत्वमित्युदाहृतम्।भाष्यकारोपिपस्पशायामाहकिंशब्दापशब्दयोरुभयोरुपदेशःकार्यः।उतान्यतरोपदेशः।अन्यतरोपदे
शेनकृतंस्यात्।तद्यथाभक्ष्यनियमेनाभक्ष्यप्रतिषेधोगम्यते।पञ्चपञ्चनखाभक्ष्याइत्युक्तेगम्यतएतद् अतोन्येनभक्ष्याइ
ति।अभक्ष्यप्रतिषेधेनभक्ष्यनियमः।तद्यथा।अभक्ष्योग्राम्यकुक्कुटइत्युक्तेगम्यतएतदारण्योभक्ष्यइति।एवमिहापिगौरित्यु
पदिष्टेगम्यतएतद्गाव्यादयोपशब्दाइति।गाव्यादिषुचोपदिष्टेषुगम्यतएतद्‌गौरित्ययंशब्दइतीति।तत्रसुशब्दोपदेशःसाधुत्व
बोधनद्वाराप्रयोगविध्यर्थः।अपशब्दोपदेशस्तत्प्रतिषेधार्थः।अत्रगम्यतइत्युक्त्यातस्यतज्जन्यशाब्दबोधाविषयत्वंस्पष्टमेवो
क्तम्।किंचलक्षणावादिमतेदृष्टान्तदार्ष्टान्तिकयोर्महद्वैषम्यम्।नियमेनेत्यस्यचोपदेशेनेत्येवार्थःसंदर्भबलाद्गम्यते।शाब्दा
न्तरेणानुपदेशादर्थतोलाभाच्चायंनमुख्यउपदेशइतिनियमपदप्रयोगः।ईदृशइतरनिवृत्तिफलकउपदेशएवचनियमपदेनो
च्यतेइतिप्रामाणिकाः।परेतुइमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तइत्यत्रलिङ्गाद्गर्दभरशनायामपिप्राप्तस्यमन्त्र
स्यापूर्वविधिद्वारापरिसंख्या।तदुक्तंतन्त्रवार्तिके।अपूर्वविधिरेवायमतोमन्त्रश्चनिश्चितः।परिसंख्याफलेनोक्तेति।आलंका
रिकाअपिपरिसंख्याप्रमाणान्तरेणप्राप्तस्यैववस्तुनःपुनःशब्देनप्रतिपादनंप्रयोजनान्तराभावात्तत्तुल्यान्यव्यवच्छेदंग

CC-0. In Public Domain. Digitization by eGangotri

मयतीति।भागवतेपि।लोकेव्यवायामिषमद्यसेवानित्यास्तुजन्तोर्नहितत्रचोदना।व्यवस्थितिस्तेषुविवाहयज्ञसुराग्रहैरासुनिवृत्तिरिष्टेति।नित्याः।रागतःप्राप्ताः।जन्तोःप्राणिमात्रस्यातस्तत्रचोदनाविधिर्नास्ति।नन्वेवमृतौभार्यामुपेयात्हुतशेषंभक्षयेत्सौत्रामण्यांसुराग्रहान्गृह्णातीत्येषांवैयर्थ्यम्।भार्यांवि वाहिताम्।तत्राहव्यवस्थितिरितितेषुपुनःप्रापणमित्यर्थः।रागतोनित्यप्राप्तत्वात्।नैतेनियमविधयःपाक्षिक्यांहिप्राप्तौनियमोभवति।किन्तुप्राप्तस्याप्यर्थस्यपुनःप्रापणमनर्थकमित्यपूर्वविधिद्वाराअन्यनिवृत्तिःफलतितदाह।आसुनिवृत्तिरिति।भाष्येपिनियमपदेनाभ्यनुज्ञा।ऋतुस्नातांतुयोभार्यामितिदोषश्रवणंतुमनसिकामेसत्यपितस्यांदोषादिनानुपगमेबोध्यम्।एवंचऋतौभार्यामित्यस्यऋतावेवतत्रभार्यामेवतन्नतामुपेयादेवेत्यर्थत्रयेतात्पर्यम्।अतएवगृहस्थस्यानृतौअनुपगमेब्रह्मचर्यमुक्तम्।अविवाहितागमनेऋतौभार्यागमनाभावेप्रायश्चित्तंप्रोक्तंस्मृतिषु।तत्रचान्यत्रचप्राप्तौपरिसंख्येतिगीयतइत्यस्यशाब्दीआर्थीचेत्यर्थः।इजादेःसनुमइतिसूत्रेकैयटोप्याह।नियमेप्राप्तबाधःसिद्धस्यपुनरुपादानात्।अनुवाददोषश्चेति।यस्यहलइतिसूत्रेपिनियमेश्रुतार्थत्यागेनाश्रुतायाअन्यनिवृत्तेःसामर्थ्यात्परिकल्पनमुक्तानुवाददोषश्चेति।अनुपराभ्यांकृञइतिसूत्रेभाष्येपिप्रतिषिध्यतेतत्रपरस्मैपदंस्वरितञितःकर्त्रभिप्रायेक्रियाफलेआत्मनेपदंभवतीत्युक्तम्।तेनहिविधेरेवप्रतिषेधआर्थंफलमितिस्पष्टमेवोक्तम्।एवकारो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिंसत्वेस्फुटंसदर्थद्योतकएव।ननुतत्समभिव्याहारेपिशाब्दबोधेतज्ज्ञानेतत्समभिव्याहारेणमनसाबुध्यमानत्वमपिद्योतक
त्वम्।एवकारासमभिव्याहारेपिअनुवादबलादेवतदर्थलाभः।शाब्दपरिसंख्यातुलघुत्वंतल्लघुत्वेनैवतु स्त्यंनान्येनकेन
चित्।किंभूषणंसुदृढमत्रयशोनरत्नमित्यादिष्वेव।युष्मदिमध्यमएवयुष्मद्येवमध्यमइतिभाष्येणैवकारसमभिव्याहारा
समभिव्याहारयोस्तुल्यार्थत्वमेवसूचितमित्याहुः।पक्षद्वयेपिस्वार्थहानिपरार्थकल्पनाप्राप्तबाधरूपदोषत्रयंतुयथाश्रुते
प्रतीयमानेस्वार्थेतात्पर्याभावात्।तात्पर्यतस्त्यागोन्यार्थेतात्पर्याङ्गीकारेणतात्पर्यतःपरार्थकल्पनाप्राप्तबाधश्चेतिसूपपा
दम्।ननुव्रीहीनवहन्तीत्यादौपक्षप्राप्तस्यनियमेऽवहननेनैवव्रीहीन्संस्कुर्यान्ननखविदलनादिनेतिप्रतीतेस्तत्रापित्रैदो
ष्यप्राप्तमितिपरिसंख्यायास्तस्यलघुत्वव्यवहारानुपपत्तिरितिचेन्न।पक्षेस्वरसतएवतस्याप्राप्तस्याक्लृप्तबाधस्यैवबाधकल्प
नम्।परिसंख्यायांतुनित्यप्राप्तस्याक्लृप्तबाधस्यैवबाधकल्पनमितिततःपरिसंख्यायागुरुत्वात्।क्लृप्तप्राप्तिकस्यैववचप्राप्ति
बोधनेनापूर्वविधेरपिनियमस्यलघुत्वम्।अस्मच्छास्त्रेनियमस्तुआत्मनेपदविषयकेमध्यमादिविषयकेचप्रकृत्युपपद
नियमरूपः।तद्विषयेहिप्रत्ययानांपाक्षिकीप्राप्तिः।अतएवयुष्मदीतिसूत्रेउपपदनियमंप्रकृत्यसमेदेशेयजेतेतिवत्पा
क्षिक्यांप्राप्तौनियमइतिकैयटः।नचतत्त्वेभाष्योक्तप्रत्ययनियमानुपपत्तिःप्रत्ययनियमस्यपरिसंख्यात्वेनगुरुत्वादि

तिवाच्यम्। एतदनपेक्ष्येतरत्फलमस्तिनवेत्येतावन्मात्रेणप्राप्तबाधसत्त्वेनद्वयोःसमतामाश्रित्यभाष्येविचारसत्त्वेनादोषात्
।एवंचपञ्चपञ्चनखाइत्यादेःपनिःसमासएवेत्यादेश्चविधिमुखेनैवप्रवृत्तिः।अवधारणविषयत्वबोधात् पुनरनुवादा
द्वारासामान्यप्रापकप्रमाणस्यतदतिरिक्तविषयकत्वरूपःसंकोचः।तेनचआर्थस्तत्कार्याभावः।तमादायनियमशास्त्रस्यनि
षेधत्वव्यवहारः नान्यत्रेत्यादिप्रतिनिर्देशश्चेत्यन्यत्रविस्तरः॥ ॥इतिधात्वर्थनिपातार्थनिर्णयः॥ ॥ छ ॥ छ ॥

श्रीगणेशायनमः॥ धातुप्रकृतिकतिङांकर्तृकर्मरूपआश्रयोर्थः॥ तत्रकर्तरि।व्यापाराश्रयःकर्मणि।फलाश्रयः॥ धात्वर्थमात्रानु
वादकस्तुभावेतिङ्॥ लःकर्मणिचभावेचाकर्मकेभ्यइतिसूत्रात्॥ चेनतत्रकर्तुरनुकर्षः॥ आश्रयत्वंचाखण्डशक्यतावच्छेद
कम्॥ तस्याश्रयनिरूपकसंबन्धभेदाद्भेदेप्याश्रयतात्वेनानुगमान्नशक्त्यानन्त्यम्॥ नचाश्रयःप्रथमान्तपदलभ्यः॥ आश्रय
तात्वेनालाभात्॥ वस्तुतःकर्तृत्वादिशक्तिमत्त्वेनैवसप्रत्ययार्थः॥ साशक्तिश्चाश्रयनिरूपकभेदेपिएकैवेतिगत्यर्थलोटेतिसू
त्रेकैयटः॥ तन्नसप्तमीपञ्चम्यौकारकमध्येइतिसूत्रभाष्यतत्रत्यस्वग्रन्थविरोधात्॥ तस्मात्तद्भेदाद्भिन्नैवसा॥ कर्तृत्वत्वे
नचानुगमइत्येवतत्त्वम्। यत्तुकृत्याश्रयस्यकर्तृत्वेनतत्रशक्तौशक्यतावच्छेदकगौरवात् कृतिरेवशक्या॥ नचकर्तरिकृदित्य
तोनुवर्तमानस्यकर्तृपदस्यकृतिपरत्वेवैषम्यम्। शानजादौसत्त्वभूतोभावोर्थः। भूयतेइत्यादौतिङन्तेःसत्त्वभूतःसइतिवैष
म्यस्यतवापिसत्त्वेनास्यवैषम्यस्यादोषत्वात्॥ कृतित्वंचजातिरूपंशक्यतावच्छेदकम्। पचतिपाकंकरोतीतिधात्वर्थात्पृथ
ग्विव्रियमाणत्वेनतस्याधात्ववाच्यत्वात्॥ तस्मात्तदतिरिक्तव्यापारएवधातुशक्यः॥ रथोगच्छतिजानातियतते इत्यादावा
श्रयत्वेलक्षणा॥ वर्तमानत्वाद्यन्वयस्तुसर्वत्रधात्वर्थएवकर्माख्यातप्रत्ययस्याश्रयत्वेशक्तिः फलंतुधात्वर्थइत्याहुस्तन्न॥
लस्यतावच्छेदकत्वस्यैवशक्यतावच्छेदकत्वस्यापिगुरुणिस्वीकारेबाधकाभावात्। अन्यूनानतिरिक्तवृत्तित्वरूपस्य

वच्छेदकत्वस्यगुरुण्यपिसत्त्वात्॥अवच्छेदकत्वस्यातिरिक्तपदार्थत्वेमानाभावात्॥स्वरूपसंबन्धस्तत्तत्स्वरूपमेवेति गुरु
धर्माणामपिसत्त्वान्नकिंचित्कल्प्यम्॥अस्तुवासंभवतिलघौगुरौनावच्छेदकत्वमितिपरंतुयत्रलघुगुरुरूपाभ्यांबोधेनिर्वि
वादस्तत्रैवलघुधर्मावच्छिन्नेशक्तिर्गुर्ववच्छिन्नेलक्षणेतियुक्तम्।प्रकृतेचप्रत्ययात्कृतित्वेनबोधःसविवादः।धातुतएव
तद्बोधात्॥किंचेदंगौरवम्गुरुतरभारोद्वहनमिवशरीरस्यचित्तस्यवाखेदजनकम्।कर्तृपदादेस्तथाशक्तिग्रहेगतदननु
भवात्॥विशेष्यस्यानेकत्वेपितद्खेदवत्शक्यतावच्छेदकानेकत्वेपितद्खेदात्॥अतादृशस्यतुनदुष्टत्वंबीजाभावात्॥
नचेतएवानुपपत्तेर्जातौशक्तिः॥तच्छक्तिज्ञानस्यजातिव्यक्त्युभयविषयकज्ञानत्वकार्यतावच्छेदकमित्यङ्गीक्रियतेइति
नदोषइतिवाच्यम्॥सकलव्यक्तीनामानन्त्येनकार्यतावच्छेदककोटौनिवेशासंभवात्॥एवंचगोव्यक्त्यन्तरबोधानापत्तिः
॥ईदृशकारणताज्ञानस्यावश्यकत्वात्॥अन्यथागोत्वेनाश्वादिबोधस्याप्यापत्तेरित्यग्रेवक्ष्यामः॥विवरणेधातोःपृथग्वि
वरणंतुतत्राख्यातप्रत्ययार्थसंख्याकालकृतीनांमध्येकृतेःकृधातुनासंख्यादेस्तदुत्तरतिङाविवरणवद्धात्वर्थकृतेरप्युपपन्न
मितिनतत्प्रत्ययार्थत्वसाधकम्॥प्रत्युतप्रकृतिभूतकृञाविवरणात्पचतीत्यत्रापितस्याःप्रकृत्यर्थत्वमेवयुक्तम्।तथा
विवरणंतुसतिसंभवेसर्वत्रतस्याःप्रकृतिवाच्यतांबोधयितुम्॥किंचकृञ्व्यापारसामान्यार्थएवनयत्नमात्रार्थः॥वातरोगा

दिनाकम्प्यमानेनाहंस्पन्दंकरोमीतिव्यवहारस्तुव्यापारमध्येकृतेरपिप्रवेशात्तदभावेनसमुदायाभावतात्पर्यकः॥काष्ठानिपा
कंकुर्वन्तीत्यादौतद्धिहितव्यापारस्यैवात्रतस्याएवधात्वर्थत्वाद्वा॥एवमेवाङ्कुरोनकृतोबीजादिनाकृतइत्याद्युपपत्तिः
॥अतएवकथंज्ञायतेक्रियावचनाःपचादयइतियदेषांकरोतिनासामानाधिकरण्यंकिंकरोतिपचतीतिभूवादिसूत्रेभाष्ये
उक्तम्॥अनेनविवरणमपिधातोरेवेतिकृभूव्यापारसामान्यवाचीतिचस्पष्टमेवोक्तम्॥नचतवाख्यातार्थाश्रयप्रकारकबो
धंप्रतिप्रथमान्तपदजन्यबोधोहेतुः।तदर्थसंख्याप्रकारकबोधेतदर्थाश्रयज्ञानंहेतुः॥तदर्थकालप्रकारकबोधेधातुजज्ञानंहेतु
रितिकार्यकारणभावत्रयम्।ममतुकालेष्टसाधनत्वाद्यतिरिक्ताख्यातार्थबोधेप्रथमान्तपदजन्यज्ञानंहेतुरितिसंख्याभावनयो
रेकइतिवाच्यम्।आख्यातत्वाद्यजाननतईदृशकार्यकारणभावग्रहासंभवात्॥किंच॥आख्यातेनक्वचित्कृतेःक्वचिदाश्रयत्व
स्यबोधः।कृतेःक्वचिद्धातुनाक्वचित्प्रत्ययेनबोधइत्यर्थस्यपर्यवसितत्वेनतवमतेऽनेकक्लिष्टकार्यकारणभावापत्तेः॥नत्विष्ट
त्वस्यनुसारेणतथाबोधस्यतेषांतेषांजायमानत्वेनतथातथाकार्यकारणभावानांसर्वेषामावश्यकत्वेनतल्लाघवगौरवविचार
स्यायुक्तत्वाच्च॥किंचकृतौशक्तिर्वृक्षोवर्धतेरथोगच्छतीत्यादावाश्रयत्वेलक्षणेत्ययुक्तंवृद्धिगमननिरूपिताश्रयत्वेनवृक्षरथ
निष्ठेनकृतेःसंबन्धाभावात्॥यथाकथंचित्परंपरासंबन्धस्योपपादनेपितज्ज्ञानपूर्वकंबोधस्याननुभवात्॥परंपरासंबन्धस्य

स्य तन्मते नुपपत्तिः।तिङर्थाभिन्नत्वं हि तिङ्सामानाधिकरण्यम्॥तिङर्थसंख्यान्वयिवाचकत्वादेर्यौगिकसामानाधिकरण्यलक्षणानियामकत्वाभावाच्च॥अतएव काव्यप्रकाशकृता प्रयोजनेन लक्षणासंबन्धाभावादित्युक्तम्॥अर्थनिर्देशे वैयर्थ्यापत्त्या व्यत्ययानुशासनादिवैयर्थ्यापत्त्या च विभक्तौ लक्षणानौचित्याच्च॥अर्थनिर्देशस्यान्यार्थेऽसाधुत्वबोधनफलकत्वेन लक्षणयान्यार्थेऽन्यशब्दमात्रस्यासाधुत्वाच्च॥किंच युष्मद्युपपदे इति सूत्रोक्तस्यक्षुष्यनुभवसिद्धसामानाधिकरण्यस्य तन्मतेऽनुपपत्तिः।तिङर्थाभिन्नत्वं हि तिङसामानाधिकरण्यम्॥तिङर्थसंख्यान्वयिवाचकत्वादेर्यौगिकसामानाधिकरण्ये शब्दावाच्यत्वात्॥यत्तु पचतीत्येतावन्मात्रोक्तावपि कर्तर्येकत्वसंशयानुत्पत्त्या तत्र लक्षणावश्यकत्वेन लक्षितेन सामानाधिकरण्यमिति तन्न॥शक्तेरेवोचितत्वात्॥अन्यथा विशिष्टशक्त्युच्छेदः॥कृतिमात्रबोधस्य क्वाप्यभावाच्च॥किंचैकः पचतीति वदने कः पचतीत्यस्यापि सत्त्वेन पचतीत्येतावन्मात्रोक्तौ तत्संशयस्येष्टत्वात्॥किंच॥युष्मदस्मच्छेषरूपकर्तृकर्मणोस्तिङर्थसंख्यान्वयिनोर्यौगएव प्रथमादीनां तन्मते साधुत्वेन तत्र संख्यान्वये नैव तत्संदेहानुत्पत्तेः॥अतएव पचतीत्येतावन्मात्रोक्तौ कः कीदृश इति प्रश्नो देवदत्तो घनश्याम इत्युत्तरं च स्वरसतः संगच्छते॥किंच पचअजर्घाः।अचकादित्यादौ प्रत्ययस्य लोपेन यत्नकालसंख्यानां धातुवाच्यत्वावश्यकत्वेनात्र प्रत्ययशक्तिकल्पने गौरवम्।प्रत्ययद्योत्यत्वे तु यत्नस्य विशेषणतापत्तिः॥किंच तवाभिधानानभिधानव्यवस्थानुपपत्तिः।संख्यानभिधान इत्यर्थे चैत्रः पक्ते त्यादौ तृतीयापत्तेः।न च कृतामपि संख्यावा

च्या अनुशासनाभावेपिस्वभावात्तद्वाचकत्वाङ्गीकारेक नैरिक्तादित्यादेर्वैयर्थ्यम्। स्वभावेनैवतद्वाचकत्वस्यापिसंभवाच्च। अर्थ
बोधकानुशासनानांनियमार्थत्वेनतस्यासाधुतापत्तेश्च। प्रत्ययशक्तिग्राहकतायाः क्वचित्त्वकृतिशक्तिग्राहकतायाश्च व्याकर
णमात्रेसत्त्वाच्च। शक्तिग्रहंव्याकरणोपमानेत्यादिनावृद्धोक्तशक्तिग्राहकेष्वत्रकस्यापिसंभवाभावाच्चेतियत्किंचिदेतत्। सं ९
रव्याकर्त्राद्यन्यतरानभिधानेइत्यर्थेगौरवंदुर्ज्ञेयत्वंच। तद्भिन्नाभिन्नत्वस्यैवान्यतररूपत्वात्। किंचविङ्विधावुपस्थितस्य
द्व्येकयोरित्यस्यार्थः लकारार्थसंख्यैकत्वादावित्यर्थः उक्ततिङुपात्तभावनान्वयिगतैकत्वादाविति। आद्येसिद्धंनइष्टम्। अन्त्येए
तद्विधेयतिङन्तदर्थानांचैतद्वाक्ये उद्देश्यत्वानुपपत्तिः। अस्मदादीन्प्रत्ययस्यैवव्याकरणस्यतदर्थशक्तिग्राहकत्वात्। ननुतिङ्वा
च्यकारकवाचिनीतित्वदीयानांव्याख्यानेपिकथंतस्योद्देश्यकोटौनिवेशः। सर्वैकवाक्यतयातिबादिसूत्रस्यविधायकत्वमि
तिसिद्धान्तेमानान्तरेणालाभात्। नचतिङ्पदेनस्वस्थानीलकारोलक्ष्यतेलकारवाच्यकारकवाचिनीत्यर्थइतिनदोषइति
वाच्यम्। परमत्वंपचसित्वत्कल्पः पचसीत्याद्यसिद्ध्यापत्तेः। अत्रहित्वत्कल्पशब्दस्यतद्वाचकत्वेपियुष्मच्छब्दस्यतत्त्वा
भावात्। युष्मदस्मदितिविशिष्टरूपपरिग्रहादस्यचशब्दान्तरत्वादितिकैयटोक्तेश्च। नचयुष्मदीत्येतत्तैसान्यालक्षणयायु
ष्मद्वतीत्येतदर्थकमितिवाच्यम्। अतित्वंभवतीत्यत्रमध्यमापत्तेः। स्पष्टंचेदंभाष्येइतिचेन्न। युष्मदिसाधनेइत्येवंभविष्यती

तिभाष्यएवसमाधानात्।युष्मदर्थेनयत्रलान्तस्यसामानाधिकरण्यंतत्रमध्यमइतिसूत्रार्थेनतल्लाभइतिकैयटः॥एवंचलवाच्यसाधनसमानाधिकरणयुष्मदर्थप्रतिपादकशब्देउपपदेमध्यमइतिसूत्रार्थः।सामानाधिकरण्यंचतदर्थप्रवृत्तिनिमित्तयोर्बोध्यम्।परेतुयुष्मादिक्रियासमानाधिकरणेइतिव्याख्यानंक्रियाक्रियावतोरभेदात्तत्सुलभम्।इदमग्रेसंख्याप्रकरणेस्फुटीभविष्यति।अतएवकैयटेलान्तस्येत्युक्तमन्यथालस्येत्येववदेदित्याहुः।नचव्याकरणंसाधुत्वमात्रतात्पर्यकंनार्थव्यवस्थापकमितिवाच्यम्।व्याकरणंशक्तिग्राहकमितिवृद्धोक्त्यसंगतेः।अर्थविशेषपुरस्कारेणैवसाधुत्वस्यभाष्यसंमतत्वाच्च।पदसमयज्ञानार्थंव्याकरणमितिन्यायभाष्योक्तेश्च।तदुक्तंहरिणा।भेद्यभेदकसंबन्धोपाधिभेदनिबन्धनम्।साधुत्वंतदभावेपिबोधोनेहनिवार्यतइति।किंचैवंकृतामपिकर्तृवाचकत्वानापत्तिः।नचमित्रावश्चीतिविशेष्यसमानलिङ्गकत्वदर्शनात्कृतिकर्तावाच्यइतिवाच्यम्।वेदाःप्रमाणंगावोधनमित्यादौसामानाधिकरण्येभिन्नलिङ्गत्ववत्क्वचिद्वैयधिकरण्येपिसमानलिङ्गत्वस्वीकारेबाधकाभावात्।अतएवभाष्येपठ्यतेलिङ्गमशिष्यंलोकाश्रयत्वाल्लिङ्गस्येति।केवलकृतौप्रयोगस्तुपक्काजातइत्यादिरस्त्येव।नचकृतिकृतेर्वाच्यत्वेचैत्रेगन्तेत्याद्यापत्तिः।आख्यातार्थकृतेःप्रथमान्तपदोपस्थाप्यइवकृदर्थकृतेःकृदन्तसमानविभक्तिकनामार्थएवाश्रयतयान्वयस्वीकारेणादोषात्।अन्यथातवचैत्रेपचतीत्यादेरा

पत्तिः।विपरीतंकेवलकृतौतिङन्तप्रयोगाभावेनतिङामपितत्रशक्त्यसिद्धिः कृत्यनभिधानेनैवचतृतीयाव्यवस्था।भोक्तातृप्यतीत्यादौकृतः कर्तरिलक्षणात्तु।तस्मादभेदान्वयानुभवएवकृत्सुकर्तरिशक्तौप्रमाणंवाच्यम्।एवंचकर्तृष्वनुभवसिद्धाभेदान्वयादाख्यातप्रत्ययस्यापिधर्मिवाचकत्वसिद्धिः।किंचकर्माख्यातेतवकृतेराख्यातार्थत्वाभावेनतृतीयान्तासमभिव्याहृतेकिंक्रियतइतिप्रश्नेपच्यतइत्युत्तरानापत्तेः।कृञस्तवयत्नार्थत्वात्।तत्रकृतेरप्याख्यातार्थत्वेतुकृत्यभिधानेनाभिधानापत्तौकर्तरितृतीयानापत्तेः।कर्तृकरणयोरितिसूत्रेकर्तृसंख्ययोरिवकृतेरप्युपस्थितत्वात्।किंचकरोतीत्यादौकालान्वयस्यधात्वर्थेङ्गीकारेणपचतीत्यादौत्वाख्यातार्थेतदन्वयेनकार्यकारणभावद्वयापत्तिः।ममतुसर्वत्रधात्वर्थएवान्वयइतिनदोषः।किंचकृतौकालान्वयेपाकशालायांकाष्ठज्वलनाद्यनुकूलेयत्नेनष्टेपच्यमानमोदनंपक्ष्यतिदेवदत्तेपचतीत्यनापत्तिः।ममतुपाक्यवस्तुनिष्ठविक्लित्तिविशेषानुकूलस्यपाकशालावस्थानरूपव्यापारस्यधात्वर्थस्यविद्यमानत्वान्नदोषः।अपिचपाचकइत्यादेःपचतीत्यादिविवरणादाख्यातस्यापिकर्त्रर्थकत्वमावश्यकंविशेष्यविशेषणभावव्यत्यासेपिचित्रगुरित्यादेश्चित्रागावोयस्येतिविवरणवन्नदोषः।वस्तुतःसमानएवविशेष्यविशेषणभावोकृत्यर्थोपदर्शकेवाक्येइत्यग्रेनिरूपयिष्यामइतिदिक्।एतेनयत्नातिरिक्तःफलानुकूलोव्यापारोधात्वर्थः।।यत्नआख्यातार्थःसचलिङ्येव।।नान्यत्र।।अप्रतीतेः।।धात्वर्थेकारकान्वयःकाष्ठैःपाकइतित्विष्टमेवेतिस

मन्वयसूत्रेवाचस्पत्युक्तंगुरुमतमप्यपास्तम्।। यदपिकर्त्रधिकरणेनव्यमीमांसकाः फलावच्छिन्नव्यापारानुकूलःकृत्यादि
शाख्यातार्थःसचव्यापारत्वेनैव। कृत्यादिव्यापारस्तुविशेष्यत्वानुरोधात्तिङ्वाच्यः।रथोगच्छतीत्यादावाश्रयत्वमेवतिङर्थो
व्यापारःतस्याप्यसत्त्वभूतस्यैवतिङोक्तयाऽऽपाद्यत्वात्।व्यापारान्तरस्याननुभवात्।कालान्वयोधात्वर्थव्यापारे अनभिहि
तद्वृत्यस्याबोधितकर्त्रादावित्यर्थः।बोधस्यशक्त्याऽऽक्षेपाद्वालक्षणयावा तत्रकृतिशक्त्यातिङिभावनयाक्षेपेणलक्षणयावा।विपरी
तंतुन।भावनायाःप्राधान्येनप्रतीयमानतयाप्रत्ययवाच्यत्वात्।कृदन्तेपिभावनयाकर्तुराक्षेपेपितिङीवतस्याःप्राधान्यापत्तिः।
तत्रकर्तुरेवप्राधान्यात्।आक्षिप्तादिधर्मिणमादायैवसामानाधिकरण्यंसंख्या न्वयश्चतत्रैव।अनुशासनमपिआक्षि
प्ताद्यर्थानुशासनमेव।कारकान्वयः प्रत्ययार्थएवसाक्षात्परंपरयावा।अन्यथाकाष्ठैःपाकइतिस्यात्।अतएवनानृतंवदेदि
तिनिषेधस्यदर्शपूर्णमासप्रकरणपठितस्यविनिगमनाविरहाच्छब्दानृतार्थानृतोभयपरस्यक्रत्वर्थत्वसिद्धिः।कर्तुर्वाच्यत्वे
श्रुत्यापुरुषार्थत्वप्रसङ्गात्।प्रकरणाद्धिक्रत्वर्थत्वंतस्यचश्रुत्यपेक्षयादुर्बलत्वंस्पष्टमेव।प्रागुल्लिखितलाघवादितश्चनैया
यिकोक्तात्कृतिर्वाच्येति।तदपिन।शाब्दसामीत्यनुभवविरोधेनाक्षेपस्यायुक्तत्वात्।आक्षिप्तेशब्दोपस्थितसंख्यान्वयायोगा
च्च।किंचलक्षणायाअपिव्यक्तेःप्राधान्यस्यतवमतेसत्त्वेनप्राधान्यानुरोधेनशक्तिकल्पनाअयुक्ता।वाच्येनकर्त्रालक्षितभाव

नायाअपिप्राधान्योपपत्तेः। अन्यथाव्यक्तेरपिवाच्यत्वापत्त्यावाकृत्यधिकरणोच्छेदः। परिच्छेद्यत्वंव्यक्तेरिवकर्तुरपीतितस्यैवा
ख्यातेविशेष्यत्वापत्तेश्च। पठतिचैत्रः पचतिमैत्रइत्यादौस्पष्टंपरिच्छेद्यताप्रतीतेः। किंचकृधातोर्भावनार्थत्वस्यादृष्टत्वेनसर्वत्र
धातोरेवतदर्थत्वंयुक्तम्। पूर्वोत्तरमीमांसयोरपिकृभ्वस्तीनांभावनासामान्यवाचकत्वोक्तेः। किंचकर्माख्यातेपच्यतइत्यादौ
पक्वेत्यादौचपाकःक्रियतेइत्यादिविवरणात्। किंक्रियतइतिप्रश्नेपच्यतइत्युत्तराच्च। कारकान्वयानुरोधाच्चभावनालक्षणाव
श्यकत्वेनसर्वत्रभावनायाएवलक्ष्यत्वमुचितम्। किंचैवंकृत्स्वपिकर्तुर्वाच्यत्वानापत्तिः। वैषम्येबीजाभावात्। आक्षिप्तकर्तुर्व्य
क्तेरिवप्राधान्योपपत्तेः। लिङ्गसंख्यान्वयस्तुतिङन्तेसंख्यान्वयवदेवलक्षितएवोपपत्तेः। किंचकोशव्याकरणयोर्लाक्षणिका
र्थान्वाख्यायकत्वेतयोःशक्तिग्राहकत्वोच्छेदः। तयोर्लाक्षणिकार्थान्वाख्यानस्यादर्शनाच्च। अतएवतटादिपर्यायेषुगङ्गादिपदा
नुल्लेखःकोशे। शुक्लादिशब्दानांगुणिष्वपिशक्तिरेव। विनापिबाधप्रतिसंधानंबोधात्। किंचकृतौशक्तस्यविशिष्टेकर्तरिलक्षणा
यांतस्यविशेष्यत्वापत्तिः। कृतौशक्तिराश्रयेलक्षणा। तत्रलक्ष्यार्थस्यशक्यार्थेविशेषणतेतिनक्वापिदृष्टचरम्। गङ्गादिपदशक्य
स्यतल्लक्ष्येविशेषणतायाएवदर्शनाद्व्युत्पत्त्यन्तरकल्पनेगौरवम्। किंचयथालःकर्मणीत्यादिभिःशत्रादिविध्येकवाक्यतया
धर्मिणिशक्तिर्बोध्यतेतथातिबादिविध्येकवाक्यतयापियुक्तंवैषम्येबीजाभावात्। नचलःकर्मणिचेत्यस्यद्व्येकयोरित्यनेनैकवा

क्यतयाकर्त्रादिगतैकत्वादिभिरित्यर्थेनविशेषणत्वात्कर्त्रादिर्नप्रत्ययार्थइतिशबरस्वाम्युक्तंयुक्तम्।तिबादिविधिनाद्व्येकयोरित्यस्यैकवाक्यत्वेपितत्रकर्मणीत्यादेरभावात् तथावाक्यार्थस्यायुक्तत्वात्।लकाराणांद्विवचनादिसंज्ञाभावेनलविधिनैकवाक्यतादुर्लभा।तथैकवाक्यतायामपिकृत्स्विव तिङ्क्ष्वपिकर्त्रादीनांप्रत्ययार्थतासंख्यायास्तद्विशेषणत्वंचदुर्वारम्।किंचसंख्यायाःप्रत्ययार्थत्वेआख्यातजबोधेतस्याविशेष्यत्वापत्तिः।अपिचकर्मांशेष्वेवमेवापत्तौतस्याप्यप्रत्ययार्थत्वेभावनायाःकर्मव्यभिचारात्तदनाक्षेपेचपच्यतेतण्डुलइत्यादौकर्मप्रतीतिर्नस्यात्।नचसंख्ययाक्षेपःकर्मत्वशक्तिमत्त्वेनबोधार्थंशक्तेरावश्यकत्वादाक्षेपोह्याश्रयत्वेनैवस्यादित्युक्तम्।लाघवात्कृतौशक्तिरितितूक्तरीत्यादूषणीयम्।किंचैवंदण्डिपिङ्गाक्ष्यादिपदानामपिसंबन्धेएवशक्तिःस्यात्।लक्षितेनचसंबन्धिनासामानाधिकरण्यंस्यादित्यरुणाधिकरणेच्छेदइतिसमासेनिरूपयिष्यामः।किंचैवंतप्तेपयसिदध्यानयतिसावैश्वदेव्यामिक्षावाजिभ्योवाजिनमित्यत्रवाजेनान्नेनामिक्षारूपेणसंबन्धाद्वाजिनोविश्वेदेवास्ताननूद्यवाजिनगुणोविधीयते।तेनोभयरूपंवैश्वदेवमेकमेवकर्मेतिपूर्वपक्षेवैश्वदेव्यामिक्षेत्यत्रश्रौतःसंबन्धः।वाजिभ्योवाजिनमित्यत्रवाक्येनसत्यपिपदान्तरापेक्षणेस्वाभिन्नार्थकपदान्तरापेक्षायामपिश्रौतत्वम्।यत्रतुभिन्नार्थकपदान्तरापेक्षातत्रवाक्यंप्रमाणम्।एवंचवैश्वदेव्यामिक्षेत्येतद्वाक्यविहितयागानुवादेनवाजिनद्रव्यविधानंश्रौतंद्रव्येणनिराकाङ्क्षत्वात्।तस्मात्कर्मान्तरविधि

CC-0. In Public Domain. Digitization by eGangotri

र्वाजिभ्यइतिचापूर्वदेवताभिधानमितिगुणाधिकरणसिद्धान्तस्यभङ्गः।नचलक्षिततद्द्रव्यमादायश्रौतत्वंवाजिनंतुनतथेतिवा
च्यम्।एवंहिनानृतंवदेदितिनिषेधस्यापिश्रुत्यापुरुषार्थतायाएवप्राप्त्याकर्तुरवाच्यत्वसाधनस्यवैयर्थ्यापत्तेः।क्रत्वर्थत्वसि
द्धान्तासिद्ध्याकर्त्रधिकरणोच्छेदाच्च।नचाकृत्यधिकरणन्यायेनदण्ड्यादिपदानांसंबन्धेशक्तिरितिवाच्यम्।तत्रशक्तावप्या
नन्त्यादिदोषसत्त्वात्।नचतदनुगमकसंबन्धत्वेशक्तिरस्तु।दण्डीत्यादिजन्यबोधेनियमतस्तदभानात्।तत्तत्संबन्धेनदण्डवि
शिष्टइत्येवबोधात्।नीलादिभ्यश्चनीलत्वविशिष्टनीलवत्ताप्रतीतेरनुभवसिद्धत्वात्तेषांगुणगतजातावेवशक्तिरितिमतोपप
त्तिः।एवंचयज्जन्यबोधेनियमेनप्रकारतयाभानमनुगतत्वंचतत्रैवाकृत्यधिकरणन्यायप्रवृत्तिरितिबोध्यम्।किंचप्रत्ययार्थ
स्यप्राधान्येक्रियाप्रधानमाख्यातमितिनिरुक्तस्यस्यक्रियाशब्दस्यप्रत्ययार्थपरत्वेआख्यातसामान्यलक्षणस्यभावाख्या
तेव्याप्तिः।चैत्रेणसुप्यतइत्यादौधात्वर्थविशेष्यतायास्त्वयाप्यङ्गीकारात्।अन्यलभ्यस्यतस्यशास्त्रबलात्प्रत्ययार्थत्वस्या
प्यङ्गीकारेकर्तृकर्मणोरपिशास्त्रबलात्तद्वाच्यतादुर्वारा।किंचनानृतंवदेदित्यत्रतवापिप्रकरणोपस्थाप्यार्थापेक्षयाश्रुत्यु
पस्थापितभावनालक्षितकर्तुःप्रथमोपस्थित्याक्रत्वर्थत्वासिद्धिःप्रथमोपस्थितत्वमेवहिश्रुतेर्बलवत्त्वेबीजम्।ममतु
श्रुतिप्रकरणाभ्यामस्यक्रतुयुक्तपुरुषधर्मता।अविरोधात्।विरोधएवबलाबलचिन्ताप्रवृत्तेः।अन्यथाजञ्जभ्यमानोनुब्रूया

ल·मं
९९

न्मायिदक्षक्रतू इत्यत्र क्रतावपिजञ्जभ्यमानपुरुषसत्त्वाद्विरुद्धाभ्यां वाक्यप्रकरणाभ्यां पुरुषसंस्कारमुखेनक्रत्वर्थत्वसिद्धा
न्तस्त्वदीयउच्छिद्येत। तदुक्तंभट्टैः। स्त्र्युपापमांसभक्षादिः पुरुषार्थमपिश्रितः। प्रतिषेधःक्रतोरङ्गमिष्टःप्रकरणाश्रयादिति अनार
भ्याधीतोनानृतंवदेदिति स्मार्तनिषेधस्तु अर्थानृतपरएव। विदितवेदितव्याः परावरज्ञाःकेचिद्दृषयोयद्वानस्तद्वानइतिप्रयोक्तव्येयर्वाणस्त
र्वाणइतिप्रयुञ्जतेयाज्ञेकर्मणिपुनर्नापभाषन्तेतेयर्वाणस्तर्वाणोनामऋषयोबभूवुरितिपस्पशाभाष्यस्वरसात्। तद्वाक्यादेव
दर्शपूर्णमासप्रकरणपठितस्योभयनिषेधकत्वंतेहेलयोहेलयइतिकुर्वन्तः पराबभूवुरितिक्रतुप्रकरणपठितभाष्यलिखितश्रुत्यन्त
राच्च। अतएवशिष्टाव्यवहारकालेस्वस्वदेशभाषयाव्यवहरन्तोनप्रत्यवायंमन्यन्ते। अतएवकर्त्रधिकरणत्वेनतत्रसंमतेधिकर
णे। अकर्मक्रतुसंयुक्तंसंयोगान्नित्यानुवादःस्यादितिपूर्वपक्षसूत्रंक्रतुसंयुक्तक्रतुप्रकरणपठितमकर्मकर्मनिषेधकंनानृतंवदेदितिवाक्यमना
रभ्याधीतेननानृतंवदेदितिवाक्येनसंयोगात्समानाकारत्वान्नित्यानुवादः स्यात्। एवंचक्रतावप्यनृतवदनेस्मार्तमेवप्रायश्चित्त
मितितदर्थः। तदुत्तरंविधिर्वासंयोगान्तरादितिसिद्धान्तसूत्रम्। अत्रसंयोगपदंसंयुज्यतेकारणमनेनेतिव्युत्पत्त्याप्रयोजनपरंस्मा
र्तेनहितेनानृतवदनेपुरुषस्यप्रत्यवायः। वर्जनेचतदभावः ननुक्रतोः किंचित्तद्भावाभावयोर्वैगुण्यमवैगुण्यंवा। एवंचयः स्वस्य
प्रत्यवायमङ्गीकृत्यक्रतुमविगुणमिच्छतितेनानृतंनवर्ज्यंस्यात् क्रतुप्रकरणस्थेनतेनक्रतोर्वैगुण्यमुच्यतइत्यतोनानुवादः किं

राम
९९

तुविधिरेवेत्यर्थइति। परे तु अथ ब्रह्मचारिणो व्रतमित्युपक्रम्य नेक्षेतोद्यन्तमादित्यमितिवदृस्यापि पाठात् स्मार्तं नानृतं वदेदि
ति तत्संकल्पपरम्। इदं तु संयोगान्तरात् क्रतुप्रकरणपाठाद् व्रतोपक्रमाभावाच्चानुवादफलाभावाच्चोक्तप्रयोजनसंभवाच्च प्रति
षेधविधायकमेवेत्यर्थ उचितः। नहि केवलप्रयोजनमात्रेण वाक्यार्थव्यवस्थितिः। नहि प्रयोजनानुवर्ति प्रमाणमिति न्यायात्। न्या
येन तु वाक्यार्थे निर्णीते प्रयोजनसिद्धिरित्यन्यत्। न च तादृशोपक्रमानुपलम्भ इति वाच्यम्। ब्रह्मचारिप्रकरणे ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन्। ब्राह्मणोत्र ब्रह्मचारीति तत्तद्व्रतप्रदर्शनपरं मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्। भा
स्करालोकनाश्लीलपरिवादादि वर्जयेदिति याज्ञवल्क्योक्तेः। व्रतमपीडयन् मध्वादिपरिहारेण अश्लीलमसभ्यभाषणमिति
मिताक्षराव्याख्यानेनाश्लीलपदेनासभ्यानृतभाषणयोः संग्रह इति सूचितम्। भास्करालोक उदितादेरिति च मिताक्षरा। शु
क्तं परुषं च इति च। आदिपदेन स्मृत्यन्तरोक्तगन्धमाल्यादिवदनृतस्यापि संग्रह इत्यन्ये। नेक्षेतोद्यन्तमित्यादिविषये। उप
क्रमे श्रुतं ब्रह्मचारिव्रतपदं यतः। तदन्वयबलात्कर्मविशेषोत्र न बोध्यत इति मिश्रोक्तेश्च। प्रकृताधिकरणे शबरस्वाम्यपि
संयोगान्तरादिति सूत्रैकदेशमुपादाय नियमानुष्ठानेन पुरुषस्य संबन्धः स्मर्यते पदार्थप्रतिषेधेन संयोग इह पुरुषस्येत्यय
मिह संयोग इत्याहेत्याहुः। नियमस्त्वसंकल्प एव। तदनन्तरं क्रतुसंयुक्तपूर्वोक्तनिषेधवाक्ये जञ्जभ्यमानोनुब्रूयान्मयि

CC-0. In Public Domain. Digitization by eGangotri

दक्षक्रतूइतिविधिवाक्येनसाधारणतयापूर्वपक्षोपपादकमहीनवत्पुरुषस्तदर्थत्वादितिसूत्रम्।उभयमपिपुरुषधर्मस्तदर्थत्वात्।आद्येवदेदितिश्रुत्याह्वनीयेजञ्जभ्यमानोनुब्रूयादितिवाक्येनपुरुषार्थत्वावगमात्।यथाज्योतिष्टोमप्रकरणपठिताद्वादशोपसदस्तिस्रएवोपसदोद्वादशाहीनस्येत्यहीनसंयोगात्प्रकरणादुत्कृष्यतेतद्वच्छ्रुतिवाक्याभ्यांचप्रकरणंदुर्बलमितितदर्थः।तदनन्तरंप्रकरणविशेषाद्वातद्युक्तस्यतत्संस्कारोद्रव्यवदितिसिद्धान्तसूत्रंप्रकरणात्तद्युक्तस्यक्रतुयुक्तस्यतद्वत् अनृतवदनाभावानुवचनादिसंस्कारइतितदर्थः।विरोधेहिश्रुतिवाक्येबलवतीप्रकृतेचतयोरविरोधात् श्रुतिप्रकरणाभ्यांवाक्यप्रकरणाभ्यांक्रतुयुक्तपुरुषसंस्कारत्वम्। यथाक्रतुयुक्तव्रीह्यादीनामेवप्रोक्षणंसंस्कारकंतेनोभयत्रापिवैपरीत्येक्रतुवैगुण्यंसिद्धम्।अवैपरीत्येनतस्माद्गुण्यंच याजुषभ्रेषनिमित्तप्रायश्चित्तंचासिद्धम्। नचनानृतंवदेदित्यस्यक्रतुगतपुरुषधर्मत्वेयजमानस्यप्राधान्यात् प्रधानभूतकर्त्र्ययजमानेनैववर्ज्यंस्यात्। क्रत्वर्थत्वेतुप्रतिषेध्यस्यवर्जनीयतयाकर्त्रनपेक्षत्वेनयज्ञप्रवृत्तेनयजमानेनऋत्विग्भिश्चवर्जनंसिध्यतीतिविशेषइतिवाच्यम्।श्रुतिप्रकरणाभ्यांक्रतुसंबद्धपुरुषकर्तृकानृतवदनाभावइतिबोधेनतत्संभवात्।क्रतुकर्तृकर्तृकेतिबोधेमानाभावात्।किंचवर्ज्यभावनायाःकर्त्रनपेक्षत्वेव्यभिचारेणभावनायाःकर्त्राक्षेपकत्वमेवत्वदुक्तंभज्येत।किंचयुष्मदस्मद्भिन्नसामानाधिकरण्येप्रथमइत्यर्थकेनशेषेप्रथमइत्यनेनतत्सामानाधिकरण्यएवप्रथमस्यसाधुत्वाद्वदेदित्यस्यसाधुत्वा

यपुरुषइतिपदस्यतदर्थस्यवाध्याहारावश्यकत्वेनजञ्जभ्यमानवाक्यतोवैषम्यंदुरुपपादम्।नचतत्सामानाधिकरण्याभावेप्र
थमइत्येवतदर्थः।उपपदेसमानाधिकरणेइत्यधिकारेणशेषपदस्वारस्येनचतादृशार्थासंभवात्।नचैवंत्वंचचैत्रश्चपचथइ
त्यत्रपरत्वात्प्रथमापत्तिः।उपयुक्तासमभिव्याहृतस्योपयुक्तादन्यस्यशेषपदार्थत्वादस्पष्टंचेदंभाष्ये।न्यायसुधाकारोपिक्रत्व
र्थत्वेपिक्रतुफलसिद्ध्यर्थत्वात्पुरुषार्थत्वमप्यस्तीतिवदन्क्रतुसंबद्धपुरुषधर्मतापक्षमेवसाधुंमेने।एवंचजञ्जभ्यमानसंस्का
रोपिक्रतुसंबद्धपुरुषमात्रस्येतिबोध्यम्।नचतुविपरीतंयजमानस्यैवस्यात्।एतेनप्राधान्याद्यजमानसंस्कारएवेतिपरास्तम्।
यद्यपीदंद्वयमपिदर्शपूर्णमासप्रकरणएवपठितंतथापितद्गतक्रतुत्वसामान्यापेक्षमेवपूर्वोक्तिमहाभाष्यात्।भगवान्शबर
स्वामीतुनानृतंवदेदित्यस्यपुरुषधर्मत्वमुत्सूत्रमेवाशङ्क्यतत्सूत्रमेवकर्तुराख्यातप्रत्ययार्थत्वनिरासेनप्रौढ्यासमाहित
वान्।नथाभावार्थाधिकरणेभगवन्तोभट्टपादाःप्रौढिवादेनैवप्राधान्यादियुक्तिभिर्भावनायाःप्रत्ययार्थत्वमुत्सूत्रमेवोक्तवन्तःभाव
र्थाःकर्मशब्दास्तेभ्यःक्रियाप्रतीयेतैषह्यर्थोविधीयतइतिहितत्रसूत्रंकर्मशब्दायजेतदद्याज्जुहुयादित्यादयस्तेभावार्थाःप्राधा
न्येनक्रियार्थाःक्रियाप्रधानमाख्यातंभावप्रधानमाख्यातमित्युक्तेरतस्तेभ्यःक्रियाप्राधान्येनप्रतीयेतहिप्राधान्यादेवैषोर्थः
क्रियारूपःसर्वत्रविधीयतेननामार्थः।तस्याश्चशीघ्रनाशित्वाद्द्वारमपूर्वंस्वीकार्यमितितदर्थः।नत्वनेनभावनायाःप्रत्यया

र्थत्वंनधात्वर्थत्वमित्यर्थः स्पृश्यते। नव्यमीमांसकानांतुप्रौढिवादेनाप्युक्तेर्थेमुख्यसिद्धान्तत्वंभ्रमइतिसुधियोविभावयन्तु।
तस्माद्भावनाधातुवाच्यैव। तदुक्तंकारकइतिसूत्रेभाष्येऽधिश्रयणोदकासेचनैधोपकर्षणक्रियाःकुर्वन्देवदत्तोयदापचतीत्यु
च्यतेनतदातत्राधिश्रयणादिषुपचिर्वर्ततेज्वलनक्रियांकुर्वन्तिकाष्ठानियदापचन्तीत्युच्यन्तेतदातत्रपचिर्वर्ततेसंभवनधार
णंचकुर्वतीस्थालीयदापचतीत्युच्यते तदातत्रपचिर्वर्ततइति। संभवनंग्रहणं धारणमासमाप्तिस्थापनमितिकैयटः। कर्तृक
र्मरूपोधर्मीप्रत्ययार्थः। स्पष्टंचेदंतिङ्भ्यामेकंद्रव्यमभिधीयतइत्यादिनागत्यर्थलोटेतिसूत्रेभाष्ये। कर्त्रादिपदानांशक्तिप
रत्वेपिशक्तिशक्तिमतोरभेदात्सएवप्रत्ययार्थः। कर्त्रादिविभक्त्याशक्तिमदभेदमापन्नायाएवशक्तेरुक्तिरितिसार्वधातुकेयगित्य
त्रकैयटोक्तेः। प्रत्ययार्थःप्रधानमित्युत्सर्गस्यापिभाष्यनिरुक्तकाराद्यनुभवबलेनत्यागइतितदर्थकारकस्यधात्वर्थंप्रतिवि
शेषणतेतिकेचित्॥ परेतुप्रत्ययार्थःप्रधानमितियत्रप्रत्ययस्यवाचकतातद्विषयंकर्तरीत्यादेस्तद्विषयाद्धातोरित्यर्थेनतिङां
तद्द्योतकत्वाद्विशेषणत्वमेव। भावेइत्यस्यतथान्वयस्यैवयुक्तत्वात्। अतएवस्नुक्रमोरितिसूत्रेभाष्येभावकर्मणोरितिसूत्र
स्यभावकर्मवृत्ताद्धातोरित्यर्थकथनंकृतम्। तस्यचभावकर्मविषयाद्धातोरित्यर्थंकैयटआह। तद्विषयत्वंचधातोःकर्मादिविशि
ष्टक्रियावाचकत्वेन। कर्मादीनांस्वप्रकृतिकप्रत्ययवाच्यत्वेनवा। तत्रतिङ्विषयलकारस्थलेआद्यम्। क्रियाप्रधानमाख्यात

CC-0. In Public Domain. Digitization by eGangotri.

मितिस्मृत्यन्तरात्। श्नादिविषयेत्वन्त्यम्। सत्त्वप्रधानानि नामानीति स्मृतेः। लः कर्मणि चेत्यादेरप्ययमेवार्थः। भावकर्मादिष्व
त्वादिति। श्नजादौ कारकप्राधान्यमुक्तरीत्यैव। अन्यथा श्नजादिस्थानिलेन भावस्य सत्त्वभूतस्य बोधनं तिङ्स्थानिलेन त्व
सत्त्वभूतस्य बोधनमिति तत्रापि न प्रसिध्येत्। तस्मादुभयत्राप्यर्थैत्तदृशे सूत्रतात्पर्यं चेदत्रापि तथैवास्तु। वर्त्तमाने लडित्या
दिविहितलानुवादेन चैतदर्थनियामकम्। अत एव कर्त्तरि कृदित्यादिना कर्त्रादेः प्रत्ययार्थत्वबोधनमेव। भावबोधकादित्य
स्य केवलक्रियामात्रबोधकादित्यर्थः। किंच द्व्येकयोरित्यादीनां तिङ्विषयाणामपि नियमत्वमिति भाष्ये स्पष्टं तद्विदाम्। सिद्धे च
नियमो भवति धातुवाच्यत्वे चानिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति सामान्यसूत्रेण सर्वत्र सिद्धौ नियमत्वं युज्यते नान्यथा।
संख्यायाश्च कारकस्येव क्रियायामेवान्वय इत्युपपादयिष्यते। स्पष्टं चेदं बहुष्विति सूत्रे भाष्ये। तत्र हि तिङोः विशेषणधातुमा
त्राद्विधीयन्ते इति नियमार्थं द्व्येकयोरित्या दीत्युक्तम्। एकवाक्यतया विधानमिति पक्षेपि फलतो नियम एव। ताहृनापि तत्र सि
द्धेः। अत एवानुदात्तङित इति सूत्रे भाष्येऽत्रपक्षे तेषां सूत्राणां परिभाषात्वव्यवहारः। अत एवाजर्घा अचकादित्यादौ धातु
मात्रात्सर्वबोधः संगच्छते। लुप्तस्मरणाद्बोध इति तु एकशेषसूत्रे प्रत्ययलक्षणकार्यसिद्धेर्लोपफलत्वं वदता भाष्यकारेण
तिरस्कृतम्। लोपमजानतां बोधानापत्तेः। यत्तु कैयटेन तिङां स्वभावतः संख्यावाचकत्वाश्रयेण तिङ्विषयाणां तेषां नियमार्थ

ल·मं· त्वमुक्तंतत्र।एवंस्वभावाश्रयणेतेनैवतत्तत्तिङंतत्तत्संख्यावाचकत्वसंभवेननियमशास्त्राणामपिवैयर्थ्यापत्तेः।सुब्विधाणाम
९ प्यनेनएकद्वित्र्यादिपक्षेष्वपिनियमार्थत्वसंभवेनतत्रनियमोपपादनायविशिष्यतवपञ्चकपक्षावलम्बनवैयर्थ्यापत्तेश्चवशास्त्र
मात्रस्यैववैयर्थ्यञ्चेत्यन्यत्रविस्तरः।सार्वधातुकेयगितिसूत्रस्थस्यसार्वधातुकार्थाःकर्त्रादयइतिभाष्यस्यतद्द्योत्यादयइत्येवार्थः
।विकरणस्त्वत्रपक्षेसाधुत्वार्थएवविकरणार्थाइतिपक्षेविकरणद्योत्याअपिभावकर्मवाचिनीत्यादेरपितद्बोधकेइत्यर्थः।तत्रसा
र्वधातुकार्थाइतिपक्षेएकत्वादीनामपितद्द्योत्यत्वान्नियमानुपपत्तिमाशङ्क्यार्थनियमाद्याश्रयणेनपरिहृतंभाष्ये।नचविकर
णार्थाइतिपक्षेलेनाभिधानाद्विकरणोनस्यादितिभाष्यदूषणानुपपत्तिः।द्योतकसमुच्चयस्यव्यतिलुनीतेगार्ग्यायणीत्यादौदर्शना
दितिवाच्यम्।लिङ्लिटोर्विकरणहीनयोरदादौचलकारमात्रेणापितद्द्योतनेनतेनैवकृतकृत्यतयाविकरणानुत्पत्त्यापत्तिरित्या
शयात्।व्यतिलुनीतइत्यादौनात्मनेपदमात्रेणापितद्द्योतनम्।अन्यत्राप्यात्मनेपददर्शनात्।गार्ग्यायणीत्यादौचनष्फमात्रेणत
द्द्योतनम्।गार्ग्यायणेष्वायनस्यदर्शनात्।तत्रशब्दशक्तिस्वभावात्क्वचिद्विकरणसहितस्यतद्द्योतकत्वंक्वचित्केवलसार्वधातु राम
कस्यापीतिनदूषणपरिहारः।विकरणानांनैरर्थक्यप्रवादस्तुतंविनापिसार्वधातुकमात्रेणार्थद्योतनात्।क्वचित्तत्साहाय्येनार्थप्र
तीतेरर्थवत्त्वव्यवहारोपि।अतएवस्त्रियामितिसूत्रेभाष्येस्त्रीत्वस्यप्रत्ययार्थत्वपक्षेप्राधान्याद्द्विवचनाद्यनुत्पत्तिमाशङ्क्यप्रधा ९

नस्यापिद्रव्याभेदेनप्रतीत्यासमाहितंनतुतस्यप्रकृत्यर्थंप्रतिविशेषणत्वाश्रयेण।द्योत्यत्वपक्षेचविशेषणतोक्ता।एवंसुपामपिद्योतकत्वेनैव।
पञ्चकंचप्रातिपदिकार्थः।एतन्मूलकमेवसत्त्वप्रधानानिनामानीति।तत्रहिनामपदेनसुबन्तमित्यनुपदमेवस्फुटीभविष्यति।स्त्रीप्र
त्ययान्तस्यतुननामत्वम्।शास्त्रप्रक्रियायांततोप्यर्थबोधात्तत्रप्रत्ययार्थत्वपक्षेद्विवचनाद्यनुत्पत्तिराशङ्किता।एतेनप्रत्ययार्थः
प्रधानमितिव्युत्पत्तिरजादौव्यभिचरितेतिपरास्तम्।अतएवसूत्रकृताप्रधानप्रत्ययार्थवचनमशिष्यमर्थस्यान्यप्रमाणत्वादित्ये
वोक्तं नतुव्यभिचरितत्वादित्यप्युक्तमितिवदन्तितत्रकर्तृत्वशक्त्याश्रयस्यव्यापारेन्वयः।योग्यत्वात्।परस्मैपदप्रश्नमादिस्वयमे
वेत्येतत्समभिव्याहृतयक्तङादिरूपतात्पर्यग्राहकवशाच्च।कर्मत्वशक्तिमतश्चफलेन्वयः।योग्यत्वात्तङ्यक्चिणादिसमभिव्या
हाराच्च।ननुकारकविशेष्यकबोधएवकुतोनस्वीक्रियतइतिचेन्न।रमतेब्राह्मणकुलमितिक्रियाप्रधानमितिह्रस्वोनपुंसकइतिसू
त्रस्थभाष्यविरोधात्।नचैतन्नामाख्यातयोर्लक्षणंसत्त्वप्रधानानिनामानिभावप्रधानमाख्यातमितिनिरुक्तविरोधाच्च।तत्रत्या
ख्यातशब्देननियमतोजनकाकाङ्क्षाविभक्त्यन्तं पाचकइत्यादावेकदेशार्थस्यनदाकाङ्क्षात्वेपिविभक्त्यन्तार्थस्यनतदाका
ङ्क्षात्वम्।आख्यातमाख्यातेनेत्यादौतथैवप्रतीतेः।चत्वारिपदजातानिनामाख्यातोपसर्गनिपाताइत्युपक्रमाच्च।भावकाल॰
कारकसंख्याश्चत्वारोर्थाआख्यातस्यतत्रभावःप्रधानमितितद्भाष्याच्च।निष्कौशाम्बिरित्याद्युदाहरणविषयेलुप्ताख्यातेषुचे

तिसमर्थसूत्रस्यवार्त्तिके कृत्याख्यातपदप्रयोगउपचारादितिबोध्यम्।भवतीतिसंबुध्यन्तस्यतिङन्तस्यचसमत्वा लक्षणापेक्षा
बोध्या।एतेनाख्यातपदेनधातुः आख्यायतेसर्वप्रधानीभूतोर्थोनेनेतिव्युत्पत्तेरित्यपास्तम्।शिष्येइतिलिङन्तेतिव्या ख्या।स्त्र
कृतिभूतधातावव्याप्तेश्च।क्रियावाचकत्वमात्रेवक्तव्येप्राधान्यनिवेशस्याप्यर्थत्वाच्च।तदेवाभिप्रेत्यनिपातवादोक्तःप्रातिशाख्ये
तदाख्यातंयेनभावंसधातुरित्यत्रतृतीयार्थेप्रथमेतितद्भाष्येव्याख्यातम्।अतएवप्रशंसायांरूपबितिसूत्रेभाष्येपचतिरूपंपचत्तो
रूपमित्यादेरसिद्धिमाशङ्क्यक्रियाप्रधानमाख्यातंद्रव्यप्रधानंनाम।यतःक्रियापृष्टस्तिङाचष्टेकिंदेवदत्तःकरोतिपचतीति।द्र
व्यपृष्टःकृताचष्टेकतरोदेवदत्तःयःपाचकइत्युक्तम्।नामान्याख्यातजानीत्यत्रतुआख्यातपदंवदलयवधातुपरम्।सर्वनामधातु
जमाहनिरुक्तेव्याकरणेशकटस्यचतोकमित्युणादयइतिसूत्रेभाष्योक्तेः।नाम्नस्तिङन्तजन्यत्वाभावाच्चभाष्येकृतेत्यस्यतत्र
कृतिकसुबन्तेनेत्यर्थः।नामपदेनचसुबन्तमेवोक्तयुक्तेः।प्रकृतिःप्रत्ययोविभक्तिरित्येतावन्नाम।सत्ताद्रव्यंलिङ्गंसंख्येतिना
मार्थःतेषुद्रव्यंप्रधानमितिनिरुक्तभाष्योक्तेः।नमत्याख्यातार्थंप्रतिविशेषणंभवतीतिनामेतिचनिरुक्तभाष्यम्।इदंचाव्ययाति
रिक्तनामलक्षणम्।उपसर्गनिपाताइत्यत्रनिपातपदमव्ययमात्रोपलक्षणमितितद्भावः।तन्नद्रव्यस्यसत्तालिङ्गसंख्यानिरूपिव
प्राधान्येपितस्यक्रियाकारकभावसंबन्धंप्रतिविशेषणत्वेनकाण्डेइत्यादौविभक्त्यर्थप्रधानत्वोक्तिर्नविरुद्धा।क्रियाप्रधानमपित्य

त्रक्रियात्वंसाध्यत्वरूपम्। तेनहिरुगादिषुनाख्यातलक्षणातिव्याप्तिः। हिरुगादीनांक्रियाप्रधानत्वंतुक्रियामात्रविशेषणत्वरूपम्
अतएवतदर्थेनकारन्वयः। तदन्वययोग्यस्यसाध्यत्वस्यतत्राभानात्। वस्तुतोहिरुगाद्यर्थस्यसिद्धत्वेनाभानमात्रेणगौणक्रियात्व
व्यवहारः। येतुक्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकंवैजात्यस्यकारकान्वयेनियामकत्वंवदन्तितेषामोदनंभुक्त्वाग्रामंग
च्छतीत्यादौभुक्त्वाप्रकृत्यर्थेकारकान्वयोनस्यात्। तत्प्रतिद्वन्द्वितयानामलक्षणेसिद्धत्वापरपर्यायसत्त्वत्वस्यनिवेशः। एधित
व्यंभुक्त्वागन्तुंपचतिरूपमेधांपाचयामित्यादिनामसरूपमाख्यातमेव। किंकर्तव्यमित्यादिक्रियाप्रश्नेपक्तव्यमित्याद्युत्तरात्।
नियमतोजन्यतयाक्रियाकाङ्क्षंयत्तदत्रनाम। भाव्येतिङाचष्टेइत्युपलक्षणम्। कृताचष्टेइतिचतद्धितादेरुपलक्षणम्। धात्वर्थ
फलस्याप्युक्तक्रियात्वसत्त्वान्नकर्माख्यातेएतल्लक्षणाव्याप्तिः। द्योतकत्वात्क्रियासमभिव्याहारनियमाच्चनिपातादुपसर्गस्य
पृथग्युक्तिः। एवंचक्रियाप्रधानमित्यस्यप्रत्ययार्थापेक्षयायत्रधात्वर्थःप्रधानंतदाख्यातमित्यर्थः। नचधात्वर्थापेक्षयाक्रिया
कृतिःप्रधानमितितदर्थः। भावशब्देनापिकृतिरेवेतिवाच्यम्। प्रत्ययार्थःप्रधानमित्येवसिद्धेः। भावाख्यातेऽव्याप्तेश्च। नन्वेवं
प्रथमान्तसमभिव्याहारेएककर्तृविशिष्टक्रियाश्रयोदेवदत्तइतिप्रथमान्तविशेष्यकबोधएवास्त्वितिचेन्न। तथाबोधाननुभवात्
।यत्रोभेभावप्रधानेभवतइत्युत्तरनिरुक्तविरोधाच्च। तदर्थस्तुतद्भाष्येएवमुक्तः नामाख्यातयोः परस्परविनाभूतयोः स्वस्व

ल॰ मं॰ पदार्थोक्तावेकस्यभावप्राधान्यमेकस्यसत्त्वप्राधान्यम्। अथपुनर्यत्रतेउभेभवतोवाक्येतत्रभावप्रधाने आख्यातार्थप्रधाने वा
११ क्येत्याख्यातेप्रधानेतदर्थत्वाद्गुणभूतंनामतदर्थस्यभावनिष्पत्तावङ्गत्वात्। एवंतावद्वाक्ये आख्यातंप्रधानमितिअत्रनामप
देननिपाताद्यतिरिक्तस्यग्रहणमुक्तम्। तेनक्रियायानञर्थविशेषणत्वेपिनक्षतिः। अतएवहरिर्वसन्ददर्शेत्यादौधातुसंबन्धेप्र
त्ययाइत्यनेनप्रधानतिङन्तवाच्यक्रियानुरोधेनगुणभूतक्रियावाचिभ्यःकालान्तरेप्रत्ययाः। ननुतिङ्·कालान्तरइतिव्यवस्था
सिद्धिः। किंचसर्वत्रप्रथमान्तार्थप्रत्येवक्रियायाविशेषणत्वमितिपक्षेपाकक्रियाभवतीत्यर्थेपचतिभवतीत्यस्यतवासिद्धिः।
तदुक्तं·भूवादिसूत्रेभाष्येकातर्हीयंवाचोयुक्तिःपचतित्वंपचसिभवति·पक्ष्यतिभवतीतिप्रश्नेउत्तरंपचादयःक्रियाभवतिक्रियायाः
कर्त्र्योभवन्तीति पक्ष्यतिभवतीत्यस्यभविष्यन्तीपाकक्रियासत्कार्यवादाङ्गीकारात्सूक्ष्मरूपेणभवतीत्यर्थान्नदोषः। नचसत्कार्यवाः
कार्यनित्यतयासामग्रीवैयर्थ्यमितिवाच्यम्। तस्याअभिव्यक्त्यर्थत्वात्। नचाभिव्यक्तेर्जन्यत्वेसत्कार्यवादबाधः। नित्यत्वेसर्वदाभि
व्यक्त्यापत्तौव्यवहारापत्तिः। अभिव्यक्त्यन्तरापेक्षायांत्वनवस्थेतिवाच्यम्। अभिव्यक्तेस्तदनतिरेकात्। नवोत्पत्तेरुत्प राम
त्तिवत्। परेतुसूक्ष्मतयाविद्यमानस्यैवस्थूलरूपस्यविद्यमानायाएववाभिव्यक्तेस्तमसाप्रतिबद्धतयाव्यवहाराक्षमत्वेनसा ११
मग्र्यातस्यप्रतिबन्धकतमसोनिवृत्तौव्यवहारक्षमतेत्यदोषात्। एवंव्यवहारादिविषयेपिसत्कार्यवादाबाधोबोध्यइत्याहुः। यु

वस्तुनोनिर्वचनीयमेनजन्मत्वमित्युक्तम्।५

क्ष्णत्वसत्कार्यवादः।असदुत्पत्तिवादेमालतीकुसुमादौविकासस्यगन्धोत्पादकत्वंवाच्यम्।एवंचानिर्गन्धेपिविकासेनगन्धोत्पत्त्याप
त्तिः।वैजात्यनिवेशादिनातद्वारणेतुसत्कार्यवादाभ्युपगमएवयुक्तः।विपर्ययनिष्ठतमसाप्रतिबन्धाद्व्यवहाराक्षमत्वंचसूक्ष्मत्वम्
।केचित्तुकारणात्मनास्थितसूक्ष्मरूपेणसत्स्थूलरूपेणत्वसदेवकार्यमितिसदसत्कार्यवादः।सूक्ष्मत्वंचकारणाभेदेनस्थितत्वा
त्ततःपृथग्ज्ञानायोग्यत्वम्।तत्रसूक्ष्मरूपमादायसत्कार्यवादःसांख्यादीनांस्थूलरूपमादायासत्कार्यवादोगौतमीयादीनामि
त्याहुः।अतएवकिंकिलास्त्यर्थेष्वितिसूत्रेअस्तिभवतिविद्यतेवात्वंशूद्रींगमिष्यसीतिवृत्त्यादावुदाहृतम्।अपिचकर्मणायमभि
प्रैतीतिसूत्रेक्रियापिकृत्रिमंकर्म क्रियापिहिक्रिययेप्सिताभवतिकयाक्रिययासंदर्शनादिक्रिययेतिभाष्येउक्तम्।तद्रीत्याधाव
नकर्मकंदर्शनमित्यर्थेभाष्यकृद्दिष्टंपश्यमृगोधावतीतिवाक्यंनस्यात्।कर्मत्वस्यचात्राकाङ्क्षावशात्संसर्गतयाभानम्।मृ
गस्यतुकर्मत्वेननतत्रान्वयसंभवः।विभक्त्यर्थमद्वारीकृत्यनामार्थधात्वर्थयोर्भेदेनान्वयायोगात्।मृगाद्द्वितीयायांतुप्रागु
क्तवाक्यासिद्धिः।अप्रथमासामानाधिकरण्येनतिङोबाधित्वाशत्राद्यापत्तेश्च।वासरूपन्यायेनतुनतिङः।लादेशेषुतदभाव
स्यभाष्येस्पष्टत्वात्।योधावतिमृगंस्तंपश्येत्यध्याहारेणान्वयेपिभाष्यसंमतस्यपदैकवाक्यतयाऽन्वयस्यभङ्गः।एतेनवि
शिष्टवाक्यार्थस्यकर्मतयादर्शनेऽन्वयः।एवंचव्युत्पत्तिविरोधः।व्युत्पत्तेर्नामार्थविषयकत्वाद्विशिष्टबोधकस्याप्रातिपदि

कत्वाच्चनद्वितीयापत्तिः। श्रुत्वाममैतन्माहात्म्यंतथाचोत्पत्तयःशुभाइतिवदित्यपास्तम्। नीलविशिष्टघटस्यदर्शनकर्मत्वेप्रतिपिपादयिषितेनीलंघटंजानामीत्यादौद्वितीयानापत्तेश्च। नचतवापिमृगीयधावनस्यविशिष्टस्यदर्शनकर्मत्वेविशेषणस्यमृगस्यापिकर्मत्वात्प्रातिपदिकत्वाच्चतद्वाचकाद्द्वितीयापत्तिरितिवाच्यम्। मृगस्यधावनविशेषणत्वेनतत्प्रयुक्तस्यान्तरङ्गसंस्कारस्यप्रथमारूपस्यानिवृत्तेः। नचतुतस्यधावनविशेष्यत्वाद्द्वयोःसाक्षाद्विशेषणत्वात्प्रधानकार्यस्यान्तरङ्गादपिबलवत्तायाद्धेतुमतिचेतिसूत्रभाष्यसम्मतत्वेनद्वितीयादुर्वारा। उत्पत्तयःशुभाइतित्वार्षमित्यलम्। किंचचैत्रःपचतीत्यादौकृतिप्रकारकप्रथमान्तार्थविशेष्यकोबोधइतिनयुक्तम्। एकविशेषणवैशिष्ट्येनोपस्थितेविशेष्येतत्सजातीयसम्बन्धेनविशेषणान्तरसंबन्धस्याव्युत्पत्तेः। अतएवराजपुरुषोभार्यायाश्चेतिन। घटोऽद्रव्यमित्यर्थेघटोऽद्रव्यत्वस्येतिचनेतिसमर्थसूत्रेभाष्येस्पष्टम्। किंचतवपचतिव्रजतीत्यस्यसाधुतापत्तिः। स्वस्वव्युत्पत्त्यनुसारेणबोधस्यदुर्वारत्वेपितत्रसाधुत्वस्यापाद्यत्वात्। साधुत्वंचतत्तदर्थनिरूपणाभियुक्तवैयाकरणसम्मतेः। र्थएवनान्यत्रेतिभेद्यभेदकसंबन्धेत्यादिनास्पष्टमेवहरिणोक्तम्। तेविभक्त्यन्ताःपदमितिगौतमसूत्रेन्यायवार्त्तिककारोप्याह। द्वयीविभक्तिःस्वादयस्तिबादयश्च। तत्रस्वाद्यन्तंनामतिबाद्यन्तमाख्यातम्। अभिधेयस्यक्रियान्तरयोगाद्विशिष्यमाणरूपःशब्दोनाम। यथाब्राह्मणइति। क्रियाकारकसमुदायःकारकसंख्याविशिष्टः। क्रियाकालयोगाभिधायिक्रियाप्रधान

माख्यातम्। यथापचतीति। अत्रवाचस्पतिमिश्राः। क्रियान्तरंक्रियाविशेषस्तत्संबन्धाद्विशिष्यमाणरूपःपर्यवसितार्थःशब्दो
नाम यस्याभिधेयंनियमेनक्रियाविशेषमाकाङ्क्षतितन्नामेतिफलितम्। यत्रापिक्रियापदंनास्तितत्राप्यस्तीत्यस्त्येव। उदाहरणं
ब्राह्मणइतिराज्ञःपुरुषइत्यादौराज्ञइत्यादेरपिपुरुषादिद्वारातदाकाङ्क्षत्वंबोध्यम्। यद्वातदभिधेयस्यराजेत्यादौतदाकाङ्क्ष
त्वम्। अथनामार्थमाह। क्रियेत्यादि। क्रियाजात्यादि। कारकंतदाश्रयः। सचव्यक्तिगतसंख्यायुतोनामार्थः। यद्वाकारकंकर्मादि
शक्तिः। संख्याग्रहणंलिङ्गस्याप्युपलक्षणम्। अयमव्ययातिरिक्तनामार्थइतिबोध्यम्। एवंचसर्वत्रनामपदेनाव्ययातिरि
क्तमेव। एवंचनामार्थादिव्युत्पत्तिषुअव्ययातिरिक्तत्वविशेषणदानमितिप्रलापएव। आख्यातलक्षणमाह। क्रियाकालेति।
क्रियायाःयःकालयोगःपौर्वापर्यक्रमःकालयोगेनतस्यभावात्। नेनघटादिनामव्यव च्छेदः। नन्विदंभुङ्क्तेत्यादावति
व्याप्तमतःक्रियाप्रधानमिति त्क्वान्तादौहिक्रियान्तरेणापर्यवस्यन्तीक्रियागम्यतेपचतीत्यादौतुनसर्वत्रतथा। क्वचित्तुत
त्संबद्धापियथापचतिभवतीति। एवंचयद्वाच्याक्रियाक्वचित्क्रियान्तरानाकाङ्क्षास्वयमेवप्रधानंतदाख्यातमितिफलित
म्। एतत्पक्षेपिकर्तव्यमित्यस्यनामलक्षणाक्रान्तत्वाभावात्। क्रियान्तरानाकाङ्क्षत्वाच्चाख्यातत्वमेवापततीति। एवंपच
तिरूपमित्यादेरपीति। अत्रक्रियाप्रधानमितिनिरुक्तसमानार्थमहाभाष्यसमानोकारशब्देननिरुक्तभाष्योक्तरीत्याप्रत्य

यार्थका लकारकसंख्यापेक्षया धात्वर्थप्राधान्यं सूचितम्। पञ्चमेन्यायभाष्येपि क्रियाकालयोगाभिधाय्याख्यात धात्वर्थमात्रंच कालाभिधानविशिष्टमिति। तत्रकालेनाभिधानेन कारकेण विशिष्टं धात्वर्थमात्रमाख्यातार्थ इति तदर्थः। तस्यैवव्याख्यानं क्रियाप्रधानमिति वार्त्तिककृताःचकृतम्। तत्रैवसूत्रेप्रघट्टकान्तरे वार्त्तिककारआह। विशेषणविशेष्यभावस्यैकविषयत्वाद्यदि गोशब्दस्य तिष्ठतिशब्दस्य चैकमभिधेयं भवति ततोविशेषणविशेष्यभावापन्नयोर्गोशब्द तिष्ठतिशब्दयोः सामानाधिकरण्यं युज्यते नान्यथेति। अनेनच स्पष्टमेव कारकस्य प्रत्ययार्थतोक्ताविशेषणताच। एवंचकृतिर्वाच्या प्रथमान्तविशेष्यको बोध इत्याद्यर्वाचीं शुष्कलाघवादितैकशरणानां कुकल्पना विलसितमिति स्पष्टमेव। पदसमयपरिपालनाय व्याकरणं प्रवृत्तमिति वदता वात्स्यायनेन स्पष्टमेव व्याकरणबोध्योऽर्थ ईश्वरसमयाविषय इत्युक्तम्। एवंचार्वाचीननैयायिकमीमांसकानां व्याकरणोक्तातिरिक्तेर्थे पचतीत्यादि प्रयुञ्जानानां याज्ञे कर्मणि प्रत्यवायो यज्ञवैगुण्यंच दुर्वारम्। तदतिरिक्तेऽर्थे तेषामसाधुत्वात्। नच निर्मूलमेतदनुशासनम्। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति श्रुतेर्मूलत्वात्। पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्। सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किंचनेति पराशरोपपुराणाच्च। साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिरित्यभियुक्तोक्तेश्च। उक्तवात्स्यायनोक्तेश्च। शक्तिग्रहं व्याकरणोपमानेत्यादिना वृद्धैर्व्याकरणस्य शक्तिग्राहकतो

क्तेश्च।नचासाधुत्वेएषांततस्तत्तदर्थबोधोनस्यादितिवाच्यम्।साधुत्वज्ञानस्यबोधककारणत्वाभावादसाधुत्वज्ञानस्यतत्प्रति
बन्धकत्वाभावाच्च।क्रियायाःकर्तृकर्मभावेनान्वयेपितदितरकारकत्वेनक्रियान्तरैःनन्वयात् क्रियानाधारकारकत्वेनान॰
न्वयाद्वा।लिङ्गसंख्यानन्वयाद्वा॰सत्त्वभूतत्वंबोध्यम्।यद्वोपमानभावस्तस्याअसत्त्वम्।अतएववरोदितीवपठतीत्यादौनो
पमा।कर्त्रीस्तुनसा।क्रियांप्रतिविशेषणत्वात्।तदुक्तंसन्सूत्रेभाष्ये॰नवैतिङन्तेनोपमानमस्तीतिकिंतुतत्रसंभावनार्थे
इवशब्दइतिकैयटः।तिङन्तेनशब्देनोपमानबोधोनास्तीतितद्व्याख्यार्थः।उपमेयत्वंत्वस्त्येव।ब्राह्मणवदधीतइत्यादौत
स्याप्रतीतेः।तथा।नद्यतनेलुङितिसूत्रेभाष्येइयंतुकदागन्तायैवंपादौनिदधातिइत्यादावद्यतनभविष्यद्विषयेलुट्कथ
मित्याशङ्क्यगन्तेवगन्तेत्यर्थेनवैतिङन्तेनोपमानमस्तीतिदूषयित्वा।नद्यतनइवानद्यतनइतिव्याख्यातम्।प्रयोगद
र्शनवशाज्ज्ञापेक्यनद्यतनेप्रत्ययइतिकैयटः।यथावैश्येनोनिपत्यादत्तेएवमयंद्विषन्तंभ्रातृव्यंनिपत्यादत्तेयमभिचरति
श्येनेनेत्यादौयथाशब्दस्यभेदकधर्मवद्वाचकतायाःप्रकारवचनेथालितिसूत्रस्याकरसंमतत्वेनयत्प्रकारवत्श्येनकर्तृकं
पत्यादानंतत्प्रकारवदेतत्कर्तृकंरिप्वादानमितिबोधोत्तरंतमेवधर्मंतत्प्रयुक्तामादानक्रियांवानिमित्तीकृत्यउपमानश्येनाभिन्नउ
पमेयोयमितिबोधः।लक्षणामूलशाब्दव्यञ्जनास्थलइवात्रापिबोधद्वयस्यशाब्दत्वम्।यथाशब्दसमभिव्याहारेसर्वत्रैवमेवबो

धद्वयंबोध्यम्। आदावेवोपमानत्वबोधेनवैतिङन्तेनेतिभाष्यविरोधः। कर्त्रोस्तुविशेषणत्वान्नप्राथमिकबोधेसा। थाल: सादृश्यार्थकत्वेयत्सदृशोहरिस्तत्सदृशोहरइतिबोधेपिहरिसदृशोहरइत्यर्थलाभइतिबोध्यम्। अतएवालंकारिकाअपिलिम्पतीवतमोङ्गानीत्यादावुत्प्रेक्षामेववदन्ति। हरिरप्याह। साध्यस्यापरिनिष्पत्तेःसोयमित्यनुपग्रहः। तिङन्तैरन्तरेणेवमुपमानं ततोनतैः। तिङन्तार्थस्यसाध्यत्वादपरिनिष्पत्तेःसिद्धत्वेनाभानात्तदर्थयोरिवमन्तरेणसिंहोमाणवकइतिवत्पठतिरोदितीत्यादौसोयमित्यभिसंबन्धाभावात्तिङन्तार्थोनोपमानम्। साधारणधर्मान्वयाभावात्। यस्योपमानस्यैवमन्तरेणोपमेयेनसहसोऽयमित्यभिसंबन्धस्तस्यैवसमभिव्याहारेउपमानत्वेनप्रतीतिरित्यङ्गीकारात्। ननुरोदितीवपठतीत्यादौकर्तुरेवतत्त्वंस्यादतउक्तम्। साधनत्वंप्रसिद्धंचतिङ्क्षुसंबन्धिनांयतः। तेनाध्यारोपएवस्यादुपमातुनकल्पते संबन्धिनांगुणभूतानाम्। अध्यारोपउत्प्रेक्षा। न्यूनत्वोत्कृष्टत्वाभावाच्चनोपमानत्वमित्याह। न्यूनेषुचसमानार्थमुपमानंविधीयते। क्रियाचैवाश्रयेसर्वातत्रतत्रसमाप्यते। येनैवहेतुनाहंसःपततीत्यभिधीयते। आतीतस्यसमाप्तत्वादुपमार्थोनविद्यतेइति। समानार्थंसाधारणंधर्मवत्। येनैवहेतुनापक्षादिनाहंसइवातिःपततीत्यत्रतुसाधनयोरुपमानोपमेयभावइतिहेलाराजः। पचतिकल्पंदेवदत्तइत्यादावप्याख्यातार्थेदेवदत्तस्यविशेषणतेतिबोध्यम्। नन्वेवंपचतिभवतीत्यादौसमानवाक्येतिङ्द्वयलाभेनतद्वारत्यर्थंतिङ्ङः तिङ्इतिसूत्रेः त्ति

CC-0. In Public Domain. Digitization by eGangotri

ङ्ग्रहणस्यावश्यकत्वेनतत्प्रत्याख्यानपरभाष्यविरोधइतिचेन्न।लौकिकैकवाक्यत्वसत्त्वेपिएकतिङ्वाक्यमितिपरिभा
षितस्यासत्त्वमितिभाष्याशयात्।लौकिकवाक्यत्वंचसुप्तिङन्तचयोवाक्यंक्रियावाकारकान्वितेत्यमरोक्तम्।अत्रवाशब्द
श्चेदर्थेबोध्येतिशेषः।कारकान्वितक्रियाबोधकसुप्तिङन्तचयोवाक्यमित्यर्थः।सुप्चतिङ्चसुप्तिङ्।सुब्विशिष्टंतिङ्सुप्तिङ्
तयोरेकशेषेन्तशब्देनसमासः।तेनसुबन्तचयतिङन्तचयसुप्तिङन्तचयानांत्रयाणामपिलाभः।तत्रसुबन्तचयश्चैत्रेणश
यितव्यमिति।तिङन्तचयःपचतिभवतीत्यादि।अन्त्यश्चैत्रःपचतीति।क्रियावेत्यनेननिरर्थकपदसमुदायव्यावृत्तिःसुप्तिङन्त
चयपदेनकेवलस्यपचतीत्यादेर्व्यावृत्तिः।तस्यापिकर्त्रादिविशिष्टक्रियाबोधकत्वात्।एतदेवैकोद्देश्यकैकविधेयकत्वगर्भमे
कवाक्यलक्षणम्।तदुक्तंहरिणा।साकाङ्क्षावयवंभेदेपरानाकाङ्क्षशब्दकम्।क्रियाप्रधानंगुणवदेकार्थंवाक्यमुच्यतइ
ति।वाक्यमित्यस्यैकवाक्यमित्यर्थः।अर्थैकत्वादेकंवाक्यंसाकाङ्क्षंचेद्विभागेस्यादितिजैमिनिसूत्रात्।गुणवदित्यस्यसा
क्षात्परंपरयावायद्विशेषणंतद्वदित्यर्थः।यत्त्वमरेक्रियावेतिलक्षणान्तरमर्थनिष्ठवाक्यत्वबोधकमितितन्न।वचोऽशब्द
संज्ञायामितिकुत्वनिषेधेनार्थेवाक्यशब्दाप्रयोगादितिसमर्थसूत्रस्यभाष्यप्रदीपोद्योतेविस्तरः।संख्यातुआख्यातार्था
श्रयविशेषणम्।लःकर्मणितिप्तस्झिद्व्येकयोरित्येषामेकवाक्यतयाएकत्वादिविशिष्टकर्त्रादौतद्विधानादितिकेचित्।प

रेतुलः कर्मणीत्यनेनवाक्यैकवाक्यतालकाराः कर्मादौ भवन्तितेषांचस्थानेएकत्वादौतिबादयइत्येवंरूपा। नहितत्रद्वितीयंक
र्मणीत्याद्यस्तियस्यसंख्याविशेषणंस्यात्। आवृत्तौचनमानम्। तस्मास्मात्संख्यायाधात्वर्थेन्वयः। कस्यैकत्वादावित्याका
ङ्क्षायामुपस्थितप्रकृत्यर्थस्यैवान्वयौचित्यात्। प्रकृत्यर्थगतैकत्वादावित्येवार्थः। एवंचसुप्तिङ्विषयेतेषामेकरूपताभ
वति कर्मणीत्यादेरपिविधेयंप्रतिगुणत्वाद्गुणानांचपरार्थत्वादितिन्यायेनसंख्ययातदसंबन्धात्। कर्मणीत्यादेरपिकस्येत्या
काङ्क्षासत्त्वेन तत्रधात्वर्थान्वयस्यक्लृप्तत्वाच्च। कर्मणिद्वितीयेत्यादौप्रातिपदिकार्थस्यैवकर्मत्वशक्तिमत्त्वेनकर्मणएक
त्वेद्वितीयेत्यादिभाष्यादिग्रन्थानांनासंगतिः। स्वप्रकृतिकप्रत्ययवाच्यसाधनगतसंख्यायास्तत्रारोपात्। नह्येकत्वादिसंख्या
बाधस्तत्र। ध्वनितंचेदंयग्विधायकेकैयटेन। अथैकपदवाच्यसाधनगतसंख्याश्रयंद्विवचनादीतिपक्षइतिवक्त्ता। अतएव
साधनेनद्वित्वादिसंशयः क्रियागतसंख्यारोपस्यसाधनगतसंख्याज्ञाननिमित्तत्वात्। शाब्दशक्तिस्वभावाच्चनभिन्नपद
वाच्यसाधनगतसंख्यायास्तत्रारोपोऽतोनभावेद्विवचनादि। अनेकः पचतीत्यादौसाधनेप्यारोपितसंख्यायाएवतत्रप्रती
तेः। पञ्चकृत्वः पच्यतइत्यादौपदान्तरसमभिव्याहारेणसंख्यावगमेपिनबहुवचनं लक्ष्यानुसारेणापदसंस्कारपक्ष
स्यैवाश्रयणात्। धातुनाचस्वतोनिवृत्तभेदैवक्रियोच्यते। तदुक्तंहरिणा। एकत्वेपिक्रियाख्यातेसाधनाश्रयसंख्ययाभि

CC-0. In Public Domain. Digitization by eGangotri

घतेनतुलिङ्गाख्योभेदस्तत्रतदाश्रयइति।अत्रहेलाराजः।एकपदोपात्तकर्तृकर्मलक्षणसाधनाधारकद्वित्वबहुत्वाभ्यांपचतःपचन्तिपच्येतेपच्यन्तइतिक्रियाविशेष्यतेनहिद्विबहुसाधनसाध्यत्वंप्रतीयतेक्रियायाः।एवंतद्गतलिङ्गयोगेनशाब्दार्थप्रतीतेःस्वाभाविकत्वेनयुक्त्यगम्यत्वात्।अतएवदेवदत्तःपचतीत्यादौद्रव्येणक्रियायाःसामानाधिकरण्यम्।अतएवद्रव्यवादिनामाख्यातार्थोपि द्रव्यमितिस्वीकारइतितथा संबन्धाज्ज्ञातभेदोयमितिहरिकारिकाप्रतीकमुपादाययथाख्यातेप्रत्ययवाच्यकारकभेदेसतितत्संबन्धाद्धात्वर्थक्रियाया अपिभेदःप्रतीयते यथापचतःपचन्तीतीति पुञ्जराजः।अतएवघटपटौनस्तइत्यादौव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावप्रतीतिरितिसंगच्छते।यत्रतुभावेलेपिसंख्यावगमस्तत्रभवत्येवबहुवचनंयथाहतशायिकाःशय्यन्तइत्यादौ तत्रहियादृशानिहतानांशयनानितादृशानिशयनानीत्यर्थः।तत्रोपमानबहुत्वेनोपमेयेपितत्प्रतीतेः।अन्यथाउपमानेबहुत्वोपादानंव्यर्थंस्यात्।नचसंख्यावान्सत्त्वभूतोर्थःसर्वएवाभिधीयते।भेदाभेदविभागोपिलोकेसंख्यानिबन्धनइतिसंख्यासमुद्देशेहर्युक्तेः कथमसत्त्वभूतक्रियायाःसंख्यावत्त्वम्।इदंतदितिसर्वनामपरामर्शयोग्योऽर्थःसत्त्वभूतस्तत्रद्वित्वादिभेदव्यवहारकृत्।एकत्वंचाभेदव्यवहारकृत्।नचराजपुरुषादिवृत्तावुपसर्जनार्थेसंख्यानवगमात्सर्वएवेत्यनुपपन्नम्।तस्याप्यर्थस्यवाक्येपृथगुपस्थितौतदवगमसत्त्वादितिवाच्यम्।यथान्यायनये

वै॰म॰ गुणत्वाद्द्रव्यगतयैवसंख्ययाआरोपेणगुणादौद्वित्वादिव्यवहारस्तथाममक्रियायामपितत्संभवात्।क्रियायांतद्योग्य
१६ त्वव्यवहारश्चानारोपितसर्वसंख्याश्रयत्वेनबोध्यः।नचन्यायनयेगुणादावपेक्षाबुद्धिविशेषविषयत्वरूपागौणीसंख्यान
तुद्रव्यगतायाआरोपइतिवाच्यम्।अयमेकोऽयमेकइत्यादिबुद्धेरेवतत्रापेक्षाबुद्धित्वेनगुणादौतस्याअभावात्।एकत्वस्या
पिगुणरूपत्वेनगुणादावसंभवेनतथाबुद्धेरसंभवात्।किंचैवंतेनैवद्रव्येपितद्व्यवहारोपपत्तावतिरिक्तसंख्यापदार्थविलया
पत्तेः।एवंचतिङर्थप्रकारकबोधेधातुजंज्ञानंकारणमित्येकएवकार्यकारणभावइतिलाघवम्।प्रत्ययानांप्रकृत्यर्थान्वितस्वा
र्थबोधकत्वव्युत्पत्त्यभङ्गश्च।अतएवङ्याप्सूत्रेभाष्येतत्सूत्राभावेपचतिपश्यत्यादौतिङन्तात्टाद्युत्पत्तिमाशङ्क्यैकत्वादी
नामुक्तत्वान्नेत्युक्तम्।नवतुतिङांकर्तृगतायाउक्तत्वेपिक्रियागतायाअनुक्तत्वात्तदापत्तिर्दुर्वारा।सुपांप्रकृत्यर्थविशेष्यगतसं
ख्याभिधायित्वात्।तथारूपप्सूत्रेतिङन्तप्रकृतिकरूपबाद्यन्तेपचतिरूपंपचतोरूपमित्यादौसंख्यालिङ्गाभावादसोऽनु
पपत्तिमाशङ्क्यक्रियाप्रधानमाख्यातंक्रियाचैकानद्वित्वादिमती।तिङन्ताट्टानवगतेःक्लीबत्वंचस्वभावादितिसमाधाय राम॰
यद्येकापचतइत्यादौकथंद्विवचनादीत्याशङ्क्यसाधनापेक्षंतदित्युक्तम्।तत्स्वसाधनान्वयीतिनार्थः।एकत्वंक्रियान्वयि
द्वित्वादिसाधनान्वयीतिवैरूप्यापत्तेः।तस्मात्साधनगतसंख्यारोपापेक्षमित्यर्थउचितः।यत्त्वनभिहितसूत्रेभाष्येप्रातिप १६

दिकार्थसूत्रेऽनुवृत्तमनभिहित इति अन्यस्यासंभवात्संख्याया एव विशेषणं स्यात्। एवं च पचत्योदनं चैत्र इत्यादावेकत्वा
दीनामुक्तत्वात्प्रथमा न स्यादित्युक्तम्। तस्यायंभावः। साधनगतसंख्यारोपनिमित्तत्वेन वस्तुतः साधननामार्थगताया
उक्तत्वमेकवचनमपि साधने हित्वाद्यभावबुद्धिनिमित्तके तदनारोप एव वक्ष्यमाणयुक्तेः। एवं च तदभावबुद्धौ द्रव्यस्य निः
संख्यत्वाभावेनैकत्वमप्यवगतमेव साधने इतीति न तद्विरोधः। अन्यथा तिङर्थाश्रयगताया उक्तत्वेपि चैत्रत्वविशिष्टरूपना
मार्थगताया अनुक्तत्वात्तत्रापि तदसंगतिरेव। पचतोरूपमित्यादौ द्विवचनादि तु न। द्वयोरेकस्य बहुषु त्रयाणामष्टानामि
त्यादिनिर्देशैः प्रातिपदिकार्थसूत्रे प्रवृत्तिनिमित्तभूतसंख्याबोधकवचनशब्देन च संख्याप्रवृत्तिनिमित्तके पुन केवलाप्र
कृतिरिति समयस्यानुवादकविभक्त्यैव पालनेपि अन्यत्रौत्सर्गिकैकवचनेनैव तत्पालनं लक्ष्यानुसाराद्भाष्यप्रामाण्याच्चेति
बोध्यम्। एवं च भावे स्वगतैकत्वेनैवैकवचनम्। अन्यथा तत्र पचति भवति पचतो भवतीत्यादौ भवत्यर्थसंख्यान्वयः कस्यात्।
भवतिः पुनर्वर्तमानकालं चैकत्वं चेति भाष्येण तस्य संख्यार्थकत्वबोधनात्। पचतो भवत इति तु न। आरोपितस्यान्यत्रारोप
दर्शनात्। तादृशस्यारोपे मानाभावाच्च। अत्र चेदमेव भाष्यं मानम्। किंच करोतिः पचादीनां सर्वान्कालान्सर्वाणि वचनान्यनु
वर्तत इत्यत्र भाष्ये श्तिपा निर्देशादिना धात्वर्थ एव कालान्वयवत्संख्यान्वयः स्पष्टमुक्तः। वचनं संख्या। पचत इत्यादौ तु नस्व

गतैकत्वप्रयुक्तमेकवचनम्। गौणीमुख्यावोत्तरासंख्यापूर्वसंख्यांबाधतइत्यइउणसूत्रेभाष्योक्तेः। नचकिंचिद्व्ययं
विभक्त्यर्थप्रधानंकिंचित्क्रियाप्रधानम्। उच्चैरित्याद्याद्यम्। हिरुगित्याद्यन्त्यम्। तिबन्तमपिकाण्डेइत्यादिविभक्त्यर्थप्रधा
नंरमतेइत्यादिक्रियाप्रधानम्। नचैतयोरर्थयोर्लिङ्गसंख्याभ्यांयोगइतितद्धितश्चेतिसूत्रस्थभाष्यविरोधइतिवाच्यम्।
तत्राव्ययेषुकाण्डेइत्यादौचोभयायोगोरमतेइत्यादौलिङ्गायोगइत्यर्थात्। प्रायेणेतिचशेषः। अन्यथाहन्तशायिकाःश
य्यन्तेपचतिरूपमित्यादौताभ्यांयोगेनतदसंगतेः। अनारोपितैकत्वातिरिक्तसंख्ययाऽयोगइतिवातदर्थः। नचैवंनवेति
ङन्तान्येकशेषंप्रयोजयन्तिक्रियायाएकत्वादितिसरूपसूत्रस्थभाष्यासंगतिरितिवाच्यम्। स्वतोऽन्यसंख्यायाअसत्त्वा
त्। आरोपितसंख्यामादायतुनानेकशब्दप्रवृत्तिः। अतएवजातिपक्षेसूत्रप्रत्याख्यातंजात्याश्रयगतसंख्यायाआरोपेप्य
नेकशब्दाप्रवृत्तेः। अन्यथानदसंगतिः स्पष्टैवेत्यदोषात्। अतएवविधिनिमन्त्रणेतिसूत्रेविध्यादिषुवाच्येषुलिङःप्रवर्त
नायाएकत्वाद्द्विवचनाद्यनापत्तिरितिदूषणमभिहितंभाष्ये। तेनहितिङर्थसंख्यायाआख्यातजन्यबोधविशेष्येऽन्वय
इतिसूचितम्। यत्तुकैयटेनकर्त्राद्यर्थानांविधिरूपार्थेनबाधस्तेननकर्त्रादिगतसंख्यानिबन्धनंद्विवचनादीतितदाश
यउक्तः। विरोधाभावाल्लःकर्मणीतिसूत्रेलइतिबहुवचनाच्चनतद्बाधइतिसिद्धान्ताशयउक्तस्तन्न· प्रवर्तनायाएकत्वादिति

CC-0. In Public Domain. Digitization by eGangotri

भाष्यासंगतेः। तिबादेरप्यनापत्तेश्च। भावकर्मकर्त्रर्थकलस्यैवात्मनेपदपरस्मैपदविभागेन तद्विधानाद्युष्मदस्मच्छेषसामानाधिकरण्याभावेप्रथमपुरुषाद्यनापत्तेश्च। अर्थनियमेऽउपपदनियमेप्यनियमापत्तेश्च। सिद्धान्ताशयोप्ययुक्तः। अविरोधेपितर्केणदृष्टोबाधदर्शनात्। एतावांश्चलः लएवेनुसाधनेषुयथास्यात्। यावद्व्यलग्रहणमितिलः कर्मणिचेति सूत्रस्थभाष्येणलडित्यस्यप्रथमैकवचनान्ततायाएवबोधनाच्च। कर्त्रादिगतसंख्यायाः स्वनिष्ठधात्वर्थेआरोपवत्तद्विषयप्रवर्त्तनायामारोपेनमानमित्याहुः। कालान्वयस्तु धात्वर्थव्यापारे नफलेनापिकारके। तेनव्यापारापगमेविक्लित्तिसत्त्वेपच्यतइतिस्यात्पाचीतिचनस्याद्‌तीतक्रियेकर्तरिचपचतीतिस्यादित्यपास्तम्। सचद्योत्यएव। विशेषणतयाऽन्वयानुभवात्। वर्तमानक्रियावाचकाद्धातोर्लडित्यादिर्वर्तमानेलडित्यादेरर्थः। एकधातुप्रकृतिकानेकलडादेशानांतत्रशक्तिकल्पनेगौरवाच्च। आमवातजडीकृतकलेवरेउत्थानानुकूलयत्नसत्त्वेपिनोत्तिष्ठतीतिप्रयोगः। तस्योत्थानोद्देश्यकत्वेपितत्प्रयोजकत्वाभावात्। अतएवतत्रोत्थानाययततइत्येवप्रयोगः। यागपाकाद्युद्देश्यककुण्डमण्डपतण्डुलक्रपणादिव्यापारमादाययागाद्यर्थंयततइत्यादिवद्यजतीत्यादिवारणायप्रयोजकताविशेषस्यैवसंबन्धतायाअभ्युपेयत्वात्। तत्राभिमतफलजननेसतितन्निष्पादकसकलव्यापारापगमेभूतत्वम्। फलावच्छिन्नतादृशसकलव्यापारस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भावित्वेभविष्यत्वम्।यावच्चाभिमतफलप्रयोजकक्रियायाःसमाप्तिर्नभवतितावद्वर्तमानत्वमित्याद्यनुपदंवक्ष्यामः।
एवंचचैत्रःपचतीत्यादौएकचैत्रकर्तृकैकावर्तमानापाकक्रियेतिबोधः।ननुधात्वर्थविशेषणतयैवबोधविषयेकर्त्रादौक
र्थंचैत्रइत्याद्यर्थस्यविशेषणतयान्वयइतिचेन्न।सामान्यरूपस्यार्थस्यानियमेनविशेषाकाङ्क्षाबलाद्विशेषणभूतेना
पितेनविशेषणतयातदन्वयात्।यथानियताकाङ्क्षावशादेवचैत्रेणगतोग्रामइत्यादौविशेषणभूतक्रियायांकारकाका
रकान्वयस्तद्वत्।नन्वेवंकर्तुःक्रियान्तरेणापिसंबन्धःस्यात्।एवंचपचतिपठतीत्याद्यपिस्यात्।एककर्तृकपाठक्रियाक
र्तृकापचिक्रियेतिबोधसंभवादितिचेन्न।तदाकाङ्क्षाभावात्।अतएवक्रियायाःकारकनिरूपिताप्राधान्याभावस्यनभ
ङ्गः।यथावनितास्वाकाङ्क्षितस्नानादिसंस्कारंपत्युःसहतेनवनितान्तरसंबन्धंस्वानाकाङ्क्षितंतद्वत्।तण्डुलः
पच्यतेचैत्रेणेतिकर्मलकारेतुएकचैत्राश्रयिकावर्तमानायाभावनातज्जन्याएकतण्डुलाश्रयिकैकाविक्लित्तिरितिफ
लविशेष्यकोबोधः।पक्वस्तण्डुलइत्यादौफलस्यविशेष्यतायाआवश्यकत्वात्।अतएवप्रत्ययार्थेसाक्षात्प्रकृत्यर्थ
विशेष्यान्वयित्वस्यसर्वत्रक्लृप्तस्यनत्यागः।अन्वयित्वंविशेष्यतयाविशेषणतयावा।अतएवकर्तृलकारेनफलविशे
ष्यकोबोधः।एतेनकर्मलकारेपिभावनाविशेष्यकोबोधइत्यपास्तम्।अतएवेष्यतेपुत्रइत्यर्थेपुत्रीयतीतिनप्रयोगोभि

न्नार्थत्वात्। किंतु पुत्रमिच्छतीत्यत्रार्थ एव। क्यजन्तात् कर्मणि प्रत्ययस्तु दुर्लभोऽकर्मकत्वादिति स्पष्टं सुप आत्मन इत्यत्र
भाष्ये। अन्यथोभयत्रापि पुत्रकर्मकेच्छानुकूलो व्यापार इति बोधेन भिन्नार्थत्वासंगतिः। इच्छानुकूलो व्यापारश्चात्म
मनःसंयोगादिरेव। ममत्वकत्रव्यापारो विशेष्योऽपरत्र फलमिति भिन्नार्थत्वं स्पष्टमेव। उक्तंच कैयटेन यदा क्रियाफ
लस्य प्राधान्यं तदा वाच्यमेव इष्टः पुत्रः इष्यते पुत्र इति न तु क्यजन्तः। तस्याकर्मकत्वात्कर्मणि प्रत्ययानुत्पादादितीति
दिक्। भावलकारे तु भावनैव विशेष्या। तथैवानुभवात्। तिङ्त्वनुवादक एव। कालद्योतकश्च। क्रियाया एकत्वादेकवचन
मेवेत्युक्तम्। अन्ये तु क्रियासंख्याऽयोग्येति मत्वा औत्सर्गिकमेकवचनम्। संख्यान्वयिकर्तृकर्मणोरप्रतीतेः। मध्य
मोत्तमावपि न। तिङ्समानाधिकरणयुष्मदाद्यभावादित्याहुः तदयुक्तमित्युक्तम्। अत एवाव्ययेभ्यः संख्याद्यभावा
द्वचनानुत्पत्तिमाशङ्क्यैवौत्सर्गिकमेकवचनमुक्तं भाष्ये न तु भावार्थेभ्योऽपि तदनुत्पत्तिमाशङ्क्येति बोध्यम्। ननु
भावे प्रथमोऽपि न स्यात्तस्यापि शेषे नियमत्वादिति चेन्न। शेष इति पदं त्यक्त्वा प्रथमस्योत्सर्गतया भाष्ये उक्तत्वेनादो
षात्। सूत्रे शेष इत्यवयुत्यानुवाद इत्याहुः। यदा तु सकर्मकाणामपि सौकर्यातिशयविवक्षया कर्तृव्यापारत्यागे
धातोः फलसमानाधिकरणव्यापारपरत्वेन फलमात्रपरत्वेन वा कर्मणः कर्तृत्वविवक्षा तदा कर्मस्थक्रियाणां पच्या

दीनांलवाच्यकर्तुःकर्मवद्भावेनपच्यतेओदनःस्वयमेवेतिप्रयोगोऽन्येषांतुपश्यतिराजेति।विक्लिद्यते ज्ञानविषयोभवतिचार्थः।अ
त्रचस्वयमेवेतिकर्त्रन्तरनिवृत्तौतात्पर्यग्राहकम्।नचैकस्यधातोरर्थत्यागपूर्वकमर्थान्तरेवृत्तौशब्दार्थसंबन्धनित्यताहा
निरितिवाच्यम्।धात्वन्तरत्वात्।डुपचष्पाकइत्यादिस्तुतन्त्रेणनिर्देशः।तदुक्तम्।एकदेशेसमूहेचव्यापाराणांपचादयः।स्वभा
वतःप्रवर्तन्तेतुल्यरूपंसमाश्रिताइति।यत्रकर्मणिक्रियाकृतोविशेषःप्रत्यक्षगम्यस्तत्रकर्मस्थाक्रिया।तत्रैवकर्मवद्भावः।
यथापक्वापक्वातण्डुलेषुच्छिन्नाच्छिन्नकाष्ठेषु।गमिदृश्यादिषुतुनैवम्।नहिगतागतग्रामेदृष्टादृष्टवस्तुनिवाकश्चित्प्रत्यक्ष
गम्यस्तत्कृतविशेषोऽस्ति।क्वचित्कर्तरितत्कृतश्रमादिरूपोविशेषोदृश्यतेइतिकर्तृस्थैवसा।अत्रयद्वक्तव्यंतदुक्तंप्राक्।
नदयमत्रानुगमः।निर्वर्त्यविकार्यकर्मणिकर्मस्थाप्राप्येतुनेति।तदुक्तम्।क्रियाकृतविशेषाणांसिद्धिर्यत्रनलक्ष्यते।दर्शनाद
नुमानाद्वातत्प्राप्यमितिकथ्यतेइति।निर्वर्त्येस्वरूपलाभएवक्रियाकृतविशेषोविकार्येविकाररूपएवसः।आद्योघटंकरोति।
अन्त्येस्वर्णंकुण्डलंकरोतिकाष्ठंभस्मकरोति।अनुमानाद्यथा।पुत्रःसुखंकरोतीत्यादौसुखस्वरूपलाभोसुखप्रसादानुमे
यः।एतद्दहितंप्राप्यंयथारविंपश्यतीति।यद्यपिविषदृष्टिसर्पदृष्टेविषज्वालावलीढतारूपोविशेषोदृश्यते तथापिनसर्वत्रत
त्सत्त्वमितिभावः।अत्रवस्तुनोदृश्यस्वभावताआलोकोदर्शनयोग्यदेशावस्थितिर्दर्शनकारणंबोध्यमितिदिक्।ननुको

CC-0. In Public Domain. Digitization by eGangotri

सौकालोयस्यवर्तमानादिभेदेनत्रैविध्यमितिचेदुच्यते। प्रकृतेःपरिणामस्यातिभङ्गुरस्यविभोःक्षणस्यकालत्वात्। तस्यैव
चक्षणस्यप्रचयविशेषैर्लवपलघटीमुहूर्ताहोरात्रादिद्विपरार्धान्तव्यवहारस्तेचक्रमिकानेकक्षणावयवकाबौद्धाःक्षण
समाहाराःक्षणप्रवाहाविच्छेदरूपाःतत्तत्स्थानीययन्त्रादिपरिच्छिन्नाःकिंचित्क्षणसमूहपरिच्छिन्नासूर्यादिक्रियाचनि
मेषादिपरार्धपर्यन्ततद्भेदानुमापिका। क्षणानांत्वतीन्द्रियतयाःनत्वमेयत्वेनचास्मदादीन्प्रत्यहराद्युपाधित्वासंभवात्।
अतीन्द्रियद्रष्टृभिर्योगिभिस्तत्तत्क्षणसमूहपरिच्छिन्नसूर्यक्रियापरिच्छिन्नत्वमहरादीनांज्ञातत्वाततत्कालनियामक
त्वेनयन्त्रपानीयपलानांछायादीनांचनिर्णयपूर्वकंनियमनात्। यद्वाशब्दतन्मात्रपरिणामएवदिग्वत्कालः। अतएव
सांख्यशास्त्रे आकाशत्वेनैवतत्त्वेषुतयोर्गणनंकृतम्। भूतादिव्यवहारासाधारणहेतुत्वंसकलपरिणामहेतुत्वंचिरक्षि
प्रव्यवहारहेतुत्वंचलक्षणम्। तदुक्तंक्षणतत्क्रमयोःसंयमाद्विवेकजंज्ञानमितिपातञ्जलसूत्रभाष्येद्वतरेतरव्यावृत्त
तयासर्ववस्तूनामशेषविशेषैःसाक्षात्करणरूपसत्त्वपुरुषान्यताख्यातिरूपाद्विवेकाज्जायमानंज्ञानंक्षणतत्क्रमयोःसं
यमादपिभवतिप्रतिक्षणंसर्ववस्तुपरिणामात्। तत्रक्षणोनामकालस्यतद्द्वारारूपस्यापकर्षावधिभूतःपूर्वापरांशशून्यःक्र
मस्तुतत्प्रवाहाविच्छेदरूपः। मुहूर्ताहोरात्रादयोबुद्धिसमाहाराएव। क्षणिकत्वादेववस्तुतस्तन्मिलनासंभवात्। क्षणस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वस्त्वेव प्रकृतेः शब्दतन्मात्रद्वारापरिणामविशेषः।आनन्तर्यरूपक्रमस्यक्षणरूपप्रतियोग्यनुयोगिघटितत्वेनतस्यवस्तु
त्वात् सएवास्माकमास्थिरोनतु पदार्थमात्रमितिबौद्धमताद्विशेषइत्यादिनासचायमुक्तः कालोभावमात्रस्योत्पत्तिस्थिति
नाशहेतुः शरदादिरूपेणाम्रादीनांपुष्पफलप्रसवशक्तीः प्रतिबध्नातिवसन्तादिरूपेणचताअनुजानातीति तन्नितयहेतु
तातस्य।तत्रजन्महेतुतोक्ता।एवंस्थितिरपिनियतकालानदधीनैव।एवंवृद्धिक्षयनाशाद्यपितदधीनम्।घटीयन्त्रसदृशी
भिर्वसन्तादिप्रवृत्तिभिःसकलामूर्तीस्तत्तदवस्थारूपेणप्रतिक्षणंपरिणामैः कलयतीतिकालइत्युच्यतेक्षणानांक्रमि
कत्वात्तस्यक्रमवत्ताक्रियाभेदोपाधिकीचतत्तत्क्षणसमुहस्यवसन्ताद्याख्या। किंचाक्रमब्रह्मविवर्तस्यविश्वस्ययदिदं
क्रमेणभासनंतत्कालाख्याविद्याशक्तिकृतमेव।एवमेवाधिकक्षणसमूहापेक्षाचिरमपचितक्षणसंतानोपाधिकंक्षिप्रमि
तिचिरक्षिप्रव्यवहारोप्याञ्जस्येनोपपद्यते।अतएवरामायणेहिरण्यगर्भदूतत्वेनागतस्यकालस्यरामंप्रतिवाक्यम्।तवाहं
पूर्वसद्भावेपुत्रः परपुरंजय।मायासंभावितोवीरकालः सर्वसमाहरइति। पूर्वसद्भावेसत्तारूपब्रह्मसद्भावे। करिष्यमाणसं
सारस्यानुज्ञाप्रतिबन्धाभ्यांसृष्टिस्थितिसंहारनिग्रहानुग्रहनिर्वाहकःकालाख्योमायायाःपरिणामइतितदर्थइतिदिक्
॥यत्तुप्रसिद्धपरिमाणास्सूर्यक्रियैवक्रियान्तरपरिच्छेदहेतुत्वात्कालःकालत्वेनैवरूपेणतस्याःकालिकसंबन्धावच्छिन्ना।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धारतावत्त्वेनैतन्क्रियायांघटइतिनप्रयोगइतिचेन्न। क्रियायास्त्रिक्षणावस्थायित्वेनक्षणव्यवहारानापत्तेः। नचोत्तरदेशसंयोगाद्यवच्छिन्नक्रियाक्षणइतिवाच्यम्। विशिष्टक्रियाया विशेष्यविशेषणतत्सम्बन्धरूपत्वेनत्रयाणामपिस्थिरत्वेनक्षणव्यवहारासंभवात्। यदिविशिष्टमतिरिक्तंतर्हिपरिभाषामात्रमतिरिक्तोनकालइति। किंचैकक्षणेऽनेकासामुत्तरदेशसंयोगावच्छिन्नक्रियाणांजायमानत्वेनविनिगमनाविरहात्तावतीनांक्षणत्वापत्तौयुगपदनेकक्षणव्यवहारापत्तिः। सूर्यक्रियापरिमाणत्वस्यापिक्रियान्तरादौस्वीकारेऽनवस्थापत्तेश्च। नचवर्तमानेलडितिसूत्रभाष्येतस्थुःपर्वताःस्थास्यन्तिपर्वतास्तिष्ठन्तिपर्वताआत्माऽस्तिएकोऽहंवैनारायणआसीदित्युपपत्तयेभूतभविष्यद्वर्तमानानांराज्ञांयाःक्रियास्तास्तिष्ठतेरधिकरणमित्युक्तम्। यद्यपिपर्वतादेःस्थितिसत्तारूपाव्यापाराःसदृशावयववत्त्वाद्दुरवधारभेदाइतितत्रकालभेदाभावः। तथापिराजक्रियाविसदृशसंतानतयाऽवधृतभेदायथाऽधिश्रयणादिविसदृशस्वभावावयवक्रियाःपाकादयःप्रसिद्धकालभेदाइतिसहचरिताभिस्ताभिःपर्वतादिस्थितिर्भिद्यतेराजक्रियाःपर्वतादिस्थितिभेदकत्वेनाश्रीयन्तइतितदाशयस्तदसंगतिरितिवाच्यम्। तत्रक्रियापदस्यतत्परिच्छेदककालपरत्वेनतदीयकालस्यपर्वतादिस्थितितावात्मसत्तायांचारोपइत्याशयात्। नित्योविभुरखण्डःकालइतितुनयुक्तम्। कालस्याधिकरणत्वेनैवतत्तत्कार्यंप्रतिकारण

CC-0. In Public Domain. Digitization by eGangotri

तयोपाध्यनालिङ्गितस्येदानींघटइत्यादिव्यवहारोपयोग्यधिकरणतासंभवेनापरिच्छिन्नसूर्यक्रियायाउपाधित्वासंभ
वेनतत्परिच्छेदकान्तरस्वीकारेऽनवस्थापत्त्यादोषात्। अद्वैतवादेतदसंभवाच्च।अतएवकालाःपरिमाणिनेतिसूत्रेभाष्यं
येनमूर्तीनामुपचयाश्चापचयाश्चलक्ष्यन्तेतंकालमित्याहुस्तस्यैवहिकयाचित्क्रिययायुक्तस्याहरितिरात्रिरितिचभव
तिकयाक्रिययाआदित्यगत्यातयैवासकृदावृत्तयामासइतिसंवत्सरइतिचभवतीति।अत्रोपचयादिहेतुत्वेनलक्षित
स्योपाधिकभेदकथनात्स्पष्टमेवाविच्छिन्नक्षणधारारूपत्वमुक्तम्।अतएवदेवीपुराणेविभुर्नित्योऽस्थिरःकालोऽव
स्थातस्यतुहेतुजेत्युक्तम्।तत्रनित्यत्वमविच्छिन्नधारारूपत्वेनबोध्यम्।अस्थिरत्वेनचस्पष्टक्षणरूपतोक्ता।क्षणसमू
हरूपश्चसषडिन्द्रियवेद्यः।इदानींपश्यामिस्पृशामिजिघ्रामीत्यादिव्यवहारादित्यलम्।तत्रवर्तमानत्वंप्रारब्धापरिस
मासक्रियाधिकरणसमयत्वम्।तदुक्तंभाष्येन्याय्यात्वेषांवर्तमानकालता।आरम्भानपवर्गात्।अवश्यंभुञ्जानोहसति
जल्पतिपिबतिनिमिषतिचेति।नान्तरीयकत्वात्तासांनभेदकत्वमितिभुङ्क्तेइत्युपपत्तिः।फलावसानःक्रियासमूहश्च
क्रिया।यद्वातासामपितदनुकूलत्वेनभुज्यादिधात्वर्थत्वाविवक्षेतितद्भावइतिकैयटः।भूतत्वंविद्यमानध्वंसप्रतियोगित्व
म्।भविष्यत्त्वंवर्तमानप्रागभावप्रतियोगिसमयत्वम्।प्रागभावपदव्यवहार्यतायाःक्वचित्स्वीकारावश्यकत्वेनसनास्ती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्यसंगतमेव। तदाश्रयस्यतत्तत्कालस्यधात्वर्थव्यापारेन्वयइत्युक्तम्। कालघटितलक्षणादेवभूतइत्यस्यानद्यतनइत्यादिविशेषणम्। अनद्यतनभिन्नेइत्यादितदर्थः। अद्यतनत्वंचतस्यव्यपदेशिवद्भावेन। अद्यत्ववर्तमानत्वादिकालगतमितिलुङ्वर्तमानेलडित्यनयोर्भाष्येस्पष्टम्। एतेनवर्तमानध्वंसप्रतियोगित्वंभूतत्वम्। प्रारब्धापरिसमाप्तत्वंवर्तमानत्वम्। वर्तमानप्रागभावप्रतियोगित्वंभविष्यत्त्वंसकलभावगतम्। कालस्यतुनत्तद्भावोपाधिकंतत्त्वम्। वर्तमानाद्यवस्थयागृहीतेघटादिस्वरूपंस्वाधारेकालेआरोप्यतत्रवर्तमानत्वभूतत्वग्रहः। समर्थहेतुसंनिधानेभावित्वेनयद्रूपंबुद्धौनिश्चितंतत्प्रतिबिम्बस्यनिर्मलादर्शरूपकालेसंभवाद्बिम्बप्रतिबिम्बयोरेकत्वाध्यवसायात्तद्गतंभावित्वंकालेआरोप्यतस्यभावित्वमध्यवसायतदुपाधितद्भावेषुव्यवह्रियते। तदुक्तंनित्योविभुरखण्डःकालइतिवैशेषिकमतोपपादनेहरिणा। तस्याभिन्नस्यकालस्यव्यवहारेक्रियाकृताः भेदाइमेत्रयः सिद्धायान्नलोकोतिवर्ततइतीत्यपास्तम्। तेषांकालमात्रधर्मत्वाच्च। वर्तमानाक्रियेत्यादितुतत्कालवृत्तिक्रियेत्याद्यर्थकम्। आदिकर्मविषयेप्रकृतःकटंदेवदत्तःप्राकार्षीत्कटमित्यादिरवयवगतातीतत्वस्यसमुदायेआरोपेणप्रयोगः। अतएवानेकदिनगमनप्राप्यंग्रामंजिगमिषुःप्रथमेदिनेकिंचिद्गत्वाइदमद्यगतमितितद्दिनेतत्फलावच्छिन्नगतिक्रियायाअसमाप्तावपियत्किंचिद्गतिक्रियातीतत्वेनसमुदायेऽतीतत्वमादायतथाप्रयोगादिति

CC-0. In Public Domain. Digitization by eGangotri

स्यदृश्यनिष्ठेतिसूत्रेभाष्ये। एवंभूतानद्यतनपरोक्षार्थकाल्लिट्। पपाचेत्यादितोबोधेतत्तद्विषयसंदेहानुदयाद्भूतत्वादेरिवानद्यत
नत्वादेरपिबोधविषयत्वम्। साक्षात्करोतीत्येतादृशविषयताशालिज्ञानत्वंज्ञाननिष्ठमपरोक्षत्वम्। तद्विषयत्वंचार्थनिष्ठंतद्भिन्न
त्वंचपरोक्षत्वम्। तादृशीविषयिताचज्ञानाकरणकज्ञानेएव। दशमस्त्वमसीत्यादिशब्दजपरोक्षज्ञानसहकृतमनसादशमो
हमस्मीतिसाक्षात्कारोनतुततःशब्दादेवसः। अतएवतत्त्वमसीत्यादिशास्त्राचार्योपदेशशमदमादिसंस्कृतंमनआत्मदर्शने
करणमितिगीताभाष्येउक्तम्। ननुसाध्यत्वेनाभिधीयमानोगुणभूतावयवः क्रमिकव्यापाराणामेकफलजनकत्वविषयैकबु
द्ध्याविषयीकृतःसमूहःक्रिया। तत्रावयवानांमेलनाभावेनसमुदायोऽप्रत्यक्षएव। किंचपचेर्यथोदकसेचनादयोऽवयवास्त
थातेषामपिअन्येअवयवाइतितेपिसमूहरूपाएव। यस्तुक्षणरूपोऽवयवःसतुशुद्धोनधातुवाच्यःकिंत्ववयवसमूहात्मनै
व। आश्रितक्रमरूपत्वात्तद्वाच्यस्य। एवंचसदसद्रूपाक्रियानसद्वस्तुविषयेन्द्रियग्राह्या। तदुक्तम्। क्रमात्सदसतांतेषामा
त्मानोनसमूहिनाम्। सद्वस्तुविषयैर्यान्तिसंबन्धंचक्षुरादिभिरिति। वस्तुतःक्षणरूपाअवयवाअप्यप्रत्यक्षाएवशतप
त्रभेत्तुरतिनोदिष्टस्यापिस्वाङ्गुल्यादिगतशतक्रियाभेदतत्कृतसंयोगभेदानवगमेनवस्तुसौक्ष्म्यवत्सूक्ष्मकालाव १
च्छिन्नत्वस्यापिप्रत्यक्षेप्रतिबन्धकत्वावश्यकत्वेनक्षणस्थायिन्याअपिक्रियायाःप्रत्यक्षासंभवात्। येतूत्तरदेशसंयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गस्यैवपूर्वदेशसंयोगनाशात्मकत्वेनक्षणस्थायित्वमेवक्रियायामन्यन्तेतेषांसुतरांतदसंभवः।तदुक्तंभाष्ये।क्रियानामेयम
त्यन्तापरदृष्टानशक्यापिण्डीभूतानिदर्शयितुंसासावनुमानगम्येति।परेणप्रधानेनप्रमाणेनप्रत्यक्षेणात्यन्तमदृष्टावयव
रूपेणसमूहरूपेणचेत्यर्थः।अत्यन्तापरदृष्टेतिप्रतीकमुपादायनिष्ठेतिसूत्रेकैयटेनैवमेवव्याख्यानात्।पिण्डीभूतेति।
अवयवानांक्षणिकत्वेनपिण्डीभावस्यैवाभावादित्याशयः।तस्मादुत्तरदेशसंयोगादिरूपफलानुमेयैवसर्वाक्रिया।पश्य
मृगोधावतीत्यादौदृशेर्ज्ञानसामान्यपरताधावतेःफलमात्रपरतावा।अन्यथावयवस्यप्रत्यक्षत्वेपितस्यधात्ववाच्यतया
तत्प्रयोगानुपपत्तिरेव।तदुक्तंभूवादिसूत्रेयद्यात्वेकस्मिन्क्षणेपचतीतिप्रयोगस्तदापितत्रसमूहरूपारोपणम्।शब्द
शक्तिस्वभावाच्चनैकक्षणोधातुवाच्यइतिकैयटेन।अतएववर्तमानेलडितिसूत्रेभाष्येनास्तिवर्तमानःकालःक्षणभङ्गुरेषुप
दार्थेषुद्वितीयक्षणेनाशात्समवायिकारणाभावेनक्रियाभावात्तदाश्रयवर्तमानकालाप्रसिद्धेः।तदप्रसिद्धेर्भूतभविष्य
तोरप्यसिद्धिः।कदाचिद्वर्तमानस्यैवतदवस्थाप्रतीतेः।यद्यपिप्रत्यभिज्ञानुसृत्याजस्येनव्यवहारोपपत्त्यभावाच्चक्षण
भङ्गवादोऽयुक्तएव।नचनवर्ततेव क्रमिषुर्नपात्यतेनस्यन्दन्तेसरितःसागरायकूटस्थोयंलोकोनविचेष्टितास्तियोह्ये
वंपश्यतिसोप्यनन्धइतिभाष्यश्लोकेनक्षणभङ्गवादउक्तः।प्रयोक्तुःक्रियाश्रयस्यचक्षणद्वयमपिस्थैर्याभावात्परिव

र्ततेचक्रमित्यादिव्यवहारःखपुष्पायमाणः।यतोयंलोकःक्षणस्थायीकूटस्थःस्वरूपस्थएवनचेशाश्रयःक्षणद्वयंस्थितोहितत्कारणिकाक्रियाउत्तरक्षणेभवेदपिनचतावदपिस्थैर्यमस्तीतितदर्थइतिवाच्यम्।अत्यन्तंसंसारानित्यत्वबोधनेतत्तास्यर्थात्।योह्येवंसंसारानित्यत्वंकथंचिदपिपश्यतिजानातिसोप्यनन्धोज्ञानी।किंपुनर्योयोगानुष्ठानेनसम्यगेवंप्रत्यक्षीकृतवान्सज्ञानीतिकिंवक्तव्यमितिवाक्यशेषेणतथाबोधनात्।नहिक्षणभङ्गवादीअनन्धइतिशिष्टसंमतःक्षणभङ्गवादिनाआपातभासमानार्थमादायश्लोकःस्वमतसाधकत्वेनोक्तइतितदनुवादोभाष्येपिकृतः।पूर्वपक्षेइतिनदोषः।तथापिवर्तनानःकालोनास्त्येवअनुपलब्धिप्रमाणेनतदभावनिश्चयात् तदप्युक्तंश्लोके।मीमांसकोमन्यमानोयुवामेधाविसंमतः।काकंस्मेहानुपृच्छतिकिंतेपतितलक्षणम्।अनागतेनपतसिअतिक्रान्तेचकाकत।यदिसंप्रतिपतसिसर्वोलोकःपतत्ययम्।हिमवानपिगच्छति।अनागतमतिक्रान्तंवर्त्तमानमितित्रयम्।सर्वत्रचगतिर्नास्तिगच्छतीतिकिमुच्यतइति।मीमांसकोविचारकःस्वयंचात्मानंतथामन्यमानोमेधावीतेषांसंमतश्च।अनेनास्यास्तिकत्वमुक्तम्।पतितंपातः तस्यकिंलक्षणंनास्त्येवसदित्यर्थः।कालत्रयेप्यनुपलब्धेः।काकपर्यायकाकतशब्दस्यसंबोधनंकाकतेति।संप्रतिवर्तमानकालेसूक्ष्मकालावच्छिन्नत्वेनानुपलब्ध्याभावनिश्चयेपिक्षणस्यपूर्वापरीभूतावयवक्रियानाश्रयत्वेपियदिपततीत्यादिव्यवहार

CC-0. In Public Domain. Digitization by eGangotri

स्तदासर्वोयंलोकः पततिअपरिहृष्टसंयोगविभागोहिमवान् गच्छतीत्यपिव्यवहारापत्तिः। एवंचकालत्रयेप्युक्तरीत्यागत्य
भावाद्गच्छतीत्यादिव्यवहारोसंगतः सूत्राणिचासंगतानीतिपूर्वपक्षे। एकंसमाधानमुक्तम्। क्रियाप्रवृत्तौयोहेतुस्तद
र्थंयद्धिचेष्टितम्। तत्समीक्ष्यप्रयुञ्जीतगच्छतीत्यविचारयन्निति। क्षणभङ्गनिरासंमनसिनिधायउत्तरदेशसंयोगपर्यन्तं
क्रियायाः स्थैर्याभिप्रायेणेदम्। क्रियाप्रवृत्तौयोहेतुः इच्छाविषयउत्तरदेशसंयोगादिरूपंफलंतस्यविनानिमित्तमसंभवा
त्तन्निमित्तंयद्धिचेष्टितंक्रियासमूहरूपंतत्समीक्ष्यबहिरविद्यमानंबुद्ध्याविषयीकृत्यबुद्धिविषयेतत्रबुद्ध्यावर्तमानत्वंवि
षयीकृत्याविचारयन्तत्स्वरूपमविचारयन्नेवाविचारितरमणीयेनैवतेनगच्छतीत्यादिप्रयोगंकुर्यादित्यर्थः। तदुक्तंहरिणा
। क्रियाप्रबन्धरूपंयद्बुद्ध्यात्मनिनिगृह्यते। संक्रान्तबिम्बमेकत्वतामाहुर्वर्तमानताम्। बुद्ध्यात्मनिबुद्धिस्वरूपेक्रमेणानु
भूतानामप्येकबुद्धौसंकलनाभवत्येव। अनुभवपूर्वकंहिस्मरणंनतुक्रमोपलब्धंयुगपन्नस्मर्यतइति। ततोपरंसमाधानमु
क्तमपरआहअस्तिवर्तमानः कालः आदित्यगतिवन्नोपलभ्यतेइति। अनुपलब्ध्याहिवर्तमानकालाभावउक्तस्त्वया। अनुप
लब्धिश्चौपाधिकीतिनसातदभावसाधिका। यथाक्रियाप्रत्यक्षत्ववादिनआदित्यगतेर्दूरत्वदोषेणानुपलम्भस्तथासूक्ष्म
कालावच्छिन्नत्वदोषेणास्यानुपलम्भः। अनेनस्पष्टमेवाद्यसमाधानस्यवर्तमानकालसत्त्वाभावमङ्गीकृत्यैवप्रवृत्तिर्दर्शिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

।अत्रनक्रियासमूहीयवर्तमानकालोविषयः समूहस्ययुगपत्संनिधानादसत्त्वेनप्रत्यक्षत्वाभावात्तदप्रत्यक्षस्यदोषाज
न्यत्वाच्चादित्यगतिवदितिदृष्टान्तोपादानेवैयर्थ्यापत्तेः। तदप्युक्तंहरिणा। कार्योत्पत्तौसमर्थंवास्वेनधर्मेणतत्तथा।आत्मत
त्त्वेनगृह्येतसाचास्मिन्वर्तमानतेति। कार्योत्पत्तौसमर्थंसमूहरूपम्। फलजनकत्वादेकक्षणोपितदभेदेनाध्यवसितः।क्रिया
त्वेनगृह्यतइतितत्रवर्तमानत्वंमुख्यमेव। स्वेनधर्मेण। फलजनकत्वेन। तत्क्षणरूपमपि। तथाफलजनकम्। अतआत्मतत्त्वे
नक्रियात्वेनेत्यर्थः। सातत्क्षणवृत्तितैव। नन्वेवंसत्त्वंकुतस्तत्रोक्तम्। विसस्यबालाङ्कुवद्दृश्यमानानलक्ष्यतेविकृतिः संनिपा
ते।अस्तीतितांवेदयन्तेत्रिभावाः सूक्ष्मोहिभावोऽनुमितेनगम्यइति। विसेदृश्यमानेतदन्तर्गतबालादृश्यमानाअपितत्त्वेन
प्रत्यक्षेणनगृह्यन्तेकिंतर्हिविसदाहेनतदन्तर्गतत्वात्तद्दाहोऽनुमीयते। तथाफलानुपपत्त्याकल्प्यमानसमूहेक्षणिकावय
वसद्भावोऽनुमीयते। ननुसमूहस्यबौद्धत्वमेववाच्यंयुगपत्तस्याभावात्। एवंचावयवसत्तानमानसिद्धाऽतआहास्तीति·
त्रिषुकालेषुभावोभावनायेषांतेयोगिनस्तामवयवक्रियांपश्यन्तीत्यर्थः। अनेनयोगिप्रत्यक्षंमानंदर्शितम्। अन्येषांत्वनुमा
नेनतज्ज्ञानमित्याह। सूक्ष्मोहीति। स्वरूपेणसूक्ष्मः सूक्ष्मकालावच्छिन्नत्वेनवासूक्ष्मः सर्वेष्वनुमानगम्यएवफलानुपप
त्त्याकल्प्यमानोबुद्धिविषयः समूहोवर्तमानेलडित्यादिशास्त्रेतदनुमापकमेवंचावयवशः समूहशश्चक्रियाः प्रत्यक्षैवे

तिस्पष्टमेवोक्तम्।यदपिभूवादिसूत्रेकैयटेनसमूहस्याप्रत्यक्षत्वेप्येकैकस्यक्षणस्यप्रत्यक्षत्वेनबुद्ध्यातान्क्षणान्संकल्प्यपचतीतिप्रयुज्यतेइति।तदपियोगिप्रयोगविषयम्।अस्मदादिप्रयोगस्तुव्यवहारपरंपरयाविकल्पात्मकज्ञानविषयएव।अतएवतिष्ठतीत्याहेर्विकल्पोदाहरणत्वंपातञ्जलेरुक्तम्।तथाक्षणसमूहेबुद्ध्यासंकलितेयोगिनांघटिकामुहूर्तादिव्यवहारोऽस्माकंयन्त्रच्छायाद्यनुमितेतद्व्यवहारपरंपरयाघटिकादिव्यवहारस्तद्वत्।योगिनांक्रमेणानुभवविषयाणामपिएकबुद्धौसंकलनाभवत्येव।अनुभवपूर्वकंहिस्मरणंनतुक्रमोपलब्धंयुगपन्नस्मर्य्यतेइति।किंचावयवस्यप्रत्यक्षत्वेऽभिप्रकृतःकटइत्यादावयवातीतत्वेनसमुदायातीतत्वमादायकाद्युपपादनवदवयवप्रत्यक्षत्वेनसमुदायप्रत्यक्षत्वमादाययत्नद्वावर्त्तकेतयापरोक्षइत्यस्यचारितार्थ्येभाष्यस्यपूर्वपक्षसिद्धान्तयोरसंगत्यापत्तेः।तस्मात्परोक्षइत्यसंगतमितिचेन्न।तदनुकूलशक्तिमतांव्यापाराविष्टानांसाधनानांपारोक्ष्यस्येहविवक्षितत्वात्।भूतानद्यतनीयाक्रियाविष्टपरोक्षसाधनिकाक्रियानहृत्तेर्लिडित्यर्थात्।तेनक्रियानाविष्टसाधनप्रत्यक्षेपिलिड् भवत्येव।यद्वाक्रियाफलस्यप्रत्यक्षत्वेनक्रियाप्रत्यक्षत्वबुद्धिस्तत्पारोक्ष्येणचतस्याःपारोक्ष्यंस्पष्टंचेदंहृदयमपिभाष्ये।एवंस्वव्यापारस्यव्यासंगादिनामनोऽसंनिधानात्स्वयमप्रतिसंधानेपश्चात्सख्याद्युक्त्याज्ञानेतत्कार्येणानुमितौवालिड् भवत्येव।यथाबहुजगदपुरस्तात्तस्यमत्ताकिलाहमित्यादौमनश्चान्तःकरणपरिणामविशे

षोमध्यमपरिमाणंसंकोचविकासशालि अन्यत्रमनाअभूवंनाश्रौषमितिसिद्धं अतएवसदानज्ञानयौगपद्यंकदाचित्तद्यौगप-
द्यंचवस्तुतोऽण्वेवमनः। लक्षणंमनसोज्ञानस्याभावोभावएवच वैधृत्यान्मनसोऽज्ञानंसांनिध्यात्तच्चवर्त्तते। अणुत्वमथचै-
कत्वंद्वौगुणौमनसः स्मृताविति चरकेपतञ्जल्युक्तेः। विकासस्तुयोगबलेनयोगिमनसएव। अस्मदादीनांतुक्षणविलम्बे-
पियौगपद्यभ्रमः शतपत्रभेदइव। अन्यथादूरदेशस्थमपिज्ञायेत। किंचविकासेनियतनियामकाभावः। अदृष्टविशेषादपित-
स्यनियतोविकासइतिकेचित्। अन्तःकरणंचविभु। अतएवतस्यानन्तवासनाधारतासर्ववृत्तिनिरोधेनयोगिनांसर्ववस्तुज्ञानं
च। अन्यथासन्निकर्षाभावान्नगृह्येत। योगजधर्मस्यप्रत्यासत्तित्वकल्पनेगौरवात्। तेनचतमआरव्यप्रतिबन्धनिवृत्तौसंयोगा-
दिप्रत्यासत्त्यैवतेषांप्रत्यक्षम्। भूतभाविनोरपितदीयसूक्ष्मावस्थासन्निकर्षेणैवेदसेवंभाविभूतंवेतिज्ञानंभग्नघटीकपालक-
लापचक्षुःसंयोगेनायंघटआसीदित्यस्मदादिज्ञानवत्। नचान्तःकरणानांविभुत्वेऽदृष्टवासनादेःसाधारण्यापत्त्यादोषः। ए-
वंज्ञानेच्छाद्याश्रयात्मनांनानात्वविभुत्वेस्वीकुर्वतामपिदोषः। तदवच्छेदेनतत्तदन्तःकरणादेरभावस्वीकारेविभुत्वभङ्ग
इतिवाच्यम्। सर्वस्यमायिकत्वेनानिर्वचनीयतयाजलनलिनीपत्रवद्दोषात्। कृतार्थंप्रतिनष्टमप्यनष्टंतदन्यसाधारणत्वा-
दितियोगसूत्रेणतथाबोधनात्। कथमेकमनष्टंचनष्टंचेत्युपपद्यते। यदिकाकोलूकनिशासमत्वमिहनेष्यतेइत्यभियुक्तोक्तेः

CC-0. In Public Domain. Digitization by eGangotri

अविवेककृतबन्धस्यविवेकादपगमनंवदतांमायावादेपर्यवसानाच्च।गौतमोपि स्वप्नविषयाभिमानवदयंप्रमाणप्रमेया
भिमानः मायागन्धर्वनगरमृगतृष्णावद्वाहेत्वभावादसिद्धिरित्याह।प्रत्यवतिष्ठतेविज्ञानवादीत्येवंवाचस्पतिनाऽवतारि
तेनाद्यसूत्रद्वयेनयथास्वप्नेविषयानसन्त्यथचाभिमानोभवति।एवंप्रमाणप्रमेयानिनसन्ति।अथचतद्भिमानः।एवंचन
विज्ञानधारारूपचित्तव्यतिरेकिणोविषयाःजाग्रत्प्रत्ययाअपिनिर्विषयादृष्टामायागन्धर्वनगरादिप्रत्ययाइतिपूर्वपक्षंकृ
त्वायद्यपिस्वप्नादिविषयाणामसत्त्वंप्रतिबोधादावनुपलम्भात्तथापिजाग्रदवस्थायांसमीपएवोपलभ्यमानविषयाणां
यावद्व्यवहारमबाध्यमानजातीयानांचित्तव्यतिरेकेणोपलभ्यमानानांतत्त्वेनहेतुरितिभाष्यवार्त्तिकादौतृतीयंसिद्धान्तत्वेन
व्याख्यातमेवंचानिर्वचनीयतावादस्यसूत्रसंमतत्वमर्थादुक्तप्रायंतस्यश्रुतिमूलकत्वेनहेत्वभावादसिद्धिरित्यनेनखण्ड
नासंभवाच्च।तद्वदेवचानिर्वचनीयस्यव्यावहारिकसत्यत्वाङ्गीकाराद्दोषः। अग्रेचचित्तातिरिक्तबाह्यसद्विषयसाधनोत्त
रमेवंतर्ह्यपवर्गेपिबाह्यविषयसत्त्वान्मुक्तस्यापितद्बुद्धिप्रसङ्ग.इतिसूत्रेणपूर्वपक्षंकृत्वाचेष्टेन्द्रियार्थाश्रयेशरीरेसतित
दिन्द्रियसंयुक्तस्यैवबाह्यविषयस्यज्ञानोत्पत्तिकारणत्वमपवर्गेचधर्माधर्मयोर्नाशेनस्थूलसूक्ष्मसकलशरीराभावान्न
तदुत्पत्तिरित्युत्तरितम्।एवंचतुल्यन्यायाच्छरीराभाववत् तद्धर्माधर्मसाध्यविषयाभावोप्युक्तप्रायस्तदुक्तंकृतार्थंप्रतिनष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ल·सं मप्यनष्टमिति। तदुत्तरं चापवर्गः कथमित्याशङ्क्य तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चात्मविध्युपायैरित्युक्तम्। तस्या-
२६ पवर्गस्याधिगमाय यमनियमाभ्यामधर्मनाशधर्मोपचयरूप आत्मसंस्कारः कार्यः। ततो योगात्पातञ्जलाख्ययोगशास्त्रा-
च्चित्तैकाग्रतासंपादकैरध्यात्मविध्युपायैस्तपःप्राणायामप्रत्याहारादिरूपोऽध्यात्मविधिः प्रत्येतव्यः। अनेन तदुक्तार्थे सर्व-
स्मिन् स्वस्याप्यभ्यनुज्ञा सूचिता। योगपदं वेदान्तानामप्युपलक्षणम्। नन्वेवं तेनैव सिद्धे इदं शास्त्रं व्यर्थमत उक्तं तत्त्वा-
ध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवदिति। अनुत्पन्नतत्त्वज्ञानानामप्रहीण-
दोषाणां तदर्थं घटमानानामुपाय एतदिति तद्भाष्यम्। तस्यामवस्थायां सौगतादिकृततर्कैः प्राप्तस्य तन्मतविश्वासस्य ना-
शाय जल्पवितण्डाभ्यां तन्मतखण्डनतात्पर्यकमिदं शास्त्रम्। स्थूलसूक्ष्मशरीरातिरिक्तात्मसाधनद्वाराऽध्यात्मशास्त्रा-
ङ्गमिदमिति तदाशयः। गुर्वादिभिर्वादेन तत्त्वनिर्णयार्थं चैतदित्यपि तत्रोक्तम्। अनेनाद्वैतशास्त्रातिरिक्तसर्वशास्त्राणा-
मेवंविधत्वं सूचितम्। किञ्च प्रमाणप्रमेयेति सूत्रे न्यायभाष्यकृता संशयादीनामपि प्रमेयत्वात्पृथग्ग्रहणं व्यर्थमित्याश-
ङ्क्य तेषां पृथग्ग्रहणे उपनिषद्वदिदमप्यध्यात्मविद्यामात्रं स्यादित्युक्तम्। प्रमेयं हि मुख्यं ब्रह्मैवेति तस्यैवेह ग्रहणं स्या- राम·
दिति तन्मात्रत्वापत्तिरिति तदाशयः। अनेनोपनिषदेव मुख्याध्यात्मविद्येति सूचितम्। अत एवास्य तन्त्रस्य प्रदीपः सर्व- २६

विद्यानामुपायः सर्वकर्मणामाश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्तितेति प्रयोजनं भाष्य एवोक्तम्। विद्योद्देशे आन्वीक्षिकी त्रयी
वार्ता दण्डनीतिश्चतुर्थिकेत्यत्र तथा तदिदं तत्त्वज्ञानं निःश्रेयसाधिगमश्च यथाविद्यं वेदितव्यमिति च भाष्यकारः। चतुष्टं च
व्यावहारिकविद्यानामध्यात्मविद्यायास्तु न व्यावहारिकीति नात्रोक्ता। तस्मान्मुख्यं तत्त्वज्ञानमध्यात्मविद्योपनिषदुक्तमेवान्य
त्तु तदुपाय इति स्पष्टमेवोक्तमित्यन्यत्र विस्तरः। अनद्यतनत्वं चातीतरात्रेः पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसोऽ
द्यतनस्तद्भिन्नत्वमिति वृत्तिः। अतीतरात्रेरन्त्ययामेनागामिरात्रेराद्ययामेन च सहितो दिवसोऽद्यतन इति लुङ्सूत्रे कैयटः
। एवमनद्यतने भविष्यति लुट् भविष्यत्सामान्ये लृडित्यादि तत्तदनुशासनादितो बोध्यम्। तत्रानद्यतने भूतेऽपि यदा भूतत्वमा
त्रविवक्षा तदा लुङाद्येव। तेन ह्योऽपाक्षीदित्यादौ भूतत्वमात्रविवक्षया लुङि पश्चाद् ह्यः पदेनानद्यतनत्वप्रतीतिरिति न दोषः।
एवमनद्यतनभविष्यति भविष्यत्त्वमात्रविवक्षया लृडाद्यपि। श्वः पक्ष्याम इति यथा। एवमियं नु कदागन्ता यैवं पादौ निदधातीत्या
दावद्यतनेऽप्यनद्यतनत्वारोपेण लुट्। तदारोपफलं त्वतिविलम्बगमनप्रत्यायनम्। ननु वृष्टे देवे देवश्चेद्वृष्टः संपन्नाः शालय इति
प्रयुञ्जते संपत्स्यन्त इति च प्रयुक्ते मैवं वोचः संपन्ना इति ब्रूहीति लोके वदन्ति तदनुपपन्नमिति चेन्न। अप्शालिबीजसंयोगे नि
ष्पदेर्वृत्तिस्वीकारेण तदुपपत्तेः। यद्वा फलनिष्पत्तिरेव निष्पदेरर्थः। अप्शालिबीजसंयोगे एव कार्यनिष्पत्तिरूपमध्यस्यते इति

CC-0. In Public Domain. Digitization by eGangotri

तस्यातीतत्वाद्भूतता।यद्वातत्तत्कारणमेघोत्पत्तिगतमतीतत्वंवृष्टौशालिसंपत्तौचारोप्यभूतोक्तः।एतेनमेघोत्पत्त्युत्तरकालेपितथा
प्रयोगःसमर्थितः।आरोपफलंतुकारणान्तरापेक्षाऽभावप्रतिपादनद्वाराऽवश्यभावित्वप्रतीतिः।यथाकोष्ठगतेष्वपिशालिषुभु
ज्यर्थमवहननादीनिप्रतीक्ष्यन्ते।एवमेष्वपिस्थूलरूपेणाभिव्यक्तिःप्रतीक्ष्येतितनतदैवभुजिक्रियेतिक्षिप्रवचनेलृङित्यत्र
भाष्ये।तथाग्रामान्तरंजिगमिषवःस्थानविशेषेकूपसत्तानिश्चयवन्तोभाविनितल्लाभेकूपोभविष्यतिअतीतेऽभूदितिप्रयुञ्जते
तत्रतल्लाभगतमतीतत्वादिकूपसत्तायामारोप्यततत्कालप्रत्ययोबुद्धिविषयत्वमात्रविवक्षायांकूपो स्तीतिवर्तमानप्रत्ययइति
लुङ् भविष्यतिगम्यादयोऽनद्यतनेलुट्क्षिप्रवचनेलृङिस्यादौभाष्येस्पष्टम्।एवंचव्यातेनेकिरणावलीमुदयनइत्यादिभूत
त्वा नद्यतनत्वपरोक्षत्वानामारोपेणोपपन्नम्।आरोपफलतुग्रन्थेऽतिसुकरत्वशीघ्रनिष्पाद्यत्वादिप्रत्यायनम्।तत्फलंतुअध्ये
तॄणांमर्थप्रविवेकादिफलकममुंग्रन्थंज्ञातुंसोत्कानामाह्लादः।परोक्षत्वारोपोप्येतत्फलकएव।एवंसूक्ष्मकालेनकरिष्यामियत्र
करणकालेस्वयमपिसाक्षात्कर्तुमशक्यमित्येवंबोधनाद्अनायासेनग्रन्थकरणमपिव्यङ्ग्यम्।सूर्योपमाप्येतत्पोषिकैव।इत
रग्रन्थेभ्योत्रग्रन्थेतत् कर्तृभ्यश्चस्वस्मिन्व्यतिरेकोपिव्यङ्ग्यः।भविष्यतःप्रयोगकालेवास्तवमेवपरोक्षत्वमितिनतद्दंशेआरोपा
पेक्षेत्यपिवदन्ति।ननुभाविकृत्यमासीदित्येवमप्युपपन्नंभूतत्वभविष्यत्त्वयोर्विरोधात्।नचधातुसम्बन्धेइत्यनेनभाविशब्देप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धानभू ताख्यानानुरोधेन भूते प्रत्ययः। एवंत्वासीद्भाविशब्दयोः पर्यायतया युगपत्प्रयोगानापत्तिः। किंच भाविनो भूतकालतायाप्र
तिपिपादयिषितासानावगम्यते नकिंतु यदिदं कर्तव्यं वस्तु तदासीदेवेत्येव प्रतीयेतेति चेन्न। यत्कृत्यमिष्यन्तं कालं भावित्वेन व्यवहृतं
तदासीदित्यर्थात्। एवं ज्योतिष्टोमयाज्यस्य पुत्रो जनितेत्यतोपि ज्योतिष्टोमयाजीत्येवं व्यवहरिष्यमाणो जनितेति बोधः। एवं च ता
दृशवाक्यार्थे वाक्यैकदेशप्रयोगोयम्। अतएव तस्य सूत्रस्य विधायकत्वं भाष्ये प्रत्याख्यातं तत्रत्यं प्रत्ययाइति च प्रत्याख्यानम्। गो
मानासीदित्यत्रापि गोमद्रूपस्यातीतत्वेन तत्सत्तायाअतीतत्वाद्भूते प्रत्ययः। तेनार्थाद्गवामतीतत्वप्रतीतिः। वसन्नवतरन्तं दद
र्शेत्यादौ दर्शनकालिकं वासावतारयोर्वर्तमानत्वं बुद्धिस्थीकृत्य प्रत्ययः। तत्फलं च दर्शने तत्समकालत्वप्रत्ययः। शतृस्थले
क्रिययोः समानकालत्वप्रतीतेरित्यन्यत्र विस्तरः। ननु लिङ्निमित्ते लृङ् क्रियातिपत्तावित्यनेन भविष्यति लृङ् विधीयते। भविष्यति
मर्यादावचने इत्यतस्तदनुवृत्तेः। क्रियातिपत्तिश्चात्यन्तं क्रियानुत्पत्तिलक्षणा। सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यदित्यादौ
सुवृष्टिभवनसुभिक्षभवनयोः साधनवैकल्यान्नियतानुत्पत्तिः प्रतिपाद्यते। तत्र भविष्यत्त्वाद्यनुपपन्नम्। उत्पन्नस्य सत्त्वातिक्रमे
णभूत इत्युच्यते। समर्थसाधनसन्निधाने संभावितोत्पत्तिश्च भविष्यन्तीति कथ्यते। अत्र च साधनाभावात्संभावितापि नोत्पत्तिरि
ति चेन्न। साधनाभावादभविष्यत्यपि वस्तुनि भविष्यत्त्वमारोप्यते निषेधप्रतियोगित्वायेत्यदोषात्। सुभिक्षभवनहेतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सृष्टिभवनं भविष्यत्वेनासंभावयन्नेवमभिधत्ते। एवं हि क्रियातिपत्तिरवगता भवति। एतेनारोपितस्यार्थस्य न शब्दबोधविषयत्वस्यापास्तम्। अत्र सर्वथागत्यभावात्। एवंभूतेऽपि योज्यमिति दिक्॥ त्वं पचसि अहं पचामि त्वं पच्यसे हं पाच्ये इत्यादौ मध्यमोत्तमयोः प्रत्यक्त्वमपरत्वं च कर्तृकर्मविशेषणतयावबुध्यते। शब्दशक्तिस्वभावात्। तत्र प्रत्यक्त्वं प्रयोक्तुरहंकारानास्पदचेतनत्वम्। अपरत्वमहंकारास्पदचेतनत्वम्। तदुक्तं पुरुषसमुद्देशे हरिणा। प्रत्यक्त्वापरभावश्चेत्युपाधी कर्तृकर्मणोः। तयोः श्रुतिविशेषेण वाचकौ मध्यमोत्तमौ। सदसद्वापि चैतन्यमेताभ्यामवगम्यते। चैतन्यभागे प्रथमपुरुषो न तु वर्तत इति। तत्र कर्मविशेषणतया तयोः प्रतीतिरात्मनेपदे नैवेत्युक्तं श्रुतिविशेषेणेति। वाचकत्वं द्योतकत्वम्। एवं च मध्यमोत्तमौ चैतन्ययुक्ते कर्तृकर्मणी बोधयतः। नन्वेवं शृणोत ग्रावाण इत्यादौ मध्यमो न स्यादत उक्तं सदसद्वेति। असदनभिव्यक्तम्। एवं च चैतन्यवत्त्वेनैव तद्बोधस्ततोऽपि। एतद्बलेनैव सर्वस्य चेतनत्वं सन्सूत्रे भाष्ये उक्तम्। तत्र हि चेतनधर्मस्याचेतने आरोपमनुक्त्वा सर्वस्य चेतनत्वे इयं श्रुतिः साधकत्वेनोक्ता। प्रथमपुरुषस्तु चैतन्यास्पर्शेन साध्यसाधनभावमात्रमवगमयति न तु चेतनत्वम्। काष्ठानि पचन्तीत्यादावज्ञानार्थधातुविषये प्रथमपुरुषान्नियमेन तदनभिव्यक्तेः। युष्मदस्मदोश्चेतनेष्वेव प्रयोगान्मध्यमोत्तमाभ्यां तदभिव्यक्तिः। संबोधनार्थं मध्यमे प्रतीयते। युष्मदस्वसंबोधने एव प्रथमेति तु न युक्तम्। त्वं पचसीत्यादौ तदप्रतीतेः। क्रियाविनियोगफल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काभिमुखीकरणस्यैव संबोधनत्वादित्यग्रे निरूपयिष्यामः। अथोपग्रहः कः पदार्थ इति चेत्। अत्र हरिः। यस्त्वात्मनेपदाद्भेदः क्व
चिदर्थस्य गम्यते। अन्यतश्चापि लादेशान्मन्यन्ते तमुपग्रहम्। अन्यतः परस्मैपदात्। उपग्रह इति तस्य पूर्वाचार्यसंज्ञा। तं वि
भजते। क्वचित्साधनमेवासौ क्वचित्तस्य विशेषणम्। साधनं तत्र कर्मादिव्यक्तवाक्त्वं विशेषणम्। कर्मादौ त्यादिना कर्त्तीभावस्व।
भावेऽपि तिङनुवाद्यः क्रियाया एकपदवाच्यसाधनावेशमावेदयन् भवति साधनम्। व्यक्तवाचां समुच्चारणे इति व्यक्तवाक्त्वस्व
विशिष्टस्य कर्तृतामावेदयदुपग्रहः। क्वचित्क्रियाविशेष उपग्रह इत्याह। धात्वर्थस्तद्विशेषश्चाप्युक्तः क्वचिदुपग्रहः। धात्वर्थो
गन्धनादिस्याद्यतीहारो विशेषणम्। तद्विशेषस्तद्विशेषणम्। गन्धनावक्षेपणादयः सन्तोऽपि नात्मनेपदमृते भिव्यक्ता इति
उपग्रहः। यथोत्कुरुते इति व्यतीहारस्तु क्रियाविशेषणमात्मनेपदव्यङ्ग्य उपग्रहः। व्यतिलुनीत इत्यादौ। क्वचिद्विषयभेदे
नक्रियाविशेष उपग्रह इत्याह। क्रियाविषयभेदेन जीविकादिषु भिद्यते। लादेशैः स क्रियाभेदो वाक्येष्वप्यवगम्यते। विषयविशेषे
ण धात्वर्थः क्रियाभिद्यते। स च भेदो लादेशैरभिव्यज्यत इति शेषः। यथा पचेर्जीवनोपायत्वेनानुष्ठीयमाने विक्लित्यनुकूलव्या
पारेणान्नसंस्काररलक्षणः पाकस्तदर्थकत्वं परस्मैपदव्यङ्ग्यम्। यथा पचति यजतीति। प्रधानं ह्यत्र क्रियाफलेन कर्तृगामि। भृत्या
नां भृतिमात्रार्थित्वात्। यजमानादीनां तु पाकादिसामग्रीसंघटनरूपं प्रतिविधानं तदर्थः। तदर्थकत्वं चात्मनेपदव्यङ्ग्यम्। यत्क्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याफलंकर्तृगामितद्वृत्तिधातोरात्मनेपदमितिस्वरितञितः कर्त्रभिप्रायेक्रियाफलेइतिसूत्रार्थः।सक्रियाभेदःस्वयज्ञंयजतेयजतीत्या
दौवाक्येस्वादिपदेनापिगम्यते।विभाषोपपदेनेतितत्रपदद्वयमित्यर्थंहेलाराजः।अतएवोक्तंस्वरितञितइत्यत्रभाष्येस्वरितइति
शक्यमकर्तुम्।यात्यादिषुकस्मान्नभवतिकर्त्रभिप्रायेक्रियाफलइत्युच्यतेसर्वेषांचकर्त्रभिप्रायंक्रियाफलमस्तितएवंविज्ञास्या
मः।एषांकर्त्रभिप्रायमकर्त्रभिप्रायंचक्रियाफलमस्तितेभ्यआत्मनेपदंभवतीति।नचैषांकर्त्रभिप्रायंचाकर्त्रभिप्रायंचक्रियाफलमस्तिन
थाजातीयकाःखल्वप्याचार्येणस्वरितञितःपठिताः।येउभयवन्तः।येषांकर्त्रभिप्रायंचाकर्त्रभिप्रायंचक्रियाफलमस्तीति।अनेन
चभाष्येणाकर्त्रभिप्रायक्रियाफलाभावप्रयुक्तोयात्यादिषूभयाभावोलभ्यते।ननुयात्यादिष्वपिसेनाप्रयातिपित्रर्थंतीर्थंनिगच्छती
त्यादौपराभिप्रेतंजयधर्मादिफलमस्तीतिचेन्न।भाष्येचश्रवणात्कर्त्रभिप्रायमेवाकर्त्रभिप्रायमेवचक्रियाफलमस्तीत्यर्थात्।इदंचोभय
भिप्रेतमितिनतथेत्यभिप्रायः।तत्रयजेर्ऋत्विग्व्यापारवचनत्वेकर्त्रभिप्रेततत्फलाभावः।यजमानस्यतदाकर्तृत्वाभावात्।यजमान
व्यापारवचनत्वेतद्वत्वम्।उभयवचनत्वेस्वामिदासावितिवक्ष्यमाणवत्प्रयोगइतितदाशयः।ननुपचादीनांविक्लित्त्यादिवचनत्वा
त्कथंप्रतिविधानमर्थः।किंचतदर्थत्वाभावेकर्त्रभिप्रेतक्रियाफलाप्रसिद्धिरतआह।संविधानंपचादीनांक्वचिदर्थःप्रतीयते।तन्निमि
त्तंयथाऽन्यापिक्रियाऽधिश्रयणादिका।कःपचेःप्रधानार्थोयासौतण्डुलानांविक्लित्तिः।अथेदानींतदभिसंधिपूर्वकमध्येषणंवाप्रेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णंवासुक्तंयत्सर्वपच्यर्थःस्यात्. बाढंयुक्तम् इतिहेतुमतिचेतिसूत्रभाष्योक्तेः। संविधानमपिसामग्रीसंघटनरूपंपच्याद्यर्थः। यथाविक्लित्य
र्थस्यापिपचेरधिश्रयणादिःकर्तृव्यापारोऽर्थोदेवदत्तःपचतीति। अन्यथादेवदत्तस्यकर्तृत्वानापत्तिः। णिचस्तु न नहिसंविधानमेव णि
जर्थः। अपितुतत्पूर्वकंप्रेरणम्। यत्रसतिप्रयोजकइत्युच्यते संविधानंकुर्वन्नपिनयावत्प्रेरयतिनतावत्प्रयोजकइत्युच्यतइतिहेलारा
जः। भिक्षावासयतिकारीषोऽग्निरध्यापयतीत्यादावपिप्रयोजकत्वारोपोबोध्यः। तूष्णीमासीनोयस्तत्समर्थान्याचरतिसोपिवासादि
प्रयोजकइतिभाष्यात्. तत्समर्थाचरणमात्रेणतत्प्रयोजकत्वारोपइतितदर्थः। अतएवायंयज्ञसंभारान्संघटयतिकंवाप्रेरयिष्यत्या॰
र्त्विज्यायेतिनजानीमइतिव्यवहारः। ननुस्वरितञितइतिसूत्रादयमर्थः कथंलभ्यते। तत्राह। कर्त्रभिप्रायतासूत्रेक्रियाभेदोपलक्षणम्।
तथाभूताक्रियासाहितत्कर्ताफलभाग्यतः। कर्त्रभिप्रायक्रियाफलग्रहणेनसंविधानक्रियानिर्दिश्यते। नक्षत्रंदृष्ट्वावाचंविसृजेदित्यत्रनक्ष
त्रदर्शनेनकालविशेषनिर्देशवत्।। यतएवंरूपक्रियायाःकर्तृफलेनयुज्यते। नह्यसंविदधद्यागादि तत्फलंस्वर्गाद्यश्नुते। ततश्चकार्यभूत
फलसंबन्धेनकारणभूतक्रियाविशेषउपलक्ष्यते। तद्वाचकाद्धातोरात्मनेपदमित्युक्तंभवति। संविधानोपलक्षणंचक्रियाफलंकिंतत्राह
।यस्यार्थस्यप्रसिद्ध्यर्थमारभ्यन्तेपचादयः। तत्प्रधानंफलंतेषांनलाभादिप्रयोजनम्। तदेवसूत्रेक्रियाफलशब्देनगृह्यतइतिभावः। त
च्चपाकस्यभोजनंलोकतोऽवगतम्। यागस्यस्वर्गोवेदतः। तदुक्तंभाष्ये। साधीयोयत्रकर्तारंक्रियाफलमभिप्रैति। नचान्तरेणापियजिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यजिफलंवपिंचवपिफलेलभन्ते। याजकाःपुनरन्तरेणापियजिंगालभन्तेभृतकास्त्ववेतनमिति। यत्रयस्यांक्रियायांसत्यामित्यर्थः। साधीयःक्रियाफलंस्वर्गादि। यजिंयागसंविधानरूपयज्यर्थम्। एवंवपिमित्यपि। अन्तरेणापियजिंस्वसाध्ययागव्यापारंविनापि। मतान्तरमाह। क्रियाप्रवृत्तावाख्याताकैश्चित्स्वार्थपरार्थता। असतीवासतीवापिविवक्षितनिबन्धना। सर्वइमेस्वभूत्यर्थंप्रवर्तन्ते नहिकश्चित्परोऽनुग्रहीतव्यइतिप्रवर्ततइतिभाष्योक्तेः। सर्वस्यस्वार्थप्रवृत्त्यास्वार्थतासर्वत्रमुख्या। परार्थतात्वसत्येव। सतीवेतितुलौकिकीवाचोयुक्तिः। विवक्षितंविवक्षासानिबन्धनंहेतुरस्याःपरार्थतायाइत्यर्थः। एवंचासत्यपरार्थताविवक्षायांमाभूदात्मनेपदमितिकर्त्रभिप्रायेइत्यनेनक्रियाफलंविशेषितम्। सूत्रार्थस्त्वेतत्पक्षेक्रियाफलकेयत्नेकर्त्रभिप्रेतोद्देश्यकेआत्मनेपदमित्यर्थः। अत्रकेचिदित्यनेनारुचिर्बोधिता। तद्बीजंतुयजन्तेऋत्विजइत्यादेरव्याप्तिः। यःस्वर्गादिफलार्थंनिर्वेशेनेतरंव्यापारयतिस्वयंचभृतिविधानमारभतेतत्रैवयजमानादौकर्तर्यात्मनेपदमिष्यते। यस्तुभृतिरूपनिर्वेशमात्रफलःस्वामिचित्तानुवर्तनादेवकृतार्थतांमन्यतेतत्रनात्मनेपदंभृत्यादाविनीतिहेलाराजः। किंचस्वरितञिद्ग्रहणप्रत्याख्यानस्योक्तभाष्यविरुद्धमिदम् तेनार्थद्वयवाचकत्वंस्वाभाविकंयत्रास्तितेतत्रविषयाइतिस्पष्टमुक्तम्। कस्तत्रविवक्षायाउपयोगः। किंचफलस्यस्वर्गादेरेवात्रग्रहणमित्यर्थस्यभाष्यसंमतत्वेनक्रियाप्रवृत्तावित्यसंगतम्। किंचक्रियाप्रवृत्तेःसर्वत्रस्वार्थोद्देश्यकत्वेनतत्रपरार्थोद्देश्यकत्ववि

CC-0. In Public Domain. Digitization by eGangotri

वाक्षाऽत्यन्तमनुचितैवेति दिक्॥ केचित्तु प्रतिविधानार्थं दृपितदर्थद्योतकमात्मनेपदं णिचा सह विकल्प्यते। संविधानमात्रं णिजर्थः सर्वइमे स्वभूत्यर्थं प्रवर्तत इति न्यायेन स्वार्थं प्रवर्तमानस्य प्रयोज्यस्यानुकूल्यकर्ता संविधातोच्यते। प्रैषस्तु न णिजर्थः। एवं चैकविषयत्वात्तयोः पर्यायः। यजते याजयतीति वदन्ति। तन्मतमाह। केषांचित्कर्त्रभिप्राये णिचा सह विकल्प्यते। आत्मनेपदमन्येषां तदर्थो प्रकृतिर्यथा। णिचा सह णिजर्थप्रकृतिर्धातुर्यथा विकल्प्यते तद्वत्। अन्येषां स्वरितञिद्व्यतिरिक्तधातूनाम्। हेतुमति चेत्यस्यापि संविधानरूपे व्यापारे वर्तमानाद्धातोर्णिजित्यर्थः। यजतेश्च संविधानमेवार्थः। पाचयतीत्यादावप्येवमित्येतन्मतम्। वस्तुतो णिच् प्रेरणावाची। तत्प्रयोजको हेतुश्चेति सूत्रात्। अत एव तदाश्रयस्य कर्तृत्वम्। अत एव पाचयति देवदत्तो यज्ञदत्तेनेत्यादिप्रयोगाः। गतिबुद्धीति सूत्रं च चरितार्थम्। एवं च भिन्नविषयत्वाद्विकल्पोक्तिरसंगता। किंच सामान्यविहितस्य णिचो धातुविशेषाद्विहितेनात्मनेपदेन बाध एवोचितः। एतच्च केषांचिदित्यनेन सूचितमिति हेलाराजः। अथैतेषां णिजात्मनेपदयोर्विकल्पभ्रमबीजं दर्शयति। क्रीणीष्व वपते धत्ते चिनोति चिनुते पि च। आप्तप्रयोगा दृश्यन्ते येषु ण्यर्थोऽभिधीयते। आत्मानं क्रीणीष्वेति विनतां कद्रूराह। तस्य च दास्यादात्मनो मोचनाय पुत्र संविधानं कुर्वित्यर्थ इति तेषां तद्भ्रमबीजम्। तत्र प्रत्युपकारं विना दास्यान्मुक्त्यसंभवात् प्रत्युपकारस्य च स्वासाध्यत्वादर्थसामर्थ्यात्तु तत्र संविधानं गम्यते न तु स तदर्थ इति स तेषां भ्रमः। एवं केशश्मश्रु वपते इत्यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वपनकर्तुःसंनिधानंकुरुतेइत्यर्थइतितेषांभ्रमबीजम्।तत्रापिस्वस्यासामर्थ्येनसामर्थ्यात्तद्गम्यतेइतितेषांभ्रमःसः।एवम
न्यत्रापिऊह्यमितिहेलाराजः।अथसिद्धान्तेशङ्कते।यत्रोभौस्वामिदासौतुप्रारभेतेसहक्रियाम्।युगपद्धर्मभेदेनधातुस्तत्र
नवर्तते।स्वामिसाध्यंसंभारघटनरूपंसंविधानम्।दाससाध्यंतुविक्लित्तिपर्यन्तंसाधनविनियोगरूपंतत्रभिन्नत्वाद्व्यापारस्य
युगपदेकधातुवाच्यत्वासंभवेनकिंसंनिधानापेक्षमात्मनेपदंकिंवासंस्कारकापेक्षंपरस्मैपदमितिसंशयः।अनेकार्थत्वाद्धा
तूनांयुगपदर्थद्वयाभिधानेप्येकत्रप्रयोगेविरुद्धत्वादेशद्वयानुपपत्त्यासएवसंशयइतिहेलाराजः।नचक्रियागतविशेषमविव
क्षितंकृत्वाक्रियामात्रेसाध्यसाधनभावमात्रविवक्षायामत्रपरस्मैपदंयुक्तमितिवाच्यम्।तयाक्रिययास्वामिनोभोजनस्यला
भेनदासस्यश्रममात्रलाभेनपूर्वपक्षस्यैवासिद्धेः।किंचैवंरीत्यायजतियजमानइत्यस्याप्यापत्तिः।नचेष्टापत्तिःतदाकर्तृगामिनोः
कर्तृगामिनश्चफलस्याभावेनस्वरितञितउभयवन्तइतिभाष्यस्यासंगतेःअत्रस्वामिपदार्थसामर्थ्यात्तत्कृतंसंविधानमवगतंदास
पदार्थसामर्थ्याच्चतत्क्रियायाःपरार्थत्वमवगतमितितत्राख्यातस्यव्यापारइतिशेषत्वात्परस्मैपदमितिकेचित्।एवमपिपूर्वपक्ष
स्यैवासिद्धिरित्यन्ये।समाधत्ते।संविधातुश्चसान्निध्याद्दासेधर्मोऽनुषज्यते।छत्रिणाचापिसंबन्धाच्छत्रिशब्दाभिधेयता।उत्तरा
धीस्ययथैवस्यादिः।दासधर्मस्यतुनस्वामिन्यारोपः।उत्तमेनिकृष्टधर्मारोपाप्रतीतेरित्यलम्विस्तरेण।अग्नीनादधीतेत्यत्रयद्य

प्याधानफलमाह्वनीयत्वाद्यग्निनिष्ठं तथापि यज्ञहोमादिसुखलाभरूपं कर्तृगतमप्यस्तीति तदादायात्मनेपदम्। आह्वनीयत्वादेराधानसंस्कारातिरिक्तत्वे मानाभावेन तस्य च धात्वर्थतया तदतिरिक्तस्यैव मदुक्तस्य तत्फलत्वौचित्यात्। स्पष्टं चेदमेकः पूर्वपरयोरिति सूत्रे भाष्ये। एतेन कर्त्रभिप्रेतत्वं फले कर्त्रर्थत्वमेव न तु कर्तृसमवेतत्वमिति पार्थसारथ्युक्तमपास्तम्। अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेति श्रुतिवाक्यं पञ्चपादिकाविवरणे धृतम्। तादृशब्राह्मणमुपगतमुपनयनेन संस्कुर्यात्संस्कृतं चाध्यापयेदिति तदर्थः। नानाविधेतिकर्तव्यताकलापस्योपगमनविधेः श्रवणादुपगतमित्यस्यस्य लाभः। छान्दोग्यश्रुतौ जाबालस्य प्रसिद्धमेव गुरूपगमनम्। तत्रोपनयनसंस्कारो नित्यस्तदभावे व्रात्यतादोषश्रवणात्। वाजसनेयिनामुपनयनं प्रक्रम्य स्वाध्यायोऽध्येतव्य इत्याद्यध्ययनविधेरुपनीतस्यैवाध्ययनम्। तदपि नित्यम्। अश्रोत्रिया अननुवाक्या अनग्नयः शूद्रसधर्माण इति तदभावे दोषश्रवणात्। तत्र यदधीतमविज्ञानं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्। इति निन्दार्थवादश्रवणेन सार्थकाध्ययनमेव नित्यम्। निरर्थकाध्ययनं तु निषिद्धम्। निन्दार्थवादेन निषेधोन्नयनात्। अधीतं शब्दतः। अविज्ञातमर्थतः। निगदेन पाठमात्रेण। अनग्नाविवेत्यादिना तस्य यज्ञाद्यनुपयोगित्वेन निष्प्रयोजनत्वमुच्यते। अत एव भाष्यकृतोक्तम्। अनर्थकं माधिगीष्महीत्यध्येयं व्याकरणमिति। निरर्थकाध्ययनेपि किंचित्फलसत्त्वे दोषाभावे च सार्थकमध्यगीष्महीत्येव वदेत्। स्थाणुरयं भारहारइति निरुक्ते भारपदेन

पापभारइत्यन्यत्रनिरूपितम्। श्रुतिरपिपतञ्जल्युक्ताह। ब्राह्मणेननिष्कारणोधर्मःषडङ्गोवेदोऽध्येयोज्ञेयश्चेति। निष्कारणः। दृष्टकारणानिरपेक्षः। अनेनविशिष्टस्यनित्यतोक्ता। व्यासोपि। मन्त्रार्थजोजपंजप्त्वातथैवाध्ययनंद्विजः। स्वर्गलोकमवाप्नोतिनरकंतुविपर्ययेइति। अत्रजपंजप्त्वेतिमन्त्रसाध्यकर्ममात्रोपलक्षणम्। किंचस्वाध्यायपदस्यवक्ष्यमाणयानेनप्रोक्तमितिसूत्रभाष्योक्तयारीत्यावेदपदस्येवशब्दार्थोभयपरतयास्वाध्यायोऽध्येतव्यइत्यस्योभयाध्ययनविधायकत्वम्। दोषश्रवणमपितद्विधिबोधिताध्ययनाभावेइतिउभयोरपिनित्यत्वम्बोध्यम्। निष्कारणोधर्मइतिवाक्येज्ञेयश्चेतितुअध्ययनमात्रेणसर्वस्यज्ञानासंभवाज्ज्ञानपर्यन्तमध्ययमंकार्यमित्यर्थकम्। विज्ञातमित्यत्रापिविशिष्टविज्ञानमेवविवक्षितम्। अतएवसमानमीहमानानांसमानंयाधीयानानांकेचिदर्थैर्युज्यन्तेऽपरेनेतिभाष्येउक्तमितिबोध्यम्। तत्रोपनीतेत्यत्राचार्यकरणेद्योत्येसंमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषुनियइत्यनेनात्मनेपदंनतुस्वरितञितइत्यनेन। उपनयनफलस्याध्ययनस्यकर्तृनिष्ठत्वाभावात्। कर्तृनिष्ठफलकक्रियाया धात्वर्थत्वाभावाच्च। उपनयनफलंचाचार्याधीनोवेदमधीष्वेत्येतत्सहकृताध्ययनविधेःसंस्कृतस्याध्ययनमेव। अन्तरङ्गत्वात्। अपस्तम्बोपि। उपनयनंविद्यार्थस्यश्रुतितःसंस्कारइतिनगुरोरध्यापनम्। पत्रोसूदादीनांलाभवद्बहिरङ्गत्वाच्च। किंचयत्किंचिदुपनयनेनैवतत्सिद्धावतिदरिद्राशक्तोपनेयान्तरोपनयनेऽप्रवृत्त्यापत्तेः। जातोप

नयनस्य गुरौ मृते गुर्वन्तरेणोपनयनं विनाप्यध्ययनदर्शनाच्च। आचार्यलक्षणं च तद्धैद्वितीयं जन्म तद्यस्मात्स आचार्य इति स्मृता।
वुक्तम्। उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षत इति स्मृतौ चोक्तम्। न चाचार्याधीनो वेदम
धीष्वेत्येतत्सहकृताध्ययनविधिनैवाध्यायनलाभे तद्विधिर्व्यर्थः। किंच वृत्तित्वेनैवाध्यापने प्रवृत्त्युपपत्त्याऽयं विधिर्व्यर्थ एवेति वाच्य
म्। स्वसंस्कृतोद्देशेनाध्यापनस्य नित्यताबोधनार्थत्वात्। अध्ययनस्यापि नित्यत्वादुपनेतरि मृतेऽन्यगुरूपसदनमप्युपपन्नम्।
अध्यापनस्य वृत्तिताश्रवणात्काम्यत्वमपीत्यन्यत। न चाध्ययनं विनाध्यापनासंभवेनाध्यापनविधिनैवाक्षेपादध्ययनलाभे सवि
धिर्व्यर्थ इति वाच्यम्। अग्निहोत्रादीनामप्यध्ययनं विनाऽसंभवात् तद्विधीनामपि विद्याक्षेपकत्वेन शूद्राणामपि तत्राधिकाराप
त्तेः। सममेवोभाभ्यामप्याक्षेपात्। अध्ययनविधौ तु सति तदाक्षेपात्प्रागेवस्तुल्यात तद्बोधनेऽधीतवेदत्रैवर्णिकानामेवाधिकारो नान्य
स्येति नियमसिद्धेः फलत्वात्। अनुमितिसामग्र्यपेक्षया शाब्दसामग्र्या बलवत्त्वस्य न्यायनये लिङ्गाद्यपेक्षया श्रुतेर्बलवत्त्वस्य मी
मांसकनये सत्त्वेन शब्दोपस्थितिलिङ्गानुमितार्थानुवादकत्वस्य वेदेऽन्याय्यत्वात्। यत्त्वध्यापनेनाध्ययनाक्षेपे नित्यानित्यसंयोग
विरोधः। अध्यापनस्य काम्यत्वादध्ययनस्य नित्यत्वादिति तन्न। तस्य दूषकताबीजानिरुक्तेः। न्यायनयेऽनित्यशब्दानुमिताकाश
स्यनित्यत्ववत्। अनित्याध्याननानुमिताध्ययनस्याकरणे दोषश्रवणेन नित्यत्वेपि बाधकाभावात्। उक्तरीत्याऽध्यापनस्यापि
ति

नित्यत्वाच्च। एतेनवृत्त्यर्थतयोपनयनाध्यापनयोः प्राप्त्या तद्विधिवैयर्थ्यादष्टवर्षो ब्राह्मणउपगच्छेत्सोऽधीयीतेतिचोक्तश्रुत्यर्थ
इत्यपास्तम्। नविधौपरः शब्दार्थइतिन्यायविरोधात्। दरिद्राशक्तादेरुपनयनाद्यनापत्तेश्च। एतेनदेवतायाविग्रहवत्त्वे विग्रहस्यानि
त्यत्वेननित्यवेदशब्दवाच्यत्वेनित्यानित्यसंयोगविरोधइतिपरास्तम्। घटाकाशयोः संयोगस्यनित्यानित्ययोर्जन्यजनकभावस्य
चप्रसिद्ध्याऽस्यदूषकताबीजाभावात्। स्वर्गकामादेर्विग्रहवत्त्वेनानित्यतयास्वर्गकामादिपदवाच्यत्वानापत्तेश्च। अनित्यस्यप
शोर्नित्ययापशुनायजेतेतिश्रुत्याविधानापत्तेश्च। प्रवाहनित्यतातूभयत्रापिसमाजातिनित्यतापिसमा। राजन्यवैश्ययोःसोमयागे
फलचमसः श्रुतः न्यग्रोधमुकुलपिष्टंचम्यतेसफलचमसः। अत्रनैमित्तिकस्यनिमित्तकालेऽनुपस्थितत्वान्न एतेनात्रसंबन्धेशब्दा
र्थसंबन्धनित्यताहानिरित्यपास्तम्। नचज्योतिष्टोमेनराजन्यवैश्यनिमित्तेनविहितफलचमसस्याप्यभिषवादिसंस्काराः स्युर्म
मतुनदोषः। अभिषवादिसंस्काराणांनिमित्तसंयोगाभावान्नित्यवदाम्नातानांनिमित्तसंयोगेनविहितफलचमसेनानित्येनसंबन्धा
योगात्। किंतुनित्यविहितसोमस्यैवसंस्काराराजन्यवैश्यकर्तृकेपियागेयजमानचमसादेवसोमस्यनिवृत्तिरन्यत्रतुसंस्थितए
वेतिसनित्यइतिवाच्यम्। तावतापिबीजानिरुक्तेः। किंचनित्यविध्युत्तरंनैमित्तिकविधिप्रवृत्तिरितिस्पष्टंन्यायविदाम्। एवंचयत्का
लेनित्यसोमविधानंतत्कालेएवतद्विशेषणतयास्वार्थविधानेनकृतार्थाः संस्कारविधयोननैमित्तिकेनसंबध्यन्ते। आवृत्तिप्रस

ङ्गात्। तथा च सिद्धान्तसूत्रम्। नैमित्तिकमतुल्यत्वादसमानविधानस्यादिति। फलचमसविषयेऽभिषवादिसंस्कारा न भवन्ति। यतो नैमित्तिकमतुल्यत्वान्नित्यधर्मसारूप्याभावाद्नित्येनासमानविधानं स्यात्। अतस्तत्र न संस्कारा इति तदर्थः। अतो नेदं नित्यानित्यसंयोगविरोधस्य मुख्यमुदाहरणम्। स्पष्टं चेदं शास्त्रदीपिकादाविति दिक्। सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति सूत्रे शांकरभाष्ये तु नित्यानित्यसंयोगविरोधौदित्यस्यार्थ एवमुक्तः। नित्यत्वकाम्यत्वयोः कर्मण एकेन संयोगेन विधिना विधने विरोध। काम्यत्वे न तस्यानावश्यकत्वं नित्यत्वे तस्यावश्यकत्वमित्यावश्यकत्वानावश्यकत्वे एकस्यैकेन विधिना बोधयितुमशक्ये विरोधादिति तद्व्याख्यातारः। संयोगभेदे तु न तयोर्विरोधः तुल्यबलश्रुतिद्वयेन पृथगेव विधिः संयोगभेदः। यथा बैल्वो वा खादिरो वा पालाशो वेत्येको नित्यत्वबोधको विधिः, तस्यैव क्रत्वर्थस्य खादिरस्य खादिरं वीर्यकामस्येत्यपरः काम्यत्वबोधको विधिरित्येकस्य खादिरस्योभयार्थत्वमिति। न च सा रीतिः प्रकृते। एकस्योभयरूपत्वाभावात्। आक्षेपकविध्यपेक्षया आक्षेप्यविधेर्भिन्नत्वाच्च। तदुक्तं जैमिनिना। एकस्य तूभयत्वे संयोगपृथक्त्वमिति। एकस्य नित्यनैमित्तिकत्वे नित्यकाम्यत्वे वा संयोगपृथक्त्वं विधिभेदो नियामकः। यथा खादिरे बध्नाति खादिरं वीर्यकामस्येति तद्व्याख्यातार इति विभावनीयम्। लिङस्तु विध्यादयोऽर्थो लोटश्च। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् लोट् चेति शास्त्रात्। तत्र विधिः प्रेरणा। यथा निकृष्टस्य भृत्यादेः प्रभुणा स्वाभिलषिते प्रेरणम्।

इयमेवाज्ञा। अप्रवृत्तप्रयोज्यस्य तदभिलषिताज्ञातोपायप्रवर्तनोपदेशः। यथा स्वर्गकामो यजेतेत्यादिः। यथा वाऽनेन पथा याही
त्याप्तवचः। सोऽपि विधिरेव। निमन्त्रणं नियोगकरणमावश्यके श्राद्धभोजनादौ स्वाभिलषिते प्रवर्त्तनम्। आमन्त्रणं स्वाभिलषिते
कामचारेण प्रवर्त्यप्रवर्तनम्। कामचारश्च प्रवर्त्यस्यैव। एषैव कामचारानुज्ञा। प्रवृत्तस्य प्रयोज्यस्य निवृत्तिप्रतिबन्धेन तद्धिते प्रव
र्तिकोक्तिरनुज्ञा। आस्ध्वं कुर्वे वेत्येवंरूपा। तथा कुरुष्व यथाहितमित्युक्तिरप्यनुज्ञैव। एतत्सर्वोपलक्षणमामन्त्रणम्। अधीष्टः
संस्कारपूर्वको व्यापारो यथा माणवकमध्यापयेति। एषैवाभ्यर्थना। प्रार्थना तु स्वाभिलषितवस्तुदानादिप्रवर्तिकोक्तिः। सर्वानुस्यू
तं प्रवर्तनासामान्यं विध्यर्थः। तदतिरिक्तांशस्य मानान्तरलभ्यत्वात्। सूत्रे सप्रार्थनानां चतुर्णां ग्रहणं प्रपञ्चार्थमित्यग्रे निरूप
यिष्यामः। प्रैषातिसर्गेति सूत्रेण प्रैषेऽपि लिङादयः। प्रैषः ज्ञातविषयप्रवर्तना। तत्र प्रवर्तना प्रवृत्त्यनुकूलो व्यापारः प्रवर्तकनिष्ठो लिङादिघटि
तशब्दप्रयोगरूपः। प्रवर्तकत्वं च स्वातन्त्र्ये सति लिङाद्युच्चारयितृत्वम्। राजप्रेरितपदातेर्लिङाद्युच्चारयितृत्वेऽपि प्रवर्तकत्वव्यवहारवार
णाय स्वातन्त्र्ये सतीति। पदातिप्रेरितोऽहं न कुर्वे किं तु राजप्रेरित इति व्यवहारात्। पिशुनप्रेरिते राज्ञ्यपि स्वातन्त्र्यमस्त्येव। वेदे प्रवर्तना लि
ङ्घटितत्वरूपम्। प्रवर्त्तकत्वं च शब्दनिष्ठमेव। वक्ष्यमाणस्वरूपाप्तोक्त्या च तया प्रतिबन्धकाभावविशिष्टया स्वविषये इष्टसाधनता
याक्षेपस्ततः प्रवृत्तिः। यद्यपि जीवन्मुक्तस्येतरं प्रति तत्प्रार्थनया ब्रह्मोपदेशे प्रवृत्तौ नेष्टसाधनताज्ञानं प्रयोजकमिति व्यभिचारात्तदाक्षे

पकत्वसंभवस्तथापि सर्वज्ञमे स्वभूत्यर्थं प्रवर्तत्तद्वृत्तिहेतुमति चेति सूत्रभाष्योक्त्या तदतिरिक्तप्रवृत्तौ तत्प्रयोज्यत्वनियमेनाक्षेपः सुल
भः। आप्तोक्तयेत्युक्तेः शत्रुप्रयुक्ताद्विषं भुङ्क्ष्वेति वाक्यान्नतराक्षेपेनापि प्रवृत्तिः। विषं भुङ्क्ष्व मा चास्य गृहे भुङ्क्थाइत्याप्तोच्चारि
तात्तद्वारणाय प्रतिबन्धकाभावविशिष्टयेति। तत्रानिष्टसाधनत्वनिश्चयप्रयुक्तद्वेषस्य प्रतिबन्धकस्य सत्त्वान्न दोषः। तद्गृहभोजनेऽत्य
न्तानिष्टसाधनत्वबोधनएव तत्तात्पर्यात्। क्रुद्धेन सेर्ष्येण चोक्तान्मृदं भुङ्क्ष्व पायसं भुङ्क्ष्वेति वाक्याद्बोधो भवत्येव। प्रवृत्तिस्तु न। दोषवि
शिष्टोक्तत्वेन तदाक्षेपकत्वाभावात्। दोषरहितस्यैवाप्तत्वात्। आप्तत्वं च भ्रमादिदोषराहित्ये सति तत्तत्क्रियाविषये स्वेष्टप्रतिबन्धानिष्टो
त्पत्त्युभयानुकूलयत्नाभाववत्त्वम्। अत एव वनेऽपहृतसर्वस्वानामपि दस्यूनां मार्गोपदेशे आप्तत्वं भवत्येव। आप्तशब्दवत्त्वेनाप्तानाम
नुगमः। तत्राक्षेपश्च क्वचित्सामान्यतः। बहुवित्तव्ययायाससाध्ये तु विशिष्येव। आक्षेपश्च पचेत्यादिशब्दोपस्थितभाविपाके पाकत्वे
न पक्षीकृत्योक्तहेतुना बोध्यः। व्याप्तिग्रहश्च यागादिविषये उपदेशात्। प्रथमोपदेष्टुस्तु योगतस्तज्ज्ञानम्। तच्च योगिसत्त्वेन मानम्।
श्रुतेर्मानत्वात्। तदुक्तं हरिणा। ज्ञानमस्मद्विशिष्टानां सर्वं सर्वेन्द्रियं विदुः। अभ्यासान्मणिरूपादिविशेषेष्विव तद्विदामिति। अस्म
द्विशिष्टानामीश्वरस्य योगसिद्धानां पतञ्जल्यादीनां च। ईश्वरसत्त्वे च त एव मुनयः प्रमाणम्। तत्र तेषां ज्ञानं सर्वं सर्वेन्द्रियसाध्यम्।
घ्राणतः शब्दं शृण्वन्ति पृष्ठतो रूपाणि पश्यन्तीत्यादिश्रुतेः। यथा रूपपरीक्षकाणामभ्यासातिशयान्मणिरूपातिशयप्रकाशस्त

ल·मं· कृत्। योगाभ्यासबलाद्योगिनामीश्वरस्य स्वत एवेति नान्धपरंपरेति तदर्थः। शब्दं विनापि स्वीयप्रवृत्तस्थले स्मृतपाकशब्दाद्युपस्थितभा
२५ विपाके तद्ग्रहः। यस्य ज्ञातस्य प्रवृत्तिव्यवहारविषयता स इष्टसाधनमित्याद्याकारस्तद्ग्रहः। एडमूकादेरपि जन्मान्तरानुभूतशब्दस्मरणं त
न्मूलकं स्वीयमुच्चारणं च कल्प्यम्। बालकस्य आद्यस्तनपानप्रवृत्तौ तज्ज्ञाननिर्वाहाय तथाप्यस्यावश्यकत्वात्। अहरहरित्यादिसमभि
व्याहृतनित्यनैमित्तिकविध्योरवश्यानुष्ठेयत्वमपि प्रेरणया बोध्यते। तेन तदभावे प्रत्यवायसिद्धिः। विश्वविता यजेतेत्यादौ स्वर्गातिरि
क्तस्य सर्वेष्टस्याभावात्प्रवर्तनया स्वर्गरूपेष्टसाधनत्वाक्षेपः। प्रेरणा च प्रवर्त्तकनिष्ठः प्रवृत्त्यनुकूलो व्यापारस्तत्र लिङादिसमभिव्या
हारे व्यापारान्तरस्याननुभवाल्लिङाद्यन्तशब्दरूप एव स इत्युक्तम्। तद्वृत्तिप्रेरणत्वं चाखण्डोपाधिः। तेन रूपेण च तस्य लिङ्वाच्य
ता। शब्दरूपत्वाच्च सा शाब्दी भावनेत्युच्यते। शब्दनिष्ठेति व्यवहारोऽपि प्रेरणात्वेन तस्यास्तद्वृत्तित्वेन। लोके पुरुषनिष्ठत्वं चैतादृ
शशब्दप्रयोक्तृतयाऽवच्छेदकत्वेन लिङ्गसंख्याद्यनन्वयित्वाद्व्यापारपदव्यवहार्यापि सा प्रेरणात्वेन सविषया चेति बोध्यम्। यत्त्वि
ष्टसाधनत्वमेव प्रवर्त्तना। तज्ज्ञानस्य प्रवृत्तिहेतुत्वात्। इष्टं च क्वचित्साक्षात्क्वचित्परंपरया। भवत्प्रेरणयाऽहमध्यापयामि न किं राम·
चिन्ममेष्टमिति व्यवहारस्तु न मे साक्षात्किंचिदिष्टमित्येवंपरः। इच्छाविषयत्वोपलक्षिततत्तत्फलसाधनत्वेन ज्ञानं प्रवर्त्तकम्। तेनै
वं च रूपेण विधेः शक्तिः बलवदनिष्टाननुबन्धित्वज्ञानं तु न प्रवर्त्तकम्। बहुतरदुःखस्यापि कुतश्चिदल्पत्वेनाल्पस्यापि कुतश्चिद्बल

वत्त्वेनानुगतबलवत्त्वस्यदुर्वचत्वात्। मधुविषसंपृक्तान्नभोजनादौप्रवृत्तिस्तु न। तत्तद्विषयकबलवद्द्वेषस्यस्वातन्त्र्येणप्रति बन्धकत्वे
नादोषात्। युक्तंचैतन्। सत्यपिबलवदनिष्टजनकत्वज्ञानेतज्जन्यदोषाभावदशायामास्तिककामुकस्यरागान्धस्यपरदारगमनादौप्रवृत्ते
। द्वेषसत्त्वेप्रवृत्तेश्च। क्वचित्तुतज्जन्यफलेउत्कटेच्छाविरहेतज्जन्यदुःखद्वेषद्वेष्यविषयसाधनताज्ञानादुपायेद्वेषेउपायेच्छाभावा
दप्रवृत्तिः। क्वचित्फलद्वेषएवतथा। अत्रतज्जन्यसुखेउत्कटेच्छोत्तेजिका। तेनयत्रसुखापेक्षयाऽनुत्कटानिदुःखानियत्रवाक्रिया
जन्यबहुसुखापेक्षयोत्कटदुःखान्यल्पानितत्रापितज्जन्यसुखेउत्कटरागात्प्रवृत्तिः। अतएवान्तरालिकश्रमेबलवद्द्वेषवान्ज्यो
तिष्टोमादौनप्रवर्तते ऽन्यस्तुप्रवर्ततएव। एतेनकृतिसाध्यताज्ञानंप्रवर्तकंकृतित्वंचनिवृत्तिजीवनयोनियतव्यावृत्तौयत्नत्वव्याप्यो
जातिविशेषइत्यपास्तम्। कृत्यसाध्येप्रवृत्त्यभावस्यततइष्टाभावेनवृथाश्रमजनकतयाद्वेषादुपपत्तेः। चिकीर्षायाएवप्रवृत्तिंप्रतिकार
णत्वम्। तांप्रतिचतत्कारणमित्यदोषाच्च। यत्नशक्तस्यापियत्किंचित्कृतिसाध्येप्रवृत्त्यापत्त्यामहदंशविशिष्टंप्रवर्तकंवाच्यम्। तस्य
चविधितो ऽसंभवेनयागोमत्कृतिसाध्योमत्कृतिसाध्यत्वविरोधिधर्मानधिकरणत्वादित्यनुमानेनतल्लाभोवाच्यः। एवंचान्यलभ्य
त्वात्तस्यनविधिशक्यता। उपायेच्छांप्रतिफलेच्छायाःसमवायसंबन्धेनकारणतयाऽतिप्रसङ्गभङ्गेनेष्टसाधनताज्ञानस्यमहदंशा
न्तर्भावेणकारणत्वेनफलंनापिमानम्। फलेच्छोपायजिज्ञासोपायज्ञानानामिच्छास्थैर्येणयौगपद्याङ्गीकारात्फलेच्छायामुपाये

च्छापूर्ववृत्तित्वस्यनक्षतिरितितन्न। सर्वत्राञ्जस्येनफलेच्छोपायजिज्ञासादेर्यौगपद्योपपादनासंभवेनफलेच्छायाउपायेच्छांप्रत्य
कारणत्वात्। किंचप्रतिपुरुषंविधेरावृत्त्याबोधकत्वेनतत्तत्पुरुषज्ञातेनविधिवाक्येनतत्तत्पुरुषेष्टसाधनत्वस्यतत्तत्पुरुषकृतिसा
ध्यत्वस्यचबोधसंभवात्। नानुमानावश्यकतायजेतेतिकर्त्रर्थकेनतत्तत्पुरुषंप्रतिप्रवृत्तेनवाक्येनप्रत्यासत्त्यातत्तत्पुरुषरूपकर्तु
रेवबोधनात्। साधनत्वंचाखण्डोपाधिः। ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादौदेवतोद्देशेनद्रव्यत्यागरूपस्ययज्यर्थफलस्यतदर्थ
कृत्यादिरूपभावनांप्रतिकरणत्वंनस्यांचेष्टसाधनत्वान्वयः। एवंचभावनानिष्ठस्येष्टकरणत्वस्यलिङोक्तावपिभावनानिरूपिता
स्यभावनाभाव्यनिर्वर्तकत्वरूपस्यत्यागनिष्ठकरणत्वस्यानुक्तत्वान्नतत्समानाधिकरणेज्योतिष्टोमादिपदेतृतीयानुपपत्तिः।
ज्योतिष्टोमादिनामधेयमपित्यागस्यैव। त्यागघटितदीक्षणीयाद्युदवसानीयान्तकर्मकलापेतथाव्यवहारस्तुगोणः। तस्यस्वर्ग
करणत्वव्यवहारोपितथैवेतिबोध्यम्। नकलञ्जंभक्षयेदित्यादावनिष्टसाधनत्वंविध्यर्थः। त्रैवनञ्तात्पर्यग्राहकइतितन्न। चिकी
र्षायाइष्टसाधनत्वस्याप्यन्यथासिद्धेः। अमुकफलसाधनमिदंकृतिसाध्यंभवत्वितीच्छायाएवचिकीर्षात्वात्। एवंहिप्रवृत्तौफलवि
षयतानियमस्याप्युपपत्तिः। उपायेच्छयापितदन्यथासिद्धेश्च। साचामुकसाधनंपाकोजायतामित्याकारैव। इच्छायाःस्वजन
कज्ञानप्रकारप्रकारकत्वनियमात्। नचद्वारेणद्वारिणोनान्यथासिद्धिः। यस्यद्वारिणोमानान्तरेणतत्कारणतासिद्धातथायाप

रम्भोस्तदन्यथानुपपत्त्याचह्वारस्यापूर्वादेः कल्पनंतद्विषयेतदभावेपिअन्यत्रतदभावेमानाभावात्।येषामपिचिकीर्षान्यापारेच्छै
वव्यापारेकृतेरपिनिवेशात्कृतीच्छापिसातेषामपिव्यापारविषयेइष्टसाधनत्वकृतिसाध्यत्वज्ञानोत्तरमेवसेतितेअन्यथासिद्धे
एव।किंचेदंतेइष्टसाधनंकृतिसाध्यंचनाप्यत्रदुःखंतस्मात्त्वंकुर्वितिस्वारसिकलोकव्यवहारसत्त्वेनतस्यविध्यर्थतावक्तुमश
क्या।पौनरुक्त्यापत्तेः।नचेदंपौनरुक्त्यंसर्वथेष्टसाधनत्वबोधनाय।तस्मादित्यस्याानन्वयापत्तेः।अपिचराज्ञाप्रवर्तितोऽहमित्या
दिव्यवहारात्प्रवर्तनाप्रवर्तकपुरुषनिष्ठासालिङ्शक्येतिसूत्रभाष्यादिसंमतम्। नचेष्टसाधनत्वंतद्बोधोवातन्निष्ठस्तज्ज्ञापन
स्यतन्निष्ठत्वेपिनतदिष्टसाधनत्वम्।नापितच्छक्यत्वेनतव संमतम्।तज्ज्ञानानुकूलव्यापारस्यमदुक्तातिरिक्तस्याभावाच्च।
किंचेष्टसाधनताज्ञानादिवसाध्येष्टकृत्वज्ञानादपिप्रवृत्त्यनुभवेनविनिगमनाविरहेणोभयोःशक्यत्वेगौरवम्।साधनत्वमिवयो
गक्षेमसाधारणंसाध्यत्वमप्यस्तुइतिनतत्सत्त्वेपिकारणतावच्छेदकगौरवम्। एवंकृतिसाध्यत्वज्ञानादिवमत्कृतिसाधनकः
पाकइतिज्ञानादपिचिकीर्षाप्रवृत्त्योर्दर्शनात्तच्छक्यत्वेपिविनिगमनाविरहइतिदिक्॥नकलञ्जंभक्षयेत्यादौआरोपितंके
लञ्जभक्षणंप्रेरणाविषयइतिवाच्योर्थस्तदभावःप्रेरणाविषयइतित्वार्थोनतुशाब्दः।नञ्वादोक्तरीत्यानञर्थेवाच्यइष्टस्याविभ
क्त्यर्थान्वयाभावात्।तेनचप्रतियोगिन्यनिष्टसाधनत्वंबोध्यते।यदभावस्तेनयदभावः।प्रेरणाविषयतयाबोध्यतेतत्प्रतियोगी

CC-0. In Public Domain. Digitization by eGangotri

ल॰ मं॰
३७

क्लृप्तेष्टाधिकानिष्टसाधनमिति व्याप्तेः। तद्भक्षणे प्रायश्चित्तविधयश्च तत्र तथा कल्पने तात्पर्यग्राहकाः। तत्तु समन्वयादिति सूत्रे शंकर
भाष्येपि न ब्राह्मणं हन्यादित्यादौ स्वभावतो हन्त्यर्थानुरागी नञ्। एष एव च नञः स्वभावो यत्स्वसंबन्धिनोऽभाववोधनं निषेध्याभा
वबुद्धिश्च निषेध्यविषयौदासीन्ये कारणमिति। औदासीन्यं निवृत्तिः। शास्त्रग्रहणादिरूपा या तत्कृननोद्यमक्रिया तस्याः उपरत्त
व्यमिति बुद्ध्यापाशस्त्रस्थापनादिक्रिया तदुपलक्षितवधप्रवृत्त्यभावसमानाधिकरणः क्रियाविशेषो निवर्तत इत्यादिपदवाच्यो
निवृत्तिः। न च प्रवृत्त्यभाव एव निवृत्तिरस्तु विनिगमनाविरहात्। तस्मादिदं पदार्थद्वयं परस्पराभावसमानाधिकरणमिति मामा
णिकाः। अनेन नहि धात्वर्थाभावे लिङर्थप्रेरणाविषयतेति लभ्यते। आवृत्ताव्यविरोध इति सूत्रेपि भाष्येन सुरां पिबेदिति वाक्येन
ञ्वतिपदत्रयसंबन्धात्सुरापाननिषेध एव गम्यते न तु विध्यर्थप्रतिषेध इत्युक्तम्। यत्तु मिश्रैर्निषेध्येऽनिष्टसाधनताबुद्धिरेव नि
षेध्याभावबुद्धिरिति व्याख्यातं तन्न। अक्षरास्वारस्यात्। मम तु निषेध्याभावस्य प्रेरणाविषयत्वेन बुद्धिर्निषेध्यविषयौदासीन्ये का
रणमिति तदर्थः। किंचानिष्टसाधनत्वमित्यस्य यदीष्टसाधनत्वाभाव इत्यर्थस्तदा कलञ्जभक्षणादौ बाधः। यद्यनिष्टजनकत्वमर्थ
स्तदा नञो विध्यर्थानुरागेण विध्यर्थैकदेशानुरागेण वा हन्त्यर्थानुरागी नञिति भाष्यासंगतिः। एतेन नञ्समभिव्याहारे प्रत्यवा
याभावरूपेष्टसाधनत्वं विध्यर्थस्तदभावो नञा बोध्यते ज्वरितो न भुञ्जीतेत्यादौ दुःखद्वेषाभावरूपेष्टसाधनत्वं विध्यर्थः। एवं च नि

राम
३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ननिवर्त्तकत्वे
षेध्यकरणेऽर्थासत्यवायदुःखवृद्धीइत्यपास्तम्। योब्राह्मणायावगुरेत्तंशतेनयातयादित्यादौहेतुहेतुमतोर्लिङ्यत्कर्तृकोब्राह्मणवधोद्य
मस्तत्कर्मिकातादृशवधोद्यमजन्यायमदूतकर्तृकाशतयातनेतिबोधेनसाध्यसाधनत्वग्रहेप्रवर्त्तकत्वेनैववावेदस्यप्रमाणत्वात्तेनव
धोद्यमनिवृत्तिपरत्वग्रहेतस्मान्नावगुरितव्यमितिविधिःकल्प्यते। अतएवभगवान्पाणिनिर्विधिनिमन्त्रणेतिसूत्रेविधिपदार्थंतद्विशे
षनिमन्त्रणादिभिर्विवृतवान्। निमन्त्रणंनामश्राद्धादिभोजनानुकूलोव्यापारःप्रयोजकनिष्ठोनिमन्त्रयतेइत्यादितस्तथाप्रतीतेः। नचे
ष्टसाधनत्वंतन्निष्ठमित्युक्तम्। उक्तंचहरिणा। अस्तिप्रवर्त्तनारूपमनुस्यूतंचतुर्ष्वपि। तत्रैवलिङ्विधातव्यःकिंभेदस्यविवक्षया। न्या
य्युत्पादनार्थंवाप्रपञ्चार्थमथापिवा। विध्यादीनामुपादानंचतुर्णामादितःकृतमिति। न्यायेत्यस्यप्रागुक्तन्यायेत्यर्थः। नन्वस्य
लोकव्युत्पत्त्यैवसिद्धिरतःप्रपञ्चार्थमिति। चतुर्णामित्युपलक्षणंप्रार्थनस्यापि। अतएवहेतुमतिचेतिसूत्रेभाष्येपृच्छतुमांभ
वानित्यत्रणिच्कस्मान्नभवतीतिलिङादिशब्दप्रयोगरूपस्यकर्तृप्रयोजकव्यापारस्यसत्त्वादितिप्रश्नः। उत्तरमकर्तृत्वादितिस
क्रियप्रेरणायांणिज्निष्क्रियप्रेरणायांलोडादितत्प्रयोजकइत्यत्रकर्तृपदेनव्यापाराविष्टःकर्त्तागृह्यतइतिभावः। अथापिकथंचि
त्कर्त्तास्यादेवमपिनदोषोलोटोक्तत्वात्प्रेषणस्यणिज्नभविष्यतीति। इष्टसाधनत्वस्यणिजर्थत्वाभावेनतस्यविध्यर्थत्वेतदसंगति
स्पष्टैव। यत्तुकैयटेनप्रष्टप्रयोज्यस्तस्यप्रेरकःप्रयोजकोभवतीतितद्व्यापारेणिचासहलोटःपर्यायप्रसङ्गइतिप्रश्नाशयउक्तः। स

चिन्त्यः पर्यायस्यलोटोक्तत्वादित्यनेनवारणासंभवात्· नापिपर्यायः प्राप्नोतिलोट्प्रयोगरूपप्रेरणायास्तदप्रयोगेऽभावात्।विधिनिमन्त्रणेतिसूत्रेपिभाष्येविधिःप्रेरणमित्युक्तम्।वात्स्यायनोपिविधिर्नियोगइत्याह।नियोगोनियोजनंनियोजनंनियोजयतीत्यादिप्रतिपाद्यंप्रवर्त्तकनिष्ठव्यापाररूपमेव।प्रेरणात्वंप्रेर्यादिधात्वर्थतावच्छेदकतयाप्रसिद्धमेव।तस्यचलिङादिवृत्तित्वमात्रंकल्प्यतइतिनमेकिंचित्कल्प्यम्।एवंचेष्टसाधनत्वबोधेतस्यासाधुत्वंस्पष्टमेव।एनेनवक्तुःकर्त्तव्यत्वेनेच्छैवलिङर्थः।तयाचेष्टसाधनत्वाद्यनुमानात्।तद्यथा·स्वर्गकामस्ययागइष्टसाधनंकर्तव्यत्वेनाप्तोक्तलिङ्बोध्येच्छाविषयत्वात्।यथामत्पित्रेष्यमाणंममभोजनम्।विषभक्षणादेरपिकस्यचित्कृतिसाध्यतयातत्कर्त्तव्यत्वेनेश्वररूपाप्तेच्छाविषयत्वेनतदनुमापकत्ववारणायलिङ्बोध्येतिवेदेआप्तस्तुईश्वरएवविधिरेवतावद्गर्भइवकुमार्याःश्रुतेःपुंयोगेमानमित्याचार्योक्तमपास्तम्।वक्त्रिच्छायाअपीष्टसाधनत्ववदनुमेयत्वाच्च।कःप्रयोज्यस्यप्रेरणयाऽर्थोयदभिप्रायेष्वासज्जन्तेइतिहेतुमतिचेतिसूत्रस्यभाष्येणेच्छायाःप्रेरणानुमेयत्वस्यैवलाभात्।किंचपचेत्यादिप्रयोगाभावेतदिच्छांप्रकारान्तरेणानुमायपाककरणोत्तरंकस्यप्रेरणयात्वयापाकःकृतइतिप्रश्नेनाहमनेनप्रेरितःकिंतुएतदिच्छांज्ञात्वामयेदंकृतमितिव्यवहारात्प्रेषितुरपिनमयाऽयंप्रेरितःकिंतुस्वचातुर्येणैवमदिच्छांज्ञात्वाकृतवानितिव्यवहाराच्चेच्छाजन्यशब्दप्रयोगादेरेवप्रवर्तनात्वंलभ्यतेनत्विच्छायाः।किंचवेदेअधिकारीइदंकुर्यादितीश्वरेच्छायाअङ्गीकारेतदिच्छायाविसंवादित्वापत्तेः।न

चेश्वरेच्छाया विसंवादिनीत्वं त्वदीयानामपि संमतम्। अधिकारिणाग्निज्योतिष्टोमादेः कदाचिदकरणात्। किंच वेदस्य सकर्तृक
त्वे ईश्वरज्ञानप्रामाण्यापेक्षया वेदप्रामाण्यापत्तौ स्वतःप्रामाण्यं तस्य भज्येत। बुद्धवाक्येऽपि प्रामाण्यापत्तेश्च। ईश्वरवचनत्वसा
म्येबुद्धवाक्यं न प्रमाणं वेदवाक्यं प्रमाणमित्यत्र विनिगमनाविरहात्। श्वासप्रश्वासादिवदीश्वरकर्तृकत्वं तु वेदस्य नवि
वादविषयः। बौद्धाद्यागमस्तु नैवम्। बुद्धिपूर्वकयत्नेनैव बुद्धादिभिस्तत्करणादिति तच्छास्त्रेषु कूर्मादिपुराणेषु च प्रसिद्धम्। अत
एव पस्पशायां भाष्ये सौत्रामण्यां सुराग्रहनिन्दाबोधकस्य। यदुदुम्बरवर्णानां घटीनां मण्डलं महत्। पीतं न गमयेत्स्वर्गं किं तत्
क्रतुगतं नयेदिति बुद्धश्लोकस्यापि भ्राजाख्यकात्यायनप्रणीतश्लोकवत्प्रामाण्यमाशङ्क्य प्रमत्तगीत एष तत्रभवत इत्युक्त्या
तस्याप्रामाण्यमुक्तम्। प्रमादेन वेदविषयविप्रतिपत्त्याश्रयत्वेन तत्रभवतः पूज्यस्यापि गीतिर्यतोऽप्रमाणमिति तदर्थः। तत्त्वं स्व
स्मिन्नारोप्य दैत्यनाशाय पूज्यस्यापि सोक्तिर्न प्रमाणमिति तद्भावः। भ्राजाख्यश्लोकानां तु श्रुतिमूलकत्वात्प्रामाण्यमिति कैयट
इति दिक्। अपूर्वं विधिशक्यमित्ययुक्तमेव। लौकिकवाक्ये तदसंभवात्॥ किंच नित्येषु विधिषु निषेधविधिषु च पण्डापूर्वकल्पने गौ
रवमिति दिक्। एवं च स्वर्गकामो यजेतेत्यादिना ज्योतिष्टोमस्य गृहीता स्वर्गसाधनता क्षणिके यागे व्यापारमन्तरा अनुपपन्नाऽपूर्वं
कल्पयति। अपूर्वं च यागस्य काचिदुत्तरावस्था फलैकनाश्या। यद्वा कर्मापूर्वादीनामचेतनतया फलजनकत्वासंभवाच्चेतनेश्वराधि

ष्ठितत्वेऽवश्यवक्तव्यत्वे तन्निष्ठाभ्यां कर्मजन्यतत्तत्स्वप्रीतिभ्यां मायावृत्तिरूपतया अनित्याभ्यां प्रति जीवकर्मसाध्याभ्यां सुखदुःखाद्युपपत्तेः कर्मापेक्षत्वात्सेवानुरूपफलदो राजवद्लौकिकोपीश्वर इति न तस्य वैषम्यनैर्घृण्ये। श्राद्धादिजन्यमपूर्वं पुत्रे पितृषु च। उभयत्र फलश्रवणात्। मुक्ते तु न दृष्टं तत्त्वज्ञानस्य तद्विरोधित्वात्। पित्रादिस्वर्गकामनया कृते पुष्करिणीमहादानादौ पित्रादेरेवादृष्टं कर्तुरेवादृष्टं तस्यैव फलमिति तूत्सर्गः। ननु स्वर्गत्वस्य वाजपेयगङ्गास्नानदानादिजन्यस्वर्गसाधारण्येन कथं ज्योतिष्टोमे स्वर्गसाधनताग्रहः। कार्यतावच्छेदकस्यातिप्रसक्तत्वादिति चेन्न। प्रवर्तनया वाक्यान्तरपर्यालोचनवतो विजातीयस्वर्गसाधनत्वस्यैवानुमानात्। ध्वनितं चेदं स्वरितञितः इति सूत्रे भाष्ये। तत्र हि न चान्तरेण यजिं यजिफलं लभन्ते इत्युक्तम्। न हि स्वर्गादिफलं यागमन्तरेण भवतीति कैयटः। तेन यत्किञ्चिदुक्तं सर्वेषां स्वर्गसाधनत्वमेव गृह्यते। न च ज्योतिष्टोमाग्निहोत्रयोः फलसाम्यापत्तावल्पवित्तव्ययायाससाध्याग्निहोत्रेणैव सिद्धौ श्रमाधिक्येन द्वेषाज्ज्योतिष्टोमादावप्रवृत्तौ तद्विधीनामननुष्ठानलक्षणाप्रामाण्यापत्तिरिति वाच्यम्। तत्फलस्वर्गाणां भूयस्त्वाल्पत्वकल्पनया प्रवृत्तिसंभवात्। युक्तं चैतत्। न हि वैजात्यमात्रज्ञानात्प्रवृत्तिः संभवत्यपि क्षीरपानेमण्डपाने प्रवृत्त्यापत्तेः। तत्रापि फलवैजात्यज्ञानात्। भूयस्त्वमनेकधा फलबाहुल्यं फलोत्कटत्वम्। तत्र स्वपुरुषगामित्वं शीघ्रता चेत्यादि। अन्यथा सर्वेभ्यः कामेभ्यो दर्शपूर्णमासावित्युक्ते समारब्धदर्शपूर्णमासानां काम्येष्टिप्रवृत्तिविलोपस्तदापि

दुर्वारः।यद्वालौकिकप्रतिष्ठारूपफलेच्छायस्यतस्यप्रवृत्तिसंभवः।अतएवसकलशास्त्रविदांयुधिष्ठिरादीनांस्वल्पफलकराज्या
र्थगोत्रजब्राह्मणादिवधेप्रवृत्तिः।दर्शितेचार्जुनंप्रतितदेवफलंभगवता।अकीर्त्तिंचापिभूतानिकथयिष्यन्तितेव्ययामित्यादिना।
अतएवाधुनिकानांकर्मसांङ्गत्वंजानतामनधिकारिणामपिबहुवित्तव्ययायाससाध्येषु।यावद्वर्णविभागोस्तियावद्वेदःप्रवर्तते।सं
न्यासंचाग्निहोत्रंचतावत्कुर्यात्कलौयुगेइतिदेवलवाक्यस्यसंकरेभ्योवर्णानांपृथक्करणरूपोवर्णविभागोयावत्यावच्चवेदस्यनि
यमाध्ययनरूपाप्रकर्षेणवृत्तिस्तावदेतद्द्वयमनुष्ठेयमित्यर्थकस्यकालबोधकैः।चत्वार्यब्दसहस्राणिचत्वार्यब्दशतानिच।क
लेर्यदागमिष्यन्तितदात्रेतापरिग्रहः।संन्यासश्चनकर्त्तव्योब्राह्मणेनविजानतेत्यादिव्यासवाक्यादिभिःकलिवर्ज्येष्वपिअग्निहो
त्रयागादिषुधनलाभफलकप्रतिष्ठार्थप्रवृत्तिः।प्रतिष्ठाद्युपाधिवशाज्जायमानोत्कटेच्छैवप्रवृत्तौप्रयोजिकेतिनदोषः।अतएवगी
तायामभिसंधायतुफलंदम्भार्थमपिचैवयत्।इज्यतेभरतश्रेष्ठतंयज्ञंविद्धिराजसमित्यनेनदम्भस्यापियज्ञफलतोक्ता।दम्भो
धार्मिकत्वेनव्यापनम्।अपिचेतिपदाभ्यांविकल्पेनसमुच्चयेनफलत्रयमुक्तमितितद्व्याख्यातारः।यद्यप्ययंनिषिद्धत्वात्संप्रत्यध
र्मएवतथापितत्त्वमजानतांलोकानांधर्मत्वभ्रमाद्दम्भार्थंतत्रप्रवृत्तिः।विधिहीनमसृष्टान्नंमन्त्रहीनमदक्षिणम्।श्रद्धाविरहितं
यज्ञंतामसंपरिचक्षतइतिच।किंचसमानफलानामपिकर्मणांशक्ताशक्तभेदेनव्यवस्था।सहस्रशक्तिश्चशतंशतशक्तिर्दशापिच।द

मं·
५०

ह्यादपक्षयः शक्त्या सर्वे तुल्यफलाः स्मृता इति भारतोक्तेः। अतएव वित्तशाठ्यं न कारयेदिति तत्तद्व्रतप्रकरणे पठ्यते इति तत्परास्तम्। उक्तभाष्यविरोधात्। तच्च द्वैजात्यस्यापि तत्तद्भूयस्त्वसमनियतत्वान्नदोषः। ननु भीष्मकण्वादीनां पाद्मोक्तयो वैयाघ्रपद्यगोत्राय सांकृत्यप्रवराय च। गङ्गापुत्राय भीष्माय आजन्मब्रह्मचारिणे। अपुत्राय ददाम्येतदुदकं भीष्मवर्मणे इत्यादितर्पणमन्त्र वसूनामवताराय शंतनोरात्मजाय च। अर्घ्यं ददामि भीष्माय आबाल्यब्रह्मचारिणे इत्यर्घ्यदानमन्त्रयोर्नित्यब्रह्मचर्यश्रवणाद्पत्नीकतया अपत्नीकस्य च पत्नीवदस्याग्निहोत्रं भवतीत्यादिवचनैरग्निसाध्ये कर्मण्यनधिकारात् कथं तदनुष्ठानम्। अयं पितरमाज्ञाय कामार्तं शंतनुं पुरा। ऊर्ध्वरेतसमात्मानं चकारेति वचनाच्च। आबाल्यनूर्ध्वरेतस्त्वमावृत्योर्ध्वरेतसं चकारेति तदर्थः। आबाल्यब्रह्मचारिणे इत्याद्येकवाक्यत्वात्। त्वां हि राज्ये स्थितं स्फीते समग्राङ्गमरोगिणम्। स्त्रीसहस्रैः परिवृतं पश्यामीह्योर्ध्वरेतसमिति शान्तिपर्वोक्तिस्तु दास्यादिभिरप्युपपन्ना। स्त्रीशब्दस्य पत्नीपर्यायत्वाभावात्। अनेकसहस्रविवाहाभावाच्च। अद्यप्रभृति मे दाशब्रह्मचर्यं भविष्यतीत्यस्या दाशाग्रे कृतप्रतिज्ञायाः पुनर्ब्रह्मचर्यं भविष्यतीत्यर्थः। किंच पूर्वब्रह्मचर्याभावेऽमोघवीर्यत्वेन कथं तस्य पुत्राभावः स्यात्। किंचानेकसहस्रपत्नीसत्त्वे ऋतुस्नातां तु यो भार्यामित्यादिदोषश्रवणात् न तत्प्रतिज्ञाया अत्यन्तौचित्यं स्यात्। दाशो वा कथं तत्र पर्यनुयुञ्जीत। पश्यामि वेति पाठे उर्ध्वरेतसं शिवमिव पश्यामीत्यर्थः। ऋते शांतनवाद्भीष्मान्न पश्याम्यूर्ध्वरेतसमित्युत्तरार्धपाठः क्वचित्। उर्ध्वरेतस्त्वं चाष्टविधमैथुनेच्छारहितत्वम्। एतेनैतद्बलात्तस्य पत्नी

राम·
५०

कल्पनंपरास्तम्। नचनित्यस्यऋतुकालिकस्याभ्युपगमस्य नैमित्तिकेन पित्रर्थमङ्गीकृतेन ब्रह्मचर्येण बाधः। षोडश्यामेव संनिहितं प्रति अनेन नित्येन तत्तन्नैमित्तिकसकलनिषेधबाधस्यदर्शनात्। अतएव ऋतौ श्राद्धदिनेऽपि भार्यां गच्छतो न ब्रह्मचर्यहानिरिति मिताक्षरा। तस्याग्निहोत्रादिसत्त्वे मानंतु तन्मरणकाले। महता राजयोगेन परिवारेण संवृतः। स्तूयमानो महातेजा भीष्मस्याग्नीननुव्रजन्। प्राप्तोस्मिन्समये राजन्नग्नीनादाय ते विभो इत्यादि भारते युधिष्ठिरवाक्यश्रवणम्। यएषरोषात्समतपनूचलस्योधोनः सेनां सिंह इवाररक्षः। सएष भीष्मः कुरुवंशकेतुर्येनाहृतास्त्रिदश वाजिमेधा इत्यादि च। त्रिशतं वाजिमेधा इति क्वचित्पाठः। नोस्मत्तः सेनां स्वसेनामित्यर्थः। कण्वस्य तु महाकविना कालिदासेन शकुन्तलानाटके शकुन्तलोपाख्याने भारतोक्तमूर्द्ध्वरेतस्त्वं प्रथमाङ्के स्वयमुक्त्वा चतुर्थे तस्यवैतानिकाग्निवर्णनं कृतम्। एवमाधुनिकानामप्यनधिकारिणां तत्कर्मणि प्रवृत्तिरिति चेन्न। बह्वृचब्राह्मणे अपत्नीकोऽग्निहोत्रमाहरेन्नाहरेदिति विचारमुपक्रम्य आहरेदित्याहुः यदि नाहरेदनद्धापुरुषः स्यात् कोऽनद्धापुरुषः न देवान्न पितॄन्न मनुष्यानिति तस्मादपत्नीकोऽप्यग्निहोत्रमाहरेत् तस्मात्सौम्यं याजयेदित्युक्तेरपत्नीकस्याप्यग्निसाध्ये कर्मण्यधिकारात्। अद्धेति सत्यनाम तद्विपरीतोऽनद्धादुसर्थः। न देवानिति पूजयेदिति शेषः। मनुष्यानतिथीन्। अत्रापत्नीकोपीत्यपिना तस्याविद्यमानत्वे तां विना यज्ञाद्यभावं सूचयति। न चेयं श्रुतिर्मृतपत्नीकपरा सामान्यप्रवृत्तश्रुतेः संकोचेन व्याख्यानस्यायुक्तत्वात्। अतएव या यजमानस्य पत्नी साभिदुत्यावहन्ति यो वा

CC-0. In Public Domain. Digitization by eGangotri

कश्चिदविद्यमानायामित्यापस्तम्बसूत्रव्याख्याने रुद्रदत्तविद्यारण्याभ्यामुक्तम्। अवहन्तीत्यनुकृष्यते। अविद्यमानायामनालम्भुकत्वादिनानिमित्तेनासंनिहितायामभावे च तस्याद् इत्यर्थः। अविशेषात्। वक्ष्यति च पत्न्यभावे तेज आदि लुप्यते इति। किंचास्याग्निहोत्रं मे इति यजमानस्यैव स्वामित्वख्यापनेन व्रीहियवपश्वाज्यकपालपत्नीसंबन्धानीति प्रसिद्धाङ्ग समभिव्याहारेण च तस्या अङ्गत्वे न तदभावेपि न तत्। किंच विद्यमानायास्तस्याः सहाधिकारेपि न यजमानसाम्यम्। यदुक्तमाशीर्ब्रह्मचर्यतन्नपत्न्या अतुल्यत्वादिति मीमांसकोक्तेः। किंच वसन्ते ब्राह्मणोऽग्निमादधीत दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिकर्मचोदना अपि यजमानमेवाधिकुर्वन्ति न पत्नीं। बह्वृचब्राह्मणेप्युक्तं तस्मादपत्नीकोप्यग्निमाहरेदिति। किंचाचारोप्यत्र दृष्टः शिष्टतमानां पूर्वेषां यथा कण्वविभाण्डकभीष्मादीनां यथा च भगवतो दाशरथेरिति। अत्रान्त्योऽसंनिहितपत्नीकः। आद्यास्तदभाववन्तः। अत्रैवं वदता विद्यारण्येन श्रुतेः संकोचेन व्याख्यानं स्वानभिमतमिति दर्शितम्। अनेनाचारेणासंकोचेन व्याख्यानस्यैव लाभात्। पत्नीवदस्याग्निहोत्रं भवतीति सूत्रे च रुद्रदत्तेनैवमुक्तम्। अग्निहोत्रं पत्नीवत्सन्निहितपत्नीकम्। स्वे आयतने पत्न्युपविशतीत्युत्तरसूत्रेण सिद्धे पत्नीवद्वचनं तस्या विद्यमानत्वे आदरार्थम्। अस्येति वचनाद्यजमानस्यैव कर्मणि स्वाम्यं न पत्न्या इति ख्यापितं भवति तच्च दर्शितं प्रागिति। एतेन यद्ग्रामाण्डारेण श्रुतिस्मृतपत्नीकविषया। ८ अत्रत्यमस्येतिवचनं तु प्रवृत्तसत्राणां कस्यचिन्मरणे तन्नेदिष्ठं तत्स्थाने दीक्षयित्वा तेन सह सत्रसमापनमुक्तमेवं च कुण्डपायिनामय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नेमासमग्निहोत्रानुष्ठानेनेदिष्टपत्न्यासहप्रयोगः प्राप्तस्तथा माभूत्। मृतपत्न्यैव सह कर्त्तव्यमित्यर्थमित्युक्तं तदपास्तम्। विनाबाधं प्र
करणान्तरे निवेशस्यायुक्तत्वात्। किंचैतद्व्याख्यानेऽस्येत्यस्य पत्नीविशेषणत्वे पत्नीवदिति वृत्तिरयुक्ता स्यात्। सविशेषणानां वृत्तिर्नेत्यु
क्तेः। अमृतस्यात्रानुपस्थितेश्च। अत एव काव्यदोषेषु प्रकाशादावुक्तशास्त्रविरुद्धत्वदोषदुष्टकथनेन शकुन्तलानाटकरूपकाव्यस्य दुष्टत्वं ना
प्त्यैवमपि भीष्मादीनां वेदाध्ययनोत्तरं कृतसमावर्तनानामपि केनचिन्निमित्तेनानिच्छया वाऽकृतदारपरिग्रहाणामनाश्रमित्वदोषापत्तिः
।अग्निहोत्रानुष्ठानातिथिपूजादिना तस्य गृहस्थाश्रमसिद्धेः। अग्निहोत्रिविधुरवत्। अग्निहोत्रादिना देवर्णमुक्तिस्तेषाम्। पितृऋणापा
करणं भीष्मस्य पितृभक्त्याऽन्येषां दत्तकादिभिस्तपोबलेन मानसपुत्रैर्वा सिद्धम्। अत एव कण्वादिभ्यो गोत्रे इति गर्गादिषु कण्वपाठ
श्च संगच्छते। त्रिभिर्ऋणवा जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः एषवानृणो यः पुत्री यज्वा ब्रह्मचारी चेति श्रूय
ते। तथापि नैष्ठिकब्रह्मचार्यादेर्नैतत्। तदृणापाकरणस्य ब्रह्मचर्येणाग्निकार्यादिना च सिद्धेः स्मृतिषूक्तत्वात्। एतेनात्र वाजिमेधा
इत्येतत्तत्समफलकदानादिपरम्। पत्न्यभावेन मुख्ययज्ञासंभवात्। अग्नीनादायेत्यपि संस्कारकाग्निपरमिति यत्कैश्चिदुक्तमे
तदेव तस्य पत्नीकल्पकमित्यन्यैरुक्तं तत्परास्तम्। अग्नीनिति बहुवचनासंगतेश्च। इदानीं तन्नानातु न तदनुष्ठानम्। तथाचाराभा
वात्। प्रागुक्तोध्वरेनस्त्वादिगुणवतामेव तथानुष्ठानौचित्येनेदानीं तनानां प्रायस्तत्त्वासंभवाच्चेत्यलम्। नित्यनैमित्तिकयोरपि

प्रत्यवायपरिहारः फलम्। वेदसहस्रैरपिबोधिते निष्फलत्वज्ञानदशायामप्रवृत्तेः। उक्तरीत्याविधिबलेनप्राप्तस्यप्रत्यवायस्यतत्करणेपरिहारावश्यंभावात्। नचाफलाकाङ्क्षिभिर्यज्ञोविधिदृष्टोयइज्यतेससात्त्विकइतिगीतावचनविरोधः। यज्ञादीन्युपक्रम्य। यज्ञोदानंतपश्चैवपावनानिमनीषिणाम्। एतान्यपितुकर्माणिसङ्गंत्यक्त्वाफलानिच। कर्तव्यानीतिमेपार्थनिश्चितंमतमुत्तममित्यष्टादशेगीतायामेवपावनत्वोक्तेः। सङ्गः कर्तृत्वाभिमानस्तस्मात्तुदृष्टोपिप्रत्यवायपरिहारः फलमितिस्वर्गादिफलंत्यक्त्वापिक्रियमाणस्यपावनत्वमितितदाशयः। नित्येषुचिजीवित्वमेवाधिकारः। नित्यत्वंचप्रत्यवायहेत्वभावप्रतियोगित्वम्। अहरहरित्यादिवीप्सायावज्जीवसदापदादिकंचतत्त्वेतात्पर्यग्राहकम्। चैत्रनिष्ठसंध्यावन्दनविषयकृतिसामान्याभाववतस्तत्तत्संध्याकालस्यपापहेतुत्वान्नकृतसंध्यावन्दनस्यकृतौनष्टायांपापोत्पत्तिः। संध्यामुपासतेयेतुसंततंसंशितव्रताः। विधूतपापास्तेयान्तिब्रह्मलोकमनामयमितिक्वचिन्नित्येफलश्रवणमप्यस्ति। नन्वयमर्थवादः स्तावकोनतुफलबोधकः। प्रशस्तत्वरूपास्तुतिश्चप्ररोचनाद्वारापुरुषप्रवृत्त्यर्थेतिचेन्न। सर्वेभ्यःकामेभ्योदर्शपूर्णमासावित्यादेरपितत्त्वापत्तेः। चतुर्थीतूर्जोवरुध्यैइत्याद्यर्थवादस्यचतुर्थीवन्नार्थसाधिका। दर्शपूर्णमासाभ्यांस्वर्गकामोयजेतेत्यादितःफलाकाङ्क्षानिवृत्तेश्चतत्तत्फलजनकत्वरूपंचप्राशस्त्यम्। धर्मान्तररूपंप्राशस्त्यंतुनप्रवृत्त्युपयोगि। विधितइष्टावगमेपितस्यावान्तररूपेणबोधनद्वाराक्वचित्क्वचिच्छीघ्रोत्पत्तिज्ञापनद्वारात्वरितप्रवृत्तयेऽर्थवादाइतीदृशा

र्थवादानां फलबोधकत्वमपीति बोध्यम्। अतएव सर्वशक्त्यधिकरणे काम्यं यथा फलायोपदिष्टं तथा नित्यमपीति भट्टैरुक्तम्। कर्मविपाकप्रायश्चित्तप्रवर्त्तनया दुःखानुत्पादरूपेष्टसाधनतानुमानम्। अन्यत्र पापध्वंससाधनतानुमानम्। अनुमाने पक्षश्च धात्वर्थे करणीभूतो यागस्तत्करणको व्यापारो वा। यत्तु तद्विषयकृतिपक्षकं तदिति तन्न। क्रियेष्टसाधनताज्ञानादपि प्रवृत्तिदर्शनात्। पाकादेरिष्टसाधनताज्ञानं विना तत्कृताविष्टसाधनत्वस्य ज्ञातुमशक्यताच्चेत्यन्यत्र विस्तरः॥ तत्र लिङ्रूपा शाब्दी भावना त्र्यंशा भाव्यकरणेतिकर्त्तव्यताभिः। तत्र तस्याः सविषयत्वेन विषयाकाङ्क्षायां समानपदोपात्तत्वप्रत्यासत्त्यांशत्रयविशिष्टार्थीभावना प्रवृत्तिरूपा विषयः। इयमेव भाव्याकाङ्क्षा साध्याकाङ्क्षेति चोच्यते। साध्यताख्यविषयतयैव तस्या विषयत्वात्। साध्यत्वं च साक्षात्परंपरासाधारणम्। एवं तस्याः साध्यत्वेऽवगते केनेत्याकाङ्क्षायां प्रवृत्त्यनुकूलव्यापारबोधकत्वेन ज्ञातपदज्ञानं करणत्वेनान्वेति। करणत्वं च भावनाभाव्यनिर्वर्त्तकत्वमेवं कुठारादेरपि पुरुषव्यापारनिर्वर्त्यच्छेदनिर्वर्तकत्वेनैव करणत्वात्। भावनाभाव्यकरणाकाङ्क्षैव च भावनाकरणाकाङ्क्षेत्युच्यते। तत्र कथं कर्मेति न्यायानुपाये द्वेषेणालस्यादिना वा प्रवर्तमानं पुरुषं प्रशस्तफलवत्ताज्ञापनेन द्वेषाद्यपसरणद्वारार्थवादवाक्यजन्या पूर्वोक्तप्राशस्त्यवत्तारूपास्तुतिः सहकारिकारणमितीयमितिकर्त्तव्यतेत्युच्यते। ननु शब्दानुपस्थितकरणादेः कथमन्वय इति चेन्न। शब्दोपस्थितप्रवर्तनाया उक्तत्रयाकाङ्क्षायाः शब्दादुपस्थितैस्तत्सहकारेण मनसोपस्थितैश्च पदार्थैस्तद्धि

ल-सं षयमानसद्बोधस्यतात्पर्यविषयीनाङ्गीकारात्। तथाहि। लिङ्गादेः श्रोत्रेणोपस्थितिस्तस्यभावनाबोधकत्वेनज्ञाततत्त्वमपिमनसोपस्थितम्। एवं
४३ चार्थीभावनाप्रवर्तनाबोधकतयाज्ञातपदज्ञानेनभावयेदितिबोधः। एवमर्थवादानामुपस्थितिः श्रोत्रेणप्रशस्तस्यतुतैर्लक्षणया। ज्ञाततया
स्तुमनसेत्यर्थवादैः प्रशस्तत्वेनज्ञात्वेतीतिकर्तव्यतासंबन्धः। प्राशस्त्यंचशीघ्रफलदातृत्वरूपम्। यत्तुस्वतःफलतोवाबलवदनिष्टाननु
बन्धित्वरूपप्राशस्त्यमर्थवादैर्बोध्यतइतितन्न। श्येनफलस्यशत्रुवधस्यानिष्टहेतुत्वेनफलतोनिष्टहेतुत्वेनफलतोनिष्टहेतौश्येनेचरा
गोत्कण्ठ्येनप्रवृत्तिदर्शनेनतदर्थवादैस्तद्बोधनासंभवात्। प्राशस्त्यज्ञानजननेनविधेःप्रवृत्तिजननेसाहाय्यमर्थवादैःक्रियतइतिविधि
स्तत्साकाङ्क्षः। एवमर्थवादाअपिभूतार्थानुवादकाःस्वाध्यायविध्यापादितप्रयोजनवत्त्वलाभायविध्याकाङ्क्षास्तत्रार्थवादानांप्रयो
जनांशोविधिनापूर्यते विधेःशब्दभावनायाइतिकर्तव्यतांशोर्थवादैरितिउभयश्रवणेपूर्णवाक्यमेकश्रवणेत्वन्यस्यकल्पनेतिबोध्यम्।
। एवमार्थीभावनापित्र्यंशा। यथायजेतेत्यत्रयजिदेवपूजायामित्युक्तेदेवपूजाकरणकव्यापारोयजेरर्थः। देवपूजाचमन्त्रकरणकोदेवो
द्देश्यकोहविषस्त्यागोयमेवयागः। भाव्यस्तुस्वर्गकामादिपदोपस्थाप्यःस्वर्गोर्थतोलभ्यते। यद्यपिसव्यापारस्यागविषयोपि। तथापित राम
स्यकरणत्वेनैवोपस्थित्याऽसुखरूपत्वेनापुरुषार्थतयाचनभाव्यत्वमितिबहिर्भूतस्वर्गस्यैवभाव्यत्वम्। अतएवज्योतिष्टोमेनेत्या
दौतृतीया। करणभूतेधात्वर्थेयागेऽभेदेनान्वयात्। यत्तुभाव्याकाङ्क्षाकिमितिशब्देनमीमांसकैर्दर्शितातदप्ययुक्तम्। भावयेदि ४३

तिपदस्योत्पत्त्यनुकूलव्यापारवाचितयासकर्मकत्वेन तदुपस्थितेस्तथाकाङ्क्षौचित्येपि यजेतेत्यादिनस्तेन रूपेणाबोधात्तदुपस्थाप्येतथाकाङ्क्षानौचित्यात्। ततोपि तथाबोधाङ्गीकारे स्वर्गं भावयेदितिवत्स्वर्गं यजेतेत्यापत्तेः। अतः किमर्थमित्येव तदाकारउचितः। अतएवेदृशानां कामान्तपदेन चतुर्थ्या चोल्लेखः। करणं तु धात्वर्थयागः। करणत्वं भावनाभाव्यनिर्वर्तकत्वमुक्तमेव। सहकारिकारणाकाङ्क्षारूपकथंभावाकाङ्क्षा तु संनिधिपठिताश्रूयमाणफलक्रियाजातरूपेतिकर्तव्यतया निवर्तते तैर्विना यागेनापूर्वजननात्। पचतीत्यादौ सकर्मकस्थले तंडुलादिरूपकर्माकाङ्क्षाप्यधिका करणाकाङ्क्षात्र बहिर्भूतकाष्ठादिपदैर्निवर्तते। बाह्यफलाकाङ्क्षायां तु प्रथे इत्याद्यपि प्रयुज्यते। न च विशिष्टस्य धात्वर्थत्वात्तदर्थस्वर्गभावनोद्देशेन त्यागस्य विधेयत्वं न स्यादिति वाच्यम्। विधिप्रत्ययबोध्यप्रवर्त्तनाविषयत्वरूपविधेयत्वस्य प्रकृत्यर्थे संपूर्णधात्वर्थे शब्दाद्बोधेपि स्वर्गस्य सुखरूपत्वेन स्वत एवेष्टतया तद्व्यापारे स्वरसत एव प्रवृत्तेः सिद्धत्वेन च विशेषणे फले तत्त्वप्रतीत्याऽदोषात्। यथा लोहितोष्णीषा ऋत्विजः प्रचरन्तीत्यादौ· उपपादयिष्यामश्चेदं समासे। इदं च भावनायाः प्रत्ययार्थत्वमिति मीमांसकमतेप्यावश्यकं तेषामपि समानपदोपात्तत्वप्रत्यासत्त्या लिङर्थप्रवर्तनायाः प्रथमतस्तदुपात्तभावनायामन्वयादिति दिक्· औपनिषदास्तु यागानुकूलो व्यापार एव यजेरर्थः पच्यादेरिव याग एव तत्र भाव्यः। स्वर्गस्तु पुरुषव्यापाररूपभावनाऽव्यवहितोत्तरवर्तित्वाभावान्न तद्भाव्यः। यागद्वारा तु ससाध्यः। तथाहि विधिरप्रवृत्तप्रवर्तकत्वे सति प्रेर्यमाणेष्टप

योजनसाधनविषयोपदेशरूपः।तस्यधर्मस्यज्ञापकउपदेशोविधिरित्यर्थकात्तस्यज्ञानमुपदेशाइतिजैमिनिसूत्रात्।तत्रज्योति
ष्टोमादिवाक्येप्रेर्यस्वर्गकामस्येष्टप्रयोजनसाधनतयायागावगतिर्विधिस्वभावात्।यागस्तुकर्मणांदुःखत्वेनचेतनसमीहाविषयत्वा
भावान्नोक्तस्वरूपविधिबोध्यभावनोद्देश्यः।किंतुस्वर्गादयएव।तेषांनामपदोपात्तत्वेपिकामपदात्साध्यत्वप्रतीतेः।प्रवृत्त्यव्यवहि
तप्राग्वर्तीच्छाविषयत्वेनोपस्थितेश्चप्रीत्यात्मकत्वेनसमाहितत्वाच्च।एवंचस्वर्गायेत्यध्याहृत्यस्वर्गाययागंभावयेत्स्वर्गकामइति
बोधः।यागेभावनाभाव्यत्वरूपसाध्यत्वस्यस्वर्गसाधनत्वेनविरोधाभावात्।अनेकविशेषणविशिष्टक्रियाविधिसत्त्वेनोभयो
र्भाव्यत्वेपिनवाक्यभेदः।अत्रकरणाकाङ्क्षाबाह्यैर्व्रीह्यादिभिर्निवर्तते।यत्तुधात्वर्थफलस्यत्यागरूपस्यभावनांप्रतिकरणत्व
मुक्तम्।तन्न।कारकाधिकारेसाधकतमंकरणमितिसूत्रस्यक्रियाजनकेषुक्रियायाःप्रकृष्टंजनकंकरणसंज्ञकमित्यर्थोभाष्यादि
संमतः।अतएववृत्तिकृदादिभिःक्रियाजनकंकारकंकरणमित्युक्तम्।हरिरप्याह।क्रियायाःपरिनिष्पत्तिर्यद्व्यापारादनन्तरम्।तत्क
रणमिति।अतएवकरणस्यव्यापारःकारकेइतिसूत्रेभाष्येदर्शितः।तद्व्यापारस्यधात्वर्थत्वेकरणस्यकर्तृत्वंचतत्रभाष्येउक्तम्।त्या
गश्चनभावनाजनकोनापिव्यापारवानितितस्यकरणत्वस्यदुरुपपादत्वात्।भावनाभाव्यनिर्वर्तकत्वंकरणत्वमित्यर्थस्यसूत्र
भाष्यादितोऽलाभात्।व्यत्ययानुशासनमपिउक्तेष्वर्थेष्वेवव्यत्ययबोधकम्।नतुयस्मिन्कस्मिंश्चिदर्थेतद्बोधकमितिस्पष्टमे

व।किंचसब्रह्महत्यांतरतियोऽश्वमेधेनयजतेइत्यादौयच्छब्दयोगादनुवादकेवाक्येतृतीयानापत्तिः।नहितत्रयजतेइत्यस्ययागेनभा
वयतीत्यर्थः।भाव्यानुपस्थित्यासाकाङ्क्षत्वात्।सब्रह्महत्यामितिवाक्यान्तरेणहिब्रह्महत्यातरणरूपभाव्योपस्थितिः।तस्यानु
वादकवाक्येभाव्यत्वेनान्वयस्तुनयुक्तः।तच्छब्दयोगेनतस्यविधेयसमर्पकत्वात्।किंचतस्यैवान्वयेयोघटमुत्पादयतिसघटंलभ
तेइतिवाक्यवदस्यवैदिकवाक्यस्यविसंकुलतापत्तिः।किंतुवाक्यद्वयजबोधोत्तरमेतत्कामोऽश्वमेधेनयजेतेतिविधिःकल्प्यतेइत्ये
वदूरमर्यादा।यदपिवाजपेयादिपदानिसुराद्रव्यादिगुणविधायकानिइतिपक्षेएककरणावरुद्धेनेतरकरणान्वयइतितदन्वयानुप
पत्तिरिति।तदपिन।अस्यार्थस्यश्रुतिस्मृतिबोधितत्वाभावात्।किंचैवंफलरूपकर्मविरुद्धायांभावनायांबाह्यकर्मान्तरयोगानाप
त्तिस्तव।सर्वकारकाणांभावनान्वयनियमात्।तत्रफलद्वारैवभावनान्वयेत्तत्रापित्यागद्वारैवभावनान्वयेबाधकाभावः।त्यागेपिसुरा
द्रव्यस्यजनकत्वात्।अवदानग्रहणमेवचतद्व्यापारः।किंचवाजपेयेनेत्यादौविशिष्टेनेत्यध्याहारेणवाक्यैकदेशन्यायेनवायज्यर्थ
यागेनगुणविधावपिसंबन्धउपपद्यते।नचलक्षणानापिवाक्यभेदः।विशिष्टविधेरितिविभाव्यताम्।तस्मादुक्तपरंपरोपदेशेन
क्वचिद्योऽश्वमेधेनयजतेससप्तदशदीक्षोवाजपेयइत्याद्यनुवादेनचज्योतिष्टोमेनेत्यादेश्चपदपरस्यस्वज्ञानद्वाराकरणत्वेना
न्वयोभावनायाम्।तस्यापिसंकल्पद्वारायागभावनाकरणत्वात्।पदस्यकरणत्वंचोपस्थितयागविशेषणत्वेनैवसंकल्पादिद्वारे

तियागनामधेयत्वमपिसिद्धम्। स्पष्टंचेदंधर्मंजैमिनिरित्यधिकरणेभाष्यभामत्योरित्याहुः। नहिंस्यात्सर्वाभूतानीतिनिषेधाद्यागीयपश्वालम्भेपापंभवत्येव। नचाग्नीषोमीयपशुमालभेतेत्यादिर्यागीयहिंसाविधिर्निषेधस्यविहितेतरहिंसापरत्वंबोधयनीतिवाच्यम्। विधिनाप्रकरणेनचतस्याआप्तप्रेरणाविषयत्वेनेष्टहेतुत्वक्रत्वर्थत्वबोधनेपिउक्तरीत्यानिष्टाहेतुत्वबोधेमानाभावेननिषेधस्यहिंसायांपुरुषानिष्टहेतुत्वबोधकत्वेनविरोधाभावात्। परकीयसुन्दरीगमनादौसमावेशदर्शनात्। किंचालम्भनमन्त्रस्पर्शः। अग्निहोत्रप्रकरणपठितेवत्समालभेतेतिवाक्येतदर्थकत्वनिर्णयात्। हिंसात्वङ्गयागविशसनप्रकारोपदेशाभ्यामाक्षेपलभ्या। एवंचाक्षेपलभ्यार्थेनविरोधेपिवेदस्याप्रामाण्यप्रसक्त्यभावेनतत्संकोचेनमानम्। अन्यतराप्रामाण्यभीत्याहिसंकोचः। पापसत्त्वेपितद्दोषसहिष्णोरेवरागवशीकृतस्यश्येनादाविवज्योतिष्टोमादावपिप्रवृत्तिरुपपद्यते। एतेनतक्रकौण्डिन्यन्यायेनाविरोधेपिनिषेधस्यविहितेतरहिंसापरत्वंविशेषविधिनाबोध्यतेइत्यपास्तम्। हिंसाविधेरभावात्। नचनिषेधस्यपुरुषार्थत्वेनयदर्थोनिषेधस्तदर्थमेवनिषेध्यमितिनियमेनपुरुषार्थहिंसायाएवसनिषेधइतिवाच्यम्। पुरुषार्थस्याप्युपगमादिनिषेधस्यक्रत्वर्थत्वदर्शनेनत्वदुक्तनियमस्यव्यभिचरितत्वात्। क्रत्वर्थहिंसायाअपिपरंपरयापुरुषोपकारकत्वेनपुरुषार्थत्वाच्च। नचयज्ञार्थंपशवःसृष्टाःस्वयमेवस्वयंभुवा। यज्ञोस्यभूत्यैसर्वस्यतस्माद्यज्ञेवधोऽवधः। यावेदविहिताहिंसानियतास्मिं

CC-0. In Public Domain. Digitization by eGangotri

श्चराचरे। अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभाविति मनुवाक्यादिभिः पापाभावप्रतिपादकैर्निन्दाप्रायश्चित्तोपदेशाद्यसमभि॰
व्याहृतविधिवाक्यबोध्यप्रवर्तनायाः स्वविषयप्रवृत्तिविषये धात्वर्थे सामान्यतोनर्थहेतुत्वप्रतिक्षेपकत्वकल्पनेन सामान्यनिषेधस्य
तदतिरिक्तपरत्वम्। आक्षेपलभ्याया अपि विधितात्पर्यविषयत्वेन तस्याप्यनर्थहेतुत्वप्रतिक्षेपात्। अतएवान्यत्र हिंसां चैवाविधानत इ
त्यविधानेन हिंसैव पापजनिकोक्ता। श्रुतिरपि अहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्य इत्याह। तीर्थं यज्ञः। तीर्थं शास्त्राध्वरेति कोशात्। अ
तएव मरणान्तप्रायश्चित्ताहवाभिमुखहननोचितदण्डरूपचोरहननादीनां न पापजनकत्वम्। शुद्ध्यर्थं विहितमरणे तस्यासुक्तत्वात्। न
दोषो हिंसायामाहवे इत्युक्तेश्च। चोराद्यवधे राज्ञो दोषश्रवणाच्च। तस्मादगर्हितहिंसातिरिक्तविषयोयं निषेधः। अगर्हिता चानुपदिष्टप्राय
श्चित्तिकाहिंसा। एवं सर्वनिषेधेषु द्रष्टव्यमिति वाच्यम्। मनुवचनेऽवध इत्यादावनुदरा कन्येतिवदल्पार्थे नञः सत्त्वात्। अन्यथा घटोऽघ
ट इतिवदस्याऽबोधकत्वेनावधपदस्य पापाजनकत्वलक्षणापत्तेः। यज्ञानुपक्रम्याहिंसा परमो धर्मो गीतो वै मनुना पुरेति ब्रह्मवैवर्तप्र
थमखण्डे उक्ततया च मदुक्तस्यैवौचित्यात्। परमत्वं च पापाजनकत्वे नास्य। अल्पीयः प्रायश्चित्तेन परिहर्तुं शक्यत्वात् तत्र न द्वेषः। किंच म
हतः फलस्य कामनया क्षुद्रे तत्र न द्वेषः। पशुहिंसाजन्यपापस्याल्पप्रायश्चित्तोपदेशेन बहुव्ययायाससाध्ययागजन्यस्वर्गात्प्रथममेवा॰
ल्पस्य मनुना यागविषये त्वल्पत्वबोधनात्। एवं च न तद्बलेन विधेः स्वविषयेनर्थहेतुताप्रतिक्षेपकत्वम्। अत एव गीतायां यज्ञानां जपयज्ञो

स्मीत्यादिनाजपयज्ञस्याहिंसारूपत्वेनप्राशस्त्यमुक्तम्।तथा।स्वधर्ममपिचावेक्ष्यनविकम्पितुमर्हसि॥धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्ष
त्रियस्यनविद्यतइत्युपक्रम्य।सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ॥ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसीत्यनेनविहिते
पियुद्धेपापंवदताःतादृशस्ययज्ञेपितदुक्तप्रायमेव।नचापशब्दज्ञानजाधर्मस्यकूपखानकन्यायेनसुशब्दज्ञानजधर्मेणनाशःफला
न्तरंचेतिभाष्येपस्पशायामुक्तम्।कूपखानकस्तत्खननवेलायांमृदालिप्तस्ततोजलंलब्ध्वातंलेपंदूरीकरोतिफलान्तरंचलभतेतेनन्या
येनयज्ञजधर्मेणतत्पापनाशःफलान्तरलाभश्चेतिनदोषइतिवाच्यम्।अपशब्दज्ञानादधर्मस्यावाचनिकत्वेनकेवलंवैपरीत्यमात्रे
णकल्प्यस्यातिस्वल्पत्वादुत्कृष्टेनसाधुशब्दज्ञानजधर्मेणनाशेपिनहिंस्यादितिवचनबोधितपापस्यतेनधर्मेणवचनंविनानाशायोगा
त्।उक्तगीतावाक्याच्च।अतएवेन्द्रादेःशताश्वमेधफलस्वर्गभोगसमयेनेकशोरावणमहिषासुरादिभ्योदुःखधाराःश्रुतिपुराणादिषू
पवर्णिताः।यज्ञान्तर्गतहिंसादिजन्यपापफलस्ययज्ञफलभोगान्तरुत्पत्तेरुपपत्तिसिद्धत्वात्।एतेनाध्वरइतियज्ञनामध्वरतिर्हिंसा
कर्मातत्प्रतिषेधोध्वरइतिनिरुक्तमहिंस्रइतितद्भाष्यमपिव्याख्यातम्।नञोल्पार्थत्वात्।अतएवतस्मादभ्युदययोगादहिंस्रइति
उपपद्यतइतितद्भाष्येउपसंहृतम्।उक्तंच।स्वर्गेपिपातभीतस्यक्षयिष्णोर्नास्तिनिर्वृतिरिति।अहिंसन्सर्वेतिश्रुतिस्त्ववैधहिंसात्या
गस्येष्टसाधनत्वंवैध्याश्चतत्त्वमाह।नतुवैध्याअनिष्टसाधनत्वाभावम्।हिंसाविधयोपिहिंसायाःस्वर्गसाधनत्वमात्रमाहुर्नत्वनर्थ

CC-0. In Public Domain. Digitization by eGangotri

हेतुताप्रतिक्षेपमपि। अल्पायुष्ट्वाद्यनिष्टबोधकस्मृतिविरोधात्। तदुक्तं पातञ्जलभाष्ये। यदि कथंचित्पुण्यावापगता हिंसा भवेत्तत्रात
त्रसुखप्राप्तावप्यल्पायुर्भवेद् इति। अतएव क्षत्रियाणामपि युधिष्ठिरादीनां स्वधर्मयुद्धेन जातज्ञातिहिंसायां प्रायश्चित्तश्रवणम्। त
थाच भागवते मुचुकुन्दं प्रति कृष्णवाक्यम्। क्षत्रधर्मे स्थितो जन्तून्न्यवधीर्मृगयादिभिः समाहितस्तत्तपसा जह्यघं मदुपाश्रित इति।
आदिनायुक्तम्। मार्कण्डेयेपि। तस्माद्यास्याम्यहं तात दृष्ट्वेमं दुःखसन्निधिम्। त्रयीधर्ममधर्माढ्यं किंपाकफलसन्निभमिति। किंपाको
निम्बः। इन्द्रवारुणीत्यपरे। मोक्षधर्मे भारते पितापुत्रसंवादे। तातैतद्बहुशोभ्यस्तं जन्मजन्मान्तरेष्वपि। त्रयीधर्ममधर्माढ्यं न सम्यक्
प्रतिभाति मे इति। तथा केनचिदुञ्छवृत्तिना मृगरूपिणो धर्मस्य प्रलोभनाद्वाक्यैर्वधे कृते उक्तम्। तस्य तेनानुभावेन मृगहिंसात्मनस्तदा।
तपोमहत्समुत्सन्नं तस्माद्धिंसा न यज्ञियेति। यज्ञियापि हिंसा न केवलं धर्मायेत्यर्थः। एवं चौषधीयज्ञ एव सात्त्विकब्राह्मणस्या
धिकारः। नमो ब्राह्मणयज्ञाय ये च यज्ञविदो जनाः। स्वयज्ञं ब्राह्मणा हित्वा क्षत्रयज्ञमिहास्थिताः। यदेव सुकृतं हव्यं तेन तुष्यन्ति देव
ताः॥ नमस्कारेण हविषा स्वाध्यायैरोषधैस्तथेति वनपर्वणि जाजलिसंवादे उक्तेश्च। अव्यवस्थितमर्यादैर्विमूढैर्नास्तिकैः परैः। सं
शयात्मभिरव्यक्तैर्हिंसा समनुवर्णिता। सर्वकर्मस्वहिंसां हि धर्मात्मा मनुरब्रवीत्। कामकाराद्विहिंसन्ति बहिर्वेद्यां पशून्यथेति। हिं
सायुक्तयज्ञनिन्दापूर्वकम्। विष्णुमेवाभिजानन्ति सर्वयागेषु ब्राह्मणाः। पायसैः सुमनोभिश्च तस्यापि यजनं स्मृतमिति मोक्षधर्मे

Nepal Sanskrit University, Balmeeki Campus

सुदिचख्नुवाक्याच्च।सायथापापायतयावेदान्तर्गतापीति तदर्थः।नस्तैकैरिति करणेतृतीया।तैःकरणभूतैस्तानुद्दिश्येति यावत्।वि
ष्णुमेवेति विष्णुत्वेनैव सर्वदेवताजानन्तीत्यर्थः।अतएव सर्वयागेषु ब्राह्मणानां पायसपुष्पैरेव तत्तद्भागकल्पनेत्यर्थः।एतेनेदंस्वा
तन्त्र्येण पूर्वविष्णुयागविधायकमित्यपास्तम्। तैत्तिरीयश्रुतावपि परागावर्तते ध्वर्युः पशोः संज्ञप्यमानादित्युक्तम्। तत्र पापसत्वे
एव हि ततः परागावर्तनं युक्तं नान्यथा॥ रिच्यत इव वा एष प्रेव वा रिच्यते यो याजयति प्रति वा गृह्णाति याजयित्वा प्रतिगृह्य वानश्नन्
त्रिः स्वाध्यायमधीयीतेति ऋत्विजां प्रायश्चित्तोपदेशाच्च।सोपि पापसत्त्वे एव युक्तः।एतेनोक्तपुराणान्यपशुचातुर्मास्यस्तावका
न्येवेत्यपास्तम्। सर्वकर्मस्वहिंसामिति विचख्नुवाक्ये श्रवणाच्च।हिंसामयानां नित्यत्वोक्तिरपि तामसं मांसभक्षणादिरागान्धं वेदमार्गं प्र
वर्तयितुं न तु तत्त्वदृष्ट्या। अतएव भागवते मुन्यन्नैस्तु परा प्रीतिस्तथा न पशुहिंसयेत्युपक्रम्य द्रव्ययज्ञैर्यक्ष्यमाणान् दृष्ट्वा भूतानि बिभ्य
ति।एष माकरुणो हन्यादतज्ज्ञोस्वतृपोभृशम्।तस्माद्यथोपपन्नेन मुन्यन्नेनैव धर्मवित्। संतुष्टोहरहः कुर्यान्नित्यनैमित्तिकीः क्रियाइ
ति।द्रव्यमत्र पशुः पशुयज्ञैरिति पाठान्तरम्।तेन च मुन्यन्नेन तुष्टस्य तेनैव यज्ञोर्थात्तेनासंतुष्टस्य मांसादिलुब्धस्य तेनेति सूचितम्।
तेषां तामसाधिकारिकत्वं च कपिलस्युमरश्मिसंवादे मोक्षधर्मे स्पष्टमेव।लोके व्यवायामिषमद्यसेवेति श्लोके भागवतेपि स्पष्टमेतत्
।न चैवकारवादे निरूपितम्। तत्रैव स्थलान्तरेपि भगवद्वाक्यम्।हिंसायां यदि रागस्याद्यज्ञ एव न चोदना। हिंसाविहाराह्यालब्धैः प

शुभिः स्वसुखेच्छया। यजन्ते देवतायज्ञैरिति। हिंसायां तत्फलमांसभक्षणे यदि रागस्तर्हि यज्ञ एवेत्यभ्यनुज्ञाद्वारा तादृशरागवतः प्रति परिसंख्येयं न तु सर्वान्प्रति आवश्यकत्वेनेयं चोदनेत्यर्थः। नित्यत्वादिकमपि तान्प्रत्येवेत्यर्थकमुक्त्वा वेदस्य हृदयं लोके नान्यो मद्वेद कश्चनेत्युक्तम्। मत् मत्तोऽन्यो न वेदेत्यर्थः। अत एव पतञ्जलिना योगसूत्रे एषां शुक्लकृष्णत्वेन व्यवहारः कृतः। गीतायामपि। अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचिदित्युक्तम्। कर्मण इति जातावेकवचनम्। कस्यचित्कर्मण इष्टं सुखमेव फलम्। कस्यचिदनिष्टं दुःखमेव। कस्यचिन्मिश्रम्। एतत्सर्वमत्यागिनां कर्मफलात्यागिनां प्रेत्य देहान्तरसंबन्धे भवति। न तु संन्यासिनां तत्फलत्यागिनाम्। यत्तु अत्यागिनां कर्मफलत्यागेऽपि कर्मानुष्ठायिनां सत्त्वशुद्धेः प्रागेव मृतानां तत्तत्कर्मफलं कर्मत्रैविध्यात्त्रिविधशरीरग्रहणरूपं भवति। पापस्यानिष्टं तिर्यगादिदेहरूपम्। पुण्यस्येष्टं देवादिदेहलक्षणम्। मिश्रस्य पापपुण्ययुगलस्येष्टानिष्टमुक्तं मनुष्यदेहलक्षणम्। संन्यासिनाम्। मुख्यसंन्यासिनाम्। तेषां ज्ञानतोऽज्ञाननिवृत्त्या देहसंबन्धाभावादिति। तन्न। तिर्यगादिदेहस्याप्युभयारब्धत्वात्। तत्रापि सुखदुःखोभयानुभवात्॥ न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः। यस्तु कर्मफलत्यागी सत्यागीत्यभिधीयते इत्युक्तश्लोकस्थत्यागस्यैवात्र त्यागपदेन ग्रहीतुमौचित्याच्च। उक्तत्यागफलकथनपरत्वात्। पतञ्जल्येकवाक्यतया मदुक्तार्थस्यैवौचित्याच्च। संन्यासिपदेनाप्युक्तश्लोकस्थत्यागिन एव ग्रहणमुचितम्। तस्य गृहीतदेहस्यापि जीवन्मुक्तदश

यावस्थानात्कर्मफलप्राप्तिजन्यहर्षविषादाभावइतितात्पर्यात्।यत्तुयेइष्टापूर्तादिकर्मणाचन्द्रलोकंगतास्तत्रभुक्तभोगाःपुन
रवतापसमयेव्रीह्यादौअन्याधिष्ठितेअनुशयिनःसंसर्गभाजएवनतुतत्रभोगस्तेषांतत्रभोगप्रापककर्माभावादितिसिद्धा
न्तिनोक्तपशुहिंसादियोगादिष्टस्याशुद्धत्वात्तस्यतत्रभोगप्रापकत्वमस्त्वितिपूर्वपक्षेसिद्धान्तबोधकंव्याससूत्रमशुद्धमिति
चेन्न।शब्दादितिनस्यायमर्थोशुद्धएवेतिचेन्नशब्दाद्धर्मत्वाधर्मत्वयोःशब्दैकगम्यत्वाद्वैधहिंसायाधर्मत्वेनोक्तेर्नसाऽधर्मए
वेतिअल्पपापत्वादेववैधहिंसानपूर्णदोषायेत्येवमीमांसकाशयः।अतएवतस्याल्पपापस्याल्पासुखादिकफलमुक्तम्।स्थाव
रभावोहिसर्वथाऽशुद्धस्यैवकर्मणःफलमितिव्यासाशयः।किंचयत्राल्पंसुखमधिकंदुखंसमेवातेतत्रापिरागान्धास्तिकस्यपर
कीयसुन्दरीगमनइवतत्सुखेउत्कटेच्छावशात्प्रवृत्तिरुपपद्यतेदुःखस्याल्पत्वेतुसुतराम्।अतएवमरणरूपमहानिष्टसाधने
पिसहगमनवेणीप्रवेशादावात्माहुत्यङ्केसर्वस्वारयज्ञादौचप्रवृत्त्युपपत्तिः।पुरुषस्यप्रत्यवायेपियागस्यसाङ्गत्वमक्षतमेव।
योनामक्रतुमध्यस्थःकलञ्जादीनिभक्षयेत्।नक्रतुस्तत्रवैगुण्यंयथाचोदितसिद्धितइत्युक्तेः।तदुक्तंपञ्चशिखाचार्यैः।कुशलंह्येव
बहून्यदल्पमस्तिस्वर्गेप्यल्पममर्षमनुभवतीति।किंचजैमिनेरेवसर्ववस्तुतत्त्वज्ञत्वाभावोमार्कण्डेयपुराणादवगम्यतेसुतरांत
दीयानाम्।तत्रहिव्यासशिष्योजैमिनिर्भारतविषयेषुकेषुचित्सदार्थेषुसंदिहानोमार्कण्डेयंपप्रच्छसचनमेऽवसरस्तस्मात्सर्वज्ञा

CC-0. In Public Domain. Digitization by eGangotri

न्विन्ध्याचलवासिनः चतुरः पक्षिणः पृच्छेत्युक्तवान्। तस्यायमाशयः। व्यासशिष्योप्ययमशुद्धचित्ततया व्यासोक्तं न साधु मन्यते सर्वफलदं परमेश्वरं तत्त्वेन न मनुते किंतु कर्मैव फलदमिति। तथा देवतिर्यगादीनां व्यासोक्तं ज्ञानाधिकारं न मन्यते असंभवादनधिकारं जैमिनिरिति व्यासोक्ते रतस्तिरश्चां शिष्यो भूत्वा तेषां ज्ञानाधिकारे ज्ञाते सर्वेन व्यासोक्ते विश्वस्तो भवेदिति देवासुरसंग्रामादेस्तन्मुखतः श्रवणे तेषामविग्रहत्वाभिमानं च त्यक्ष्यतीति तस्मात्सातज्जलभाष्ये व्यासोक्तमेव वक्ष्यद्धेयमिति। अतएव रामायणे वाल्मीकीये वालिवधे कृते तेन भगवतो रामस्याधिक्षेपे कृते भ्रातृजायापहारेण तस्य पापित्वमुक्तं भगवता अज्ञतिरश्चां तु कर्मानधिकारस्तथा पराशरस्मृतिव्याख्यायां माधवाचार्यो जैमिनिमतानुसारिणो जहास। ईशसिद्धिभयाद्वेदशास्त्राप्रामाण्यमीयुषाम्। शास्त्रकृज्जैमिनिमुनिः केन मानेन सिध्यतीति। ईशसिद्धीत्युपलक्षणम् देवताविग्रहादेरपि। इत्थं हि तदीयानां सूक्तिः। प्रबलाध्यक्षविषयं भेदं दुर्बलवेदगीः। मिथ्यात्वान्निःस्वरूपा च न निषेद्धुमलं किलेति इति दिक्। यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं तत्सुखं स्वः पदास्पदमित्यनेनापि सूचितमेतत्। आद्यपादेन तत्रैहिकरत्यन्तकालदुःखसदृशसुखसमानदुःखनिरासः। न च ग्रस्तमित्यनेन तदधिकदुःखनिरासः। अनन्तरमित्यनेन निद्राकालवद्वैषयिकोभयरहिततद्भिन्नरूपकालनिरासः। अन्यथा सकलदुःखाभावस्याद्यपादेनैव शक्तिपादने सिद्धे न च ग्रस्तमित्यस्य वैयर्थ्यापत्तेः। अभिलाषोपनीतत्वेन विषयसंपादनक्लेशनि

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

शास्त्रान्तरेऽपि वैषयिकमेव सुखमिति अप्सरस एनं जाया भूत्वोपशेरत इत्यग्निष्टोमादिफलकथनेनैकः पूर्वपरयोरिति सूत्रे भाष्ये
स्पष्टमुक्तम्। एवं च विजातीयसुखत्वमेव स्वर्गत्वम्। तस्मान्महिषासुरादिजन्यं दुःखमस्त्येवेति सूचितम्। यद्वा स्वनान्तरीयका-
वश्यभाविदुःखान्यदुःखजनकाधर्मानारब्धदेहोपभोग्यसुखत्वं तत्। सहगमनादौ मरणान्तप्रायश्चित्तादौ चोक्तरीत्याल्प-
पापभूयस्त्वमौ ज्योतिष्टोमन्यायेनेति वदन्तीति दिक्। श्येनफलीभूतस्य शत्रुवधस्य रागतः प्रवृत्तिविषयस्य विधिविषयत्वा-
भावेन न हिंस्यादिति निषेधविषयत्वं पूर्णमेव। यज्ञान्तःपातिवधस्यैव मनुनाऽवधत्वबोधनात्। अत एव तज्जन्यपापे बलव-
द्द्वेषवतां शिष्टानामपेक्षितवैरिवधसाधनत्वेऽपि न तत्र प्रवृत्तिः। श्येनस्तु मरणानुकूलव्यापारोऽपि न हिंसा। मरणोद्देशेन प्रवृत्तस्य
श्रौतविध्यबोधितस्य तदनुकूलव्यापारस्यैव हिंसात्वात्। तस्मात्स्वेनैव वीर्येण निगृह्णीयादरीन् द्विजः। श्रुतीरथर्वाङ्गिरसीः कु-
र्यादित्यविचारयन्। क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः। धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तम इत्यादिना श्रौतस्यैव मनुना-
भ्यनुज्ञानात्। श्रुतीरित्यस्य तद्बोधिताभिचारकर्माणीत्यर्थः। कूपादौ विनष्टे गवि कूपकर्तुर्हिंसकत्ववारणाय मरणोद्देशेनेति। मर-
णकामनयेत्यर्थः॥ एवमन्योद्देशेन प्रक्षिप्तनाराचहते ब्राह्मणेन तत्क्षेप्तुर्ब्रह्महन्तृत्वम्। ब्राह्मणमरणकामनया तदप्रक्षेपात्। तथा
काशीमरणोद्देशेन कृतशिवपूजादेर्न हिंसात्वम्। यदा मे मरणं भवति तदा काश्यां भवत्विति। एवं कामनया मरणस्य काश्यधि

करणत्वविषयतया तदाचरणेपि मरणकामनया नाचरणात्। एवं चात्र हिंसात्ववारणायाः दृष्टाद्वारकत्वं विशेषणं वदन्तो मा
न्या एव। मरणोद्देशेन कृतस्य तु हिंसात्वं भवत्येव। श्रौतविध्यबोधितेस्युक्तेस्तन्त्राद्युक्ताभिचाराणां हिंसात्वमेव। श्येनादावपि
शिष्टानां विगानं तु श्येनाद्यधोवधाच्च नरकइति प्रतिसंधानेन बोध्यम्। श्येनानुष्ठानकाले शत्रून्हन्तीति प्रयोगस्तु गौण एव। उप
पातकेष्वभिचारगणनं तु वैदिकेतराभिचारपरम्। स्मृत्यपेक्षया श्रुतेर्बलवत्वात्। एवं च श्येने कृते प्रतिप्रयोगादिना दैवाद्रिपोरम
रणे श्येनकर्तुर्न किंचिदपि प्रायश्चित्तम्। शत्रोर्मरणे तु तत्र तस्य प्रयोजककर्तृत्वात् प्रयोजकस्य यत्प्रायश्चित्तमुक्तं तावदेवमसंपू
र्णम्। मरणजनकरोगादिकं प्रति अन्यकर्तृकखड्गपातादिकं प्रति च श्येनस्य हेतुताया वेदेन बोधनात्। श्येनवधप्रयुक्तमत्यल्पं
भवत्येव। तान्त्रिकाभिचारकर्तुर्मरणसिद्धौ तत्तद्वधप्रयोजकत्वप्रयुक्तमुपपातकप्रयुक्तं च प्रायश्चित्तम्। कृतेभिचारे दैवादम
रणे तु उपपातकप्रयुक्तमेव। ब्राह्मणविषये त्वभिचारस्य मन्वादिस्मृतौ निषेधात्तत्राधिकं प्रायश्चित्तं श्येनादिश्रौताभिचारक
रणेपि प्रायश्चित्तं तद्विषये भाट्टा अपि श्येनो विहितत्वादिष्टसाधनत्वाच्च धर्म एव तत्फलं वैरिवधस्त्वनर्थहेतुत्वादधर्म एवेति
प्रतिपन्नाः। परे त्वेवं सति चोदनालक्षणोर्थो धर्म इत्यत्रार्थपदं व्यर्थं निषिद्धकलञ्जभक्षणादि तु न चोदनालक्षणमिति न तद्या
वृत्तिफलकं तत्। तस्मात् श्येनो विहितत्वान्नाधर्मः। नरकसाधनहिंसाफलकत्वाच्च न धर्म इति प्रतिपन्ना इत्यलम्। यत्तु मीमांस

ल·म
५०

वै, वाजपेयेन यजेतेत्यादौ वाजपेयपदेन न द्रव्यसंस्कारारूपगु। स्वपदोपात्तयागस्वरूपकरणावरुद्धायां बहिर्भूतद्रव्यस्य करणत्वेना-
न्वयासंभवात्। वाजपेयवतेति बोधे तु मत्वर्थलक्षणादोषः। वाजपेयेन यागं भावयेद् यागेन च स्वर्गं भावयेदिति बोधे वाक्यभे-
दापत्तिस्तस्मात्तन्नामधेयमिति सिद्धान्त इत्युक्तम्। तत्र मत्वर्थलक्षणे त्वस्य तत्कृतासाधुत्वं दोष इत्यर्थः। तदर्थं तेषां प्रत्ययानां
साधुत्वबोधकव्याकरणेन तत्रार्थे लक्षणया प्रकृतिप्रयोगस्यासाधुत्वबोधनात्। कुन्ताः प्रविशन्तीत्यादावपि कुन्तत्वादीनां
तत्संयोगिन्यारोपो न तु कुन्तसंयोगित्वेन लक्षणा। अत एव वाभ्रव्य इत्यर्थे बभ्रुरित्यादीनामसाधुत्वमुक्तं परस्येति सूत्रे भा-
ष्ये। न च तद्भाष्यं शक्तिभ्रमेण बोधे असाधुत्वपरम्। शक्तिभ्रमस्य दुरुपपादतया प्रागुक्तत्वात् तत्सवाच्यपरत्वमित्यर्थः। णा-
दिप्रत्ययसमासयोः साधुत्वस्य सूत्राद्बोधेन तत्रार्थेऽन्यस्य लक्षणयाप्यसाधुत्वमित्यस्य सूत्रस्वारस्येन लाभाच्च। एत-
न्मूलक एव विभक्तौ न लक्षणेति प्रवादः। रघूणामन्वयमित्यादौ तदपत्ये रघुत्वारोपो बोध्यः। सोमेन यजेतेत्यादौ छान्दसी मत्व-
र्थे लक्षणेति बोध्यम्। अर्शआद्यजन्तं वा सोमपदम्। अत एव प्रोक्ताल्लुगिति सूत्रे प्रोक्तार्थकप्रत्ययान्तादित्यर्थे प्रोक्तादिति भाष्य-
किल्याशङ्क्य सौत्रोऽयं निर्देश इति भाष्ये समाहितम्। अत एव गुणवचनेभ्यो मतुपो लुग्वक्तव्य इति वचनं वार्तिककृतारब्धम्।
अन्यथा तद्वृत्तिलक्षणयैव सिद्धे तद्वैयर्थ्यं स्पष्टमेव। लुगपि समानाधिकरणद्रव्यवाचकसत्त्व एव॥ लक्षणापि तत्सत्त्व एव। तत्रै-

राम
५०

वाऽनुपपत्तिप्रतिसंधानात्। नचलुकापिलक्षणैवान्वाख्यायतइतिवाच्यम्। शास्त्रबोधितत्वेनतत्रसाधुत्वस्यनिर्बाधत्वात्
।गुणगुणिनोरभेदस्यापिसत्त्वेनतत्रत्याख्यातमित्यन्यत्।गुणवचनानामाश्रयतोलिङ्गवचनानीत्यनेनतत्रपक्षेलिङ्गादि
सिद्धिर्बोध्या।अन्यत्रापिनामधेयत्वबीजंपूर्वमीमांसायांस्पष्टम्।नामधेयत्वेचवाजपेयादिपदंपदपरम्।मत्वर्थलक्षणाया
मसाधुत्वेऽप्यस्यांतत्त्वाभावात्।स्वरूपस्यापिपदशक्यत्वाच्च।परंतदर्थयोरभेदाध्यवसायस्यपूर्वमुपपादितत्वेनवाजपे
यपदाभिन्नोयागइतिबोधेपञ्चमलकाराङ्गोपाङ्गविधिपर्यालोचनेप्रवृत्तिनिमित्तरूपवैजात्योपस्थितौविजातीयोयंयागोवाजपे
यपदशक्यइतिशक्तिग्रहेऽन्यत्रतेनपदेनयागविशेषोपस्थितिः। इहसहकारतरौमधुरंपिकोरौतीत्यादौएतत्सहकारतर्व
धिकरणकमधुररववर्णकर्तृकंसपिकपदाभिन्नइतिबोधेसहकारेकोकिलत्वजातिमतएवमधुररववर्णजानतस्तद्वैजात्योप
स्थितौतदवच्छिन्नेपिकपदशक्तिग्रहेतेनरूपेणबोधः।यत्तुपदस्यवाच्यतासंबन्धेनयोगेऽन्वयइति।तन्न। संबन्धाप्रसिद्धेः।पू
र्वमनुपस्थितसंबन्धस्यभानाङ्गीकारेपिसर्वथाऽप्रसिद्धस्याज्ञातस्यसंबन्धस्यभानाननुभवात्। वाजपेयपदोत्तरतृतीया
याअसाधुत्वापत्तेश्चकरणाभेदेनहिसेतिसिद्धान्तः। यदपिवाजपेयपदंकिञ्चित्शक्तमितिसामान्याकारशक्तिग्रहेणसा
मान्यतोवाजपेयपदशक्यइत्युपस्थित्याऽभेदान्वयइति।तदपिन।तथोपस्थितेःकारणाभावात्।किंचिदिसेवोपस्थितेश्च

CC-0. In Public Domain. Digitization by eGangotri

नहिकिंचिद्भिन्नोयागइतिबोधोनुभवसिद्धः।किंचवाजपेयपदस्ययोगेनसुराद्रव्येशक्तिग्रहसत्वेनेदृशशक्तिग्रहासंभवादित्य
लम्।प्रवर्तनाचलिङादेर्द्योत्या।पचेत्यादौविनापिलिङादिकंप्रवर्तनाप्रतीतेः।अन्तर्भावितण्यर्थेप्रवर्तनायाधात्वर्थत्वस्यदृ
ष्टत्वाच्च।कर्त्रादिष्वपिद्योत्यतायाएवदृष्टत्वाच्च।अतएवनिमन्त्रयेयंभवन्तमित्यादौधातुनानिमन्त्रणस्योक्तत्वेपि
लिङ्·सिद्धिः।यद्वार्हेकृत्यतृचश्चेतिलिङ्·लोटौ।निमन्त्रणादिनिष्ठमर्हत्वंचावश्यकर्तव्यतालक्षणम्।किंचतस्याःवाच्यत्वेत
स्याएवविशेष्यत्वेनतत्रैकत्वस्यैवसत्त्वेनद्विवचनाद्यनापत्तिः।संख्यायाःस्ववाचकप्रत्ययान्तजबोधविशेष्यएवान्वयात्
कर्तृगतसंख्यायास्तन्निष्ठधात्वर्थेइवतद्विषयकप्रवर्तनायामप्यारोपेणतत्साधुत्वमित्यपिक्लिष्टम्।तत्रधातूपस्थितव्यापारा
णांमध्येप्रयोजकव्यापारस्यविषयितयाविशेषणत्वमितरेषांतुविषयतयाविशेष्यत्वम्।एवंचपचेदित्यादावेककर्तृका
प्रवर्तनाविषयीभूतापाकानुकूलाक्रियेत्यादिरीत्याबोधः।यत्तुद्योतकत्वेपिप्रवर्त्तनाविशेष्येति।तन्न।द्योत्यार्थेविशेषणता
याएवन्याय्यत्वात्।किंचतस्याविशेष्यत्वेदेवदत्तादेःप्रधानभूतधात्वर्थानाश्रयत्वेनाकर्तृत्वेकर्तृलिङनद्यनापत्तिः।किंचस्वा
ध्यायोध्येतव्यइत्यादौसत्वप्रधानेकृदन्तेप्रवर्तनायाविशेषणत्वमावश्यकमितिसर्वत्रतथैवोचितम्।तत्रहिप्रवर्तनाविष
याध्ययनकर्मस्वाध्यायइतिबोधः।प्रवर्तनाविषयत्वेनबुद्धस्यधात्वर्थस्यभाव्यत्वेनग्रहान्नकस्यभावाकाङ्क्षानुत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पसद्नादिविधिनानिवर्त्तते।करणाकाङ्क्षाचबाह्यैरध्ययननियमनविधिभिर्निवर्त्तते।फलाकाङ्क्षाचयज्ञादिविधिभिः।यद्वागुरूपसदनंकरणंनियमाश्चेतिकर्तव्यता।अयंविधिःसंपूर्णवेदस्यप्रयोजनवदर्थपर्यवसायित्वबोधकः।निष्कारणःषडङ्गोवेदोध्येयोज्ञेयश्चेतिवाक्यान्तरादध्ययनस्यनित्यत्वमपीतिनित्यकाम्यमेतदित्याहुः।तत्रसकलकारकविशिष्टेधात्वर्थेप्रवर्त्तनायाविशेषणत्वेविधिप्रत्ययस्तात्पर्यग्राहकः।एवंचप्रवर्त्तनासिद्धमज्ञातज्ञाप्यत्वेश्रेयःसाधनत्वंचविशिष्टएव।।धात्वर्थस्यप्राप्त्यर्थत्वेतुतात्पर्यतोगुणांशेपर्यवस्यति।प्रवर्त्तनात्रवर्त्तमानकालेवभासतेशब्दशक्तिस्वभावात्।इतरधात्वर्थस्तुभविष्यत्कालएवततएव।एतेनप्रेरणाप्रयोज्यपाकवर्त्तमानतादृशायांपचेदितिस्यादित्यपास्तम्।विधिलिङसदाउत्तमस्तुन।स्वप्रवृत्तौस्वप्रेरणायाअकारणत्वेनतज्ज्ञानानुपयोगादिदमेवाभिप्रेत्योत्तमपुरुषोविधिशक्तिप्रतिबन्धकइतितान्त्रिकाः।एवंयच्छब्दयोगएवकारयोगोपिविधिशक्तिप्रतिबन्धकइतिबोध्यम्।इतितिङर्थविचारःसमाप्तः।।पिपठिषतीत्यादौसनर्थइच्छा।तस्याःप्राधान्यानुभवात्।तत्रधात्वर्थस्यकर्मत्वसमानकर्तृत्वेतदुभयसंबन्धेनविशेषणता।धातोःकर्मणःसमानकर्तृकादिच्छायांवेतिसूत्रस्वरसात्।गमेर्ग्रामःकर्मइषधातोरुभेकर्मणीइतिसन्सूत्रभाष्योक्तेरस्मात्कर्मण्यपिलादयः।अतएवनिदिध्यासितव्योविजिज्ञासितव्यइतिप्रयोगाःसङ्गच्छन्ते।ननुज्ञानस्वभावत्वाद्वर्त्तमानाप्याशंसाविषयभविष्यत्वाद्भविष्य

त्कालेत्याशंसायांभूतवच्चेतिसूत्रेभाष्येउक्तम्। तत्रेच्छायावर्तमानायाअपिइच्छायाविषयभविष्यत्वेनभविष्यत्कालत्वात्सन्नन्ता
द्वर्त्तमानप्रत्ययासङ्गतिरितिचेन्न। सन्प्रत्ययार्थेच्छायाःप्रधानत्वेनगुणभूतप्रकृत्यर्थानुयायित्वात्। आशंसातुनप्रत्ययार्थ
इतिप्रधानानुयायिन्येव। आबाधादिवत्तयोर्नधर्मोह्याशंसा। आशंसेइत्यादिशब्दप्रयोगेप्रयोक्तृधर्मःसागम्यतइत्यन्यत्रवि
स्तरः। श्वामुमूर्षतिकूलंपिपतिषतीत्यादौआशङ्कार्थेसन्। स्वकर्तृकमरणविषयाशङ्केतिरीत्याबोधः इच्छारोपेणात्रप्रत्ययइ
तिभाष्यसंमतेपक्षेउक्तोर्थःपश्चान्मानसबोधविषयइतिबोध्यम्। सन्नन्तेपिपठिषतिगन्तुमित्यादिवारणायैकार्थीभावः। तस्य
पदविधित्वाभावेपिवावचनानर्थक्यंनित्यत्वात्सनः। इहद्वौपक्षौवृत्तिपक्षश्चावृत्तिपक्षश्च। तत्रस्वभावतएतद्भवतिवाक्यंवृत्तिश्चेतिभा
यात्सः। वृत्तेरेकार्थीभावविषयत्वाद्वाक्यस्यव्यपेक्षाविषयत्वाद्भिन्नार्थत्वेनबाध्यबाधकभावाप्रसङ्गइतिकैयटाच्च। पुनःपुनर्वृत्ति
श्रयेनवापचतिपापच्यतइत्यादौयङाप्रकृत्यर्थगतंपौनःपुन्यंबाहुल्यंवाद्योत्यते। बाहुल्यंकार्त्स्न्यम्। क्वचित्कौटिल्यगर्हाद्य
पि। नित्यंकौटिल्येगतौलुपसदचरेत्यादिशास्त्रप्रामाण्यात्। तद्विषयेक्रियासमभि—हारेयङोनभिधानात्। पाचयतीत्यादौ
णिज्वाच्याप्रेरणानतुद्योत्या। विशेषणत्वापत्तेः। एवंचतदाश्रयस्यकर्तृत्वानापत्तौण्यन्तात्प्रयोजककर्तरिलाद्यनापत्तिः। अत
एवद्योतकतापक्षस्यतत्रभाष्येप्रकृत्यर्थविशेषणत्वशब्देनोल्लेखःकृतः। किंचैवमपिप्रयोजकस्यकर्तृत्वाङ्गीकारेगमितोग्रामंदे

वदत्तोयज्ञदत्तेनेत्यादौ प्रयोजकव्यापारस्य गमिवाच्यत्वात्प्राधान्येन गत्यर्थत्वाच्च प्रयोजककर्तरिक्तस्यापत्तिः। द्योत्यस्य विशेष्य
त्वाङ्गीकारेपि पाचयति देवदत्तम्मैत्रेणेत्यादौ प्रधानीभूतव्यापारानाश्रयत्वेन प्रयोज्यस्य कर्तृत्वानापत्तिः। ममतु धातुभेदान्न दोषः
। नचस्वतन्त्रपदेन शब्दतः प्रधानस्येवार्थतः प्रधानस्यापि ग्रहणादुभयोः कर्तृत्वं तत्र प्रेरणाया विशेषणत्वेपि तस्या अन्यानधी
नत्वलक्षणमार्थं प्राधान्यमिति वाच्यम्। प्रयोज्ये कर्तरि तृतीयेव ण्यन्ताल्लादेरप्यापत्तेः। दुहादीनामप्रधाने कर्मण्यपि लादिस्वी
कारेण लादिविधौ कर्त्राद्यंशे प्रधानाप्रधानन्यायाप्रवृत्तेः। तत्रार्थप्राधान्यस्य सत्त्वाच्च। किंचैवमन्तर्भावितण्यर्थेष्वुभयोः कर्तृ
त्वापत्तिः। स्वसाध्यक्रियाजनकप्रयोक्तृत्वं स्वतन्त्रत्वमिति पक्षेपि स्वतन्त्रं कारकं क्रियाजनकं कर्तेत्यर्थे बाधकाभावेन क्रियाया
ः प्रधानभूताया एव ग्रहणान्नोभयोस्तत्त्वम्। ममतु तत्र प्रयोज्यकर्तुः प्रायेण करणत्वेन विवक्षा। तत्क्रियाया अपि धातुनाप्रायेण क
रणत्वेनैव बोधान्न तदाश्रयस्य कर्मत्वम्। क्वचित्तु तदपि। यथा गर्गाः शतं दण्ड्यन्तामित्यादौ तत्र प्रयोज्यव्यापारानुकूलव्यापा
रो धात्वर्थ इति बोध्यम्। अतएव चारेणाहं परसैन्यमनुप्रविश्य संकलयामीत्यादौ प्रयोज्यकर्तुश्चारादेः करणत्वमुक्तं भामत्या
म्। चारेणेत्यस्यानुप्रवेशनान्वयेपि करण एव तृतीयेति बोध्यम्। वाचकत्वे तु न दोषः। प्रयोज्यस्य ण्यन्तप्रकृत्यर्थकर्तृत्वेपि
ण्यन्तार्थकर्तृत्वाभावात्। ण्यन्तात्प्रधानकर्तरि लङिति भाष्ये प्रधानत्वं लप्रकृत्यर्थकर्तृत्वरूपम्। स्पष्टं चेदं हेतुमति चेति सूत्रे

भाष्ये ॥ इति सनाद्यर्थविचारः ॥ कर्तृकर्मविहितकृतां कर्तृकर्मणी वाच्ये। तयोरेव च लिङ्गाद्यन्वययोग्ययोः प्राधान्यं सत्त्वप्रधाना
नीत्युक्तेः। कर्म कृति च फलव्यापारयोर्व्यत्यास इत्याद्युक्तम्। तत्र शतृशानजन्तार्थस्याख्यातार्थक्रियाविशेषणत्वमित्यर्थो लिख
न्नास्ते भूमिमित्यत्र चतुर्थोल्लासे स्पष्टः काव्यप्रकाशे। हरिरप्याह। चङ्क्रम्यमाणोधीष्वात्र जपं श्वङ्क्रमणं कुरु ॥ तादर्थ्यस्याविशे
षेपि शब्दाद्भेदः प्रतीयत इति। अध्ययनमत्र जपः। उभयत्रापि जपस्यैव विधिः। शब्देन त्वाद्ये जपस्य प्राधान्यमन्त्ये तस्य गुणभा
व इति तदर्थः। क्वचित्तु शत्रन्तार्थस्याबुद्धिपूर्वकत्वादिरूपमप्राधान्यं प्रकरणादिवशाद्व्यञ्जनया वा प्रतीयते। यथा लिखन्नास्त इ
त्यादौ। एवं च तदर्थे समानाधिकरणनामार्थस्य विशेषणत्वमेवान्यथा तत्र विशेषणतामापन्नस्याख्यातार्थे विशेषणत्वं न स्या
त्। गलद्रक्तधारेत्यादौ समासे तद्विग्रहवाक्ये च विपरीतमिति न गलदित्यादेः पूर्वनिपातासिद्धिः। भावार्थानां कृत्यसंज्ञकतव्या
दीनां खलर्थानां नपुंसके भावे क्तस्य च साध्यावस्थापन्नधात्वर्थानुवादकत्वमेव। अत एवेधितव्यमित्यादौ न क्रियान्तराकाङ्
क्षा। अतस्तेष्वेकवचनमेव सत्त्वप्रधानानि नामानीत्युक्तेः। साध्यावस्थस्यापि पचतिरूपमित्यादाविव लिङ्गयोगः। तत्र लिङ्गान्तरा
संभवाल्लिङ्गसर्वनामत्वाच्च नपुंसकत्वमेव। लिङ्गान्वयित्वमेव च तत्र सत्त्वम्। शयितव्याद्यर्थे विभक्त्या लिङ्गान्वयोपयोगि सिद्ध
त्वावेदनमिति कश्चित्। घञादिवाच्यस्तु सिद्धावस्थापन्नः। पाक इत्यादौ सर्वसंख्यादियोगदर्शनात्। तत्रापि प्रकृत्यासाध्या

वस्थापन्नस्यैवोपस्थितेरौदनस्यपाकइत्यादौनकारकान्वयप्रसक्तिः।अध्याहृततिङन्तार्थक्रियायांतत्प्रकारकान्वयइतितुनए
युक्तम्।नलोकेतिनिषेधेनकृद्योगषष्ठ्यनापत्तेः।कर्तृकर्मणोरित्यस्यवैयर्थ्यापत्तेश्च।काष्ठैःपाकइतित्विष्टापत्तिग्रस्तम्।नचै
कस्यैवसिद्धत्वसाध्यत्वाभ्यामुपस्थितिःकथंविरोधादितिवाच्यम्।यथासंबन्धिभेदेनैकस्यैवाचार्यत्वंमातुलत्वंचतथाकार
कलिङ्गादिसंबन्धिभेदेनसाध्यत्वस्यसिद्धत्वस्यचैकत्रविरोधस्यैवाभावात्।यथावामृगोधावतिपश्येत्यादौधावनस्यमृगंप्रति
साध्यत्वंदर्शनंप्रतिचसाधनत्वंतद्वत्।एकस्यैवचधात्वर्थस्यसाध्यत्वेनप्रकारतासिद्धत्वेनविशेष्यताएकनिष्ठत्वाच्चतयोर्नसु
टंग्रहोबोधे।एतेनघञ्वाच्योभावःप्रधानमितिग्रन्थाव्याख्याताः।तदुक्तंकर्तरिकृदितिसूत्रेभाष्ये।घञादिवाच्योभावोबाह्यः
प्रकृत्यर्थादिति।तुमुनादिवाच्यस्त्वाभ्यन्तरइतितुमर्थइतिसूत्रेभाष्ये।तत्रशोभनाद्यर्थस्यधात्वर्थफलान्वयेशोभनंपाकइ
त्येव।कर्तृकर्मणोरितिषष्ठीतुन।कर्तृसाहचर्येणकर्मणोधात्वर्थभेदेनान्वयिनएवतत्रग्रहणात्।स्पष्टंचेदंपूजनात्पूजित
मित्यत्राष्टमेभाष्ये।एतच्चनिरूपितंकर्तृकर्मणोरितिसूत्रेशब्देन्दुशेखरे।व्यापारान्वयेतुशोभनःपाकइत्येव।तस्यकर्मत्वाभा
वेनतद्विशेषणेद्वितीयायाअप्राप्तेः।तिङन्तार्थव्यापारान्वयेतुनपुंसकतैव।एतेनघञादीनांप्रयोगसाधुतामात्रमित्यपास्तम्।त
दुक्तम्।आख्यातशब्देभागाभ्यांसाध्यसाधनवर्तिता।प्रकल्पितायथाशास्त्रेसघञादिष्वपिक्रमः॥साध्यत्वेनक्रियातत्रधा

तुरूपनिबन्धना॥सिद्धभावस्तु यस्तस्याः सघञादिनिबन्धनइति। सिद्धभावःसिद्धत्वम्। यथापचतीत्यादौ कल्पितान्वयव्यतिरेकाभ्यां धातुभागक्रियायां प्रत्ययःकारकेइतिकल्पनाश्रीयते तथाप्रकृतिः साध्यस्वभावमाचष्टे घञ्तस्याः सत्त्वभावमित्यर्थइतिहेलाराजः। अनेनात्रापीयंशास्त्रकृत्कल्पनैवेति दर्शयति। स्पष्टं चेदं भावेसार्वधातुकेयगिति सूत्रे भाष्ये। साध्यत्वेन भानादेव क्रियार्थक्रियोपपदे विधीयमानतुमुनादिसिद्धिः। भोक्तुं पाकइत्यादि क्रियापदस्य साध्यत्वविशिष्टएव प्रवृत्तेः। पदार्थः पदार्थेनेति न्यायस्तु क्रियातिरिक्तविषयएव। भोक्तुंगतो देवदत्तेन ग्रामो गतः कृतपूर्वीकटमित्यादौ कारकाणां गुणभूतक्रियायामन्वयात्। साध्यावस्थस्य प्रकारतयाभानात्तस्य प्रसज्यप्रतिषेधरूपनञर्थेन्वयोन। तेनहित्वावच्छिन्नपाकाभावकर्तृकासतेतिबोधाभिप्रायेण पाको नास्तीति न। वस्तुतो भोक्तुं पाको भोक्तुंगतइत्यादावसाध्यैव। क्रियार्थायां क्रियायामित्युक्त्या प्रत्यासत्त्या क्रिययोरेकजातीयत्वलाभेन स्वप्रकृतिकप्रत्ययार्थप्रत्यगुणीभूतायाः साध्यावस्थमात्राया एव क्रियार्थक्रियाया ग्रहणात्। ध्वनितं चेदमुपपदमतिङ् इति कारकोपपदात्कृदिति सूत्रयोर्भाष्ये इत्यन्यत्र प्रपञ्चितम्। किंच यत्र कार्ये क्रियावाचकशब्दग्रहणं तत्रोक्तक्रियाया एव ग्रहणम्। यत्र तु क्रियारूपार्थग्रहणं तत्र गुणीभूतादेरपि ग्रहणम्। अतएव गतपाकादियोगे कारकविभक्तिकृत्वसुच्त्वादीनां साधुत्वमित्यन्यत्र विस्तरः। तुमुनादीनाम सत्त्वभूतो भाव एवार्थः। अव्ययकृतो भावइत्युक्तेः

CC-0. In Public Domain. Digitization by eGangotri

।पाकइत्यादाविवतुमुनर्थेवैलक्षण्याननुभवात्। एवंचायंधात्वर्थानुवादकएव।तत्रतुमुन्ण्वुलौक्रियायांक्रियार्थायामित्यु
क्तेरुद्देश्यत्वरूपतादर्थ्यमपितुमुन्द्योत्यम्। तच्चसंसर्गः। प्रकृत्युपपदार्थयोस्तादर्थ्यवत्समानकर्तृत्वमपीहाभिधानबल
लभ्यः संसर्गः।क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवैजात्येनतुनभानम्। तदाकाङ्क्षादर्शनात्। कारकान्वययो
ग्यतावच्छेदकवैजात्येनतुभानमस्त्येव।एतद्धिहितण्वुलस्तुकर्तर्येव। कृष्णंद्रष्टुंयातितंदर्शकोयातीत्यादौकृष्णकर्मकभवि
ष्यद्दर्शनोद्देश्यकंदर्शनकर्तृकर्तृकंयानंकृष्णकर्मकभविष्यद्दर्शनकर्तृकर्तृकंतद्दर्शनोद्देश्यकंगमनमित्यादिरीत्याबोधः।एवं
क्त्वाणमुलादीनामपिअसत्त्वभूतोभावएवार्थः।तुमुन्वत्क्त्वाप्रकृत्यर्थक्रियाक्रियान्तरेविशेषणंधातुसंबन्धाधिकारात्।तयोः
संबन्धएककर्तृकत्वंपूर्वकालत्वोत्तरकालकत्वंच।समानकर्तृकयोःपूर्वकालेक्त्वेत्यनुशासनात्। समानकर्तृकयोरितिनिर्धार
णेसुप्। पूर्वकालइतिबहुव्रीहिः।समानकर्तृकयोः क्रियारूपार्थयोर्मध्येपूर्वकालसंबन्ध्यर्थवाचकाद्धातोः क्त्वेत्यर्थः।एवंचवा
क्यशक्त्योक्तसंबन्धतात्पर्यग्राहकाः क्त्वादयः सूत्रबलादेवतयोः क्रिययोरेककर्तृकत्वबोधः। क्वचित्तुजन्यत्वव्याप्यत्वादिक
मप्यधिकंभासतेतत्तुमानान्तरगम्यत्वान्नक्त्वाद्योत्यम्। यथाभुक्त्वेवतृप्तोनपीत्वाअधीत्यतिष्ठतीत्यादौ।अतएवाध्ययनकालि
कस्थितिमादायैवाधीत्यतिष्ठतीतिप्रयोगोनतदभावकालिकस्थितिमादायेतिबोध्यम्। तदपिसंसर्गमर्यादयैवभासते।एतेनस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मानकर्तृकत्वं क्त्वा वाच्यमित्यपास्तम्। संसर्गमर्यादयैव लाभेनान्यलभ्यत्वात्। कर्तरि कृदित्यस्य तु नात्र प्रवृत्तिः। अन्वयकृतो
भावद्व्युत्पत्तेः। तत्राव्यवहितपूर्वकालत्वाद्येव संसर्गः। अतएव वर्षान्तरीयभोजनमादाय भुक्त्वा व्रजतीति न। अव्यवधानं तात्प
र्यवशाद्दण्डमुहूर्ताद्यहरादिभिर्यथायथं बोध्यम्। तेनाद्य भुक्त्वा श्वो गन्तेत्याद्युपपत्तिः। न च पूर्वकालत्वादेः संसर्गत्वे मुखं व्यादाय
स्वपितीति न स्यात्। व्यादानस्य स्वापपूर्वकालत्वाभावादिति वाच्यम्। व्यादानोत्तरमपि स्वापानुवृत्त्या तमादाय तदुपपत्तेः। अ
त्रकालिकसंबन्धेन व्याप्यत्वमपि भासते। तेन व्यादानोत्तरस्वापे कृते तदनुवृत्तावेव तथा प्रयोगो न तु मुखमीलने तथा प्रयोगः।
तदातननिद्रायास्तद्व्याप्यत्वाभावात्। दर्शपौर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यादौ दर्शादियागवैशिष्ट्यस्य सोमयागे विधानम
तो दर्शादितः प्राक् सोमकरणे प्रत्यवायसिद्धिः। दर्शमात्रकरणे सोमाकरणे च तदभावसिद्धिः। आधानोत्तरं तावत्कालं संदिग्धजी
वनस्याति श्रद्धावतस्ततः प्राक् सोमानुष्ठानेऽपि न प्रत्यवायः। प्रागपि सोमेनेक इति आश्वलायनोक्तेः। उत्तरकालमात्रं पूर्वकाल
मात्रं वा संबन्ध इति तु न युक्तम्। संबन्धस्योभयनिष्ठत्वावश्यकत्वात्। तत्रोत्तरकालवृत्तित्वं न तद्ध्वंसाधिकरणकालवृत्तित्वम्।
स्थित्वा पश्यतीत्यादावभावात्। किं तु तदधिकरणसमयध्वंसाधिकरणसमयोत्पत्तिकत्वम्। उत्तरकालस्य प्रत्ययार्थत्वं तु न यु
क्तम्। कृतिप्रत्ययार्थस्य विशेष्यत्वदर्शनात्तस्य विशेष्यत्वापत्तौ क्रियाप्राधान्यविरहेणाभीप्स्येप्सित्वाभावापत्तेः। गुणभूतक्रिया

माभिस्थलसमवृत्तौ पाचक इत्यादावतिप्रसङ्गः इति भाष्ये॥ परे तु समानकर्तृकयोरर्थयोर्मध्ये पूर्वकालविशिष्टार्थवृत्तेर्धातोः क्त्वेति सूत्रार्थात्तु पूर्वकालः क्त्वाप्रकृत्यर्थे प्रकारः। तद्बलादेवानन्तर्यसंबन्धेन तस्य धात्वन्तरार्थेन्वयः अतएव भाष्ये समानकर्तृकत्वेन पूर्वं भुङ्क्ते पश्चाद्व्रजतीत्यत्र क्त्वाप्रत्ययमाशङ्क्य स्वशब्देनोक्तत्वान्नेति परिहृतम्। पूर्वशब्दस्यात्र पूर्वकालोर्थो न तु धातोस्तेन वृत्तिरिति तदर्थः। न तूक्तार्थानामप्रयोग इति तदर्थः। तथा सतीह कस्मान्न भवत्यास्यते भोक्तुमिति शङ्काऽपरभाष्यासङ्गतेः। तत्रापि लार्थकतुमुना पूर्वकालत्वस्यापि क्रियायां द्योतितत्वेन न तद्भासेः। तत्र पूर्वकालत्वस्याप्रतीतौ तु कथं क्त्वा आपादनम्। वासरूपन्यायेन लटा साधितमित्यन्यत्। यदा त्वासेः क्त्वा तदा भुजेस्तुमुननभिधानान्नेति कैयटः। पूर्वं भुक्त्वा पश्चाद्व्रजतीत्यादावन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वान्येभ्यो व्रजितृभ्यः पश्चाद्व्रजतीत्यर्थ इति साधनान्तरक्रियापेक्षं पौर्वकाल्यमिति विभाषाग्रेप्रथमेति क्त्वा। आनन्तर्यसंबन्धेन पूर्वकालिकदर्शादिविशिष्टं च सोमे विधीयत इति न तत्र दोषः। एवं च पूर्वकाल इति कर्मधारयः द्व। भूत इति तु नोक्तम्। लाघवानादरात्। तत्त्वेन बोधाननुभवाच्च। एवं च षष्ठ्याः संबन्धवाचकत्ववदेषामपि समानकर्तृकत्वादिरूपसंबन्धवाचकत्वं वक्तुं शक्यमिति प्राहुः। नन्वेवमिष्टकाः पक्त्वाहं भोक्ष्येऽहं भुक्त्वा व्रजामीत्यादौ तृतीयापत्तिः। न च तिङन्तेन कर्तुरभिधानान्नेति वाच्यम्। तिङन्तार्थकर्तुरुक्तत्वेपि क्त्वान्तार्थकर्तुरभिधानाभावात्। अनभिहिते

ल·मं·
५६

भवतीतिपर्युदासात्।अतएवप्रासादेआस्तेइत्यत्रसदिक्रियाधिकरणस्याभिधानेप्यासिक्रियाधिकरणस्यानभिधानात्सप्तमीतिभाष्यादौस्पष्टम्। तथापक्वौदनोभुज्यतेइत्यत्रद्वितीयापत्तिरितिचेन्न।कर्त्रादेरेकत्वेप्रधानतिङन्तार्थक्रियानिरूपितशक्त्यभिधानक्त्वान्ताद्यर्थगुणक्रियानिरूपितशक्तेरप्यभिहितवत्त्वस्यभाष्यादिप्रामाण्येनाङ्गीकारात्।तदुक्तंहरिणा।प्रधानेतरयोर्यत्रद्रव्यस्यक्रिययोःपृथक्।शक्तिर्गुणाश्रयातत्रप्रधानमनुरुध्यते॥प्रधानविषयाशक्तिःप्रत्ययेनाभिधीयते।यदागुणेतदातदनुक्तापिप्रतीयतइति।क्रियान्तरसंबन्धस्यबुद्धिविषयत्वेएवक्त्वःसाधुत्वम्।एतेनपूर्वंक्त्वान्तार्थमात्रस्यबुद्धिविषयत्वेतस्यकर्तृकर्माकाङ्क्षासत्त्वाद्अन्तरङ्गत्वेनद्वितीयादिकंदुर्वारमित्यपास्तम्।ओदनंपक्त्वाग्रामोगम्यतेदेवदत्तेनेत्यादौद्वितीयाभवत्येव। कर्मशक्त्योरेकनिष्ठत्वाभावात्।अतएवस्वादुमीतिसूत्रेभाष्येक्त्वातुमुन्णमुलादयःसमभिव्याहृतेनानुप्रयुज्यमानेनसमानेऽधिकरणेतद्वाच्यकारकेवक्तव्यास्तेनोक्तविषयेतृतीयादिर्नेत्युक्तम्।अन्यप्रकृतौभावइत्याश्रित्यत्रप्रत्याख्यातम्।तत्रसमानशब्दएकपर्यायः।एवंचक्षुधंप्रतिहन्तुंशक्यमितिकैयटोक्तंचिन्त्यम्।वचनारम्भेऽसिद्धेः।क्षुधःप्रतिघातमात्रविशेषणत्वमपिनयुक्तम्।गमेर्ग्रामःकर्मैषस्तूभयमितिसत्सूत्रस्थभाष्यविरोधात्।अतएवग्रामोगन्तुमिष्यतेइत्येव।नतुग्रामायग्रामंवेति।एवंचाकृत्स्नोभयत्रापिशाब्दान्वयएव।ग्रामोगन्तुमिष्यतेइत्यत्रगमिक्रियापेक्षेद्वितीयाचतुर्थ्यौनकदापिभवतस्तदपेक्ष

राम
५६

कर्मत्वस्याप्यभिहितवत्प्रकाशातइतिकैयटोक्तेः।हरिरपि।इषेश्चगतिसंस्पर्शाद्ग्रामेयोलोविधीयते।तत्रेषिणैवनिर्भोगःक्रियतेगतिकर्मणइति।संस्पर्शात्।इषेःक्रियासुखेनैवद्रव्यसंबन्धात्।निर्भोगः।अभिधानम्।इषिणा।तद्विहितलादिना।अतएवपक्त्वाभुज्यतइत्यत्रकेषांचिन्नव्यपेक्षते।ओदनंपचतिःसोसावनुमानात्प्रतीयतइत्यत्रकेषांचिदित्युक्तम्।प्रथमान्तौदनपदवाच्यस्यायोग्यत्वान्नपचिक्रियासंबन्धःकिंतुभुजिनैवेतिनपचिनिरूपिताशक्तिरुपात्तौदनपदार्थेकिंतुसामर्थ्याद्द्वितीयान्तौदनपदार्थस्तत्रगम्यतेइतिकेषांचिन्मतमितितदर्थइत्यलम्।आख्यातवाच्यक्रियायाःप्राधान्यात्तांप्रत्येवयेक्त्वान्तोपस्थिताःसर्वविशेषणंनतुतासांपरस्परंसंबन्धः।गुणानांचपरार्थत्वादितिन्यायात्।अतएवानियतःप्रयोगःस्नात्वाभुक्त्वापीत्वाव्रजतिपीत्वाभुक्त्वास्नात्वेत्यादिच।आवाह्यषोडशोपचारैःपूजयेदित्यत्रोक्तसंबन्धेनावाहनविशिष्टेपूजनेषोडशोपचारैरित्यस्यकरणत्वम्।तेनावाहनस्यषोडशोपचारान्तर्गतत्वेपिनदोषः।दक्षिणदेशस्थैरप्राप्यगङ्गांपर्वतइत्यादौपरावरयोगेचेतिक्त्वा।प्राप्यतइत्यध्याहारः।अप्राप्येत्यस्यदक्षिणदेशस्थपुरुषकर्तृकानदीकर्मिकाआरोपितप्राप्तिरर्थः।साचोत्तरकालिकत्वेनपर्वतकर्मकप्राप्तिक्रियान्वयिनी।अत्रपरभूतनद्याअप्राप्येत्येतद्द्वारकःसंबन्धः।एवमतिक्रम्यपर्वतंनदीत्यत्रावरयोगः।दक्षिणदेशस्थपुरुषकर्तृकंपर्वतकर्मकप्राप्तिध्वंसोत्तरकालावच्छिन्ननदीप्राप्तिरितिबोधः।तेनोभयत्रक्रमेणाभग

ल.शं. भावसमानाधिकरणत्वंध्वंससमानाधिकरणत्वंचेतरस्मात्तौफलति।क्वचित्साक्षात्क्रियायाएवपरावरयोगः॥यथावेर्मा
५७ सम्मितिविग्रहाद्याविकशब्दादुत्पत्तिरित्यत्र।तत्रविग्रहोविभिन्नत्वेनज्ञानंतदुत्तरकालिकीअविकशब्दावधिकाप्रत्ययकर्तृ
कोत्पत्तिरित्यर्थः।परत्वादिकमत्रलोकव्यवहाराद्वैस्मिकमित्यन्यत्रविस्तरः॥इतिकारकार्थविचारः॥अथप्रातिपदिकार्थो
निरूप्यते।तत्रघटादिपदेभ्योघटत्वादिविशिष्टव्यक्तिबोधोनुभूयते।तत्रयद्यपिशक्तिपरिच्छेदकेषुमुख्येननयनानयना
द्यात्मकव्यवहारेणव्यक्तावेवतत्परिच्छेदस्तथापिव्यक्तिमात्रेशक्तिग्रहोसंभवी।तासामानन्त्यात्।यत्किंचिद्व्यक्तौशक्ति
ग्रहात्तद्विषयव्यक्त्यन्तरस्यापिशाब्दभानेगोपदादश्वस्यापिभानापत्तिः।तद्विषयकशाब्देतद्विषयकशक्तिग्रहस्यकारणत्वा
भ्युपगमेतत्रव्यभिचारश्च।किंचहस्तिपकव्यक्त्यन्तरेहस्तिसंबन्धग्रहाद्यत्रहस्तिपकेसनगृहीतस्तस्यापिहस्तिदर्शनेस्मर
णापत्त्याव्यक्त्यन्तरेसंबन्धज्ञानस्यव्यक्त्यन्तरज्ञानाहेतुत्वात्।किंचसर्वेषांशब्दानांव्यक्तिमात्रबोधकत्वेगौःशुक्लश्चलो
डित्थइत्येषांसहप्रयोगानुपपत्तिः।तस्माज्जातिगुणक्रियासंज्ञाविशिष्टासुतज्जात्याद्यनुगतीकृतव्यक्तिषुशक्तिग्रहोवाच्यः।ता राम.
दृशशक्तिग्रहेणसकलव्यक्तिबोधदर्शनात्।व्यक्त्यंशेशक्यतावच्छेदकातिरिक्तानवच्छिन्नविशेष्यताशालीजातिप्रकारकशक्ति
ग्रहइतिजात्याश्रयसकलव्यक्तिबोधसंभवः।एवंचैतदर्थसामान्यलक्षणाप्रत्यासत्त्यङ्गीकारोव्यर्थएव॥किंचतदङ्गीकारेप्रमेयः ५७

त्वसामान्यलक्षणाया धर्मणांधर्मिणांविशिष्टस्यचसर्वस्यतत्तद्रूपेणज्ञानापत्तौसार्वज्ञ्यापत्तिः। नचस्ववृत्तिधर्माश्रयत्वरूपयातयासामान्यधर्मप्रकारकमेवज्ञानमितिनदोषइतिवाच्यम्। प्रत्यासत्तेःप्रकारतयाभानस्य क्वाप्यदृष्टत्वात्। किंचाविद्यमाने नष्टवस्मिनासंबंधस्योपपादयितुमशक्यत्वेनभाविषुशक्तिग्रहासंभवस्तदवस्थएव। भाविजात्याश्रयत्वमादायतदुपपादनेचचक्षुःसंयुक्तेभाविपाकजरूपादेर्भाविचक्षुःसंयुक्तसमवायात्प्रत्यक्षापत्तिः। विनश्यदवस्थेघटप्रत्यक्षवारणायसन्निकर्षाणांकार्यसहभावित्वेनैवकारणतावश्यकत्वेनात्रैवदृष्टविपरीतकल्पनेमानाभावः। समवेतगुणनाशस्याश्रयनाशकसामग्र्येव। प्रत्यक्षविषयस्यापिकार्यसहभावेनकारणत्वेगौरवम्। एवंविनाशकालेद्रव्यस्यसत्त्वेतेनापिकार्यकारणभावेननननिर्वाहः। तत्कालेतदसत्त्वेतुसन्निकर्षस्याप्यभावः। संबन्धिद्वयाश्रित सन्निकर्षस्यान्यतरासत्त्वेउपपादयितुमशक्यत्वात्। वस्तुतोविनश्यदवस्थघटः प्रत्यक्षएवसत्यांसामग्र्याम्। घटोनास्तीत्यादौप्रसक्तियोग्यवर्तमानघटानामेवाभावप्रतीतिरित्यलम्। एवंचजात्यवच्छिन्नविषयकशक्तिमान्जातिशब्दः गुणाद्यवच्छिन्नविषयकशक्तिमान्गुणशब्दादिरितिव्यवस्था। तत्रविशेषणविशेष्ययोरुभयोरपिशक्तिः। शक्यतावच्छेदकत्वंचशक्यैकदेशेप्रकारत्वम्। हस्तिपकत्वादावप्यारोपेणगृहीतहस्तिसंबन्धाद्हस्तिदर्शनेहस्तिपकत्वेनोपस्थितिर्विशेषणविशेष्ययोरन्यतरधर्मस्यान्यतरत्रारोपेवि॰

शेषणत्वादिकमेवबीजम्। अतएवशिखीध्वस्तइत्यादौविशिष्टस्यध्वंसेऽन्वयःकारकविशेषणेचगुणादौकारकत्वम्। यहृसंबन्धग्रहविशेष्यत्वस्यसंबन्धिभाननियामकत्ववत्तदवच्छेदकत्वस्यधर्मभाननियामकत्वम्। यथाहस्तिपकादौहस्त्यादिसंबन्धग्रहस्यहस्तिपकत्वादिनोपस्थितौनियामकत्वम्।अतएवदण्डाद्घटत्वेनघटस्यघटाच्चदण्डत्वेनदण्डस्योपस्थितिः। एतेनशक्यतावच्छेदकेपिशक्तिरित्यपास्तम्। फलाभावात्। यथाचशक्तिग्रहेशक्यतावच्छेदकानुगतीकृतसकलव्यक्तिभानम्। एवंशाब्दबोधेपितदनुगतसकलव्यक्तिभानम्। नब्राह्मणमित्यादावेकवचनंतुशक्यतावच्छेदकगतसंख्यांविशेष्येआरोप्यप्रयोगान्नानुपपन्नम्। शक्यतावच्छेदकत्वं शक्यनिष्ठायाविशेष्यतातदवच्छेदकताख्यप्रकारतयाभासमानत्वम्। घटादिपदशक्तिग्रहेचघटत्वादेरेवतत्त्वंनद्रव्यत्वादेरितिनतेभ्योद्रव्यत्वादिप्रकारकबोधः।द्रव्यादिपदाच्चनघटत्वादिप्रकारकबोधः।अतएवआकाशपदस्यशब्दाश्रयत्वेशक्त्यभावेपिततस्तद्रूपेणबोधः।तद्विशिष्टविषयकसंबन्धग्रहस्येवतद्विशिष्टविषयकज्ञानहेतुत्वादितिमणिकृतोक्तम्। वस्तुतस्तत्राकाशत्वमखण्डोपाधिरूपंतत्तत्पदरूपंवाजातिरूपंवाशक्यतावच्छेदकम्। तेनाकाशःशब्दाश्रयइतिप्रयोगोपपत्तिः। तदुक्तंसरूपसूत्रेभाष्ये। द्रव्याभिधानंव्याडिरिति। एतत्पक्षेजातेरुपलक्षणत्वेनाश्रयणात्परित्यक्तभेदंद्रव्यमात्रंविशिष्टजातियुक्तंशब्दैर्नोच्यतइ ।कैयटः।श्येनचितिंचिन्वीते

स्यादौचश्येनाकाराचितिमितिमध्यमपदलोपीसमासइतिनतत्रानुपपत्तिः।अत्रपक्षेयोयःशब्देनोच्यतेससर्वोपिद्रव्यधर्मयुक्तः कश्चिन्मुख्यतद्धर्मयुक्तः कश्चिदुपचरिततद्धर्मयुक्तः।तदुक्तम्।वस्तूपलक्षणंयत्रसर्वनामप्रयुज्यते॥द्रव्यमित्युच्यतेसोर्थोभेद्यत्वेनविवक्षितइति।इदंतदितिसर्वनामपरामर्शयोग्यंद्रव्यमित्यर्थः।अतइतियत्प्रतीयतेतद्द्रव्यमितिनिरुक्तोक्तेः।लक्षणान्तरमाह।भेद्यत्वेनेति।किंचिन्निरूपितविशेष्यत्वेनेत्यर्थः।विवक्षितइत्यनेनशब्दार्थस्येदंलक्षणमित्युक्तम्।एवंचजात्यादेरपिविशेष्यत्वविवक्षायांद्रव्यत्वमेव।तिङन्तार्थक्रियायाअपिकिमादिभिःपरामर्शात्सुखमित्यादिभिर्विशेष्यत्वाच्चसिद्धान्तेसंख्यायाविशेषणाच्चद्रव्यत्वमेव।विप्रतिषिद्धंचेत्यादौतुसामर्थ्यात्तन्त्रान्तरीयप्रसिद्धद्रव्यग्रहणमितिहेलाराजः।अन्येतुजातिरेवशक्योभयत्रशक्तिकल्पनेव्यक्तौशक्तेर्जातौतदवच्छेदकत्वस्यवाकल्पनेगौरवात्।युक्त्यन्तरमपिशक्तिवादान्तेउक्तम्।व्यक्तिभानंतुशक्तिग्रहविशेष्यत्वात्।तवतत्रावच्छेदकत्वेनजातिभानवत्।शक्तिग्रहस्तुगौर्गोपदशक्यइत्येव।सचस्वर्गोध्वस्तइतिवद्नागृहीतविशेषणाबुद्धिर्विशेष्येउपजायतेइतिन्यायसहकृतलाघवेनजातिमात्रे।यद्वा।जातिविशेष्यकएवशक्तिग्रहोगौर्गोपदशक्यइतिजातावेवशक्तावप्येवमेवाभिलापात्।जातेराश्रयावियोगेपितस्याःकेवलायाःशब्दवाच्यत्वम्।यथामुखस्यस्वस्थानावियोगेपिजलादौदृश्यमानस्यमुखपदबोध्यत्वं तद्वत्।शक्यतावच्छेदकंतुशब्दगताजातिः।शब्दार्थ

योस्तादात्म्येन तद्व तज्जात्योरपि तत्त्वात्। यद्वा। जातिगतो धर्मस्तथा। विनापि संकेतविषयतां सामान्येन संबन्धनियमात् स्वसह-
चरिता व्यक्तिर्जातिं विशिनष्टि। यथा चक्षुरादीनि रूपादिज्ञानागृहीतान्यपि चाक्षुषयामीत्यनुव्यवसाये गृह्यन्ते तद्वदिति हरिग्रन्थे
स्पष्टम्। मास्तु वा व्यक्तेर्भानमित्याहुः। तदुक्तं तत्रैव भाष्ये। आकृतिं वाजप्यायन इति। व्यक्तेरभानेप्यानयनादिक्रिया तत्र केवलाया
मसंभवन्ती व्यक्तिसाहित्येन निष्पाद्यते। तदुक्तं सरूपसूत्रे। तद्धितार्थेति सूत्रे च भाष्ये। आकृतावारम्भणादीनां संभवो नास्तीति
कृत्वा तत्सहचरिते द्रव्ये भविष्यतीति। यथाग्निरानीयतामित्युक्ते केवलस्याग्नेरानयनासंभवाद् चोदितमपि पात्रमानीयते। एत
देवाग्नेरानयनं यत्तु पात्रस्थस्य। तथाकृतावारम्भणादीनि चोद्यमानानि सामर्थ्यात् साहचर्याद् द्रव्यमभिनिविशन्ते सर्व एवाकृतेः
क्रियासंयोगोन्तर्भावितद्रव्याया एवेति द्रव्यद्वारकः संपद्यत इति कैयटः। साहचर्यं च संबन्धः आकृतेरारम्भणादिभिः शब्दोन्व
यस्तु बोधे बाधस्याप्रतिबन्धकत्वादारोपेण वोपपाद्यः। द्रव्यगतलिङ्गसंख्यादिकं तद्गतभेदारोपेण गौश्च गौश्चेत्यादिसमुच्चयो
पपत्तिः। कदाचिदेकेनैव शब्देन द्रव्यगतद्वित्वादिमत्त्वेन प्रतीतिरित्याद्यूह्यम्। हरिस्त्वाह। व्यक्तौ कार्याणि संसृष्टा जातिस्तु प्रति
पद्यत इति केचित्। वस्तुतस्तु संबन्धात् स्मृतव्यक्तेर्भानमित्येव न्याय्यम्। अत एव सरूपसूत्रादिस्थभाष्येणैकवाक्यता। त
स्याश्चैतद्द्वारे विशेषणतया भानमिति वक्ष्यते। गोत्वादिपदे जातिरेव धर्मी तद्वृत्तिधर्मश्च गोत्वादिपदानां शक्तिरतस्तत्र न

कदाचिद्गो व्यक्तिविशेष्यकोबोधः। नापि तद्विषया क्रिया यतस्तैर्गवाद्युपलक्षितगोत्वाद्यवितरपदार्थसंबन्धबोधनम् प्रकृत्यर्थ
स्य च प्रत्ययार्थे प्रायेणोपलक्षणत्वमेव। अतएवोपगवमानयेत्युक्ते नोपगोरानयनम्। उपलक्षणत्वं चोपलक्ष्यविषयक्रि
याः विषयत्वमेव। सहचरितां व्यक्तिं जातिर्विशिनष्टीति पक्षे जातिप्राधान्ये एकवचनं तात्पर्यग्राहकं तरुशैलमित्यादौ समा
हारद्वन्द्वस्य पटस्य शुक्ल इत्यादौ व्यक्तेः प्राधान्यं जातेर्विशेषणता। शुक्लः पटः पटो नेत्यादौ च। शाबलेयस्य गौर्घटो नित्य इत्याद्यन
भिधान्नं। एवमेव घटो न द्रव्यमिति न। यद्वा। जातिव्यक्त्योरव्यक्तिरेकाज्जातेरेव प्राधान्येऽपि न वाहाद्यन्वयानुपपत्तिः। अतएव ग
वादिशब्दार्थानामाश्रयगतलिङ्गादिग्राहिता। तदप्युक्तं तद्धितार्थेति सूत्रे भाष्ये। अथवाऽव्यतिरेकाद्द्रव्याकृत्योर्द्रव्यानयन
मिति गोत्वपदजन्यबोधे गोत्वं तु भेदप्रधानतादात्म्येन व्यक्तेर्विशेषणत्वमिति न गोत्वं वाहयेदिति प्रयोगः। एवमेव घटः शुक्ल
इत्यादौ गुणिगतलिङ्गादिग्राहिता शुक्लादिशब्दानाम्। पटस्य शुक्ल इत्यत्र तु न। भेदस्यैव तत्र संबन्धत्वात्। यदा जातिव्यक्त्यो
र्भेद एव विवक्षितो वाहाद्यसमभिव्याहारो जातेः प्राधान्यं च तदा भावप्रधानो निर्देश इति व्यवहारः। स च यथाभिधानमिति नाति
प्रसङ्गः। तदुक्तं जात्याख्यायामिति सूत्रे भाष्ये। जातिशब्देन जातिरप्यभिधीयते द्रव्यमपि। कथं पुनर्ज्ञायते द्रव्यमपीति। एवं
हि कश्चिन्महति गोमण्डले आसीनं गोपालकं पृच्छति। अस्त्यत्र कांचिद्गां पश्यसीति। स पश्यति पश्यति चायं गाः प्रच्छति च

अ. नूनमस्यद्रव्यंविवक्षितमितितद्यदाद्रव्याभिधानंतदाबहुवचनम्।यदासामान्याभिधानंतदैकवचनमिति।जातिशब्देनेत्यस्यजा
६० तिशक्तिग्रहविषयेणेत्यर्थः।द्रव्याभिधानमित्यस्यद्रव्याभेदेनाभिधानविशेष्यतयाद्रव्याभिधानंचार्थः।सामान्याभिधानमित्य
स्यद्रव्याङ्गेदेनविशेष्यतयातदभिधानमित्यर्थः।यत्तुबहुषुबहुवचनमितिसूत्रेभाष्येउक्तम्।यदागुणोगुणिविशेषकोभवति
तदानान्तरेणभावप्रत्ययंगुणप्रधानोनिर्देशः।यदातुगुणिनागुणोव्यपदिश्यतेपटस्यशुक्लइतितदान्तरेणापिभावप्रत्ययंगुणप्र
धानोभवतिनिर्देशइति।तत्तुभावप्रधानतात्पर्यग्राहकमात्रोपलक्षणम्।नथासरूपसूत्रेपिजातेःपदार्थत्वेतस्याएकत्वाद्द्वि
वचनाद्यसिद्धिमाशङ्क्यव्यक्तिवादेचनब्राह्मणंहन्यादित्यादावेकंब्राह्मणमहत्वाकृतीस्यादित्याद्याशङ्क्योक्तम्।नह्याकृति
पदार्थकस्यद्रव्यंनपदार्थोद्रव्यपदार्थकस्यवाकृतिर्नपदार्थः।उभयोरुभयंपदार्थःकस्यचित्किंचिद्गुणभूतंकिंचित्प्रधानभू
तमिति।यथापचतइत्यादौक्रियाप्राधान्येपिसाधनसंख्याकृतोवचनभेदएवमाकृतिप्राधान्येपिद्रव्यसंख्याकृतइत्यदोषइति
कैयटः।मतुप्सूत्रेपिकैयटः।आश्रयगतैकत्वसंख्याविशिष्टाजातिःकार्येआश्रीयतेयथापशुनायजेतेत्यादाविति।पदार्थइत्य राम
स्यपदजन्यबोधविषयइत्यर्थः।गुणभूतमित्यादेःस्वारसिकतयेतिशेषः।कदाचित्तस्यापिप्राधान्यंतुतात्पर्यग्राहकसापेक्ष
मितितदाशयः।द्रव्यप्राधान्येचक्वचिज्जातिगतसंख्ययावचनम्।यथानब्राह्मणमित्यादौ।तज्जात्याक्रान्तसकलव्यक्तीनांचबो ६०

धइतिबोध्यम्। इदंचाभेदेनव्यक्तेर्विशेषणत्वेद्रष्टव्यम्। भेदेनविशेषणत्वेतुजात्याख्यायामितिसूत्रोक्तरीत्यैकवचनमेव। व्य
क्तेः प्रकारत्वंचनिरवच्छिन्नायाएव। विशेष्यभूतजात्याचानुगमः। नहिप्रकारीभूतमेवानुगमकमित्यत्रमानमस्ति। यत्तुस
मर्थसूत्रेभाष्यकैयटयोरुक्तंवीरपुरुषइत्यादौद्रव्यवादेतस्यभेदाभावान्नभिन्नार्थानामेकार्थीभावरूपंसामर्थ्यमित्याशङ्
क्यावाच्यमपिद्रव्यंद्वारीकृत्ययथाविशेषणविशेष्यभावोजातिवादेएवंद्रव्यवादेऽवाच्यगुणकृतभेदमाश्रित्यतदुपपत्ति
रिति। तत्रावाच्यमित्यस्यशक्त्यविषयइत्यर्थः। शुद्धद्रव्यवादस्त्वनुपदमेवोपपादयिष्यते। घटोघटइत्यादौविशेष्यविशे
षणभावाप्रतीतेः सोपिभेदसापेक्षइतितदाशयः। जात्याकृतिव्यक्तयस्तुपदार्थइतिगौतमीयसूत्रे। नह्यस्तिककारोप्याह
।तुशब्दोविशेषणार्थः। किंविशेष्यतेप्रधानोपसर्जनभावस्यनियमेनपदार्थत्वम्। यदाभेदविवक्षाविशेषगतिश्चतदाव्यक्तिः
पदार्थोनजात्याकृती। यथागौस्तिष्ठतिगौर्गच्छतीति। तयोः स्थानादीनामसंभवात्सापदार्थः। यदापुनरभेदोविवक्षि
तः सामान्यगतिश्चतदाजातिःपदार्थइतरेविशेषणम्। यथागौर्नपदास्प्रष्टव्यइति। अत्रसर्वव्यक्तिलाभायैकवचनोप
पत्तयेचजातिः प्रधानंतस्याः साक्षात्संसर्गासंभवाद्व्यक्त्यभेदविवक्षाबोध्या। पिष्टकमय्योगावइत्यत्राकृतिः। वैया
करणनयेप्याकृतिः शक्येतिस्फोटवादेनिरूपितम्। केचित्तुपिष्टकमय्योगावइत्यत्रशब्दज्ञानानुपातिवस्तुशू

न्यं विकल्पाख्यं ज्ञानं पातञ्जलोक्तम्। वस्तुशून्यमित्यस्य बाह्यवस्तुशून्यमित्यर्थः। बाधज्ञानाबाध्यत्वाच्च मिथ्याज्ञानाद्
स्य भेदः। बाधज्ञानसत्त्वेपि शब्दव्यवहारस्य तज्जन्यज्ञानस्य च जायमानत्वात् तदुक्तमत्यन्तासत्यपि त्वर्थे ज्ञानं शब्दः करोति
हीतीत्याहुः। अपरे तु धर्ममुपलक्षणीकृत्य शक्तिग्रहाद्वस्तुतस्तत्तद्धर्माकृतिविशिष्टा व्यक्तिर्बुध्यते न तु तद्धर्मप्रकारेणेति
व्यक्तिवादः। प्रकृष्टप्रकाशश्चन्द्र इति वाक्यतोपि वस्तुतस्तत्तद्विशेषणविशिष्टव्यक्तेः स्वरूपेणोपस्थितिः। यथा यः शुक्लवा
साः स देवदत्त इत्यादौ शुक्लवाससोपलक्षिते शक्तिग्रहेपि देवदत्तपदजबोधेन तज्ज्ञानं तथा जात्यादेरपि। एवदेव जात्यादेरु
पलक्षणत्वम्। घटत्वाश्रयाणां सर्वेषां स्वरूपतः शक्तिग्रहविषयत्वं संपाद्य स्वयं शक्तिग्रहाविषयो बोधाविषयश्च। यथा काक
वन्तो देवदत्तगृहा इत्यादौ काकः स्वोपलक्षितोत्तृणात्वादिना तद्गृहमितरेभ्यो व्यावर्तयति तथा जातिर्व्यक्तीरुपस्थाप्य
स्वोपलक्षिताभिस्ताभिः शक्तिमितरेभ्यो व्यावर्तयति। घटत्वाश्रयो यः स घटपदशक्य इति शक्तिग्रहस्तत्पदेन विशेष्यमात्र
परामर्शः। घटो घटपदशक्य इत्यस्याप्ययमेवार्थः। एतदेवाभिप्रेत्य ध्रुवमपाये इति सूत्रे धावतः पतित इत्यादावध्रुवत्वमा
शङ्क्यासतोप्यविवक्षया समाहितम्। सरणोपलक्षितं द्रव्यमात्रमत्र विवक्षितमिति कैयटः। तदुक्तम्। आनन्त्येपि हि भा
वानामेकं कृत्वोपलक्षणम्। शब्दः सुकरसंबन्धो न च व्यभिचरिष्यतीति। हरिरप्याह। अध्रुवेण निमित्तेन देवदत्तगृहं यथा

।गृहीतंगृहशब्देनशुद्धमेवाभिधीयतइति।शुद्धमेवनतुउपलक्षणीभूतकाकविशिष्टमित्यर्थः।तथासत्योपाध्युपलक्षितंसत्सुमुपाध्यनादरेणैवशब्दैरभिधीयतइतिहेलाराजः।नब्राह्मणमित्यादौब्राह्मणत्वोपलक्षिततत्वस्यसर्वव्यक्तिषुसत्त्वाद्धनदोषः।पद्या।रूपसामान्यात्सर्वव्यक्तिषुहनननिषेधादिति।तदुक्तमइउण्सूत्रेभाष्येरूपसामान्याद्वासिद्धम्।बालस्याद्यशक्तिग्रहोपिईदृशोगोपदवाच्यइति।अत्रापिपक्षेशक्तिग्रहेभासमानोपलक्षकरूपेणद्रव्यस्यभेदमाश्रित्यवीरपुरुषइत्यादौसमासः।वीरपदेनापुरुषस्याप्युपस्थित्यातयोर्नपर्यायतातद्बोध्यव्यक्तिमात्रबोधकत्वंहिपर्यायत्वमितिवदन्तिअयमपिपक्षःसमर्थसूत्रेभाष्येस्पष्टइतिसमासवादेनिरूपयिष्यते।यत्तुजातिपक्षेपिगवादिपदानामुभयत्रशक्तिःशक्तिग्रहकार्यकारणभावेचजातिप्रकारत्वस्यैवनिवेशोनतुव्यक्तिविशेष्यकत्वस्यनिवेशः।अतएवव्यक्त्यंशेकुण्ठाशक्तिस्तदंशेतज्ज्ञानानपेक्षणात्।एतावतैवजातौशक्तिरितिव्यवहारइति।तन्न।गौरवात्।किंचसामान्यलक्षणाखण्डनायह्ययंप्रकारस्त्वावश्यकम्।कार्यतावच्छेदककोटौविशेष्यांशानिवेशेगोत्वेनाश्वादिबोधापत्तेः।नचप्रकारताविशेषएवनिवेश्यतइतिवाच्यम्।तस्यगोनिष्ठविशेष्यतानिरूपितेतिशब्देनैवबोधनीयतयादुर्ज्ञेयत्वात्।तन्निवेशेतुगोव्यक्त्यन्तरबोधोनस्यात्।तन्निष्ठविशेष्यतायांतन्निरूपकत्वाभावात्।यदितुविशेष्यांशेविशेष्यतायाःप्र-

CC-0. In Public Domain. Digitization by eGangotri

कारातिरिक्तानवच्छिन्नतयानिवेशात् तत्रनदोषइतिविभाव्यते। तदावृथायंप्रयासः। किंचघटत्वावच्छिन्नंसर्वंप्रतिघट
कारणताग्रहोपिमदुक्तरीत्यैवसुग्रहो नभवदुक्तरीत्येत्यलम्। यत्तुकुत्सितइतिसूत्रेभाष्येउक्तम्। स्वार्थमभिधायशब्दो
निरपेक्षोद्रव्यमाहसमवेतइति। तस्यायमर्थः। स्वार्थंजात्यादि। अभिधायतद्विषयकाभिधाग्रहविषयीभूता शब्दः प्राति
पदिकरूपस्तादितरनिरपेक्षःसमवायेनसंबद्धंद्रव्यमाहेति। अभिधायेत्यस्यप्रतिपाद्येत्यर्थेक्त्वोनुपपत्तिः। शब्दतोजातिद्र
व्ययोः क्रमेणबोधाननुभवात्। प्रत्यक्षदृष्टक्रमस्यात्रारोपइत्यपिनयुक्तम्। आश्रयानालिङ्गितजातिप्रत्यक्षस्याप्यनुभव
विरुद्धत्वेनतत्रापिवस्तुतःक्रमाभावात्। भट्टास्तुजात्याव्यक्त्याक्षेपः। विशेषणत्ववैशिष्ट्येनैवजातौपदानांशक्तिग्रहाद्वि
शेषणत्वानुपपत्त्याविशेष्यव्यक्तेराक्षेपः। त्वादिरहितपदबोध्याजातिर्व्यक्तिविशेष्यकबोधविषया। विशेषणतयागृही
तशक्तिकत्वादित्यनुमानम्। यत्तुजातेर्निर्विकल्पकोपस्थितिर्निर्विकल्पकेइन्द्रियवत् शब्दोपिकरणंशक्त्यनुभवोपिजा
त्यंशेनिष्प्रकारकएव। गोत्वंकिंचिदाश्रितंजातित्वादित्यनुमानम्। पदप्रयोज्यायाश्चउपस्थितेः शाब्दकारणत्वान्नव्युत्प
त्तिभङ्गः। प्रतितात्पर्येधूमोसंज्वलतीत्यतोवन्हिर्ज्वलतीतिबोधोभवत्येवायमेवाक्षेपइतितन्न। तादृशाहेतूपस्थितेरसा
र्वत्रिकत्वात्। शब्दतोजातित्वेनानुपस्थितेः। अर्थापत्तेरपिनावसरः। अनुपपत्तिज्ञानमन्तरेणापिबोधात्। समान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संविदःसंवेद्यत्वमाक्षेपइत्यपिनयुक्तम्।स्वर्णकरकादिषुगृह्यमाणेषुतेजस्त्वजलत्वपृथिवीत्वसंशयदर्शनात्॥द्रव्यमि
तिघटज्ञानेघटत्वभानाभावाद्घटत्वपदजन्यजातिभानेविशेष्यतयाव्यक्त्यभानाच्च।किंचगवादिवैशिष्ट्येनचगोत्व
स्यसमानवित्तिवेद्यत्वेपिगोगोत्ववैशिष्ट्यानीतिसमूहालम्बनमेवस्यान्नविशिष्टबुद्धिरित्याहुः।तन्न।व्यास्यादि
प्रतिसंधानंविनापिबोधात्।एतेनजातिशक्तस्यव्यक्तौलक्षणेत्यपास्तम्।अनुपपत्तिप्रतिसंधानंविनापिबोधात्।क्व
चित्शक्यार्थमात्रबोधकपदस्यैवान्यत्रलक्षणायादृष्टत्वाच्च।नचैवंप्रकृतेअन्यथोपपत्तेश्चेत्यलम्।तत्रगवादिशब्दे
नगवादीनांप्रतीतौसाकदाचित्सास्नादीनांप्रतीतिःसानुमानिक्येवेत्यन्ये।शाब्द्येवेत्यपरे।जलतैलादयःशब्दास्त्ववयवाव
यविसाधारणाः।यदात्वौषधादिसंस्कृतेपरिच्छिन्नेतैलादयोव्यवस्थितास्तदापितेऽवयवंसमुदायरूपेणाहुस्तदभिप्रा
येणभाष्येउक्तंसमुदायेदृष्टाःशब्दाअवयवेपिवर्तन्तेयथातैलंभुक्तमित्यादिना।एवंगुणिपरशुक्लादिषुगुणःशक्यः।न
चानन्त्यम्।शुक्लादिगुणानामेकत्वनित्यत्वस्वीकारात्।आश्रयभेदौपाधिकस्तुभेदव्यवहारः।एकोपिसावयवः।अतए
वअल्पत्वमहत्त्वकृतोभेदः।यद्वैकमखण्डंनैर्मल्यादिगुणान्तरसंमिश्रणेमहत्त्वमन्यथाल्पत्वमितितमस्सूत्रेभाष्ये।
स्पष्टम्।क्रियाप्येवमेकानित्याच।उत्पादविनाशौसंबन्धस्यैव।पच्यादिशक्यापियाःस्वप्रधानेनफलजनिकासैकैव

CC-0. In Public Domain. Digitization by eGangotri

अन्यासांतुतादर्थ्यात्पाकत्वव्यवहारोगौणः।एकपटशुक्लापरपटशुक्लगुणयोः प्रत्यभिज्ञा अवस्तुआरोपितभेदकृतः
।क्वचिदस्त्येव तथाप्रत्यभिज्ञा।गुणपरेषु तद्गतजातिः।पाचकइत्यादेः पाकक्रियासंबन्धवत्कर्तरि शक्तिः।क्रियापचेर
कस्यकर्ताशक्यः संबन्धोविशिष्टशक्यः।संबन्धश्चक्रियाकारकभावः सएवतत्र प्रवृत्तिनिमित्तम्। प्रवृत्तिनिमित्त
त्वंचयज्ज्ञानाच्छब्दप्रवृत्तिस्तत्त्वम्।तस्यभावइतिसूत्रेभावशब्देनप्रवृत्तिनिमित्तमेव।अतएवततः संबन्धेभावप्र
त्ययः।शब्दप्रवृत्तिश्चक्वचिद्धर्मस्वरूपज्ञानात् क्वचित्संबन्धज्ञानादिति स्पष्टं तस्यभावइत्यत्र कैयटे।तत्रजातिगु
णयोर्लोकनिरूढ्यासोयमित्यादिप्रतीत्याभेदनिबन्धनस्यातिरेकाभानान्नतत्रसंबन्धेभावप्रत्ययः।क्रियया तुकृदन्तेभेद
स्यैवनियमेनप्रतीतेस्तत्संबन्धज्ञानादेवशब्दप्रवृत्तिरितितत्रैवभावप्रत्ययः।क्रियाकारकयोर्भेदाभेदावितिप्रतीतेतिङन्ते
तुयुष्मद्युपपदेसमानाधिकरणेइत्युक्तेर्भेदतिरोधानम्।अत्रचशब्दशक्तिस्वभावएवबीजम्।अतएवकृत्तद्धितसमासे
भ्यः संबन्धाभिधानंभावप्रत्ययेनेत्युक्त्वापाचकत्वमित्युदाहृतंहरिणा।क्रियाप्रवृत्तिनिमित्तइत्यस्यक्रियासंबन्धप्रवृत्तिनि
मित्तकइत्येवार्थः।जातिगुणक्रियायदृच्छेतिचतुष्टयीशब्दानांप्रवृत्तिरित्यत्रक्रियापदंसंबन्धप्रवृत्तिनिमित्तकशब्दोपल
क्षणमितिनन्यूनता।यदृच्छाशब्दाडित्थादयः क्वादयोभादयश्च।तत्रडित्थादिषुएकद्रव्योपनिवेशसंज्ञाभूतेषुव्यक्तिरेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच्या।आनन्त्यव्यभिचारयोरभावात्।प्रातिपदिकमात्रादर्थबोधाभावेनसुबन्ताच्चसंख्यादेरेवप्रकारतयाभानेननत
तोनिर्विकल्पकम्।नचडित्थत्वमित्यादौप्रत्ययार्थाभावेनत्वाद्यनुपपत्तिरितिवाच्यम्।व्यक्तेरेवप्रकारताविशेष्यतारूप
विषयताद्वयेनभानेनप्रकारत्वावच्छिन्नायाव्यक्तेरेवत्वाद्यर्थत्वात्।जात्यतिरिक्तधर्मांशेप्रकारतायाःस्वावच्छिन्नत्वनि
यमस्तुभेदसंबन्धावच्छिन्नप्रकारतायाएवेतिनकश्चिद्दोषः।यद्वा।तत्रप्रकृतिःशब्दपराविशेष्यभूतोर्थएवत्वाद्यर्थः।डि
त्थडित्थत्वपदयोश्चपर्यायता।यत्तु —— बालयुवाद्यवस्थाभेदेनशरीरभेदात्तद्वृत्तिडित्थत्वादिजातिःसैवत्वाद्यर्थइति
।तन्न।लोकेतत्रभेदव्यवहाराभावेनतादृशोपाधिभेदेनभेदेप्रमाणाभावात्।आकाशेतुपटाकाशमगकाशादीतिलोकेभेदव्य
वहारेणतत्रौपाधिकभेदसिद्धिः।अन्यथैकद्रव्योपनिवेशिनीत्यस्यासंभवापत्तिः।एतच्चतस्यभावइतिसूत्रेभाष्येस्पष्ट
मितिशक्तिवादेनिरूपितंतद्धितवादेनिरूपयिष्यतेच।क्कादिपदानांकादीनामेकत्वमतेपञ्चवर्णव्यक्तिषुतेषामनेकत्वमते
पञ्चजातीयवर्णव्यक्तिषुवाशक्तिः।अन्त्येजातयउपलक्षणमितिव्यक्तिवादोक्तरीत्याबोध्यम्।तत्राप्यानन्त्याद्यभावेनप
क्वत्वस्यैकशक्यतावच्छेदकात्तुपयोगएव।तत्रापिपूर्ववदेवभावप्रत्ययइतिकुत्वकुशब्दयोःपर्यायताएव।भादिपदा
नांतुशक्यव्यक्त्यानन्त्येनशक्यतावच्छेदकापेक्षणात्।भादिपदमेवशक्यतावच्छेदकंतदेवचतदुत्तरत्वाद्यर्थः।एतदभि

Nepal Sanskrit University

प्रायेणैववृद्धिरादैच्सूत्रेभाष्येउक्तम्कुत्वंकस्मान्नभवतिचोःकुःपदस्येतिभत्वात्। कथंभसंज्ञेति। अनेनकुत्वकुपदयोर्भत्वभसंज्ञापदयोःपर्यायतास्पष्टमेवोक्ता। नचकुत्वपदस्यतत्रलक्षणा। मुख्येर्थेक्वापिप्रयोगादर्शनात्। उपक्रमेलाक्षणिकशब्दप्रयोगेबीजाभावाच्चेतिदिक्। परेतुगुणादीनामपिशक्यत्वेआनन्त्यव्यभिचारयोःसत्त्वेनगुणादिगतजातिरेवशक्या। रूपवान्क्रियावान्इतिपदयोःशक्तिग्रहेसर्वथातयोर्दुर्वारत्वात्। शुक्लादीनामप्यनेकत्वमितिपक्षस्यापितमप्सूत्रेभाष्येसत्त्वेनतत्रापितयोःसत्त्वाच्च। युक्तंचैतत्। अन्यथोक्तरीत्याघटादीनामपिनित्यत्वाद्यापत्तिः। किंचैकत्वेप्यौपाधिकभेदसत्त्वेनतौदुर्वारौ। पाचकादिषुसंबन्धप्रवृत्तिनिमित्तकेषुसंबन्धप्रतियोगिक्रियागताजातिःशक्या॥ गुडतण्डुलपाकेषुभिन्नेषुपाकःपाकइत्यनुगतव्यवहारेणपाकत्वस्यैकजातिरूपस्याङ्गीकारात्। एवमन्यत्रापि। डित्थादावपिडित्थादिशब्दगतजातिःशुकाद्युच्चारणभेदेनडित्थादिशब्दानांनानात्वात्। तदध्यवसायाच्च । गुणादिगतजातेःपरंपरयाद्रव्यवृत्तितयाद्रव्यबोधनिर्वाहः। साक्षादाश्रयवृत्तिजातिबोधजनकोजातिशब्दः। गुणादिद्वारकपरंपरयातद्वृत्तिधर्मबोधजनकागुणादिशब्दाइतिनचतुष्टयीशब्दानांप्रवृत्तिरित्यस्यहानिरित्याहुः। एवंचशुक्लादयउभयत्रशक्ताएवंगुणेगुणिनिच। आद्येपुंस्त्वम्। अन्त्येविशेष्यनिघ्नता। गुणेशुक्लादयःपुंसिगुणिलिङ्गास्तुतद्वतीतिकोशात्। गुणिनिलक्षणेतितुनयुक्तम्। मानाभावात्

।लाक्षणिकानां कोशेऽनुपादानाच्च। रूपादिशब्दवाच्यस्य तु शब्दशक्तिस्वभावान्न गुण्यभेदमापन्नतेति बोध्यम्। जातितद्वृत्तोर्गुणगुण्यादेश्च समवायः संबन्धः। समवायोऽपृथग्भावो द्रव्यादीनां गुणैर्मतः। स नित्यो यत्र हि द्रव्यं न तत्रानियतोऽगुण इति चरकेपतञ्जल्युक्तेः। तत्र समवाय इति लक्ष्यम् अपृथग्भाव इति लक्षणम्। स च सदैवावस्थानम्। अयमेवायुतसिद्धः। द्रव्यादीनामाधारभूतानां गुणैराधेयैः समवायो मतः संबन्ध इति शेषः। तेन पृथिवीत्वगन्धयोर्न संबन्धः। आधाराधेयत्वाभावात्। आधाराधेयभावश्च तयोरनियतः। तन्तुषु पटः पटे तन्तव इति वृक्षे शाखेति च व्यवहारात्। समवायो नित्यः किं सर्वत्र नेत्याह। यत्रेति। नित्यमिति शेषः। तत्र नित्य इत्यर्थः। हियतस्तत्रानियतोऽनित्यो गुणो नातो नित्यद्रव्यतद्गुणयोः समवायो नित्योऽर्थादन्यत्रानित्य इत्युक्तम्। एवं चानेकत्वमप्युक्तमेव। एकत्र द्रव्ये अनेकगुणकर्मादिनिरूपितोऽनेकस्तु न। मानाभावात्। किं त्वेक एव। एतावतैवैकः समवाय इति व्यवहारः केषांचित्। तदुक्तं कणादेन तत्त्वं भावेनेति। तत्त्वमेकत्वं भावेन सत्तया व्याख्यातमिति तदर्थः। स चापृथक्स्थितिरूपः समवायः स्वस्वरूपेणैतेषां भेदव्यवहारनियामकः। अयुतसिद्धिमूलकादभेदारोपाच्चाभेदव्यवहारनियामकोऽपि। पटः शुक्लः तन्तुषु पटः पटीभवन्ति तन्तवो वृक्षे शाखेत्यादिव्यवहारात्। तदुक्तं हरिणापि। ततस्तु समवायाख्याशक्तिर्भेदस्य बाधिका॥ एकत्वमिवता व्यक्तीरापादयति कारणैरिति।

ततःकार्यव्यक्त्यनन्तरंभेदस्यभेदमात्रप्रतीतेःकारणैः।अयुतसिद्धत्वेनैकदेशस्थित्याविभागरूपैरित्यर्थइतिहेलाराजः।तत्रभेदस्थलकोऽवयवावयविभावोगुणगुणिभावादिश्चसंबन्धःषष्ठीवाच्यइत्येतावतासमवायस्यसंबन्धत्वव्यवहारः।लोकेप्यपृथग्भावारोपात्।तदाश्रयेसंघेसमवायव्यवहारः।तत्रचसमवायपदमेवप्रवृत्तिनिमित्तम्।समवायाभ्युपगमाच्चसाम्यादनवस्थितेरितिव्याससूत्रंतुसमवायस्यैवसाक्षात्संबन्धत्वमित्यर्थखण्डकम्।तदर्थस्तुसमवायसंबन्धाभ्युपगमादपिनेष्टसिद्धिः।अवयवैरत्यन्तभिन्नोवयवीसमवायसंबन्धेनतैःसंबध्यतेचेत्समवायोपिसमवायिभ्योत्यन्तभिन्नःसमवायेनान्येनवासंबन्धेनसमवायिभिःसंबध्येतात्यन्तभेदसाम्यात्।ततश्चतस्याप्यन्योन्यःसंबन्धःकल्प्यइत्यनवस्थेतिसमवायस्यसमवायिभिःसंमूर्छितावभासाद्भेदानवभासेननमुख्यसंबन्धत्वमतोनषष्ठीवाच्यःसः।संयोगोपिनषष्ठीवाच्यः।पदार्थयोजनामात्रहेतुःसंबन्धोहिषष्ठ्यर्थः।संयोगस्तुनैवम्।तस्यस्वतःपदार्थत्वात्।संयोगंपश्येत्यादिव्यवहारात्।परस्परंसंयोगेनावयवानामवयव्युत्पादकत्वेनवस्तुभूतकार्यकारित्वाच्च।संबन्धस्यतुनतत्त्वमितिस्पष्टमेवेतिस्पष्टंह[illegible]हेलाराजग्रन्थयोः।कणादोपिइहेदमितियतःकार्यकारणयोःसमवायइति।इहेतिइदमितिचयतइत्यर्थः।कार्यकारणयोरित्ययुतसिद्धानामुपलक्षणम्।आद्यंमृदिघटइति।अन्त्यंमृद्

घटइत्यादिक्रियाक्रियावतोऽपिचैत्रोगच्छतीत्यादावभेदप्रतीतिः।प्रत्ययार्थकर्तुःक्रिययाभेदेनैवान्वयात्।भेदसंबन्धस्यशब्दादनुपस्थितेः।अयंसमवायोबौद्धशब्दार्थयोरपिवक्तुंशक्यः।अतएवतयोर्भेदाभेदव्यवहारः।अत्रार्थेयंशाऽब्दइतिव्यवहारेणतयोरप्याधाराधेयभावसत्त्वात्।विमानखण्डेऽप्युक्तम्।वादमार्गेजिघायद्रव्यगुणकर्मसामान्यविशेषसमवायाज्ञातव्याइतिचरके।यत्तुभेदसमानाधिकरणाभेदरूपंतादात्म्यसंबन्धःअभेदश्चव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकभेदस्यतादृशएवाभावोनातिरिक्तः।एतेनभेदत्वावच्छिन्नाभावश्चेदप्रसिद्धिः।भेदप्रतियोगिताकाभावश्चेद् द्वित्वादिनावह्न्यादौनीलभेदाभावस्यापिसत्त्वाद् वह्निर्नीलइत्यादेरापत्तिरित्यपास्तमिति।तन्न।तदस्यसाधारणधर्मरूपार्थयौगिकेनतादात्म्यशब्देनशब्दमर्यादयातावतोऽर्थस्यालाभात्।तत्राप्यर्थेरूढिकल्पनायांतुगौरवमकॢप्तकल्पनाच।समवायात्समवैतीतिसूत्रेसमवायंसमूहंप्राप्यतदेकदेशीभवतीत्यर्थइतिवृत्तिव्याख्यानेनोक्तश्चरकश्लोकेनचसमवपूर्वकेणस्तत्रशक्तिःकॢप्तासपदार्थश्चकॢप्तएवेतिनमेकिंचित्कल्प्यम्।किंचभेदतदभावयोर्विरुद्धस्वभावत्वात्कथमेकत्रस्थितिः।नचैकोध्यस्तः।तत्त्वंकिंभेदस्यतदभावस्यवा।आद्येयमध्यासःकिमाद्यव्यवहारद्वदीश्वरस्योतशुक्तौरजताध्यासवदाधुनिकस्य।आद्येसिद्धंतस्यव्यावहारिकत्वमितिनतयोर्वैषम्यम्।अन्त्येतद

ध्यासवदेवास्यापिव्यवहारनियामकत्वाभावापत्तिः। स्वर्णकार्यदानेस्वर्णदानाद्धर्माधिक्यश्रवणात्। किंच भेदाभावः
प्रतियोगितावच्छेदकधर्मरूपइतिरूपादौतस्याध्यासएववाच्यइतितस्याध्यस्तत्वापत्तौत्वत्सिद्धान्तभङ्गः। अतिरि
क्तत्वेतुगौरवम्। किंचातिरिक्तोपितत्समनियतवृत्तिनाध्यासंविनानिर्वाहः। अतिरिक्तोऽसमनियतइतिचेत्। अक्लृप्त
कल्पनायामनन्तगौरवम्। अत्रग्रन्थेयत्तुवैवहुशस्तादात्म्यस्यसंबन्धत्वमुक्तम्। वक्ष्यतेचतत्परवासनयेतिबो
ध्यम्। एतेनायुतसिद्धानांस्वरूपमेवसंबन्धोनसमवायः। तथाहिस्वरूपविशेषेसंबन्धत्वमपिधर्मः स्वीक्रियते। प्रत्ये
करूपेणचसंबन्धिता प्रतीत्यनुसारात्। संबन्धत्वेनचतस्यसंबन्धिद्वयनिरूप्यत्वंविशिष्टबुद्धिनियामकत्वंषष्ठीबो
ध्यताआधारत्वादिनियामकताच। तन्तुषुपटःसमवेतइतितद्विशिष्टबुद्धेस्त्वयाप्येवमेवोपपाद्यत्वात्। एतेनानेकेषुसं
बन्धत्वकल्पनापेक्षयासमवायतत्संबन्धत्वयोः कल्पनालघीयसीत्यपास्तम्। समवायनिरूपितमनेकेष्वनेकंसंब
न्धत्वंकल्प्यंनिरूपकभेदेनसंबन्धत्वभेदेसमवायेप्यनेकंतत् कल्प्यसमवायश्चेत्यतिगौरवात्। संबन्धिभेदेनसम
वायस्याप्यनेकत्वेऽतिगौरवाच्च। संयोगस्यतुनघटभूतलादिस्वरूपेणान्यथासिद्धिः। वियोगकालेपितत्स्वरूपताद्व
स्थ्येनविशिष्टबुद्धिप्रसङ्गात्। समवायस्थलेतुसतोः संबन्धिनोर्नकदापिवियोगइतिनदोषः। गुणगुण्यादेःसतः कदाप्य

वियोगेनलोकानांविवेकाग्रहात्।पटःशुक्लइति।भेदारोपेणतुपटेशुक्लइति।एवंचघटादिशब्दानांजातिशक्तत्वेपिजातिव्य
क्त्योर्विवेकाग्रहात्नवाहाद्यनुपपत्तिरित्यपास्तम्।कदापिसंबन्धस्यद्रव्यत्वादिनाऽप्रतीतेश्च।अतएवद्रव्यस्वरूपा
तिरिक्तसत्तादिजातिसिद्धिः।तदुक्तंकणादेन।द्रव्यत्वगुणत्वप्रतिषेधोभावेनव्याख्यातइति।भावःसत्तायथानद्रव्याद्या
त्मिकातथासमवायोपि।विलक्षणबुद्धिवेद्यत्वादितितदर्थः।ननुभाविविषयकशक्तिग्रहोबोधश्चकथम्।नसामान्य
लक्षणया।तदनुपपत्तेरुक्तत्वात्।नचजातिप्रकारकशक्तिग्रहस्यस्वाश्रयविषयकबोधजनकत्वेनतद्बोधनिर्वाहइतिवा
च्यम्।बोधकालेऽसत्त्वेनतस्यजात्याश्रयत्वाभावात्।सत्त्वेनाग्रहाच्च।तादृशेनतेनार्थेनशब्दस्यापिसंबन्धाग्रहाच्च।
नचसत्कार्यवादेकारणेकार्यस्यसूक्ष्मरूपेणसत्त्वान्नानुपपत्तिः।सूक्ष्मरूपेणसत्त्वमित्यस्यकारणरूपेणसत्त्वमि
त्यर्थात्तस्यमृदादिशब्दवाच्यत्वेपिघटादिशब्दावाच्यत्वात्।घटत्वाद्याश्रयत्वाभावात्।तद्ग्रहाभावाच्च।नचैवंश
ब्दार्थसंबन्धनित्यताहानिः।तदुत्पत्तिकालमेवशब्दसंबन्धेनविद्यमानयोःशब्दार्थयोरवियोगात्।तज्जातीयेव्यव
हारनित्यत्वाच्चनित्यत्वव्यवहाराक्षतेः।अतएवसतःसंज्ञासंबन्धइतिवृद्धिरादैच्सूत्रेभाष्यउक्तम्।सावर्णिकोनामम
नुर्भवान्भुविभविष्यतीत्यादौभावित्वेनबुद्धिस्थस्यभावित्वेनबुद्धिस्थस्यसंज्ञाबोधनमितिनदोषइतिचेन्न।

बोद्धस्यैवशब्दतोबोधेनाक्षतेः। घटंकुर्वित्यादेश्चबुद्धिस्थघटंबाह्यरूपेणकुर्वित्यर्थः। यदितुविधौलक्षणानुचिता।
किंचयत्रक्रियापिबुद्धिस्थैवोत्पाद्यत्वेनप्रतीयते कंसंघातयतीत्यादौतत्रबौद्धपदार्थेननिर्वाहोनान्यत्र। किंचास्व
त्तन्त्रस्यशाटकंवयेत्यादौबुद्धिस्थेएतत्सूत्रसंबन्धाभावादनुपपत्तिः। मार्ष्टीत्यादौबौद्धाकारस्यबाह्यशब्देविधाना
नुपपत्तिश्चेतिभाव्यते। तदाघटादिपदानांसत्पदव्यवहरिष्यमाणेलक्षणयायस्यजातस्यघटपदेनव्यवहारोभावी
तंकुर्वितितदर्थः। सत्कार्यवादाभ्युपगमाच्चनतत्रव्यवहरिष्यमाणत्वादेरनुपपत्तिः। यद्वाईदृशबोधस्यैवशाब्दवि
षयत्वंबोद्धसूत्रैतत्सूत्रयोर्भेदाग्रहादेतत्सूत्रसंबन्धोनानुपपन्नः। एवमेवबौद्धाकारस्यबाह्यशब्देनविधानम
प्युपपन्नम्। वचनमपिबोद्धमेवेतिबोध्यम्। इग्यणइतिसूत्रेभाष्येस्पष्टमिदम्। वृद्धिरादैजित्यादौतुसर्वेषांशब्दानां
नित्यत्वेनसर्वकारादिषुविद्यमानेषूक्तरीत्याशक्तिग्रहस्यबोधस्यचोपपत्तिः। शास्त्रंतुसाधुत्वान्वाख्यानमात्रमि
तिप्रकारान्तरमपिभाष्येउक्तम्। किंचविद्यमानघटेषुगृहीतशक्तिकस्यभाविघटोत्पत्त्यनन्तरंगृहीतशक्तिकघट
सादृश्यात्तत्रतच्शक्तिग्रहस्तद्बोधश्च। घटोनष्टइत्यादेरपितत्पदव्यवहृतोनष्टइत्यर्थोबोध्यः। इदंतुबोध्यम्। य
त्रकयाचित्संज्ञयोपस्थितमनेकमर्थमुद्दिश्यसंज्ञान्तरंबोध्यते। यथैचशब्देनैकारौकारावुद्दिश्यवृद्धिसंज्ञा। त

CC-0. In Public Domain. Digitization by eGangotri

त्रप्रदेशेषु स्पष्टः । [illegible]त्वेनैव तयोर्वोधः । अत एवानुदात्तङित इति सूत्रे ऽनुदात्तङितो ह्यात्मनेपदमित्यस्य तङानौ ह्यावर्थौ तत्र संख्यातानुदेशः प्राप्नोतीति यथासंख्यसूत्रभाष्योक्तं संगच्छते । अन्यथा न वानां तदर्थत्वेनात्मनेपदवत्त्वेन बोधे ऐच्त्वेन च ह्यावर्थावित्यस्यानुपपत्तिः स्पष्टैव । ऐच्त्वमैच्पदं जातिविशेषो वेत्यन्यत् । एवं च वृद्ध्यादिपदानां न पदं प्रवृत्तिनिमित्तम् । यत्र प्रवृत्तिनिमित्तान्तरासंभवस्तत्रैव पदस्य प्रवृत्तिनिमित्तत्वात् । यथा भादिपरे इत्यन्यत्र विस्तरः । एवं लिङ्गमपि प्रातिपदिकार्थः । न तु प्रत्ययार्थः । प्राधान्यापत्तेः । नागादिशब्देभ्यो विनापि प्रत्ययं तद्बोधाच्च । लिङ्गानुशासनस्य प्रकृतावेव दर्शनाच्च । अत एव स्वमोर्नपुंसकाद् ह्रस्वो नपुंसके नपुंसकस्य झलच इत्यादिसूत्राण्यपि संगच्छन्ते । तस्माच्छस इत्यत्र पुंसीत्यस्य पुंल्लिङ्गशब्दस्य प्रकृतित्वे इत्यर्थः । स्त्रियामित्यस्य च तत्र वर्तमानात् प्रातिपदिकादित्यर्थः । प्रातिपदिकार्थेति सूत्रे लिङ्गेत्यस्यापि तत्र वर्तमानादित्यर्थः । प्रथमाया लिङ्गार्थकताया अभ्युपगमे तु घटेऽनेन स्यादौ तत्प्रतीत्यनापत्तिः । ननु स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृत इत्यादिलक्षणलक्षितपुंस्त्वादेरचेतनेऽबाधात् खट्वादौ टाबाद्यनापत्तिः । किंच दारानित्यादौ नत्वं न स्यात् । तदर्थस्य पुंस्त्वाभावादिति चेन्न । अत्र भाष्यकारैः । सत्त्वरजस्तमसां प्राकृतगुणानां वृद्धिः पुंस्त्वमपचयः स्त्रीत्वं साम्यावस्थारूपस्थितिमात्रं नपुंसकत्वमिति । अत एव सामान्ये नपुंसकमित्युद्घोषः । उत्कर्षापकर्षसत्त्वेपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

साम्यावस्थारूपस्थितिमात्रविवक्षायांनपुंसकत्वमितितदर्थः।एतदवस्थात्रयस्यपदार्थमात्रेसत्त्वादिदंकेवलान्वयि।इयं
व्यक्तिरिदंवस्तुअयंपदार्थइतिव्यवहाराणांसर्वत्राप्रतिबद्धप्रसरत्वात्।अर्थनिष्ठंचतत्।तथाचभाष्यम्।एकार्थेशब्दा
न्यत्वाद्दृष्टंलिङ्गान्यत्वमवयवान्यत्वाच्चेति।पुष्यःतारकानक्षत्रमितिशब्दनानात्वदर्शनात्स्तनकेशाद्यतिरिक्तमेवलिङ्ग
मर्थनिष्ठम्।कुटीकुटीरइत्यादौरेफस्यावयवस्योपजननेलिङ्गभेददर्शनाच्चेतिअर्थइतिकैयटः।अतएवोपक्रमभाष्येरू
परसगन्धस्पर्शशब्दानांस्त्यानप्रसवौलिङ्गमित्युक्तम्।नहिरूपादयःशब्दगताःपुल्लिङ्गःशब्दइतितुवाच्यवाचकयोरभे
दोपचाराद्बोध्यम्।अर्थआद्यजन्तंवातत्।आत्मनिसर्वस्याध्यस्तत्वेनपरंपरयातत्रापिस्त्यानादिसत्त्वादात्माब्रह्मे
त्यादिव्यवहारोपपत्तिः।नचोपचयादेर्विरुद्धस्यनैकत्रसमावेशइतिएकस्यहित्रिलिङ्गतानापत्तिरितिवाच्यम्।कोश
भाष्यादिप्रामाण्येनविरोधस्यैवाभावात्।उपचयादीनांविवक्षैवचव्यवहारनिमित्तमितितेषांसंमतंनहिकश्चिदपिस्व
स्मिन्नात्मक्षणमप्यवतिष्ठतेवर्धतेवायावदनेनवर्धितव्यमपायेनवायुज्यतेइतिभाष्यात्क्षणिकत्वेपिनव्यवहारहानिः।
तत्रकश्चित्शब्दएकलिङ्गविशिष्टार्थेएवशक्तःकश्चित्लिङ्गद्वयविशिष्टेकश्चित्त्रितयविशिष्टेइतिलिङ्गानुशासनादि
भ्योनिर्णयम्।भावतत्त्वविदःशिष्टाःशब्दार्थेषुव्यवस्थिताः।यद्यद्धर्मंगतमितितत्तल्लिङ्गंप्रचक्षतेइतिहर्युक्तेस्तेषां

CC-0. In Public Domain. Digitization by eGangotri

प्रयोगादपिनिर्णयम्।अत्रश्लोकेशब्दार्थेष्वितिलिङ्गमितिचसर्वधर्मोपलक्षणम्।सप्तर्षयोऽथमनवःप्रजानांपतयस्त
था।सदाचारस्यवक्तारःकर्त्तारश्चमहीपतेइतिविष्णुपुराणात्।एवंमधुशब्देनपुंस्त्वनपुंसकत्वविशिष्टंतथामकरन्दा
दिकमेवोच्यते॥पुंस्त्वमात्रविशिष्टंतुचैत्रादिकमित्यपिततएवनिर्णयम्।एषुचपुंसादिशब्दानांरूढ्यादिवच्छास्त्री
यःसंकेतः।अवश्यंकश्चित्स्वकृतान्तआस्थेयइतिभाष्यात्।तत्रटिघुभादिवल्लघ्वीसंज्ञायुक्तेतिगुरुसंज्ञाकरणात्नत्वा
दिशास्त्रप्रवृत्तौलौकिकमपिलिङ्गंनिमित्तत्वेनाश्रीयते।पुंसादिसंकेतानांसंख्यासंज्ञायाइवार्थान्तरसंग्रहार्थंप्रवृत्त
त्वेपिअर्थान्तरनिरासार्थमप्रवृत्तेश्च।तत्रलौकिकेऽसंभवेशास्त्रीयएवतत्संभवेतुसामानाधिकरण्यसंबन्धेनशास्त्री
यविशिष्टलौकिकेनतुकेवललौकिकेनापिकेवलशास्त्रीये।हरिरपि।आविर्भावस्तिरोभावःस्थितिश्चेत्यप्यपायिनः।ध
र्मस्मूर्त्तिषुसर्वासुलिङ्गत्वेनव्यवस्थितादृत्याह।तत्रापिनेदंसूचितम्।अपायित्वंप्रतिक्षणनश्वरत्वम्।अतएवपशुनाय
जेतेस्यादौपुंस्त्वस्यविवक्षितत्वात्नस्त्रियायागइतिमीमांसकाः।तत्रपुंस्त्वस्येत्यस्यलौकिकपुंस्त्वस्येत्यर्थः।पश्वा
नतापुंपश्वानयेतिऋग्वेदेदर्शनेनपशुशब्दस्यनित्यपुमर्थकत्वाभावनिर्णयात्।छागोवामन्त्रवर्णादितिषष्ठान्त्याधि
करणन्यायेनच्छागरूपपशुविशेषग्रहणेऽद्वमन्त्रवर्णस्यलौकिकपुंस्त्वविवक्षायांतात्पर्यग्राहकस्यसत्त्वाच्च।छाग

स्यवपायाइतिमन्त्रेच्छागस्येत्यस्यच्छागभिन्नेइवत्रियामसंभवात्।अदन्तच्छागशब्दस्यलौकिकपुंस्त्वसमानाधिकरणपारिभाषिकपुंस्त्वविशिष्टेशक्तेः।यथासारस्वतोमेषावित्यत्रतद्धितप्रकृतिःशब्दःस्त्रीलिङ्गःपुल्लिङ्गोवेतिसंदेहेसंदिग्धेतुवाक्यशेषादितिन्यायेनएतद्वैदैव्यंमिथुनमित्यर्थवादादेकशेषेणद्वयोर्ग्रहणंनिर्णीयते।शास्त्रीयमपिलिङ्गंलौकिकलिङ्गवत्शाब्दबोधेभासते।तथानुभवात्।पुंस्त्वविशिष्टेघटोघटपदशक्यइत्यादिप्रकारेणशक्तिग्रहः।धर्मितावच्छेदकत्वेनधर्मितावच्छेदकसमानाधिकरणत्वेनविशेष्यत्वेनवाशक्तिग्रहविषयस्यबोधविषयत्वंफलबलादितिनातिप्रसङ्गः।एतेनशब्दानिष्ठंलिङ्गमित्यपास्तम्।उक्तभाष्यविरोधात्।अर्थतदन्वयसंबन्धगौरवाच्च।पुंयोगादाख्यायामित्याद्यस्वारस्याच्च।लौकिकेलिङ्गेर्थवृत्तितायाएवक्लृप्तत्वाच्च।नहिनपुंसकंनामशब्दोस्तिइतिस्वमोरितिसूत्रेभाष्याच्च।नपुंसककार्याभिधायित्वात्तद्भेदाच्चशब्दस्यनपुंसकत्वमितिहरिकैयटौइत्यन्यत्रविस्तरः।वैशेषिकास्तुपुंस्त्वादयोजातयः।तिस्रोजातयएवैताःकेषांचित्समवस्थिताः।अविरुद्धाविरुद्धाभिर्गोमनुष्यादिजातिभिरितिहर्युक्तेः।परस्परविरुद्धाभिर्गोमनुष्यादिजातिभिःसहपरस्परमविरुद्धाएताःसमवस्थिताइत्यर्थः।केषांचिद्वैशेषिकाणामितिहेलाराजः।अतएवइदंवस्त्वयंपदार्थःइयंव्यक्तिरितिव्यवहारः सर्वत्र।क्वचित्शब्दान्यत्वेनलिङ्गानिय

मोयथापुष्यतारकानक्षत्रमिति।क्वचिदर्थविशेषेणानियमः।यथामहत्वयुक्तहिमारण्ययोः स्त्रीत्वमेवहिमानी।अरण्यानी
त्ति।यथाचह्रस्वोपाधेःकुट्यादेःपुंस्त्वमेवेतिकुटीकुटीरइति।यद्यप्येतेशब्दाभिन्नाएवतथापिलाघवेनान्वाख्यानाय
हिमादिशब्दसामान्यमाश्रित्यार्थान्तरविषयशब्दानुशासनकरणादेवमुक्तम्।एतद्व्यञ्जकंचचेतनेषुस्तनकेश
वतीत्यादि।अचेतनेतुप्रयोगादवसितस्यास्यसमारोपाच्छब्दसंस्कारहेतुत्वम्।यथाआपोदाराइत्यादौनिश्चितेपि
वस्तुनएकत्वेधर्मभेदाश्रयबहुत्वाध्यवसायाद्बहुवचनंतथाबहिरसत्त्वेपितस्यखट्वादावारोपेणाशास्त्रीयकार्यम्।भा
ष्येसंस्त्यानप्रसवादिपदेनाप्युत्पत्तिनाशस्थितयोनित्यानामनित्यानांवाभावानामनोपाधिकेनिजेतत्त्वंस्थितिर्नपुंस
कमित्युच्यते।अवयवसाहित्येनोत्पत्तिःपुंस्त्वम्।विनाशोवयवानामपचयःस्त्रीत्वम्।उपाधिसंसर्गेणतुनित्य
स्याप्युत्पत्तिनाशावितिपुरुषश्चितिरित्याद्युपपत्तिः।एतच्चारोपितंसर्वदासर्वव्यवहारनिर्वाहकम्।अनित्यानामपिस
र्वावस्थानुवर्तमानंप्रत्यभिज्ञाविषयोयद्रूपंतदेवस्थितिः।एवंलिङ्गेष्वप्युपाधिसंसर्गेणेतत्कल्पितमितिस्त्रीत्वं
स्त्रीतेत्याद्युपपत्तिः।शब्दप्रमाणकानांशब्दार्थएवार्थइतिसर्वत्रद्रव्यगुणकर्मसामान्यादावपिलिङ्गजातियोगः
गोत्वादयोऽपिभावजातिसामान्यशब्दैर्लिङ्गोपाधयएवाभिधीयन्तेइतिसर्वत्रलिङ्गजातिव्यवस्थानतुगोत्वा

दिभिरविरोधः कुत इति चेन्न। भिन्नजातीयेष्वपि स्त्र्याद्याकारबुद्धेरनुगमात्। तदुक्तम्। हस्तिन्यां वडवायां च स्त्रीति बुद्धेः स
मन्वयः। अतस्तां जातिमिच्छन्ति द्रव्यादिसमवायिनीमिति। आदिपदेन गुणकर्मसामान्यादिः। अत्रापि कश्चिदेकलिङ्गः
कश्चिदुभयलिङ्ग इत्यादिनियमः कियत्पूर्ववदेवेत्याहुः। एतत्त्वन्योन्याश्रयग्रस्तम्। लक्षणबलेनैव शब्दार्थनिर्णये वक्तव्ये लक्षणे
कच लुप्कानां प्रयोगव्यवसितलिङ्गारोपाच्छास्त्रीयं टाबादि। न च व्युत्पत्तिग्रहपूर्वकं च प्रयोगात् तद्वक्ताय इति। बहुत्वं चा
वयवेषु धर्मेषु च सन्निहितमिति तदारोप इति तत्रोत्र वैषम्यं स्पष्टमेव। अतएव भाष्ये सांख्यमते नैव संस्त्यानप्रसवौ नि
रूपिताविति दिक्। एकं प्रातिपदिकार्थ इत्यस्य जातिव्यक्त्योर्मध्येऽन्यतरदेव तच्छक्यमित्यर्थः। द्विकमित्यस्य प्रथमावि
धायके जातिव्यक्तिरूपं द्विकं प्रातिपदिकार्थशब्देन गृह्यत इत्यर्थः। त्रिकमित्यस्य यथा कथंचिच्छक्तिग्रहविषयोऽपित्र
र्थ इत्यभिप्राय इत्याहुः। संख्याकारके तु प्रत्ययार्थ इत्येके॥ परे तु संख्यापि प्रकृतेरर्थः। दधिमधित्यादौ विनापि प्रत्ययं त
त्प्रतीतेः। अनन्तप्रकृतीनां शक्तत्वकल्पनागौरवं तु फलमुखत्वान्न दोषाय। यथा गृहीतशक्तिकस्य प्रकृतिमात्रादपि त
द्बोधाच्च। अतिप्रसङ्गस्तु व्यवहारानुसारेण तात्पर्यवशात् परिहरणीय इत्याहुः। केचित्तु कारकमपि तथेत्याहुः। केचि
त्तु संख्यामात्रे विभक्त्यर्थः। कारकान्तं चतुष्कं प्रातिपदिकार्थ इत्याहुः। तदुक्तम्। वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्त

CC-0. In Public Domain. Digitization by eGangotri

यः। यद्वा संख्यावतोऽर्थस्य समुदायोभिधायक इति। न च पञ्चानामपि प्रातिपदिकार्थत्वे प्रातिपदिकार्थप्रकारकबोधे सुब्
जन्योपस्थितिर्हेतुरित्या दिविलीयेतेति वाच्यम्। इष्टापत्तेः। जातिलिङ्गसंख्याकारकशक्तिविशिष्टस्य द्रव्यस्यैव बोधे
न सुबर्थविशेष्यकबोधस्य खपुष्पायमाणत्वात्। सर्वे चैते पक्षा अनभिहितसूत्रादौ भाष्ये स्पष्टाः। तत्र पञ्चकं प्रातिपदि-
कार्थ इत्येव ज्यायः। सर्वेषां विशेषणत्वानुभवादित्यलम्। ज्ञानमात्रे यथा शब्दभानं तथोक्तम्। केचित्तु शब्दार्थयोर्भेद एवे
तिपक्षेपि अनुभवबलात् ज्ञानसामा—न्यसामग्र्या एव शब्दभासकत्वकल्पनान्न दोषः यत्तु अर्थस्मृत व शब्दस्य ज्ञाने भा
नमिति। तन्न। प्रत्यक्षे शब्दभानानुपपत्तेः। अर्थज्ञानोत्तरं स्मृतस्य तस्य व्यवसाये भानासंभवात्। अनुव्यवसाये त्वेवं त
ज्ज्ञानमुपपादयितुं शक्यमित्याहुः। पटदिति कुर्वित्यादावनुकरणे भुवो वुगित्यादौ चानुकार्यशब्दस्वरूपमर्थः। आद्ये ध्व
निमयत्ववर्णमयत्वाभ्यामनुकार्यानुकरणयोर्भेदसिद्धेः। अन्त्ये अर्थपदार्थकत्वशब्दपदार्थकत्वाभ्यां भेदात्। पाणिनि
रप्याह। स्वं रूपं शब्दस्याशब्दसंज्ञेति। अत एव वृत्त्यार्थबोधकत्वरूपार्थवत्वात् प्रातिपदिकत्वे सुबाद्युत्पत्तिः। तदुक्तं मतो
च्छ इति सूत्रे भाष्ये योसावाम्नायेऽस्य वामशब्दः पठ्यते स छप्रत्ययप्रकृतेरस्य वामशब्दस्यास्य वामीय इत्यादौ पदार्थः
। अत एव प्रातिपदिकत्वात् छसिद्धिरिति। क्वचित्तु अनुकरणं सादृश्येनोपस्थापकं तथोपस्थितस्यापि शाब्दबोधेऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्वयस्तात्पर्यवशात्। वृत्तिज्ञानस्य चानुकरणाजन्यशाब्दत्वमेव कार्यतावच्छेदकम्। अतएव भू सत्तायामित्यादौ विभक्त्यनुत्पत्तिः। वृत्त्याबोधकत्वरूपार्थवत्त्वाभावात्। तदप्युक्तं तत्रैव कैयटेन अनुकरणतु व्युत्क्रमेणाप्युच्चार्यमाणसादृश्यादनुकार्यस्य प्रत्यायकं भवतीति। भाष्येपि वेदस्थोनुकरणस्य पदार्थ इति सिद्धान्तिनोक्ते किमनयोरन्यत्वमिति प्रश्ने ओमित्याहाम्नायशब्दानां स्वरवर्णानुपूर्वीदेशकालनियतत्वादित्येवोक्तं न त्वर्थभेदादित्युक्तम्। तस्य क्वचिदभावेन न स तत्र हेतुरिति तदाशयः। यद्यप्याम्नायशब्दानभ्यासे केचिदाहुरनर्थकान्। स्वरूपमात्रवृत्तौ स्वशिष्याणां प्रतिपादने इति। तथाप्यर्थे तात्पर्याभावमात्रम्। तत्र देशकालादिनियमस्तु तत्राप्यस्त्येवेति बोध्यम्। केचित्तु भू सत्तायामित्यादिनिर्देशात्क्वचिद्विभक्त्यनुत्पत्तिः। सादृश्यादर्थोपस्थितिस्तु न॥ किं तु वाचकसादृश्याद्व्युत्क्रमेणोच्चारितशब्दादपि बोधः। प्राग्दीव्यत इति सूत्रे भाष्येप्युक्तम् एकदेशविकृतमनन्यवदिति तद्वदित्यर्थस्तेन तद्वत्तदप्यर्थोपस्थापकम्। अतएव दीव्यतशब्देनैव दीव्यतिशब्दार्थोपस्थितिं वदन्ति। गामुच्चारयेत्यादेश्च गोशब्दमुच्चारयेत्यर्थः। उच्चारयेत्येतत्समभिव्याहारात् शब्दपरता। तत्परत्वेप्यात्वादिप्रवृत्तिरस्त्येवेत्यन्यत्र प्रपञ्चितम्। तत्र स्वरूपमित्यनेनोभयोरर्थशब्दयोः शक्तिबोधनेप्यर्थे कार्यस्य बाधेन शब्दस्य विशेष्यतायथाग्नेर्ढगित्यादौ। अन्यथा विशेषणता शब्दस्य वि

CC-0. In Public Domain. Digitization by eGangotri

श्रोष्यत्वे चार्थो विशेषणम्। वृद्धिरादैज्इत्यादावपि संज्ञापदानां परपरता। वृद्ध्यादिपदाभेद् आदैजादिपदार्थे विधेयः आदैचां ज्ञातत्वात्। एतेन विपरीत उद्देश्यविधेयभावः परास्तः। प्रसिद्धवृद्धिपदार्थाभेदस्य तत्र बाधाच्च। सर्वनामानीत्यादौ महासंज्ञाबलादर्थपदोभयपरता। गणपठितत्वसर्वादिषु सामानाधिकरण्यसंबन्धेन सर्वार्थवाचकत्वरूपार्थविशिष्टसर्वनामपदाभेदो विधेयः। गणपठितत्वं च गणपठितशब्दबोध्यत्वम्। न च ज्ञाने सर्वत्र शब्दभाने सर्वपर्यायाणां भानापत्तिर्विनिगमनाविरहाद् इति वाच्यम्। शाब्दे उपस्थितस्यैव पदस्य भानेनादोषात्। प्रत्यक्षादावुपस्थितयावज्ज्ञाने बाधकाभावाच्चेति दिक्। केचित् सर्वशब्दानां तत्तच्छब्दस्वरूपमेव प्रवृत्तिनिमित्तम्। अथ कस्माद् गौरित्युच्यते गौरित्येव हि गौर्गविवर्ते तद्सौ विथक्याइति निरुक्तात्। यद्वा स्वरूपं जात्यादि चेत्युभयं प्रवृत्तिनिमित्तमित्याहुः। अनुकरणत्वं च शब्दमात्रतात्पर्यकोच्चारणविषयत्वम्। पदार्थविपर्यासकृदिति समभिव्याहारे गौरित्याहेत्यादौ। नवेति सूत्रभाष्योदाहृते नानुकरणत्वम्। विशेषणतयार्थभाने न शब्दमात्रतात्पर्यकत्वाभावात्। अत एव गौ शनेयेस्य भिप्रायेण गौरानेयेति परेण प्रयुक्ते इतरः सम्यगश्रुत्वा परं पृच्छति किमाहेति तेन गौरित्याहेत्युक्ते तत एवार्थबोधात् प्रवर्तते। स्मृताद्बोध इति तु न युक्तम्। उच्चारितस्यैव बोधकत्वमिति सिद्धान्तात्। अनुकरणत्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्योतकोपिकदाचिद्इतिः।अनुकरणंचानितिपरमितिसूत्रात्।अनुकरणेतुनविशेष्यतयानापिविशेषणतयार्थस्यभानम्।
यथास्यवामीयमित्यादाविति बोध्यम्। विष्णुर्नारायणःकृष्णइत्यादौ कोशेविष्ण्वादिशब्दाअर्थपराःशक्तिग्रहस्तुप
दत्वहेतुकानुमानेनसामान्यतएवपदप्रकारकः।एवंचविष्णुपदार्थोभिन्नःकृष्णपदार्थइत्यादिक्रमेणबोधः।विनाय
कोविघ्नराजेत्यादौद्वन्द्वविषयेएतेपदार्थाःविनायकपदार्थाभिन्नाइतिबोधः।सर्वपर्यायद्वन्द्वात्मकेकोशेएतेपदार्था
अभिन्नाइत्यध्याहारेणबोधः।एतत्पदममुकवाचकमितिशक्तिग्रहस्तुस्वस्वप्रसिद्धपदार्थमादायतत्तत्पुरुषस्य
नियमतःपश्चान्मनसैव।अतएवतृतीयाध्यायतृतीयपादेशंकरभगवत्पादैरुद्गीथाधिकरणेसामानाधिकरण्यं
चतुर्धा।अध्यासेनापवादेनैकत्वेनविशेषणत्वेनच।अध्यासेनयथाद्यंप्रतिमाविष्णुरिति।नहितत्रविष्णुबुध्याप्रतिमाबु
द्धिर्निवर्ततइतिनायमपवादः।अपवादोयथाइदंरजतमिति।अत्रहिपश्चाद्भाविन्यायथार्थयाशुक्तिबुद्ध्यास्याबुद्धे
र्निवृत्तेरपवादसामानाधिकरण्यमितिव्यवहारः।एवंचाध्यासस्यनिरपवादत्वसापवादत्वाभ्यांद्वैविध्यमुक्तम्।एक
त्वेनयथाद्विजोत्तमोब्राह्मणोभूदेवइति।नेदंलौकिकंवाक्यंलोकव्यवहारेएकेनैवविवक्षितार्थसमर्पणादन्यस्यान
र्थक्येनपर्यायाणांसहप्रयोगाभावात्।तस्मात्कोशरूपमेवेदम्।एतेनकोशस्थपदानांपदपरत्वमित्यपास्तम्।विशेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णत्वेननीलमुत्पलमित्यादौ॥अतएवनामन्विते समानाधिकरणेइतिसूत्रेऽध्येयेदेविसरस्वतिइडेकाव्येविद्व्येएतानि
तेध्येयेनामनीत्यत्रसमानाधिकरणत्वमयुक्तमविद्यमानत्वनिषेधमाशङ्क्यसामान्यविशेषवचनत्वाभावमाश्रि
त्यसमाहितम्।अन्यथैकार्थबोधकत्वरूपसामानाधिकरण्यस्याप्यत्राभावात्तदसङ्गतिःस्पष्टैव।एकशेषस्तुन।तत्त
च्छब्दस्वरूपस्यसम्यग्बोधानापत्तेः।कोशस्यचानेकपर्यायाणांस्वरूपबोधपूर्वकमेवार्थबोधनेतात्पर्यात्।तदुक्तम्।
भेदाख्यानायनद्वन्द्वोनैकशेषोनसंकरइति।भेदाख्यानायेत्यस्यलिङ्गभेदाख्यानायस्वरूपभेदाख्यानायचेत्यर्थः।लिङ्ग
भेदाख्यानायखंनभःश्रावणोनभाइत्यस्यस्थानेखश्रावणौतुनभसीइतिनकृतम्।विष्णुर्नारायणइत्यादौस्वरूपभे
दाख्यानायनैकशेषःकृतः।तथापूर्वपरतएकलिङ्गानांमध्येभिन्नलिङ्गपाठरूपःसंकरोपिनकृतः।यथास्तवःस्तोत्रंनु
तिस्तुतिरित्येवकृतंनतुस्तुतिःस्तोत्रंस्तवोनुतिरिति।कृतोत्रभिन्नलिङ्गानामनुक्तानांक्रमादृतेइत्यस्यानुक्तानांस्थाना
न्तरानिर्दिष्टानांभिन्नलिङ्गानांद्वन्द्वएकशेषश्चनकृतोऽन्येषांतुकृतएवयथाप्सरोयक्षरक्षोगन्धर्वकिन्नराइति।मातापित
रौपितराविति।भिन्नलिङ्गानामितिभिन्नस्वरूपाणामप्युपलक्षणम्।विरूपाणामपिसमानार्थानामितिचैकशेषप्राप्तिः।
अतोऽर्थपरतैवकोशेऽनुक्तानांक्रमादृतेइत्यस्यवर्गाःपृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिरित्युदाहरणम्।तत्रद्वन्द्वसंक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रौकृतावेवेसलम्। सर्वशब्दस्यबुद्धिविषयोयावत्त्वावच्छिन्नःसमूहोर्थः। यावत्त्वमनेकत्वद्वित्वभिन्नसंख्याकृतपरि
च्छेदवत्त्वम्। तत्रसमूहस्योद्भूतावयवभेदत्त्वेसर्वेघटाइति। अनुद्भूतावयवभेदत्वेएकवचनंसर्वओदनोभुक्तइत्यादेः
सर्वावयवकइत्यर्थः। अवयवगतसर्वत्वस्यावयविनिआरोपोबोध्यः। बुद्धिविषयत्वेनबुद्धिविषयेतदादेःप्रवृत्तिः। अत
एवतस्यापत्यमितिसूत्रभाष्येसर्वनामनिर्देशाविशेषासंप्रत्ययःसामान्यनिर्देशादितिशङ्कितम्। तस्यापत्यमित्यर्थे
प्रत्ययइतिसूत्रार्थेतस्येतिनिर्देशात्सामान्यवाचिनस्तच्छब्दादेवप्रत्ययःस्यान्नतुउपग्वादेरितिशङ्कार्थःकैयटः। सा
मान्यवाचिनउत्पत्तेरसंभवाद्विशेषवाचिनउत्पत्तिरितिसिद्धान्तितम्। अपत्यशब्दस्यसंबन्धिविशेषाकाङ्क्षतया
तस्यापत्यमित्युक्तावप्याकाङ्क्षायाअनिवृत्तेस्तेनतद्विशेषणायोगाद्विशेषवाचिनएवोत्पत्तेः। यदाप्रकरणात्तदाद
योपिविशेषेवर्तन्ते तदातस्मादपिप्रत्ययस्तादायनिरितीतिकैयटः। सामान्यरूपेणैवविशेषविशिष्टस्यभानंप्रकरणा
दिवशादितितदर्थः। विशिष्टेपिबुद्धिविषयत्वसत्त्वात्। एवंचतस्यापत्यमित्यादौतच्छब्दोपादानमपत्याद्यर्थसंब
न्ध्युपलक्षणमितितात्पर्यम्। तदुक्तंतस्येदमितिसूत्रेकैयटेन। षष्ठ्यन्तमात्रंतस्येतिप्रकृतित्वेनविवक्षितंतत्प्रति
योगिमात्रंचप्रत्ययार्थत्वेन। यत्त्वपरंलिङ्गसंख्याप्रत्यक्षत्वपरोक्षत्वादिकतदविवक्षितमिति। एतदभिप्रायेणै

वस्तूत्रोपक्रमेतस्येदमित्यपत्येपिसिद्धमित्युक्तम्। शेषइतिसूत्रेचभाष्येउक्तंतस्येदंविशेषाह्यतेऽपत्यंसमूहोनिवासइति। तस्येदमितिसूत्रेइदंपदार्थप्रवृत्तिनिमित्ताश्रयाव्यक्तिविशेषाएतेइतितदर्थः। अतएवतस्मिन्नितिसूत्रेभाष्यंसर्वनाम्नानिर्देशःक्रियतेसर्वनामचसामान्यवाचि। तत्रसामान्येनिर्दिष्टेविशेषाअपिउदाहरणानीति। व्यापकंसामान्यंव्याप्योविशेषः। तत्त्वंचविवक्षाधीनम्। अतएवगोकृष्णयोःपरस्परंसामान्यविशेषभावइतिच। तत्रसामान्यवाचीत्यनेनसकलसाधारणसामान्यमेवप्रवृत्तिनिमित्तमित्युक्तम्। नचकाव्यप्रकाशेऽनेकार्थस्यशब्दस्यवाचकत्वेनियन्त्रितेइत्येतदुदाहरणावसरेतावन्मात्ररक्तनिकेत्यादावभिनयेनशक्तिसंकोचइत्युक्तंतद्विरुध्येत। नदादीनांत्वद्रीस्यानानार्थत्वाभावादितिवाच्यम्। शक्यतावच्छेदकानेकत्वइवशक्यतावच्छेदकव्याप्यधर्माणांनानात्वेप्यनेकार्थत्वात्। परेतुघटमानयेत्याद्युक्तेतैलघटजलघटघृतघटानांमध्येतत्तत्प्रकरणेतत्तद्घटानयनमतएववाक्याःशर्कराउपदधातीत्यादौतेजोवैघृतमितिलिङ्गादक्ताइत्यस्यघृतसाधनाञ्जनपरत्वमितिहेलाराजादिभिरुक्तम्। हरिणाशब्दार्थस्यानवच्छेदेइत्येवोक्तम्। एवंचसंयोगादिशक्यतावच्छेदकानेकत्वएवनिर्णायकमित्यप्युक्तम्। प्रकाशेऽनेकार्थस्येत्युक्तिस्तुतत्रद्वितीयार्थव्यञ्जनायाःस्फुटतयाव्यञ्जना

निरूपणप्रस्तावादित्याहुः।यत्तुयद्यत्तत्पदंयादृशयादृशधर्मावच्छिन्नविषयकबुद्ध्याप्रयुज्यतेतत्तत्पदंबुद्धिविषय
तावच्छेदकत्वोपलक्षिततादृशतादृशधर्मविशिष्टेशक्तमितिशक्तिग्रहः।बुद्धिविषयत्वस्यापितदुपलक्षितत्वात्कदाचि
त्तेनरूपेणापिबोधः।अतएवतत्पदात्कदाचिद्घटइतिकदाचिज्जातिमानितिकदाचिज्जातिमान्घटइतिकदाचिद्बुद्धिस्थ
इतिबोधः।तादृशार्थनिरूपितशक्तिरेकैव।हर्यादिपदशक्यतावच्छेदकानांतुनतेनानुगमः।तेष्वेकस्यनानारूपेण
बोधनानुभवात्।अतएवतेभ्योनकदाचिदपिजातिमान्हरिरित्यादिक्रमेणबोधइति।तन्न।तेषांतेषांधर्माणांविशिष्य
ज्ञानाभावेतत्तद्रूपेणशक्तिग्रहाभावात्तथाबोधासंभवात्।ममतुबुद्धिविषयत्वेनतदाश्रयेशक्तिग्रहान्नदोषः।सर्वस्या
पिबुद्धिविषयत्वेनैवबोधादितिदिक्।अत्रतदिदमादीनांपर्यायित्ववारणायपरोक्षत्वाद्यपिशक्यकोटौनिवेशनीयम्।एवं
यच्छब्दशक्यकोटावुद्देश्यत्वंतदोविधेयत्वमिति।इदंतुबोध्यम्।तत्पदप्रतिपाद्यतयावक्तृबुद्धिविषयउद्देश्योयत्पदार्थो
तस्तेनार्थप्रत्यायनेनियमतस्तत्पदापेक्षा।तत्रोत्तरवाक्यगतयच्छब्दस्यतच्छब्दाक्षेपसमर्थत्वेननतत्रतच्छब्दोपादाना
पेक्षा।यथासाधुचन्द्रमसिपुष्करैःकृतंमीलितंयदभिरामताधिकइत्यादौ।एवंतत्पदंयत्पदप्रतिपाद्यतयावक्तृबुद्धिविषये
विधेयेशक्तंतत्रप्रसिद्धानुभूतप्रक्रान्तार्थकतच्छब्दस्ययच्छब्दाक्षेपसमर्थत्वान्नतत्रयच्छब्दोपादानापेक्षेतिका॰

न्यप्रकाशादौ विस्तरः। तत्रेदमेतदोः प्रत्यक्षेऽदसो व्यवहिते शक्तिः। तदुक्तमिदमस्तु सन्निकृष्टे समीपतरवर्ति चैतदो रूपम्
॥ अदसस्तु विप्रकृष्टे तदिति परोक्षे विजानीयादित्यलम्। एतच्च तस्येदमिति सूत्रे भाष्ये स्पष्टम्। परे तु परोक्षत्वाद्येव तदादेः श
क्यतावच्छेदकं प्रकरणादिवशाच्च तत्तद्विशेषबोधः। वक्तृश्रोतृबुद्धिस्थत्वमेव हि प्रकरणम्। एतावतैव सर्वनाम्नां बुद्धिस्थप
रामर्शकत्वमिति प्रवादः। तेषां प्रकरणज्ञानं [illegible] सर्वथा विशिष्य बोधाजनकत्वात्। अतएव तस्यापत्यसूत्रस्थ पूर्वोक्तशङ्
कापरभाष्यस्थं सामान्यनिर्देशादिति प्रतीकमुपादाय तस्येति सामान्यनिर्देशात् तच्छब्दादेव सामान्यवाचिनः प्रत्ययः
स्यादिति कैयटेनोक्तम्। अन्यथा त[illegible]दादिभ्य इति वदेदित्याहुः। केचित्तु एवं युष्मदः संबोध्यत्वमस्मद उच्चारयितृत्वं प्र
वृत्तिनिमित्तम्। तेन रूपेणैव बोधानुभवात्। ॥ देव्युवाच। मया त्वयीह तेनैव गर्जिष्यन्त्याशु देवता इत्यादावृषिवाक्योच्चार
णकाले आनुपूर्वीसामान्ये नैव [illegible]स्याप्युच्चारणाद्देवीमहिषासुरयोस्तद्वाक्यप्रयोक्तृत्वसंबोध्यत्वप्रतिसंधानादेव
ताभ्यां देवीमहिषासुरप्रतीतिः। अनुवादक[illegible]कल्पितत्संबोध्ययोस्तु न प्रतीतिस्तात्पर्याभावात्। मौनिनापि मन्दोच्चारण
पूर्वकमेव लिखनेन तल्लिखितादिपदादुच्चारयितृत्वेन प्रतीतिरविरुद्धा। उच्चारणमनुसंधानोपलक्षणं वा इत्याहुः। परे तु
क्रियाविनियोगफलकमभिमुखीकरणं संबोधनम्। तद्विषयत्वं च संबोध्यत्वम्। न चैतत्त्वं पचसीत्यादौ प्रतीयते। अभि

ल· मं· सुखीभूतेपितथाप्रयोगात्।तस्मात्त्वयोक्तुरहंकारानास्पदचेतनत्वेनयुष्मदःशक्तिः।स्पष्टंचेदंपुरुषसमुद्देशे हरिग्रन्थे
७५ इत्याहुः।नन्वेवंसतियुष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितिशांकरभाष्यानुपपत्तिः
।तद्भाष्याद्धियुष्मदोजडेशक्तिरस्मदश्चेतनेइतिस्पष्टंतद्विदाम्।तवतूभयोरपिचेतनशक्तत्वेनतदसङ्गतिरितिचेन्न।तत्त्व
ज्ञश्रुत्यातथोक्तेरित्याहुः।किंपदस्यजिज्ञासाविषयेशक्तिः।यत्रकिंपदार्थान्वयस्तत्रवासदन्वयस्तद्वृत्तिधर्मव्याप्यधर्मा
वच्छिन्नोजिज्ञासाविषयत्वेनतच्छक्यः।स्वीयजिज्ञासाज्ञापनायकिंपदघटितवाक्यप्रयोगात्।अतएवकःपचतीत्यादि
प्रश्नेविप्रःपचतीत्येवोत्तरंनतुप्रमेयंपचतीति।जिज्ञासाविषयकर्तृकःपाकइतिप्रश्नार्थः।तद्विषयजिज्ञासायास्तदिच्छावि
षयीभूतज्ञानजनकादुक्तोत्तरान्निवृत्तिः।कोब्राह्मणःपचतीतिप्रश्नेचचैत्रःपचतीत्येवोत्तरंनतुमनुष्यःपचतीतिअयंकइ
त्यादौसमभिव्याहृतपदोपस्थाप्यधर्मावच्छिन्नोद्देश्यतानिरूपितविधेयतावांस्तद्व्याप्यविशेषधर्मावच्छिन्नोजिज्ञासाविष
यतयाशक्यः।अतएवतत्रायंब्राह्मणइत्येवोत्तरम्।एवंप्रश्नवाक्यात्समभिव्याहृतधर्मव्याप्यधर्मप्रकारकज्ञानमिष्टसाधन राम
मितिज्ञानजन्यतादृशज्ञानंमेजायतामितीच्छाज्ञायते।उत्तरेणचविप्रत्वादिरूपविशेषधर्मावच्छिन्नप्रकारताशालिज्ञा
नोत्पत्त्यातन्निवृत्तिः।इष्टसाधनताज्ञानेतुतादृशधर्मांशेविशेषधर्मानवच्छिन्नप्रकारताशालीन्येवज्ञानानिविषयः।एवं ७५

प्रश्नवाक्येयत्प्रधानंतत्समानलिङ्गवचनशब्देनैवोत्तरंयथाकथंचित्प्रश्नविषयजिज्ञासानिवर्त्तकम्।एवंचकेशिष्याअ
स्येतिप्रश्नेकठाइत्येवोत्तरंनतुकठइति।एवंकिंशिष्योयमितिबहुव्रीहिसमासेनप्रश्नेकठइत्येवनतुकठाइति।तस्यक
ठत्वेशिष्याणांकठत्वमार्थंप्राप्तमित्यार्थमिदमुत्तरमिति अनेकमन्यपदार्थेइतिसूत्रेभाष्येस्पष्टम्।मुखंकिमिन्दुरि
त्यादावव्ययकिमोवितर्कोर्थः।वितर्कश्चसंभावनात्मकंज्ञानम्।इन्दुप्रकारकसंभावनाविशेष्यंमुखमित्यर्थः।संभाव
नाप्रयोजकाह्लादकत्वसाधर्म्यप्रतीतिस्त्वर्थात्॥धनमिदंकिंचैत्रस्येत्यादेश्चैत्रस्वामिकत्वेनसंभावनाविशेष्यं
धनमित्यादिरर्थः।किंगौरित्यादौकुत्सार्थकोपिसः।स्वपदस्यतद्घटितवाक्यघटकक्रियान्वितसमभिव्याहृतप
दोपस्थाप्येशक्तिः।तेनचैत्रस्यभ्रातास्वपुत्रंपश्यतीत्यादौस्वशब्देननचैत्रप्रतीतिः।स्वपुत्रदर्शिनंचैत्रंमैत्रःपश्यती
त्यादौतात्पर्यवशाच्चैत्रपुत्रमैत्रपुत्रान्यतरप्रतीतिः।कलशेनिजहेतुदण्डजइत्यादावध्याहृतक्रियान्वयिनःकलश
शब्दस्यस्वशब्दसमानार्थकनिजपदेनप्रतीतिः।सर्वनाम्नामुत्सर्गतःप्रधानपरामर्शित्वमित्यस्यप्रधानान्वयिप
रामर्शकत्वमित्यर्थः।एवमात्मीयधनज्ञातिवाच्यपिस्वशब्दः।ऐश्वर्यवाच्यपिस्वामीतिप्रयोगविषयइत्यन्यत्र
विस्तरः।एकशब्दःकेवलेपिशक्तः।कैवल्यंद्वितीयरहितत्वम्।द्वितीयशब्दश्चसजातीयेसहायेरूढः।एवंच

तत्तत्क्रियाकर्तृत्वादिविशिष्टसजातीयराहित्यं कैवल्यम्। अयमेकोत्र भुङ्क्त इत्यादावेतद्देशाधिकरणकभोजनकर्तृसजातीयरहितो भुङ्क्त इत्यादिरीत्या बोधः। अतएवैकाकी हयमारुह्य जगामेत्यादौ नानुपपत्तिः। हयस्य द्वितीयस्य सत्त्वेपि तस्य सजातीयत्वाभावात्। एवं योद्धृत्वेन सजातीयाभावे श्वादिपालकमनुष्यसत्त्वेपि एको रणं गच्छतीत्युपपद्यत इति दिक्। दिग्वाचकपूर्वादिशब्दानां स स शब्दः प्रवृत्तिनिमित्तम्। एकस्या अपि दिश उपाधिभेदात्तत्तच्छब्दवाच्यता। तत्र मध्याह्नसूर्यसंयोगवान्देशो मध्यं ततउदयाचलपर्यन्तदेशोपाधिका पूर्वा दिक्। ततोस्ताचलपर्यन्तदेशोपाधिका प्रतीची। तत एवमध्याह्नसूर्यसंमुखयावद्देशोपाधिकोदक्। तत्पृष्ठयावद्देशोपाधिका दक्षिणा। मध्याह्ने सूर्यस्योदङ्मुखत्वात्। अतएवान्तर्भाविताऽवधयो दिक्शब्दाः। देशादौ तु शब्दोपात्तावध्यपेक्षा इति हेलाराजः। दिक् चेदमस्मादित्यवध्यवधिमद्भावप्रयोजिकोत्क्षेपणादिक्रियाभेदप्रयोजिका ऋजुवक्रत्वादिव्यवहारप्रयोजिका द्रव्याणां परापरव्यवहारप्रयोजिका च शक्तिः। एकदिक्कमवयवप्रसारणमृजुता। अनेकदिक्कं तद्वक्रता॥ पूर्वमभूत् परतो भविष्यतीति क्रियापौर्वकाल्यमेव कालकृतमिति न दिक्कालशक्त्योरैक्यम्। नापि तयोः स्वतन्त्रद्रव्यत्वं परोपाधितयैव सदा प्रतीतेः। सर्वत्र च तत्कार्यदर्शनात्तयोर्विभुत्वम्। सर्वत्र स्वकार्यसंपादकत्वमेवामूर्तानां विभुत्वम्। देशानां पूर्वपरादिव्यवहारोपि दिक्

कृत एव। पूर्वदिगादिस्थानां तेषां पूर्वादित्वात्। यस्त्वभिमुखः पूर्वः पृष्ठस्थः पश्चात्। हस्त दक्षिणो हस्त वाम इत्यादिव्यवहारः स न दिगपेक्षः। प्रत्यङ्मुखस्य यत्पश्चाद्देशस्थं तस्य प्राङ्मुखत्वे पूर्वदेशस्थत्वेन प्राङ्मुखोऽन्नानि भुञ्जीतेत्यादावन्यवस्थाप त्तेः। किंतु तत्र वक्तृसंमुखदेशत्वाद्येव पूर्वादिप्रवृत्तिनिमित्तम्। एवं तत्तदवधिकोदयाचलास्ताचलसन्निहितत्वमपि देशवृत्ति पूर्वपरशब्दयोस्तत् पूर्वदिगभिमुखस्थितस्य दक्षिणवामहस्तसन्निहितत्वमपि देशवृत्ति दक्षिणोत्तरशब्दयोस्तत्। पूर्वाध्युषितत्वं पूर्वार्जितत्वमपि पूर्वशब्दार्थः। पूर्वस्मिन्देशे वसतीत्यादौ तथा प्रतीतेः। सर्वं चेदं हरिग्रन्थे हेलाराजीयग्रन्थे च स्पष्टम्। विंशत्यादयः स्वभावात्संख्यासंख्येये च। तेन विंशतिर्गवां विंशतिर्गाव इति च॥

प्रदाप्यते समुदायवचनात्तदापि समूहस्यानुद्भूतावयवत्वे गवामिति षष्ठी उद्भूतावयवत्वेन संघसंघिनोरभेदविवक्षायां सामानाधिकरण्यमुभयत्रापि एकवचनान्ताः। अन्त्येपि शब्दशक्तिस्वभावान्नियमेन धर्मनिष्ठसंख्यायां धर्मिण्यारोपेणैव प्रयोगः। वेदाः प्रमाणमितिवत्। ते चा नवतेः स्त्रियाम्। गावो धनमित्याद्यपि एवमेव। धर्मनिष्ठसंख्यानारोपे तत्र गावो धनानीत्यपीति विशेषः॥ संख्यापरत्वं च द्रव्याद्भेदेन संख्याबोधनं यथाद्ये तत्रापि गवां विंशतिमानयेत्यानयनादिक्रियाद्रव्ये एव धर्मे तस्या असंभवात् धर्मधर्मिणोरभेदाद्वेति पङ्क्तिविंशतीति

CC-0. In Public Domain. Digitization by eGangotri

सूत्रभाष्योक्तरीत्याबोध्यम्।अभेदेनबोधनेसंख्येयपरत्वमितिबोध्यम्।एकशेषेणविंशतीविंशतयइत्यादीष्टमेव।द्रो
णप्रस्थादिशब्दाश्चेयत्ताविशेषावच्छिन्नपलादिपरिच्छिन्नधान्यादिपरिच्छेदकत्वसमानाधिकरणजातिविशेषरू
पद्रोणत्वाद्यवच्छिन्नेशक्ताः।प्रवृत्तिनिमित्तंतुद्रोणत्वाद्येवपरिच्छेदकत्वंतुलिङ्ग·वत्तत्समानाधिकरणमेवप्रातिप
दिकार्थसूत्रेभाष्येध्वनितमेतदित्याद्यूह्यम्। गोशब्दस्यस्त्रीत्वसमानाधिकरणंपुंस्त्वसमानाधिकरणंचगोत्वंश
क्यतावच्छेदकमितिनानार्थोयम्। तत्राद्यंप्रसिद्धम्। अन्त्यंतात्पर्यग्राहकसापेक्षंबोध्यम्।अतएवगोरित्ये तन्मा
त्रात्स्त्रीव्यक्तीनामेवबोधःस्वरसतः।अतएवगोबलीवर्दमित्यादौसामान्यविशेषभावाभावाद्द्वन्द्वःसिद्धः।अन्त्य
स्तुगोवाहिकइत्यादौ।एतान्गाश्चतुरोबलीवर्दान्पश्येत्यादौप्रथमयोरितिसूत्रभाष्योदाहृतेचएतदेवाभिप्रेत्य त्य
दादीनीतिसूत्रेसामान्यविशेषवाचिनोर्द्वन्द्वोनेतिवक्तव्यमेवेहिशूद्राभीरंगोबलीवर्दंतृणोलपमित्यादौनस्यादि
तिशङ्कायामाभीराजात्यन्तराणिउलपमित्यपांनामधेयमित्यादिनासामान्यविशेषभावाभावउक्तोभाष्ये।गोबली
वर्दमित्यत्रगावउत्कालितपुंस्कावाहायचविक्रयायचस्त्रियएवावशिष्यन्तेइत्युक्तम्।वाहाद्यर्थंपृथक्कृतपु॰
रुषाः स्त्रियएवगोशब्दव्यवहार्यत्वेनावशिष्यन्तइतितदर्थः।लोकव्यवहारेप्येवमेवेत्यलम्। धेनुशब्दस्यधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नकर्मत्वंप्रवृत्तिनिमित्तंधेट्पानेइत्यतः कर्मणिनुप्रत्ययसत्वात्। अतएवावीधेनूइत्यादिप्रयोगाःसंगच्छन्ते। हवि
र्धान्यास्मिधेनुसुइतिभागवतप्रयोगश्च। हविर्धानीगौः। एतेनगोत्वसमानाधिकरणंधानकर्मत्वंप्रवृत्तिनिमित्तमित्य
पास्तम्। नचोक्तप्रयोगेलक्षणा। शक्त्यैवोपपत्तेः। नचाथैषभूस्त्रिवृद्देवसर्वस्तस्यविश्ववत्यस्तोत्रियाधेनुर्दक्षिणेअ
त्यत्रद्यावापृथिवीभ्यांधेनुमालभेतेत्यत्रचगवामेवप्रतीतेर्नस्यादितिवाच्यम्। अपशवोवान्येगोश्वेभ्यइतिश्रुतेः
प्रशस्तत्वेनतत्रगवामेवप्रतीतेः। वडवानांतुनदक्षिणात्वेभागित्वाद्गवामितिजैमिन्युक्तेः। भागित्वमुपकार
कत्वंदक्षिणाहिऋत्विगुपकारार्थानचताभिर्दुग्धादिद्वाराऽग्निहोत्राद्युपकारः नकेसरिणो ददातिनोभयतोद
तःप्रतिगृह्णातीतिनिषेधाच्च। एतेनधनलाभद्वारातासामप्युपकारकत्वमित्यपास्तम्। नाश्वंविक्रीणीतइतिस्मृते
श्च। द्यावापृथिवीभ्यांधेनुमालभेतेत्यत्राप्युक्तप्राशस्त्यादश्वजातीयस्याश्वमेधातिरिक्तेपशुत्वाश्रवणाच्चगोरे
वालम्भः। किंचतदग्रेवायव्यंवत्समालभेतेतिश्रुतंतत्रचप्रत्यासत्त्यापूर्वालब्धेधेनोरेववत्सस्यग्रहणमितिवे
दभाष्यकृद्भिर्व्याख्यातम्। एवंचतत्संयोगात् तत्परत्वंवत्सशब्दस्तुगोत्वसमानाधिकरणवयःप्रवृत्तिनिमित्त
कएव। अतएवमहिष्यादावपिधेनुव्यवहारोलौकिकानाम्। अतएवहर्यादिभिः सवत्सासकरभाःवत्साकरभा

धेनुरिति संयोगविप्रयोगयोरुदाहृतम्। वत्ससंयोगादिना गौः करभसंयोगादिनोष्ट्री उच्यते इति च विवृतम्। अतएव तथा सुवर्णशृङ्गीणां गोधेनूनां चतुःशतमिति कर्णपर्वणि भारते प्रयोगः संगच्छते इत्यलम्। अन्योन्येतरेतरपरस्परशब्दानां क्रियाव्यतीहारविषयत्वमेकमात्रावृत्त्यऽन्योन्यत्वमखण्डोपाधिरूपं प्रवृत्तिनिमित्तमिति सर्वेष्टसिद्धिः॥ इति प्रातिपदिकार्थनिर्णयः॥ अथ तत्प्रकृतिकसुबर्थो निर्णीयते॥ तत्र प्रथमा द्वितीया तृतीया चतुर्थी पञ्चमी षष्ठी सप्तमीत्याख्याः सप्त विभक्तयः। तत्र प्रथमाविधायकं प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमेति। अत्र प्रातिपदिकार्थशब्देन तत्तच्छब्दप्रवृत्तिनिमित्तं तदाश्रयश्च। अतएव लिङ्गादिग्रहणं चरितार्थम्। तेषामपि प्रातिपदिकार्थत्वात्। तदाश्रयश्चारोपितप्रवृत्तिनिमित्ताश्रयोपि। तेन सिंहो माणवको द्रोणो व्रीहिरित्यादौ न दोषः। किंच शक्यार्थे पदं साधुत्वेनान्वाख्याय पश्चात् पदान्तरसन्निधानेऽन्वयानुपपत्त्या वक्तृश्रोतृभ्यां लक्षणाश्रयणमिति न दोषः। अन्यथा गङ्गायां घोष इत्यादौ सुबुत्पत्तेः प्राक् प्रातिपदिकस्यैव लक्षणायां नपुंसकह्रस्वत्वापत्तिः। तिङ्समानाधिकरणे प्रथमेत्यादिना तिङन्तार्थसामानाधिकरण्येनान्वययोग्यमेव प्रथमान्तं साधु इत्येतावद् बोध्यते। अन्ततो लट्परस्यास्तेः सत्त्वात्। न तु तदन्वयबोधोत्तरं प्रथमोत्पत्तिरिति बोध्यते। एवमन्यै र

पिकारकाधिकारस्थसूत्रैर्युष्मद्युपपद इत्यादिभिश्च। अत एवार्थवत्सूत्रे भाष्ये शुक्लामित्युक्ते कर्म निर्दिष्टं कर्ता क्रियाचानिर्दिष्टे अभ्याजेत्युक्ते क्रिया निर्दिष्टा कर्ता कर्म चानिर्दिष्टे देवदत्तेत्युक्ते कर्ता निर्दिष्ट इतरदनिर्दिष्टमिहेदानीं गामभ्याज कृष्णां देवदत्तेत्युक्ते सर्वं निर्दिष्टं गामेव कर्म देवदत्त एव कर्ताऽभ्याजैव क्रियेत्युक्तम्। तत्तत्कारकादिमात्रप्रयोगे योग्यसर्वक्रियाध्याहारे प्रसक्ते नियमार्थस्तत्तत्प्रयोग इति तत्तात्पर्यम्। एवं च सामान्यतः क्रियाकारकत्वसंबन्धयोग्यताबुद्धिरेव विभक्तिप्रयोजिका न तु विशिष्येति लभ्यते। कारकत्वं क्रियाजनकत्वयोग्यताबुद्धिविषयत्वमेव। वृद्धिसूत्रे भाष्येप्युक्तम्। संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसंबन्धो भवत्याहर पात्रं पात्रमाहरेति द्रोणो व्रीहिरित्यादौ पदद्वयोपस्थाप्ययोरेकत्वेन संबन्धाभावेपि विशेष्यविशेषणभावो बोध्यः। षत्वभेदः संबन्ध इति। तन्न। तस्य संबन्धत्वे मानाभावात्। संबन्धिभेदनियतत्वात् संबन्धस्य। अत एवाद्यन्तवत्सूत्रे राहोः शिर इत्यादौ षष्ठ्युपपादनाय व्यपदेशिवद्भाव इति भाष्ये उक्तम्। किंच। तस्य संबन्धत्वे नीलो घट इत्यादौ षष्ठ्यापत्तिः। भेदमूलकसंबन्ध एव षष्ठी सस्वस्वत्वन्ततो वाच्यवृत्त्यालाभात्। अत एव तार्किकनव्यैरपि कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकसामानाधिकरण्यवचनत्वं कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेनेत्यस्य मित्युक्तौ

नेरित्युक्तम्। अभेदस्य संबन्धत्वेन भाने तस्यैव तदुत्तरभावप्रत्ययवाच्यता वक्तुं युक्ता। राजपौरुष्यमित्यादौ पूर्वोत्तर
पदार्थयोः संबन्धस्यैवेति दिक्। नच प्रथमार्थः सङ्ख्यशेषः। अनुशासनाभावात्। नीलं घटं पश्येत्यादौ तज्ज्ञानानाप
त्तेश्च। न चाकाङ्क्षालभ्यः सः। वाक्ये विशेषणविशेष्यभावातिरिक्तस्याकाङ्क्षालभ्यत्वाभावात्। राज्ञः पुरुष इत्य
त्राकाङ्क्षितसंबन्धस्य षष्ठ्या रामं श्रपतीत्यादौ क्रियाकारकयोः संबन्धस्य द्वितीयादिना लाभात्। कारकविभक्ती
नां तत्तच्छक्तिस्तत्तत्क्रियाकारकभावसंबन्धश्चार्थ इति कारक इति सूत्रभाष्यात् समर्थसूत्रभाष्याच्च लभ्यत इत्य
ग्रे निरूपयिष्यामः। नच संबन्धसंबन्ध आकाङ्क्षालभ्यः। तज्ज्ञाने मानाभावात्। अनवस्थापत्तेश्च। यदपि वीरः पु
रुष इत्यादौ गुणभेदे नैकस्यापि द्रव्यस्य भेदारोपेण भेदाभेदगर्भं तादात्म्यं संबन्ध इति। तदपि न। वास्तवभेदमूलक इ
वारोपितभेदमूलकसंबन्धेऽपि षष्ठ्यापत्तेः। तत्र विभक्तिवाच्यस्यापि संबन्धस्य संसर्गतयैव भानम्। अत एवार्थवत्सू
त्रभाष्ये एषां पदानां सामान्ये वर्तमानानां यद्विशेषेऽवस्थानं स वाक्यार्थ इत्युक्तम्। विशेष इत्यस्य विशेषणविशेष्य
भावरूपपदार्थसंसर्गरूपे इत्यर्थः। संबन्धान्तरस्य समर्थसूत्रे भाष्ये षष्ठ्यादिवाच्यतोक्तेः। अत एव प्रातिपदिकार्थ
सूत्रे वीरः पुरुष इत्यादौ विशेषणविशेष्यभावस्याधिकस्य प्रतीत्या प्रातिपदिकार्थमात्राभावात् प्रथमा न प्राप्नोतीत्या

CC-0. In Public Domain. Digitization by eGangotri

शाङ्कव्ययदत्राधिकं सवाक्यार्थ इत्युक्तम्। अत्र कैयटः। वीरप्रातिपदिकाद् वीरः क इत्याकाङ्क्षया प्रापितविशेषणत्व
मनपेक्ष्य स्वार्थमात्रनिष्ठात्प्रथमा पश्चात्त्वाकाङ्क्षावशाद्विशेषणविशेष्यभावावगतिरिति। षष्ठीशेष इति सूत्रे भाष्ये
पि स्फुटमेतत्। घटो घट इत्यादौ विशेष्यविशेषणभाववारणाय सोपि धर्मभेदमूलकारोपितभेदसापेक्ष इति बोध्यम्।
हरिणाप्युक्तम्। विशेषणविशेष्यत्वं पदयोरुपजायते। न प्रातिपदिकार्थस्य तत्रैवं व्यतिरिच्यत इति। पदयोः संबद्धयोरि
ति शेषः। वीरः पुरुष इत्यादौ परस्परसंबन्धेन गुणप्रधानभावापन्नार्थकत्वेन वाक्यार्थभूतविशेष्यविशेषणभावयुक्ता
र्थकत्वात्पदयोरपि तत्त्वम्। एवं राज्ञः पुरुष इत्यादौ प्रातिपदिकार्थस्य राज्ञो विशेषणत्वं पुरुषस्य विशेष्यत्वं स्वामित्वे
न स्वत्वेन च यथा तयोर्व्यतिरेकः रूपान्तरेण परिवर्तनं न तथा प्रकृत इति तदर्थः। अत एव जात्याकृतीति सूत्रे न्याय
वार्तिककारेण यदुक्तम्। विशेषणविशेष्यभावस्यैकविषयत्वाद् यदि गोशब्द तिष्ठति शब्दयोरेकमभिधेयं भवतीति त
तो विशेषणविशेष्यभावापन्नयोस्तिष्ठति गोशब्दयोः सामानाधिकरण्यं युज्यत इति तत्संगच्छते। अन्यथा राज्ञः
पुरुष इत्यादौ भेदेपि तस्य सत्त्वेनैकविषयत्वादित्यसङ्गतिः। अत्रैकमभिधेयमित्युक्त्या क्रियाक्रियावतोरभेदः सूचि
तः। अभिधेयपदस्य विशेष्य एव प्रसिद्धेः। तस्माद् द्वैधासः। द्वयोर्धर्मिणोः संबन्धेन वैकत्वेन वेति॥ एवं च विना संब

न्यं विशेषणविशेष्यभावस्यैकविषयत्वादिति तदर्थो वाच्यः। एवं चाभेदस्य संबन्धत्वाभावः स्पष्ट एव तदभिमतः। यद्वा तत्र प्रवृत्तिनिमित्तयोः साहित्यरूपः संबन्ध एव तदाश्रययोर्विशेषणत्वादिनियामकः। सोपि वाक्यार्थ एव। एतदेवाभिप्रेत्य कर्मधारयविषये द्वन्द्वापादनं चार्थे द्वन्द्व इति सूत्रे भाष्ये कृतम्। एवं च वीरत्वपुरुषत्वसमूहवान् वीरः पुरुष इति बोधः। सामानाधिकरण्यं चैकधर्मिबोधकत्वमेव। एतेन प्रकारताविशेष्यते सांसर्गिकविषयता निरूपिते एवेति नियम इत्यपास्तम्। मानाभावात्। अभेदान्वय इत्यस्याभेदेप्यन्वयो विशेषणविशेष्यभाव इत्येवार्थो न त्वभेदसंसर्गको बोध इतीत्यलम्। तत्राव्ययानि स्त्री पुमान् नपुंसकमित्यादिशब्दाश्च प्रातिपदिकार्थ इत्यस्योदाहरणम्। कृष्णः श्रीर्ज्ञानं तटस्तटी तटमित्यादि लिङ्गाधिक्यस्य। द्रोणः खारी आढकमित्यादौ प्रवृत्तिनिमित्तजातिरूपद्रोणत्वाद्यपेक्षया परिच्छेदकत्वस्याधिकस्य तेभ्यो भाने न प्रातिपदिकार्थमात्रविहितप्रथमाया अप्राप्त्या परिमाणग्रहणम्। एकोद्वावित्यादौ संख्याया उक्तत्वात् तदप्राप्त्या वचनग्रहणम्। अत्रानुवृत्तस्यानभिहित इत्यस्य संख्याविशेषणत्वात्। यद्वा प्रवृत्तिनिमित्तसंख्यात्र विभक्तिवाच्या। न च तद्द्वयबोधाननुभवः। एकत्वस्य प्रचितस्य ततो बोधात्सजातीयसंवलने हि प्रचयः। द्वित्वाद्युपजननयोग्यत्वं च प्रचितत्वम्। प्रातिपदिकस्य तु प्रचि-

ताप्रचितसाधारणतदर्थः। सत्प्रतीतिश्चैकपुत्र इत्यादौ। एवं द्वौ बहव इत्यत्रोद्भूतावयवभेदसमूहप्रतीतिर्विभक्त्या। तदभावे तु द्विपुत्रो बहुपुत्र इत्यादावनुद्भूतावयवभेदसमूहरूपप्रतीतौ द्विभानम्। एतन्मूलकमेव संभेदेनान्यतरवैयर्थ्यमिति वक्ष्यते। यद्वा न केवलेति नियमेन स्वाभाविकस्य ह्यभिधानमत्र लुग्विधिना तु केवलेनाप्यभिधानं ज्ञाप्यते। एवं च प्रकृत्यर्थानुवादिका विभक्तिः। यद्वा प्रकृतिप्रत्ययसमुदायवाच्यः सोर्थ इत्यनुक्तत्वादेव विभक्तिरत्र। अन्वयव्यतिरेकाभ्यां ह्यत्र प्रकृतिप्रत्ययार्थावधारणमर्थवत्सूत्रादौ भाष्ये उक्तम्। एकशब्दाद्वेचवचनान्तराभावाद्व्यतिरेकाभावेऽन्वयस्याप्यनिश्चयात् केवलप्रकृत्यर्थानवधारणमेव। वृत्तौ तु वृत्तिस्वभावादेवान्यार्थसंबद्ध उपसर्जनार्थः केवलप्रकृतेरेवगम्यत इति न तत्र विभक्तिः। सैव चानुत्पत्तिर्लुकान्वाख्यायते। यद्वा एकत्वादिविशिष्टः प्रकृत्यर्थो विभक्तिवाच्येनैकत्वादिना विशेष्यते। एकत्वादिविशिष्ट एवार्थो न तु गुणान्तरविशिष्ट इति। एवं च वचनग्रहणं न कार्यं स्पष्टं चेदं सर्वमनभिहितसूत्रे भाष्ये। संख्यासमुद्देशो हरिग्रन्थे चेति दिक्। इदमपि सूत्रं क्रियायोग एव प्रवर्तते कर्मणि द्वितीयेत्यादिसाहचर्यात् तथैवाकाङ्क्षितत्वाच्च। तिङ्समानाधिकरणे प्रथमेति वार्तिकाच्च क्रियान्वयिकर्त्रादावभेदान्वयाच्च क्रियायोगो बोध्यः। यत्र क्रिया न श्रूय

तेतत्राध्याहारः।अन्ततोऽस्तीत्यस्यास्तिर्भवन्तीपरोप्रयुज्यमानोपिअस्तीतिभाष्यात्।संबोधनेचेत्यनेनसंबोधनाधिक्येप्रातिपदिकार्थेवर्तमानात्प्रातिपदिकात्प्रथमा।तत्रसंबोधनमभिमुखीभावः।तत्फलंप्रवृत्तिनिवृत्ती।तेनसंबोधनविभक्तिरनुवाद्यविषया।संबोध्यतावच्छेदकरूपेणसंबोध्यस्यसिद्धिंविनातत्त्वासंभवात्।तेनराजाभवयुध्यस्वेन्द्रशत्रुवर्धस्वेत्यादौनसंबोधनविभक्तिः।राजत्वादेरसिद्धत्वेनानुवाद्यत्वाभावात्।अतएवराजन्युध्यस्वेत्यस्यकुमारावस्थायांराजाभवयुध्यस्वेत्यस्यराजावस्थायांनप्रयोगः।केचित्तुसंबोधनंसम्यग्ज्ञापनंसंबोध्यज्ञापनार्थमेवसंबोधनविभक्त्यन्तपदघटितवाक्यप्रयोगात्।तत्फलंप्रवृत्तिनिवृत्तीइतिपूर्ववत्।ज्ञापनेसम्यक्त्वंचावश्यकर्तव्यत्वादिविषयकज्ञानानुकूलत्वम्।तादृशज्ञानानुकूलव्यापारश्चएतद्विभक्त्यन्तपदघटितवाक्यप्रयोगएव।यत्तुप्रयोक्त्रिच्छाविषयकत्वंज्ञानेसम्यक्त्वमिति।तन्न।नस्यवाक्यप्रयोगानुमेयत्वेनविभक्तिबोध्यतावच्छेदककोटौनिवेशेमानाभावात्।संबोधनपदाघटितवाक्यप्रयोगेपिबोध्यबोधेप्रयोक्त्रिच्छाविषयत्वानुमानात्।अन्यथातस्यतत्प्रयोक्तृत्वमेवनस्यात्।तंपचेत्यादौप्रयोज्यप्रवृत्तेस्तदिष्टत्वस्यप्रवर्तनानुमेयत्वदर्शनाच्च।हेशब्दादिसंबोधनेतात्पर्यग्राहकम्।अचेतनेतुचे

तनत्वारोपेणगौणः प्रयोगः।संबोधनंचाभिमुखीकृत्याज्ञातार्थज्ञानानुकूलव्यापारानुकूलव्यापारः।तद्व्यापारजन्यज्ञानानुकूलव्यापाराश्रयत्वंसंबोध्यत्वम्। तत्त्वेनबुद्धिस्थस्वनिष्ठज्ञानविषयज्ञेयसाकाङ्क्षे इतिज्ञेयेर्थेतस्यान्वयः।सएवचज्ञाप्योर्थः।तेनरामत्रायस्वेत्यादौरामसंबोधनविषयस्त्राणमितिबोधः।अभिमुखीकरणंस्ववचनार्थग्रहणेसादरत्वकरणम्। तद्व्यञ्जकंचमुखपरावृत्त्यादि।हेरामसुन्दरइत्यादावसीत्यध्याहारः।एवंचधिङ्मूर्खेत्यादौक्रियाध्याहारेप्रथमातदभावेद्वितीयेत्याहुः।तत्तुसिद्धस्याभिमुखीभावेत्यादिवक्ष्यमाणहरिग्रन्थविरुद्धम्संबोधनपदंयत्रतत्क्रियायाविशेषणम्।व्रजानिदेवदत्तेतिनिघातोत्रतथासतीतिहरिः।अत्रपुञ्जराजः।आख्यातंसविशेषणंवाक्यमितिवाक्यलक्षणस्यसमर्थसूत्रभाष्योक्तस्यसंबोधनपदार्थेक्रियाविशेषणत्वाभावेव्रजानिदेवदत्तेत्यादावभावेनसमानवाक्येइतिप्रकृत्यविहितोनिघातोनस्यादितिसंबोधनविभक्तेरनुवाद्यविषयतयाऽनुवाद्यस्यचविधेयएवान्वयेनविधेयतायाश्चक्रियानिष्ठत्वेनतस्यामेवान्वयइतियुक्तम्।एतच्चनडीतिसूत्रेभाष्येध्वनितमितिसमानाधिकरणसमासप्रकरणेसमासवादेनिरूपयिष्यामः।तदुक्तंहरिणा।सिद्धस्याभिमुखीभावमात्रंसंबोधनंविदुः।प्राप्ताभिमुख्योह्यर्थात्माक्रियासुविनियुज्यते।संबोधनंनवाक्यार्थइतिवृद्धेभ्यआगमइति।एवंच

CC-0. In Public Domain. Digitization by eGangotri

केचिन्मतोक्तसंबोधनपदार्थफलभूतोऽभिमुखीभावएवात्रसंबोधनपदार्थोनतुसर्वैस्तदुक्तमभिमुखीभावमात्रमिति।एवंचक्रियासुविनियोगफलकोऽभिमुखीभावःसंबोधनमितिसूचितम्।अत्रसिद्धस्येत्यनेनतस्यानुवाद्यत्वंविनियुज्यतइत्यनेनप्रवर्तनाविषयक्रियासंबन्धस्तस्येतिबोधितम्।एवंचाभिमुखीभवद्रामाद्युद्देश्यकप्रवर्तनाविषयोरक्षणमितिबोधः।व्रजानिदेवदत्तेत्यादावपिजानीहीत्यध्याहारोवाक्यैकदेशन्यायेनवा।तत्रव्रजनस्यकर्मत्वाद्देवदत्तस्योद्देश्यत्वाद्उभयोःसमानवाक्यस्थत्वम्।उद्देश्यविधेयभावोवाक्यार्थः।अभिमुखीभवनानुकूलस्यसंबोधनविभक्त्यन्तशब्दप्रयोगरूपव्यापारस्येतरनैरपेक्ष्येणैवप्रतीतेस्तन्नवाक्यार्थइतितदर्थइतिबोध्यम्।तत्रवाक्यैकदेशन्यायेनव्रजानिदेवदत्तेत्यनेनैवजानीहीत्येतद्घटितवाक्यार्थबोधइतिएकतिङ्वाक्यमितिवाक्यलक्षणमपितत्रास्त्येवेतिनिघातसिद्धिः।एतन्मूलकएवसंबोधनस्यकर्तृकारकत्व व्यवहारोवृद्धानाम्।तस्यैवत्वंपदार्थत्वेनविनियोज्यक्रियाकर्तृत्वात्।अतएवतिङ्समानाधिकरणेप्रथमेतिवार्तिकमतेप्रथमासिद्धिःसंबोधने।तन्न्यासेहिप्रातिपदिकार्थेतिसूत्रवदस्याप्यकरणमेव।अतएवसंबोधनेचेतिसूत्रंकर्मादिविशिष्टेप्रथमाभावेज्ञापकमाश्रित्यप्रातिपदिकार्थसूत्रेमात्रग्रहणंप्रत्याख्यातम्।तेनहिसंबोधनविषयेपिप्राति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पदिकार्थ इत्यनेन सिद्धिः सूचितेति तत्व पठन वार्तिकेनैव तत्र सिद्धिरुचितेति बोध्यम्। वार्तिकनये सूत्रस
त्त्वेपि संबोधनाधिके तिङ्समानाधिकरणेऽर्थे वर्त्तमानात्प्रथमेत्येव तदर्थस्यौचित्याच्च। तस्मात्कर्तृकार
कत्वं संबोधनस्येति वृद्धोक्तं साध्वेव व्रजानि देवदत्तेत्यादौ व्रजनक्रियान्वयेनैवैकवाक्यत्वमिति नयुक्तम्
। तस्यान्तस्य नियोगाभावेन क्रियासु विनियुज्यत इति हरिग्रन्थविरोधापत्तेरिति दिक्। यत्तु संबोधनस्य प्र
कृत्यर्थविशेषणत्वे भो ब्राह्मणास्त्वं पचेति प्रयोगापत्तिरिति। तन्न। शब्दशक्तिस्वाभाव्येन संबोधनविभक्त्य
न्तपदसमभिव्याहारे युष्मदस्तत्पदबोध्ययावत्परामर्शकत्वस्य व्युत्पत्तिसिद्धत्वेनैकवचनस्यासाधुत्वादि
त्यलम्॥ इति प्रथमा॥ अथ द्वितीया। द्वितीया—दयोपि द्विविधाः कारकविभक्तय उपपदविभक्तयश्च। कारकं
क्रियाजनकत्वशक्तिः। भाष्ये करोति क्रियां निर्वर्त्तयतीति व्युत्पत्तिदर्शनात्। ब्राह्मणस्य पुत्रं—पन्थानं पृच्छती
त्यादौ ब्राह्मणस्य न कारकत्वं पुत्रेणान्यथासिद्ध्या तत्त्वाभावात्। हरिरप्याह। स्वाश्रये समवेतानां तद्वदेवा
श्रयान्तरे। क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुरिति। द्रव्यगता क्रियाजनकताशक्तिरेव कारकं साधनं
मिति चोच्यते। सिद्धस्य द्रव्यस्य स्वरूपतः क्रियाजनकत्वानुपपत्त्याशक्त्याविशिष्टस्यैव तत्त्वं वाच्यमिति प्राप्ता

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तविवेकेनशक्तिरेवसाधनम्।तदुक्तमनभिहितसूत्रेभाष्ये।गुणाःसाधनमिति।शक्तिरेवात्रपारतन्त्र्याद्गुणत्वेनो
क्ता।तत्रकर्तृकर्मणोःस्वाश्रयसमवेतक्रियाजनकता।करणादीनामाश्रयान्तरसमवेतक्रियाजनकता।किंचद्रव्य
स्यकारकत्वेतस्यैकरूपत्वेनकार्यवैचित्र्यानुपपत्तिः।दृश्यतेचघटंपश्यघटेनजलमाहरघटेजलंनिधेहीत्यादौका
र्यवैचित्र्यम्।सर्वस्यचसर्वशक्त्याश्रयतेतिकदाचित्कस्याश्चिद्विवक्षयातत्तद्धिचित्रानेककार्योत्पत्तिः।क्वचित्
शक्त्याविष्टद्रव्यस्यापिसाधनत्वेनव्यवहारः।शक्तिशक्तिमतोरभेदस्यापिसत्त्वात्।शक्त्याकरोतीत्यादौशक्तेरपि
द्रव्यायमाणतयाशक्त्यन्तरयोगः।अतएवविभक्त्यर्थकेनाव्ययेनाव्ययीभावःसंगच्छते।द्रव्यस्यैवसाधनत्वे
तुतस्यशब्देनैवोक्तत्वादव्ययस्यप्रयोगएवनेतिकथंतेनसमासःस्यात्।पशौकर्तरीत्यादेश्चकर्तृशक्त्याश्रयेइ
त्यादिप्रकारेणार्थइत्यलम्।सर्वेषांचकारकाणांस्वस्वावान्तरक्रियाद्वाराप्रधानक्रियानिष्पादकत्वम्।अतएवतेषां
भावनायामेवान्वयः।क्रियाजनकत्वावगतौकासाक्रियेत्याकाङ्क्षोदयेनतत्रैवान्वयौचित्यात्।असन्निहितसंप्र
दानस्यापिदातृबुद्धिस्थत्वेसतिदातृज्ञानपूर्वकालत्वेनैवजनकत्वंतावतैवदानक्रियानिष्पत्तेः।घटंस्मरतिघटंकरो
तीत्यादौबोद्धुर्घटादेःपूर्वकालत्वात्स्मृत्यादिनिष्पादकत्वमित्याद्यूह्यम्।क्रियान्वयित्वंकारकत्वमितितुन।कार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥

कापंं भावनान्वय इत्यस्य क्रियान्वयिनां क्रियान्वय इत्यर्थापत्त्याऽसंगत्यापत्तेः। अधिकरणस्य कारकत्वेन क्रियान्वय इत्यादि भवदीयव्यवहारासंगत्यापत्तेश्च। केचित्तु प्रत्यक्षादिनाऽर्थं ज्ञात्वा परं प्रति संस्कृतेन बोधनेच्छायां संस्कृतस्य व्याकरणत एव प्रकृतिप्रत्ययविभागद्वारा यस्य ज्ञानं तेन पूर्वं क्रियान्वयानवगत्या कारकत्वज्ञानाभावात् तदीयसंस्कृतव्यवहारानुपपत्त्या भाष्योक्तमेव साधु इत्याह। यत्तु क्रियान्वितप्रत्ययार्थान्वयित्वं कारकत्वमिति। तन्न। पक्व ओदन इत्यादौ प्रत्ययार्थे कारकत्वकर्मत्वव्यवहारानापत्तेः। कारकाणां भावनान्वय इत्यस्य भङ्गापत्तेश्च। उक्तदोषाच्च। न च कारकशब्दस्य कर्तृपर्यायत्वेन कारकं करणमित्यादि विरुद्धं कारकं कर्त्तेति पुनरुक्तं चेति वाच्यम्। हरिणैव समाधानात्। तथाहि। निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके॥ व्यापारभेदापेक्षायां करणादित्वसंभव इति तेनोक्तम्। सर्वेषां स्वस्वव्यापारद्वारा स्वातन्त्र्येणैव क्रियाजनकत्वात्कर्तृत्वेन कारकत्वम्। ततः कः केन किं पचतीति विवक्षायां स्वस्वव्यापारवशेन करणादित्वम्। तत्र साधनान्तरनियोगव्यापारः कर्त्ता तद्व्यापार एव सर्वत्र प्रधानधात्वर्थः। कर्तुः क्रियये(प्)सिततमव्यापारं कर्म। कारकान्तरसाध्यव्यापारं करणम्। प्रेरणानुमत्यादिव्यापारं संप्रदानम्। अवधिभावोपगमव्यापारमपादानम्। कर्त्रादिव्यवहितक्रियाधारोऽधिकरणम्। स्वत

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

न्त्रंप्रेरयन्‌हेतुः।तत्रसामान्यपूर्वकत्वाद्विशेषस्यकारकत्वमनुवृत्तमितिकरणंकारकमित्याद्युपपत्तिः।यथापुत्र
जन्मनिपित्रोःकर्तृत्वेपिविवक्षयाऽयमस्यामियमस्मात्पुत्रंजनयतीतिव्यवहारः।तथैवमीदृशस्थलेऽपादान
स्यकर्तृत्वेपिग्रामादागच्छतीत्येतद्विषयेग्रामआगच्छतीतिप्रयोगस्तुन।अनभिधानात्।करणत्वाद्यवस्था
यांकर्तृसंज्ञातुन।कारकत्वादेवस्वातन्त्र्येलब्धेस्वतन्त्रःकर्तेतिपुनःस्वतन्त्रग्रहणंस्वातन्त्र्यमेवयस्यतस्य
कर्तृत्वार्थंनतुपारतन्त्र्ययुक्त स्वातन्त्र्ययुक्तस्यसा।कारकसंज्ञातुवस्तुसत्स्वातन्त्र्यस्यस्थितिमात्रेणकर
णत्वादीनांविधानसामर्थ्यात्प्रवर्त्ततइत्यलम्।यद्वाप्रधानक्रियाजनकपूर्वोक्तस्वस्वव्यापारेकर्त्तारःप्रधानक
र्मान्यक्तेपिस्वगततत्तद्व्यापारेस्वातन्त्र्यसत्वात्अकुर्वतःसाधनत्वा नुपपत्तेः।एवंचतत्तद्व्यापारलब्धकरण
त्वादिमन्तएवकर्तृपारतन्त्र्येपिस्वस्वव्यापारेस्वातन्त्र्यसत्वात्।तद्द्वारामुख्यक्रियायामपिस्वतन्त्राइतिप्रधान
क्रियाकर्तृत्ववन्तोपीतितदुपपत्तिः।विभक्तिस्तुकरणत्वादिनिमित्तैर्बानवकाशत्वात्।करणत्वादेरेवोद्भूतत्वात्।
कर्तृवियोगेनतदीयव्यापारस्यैवधात्वर्थत्वेनोद्भूतस्वातन्त्र्यविवक्षायांतुकर्तृविभक्तिरेवसर्वत्र।क्वचित्संप्रदानापा
दानयोस्तुनसाऽनभिधानादित्युक्तम्।यथासुहृत्कर्त्तारोपियोद्धारोराजनियोगापेक्षणादस्वतन्त्राअपिनियोगो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तरं पुनः स्वतन्त्र एव नियोगमात्रात्तु तन्निष्ठजयादिभाग्राजा। तथा कर्तृनियोगोत्तरं यत्करणादिषु स्वस्वव्यापार
द्वारा क्रियानिष्पादने स्वातन्त्र्यं तत्करणत्वादिकालेप्यबाधितमेवेत्यदोषः। नियोगमात्रेण च तत्रैव कर्तृत्व
व्यवहारोपीति दिक्। यद्वा ज्वलनादिरूपस्वस्वव्यापारे स्वातन्त्र्यात् तेषां धात्वर्थत्वे एधाः पचन्तीत्यादिद
र्शनाच्च तात्कालिकस्वातन्त्र्येण कारकत्वं स्वस्वव्यापारद्वारा प्रधानक्रियानिष्पादकत्वेन च करणत्वादि। संप्र
दानापादानयोरपि स्वातन्त्र्यमादायैव ग्राम आगच्छति विप्रो ददातीति प्रयोगाभावेपि कारकत्वं बोध्यम्। त
दुक्तं भाष्ये। पर्यप्तिं करणाधिकरणकर्मणां कर्तृत्वं निदर्शितमपादानादीनां कर्तृत्वनिदर्शनायेति। वृक्षो वधि
भावमुपगच्छति विप्रोनुमन्यते इत्यादौ स्वस्वव्यापारप्रवृत्तयोः कर्तृत्वं दृश्यते पतिदा धातुवाच्यता तु न
तद्व्यापारस्यानभिधानादिति बोध्यम्। कारकत्वं चोपलक्षणं सदेव तत्तत्संज्ञोपयोगीति स्पष्टं चेदं सर्वं भाष्ये
स्तस्मदृशाम्। ये तु क्रियान्वयित्वं कारकत्वमिति वदन्ति। तेषां कर्तृसमवाये पि करणं कारकमित्यादेरनुपपत्त्य
भावात् तत्र तदाशङ्कासमाधानपरभाष्यासङ्गतिः। तदर्थे कारकशब्दस्य साधुत्वानुपपत्तिश्चेति बोध्यम्॥
तत्र कर्मणि द्वितीयेति सूत्रम्। तत्र कर्मत्वं व्याकरणशास्त्रबोधितकर्मसंज्ञकत्वम्। तत्र कर्तुरीप्सिततमं क

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

र्मेति सूत्रबोधितं कर्मत्वं कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यव्यापारव्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वम्। तण्डुलं पचतीत्यादौ विक्लित्त्याश्रयत्वात् कर्मत्वं विक्लित्तिरूपफलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्तत्वम्। अतएव तत्समानाधिकरणे स्तोकं पचतीत्यादौ कर्मत्वम्। उद्देश्यत्वं च सनागर्भितम्। अतएव कर्मणा यमभिप्रेतीति सूत्रे कर्मणेत्यस्याभावे कर्मण एव संप्रदानसंज्ञापर्यायेण स्यादित्यापादितं भाष्ये। उद्देश्यत्वं च साक्षात्फलरूपे धात्वर्थे क्रियायाः फलेच्छापूर्वकेच्छाविषयत्वात् तदाश्रयत्वात्तण्डुलादीनामपि तत्त्वम्। फलस्यापि क्रियाजनकत्वं तज्ज्ञानपूर्वकक्रियोत्पादनात्। रथो ग्रामं गच्छतीत्यादौ तूद्देश्यत्वारोपेणानिर्वाहस्तस्य॥ न च कालिकादिसंबन्धेन फलाश्रयेति व्याप्तिः। फलतावच्छेदकसंबन्धेन तदाश्रयस्य ग्रहणात्। पृष्ठातस्य नोद्देश्यतेति दोषः। गच्छतियोगे गम्यर्थसंयोगरूपफलाश्रयस्यापि कर्तुर्न कर्मत्वं परस्याः कर्तृसंज्ञया बाधात्। आत्मानमात्मा हन्तीत्यत्र तु शरीरान्तःकरणरूपावच्छेदकभेदेनात्मनि भेदमारोप्य कर्मत्वकर्तृत्वोपपादनं भाष्ये कृतम्। कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यफले त्वुक्तेरग्नेर्माणवकं वारयतीत्यादावग्न्यादेर्न कर्मत्वम्। अन्यथा वारणार्थानामिति सूत्रमस्यापवादः स्याद् इति माणवक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यापिकर्मत्वंनस्यादिति।वारयतेश्वसंयोगाद्यनुकूलव्यापाराभावानुकूलोव्यापारोर्थः।चैत्रंग्रामंगमयतीत्यादौग्रामस्यकर्मत्वायप्रयोज्यत्वनिवेशः।प्रयोज्यताचजन्याजन्यसाधारणी।विषयतायाअजन्यत्वेचस्वविषयज्ञानसामग्रीप्रयोज्यज्ञानविषयसाधारणीचनिवेश्या।माषेष्वश्वंबध्नातीत्यादौबन्धनप्रयोज्यभक्षणाश्रयमाषाणांतत्ववारणायप्रकृतधात्वर्थेतिफलस्यापिविशेषणंबोध्यम्।पयसौदनंभुङ्क्ते इत्यत्रपयसःकरणत्वस्यैवविवक्षणेनप्रकृतधात्वर्थफलाश्रयत्वेनाविवक्षणेनचनकर्मत्वम्।उभयविवक्षायांतुपरत्वात्कर्मत्वमेव।नचपयसःकर्तुरुद्देश्यत्वाभावादेवतदप्राप्तिः।यदाकृतभोजनोपिपयसोलाभेनभोजनेप्रवर्ततेतदातत्क्रियायाःपयउद्देश्यकत्वसत्त्वात्।फलत्वंचकर्तृप्रत्ययसमभिव्याहारेतद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयतद्धात्वर्थत्वम्।पश्यमृगोधावतीत्यादौधावनादेःफलत्ववारणायतद्धात्विति।अन्यथाप्रधानानुरोधिकर्मत्वस्यबलवत्त्वान्मृगस्यकर्तृत्वंनस्यात्।कर्मणिविहितद्वितीयायाःकर्मत्वशक्तिमान् अर्थः।कर्मणीतिसूत्रस्वरसात्।एवंसर्वविभक्तीनांतत्तत्कारकशक्तिमद्धर्मिबोधकत्वंबोध्यम्।तत्रचप्रकृत्यर्थोविशेषणंविशेष्यंधात्वर्थस्तच्छक्तिनिरूपकत्वसंबन्धेन।एवंचहरिंभजतीत्यादौहरिरूपंयत्कर्मतन्निष्ठशक्तिनिरूपक।

प्रीत्यनुकूलोव्यापार इति बोधः। प्रीत्यनुकूलो व्यापारो भजेरर्थः। यत्तु फलाश्रयः कर्म। तत्र फलस्य धातुना लाभात्। आश्रयो द्वितीयार्थः। तत्र प्रकृत्यर्थो विशेषणम्। आधेयतया फलं विशेष्यम्। आश्रयत्वं शक्यतावच्छेदकम्। अखण्डोपाधिरूपमाश्रयतात्वं तदनुगमकम्। आश्रयत्वस्य निरूपकतया फलेऽन्वय इति तु न युक्तम्। कर्मणीति सूत्रस्वरसभङ्गात्। न चाधेयत्वस्य संसर्गत्वाङ्गीकारे तण्डुलः पचतीत्यतोऽपि बोधापत्तिरिति वाच्यम्। विभक्त्यर्थमद्वारीकृत्य प्रातिपदिकार्थधात्वर्थयोः साक्षाद्भेदेनान्वयाव्युत्पत्तेः। अन्यथा कर्मतासंसर्गकबोधस्यापत्तिरिति। तन्न। सप्तमीपञ्चम्यौ कारकमध्ये इत्यत्र कारकशब्दस्य शक्तिपरत्वेन शक्तिशक्तिमतोरभाभेदेन शक्तिमत एव द्वितीयार्थतया भाष्यादिसंमतत्वात्। किं च त्रयी शब्दानां प्रवृत्तिरिति भाष्यसंमतमुख्यपक्षे संज्ञाशब्दैरारोपितस्वप्रवृत्तिनिमित्तबोधो यथा डित्थादिपदैः पूर्वपूर्वडित्थादिगुणारोपेण तत्तड्डित्थादिबोध इति ऋलृक्सूत्रे कैयटे स्पष्टम्। एवं चात्रत्यसंज्ञाशास्त्रेस्तत्तत्प्रवृत्तिनिमित्तशक्तेः संज्ञिनि बोधनमेवोचितम्। उद्देश्यतावच्छेदकस्यैव तत्तत्संज्ञाशब्दप्रवृत्तिनिमित्तत्वे फलाश्रयत्वात् कर्मत्वमित्यादिव्यवहारासङ्गत्यापत्तेः। न चास्य तत्त्वात् कर्मसंज्ञेत्यर्थः। लक्षणापत्तेः। संज्ञामजानतामपि तथा व्यवहाराच्च। त्रयीपक्षे

कर्मादिशब्दानांपदप्रवृत्तिनिमित्तकत्वाभावेनतदुत्तरत्वप्रत्ययेनपदानभिधानाच्च।अनादित्वाद्व्यवहारस्यपूर्वपूर्वव्यवहारेणकर्मादिपदानांतत्तच्छक्तिमतिशक्तिग्रहः।केचित्तुवृद्धिरादैजित्यादावप्येवमेव।तत्तत्प्रवृत्तिनिमित्तंचक्रविद्वास्तवंक्वचिदारोपितमित्यपिव्यवहारतोनिर्णेयम्।यत्रटिघुभादिषुप्रवृत्तिनिमित्तज्ञानासंभवस्तत्रपदप्रकारकएवबोधोनलपदादाविवेतिप्राहुः॥किंचाश्रयत्वस्यातिप्रसक्तत्वान्नतच्छक्यतावच्छेदकमुचितम्।नचफलनिरूपितत्वविशिष्टमाश्रयत्वंतथा।तद्रूपेणावच्छेदकत्वेगौरवात्।वैकुण्ठमध्यास्तेइत्यादौतदभावेनतस्यन्यूनवृत्तितयाद्वितीयाशक्यतावच्छेदकत्वानौचित्याच्च।तत्रशुद्धाश्रयत्वस्यशक्यत्वेऽसारैनानार्थत्वापत्तिः।हरिपदात्तस्यलाभेपिशक्तिमत्त्वेनालाभान्नदोषः।कर्मादिपदवत्त्वेनशक्यत्वेतुगौरवम्।आकृत्यधिकरणरीत्याशक्तिरेववाच्येत्यन्यत्।परेतुकर्मत्वादिशक्तिमान्तद्गतंविशेषणत्वंक्रियाकारकभावसंबन्धश्चद्वितीयाद्यर्थः।तद्द्योत्योवा॥प्रातिपदिकार्थएवहिनानाशक्तियोगेनकर्मादिशब्दवाच्यइतिसएवविशिष्टशक्तियुक्तोविभक्त्यन्तवाच्यइतिप्रशस्यस्यश्रइतिसूत्रेकैयटोक्तेः।विभक्त्यन्तरवाच्यइतिपाठेपिप्रथमातिरिक्तविभक्त्यन्तवाच्यइत्येवार्थः।अर्थाद्विभक्तिविपरिणामोभविष्यतीतिभाष्यमुपादा

य विभक्तिशब्देन विभक्त्यन्तार्थ उच्यत इति उपक्रमात्। कष्टंश्रितो भवतीत्यत्र क्रियाकारकयोरभिसंबन्धस्य द्वितीया वाचिका भवतीति समर्थसूत्रस्थभाष्याच्च। यत्तु कैयटेनोक्तमत्राभिसंबन्धपदेन शक्तिरेवोच्यते तयोरभिसंबन्धनिमित्तत्वादिति। तन्न। राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरुषो विशेष्यस्तयोरभिसंबन्धस्य षष्ठी वाचिका। तथा कष्टं श्रित इति क्रियाकारकयोरित्यादिसंदर्भेण षष्ठीवदस्या अपि संबन्धवाचकत्वस्यैव प्रतीतेः। भाष्यस्थसंबन्धशब्दस्य लाक्षणिकत्वे मानाभावाच्च। क्रियात्वकारकत्वसमूहः संबन्ध इति तद्भाष्यार्थः। भेदसमानाधिकरणविशेषणत्वज्ञाने एव संबन्धाकाङ्क्षेति तदपि द्वितीयावाच्यम्। विशेषणत्वं च शक्तिमत्त्वे एवेति सापि शक्तिर्वाच्या। शक्तेः स्वपञ्चकं प्रातिपदिकार्थ इति पक्षे विभक्तिद्योत्यतया विशेषणत्वमुचितम्। कारकस्य विभक्त्यर्थत्वपक्षेऽपि तथैव संख्यावत्। सत्त्वप्रधानानि नामानीति निरुक्ताच्च। विभक्त्यर्थश्चासत्त्वभूत इति तद्धितश्चेति सूत्रभाष्ये स्पष्टम्। तत्र हि विभक्त्यर्थप्रधानस्याव्ययस्य विभक्त्यर्थप्रधानत्वाद् असत्त्वभूतत्वमुक्तम्। विशेषणभूतत्वेऽपि कर्म हरीति वद् हरिकर्मके—त्युक्तेरवः। कर्मशब्दस्य समासघटकस्य संज्ञाशब्दत्वेन तत्र विशेष्यविशेषणभावे कामचारात्। काण्ड इत्यादेर्विभक्त्यर्थप्रधानत्वोक्तिस्तु तदर्थसंबन्धे प्र

कृत्यर्थस्य प्रकारत्वमात्रेण। संसर्गभाने संसर्गविशेष्योभयनिरूपितत्वस्य प्रकारतायां स्वीकारात्। अतएवानेकमन्यपदार्थ इति सूत्रे भाष्ये विभक्त्यर्थमुपक्रम्य तत्र हि सर्वपश्चात् परं वर्तत इत्युक्तम्। अत्र द्योतकतापक्ष एव मुख्यः। पञ्चकंप्रातिपदिकार्थ इति पक्षे तत्त्वस्यैवोचितत्वात्। कुत्सित इति सूत्रभाष्येपि स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतम्। समवेतस्य च वचने लिङ्गं संख्या विभक्तिं च। अभिधाय तान्विशेषानपेक्षमाणश्च कृत्स्नमात्मानम्। प्रियकुत्सनादिषु ततः प्रवर्तते सोविभक्त्यन्तः॥ इत्यनेन पञ्चकंप्रातिपदिकार्थ इत्येवोक्तम्। सर्वत्र स्वार्थाभिधायकशब्दस्यैवाभिधानकर्तृत्वप्रतीतेः। कर्मणि द्वितीया द्व्येकयोरित्यादीनां भाष्ये नियमत्वोक्त्यापि पञ्चकप्रातिपदिकार्थपक्ष एव लभ्यते तदा ह्यनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति सर्वत्र सिद्धे तेषां नियमत्वं युज्यते। तदुक्तं बहुष्विति सूत्रे भाष्ये। सुपो विशेषेण प्रातिपदिकमात्राद्विधीयन्ते इति। कैयटेन च स्पष्टमेवोक्तम्। अतएव दधिराजेत्यादौ प्रातिपदिकमात्रात्सर्वबोधः संगच्छते। लुप्तस्मरणं तु लोपमजानतामसंभवि। एकशेषसूत्रे प्रत्ययलक्षणकार्यलोपफलं वदता भाष्यकृता तिरस्कृतं च। अतएव क्रीतात्करणपूर्वादिति सूत्रे गवाक्रीतेत्यत्रातिप्रसङ्गमाशङ्क्य विभक्त्या व्यवधानात् नेति उक्तम्। अन्यथा विभक्त्यन्तस्यैव करणवाचकत्वेन तदसङ्गतिः स्पष्टैव।

संबन्धस्तुवाच्यस्तु। अतएवप्रकारीभूतविभक्त्यर्थसंबन्धेन नामार्थधात्वर्थयोरन्वय इति वृद्धाः। हरिकर्मकप्रतीत्यादिक्रमेण बोधप्रकारीभूतो विभक्त्यर्थः कर्मत्वादिशक्तिः। तद्घटितेन क्रियात्वकारकत्वरूपसमूहसंबन्धेन तयोरन्वय इति वृद्धोक्त्यर्थः। प्रकारीभूतस्यापि संबन्धघटकत्वं शाब्दः स्वमित्यादौ। अतएव घटमित्युक्ते तावन्मात्रोक्तौ क्रियाविशेषजिज्ञासा। तत्रापि वाक्यैकदेशन्यायेन घटकर्मिकेत्येव बोधः। यदा तु प्रातिपदिकार्थ इतराविशेषणत्वेनैव विवक्षितः शक्तिस्वतद्भेदेनैव विवक्षिता। तदा घटः कर्मेत्याद्येव। यथाशक्तिभेदेन विवक्षिता तदा द्वितीयादयः। स्पष्टं चैतत् षष्ठीशेष इति सूत्रे भाष्ये। तदुक्तम्। स्वशब्दैरभिधाने तु स धर्मोनाभिधीयते। विभक्त्यादिभिरेवासावुपकारः प्रतीयत इति। सधर्मः शक्तिरूपः द्विभक्त्यादिभिरित्यादिनान्तरेत्याद्यव्ययग्रहणम्। दधि तिष्ठतीत्यादौ प्रातिपदिकग्रहणं च। उपकारशब्दोऽर्शआद्यजन्तत्वेन प्रातिपदिकार्थस्य स्वावेशेन विशेषणत्वनियामकत्वादुपकारक इत्यर्थः। क्रियाया इति शेषः। कर्मकर्त्रादिपदवत् पाचकादिपदान्यपि तद्योग्यताविशिष्टद्रव्यवाचकानि न तूद्भूतकारकशक्तिप्रतिपादकानीति गतिकारकोपपदात् कृदिति सूत्रे भाष्यकैयटयोः स्पष्टम्। अनभिहितसूत्रे तु अनुद्भूतशक्तिककर्मादिग्रहणं नेत्येतत्तात्पर्यकमेव। तिङोक्तावपि घटोऽस्तीत्यादौ

प्रातिपदिकस्योद्भूतकर्त्रादिशक्तावृत्तेः। शक्त्यावुद्भूतत्वं च सर्वत्र प्रतीयमानप्रातिपदिकार्थाद्भेदेन प्रतीयमानत्वम्। तद्वैपरीत्येनाभिन्नत्वं चाकाङ्क्षादिप्रतिपाद्यत्वं तत्समानाधिकरणत्वं च। तदुक्तम्। अभिहितः सोऽर्थोऽन्तर्भूतः प्रातिपदिकार्थः संपन्न इति। अन्तर्भूतत्वं भेदेनाप्रतीयमानत्वमेव। प्रथमापि विशेषणत्वबोधिका। अस्तिक्रियायाः सर्वत्र सत्त्वात्। अत एव प्रथमायाः कारकविभक्तित्वव्यवहारो भाष्य इत्याहुः। कारकान्वययोग्यक्रिया च धातूपस्थितैव न तु तद्धिताद्युपस्थिता। स्पष्टं चेदं कर्तृकर्मणोरिति सूत्रे भाष्ये। अत एव शतेन क्रीत इत्यर्थकशत्यपदोपात्तक्रियायां न कारकान्वयः शत्यो देवदत्तेनेत्यादि। अधिकारवारीद्रोणेनेत्यत्र तु हेतौ तृतीया। विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतमित्यत्र तु मुनः साधुत्वायेष्यत इत्यध्याहारावश्यकत्वेन तेन कर्मण उक्तत्वान्न दोषः। विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमिष्यत इति यत्तदसांप्रतमन्याय्यमित्यर्थः। तादृशेच्छाया अन्याय्यत्वं च तद्विषयस्यान्याय्यत्वेन। एवं चेच्छार्थेष्विति तुमुन्। अमुं नारद इत्यबोधीत्यादौ नारद इतीति श्रीकृष्णीयज्ञानानुकरणम्। नारद इत्येतच्छब्दाभिलप्यमानाकारो बोध इति प्रथमान्तस्याप्रातिपदिकत्वान्न द्वितीयेत्यन्यत्र विस्तरः। तण्डुलानोदनं पचतीत्यत्र विक्लेदनं निर्वर्तनं च पचेरर्थः। तण्डुलान् विक्लेदयन् ओदनं निर्वर्तयतीत्यनेनैव द्वयोः कर्मत्वम्। त

ण्डुलानामोदनं पचतीत्यादौ विकारयोगे षष्ठी निर्वर्तने च पाकस्य करणत्वं तण्डुलविकारमोदनं पाकेन निर्वर्तय
तीत्यर्थः। शेषषष्ठ्यन्तार्थस्य स्वान्वययोग्यनामसमभिव्याहारे तेनैवान्वय इति व्युत्पत्तेर्न तदर्थस्य क्रियान्वय
इति कर्तुरीप्सितेति सूत्रे भाष्ये स्पष्टम्। काष्ठं भस्म करोतीत्यादौ विकृत्यनुकूलव्यापारनिर्वर्तने धात्वर्थेऽन्वयः प्रा
ग्वत्। अत्र प्रधानकर्मणि लादयः। प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति भाष्योक्तेः। प्रधानकर्मत्वं च
कर्तृप्रत्ययसमभिव्याहारे प्रधानभूतव्यापारविशेषणफलाश्रयत्वम्। ण्यन्तविषये ईदृशप्राधान्यस्यैव ग्रा
ह्यत्वात्। तच्चोक्तोदाहरणयोः निर्वर्त्यमानौदनभस्मनोरेव तन्निष्ठफलविशेषणकव्यापारस्यैव तत्सूत्रस्थभाष्ये
णशब्दप्राधान्यप्रतीतेः। तण्डुलरूपे कर्मणि लादय इति तु नव्यानां प्रमाद एव। दुहादिषु भाष्ये गणनाभावाच्चानी
हृकृष्वहामुत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापारार्थकानामनेनैव द्विकर्मकता। संयोगस्य फलतावच्छे
दकः सम्बन्धो ग्रामनिष्ठस्तदनुकूलव्यापारश्चाजानिष्ठः प्रधानजन्यफलाश्रयत्वादजा प्रधानं तत्र लादय उक्तः
भाष्यात्। तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षेत्यत्र दध्यानयनेन पयसः संस्कार्यतयाऽर्थे प्राधान्य
मादाय तच्छब्देन पयसः परामर्श इति मीमांसकग्रन्था नेयाः। दधिनिष्ठसंयोगानुकूलव्यापारार्थकत्वाद्धातोः

पयसः स सप्तमी। दुहेरप्यन्तःस्थितइवद्रव्यविभागानुकूलव्यापारानुकूलव्यापारार्थत्वे गां दोग्धि पय इत्यत्र गोप
यसोरुभयोरप्यनेन कर्मत्वम्। गोः कर्तृव्यापारजन्यफलाश्रयत्वात्पयसस्तत्प्रयोज्यफलाश्रयत्वाद्द्वयोर्विभा
गाश्रयत्वेन तु न कर्मत्वं पयोनिष्ठविभागीयसंबन्धस्यैव फलतावच्छेदकत्वात् तत्त्वेनानुद्देश्यत्वाच्च। उक्तप्राधा
न्यं च गोरिति तत्र लादयः। एवमन्येषामपि दुहादीनां जिदण्ड्यादीनां च द्विकर्मकत्वं बोध्यम्। गर्गाः शतं दण्ड्य
न्तामित्यत्रोक्तप्राधान्यं गर्गाणामिति तत्रैव लादयः। उद्देश्यत्वरूपमार्थप्राधान्यं तु शतस्येत्यनुद्देश्यत्वेनाप्रधा
नगर्गानुरोधेन न शतावृत्तिरिति न वृद्धिसूत्रस्थभाष्यविरोधः। अमृतमम्बुनिधिर्ममन्थे इत्याद्यप्येवमेव।
मासमास्त इत्यादावास्यादेरासनादिकरणके व्यापने वृत्तिर्व्याप्तिर्मासादिनिष्ठं फलम्। मासमासनेन व्याप्नोती
त्यर्थः। यद्वा व्यापनपूर्वके आसने वृत्तिः। मासं व्याप्नुवन्नास्त इत्यर्थः। उभयथापि कर्तुरिति सूत्रेण कर्मत्वम्। आ
सनजन्यत्वस्य व्याप्तावारोपेण तस्याः फलत्वम्। अनया रीत्या मासमोदनं पचतीत्यपि भवत्येव। आसनादि
मात्रवृत्तौ त्वधिकरणत्वात्सप्तमी समायां समायां विजायत इति यथा। ननु यद्यपि पराधीनतया विषं भुङ्क्ते
इत्यादौ भुजिक्रियाफलाश्रयत्वेनोद्देश्यत्वादनेन सिद्धम्। आतश्च विषमीप्सितं यत्तद्भक्षयतीति भा

ल॰मं॰ व्योक्तेः। तथापि चोरान् पश्यति ग्रामं गच्छन् तृणं स्पृशतीत्यादौ कर्मत्वं न स्यात् तेषामनुद्देश्यत्वाच्चोरादिविषये
९० न्द्रियसंबन्धाद् दृश्यमाना अपि न दर्शनोद्देश्या अपि त्वनिष्टदर्शना एवेति द्वेष्याः। तृणे औदासीन्यादनुद्देश्यत्व
मिति चेन्न। तथायुक्तं चानीप्सितमित्यनेनैव सत्त्वात्। अनीप्सितत्वमनुद्देश्यत्वम्। तत्त्वं च प्रत्यासत्त्या यद्धात्वर्थ
फलाश्रयत्वेन कर्मत्वं तद्धात्वर्थकर्तुरेवेति बोध्यम्: तेन वारयति योगेभ्यारेनोनेनापि कर्मता। तथायुक्तत्वं
प्रकृतधात्वर्थप्रयोज्यफलाश्रयत्वम्। यत्तु परसमवेतक्रियाजन्यधात्वर्थफलाश्रयत्वं कर्मत्वम्। परसमवेते
ति विशेषणाच्चैत्रश्चैत्रं गच्छतीति न प्रयोगः। तत्र द्वितीययास्वप्रकृत्यर्थापेक्षया परत्वं बोध्यते। आख्यातेन तु
स्वार्थसंख्यान्वय्यपेक्षया। परसमवेतत्वं च धात्वर्थक्रियान्वयि। गमिपत्योः पूर्वदेशत्यजेरुत्तरदेशस्यन्दे॰
श्च पूर्वोत्तरयोः कर्मत्ववारणाय धात्वर्थेति। तत्र क्रियायाः फलस्य च धातुनैव लाभाद् आधेयत्वं भेदश्च द्वितीया
र्थः। तत्र फले आद्यान्वयः। अन्त्यस्य सामानाधिकरण्येन व्यापारे। भेदे प्रकृत्यर्थस्य फलान्वयिव्यक्तिविशेषा राम
वच्छिन्नप्रतियोगितयाऽन्वयः। एवं च ग्रामं गच्छतीत्यादौ ग्रामाधेयफलानुकूलग्रामभेदसमानाधिकरणव्या
पारवानिति बोधः। एतेन प्रतियोगितासामान्येनान्वये द्वित्वावच्छिन्नप्रतियोगिताकचैत्रभेदस्य चैत्रे सत्त्वे॰ ९०

नचैत्रश्चैत्रंगच्छतीत्यस्यापत्तिः।अन्वयितावच्छेदकावच्छिन्नप्रतियोगितयाऽन्वये देवदत्तोद्रव्यंगच्छतीत्यस्यानापत्तिरितिनिरस्तमिति। तन्न। परस्याकर्तृसंज्ञया बोधेनोद्देश्यत्वाभावे नचतत्प्रयोगापत्तेरसंभवे नभेदे शक्तिकल्पनस्य व्यर्थत्वात्। नचततोबोधव्यावृत्त्यर्थंतत्कल्पनम्। तथाव्युत्पत्तिमवस्ततोबोधस्यदुर्वारत्वात्। किंचद्वितीयार्थाधेयत्वान्वितफलप्रकारकबोधंप्रतिद्वितीयान्तार्थवृत्तिभेदप्रतियोगितावच्छेदकव्यापारोपस्थितेर्हेतुत्वकल्पनेनतद्वारणात्। फलान्वयानुरोधेनतवाप्यावश्यकेकार्यकारणभावेतादृशव्यापारप्रवेशेननभेगौरवम्। तवतुभेदेशक्तेः(सामानाधिकरण्येनतत्प्रकारकबोधेधातुजन्योपस्थितिःकारणमितिकार्यकारणभावान्तरस्यचकल्प—नेगौरवं स्पष्टमेव। चैत्रमैत्रौपरस्परंगच्छतइतितूभयोः समम्। तवचैत्रमैत्रयोः परस्परपदार्थभेदवन्ममपरस्परपदार्थव्यापारवद्भेदस्यसत्वात्। किंचघटंजानातीत्यादौद्वितीयानापत्तिः उक्तकर्मत्वाभावात्। नचतत्रविषयत्वेलक्ष(णा॥ कर्मण्येवद्वितीयेत्यादिनियमैरन्यत्रलक्षणयाप्यसाधुत्वात्। अतएवसुब्विभक्तौनलक्षणेतित्वद्वृद्धव्यवहारः। वैकुण्ठमधितिष्ठतीत्यादौअव्याप्तिश्चत्वदुक्तलक्षणस्य। संज्ञायाएवतद्नियामकत्वेतुकिंभेदनिवेशेनानयारीत्याव्यापारव्यधिकरणधात्वर्थफलाश्रयत्वंकर्मत्वमित्यादिरवपुनीयमित्यलम्। यदपिमीमांसकाःसा

अस्त्वं द्वितीयार्थः व्रीहीनवहन्तीत्यस्यावहननेन व्रीहीन् भावयेदित्यर्थः। यद्यपि व्रीहयः सिद्धा एव क्रियायाः साधनानि च तथाप्यदृष्टविशेषसाधनत्वरूपसंस्कार्यत्वमेवात्र साध्यत्वं बोध्यम्। सक्तून् जुहोतीत्यत्र तु सक्तूनां भूतभाव्युपयोगाभावेन प्रागुक्तसाध्यत्वासंभवेन तत्रव्यत्ययो बहुलमिति वचनात् तृतीयार्थे द्वितीया सक्तुभिर्भावयेदित्यर्थ इत्याहुः। तेषामयं भावः। वेदैककर्मत्वशक्तिः प्रागुक्तसंस्कार्यत्वसमानाधिकरणैवेत्येतावता तस्य द्वितीयार्थत्वमिति। दुहियाचिरुधिप्रच्छिभिक्षिचिब्रूशासां योगे अपादानत्वसंप्रदानत्वाधिकरणत्वानां विषयाभावे कारकं कर्म। अकथितं चेति सूत्रात्। तद्विवक्षाभावश्च सर्वथा तदप्राप्त्याप्राप्तस्याविवक्षया चेति बोध्यम्। तत्र च्यन्तानां योगे कर्तुरिति विहितकर्मसंज्ञकेन धात्वर्थव्यापारात् प्रागपि यत्संबद्धं तदेव कर्म। तेन कांस्यपात्र्यां गां दोग्धि पय इत्यादौ कांस्यपात्र्यादेः न कर्मत्वम्। ब्रूशासियोगे तु तद्धात्वर्थव्यापारोत्तरं यदुक्तकर्मणा संबद्धं तत्कर्म। एतद्विहितं कर्म गौणं कर्मेत्युच्यते। पूर्वोक्तप्राधान्यानाश्रयत्वात्। गां दोग्धि पयः। द्रवद्रव्यविभागानुकूलव्यापारो दुहेरर्थः। अपादानत्वगोः तदविवक्षायामनेन कर्मत्वम्। अत्र गौणकर्मणि गवादौ लादयः। बलिं याचते वसुधाम्। स्वामिस्वत्वनिवृत्तिस्वस्वत्वोत्पत्त्युभयानुकूलो दीयतामित्यभिलापादिरूपो व्यापारो दि

दापयिषाव्यञ्जको याचेरर्थः। अत्र बलौ पूर्वविषयस्य कस्यापि न प्राप्तिरिति कर्मत्वम्। याचनमात्राद्प्राप्त्यभावेन बलेर्वसुधां याचते इति नेष्टमिति स्पष्टं भाष्ये इत्यन्यत्र निरूपितम्। यत्तु स्वोद्देश्यकदानेच्छायाचनमिति। तन्न। पुत्रार्थं कन्यां याचते इत्यनापत्तेः। स्वसंप्रदानकदानेच्छावति फलालाभशङ्कया देहीत्यवदत्यपि तथाप्रयोगापत्तेश्च। अविनीतं विनयं याचते। स्वीकारानुकूलो व्यापारोऽत्र याचेरर्थः। स्वीकारश्चेदमवश्यं करिष्यामीत्यभिलाषादिजनको ज्ञानविशेषः। फलतावच्छेदकसंबन्धो विषयता॥ अत्रापादानादिविषयाभावात् अनेन कर्मत्वम्। याचनमात्रेण विनयसंबन्धाभावाद् नात्र संप्रदानत्वमिति स्पष्टं भाष्ये। विनये न च तद्विषयज्ञानवत्त्वं संबन्धः। व्रजमवरुणद्धि गाम्। निर्गमप्रतिबन्धद्वारा व्रजाद्यधिकरणकचिरस्थित्यनुकूलव्यापारो रुधेरर्थः। व्रजे गोस्तिष्ठति तत्र तां निर्गमप्रतिबन्धेन चिरं स्थापयतीति संप्रत्ययात्। तस्याधिकरणत्वाविवक्षायामनेन कर्मत्वम्। माणवकं पन्थानं पृच्छति॥ जिज्ञासाविषयार्थज्ञानानुकूलः केन पथा गन्तव्यमित्यभिलाषादिरूपो व्यापारः पृच्छेरर्थः। माणवकस्य व्यापारे संबन्धसामान्येनान्वयः। ज्ञानविषयत्वेन पथः कर्मत्वं माणवकेन च तज्ज्ञानाश्रयत्वं संबन्धः। कस्यापि पूर्वविषयस्याप्राप्तावनेन कर्मत्वम्। भिक्षिर्याचिना व्याख्यातः। वृक्षमवचि

CC-0. In Public Domain. Digitization by eGangotri

नोतिफलानि। विभागपूर्वकमादानं चेरर्थः। वृक्षात्फलान्यादत्ते इत्यर्थात्। अवधित्वाविवक्षायामनेन कर्मत्वम्।
माणवकं धर्मं ब्रूते शास्ति वा। ब्रूञो विषयतया ज्ञानानुकूलशब्दप्रयोगरूपो व्यापारोर्थः। प्रवृत्तिपर्यवसायी शासेः
अर्थः स च धर्मंकुर्वित्यादिविधिघटितोपदेशरूपः। अत्रोभयत्रापि कर्तृव्यापारानन्तरं तज्ज्ञानाश्रयत्वरूपे
माणवकेन संबन्धः। वचनादिकर्मणा धर्मेण माणवकस्याभिप्रेयमाणत्वात्प्राप्तसंप्रदानत्वाविवक्षायामनेन कर्म
त्वमिति स्पष्टं भाष्ये। अनयोर्योगे सर्वथापूर्वविधिविषयाप्राप्तियोग्ये विषयेनानेन कर्मत्वमनभिधानात्। तेन
माणवकाय धर्मोपदेशकाले शूद्रेणापि श्रवणोत्सुकं धर्मं ब्रूते इति न प्रयोगः। अनभिधानं च ततः शिष्टलोक
स्य बोधाभावरूपमिति तदस्य तस्मिन्निति सूत्रे भाष्ये स्पष्टम्। तत्र हि द्वयी विवक्षा प्रायोक्त्री लौकिकी चेत्युक्त
म्। प्रयोक्तृशब्देन व्यवहारार्थं प्रयोगकर्तारः ते चापभ्रंशानपि प्रयुञ्जते अतस्तद्विवक्षा न शास्त्रप्रवृत्तौ नियामि
का। लोकशब्देन शिष्टलोकः स हि यत्रार्थे यं शब्दं धर्मबुद्ध्या परशिष्टबोधनाय प्रयोक्तुमिच्छति तद्विवक्षा शास्त्र
प्रवृत्तौ प्रयोजिकेति तदर्थ इति तत्रैव कैयटे स्पष्टम्। शिष्टाश्च शब्दतत्वविदः साक्षात्कृतपरावरा इति पृषोदरा
दीनि सूत्रे भाष्ये स्पष्टमिति भाष्यप्रदीपोद्योते विस्तरः। अत्रापि कर्मत्वशक्तिमत्वेनैव द्वितीयया बोधः। कर्मसंज्ञा

विधायकशास्त्रैस्तत्तदर्थे कर्मत्वशक्तिमत्त्वबोधनात्। अत एवाकथितं चेति सूत्रशेषे भाष्ये अनेनैव सर्वत्र कर्मत्वे सिद्धे आद्यसूत्रद्वयवैयर्थ्यमाशङ्क्यैवं सति वारणार्थानामिति सूत्रस्यानवकाशत्वेन माणवकादपि पञ्चमी स्याद् इतीप्सिततममित्यारब्धव्यमित्युत्तरितम्। एवं वैकुण्ठमधितिष्ठतीत्यादावपि बोध्यम्। अधिशीङ्स्थासामित्यादिभिराधार इत्यनुवृत्या तस्य कर्मत्वशक्तिमत्त्वबोधनात्। दिवधातुयोगे दिवः कर्म चेति सूत्रात् तद्धात्वर्थसाधकतमस्य कर्मत्वकरणत्वोभयशक्तिमत्त्वं बोध्यम्। शतं शतेन वा दीव्यति। एवं च सर्वसाधारणकर्मत्वं कर्मताशक्तिमत्त्वम्। धातूनां सकर्मकत्वमपि कर्मत्वशक्तिमदर्थान्वय्यर्थकत्वमिति दिक्। उपपदविभक्तीनां संबन्धोऽर्थः विशिष्यार्थानुक्तेः षष्ठ्यपवादत्वाच्च। उभयतः कृष्णं गोप्यः। कृष्णसंबन्धिपार्श्वद्वयवर्तिन्य इति बोधः। धिक् कृष्णाभक्तम्। कृष्णाभक्तसंबन्धिनी निन्देत्यर्थः। धिगर्थो निन्दा। उपर्युपरि अधोधः अध्यधि वा लोकं हरिः। द्विरुक्तोपर्यादेः समीपोर्ध्वभागसमीपाधस्तनभागसमीपदेशवृत्तित्वानि क्रमेणार्थः सामीप्यरूपः संबन्धो द्वितीयार्थः। सामीप्यं न षष्ठ्यर्थ इति त्वन्वयिपदवाच्यं सामीप्यं न षष्ठ्यर्थ इत्येवं परम्। अत एव वृक्षस्य समीपमित्यादौ तत्र संबन्धे षष्ठी। लोकसमीपोर्ध्वभागवृत्तिरित्यादिक्रमेण बोधः। अभितः परितः कृष्णं गोपाः। अनयोः समीपसर्वदेशावच्छेदेनेत्यर्थः। सा

मीप्यरूपः संबन्धो द्वितीयार्थः। अभित इत्याभिमुख्येपि। कृष्णसंमुख इत्यर्थः। समया निकषा वा ग्राममित्यत्राव्य
ये समीप इत्यर्थके अधिकरणशक्तिप्रधाने। द्वितीयार्थः सामीप्यरूपः संबन्धः। ग्रामसमीपदेश इति बोधः। हा कृ
ष्णाभक्तमित्यत्र हाशब्दः शोके तत्संबन्धी शोक इत्यर्थः। बुभुक्षितं न प्रतिभातीत्यादौ बुभुक्षितसंबन्धी यत्किंचिद्वि
षयप्रतिभाभाव इत्यर्थः। प्रतिभाद्यं दिति स्फूर्त्तिः। अन्तरा त्वां मां च हरिरित्यत्रान्तरेति मध्ये इत्यर्थकम्। अवधि
त्वसंबन्धो द्वितीयार्थः। त्वन्मदवधिकमध्यवृत्तिर्हरिरिति बोधः। अन्तरा हरिं न सुखमित्यत्राभाववांस्तदर्थः। हरि
शब्दस्तद्भक्तिलाक्षणिकः। द्वितीयार्थः प्रतियोगित्वम्। हरिभक्तिप्रतियोगिकाभाववद्वृत्तिः सुखसत्ताभाव इति
बोधः। एवमन्तरेणशब्दोप्युभयार्थः। तद्योगेपि द्वितीया। तव मम चान्तरा कमण्डलुरित्यत्र त्वन्मत्संबन्धी कमण्ड
लुर्मध्य इत्यर्थात् अन्तराशब्दयोगाभावेन न द्वितीया। किं च यासां सुपपदविभक्तीनां तत्तद्विशेषसंबन्धे विधानं
तत्र तेषां संबन्धानां विशेषरूपेणाविवक्षायां संबन्धत्वेन विवक्षायां षष्ठ्येवास्पष्टं चेदं चतुर्थी तदर्थार्थेति सू
त्रे भाष्ये। तत्र हितादर्थ्यस्य संबन्धत्वेन विवक्षायां षष्ठ्युक्ता गुरोरिदं गुर्वर्थमिति। विशेषसंबन्धे विधानेन्व क्वचिद्
विशेषे नैव। यथा अनुर्लक्षण इत्यादौ। क्वचित्तु तत्तदर्थस्य तत्तत्संबन्धेन संबन्धिनि नियताकाङ्क्षया। यथा प्रकृते।

वधित्वप्रतियोगित्वयोः। एवंचत्वन्मत्संबन्धिमध्येकमण्डलुरित्यर्थेनद्वितीया। ईदृशस्थलेकेवलौत्तावेवमध्यस्याव
धिभूताविति न निर्णयः किंत्वन्यसहितयोरपितत्त्वप्रतीतिरितिनात्रद्वितीयेतिहलोनन्तराइत्यत्रकैयटेस्पष्टम्। ज
पमनुप्रावर्षद्इत्यत्रद्वितीयार्थोलक्ष्यलक्षणभावः संबन्धोनुद्योत्यः। कर्मप्रवचनीयसंज्ञत्वात्। हेतुतृतीयाबा
धकत्वाद्अत्रविभक्तेर्हेतुरपिद्योत्यः। लक्ष्यत्वं चज्ञानजन्यज्ञानविषयत्वम्। जपज्ञानेनहिजपकालज्ञानद्वारातदुत्त
रकालवैशिष्ट्येनवृष्टिर्ज्ञाप्यतेअतएवकदावृष्टइतिप्रश्नेइदमुत्तरम्। जपाभिन्नहेतुलक्षणकंवर्षणमितिबोधः उ
क्तं चक्रियायाद्योतकोनायंसंबन्धस्यनवाचकः॥ नापिक्रियापदाक्षेपीसंबन्धस्यतुभेदकइति। अस्यार्थः। प्रप
चतीत्यादौउपसर्गवन्नायंक्रियागतविशेषद्योतकः। विभक्त्यैवोक्तत्वात्संबन्धस्य न वाचकः नापिप्रादेशंविपरि
लिखतीत्यादौविशब्दवत्क्रियापदाक्षेपी। तत्रहिविनामानक्रियाक्षिप्यते। तथासतितत्क्रियानिबन्धनाकारक
विभक्तिरेवस्यादितिकर्मप्रवचनीययुक्तेद्वितीयेतिव्यर्थंस्यात् किंतुविशिष्टक्रियाजनितोयंसंबन्धोविभक्त्यर्थ
इतितद्द्योतकः। यथाप्रकृतेनिशमनक्रियाकृतः संबन्धइति॥ लक्षणपदार्थलक्षणंतुहरिणोक्तम्। आश्रितावधि
भावंतुलक्षणेलक्षणंविदुरिति। लक्षणेलक्ष्यवस्तुप्रकाशेआश्रितावधिभावमाश्रितमर्यादारूपम्। अनुहरिंसु

रा: स्वावधिकापकर्षरूपहीनत्वसंबन्धोऽनुद्योत्यो द्वितीयार्थः। हरिप्रतियोगिकापकर्षवन्त इत्यर्थः। उपहरिमित्यत्राप्येवम्। उपः स्वावधिकावधिकत्वसंबन्धस्यापि द्योतकः। उपसुरेषु हरिरित्यादौ। वृक्षं प्रति विद्योतते विद्युदित्यादौ लक्ष्यलक्षणभावः प्रत्यादिद्योत्यः। वृक्षप्रकाशेन हि तत्समीपदेशविशेषावच्छिन्ना विद्युत् ज्ञायते। भक्तो विष्णुं प्रति। अत्र भक्तत्वादिप्रकारविशेषरूपः संबन्धः प्रत्यादिद्योत्यः। भक्तपदार्थे विशेषणस्यापि तस्य संबन्धत्वम्। लक्ष्मीर्हरिं प्रति। हरिस्वामिकेति बोधः। वृक्षं वृक्षं प्रति सिंचति। अत्र वीप्साविषयो व्याप्यत्वं द्विर्वचनद्योत्यम्। व्याप्यत्वविशिष्टवृक्षादीनां च व्यापकत्वसंबन्धेन सेचनेऽन्वयः प्रत्यादिद्योत्यः। सेचने वृक्षादीनां कर्मत्वेऽपि तत्त्वेनाविवक्षायां कर्मप्रवचनीययुक्तत्वाद् द्वितीया। अत एव प्रत्यर्थं शब्दनिवेश इत्यादावर्थस्य निवेशनक्रियानिरूपिताधिकरणत्वेऽप्यर्थमर्थं प्रतीत्येवं विग्रहो भाष्यादौ दर्शितः। यदत्र ममाभिष्यात्तद्दीयताम्। अत्र यच्छब्दो भागवाची मत्संबन्धियद्भागकर्तृके तदधिकरणिकासत्ताप्रेरणाविषयस्तत्कर्मकं दानमिति बोधः। सर्पिषोऽपि स्यात्। अत्रापि शब्दबलाद्बिन्दूध्याहारेऽपेः पदार्थद्योतकता। संभावनायां लिङ्। बिन्दो सर्पिषद्रव्यस्यावयवावयविभावेनान्वयः। बिन्दुश्चाख्यातार्थकर्तर्यन्वेति। अपिः क्रियायां स्वद्योत्यबिन्दुदौर्लभ्यप्रयुक्तदौर्लभ्यस्यापि द्योतकः। शब्दशक्तिस्वभावात्। एवं च

CC-0. In Public Domain. Digitization by eGangotri

सर्पिरवयवबिन्दुकर्तृकात्तद्बिन्दुदौर्लभ्यप्रयुक्तदौर्लभ्यवती संभावनाविषयः सत्तेति बोधः। अपि स्तुयाद्विष्णुम्। सं
भावने लिङ्। अपिर्लिङर्थसंभावनायांक्रियागतशक्यत्वस्य विषयताद्योतकः। विष्णुकर्मिकास्ततत्कर्तृकाशक्यत्वेन सं
भाव्यमानास्तुतिरिति बोधः। विष्णुविषयायाः शक्यत्वसंभावने चान्यविषयानिश्चये न शक्येति फलति। एतेनापि वे
दान्तपारगमित्याद्यपि योगे स्वार्थे न तात्पर्यमिति धर्मशास्त्रग्रन्था व्याख्याताः। ईदृशेषु संभावनाविषयतया क्रि
यागतमौचित्यं द्योत्यम्। संभावितौचित्यस्य चानुष्ठानमयुक्तमिति स्वार्थे तात्पर्याभावः। मासमधीते। अत्यन्तसं
योगे व्याप्तिरूपे द्वितीया। मासपदेनावयवानतिरेकेण त्रिंशद्दिनसमूह उच्यते। व्यापकत्वं द्वितीयार्थः। तत्त्वं च
त्रिंशत्त्ववन्निष्ठप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नत्वम्। प्रतियोगिव्यधिकरणे
त्युक्तेर्दिनान्तरदण्डादावध्ययनाभावेपि न दोषः। एकदिनाध्ययने च न तथा प्रयोगः। तद्घटकदिनपदेन चावय
वानतिरेकेण सूर्योदयावधिसूर्योदयान्तरपर्यन्तक्षणसमूह उच्यते। एतेनैकैकक्षणव्यक्तेरपि मासत्वाधिकरणत
यातत्र प्रतियोगिव्यधिकरणाध्ययनाभावसत्त्वेन बाध इत्यपास्तम्। दिनं स्वपितीत्यादौ दिनपदमवयवानति
रेकेण त्रिंशद्दण्डकूटपरमतो नैकदण्डस्वप्ने तथा प्रयोगः। अवयवानतिरेकेण भानेप्येकवचनान्तत्वमेव। शब्दशक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वभावेनतत्त्वेपिअवयवगतसंख्यायाः समूहेनारोपात्। त्रिंशत्त्वादिकं चतात्पर्यवशात्तत्तत्त्रिंशत्त्वादिकमेवभासते।
एतेनैकमासव्यापकाध्ययनस्थलेपिमासान्तरेऽध्ययनाभावसत्त्वेनमासव्यापकतायाअध्ययनेबाधइत्यपास्तम्।
एवंक्रोशंकुटिलानदीत्यादौयत्किंचित्क्रोशत्ववन्निष्ठप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितानवच्छेद
कावच्छिन्नत्वंकुटिलादौभासते। क्रोशत्वादिकंतत्तत्संख्यावद्दण्डादिपरिच्छिन्नदेशत्वमेवेत्यन्यत्रविस्तरः॥ इति
द्वितीया॥ तृतीयायाःकर्तृकरणेअर्थः कर्तृकरणयोस्तृतीयेतिसूत्रात्। कर्तृत्वंचकर्तृसंज्ञाबोधितकर्तृत्वशक्तिम
त्वम्। साशक्तिश्चकर्तृप्रत्ययसमव्याहारेव्यापारतावच्छेदकसंबन्धेनतद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारता
नाश्रयतद्धात्वर्थाश्रयेवर्तते। स्वतन्त्रःकर्तेतिसूत्रस्वरसात्। उक्ततद्धात्वर्थाश्रयत्वमेवस्वातन्त्र्यम्। स्थालीस्थेय
त्ने कथ्यमानेस्थालीस्वतन्त्रेतिकारकइतिसूत्रेभाष्येउक्तेः। कालिकादिसंबन्धेनव्यापाराश्रयेतिप्रसङ्गवारणाय
संबन्धविशेषनिवेशः। एतेनसामग्रीसाध्यायांक्रियायांसर्वेषांस्वस्वव्यापारेस्वातन्त्र्यात्सूत्रेस्वतन्त्रइत्यव्याव
र्तकमित्यपास्तम्। प्रागुक्तस्वातन्त्र्यस्ययुगपत्सर्वेषुअभावात्। रूपवन्तंगच्छतीत्यादाउत्तरदेशसंयोगरूपेफ
लेरूपादौचनताद्दशधात्वर्थत्वमितितदाश्रयेरूपवतिनातिव्याप्तिः। कर्तृप्रत्ययसमभिव्याहारेइत्यनेनपक्वस्तण्डु

लोदेवदत्तेनेत्यादौफलस्यविशेष्यत्वेपिदेवदत्तस्यकर्तृत्वसिद्धिः। तत्रसतिसंभवेतद्धात्वर्थकृतिव्यापारोभयाश्रयत्वस
मानाधिकरणेवकर्तृताशक्तिरतोगुरुतरभारोत्तोलनादिविषयकयत्नसत्त्वेपिनतत्क्रियायाअनिष्पत्तौनतत्रकर्तृत्व
व्यवहारः। तत्रयत्नसत्त्वेनमानमित्यन्ये। धात्वर्थकृतिश्चसाध्यत्वाख्यविषयतयाक्रियाविषयैवग्राह्या। अतोम
त्तोभूतंनतुमयाकृतमितिव्यवहारस्यनानुपपत्तिः। नान्तरीयककृतिसाध्यपिष्टकमध्यस्थशर्कराभोक्तरिचनत
त्कर्तृत्वव्यवहारः। एतेनकृतिर्नाममनकाचिद्व्यापारातिरिक्तेत्यपास्तम्। आन्तरचेष्टाविशेषएववाकृतिरितिदिक्॥
तत्रव्यापारस्यधातुतएवलाभात्कर्तृत्वशक्तिमत्त्वेनकर्तातृतीयार्थस्तत्रप्रकृत्यर्थस्याभेदान्वयः। सचधात्वर्थेआ
धेयतयान्वेतितेनचैत्रेणसुप्यतेइत्यत्रचैत्राभिन्नकर्तृवृत्तिस्वापइतिबोधइतिप्राञ्चः। द्वितीयाप्रकरणोक्तदिशाक
र्तृचैत्रीयः स्वापइतिचैत्रकर्तृकः स्वापइतिवाबोधइत्युचितम्। यत्तुतत्तत्क्रियानुकूलकृत्याश्रयः कर्ता। कृञः कृत्यर्थ
कत्वेनकृप्रकृतिकतृचातथैवलाभात्। तत्राश्रयस्यप्रकृत्यालाभात्कृतिस्तृतीयार्थइति। तन्न। कृतेरपिधातु
लभ्यतायाउक्तत्वात्। रथेनगम्यतेइत्यादावचेतनेऽसंभवाच्च। विभक्तौलक्षणानौचित्यस्यप्रागेवनिवेदितत्वा
त्तत्राश्रयलक्षणेत्ययुक्तं कृञः कृतिमात्रवाचकत्वाभावाच्चेतिदिक्। यस्तुधात्वर्थश्चेतनमात्रवर्त्त्यैव। तत्राचेतन

स-
९६

स्यकर्तृत्वं चेतनत्वारोपेण तन्निष्ठक्रियारोपेण चेति दामहायनान्ताच्चेति सूत्रे भाष्ये स्पष्टम्। परे तु तत्तद्धात्वर्थीय
कारकचक्रप्रयोक्तृत्वसूत्रे स्वातन्त्र्यम्। तदुक्तं कारक इति सूत्रे भाष्ये प्रधानेन समवाये स्थाली परतन्त्रा व्यवाये
स्वतन्त्रा। किं पुनः प्रधानं कर्ता कथं ज्ञायते कर्ता प्रधानमिति यत्सर्वेषु कारकेषु सन्निहितेषु कर्ता प्रवर्तयिता भवतीति
॥ एवं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि स्वातन्त्र्यं तच्च प्रयोजकसन्निधानेऽपि प्रयोज्यस्य। तत्सन्निधानेऽपि स्वार्थ
सत्त्वे प्रवृत्तेस्तदभावेऽप्रवृत्तेश्च। एतच्च स्वतन्त्रः कर्तेति सूत्रे भाष्ये। तच्चारोपितमनारोपितं च संज्ञानिमित्तम्। आ
द्यं स्थाल्यादौ। अन्त्यं पुरुषे। यस्य च स्वातन्त्र्यविवक्षा तद्व्यापार एव च धातुना प्राधान्येनोच्यते शब्दशक्तिस्वभा
वात्। स्थाली स्वतन्त्रेति भाष्ये आरोपितस्वातन्त्र्यवतीत्यर्थः। तत्त्वं विना तद्व्यापारे धातोः प्राधान्येन वृत्त्यसंभवात्
। प्रधानधात्वर्थव्यापाराश्रयत्वमेव न स्वतन्त्रत्वम्। स्वतन्त्रपदस्य तत्रापरिभाषणात्। लोकेऽउक्तार्थयोरेव तत्प्र
वृत्तेरिति। अत एव प्रयोज्यस्यास्वतन्त्रत्वात् कर्तृसंज्ञा न प्राप्नोतीति पूर्वपक्षे तस्यापि स्वेच्छाधीनप्रवृत्तिकत्वरूपं
स्वातन्त्र्यं साधितं कर्तृसंज्ञासूत्रे भाष्ये इति दिक्। हरिरप्याह। प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि। त
दधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्। अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात्। आरादप्युपकारित्वे स्वातन्त्र्यं

राम.
९६

कर्तुरुच्यते इति॥ करणादिव्यापारात्पूर्वमेव करणादिसंपादकतया शक्तिमत्वेन करणादीनामात्माधीनत्वसंपादनेन च तेषां तदायत्तव्यापारवत्त्वे नातिप्रवृत्तानां तेषां निवर्तनेन च कर्तुः फलप्राप्तौ स्वत एव निवृत्स्या कर्तुः प्रतिनिध्यभावेन च कारकान्तराभावेऽपि अस्त्यादौ कर्तुर्दर्शने च दूरादुपकारित्वेऽपि कर्तुः स्वातन्त्र्यमिति तदर्थः। वस्तुस्थितस्येषां धर्माणामभावेऽपि शब्देन यस्यैते प्रत्याय्यन्ते स कर्ता। घटो भवतीत्यादौ बौद्धघटस्य कर्तृत्वम्। यद्वा घटपदेनोपादानकारणं मृदेव कार्यात्मना भवतीत्यर्थः। कार्यकारणयोरभेदस्य स्वीकारात्। यद्वा ब्रह्मण एवाविद्यावशादुपचरितनानात्वभावाभावरूपत्ववत्तद्रूपगतजन्मनाशव्यवहारोऽप्यविचारितरमणीयः सिद्ध इति बोध्यम्। पाचयति चैत्रेण मैत्र इत्यादौ प्रयोज्यस्य प्रयोजकव्यापाराधीनत्वेऽपि साधनान्तरविषये उक्तस्वातन्त्र्यात् कर्तृत्वमव्याहतम्। प्रेरणापारतन्त्र्ये उक्तस्वातन्त्र्यस्योपायत्वात्। धातुवाच्यक्रियाकृतस्वातन्त्र्यस्यैव विवक्षणात् कर्तृपरतन्त्रकरणादेर्न स्वव्यापारमादाय कर्तृत्वम्। किंच करणादीनां कर्त्रधीनत्ववत् न प्रयोज्यस्य प्रयोजकाधीनत्वं प्रयोज्यस्य स्वार्थसिध्यर्थं प्रवृत्तेः। नहि करणादीनां तादृशी प्रवृत्तिः। तदुक्तं निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये। अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धय इति। निमित्तं भृत्यादि। तन्निमित्तापि स्वार्थसाधनफलिकैव सेति स्वा

स्याश्रयानुवर्त्तनमात्रेणतु प्रयोज्यत्वमितिदिगित्याहुः। केचित्तु धात्वर्थव्यापाराश्रयत्वं साक्षात्परंपरया वा। तत्राद्यं प्रसिद्धम्। द्वितीयं पञ्चभिर्हलैः कर्षतीति। तत्र हि स्वाश्रयप्रयोजकत्वसंबन्धेन कर्तुर्धात्वर्थव्यापाराश्रयत्वम्। अन्यस्याप्रयोज्यव्यापारस्य धात्वर्थत्वे तदाश्रयाणां बहुत्वाद्बहुवचनापत्तिः प्रयोजकव्यापारस्यापि धातुवाच्यत्वे तु णिजापत्तिः। अन्तर्भावितण्यर्था इति प्रवादस्याप्ययमेवार्थ इति आहुस्तन्न। अन्तर्भावितण्यर्थत्वे न सकर्मकत्वोच्छेदापत्तेः। दृश्यते चान्तर्भावितण्यर्थत्वेन सकर्मकाणामपि द्विकर्मकता। तस्माद्धातूनामनेकार्थत्वाद् ण्यर्थान्तर्भावेणापि धातोर्वृत्तिः। परन्तु यत्र णिचोऽभावेऽपि तदर्थद्योतकमस्ति तत्रैव। यथा प्रकृते पञ्चभिर्हलैरिति। क्वचित्तु राकान्ते तूष्णीमासीनत्वादिकं तद्द्योतकम्। यदि तु द्वितीयकर्मरहितोऽपि तत्र प्रयोगदृष्टस्तदाप्रयोजकव्यापारस्यैव धात्वर्थत्वमाश्रित्य समाधेयः। कर्तृत्वं च विवक्षानिबन्धनम्। तेन स्थाल्यादिव्यापारस्य धात्वर्थत्वे स्थाली पचतीत्याद्यपि। तदुक्तं कारकइति सूत्रे भाष्ये स्थाली स्थे यत्ने कथ्यमाने स्थाली स्वतन्त्रेति। यत्नो व्यापारः। एवमेकस्यैवोपाधिभेदेन कर्तृत्वकर्मत्वकरणत्वानि भवन्ति यथात्मानमात्मना सृजसीति। तदुक्तं हरिणा। एकस्य बुद्ध्यवस्थाभिर्भेदेन परिकल्पने। कर्मत्वं करणत्वं च कर्तृत्वं चोपजायते इति। योऽपि णेरणाविति सूत्रे भाष्ये शरीरात्मान्तरात्मेत्यादिभेद उक्तः

CC-0. In Public Domain. Digitization by eGangotri

सोपिव्यावहारिकोबौद्ध एवेतिबुद्ध्यवस्थाभिरित्युक्तम्। बुद्धिकल्पितावस्थाभिरित्यर्थकम्। करणत्वंच करणताशक्तिमत्त्वम्। साचशक्तिः यद्व्यापाराव्यवधानेनक्रियानिष्पत्तिर्विवक्ष्यते तन्निष्ठा। अधिकरणादिव्यापाराव्यवधानेनापियदाक्रियानिष्पत्तिर्विवक्ष्यतेतदा तेषामपिकरणत्वमिष्टमेव। तदाहहरिः। क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्रकरणंतत्तदास्मृतम्। वस्तुतस्तदनिर्देश्यंनहिवस्तुव्यवस्थितम्। स्थाल्यापच्यतइत्येषाविवक्षादृश्यतेयतइति। विवक्ष्यतेइत्यनेनविवक्षैवव्याकरणेङ्गं नबाह्यवस्तुसत्तेत्युक्तम्। अतएवदात्राद्यनादरेणबलस्यतत्त्वविवक्षायांबलेनलुनातीत्यादिभवति तदाद्वस्तु तइति। इदमेववस्तुकरणमितिननियमः निश्चिताधिकरणत्वापिस्थालीतनुतरकपालत्वात् शीघ्रतरपाकसाधनत्वेनानुभवतिवैवक्षिकंकरणत्वमित्यर्थः। प्रकर्षश्चकर्तृपराधीनस्यापिनकरणान्तरापेक्षः किंतुकारकान्तरापेक्षएव। कारकसामान्यवाचिनः साधकशब्दादुत्पद्यमानेनतमपाततएवप्रकर्षबोधनात्। अतएवअश्वेनपथादीपिकयाव्रजतीतिभवति। करणंतृतीयार्थः। प्रकृत्यर्थस्यतत्राभेदेनान्वयः तस्यचस्वनिष्ठव्यापाराव्यवहितोत्तरोत्पत्तिकत्वसंबन्धेनधात्वर्थेन्वयइत्येके। करणबाणीयोवधइतिबाणकरणकइतिवार्थइतितत्त्वम्। अत्रबहवः। करणस्यचव्यापारएवान्वयोन

फलांशे शब्दशक्तिस्वभावात्। अतएवोद्भिदा यजेतेत्यादौ मत्वर्थलक्षणाभिया नामधेयत्वं सिद्धान्तितम्। अन्यथा व्यापारं प्रति करणत्वेनान्विते धात्वर्थफलांशे करणत्वेनान्वयोपपत्तौ लक्षणाया अप्रसङ्ग एव। अतएव सोमेन यजेतेत्यादौ छान्दसी मत्वर्थलक्षणेति मीमांसकाः। व्यापारे तदन्वये तु फलस्य करणत्वेनान्वयात् उत्पत्तिशिष्टकरणावरुद्धे करणान्तरस्यान्वयायोग्यतया सावश्यकेति वदन्ति। फलेप्यन्वये युगपत् फलांशस्य भावनानिरूपितं करणत्वं स्वकरणनिरूपितं साध्यत्वं चेति वैरूप्यं स्याद् इति सावश्यकेत्यन्ये। प्रकृत्या चारुरित्यादौ प्रकृत्यादिभ्य उपसंख्यानमिति तृतीया। सा च सर्वविभक्त्यपवाद इति भाष्ये स्पष्टम्। प्रकृतिर्यावदाश्रयभावी धर्मविशेषः। तेन तत्संबन्धि चारुत्ववानिति बोधः। प्रायेण याज्ञिक इत्यत्र प्रायशब्दो बह्वर्थः। बहुभ्याचारादिः। बह्वाचारज्ञाप्ययाज्ञिकत्ववानिति बोधः। यद्वा। प्रायशब्दः संभावनार्थः। संभावनाविषययाज्ञिकत्ववानिति बोधः। प्रायेणात्र याज्ञिका इत्यादौ बहवो याज्ञिका इति बोधः। नाम्ना सुतीक्ष्ण इत्यत्र नामज्ञाप्यतीक्ष्णत्ववानिति बोधः। एवं चरितेन दान्त इत्यादौ। सुरथो नाम राजेत्यादौ नामेति प्रसिद्धो सुरथ इति प्रसिद्धो राजेत्यर्थः। यद्वा नामभूतसुरथशब्दाभिन्नो राजेति बोधः। नाम्ना चन्द्रकलेत्यादौ नामभूतचन्द्रकलाशब्दाभिन्नेत्यर्थः। एवमवच्छेद्यत्वादीनां संबन्ध

CC-0. In Public Domain. Digitization by eGangotri

त्वविवक्षायांपटत्वेनजन्यत्वंप्रकारत्वमभाव इत्यादिप्रकृत्यादित्वात्साधु।अत्रचसर्वत्रकथंचित्करणत्वहेतुत्वा
न्यतरारोपेणतृतीयेतिभाष्यसंमतम्।अह्नाक्रोशेनवानुवाकोधीत इत्यत्रतृतीयार्थः संबन्धः क्तप्रत्ययार्थातीत
त्वमपवर्गेक्रियात्यागेफलप्राप्तिपूर्वकत्वंचतृतीयाद्योत्यम्।एवंचानुवाकविषयकमह्नः संबन्ध्यतीतमध्ययनमि
तिबोधः॥तेनफलप्राप्तिपूर्वकस्तत्यागोव्यज्यते।पुत्रेणसहागत इत्यादौ सहयुक्तेऽप्रधाने इति तृतीया।सहार्थ
श्चसमभिव्याहृतपदार्थसमानकालिकत्वरूपंसाहित्यं तत्समनियतमखण्डोपाधिरूपंवा।तृतीयार्थश्चक्रिया
समभिव्याहारेसहार्थबलात्प्रतीयमानतत्क्रियाकर्तृत्वादिकमेव।द्रव्यगुणसमभिव्याहारेसहार्थबलात्प्र
तीयमानस्तत्तत्पदार्थसंबन्धएव।एवंचपुत्रेणसहागतः पुत्रेणसहपितुर्गौः पुत्रेणसहस्थूलइत्यादौपुत्रक
र्तृकागमनसमानकालिकागमनवान्।पुत्रस्वामिकत्वसमानकालिकपितृस्वामिकत्ववतीगौः।पुत्रवृत्तिस्थौल्य
समानकालिकस्थौल्यवान् इत्यादिक्रमेणबोधः।तदुक्तंकाव्यप्रकाशे।सासहोक्तिः सहार्थस्यबलादेकंद्विवा
चकमिति।शब्दशक्त्या एकार्थाभिधायकपदंयत्सहार्थान्वयबलादनेकार्थाभिधायकंयथाकथंचित्तद्बोधकंसा
सहोक्तिरितितदर्थः।तत्रैकस्यार्थस्यवाचकमन्यस्याक्षेपकमितिबोध्यम्।उदाहरणेआगत इत्येतदुभयत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यागमनबोधकमितितद्व्याख्यातारः।पुत्रकर्तृकागमनसहितागमनवानितिवाबोधः।पुत्रादेरसहार्थयोग
स्यागमनादिद्वारकएवबोध्यः।केचित्समानदेशत्वरूपंतत्समनियतंवातदर्थः।यथामाषवापोत्तरंतत्रैवक्षेत्रे
तिलवापेपितिलैःसहमाषान्वपतिस्मेत्यपिभवति।स्पष्टंचेदंभाष्ये।यद्यपिपुत्रेणसहागतइत्यादौसत्वार्थसाम
र्थ्यात्प्रतीयमानक्रियाकर्तृत्वेनपुत्रात्तृतीयासिद्धा।नचक्तेनाभिधानम्।इतरसमभिव्याहारंविनापिप्रतीय
मानस्यप्रकृत्यर्थक्रियाकर्तुरेवतेनाभिधानात्।एवंपुत्रेणसहागमनंदेवदत्तस्येत्यादावुक्तरीत्याप्रतीयमानकृत्
प्रकृत्यर्थान्वयिनोःकर्तृकर्मणोरेवषष्ठीनतत्प्रतीयमानतदन्वयिनोरितिनदोषस्तथापिपुत्रेणसहस्थूलइत्याद्यर्थे
सूत्रम्।स्वान्वयिगुणद्वारासहयोगस्यपितापुत्रयोरविशेषेपिनपितुस्तृतीयाप्रधानत्वात्।अप्रधानग्रहणप्रत्या
ख्यानेपिपितुर्नसोपपदविभक्तेरितिन्यायादितिसर्वंभाष्येस्पष्टम्।गुणक्रियाद्रव्येर्गुणप्रधानभावेनद्वयोःसंब
न्धेसहशब्दप्रयोगोभवति।तत्राप्राधान्यंनामशाब्दगुणाद्यन्वयित्वाभावःउक्तेष्वागमनादिभिःपितुःशाब्दःपु
त्रस्यसहार्थबलात्प्रतीयमानैस्तैःसंबन्धादार्थःइतरसंबन्धंविनाप्रतीयमानत्वंचार्थस्यशाब्दत्वम्।तत्रउक्त
साहित्यवाचिसहशब्दप्रयोगेशाब्दत्वरूपविशेषणाभावकृतोविशिष्टाभावः।विद्यमानतावाचिसहशब्दयो

Nepal Sanskrit University, Balmeeki Campus

गेतु विशेष्याभावात्सः। स हैवं दशभिः पुत्रैर्भारं वहति गर्दभीत्यादौ दशसंख्याकपुत्राणां विद्यमानत्वेपीत्यर्थः। पुत्रे
ण सहयः सगतइत्यादौ वैशिष्ट्यादिरूपं साहित्यं सहार्थः। पुत्रसाहित्यवान्यः सगत इति बोधः। एवं तृतीयान्तार्थ
स्य शाब्दप्राधान्येपि प्रथमाद्यन्तार्थस्यान्याधीनत्वलक्षणमार्थमर्थे प्राधान्यं प्रतीयते। अतएव समकक्षयोर्म
ध्येन्यतरस्यापरेण सहागन्तव्यमित्युक्ते दुःखं दृश्यते। यत्तु प्रधानत्वं मुख्यत्वमत्र नगरेऽयं प्रधानमित्यादि
वत्तदभावरूपं चाप्रधानत्वं तृतीयावाच्यमिति तन्न। राज्ञा सह सेनागच्छतीत्यादौ तृतीयानापत्तेरुक्तभाष्य
विरोधाच्चेत्यन्यत्र विस्तरः। पादेन खञ्ज इत्यादौ विकारप्रयुक्तत्वरूपसंबन्धस्तृतीयार्थः। पादविकारप्रयुक्तसंस्थानधा
वैधुर्यवच्चरणवानिति बोधः। कायेन दशवक्त्रो मुखेन त्रिलोचन इत्यादौ प्रकृत्यादित्वात्तृतीया। अक्ष्णा काण इत्यत्र
चक्षुर्नाशवान्सचक्षुष्कः काणपदार्थः। अक्षिपदार्थो गोलकं गोलकविकारप्रयुक्तचक्षुर्नाशवान्सचक्षुष्क इति बोधः।
अतिशायने तमबिति सूत्रे भाष्ये त्वन्धानां काणतम इति काणिरयं सौक्ष्म्ये वर्तते सर्व इमे किंचित्पश्यन्ति अयमेषां का
णतम इति उक्तम्। अन्धानामपि ज्ञास्तवं काणत्वं विद्यते तत्रादर्शनप्रकर्षाश्रयः प्रत्ययस्तया च प्रसिद्धिरन्धानां का
णो राजेतीति कैयटः। जटाभिस्तापस इत्यादौ ज्ञाप्यत्वं तृतीयार्थः। जटाज्ञाप्यतापसत्ववानिति बोधः। दण्डेन घट इत्या

दौहेतुस्तृतीयार्थः। हेतुत्वमखण्डोपाधिः। दण्डाभिन्नहेतुजन्योघटइतिबोधः। हेतुर्दण्डोयइतिबोधइतिसूचितम्। अध्ययनेनवसतीत्यादौ फलस्याप्यध्ययनस्यज्ञानद्वाराहेतुत्वम्। उक्तंच हरिणा। अनाश्रितेतुव्यापारेकरणंहेतुरिष्यते। द्रव्यादिविषयोहेतुःकरणंनियतक्रियमितिच। व्यापारानावेशेपियोग्यतामात्रेणहेतुत्वम्। आदिनागुणक्रिये। क्रियाविषयेत्वनाश्रितव्यापारमेव। दास्यासंयच्छते। संयच्छतेर्दानपूर्वकोभोगोर्थः। दास्यैदत्त्वातांभुङ्क्त इत्यर्थः॥ इतितृतीया॥ कारकचतुर्थ्याः संप्रदानत्वशक्तिमानर्थः। साशक्तिश्चतत्तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयोयस्तन्निष्ठा कर्मणायमभिप्रैतीतिसूत्रात्। कर्मनिष्ठेत्यनेनकर्मणश्चतुर्थीनिमित्तत्वप्रदर्शनात्कर्मश्रुत्यपेक्षयाचतुर्थीश्रुतेर्बलवत्त्वंबोध्यते। अतएवक्रीतेसोमेमैत्रावरुणायदण्डंप्रयच्छतीत्यादौदण्डदानेनप्रतिपत्तिः किंतुद्वितीयापेक्षयाबलीयस्याचतुर्थीश्रुत्यामैत्रावरुणसंस्कारकमितिमीमांसकाः। यत्तुतत्तद्धात्वर्थकर्मसंबन्धजन्यफलंगोलाभकृतसुखादितद्भागित्वेनयदिच्छाविषयःससंप्रदानमिति। तन्न। सूत्राक्षरैर्वाच्यवृत्त्योक्तार्थालाभात्। तथाशाब्दबोधाभावाच्च। यदपिइच्छाविषयत्वमेवोद्देश्यत्वमिति। तदपिन। देवोरूपवानित्यादौउद्देश्यविधेयभावेनान्वयात्। देवेउद्देश्यत्वप्रतीतावपिइच्छाविषयत्वाप्रतीतेः। तस्मादुद्देश्यत्वमुद्देश्यादिपद

शक्यतावच्छेदकतया सिद्धं पदार्थान्तरमेव। क्वचिदिच्छाविषयत्वसमानाधिकरणमित्यन्यत्। विप्राय गां ददातीत्या
दौ विप्राभिन्नसंप्रदाननिष्ठोद्देश्यतानिरूपकं दानमिति बोधः। स्वत्वन्तूद्देश्यतानिरूपकत्वं संबन्धः। संप्रदानविप्रीय
मिति विप्रसंप्रदानकमिति वा बोधः क्रियाकारकभावः संबन्ध इति द्वितीयोक्तदिशोचितम्। पितृभ्यः श्राद्धं दद्यादि
त्यादौ स्वत्वेपि तु निरूपितत्वस्य बाधेपि स्वत्वनिवृत्तिपूर्वकपरमात्रस्वत्वापत्त्यनुकूलत्यागरूपदाधात्वर्थे पितॄणा
मुद्देश्यत्वसत्त्वान्न दोषः। परस्वत्वे हेतुश्च त्याग एव। अत एव विदेशस्थपात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पा
त्रस्य मरणेपि उद्देश्यपुत्रादिभिरेव पितृदायत्वेन तद्धनं विभज्य गृह्यते नान्यैरिति व्यवहारः। प्रतिग्रहस्तु लब्धा
वष्टगुणं पुण्यमित्युक्तेः प्रतिगृहीतधनदाने फलातिशयजनकः। अदृष्टार्थदत्तस्वीकार एव प्रतिग्रह इति परितोष
दत्ततिलतुरगादिस्वीकारे न दोषः। संसृष्टिस्थले साधारणस्वत्वोत्पादेपि ददातीत्यप्रयोगात् परमात्रस्वत्वानुकूले
त्युपात्तम्। तत्रापि स्वत्ववति स्वत्वानुत्पत्त्या पूर्वस्वत्वनाशाङ्गीकारात्। उपेक्षा तु न नियमतः परस्वत्वोत्पादिकेति न
तत्र ददातीति प्रयोगः। विक्रयोपि न तथा। मूल्यदानपूर्वकस्वीकाररूपक्रयस्यैव स्वत्वजनकत्वात्। स्वत्वं च दानादि
नाश्यं प्रतिग्रहादिजन्यमतिरिक्तपदार्थरूपम्। तच्च बहिरिन्द्रियवेद्यम्। स्वं पश्यामीत्यादिव्यवहारात्। तत्साक्षात्का

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रेचनदीयस्वत्वव्याप्यतदीययथेष्टविनियोज्यत्ववदिदमितिज्ञानंहेतुः।संप्रदानमनेकधोक्तम्। अनिराकरणात्कर्तु
स्त्यागाङ्गं कर्मणोप्सितम्।प्रेरणानु मतिभ्यांचलभतेसंप्रदानतामिति।आद्यं देवता।प्रेरणया याचकः।अनुमतो
पाध्यायः।खण्डिकोपाध्यायस्तस्मै चपेटां ददातीत्यत्रसंयोगविशेषानुकूलोव्यापारोददात्यर्थः।चपेटाप्रसृतकर
तलम्। नशूद्रायमतिंदद्यादित्यादौबोधनार्थः।मतिशब्देनतज्जनकंवेदादिरूपंशास्त्रमुच्यते।रजकायवस्त्रंददाती
त्यादौअधीनीकरणंतदर्थः।शेषत्वविवक्षायांरजकस्यवस्त्रमित्यपिभवति।अजांग्रामंनयतीत्यादौपरयाकर्मसंज्ञ
याबाधान्नदोषः।पत्येशेतेइत्यादौशयनादिक्रियायाअपिसंदर्शनप्रार्थनव्यवसायजन्यारम्भक्रियानिरूपितंकर्मत्व
म्।पिण्डीमित्यादौगम्यमानक्रियापेक्षकारकत्वदर्शनात्। हरिरप्याह।संदर्शनंप्रार्थनायांव्यवसायेत्वनन्तरा।व्यव
सायस्तथारम्भेसाधनत्वायकल्पते।पूर्वस्मिन्याक्रियासैवपरस्मिन्साधनंमतेति। संदर्शनंफलविषयःसंकल्पःत
त्प्रार्थनायांफलोपायविषयेभिलाषेसाधनंव्यवसायःक्रियाविषयस्यफलसाधनत्वेननिश्चयः तत्रानन्तराप्रार्थ
नासाधनम्।अभिलाषेसतिनिश्चयकरणात्।व्यवसायश्चारम्भेमानस्यांप्रवृत्तौसाधनंतेनचाप्यमानत्वेनप्रकृतक्रि
याकर्मत्वंलभते।पूर्वस्मिन्कालेयाक्रियासापरस्मिन्नुत्तरकालभाविनिसाधनम्। सापेक्षतयासिद्धस्यैवस्वसाधन

त्वात्। संदर्शनंतुनक्रियासाध्यंफलाभिलाषयोग्यताविशिष्टचैतन्यस्यैवतत्साधनत्वात्। एवंचकर्मणायमभितिसूत्रेणसंप्रदानत्वम्। पतिसंप्रदानकमारम्भकर्मभूतंपत्नीकर्तृकंशयनमितिबोधइतिस्पष्टंभाष्ये। कटंकरोतीत्यादौतुनैवंरीत्यातत्। अनभिधानात्। क्रियायायमभिप्रैतिससंप्रदानमितिवार्त्तिकमतेतुपतिसंप्रदानकंशयनमितिबोधः। तत्तत्संज्ञासूत्रैस्तत्तदर्थेतत्तत्कारकशक्तिमत्त्वबोधनात्। पशुनारुद्रंयजतेइत्यत्रफलाश्रयः करणत्वशक्तिमान्। उद्देश्यः कर्मताशक्तिमान्। कर्मणः करणसंज्ञासंप्रदानस्यकर्मसंज्ञेतिवार्तिकात्। पशुकरणकोरुद्रकर्मकोयागइतिबोधः। अग्नौकिलपशुःप्रक्षिप्यतेतदुद्देश्योपाद्रियतइतिभाष्यम्। हरयेरोचतेभक्तिः। विषयतासंबन्धावच्छिन्नप्रीत्यनुकूलस्तत्समानाधिकरणोव्यापारोरुचेरर्थः। तत्फलभूतप्रीतेःसमवायेनाश्रयोहरिःसंप्रदानत्वशक्तिमान्। रुच्यर्थानांप्रीयमाणइत्यनुशासनात्। समवायसंबन्धावच्छिन्नप्रीत्यनुकूलव्यापारः प्रीधातोरर्थः। अतएवहरिंप्रीणयतीत्यादिसिद्धिः। एतदभावेहिहरौषष्ठीप्राप्तेतिविशेषषष्ठ्यपवादोत्रचतुर्थी। केचित्तुप्रीतिविषयतामापद्यमानंमोदकंलौल्याद्देवदत्तःप्रयुङ्क्ते·तदानुगुण्यमाचरतीतिहेतुत्वेप्राप्तेइदम्। एवंचहेतुसंज्ञाभावेणिचोभावाद्धेतुगतव्यापाराप्रतीतेर्मोदकःस्वक्रियायांकर्त्ताभवति नतुदेवदत्तःउपात्तक्रियायांतस्यस्वात

न्याभावादित्याहुः। हरिसंप्रदानिकाभक्तिकर्त्तृकारुचिरितिबोधः। हरिनिष्ठायाभक्तिविषयाप्रीतिस्तदनुकूलोभक्तिनिष्ठोव्यापारइतियावत्। येतुप्रीसमानार्थोरुचिः कर्मसंज्ञापवादश्चेदंसंप्रदानत्वमितीच्छन्ति। तेषांप्रीयमाणइतिसूत्रनिर्देशात्प्रीधातुयोगेऽस्याप्रवृत्तिः कल्प्येतिगौरवम्। अभिलषतेश्चविषयतासंबन्धावच्छिन्नप्रीत्यनुकूलःप्रीतिव्यधिकरणोव्यापारोर्थइतिनतस्यरुच्यर्थत्वमितिहरिर्भक्तिमभिलष्यतीत्या दौनहरेःसंप्रदानत्वम्। गोपीस्मरात् कृष्णायश्लाघतेअत्रश्लाघतेर्बोधविषयास्तुतिरर्थः। बोधस्यफलतावच्छेदकःसंबन्धोवृत्तिता। स्तुतिश्चगुणवत्त्वप्रतिपादकशब्दप्रयोगादिः। स्मरादितिहेतौपञ्चमी। बोधाश्रयस्यश्लाघह्नुङ्स्थाशपांज्ञीप्स्यमानइतिसंप्रदानत्वम्। ज्ञीप्स्यमानपदेनप्रधानभूतण्यर्थकर्मणोग्रहणम्। सन्स्वारस्याद्यद्विषयकज्ञानानुकूलव्यापारस्तस्यप्रकृत्यर्थकर्मणोपितेनपदेनग्रहणम्। सअन्यथाज्ञाप्यमानइत्येववदेत्। तत्राद्येगोपीकर्तृकास्मरहेतुकृष्णसंप्रदानिकार्थात्कृष्णवृत्तिबोधविषयास्तुतिरितिबोधः॥ स्तुतिश्चात्मनःपरस्यवेतितुप्रकरणादिगम्यम्। अतएवकृष्णायगोप्यात्मानंपरंश्लाघ्यंकथयतीत्यर्थइतिप्राञ्चः। कर्मसंज्ञापवादोयम्। कृष्णस्यैववस्तुतस्त्वेतुपरत्वात्कर्मत्वमेव। यद्वागुणोत्कर्षेणश्लाघ्यमानःकृष्णोगुणवत्तयातत्समर्थाचरणेनारोपितप्रेरणात्वाद्

हेतुरितिहेतुत्वापवादइयम्।ह्नुतेइत्यत्रह्नौतेर्बोधविषयमितरादर्शनयोग्यदेशस्थापनमर्थः।आत्मानमित्यादेरध्याहा
रः।सपत्नीभियाचात्मादे स्तथास्थापनंबोध्यम्।एवंचगोपीकर्तृकाकृष्णसंप्रदानिकार्थात्कृष्णवृत्तिबोधविषयात्मकर्मक
तथावस्थानानुकूलाक्रियेतिबोधः।तिष्ठतेःस्वाभिप्रायबोधानुकूलास्थितिरर्थः।शपेःस्वाभिप्रायबोधानुकूलशपथक
रणमर्थः।कृष्णसंप्रदानकबोधानुकूलास्थितिस्तत्संप्रदानबोधानुकूलंशपथकरणमितिबोधः।यद्वा।श्लाघादेस्तुत्यादिपूर्विका
बोधनार्थः।स्तुत्याकृष्णमात्मानुरागंबोधयति।ह्नुत्यातंकृष्णंबोधयति।स्थित्याशपथेनतंकृष्णंबोधयतीत्यर्थः।प्रकृत्यर्थकर्मणोग्रहणेतुस्तु
त्याह्नुत्यास्थित्याशपथेनकृष्णांस्वसखीजनंज्ञापयतीत्यर्थः।भक्तायधारयतिमोक्षंहरिः।धृङ्‌अवस्थानइतिधातोर्णि
चावस्थानानुकूलोव्यापारोधारेरर्थः।तदर्थावस्थित्याश्रयसंबन्धीसंप्रदानंधारेरुत्तमर्णइतिसूत्रात्।हरिकर्तृकोभक्त
संप्रदानकोमोक्षकर्मकावस्थित्यनुकूलोव्यापारइतिबोधः।शेषषष्ठ्यपवादोयम्।अत्रोत्तमर्णोदानक्रिययाधारण
स्यनिमित्तंयतोसौवहणंददाति।ददातिश्चनश्रूयतेइत्यश्रूयमाणक्रियत्वात्शेषषष्ठीप्राप्ता।सर्वत्रविशेषविवक्षायाअभावे
क्रियानिमित्तत्वमात्राश्रयणेनशेषत्वंप्राप्तमितिबोध्यम्।तदुक्तंहेतुत्वेकर्मसंज्ञायांशेषत्वेवापिकारकम्।।रुच्यर्था
दिषुशास्त्रेणसंप्रदानाख्यमुच्यतइति।ननुऋणंनामसजातीयद्रव्यान्तरदानमङ्गीकृत्यपरहस्तपरकीयद्रव्यादानम्।

तज्जन्यो धर्मस्तदिष्टं परिशोधननाश्योदृष्टविशेषो वोभयथापिनेहप्राप्तिः मोक्षस्योक्तरूपकरणत्वाभावेन भक्तस्योत्तमर्णत्वाभावादिति चेन्न। अवश्यदेयत्वेन तत्रापि ऋणव्यवहारात्। पुष्पेभ्यः स्पृहयति। स्पृहयतिरिच्छामात्रवाची। इच्छानुकूलमनःसंयोगादिव्यापारवाची च। फलावच्छिन्नेच्छावाची च वा। आद्ये स्पृहेरीप्सित इति संप्रदानत्वम्। तत्रेप्सितत्वं धात्वर्थव्यापारजन्यफलाश्रयत्वम्। न तु फलस्य धात्वर्थत्वाग्रहः। कर्मसंज्ञा तु धात्वर्थफलाश्रयस्येत्युक्तम्। शेषषष्ठ्यपवाद एतत्संप्रदानविभक्तिः। पुष्पसंप्रदानिकेच्छेति बोधः। अन्त्ये कर्मत्वम्। पुष्पाणि स्पृहयतीति। संप्रदानस्यापि तत्त्वेनाविवक्षायां षष्ठ्येव। हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति। तत्र वधाद्यनुकूलव्यापारजनकश्चित्तवृत्तिविशेषः क्रोधः क्रुधेरर्थः। दुःखजनकक्रियारूपापकारजनकश्चित्तवृत्तिविशेषो द्रुहेः। धात्वर्थत्वोपसंगृहीतत्वादेतावकर्मकौ। विषयतयैतद्धात्वर्थमूलभूतकोपसंबन्धिनो हरेः क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप इति सूत्रेण संप्रदानत्वम्। हरिसंप्रदानको द्रोहः क्रोध इति बोधः। अत्र शेषषष्ठ्यपवादत्वम्। उत्कर्षविरोधिधर्मारोपानुकूलव्यापारजनकश्चित्तवृत्तिविशेष ईर्ष्या। शौचाचारादिगुणविषये दम्भादिकृतत्वरूपदोषारोपानुकूलश्चित्तवृत्तिविशेषोऽसूया। एते चित्तवृत्तिविशेषरूपकोपमूलकाः। प्ररूढस्य वाक्चक्षुरादिविकारानुमेयस्य कोपस्यैव क्रोधपदार्थत्वेन तस्यापि कोपमूलक

त्वम्। कुपक्रोध इति तु तद्वृत्तिकोपत्वसामान्यमादाय। कर्मसंज्ञापवादोऽत्र। हरिसंप्रदानकोत्कर्षविरोधीत्यादिक्रमेण बोधः। तद्धात्वर्थमूलभूतकोपविषयत्वे सति तद्धात्वर्थफलाश्रयस्यात्र संप्रदानत्वम्। सत्यन्तेन भार्यामीर्ष्यति मैनामन्योऽद्राक्षीदित्यादेर्व्युदासः। मित्राय द्रुह्यति प्रतापोपीत्यादौ चेतनत्वारोपो बोध्यः। द्वेषस्तु बलवद्दुःखसाधनताज्ञानजन्योप्रीतिजनकश्चित्तवृत्तिविशेषः। औषधं द्वेष्टीति यथा। एतदेवानभिनन्दनम्। तद्योगे तु नैतस्य वृत्तिः। क्रुधाद्यर्थत्वाभावात्। कृष्णाय राध्यति ईक्षते वा। अत्र प्रश्नविषयशुभाशुभपर्यालोचनं धात्वोरर्थः। तदर्थप्रश्नविषयसंबन्धिनः कृष्णस्य राधीक्ष्योर्यस्य विप्रश्न इत्यनेन संप्रदानत्वम्। कृष्णसंप्रदानकमर्याविकृष्णसंबन्धिप्रश्नविषयशुभाशुभपर्यालोचनमिति बोधः। विप्राय गां प्रतिशृणोत्याशृणोति वा। अत्र प्रवर्त्तनाजन्योऽभ्युपगमो धात्वर्थः। स्वार्थप्रवर्त्तनाश्रयस्य प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्ता इत्यनेन संप्रदानत्वम्। होत्रे तु गृणाति प्रतिगृणाति चेत्यत्र शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनं धात्वर्थः। धात्वर्थशंसनाश्रयस्यात्रानुप्रतिगृणश्चेत्यनेन संप्रदानत्वम्। शतेन शताय वा परिक्रीत इत्यत्र करणस्य पक्षे संप्रदानत्वम्। शतव्यापारस्प्रदानम्। फलेभ्यो याति अत्राहर्त्तुमिति तुमुनन्तार्थकर्मच तुर्थ्यर्थः। फलकर्मकाहरणफलकं यानमिति बोधः। एतद्बोधोपपत्तिराकाङ्क्षावादान्ते दर्शिता। यत्तु फलेभ्य

लं·मं इत्यत्राहरणक्रियाचतुर्थ्यर्थः। कर्मत्वप्रयोजकत्वेपूर्वपरयोः संसर्गाविति। तन्न। क्रियार्थोपपदस्यचकर्मणिस्थानिनइति
१०५ सूत्रसत्वेनेदृशेर्थेसाधुत्वेमानाभावात्। यागाययाति। अत्रप्रातिपदिकार्थेप्रथमापवादश्चतुर्थी। घञर्थंतुमुनासमाना
र्थः। यागफलकंयानमितिबोधः। नत्वांतृणायतृणंवामन्ये। अत्रकर्मद्वितीयाचतुर्थ्योरर्थः। तृणपदंतृणसदृशपरम्। त्वत्क
र्मकतृणसदृशकर्मकमद्वृत्तिज्ञानाभावइतिबोधः। त्वद्विशेष्यतृणसदृशप्रकारकेतियावत्। एवंचात्यन्तापकर्षःफ
लति। तत्रैवचेयंचतुर्थीसाधुरितिभाष्येस्पष्टम्। ग्रामंग्रामायवायाति। अत्रद्वितीयाचतुर्थ्योः कर्मैवार्थइतिसूत्रमतम्।
भाष्येतुयातेरेवारम्भपर्यन्तमर्थेनगम्यमानमारम्भंप्रतियात्याद्यर्थस्याकृत्रिमकर्मतयातेननाभिप्रेयमाणत्वाद्ग्रामस्य
संप्रदानत्वंफलाश्रयत्वेपितत्वस्याविवक्षा। एवंचग्रामसंप्रदानकोत्तरदेशसंयोगानुकूलव्यापारविषयकआरम्भइति
बोधः। अतिप्रसङ्गस्त्वनभिधानाद्वारणीयः। ग्रामंयातीत्यादौतदर्थाभावः कर्मत्वविवक्षाच। विप्रायौदनइत्यादौताद
र्थ्येचतुर्थी। तादर्थ्यमुपकार्योपकारकभावः संबन्धः। विप्रायदधीत्यादौविप्रकर्तृकभोजनोपकारकेउपकारकत्वारोपा राम
द्विप्रोपकार्योपकारकंदधीतिबोधः। मुक्तयेहरिंभजति। मुक्तिरूपोपकार्योपकारकंहरिकर्मकंभजनमितिबोधः। एवम
ध्ययनायवसतीत्यादिष्वपि। तादर्थ्यस्यापिसंबन्धत्वेनविवक्षायांषष्ठ्येव। यथागुरोरिदंगुर्वर्थमितिस्पष्टंभाष्ये। तादर्थ्ये १०५

स्यहेतुत्वानुगतत्वेपिकारणवाचकान्नतृतीयाकुण्डलायहिरण्यमित्यादौ।कार्यवाचकादुत्पद्यमानचतुर्थ्यैवकारणगतसंबन्धस्यबोधनात्।तस्मैइदंतदर्थंतच्छब्दउपकार्यवाचीइदमर्थउपकारकंतत्रोत्तरपदार्थस्यकारणरूपस्यज्ञापनीयत्वेनप्राधान्यात्तच्छब्दवाच्येगुणेसंबन्धउद्भूतइत्याहुः।सुखायपुण्यंनरकायपापमित्यादिसाध्वेव।तुमर्थघञन्तेपाकाययातीत्यादौघञातादर्थ्यस्योक्तत्वात् एतदप्राप्त्यातुमर्थाच्चभाववचनादित्यारब्धम्।भक्तिर्ज्ञानायकल्पतेकृपेरुत्पत्तिरर्थः।प्रथमापवादोत्र।कृपिसंपद्यमानेचेत्यनेननविकारवाचकाच्चतुर्थी।विकारेचप्रकृतिरूपारोपः।भक्तिरूपज्ञानकर्त्तृकोत्पत्तिरितिबोधः।भक्तिरत्रनिदिध्यासनरूपा॥प्रकृतिविकृत्योर्भेदविवक्षायांतुप्रकृतिविकृतिभावप्रतीतेर्जनिकर्त्तुरित्यपादानत्वेनभक्तिपदात्पञ्चमी।भक्तेर्ज्ञानंकल्पतेइति।ज्ञानस्यकर्त्तृत्वेनकारकविभक्तेर्बलवत्त्वेनचततःप्रथमेतिकैयटेस्पष्टम्।भक्तिर्ज्ञानात्मनापरिणमतेइत्यादावात्मशब्दस्तद्वृत्तिधर्मपरः।ज्ञानत्वविशिष्टरूपान्तरप्राप्तिर्भक्तिकर्त्तृकेतिबोधः।अत्रप्रकृतिविकृतिभावाप्रतीतेर्नचतुर्थी।किंतुप्रकृत्यादित्वात्तृतीया।वातायकपिलाविद्युत्।उत्पातेनज्ञापितेचेत्यनेनचतुर्थीप्राणिनांशुभाशुभसूचकोभूतविकारउत्पातः।ज्ञाप्यज्ञापकभावश्चतुर्थ्यर्थः।वातरूपज्ञाप्यज्ञापिकाकपिलाविद्युदितिबोधः।विप्रायहितम्।इष्टसाधनंहितपदार्थः।संबन्धश्चतुर्थ्यर्थः।विप्र

संबन्धिहितमितिबोधः। एवंसुखयोगेपि। विप्रायसुखमित्यादौ। हरयेनमः। नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्चेति चतुर्थी। अपकृष्टत्वज्ञानबोधनानुकूलोव्यापारः स्वरादिपठितनमः शब्दार्थस्तत्रापकर्षः प्रयोक्तृरूपविशेषनिष्ठो नमस्कार्यावधिकएवप्रतीयते। व्यापारश्च प्रयोक्तृनिष्ठः प्रतीयतेशब्दशक्तिस्वभावात्। अन्योच्चारितेननमः पदमात्रेणान्यदीयनत्वबोधनात्। सचव्यापारः करशिरः संयोगादिरीदृशशब्दप्रयोगश्च। चतुर्थ्यर्थउद्देश्यत्वम्। एवंचहर्युद्देश्यकउक्तव्यापारइतिबोधः। एषोर्घ्यः शिवायनमइत्यादौत्यागोनमः शब्दार्थः। त्यागश्चस्वस्वत्वनिवृत्त्यनुकूलोव्यापारः उद्देश्यत्वंचतुर्थ्यर्थः। शिवोद्देश्यकत्यागविषयोर्घ्यइतिबोधः। उद्देश्यत्वंविषयताविशेषरूपम्। त्यागश्चवेदबोधितोद्देश्यकत्वस्वप्रयोगकर्तृकर्तृकत्वोपरक्तएवप्रतीयतेशब्दशक्तिस्वभावात्। अन्योच्चारितनमः शब्देनान्यदीयद्रव्यत्यागाप्रतीतेः। ऋत्विग्भिश्चयजमानीयतत्तद्रव्येस्वीयत्वमारोप्यैवनमः शब्दः प्रयुज्यते। वेदबोधितेत्युक्तेर्ननीचोद्देश्यकत्यागेनमः शब्दप्रयोगः। अहंममेत्यभिमानरहितानांशिवादीनांद्रव्येस्वत्वाभावेपिशिवस्वंनप्रतिगृह्णीयादित्यादेः शिवोद्देशेनत्युक्तमित्यपिबोध्यः। संप्रदानञ्चतुर्थीत्वञ्चन। नमः पदार्थस्यक्रियात्वाभावात्। उद्देश्यत्वस्यसंबन्धत्वेनविवक्षायांषष्ठ्यपि। नमस्करोतिदेवानित्यत्रोपपदविभक्तेः कारकविभक्तिर्बलीयसीतिन्यायात्कर्मणिद्वितीयेतिशब्देन्दुशे

त्वरेस्पष्टम्। अत्रायंनमःशब्दोनिपातोद्योतकः।उक्तोनमः पदार्थोत्रकृधातोरेवार्थः॥स्वविषयविषयावधित्वसमानाधिकरणसमवायरूपेणफलतावच्छेदकसंबन्धेनस्वनिष्ठापकृष्टत्वज्ञानबोधरूपफलाश्रयत्वाद्देवानांकर्मत्वम्।नतुतटस्थस्यप्रेप्सितुरितिबोध्यम्। स्वविषयेत्यत्रस्वशब्देनापकृष्टत्वज्ञानबोधरूपंफलम्। नमःशब्दयोस्सार्थान्वयमात्रेणचात्रनमःस्वस्तीत्यस्यापिप्राप्तिः।यदात्वत्रापिनमःशब्दस्यवाचकत्वंतदाचतुर्थ्येव।तेननमस्कुर्मोनृसिंहायेतिसिद्धम्।नमःस्वस्तीतिसूत्रेचोभयोरपिनमःशब्दयोर्ग्रहणमितिदिक्। प्रजाभ्यःस्वस्तीत्यादौस्वस्तिशब्दोमङ्गलार्थः संबन्धश्चतुर्थ्यर्थः।प्रजासंबन्धिमङ्गलमित्यर्थः।मङ्गलाशंसास्थलेस्वस्त्यस्तुगोभ्यइत्यादौस्वस्तिशब्दार्थएवान्वयेनचतुर्थ्येव।गोसंबन्धिमङ्गलकर्तृकमाशंसाविषयोभवनमितिबोधः।यत्त्वाशीःस्वस्त्यर्थः साचपरहितेच्छा।हितान्वयिसंबन्धश्चतुर्थ्यर्थइति।तन्न।भूयादित्याशीर्लिङादेःप्रयोगानापत्तेः।प्रत्यभिवादइतिसूत्रभाष्यात्शूद्रेआशिषोऽभावेनस्वस्तिवृषलायेत्यादौचतुर्थ्यनापत्तेश्च।मङ्गलार्थोहितत्रस्वस्तिशब्दः।मङ्गलाङ्गीकारार्थत्वस्यैवप्रामाणिकैरुक्तेश्चेतिदिक्।स्वाहास्वधावषट्शब्दास्त्यागार्थकनमःशब्देनव्याख्याताः।दैत्येभ्योहरिरलंप्रभुःसमर्थः अलमाद्यर्थः सामर्थ्यवान्मारणादिसंबन्धित्वरूपःसंबन्धश्चतुर्थ्यर्थः।दैत्यमारणादिसंबन्धिसामर्थ्यवानितिबोधः॥ इतिचतुर्थी॥पञ्च

स्याअपादानत्वशक्तिमान् अर्थः।अपादानेपञ्चमीतिसूत्रात्॥ साशक्तिश्चप्रकृतधातूपात्तविभागजनकव्यापारानाश्रयत्वेसतिप्रकृतधात्वर्थविभागाश्रयोयस्तद्वृत्तिः।ध्रुवमपायेपादानमितिसूत्रात्। कर्त्तृवारणाय सत्यन्तम्।अयमेवसूत्रेध्रुवपदार्थः।विभागश्चनवास्तवसंबन्धमूलकएव किंतुबुद्धिकल्पितसंबन्धकल्पितोपि।अतएवजुगुप्सापूर्वकनिवृत्तिलक्षकतामाश्रित्यजुगुप्साविरामेत्यादिप्रत्याख्यानंभाष्योक्तंसङ्गच्छते।सूत्रेऽधोदेशसंयोगानुकूलव्यापाररूपंपातमात्रंतुनापायः।वृक्षमजहत्यपिपर्णेभूमिंस्पृशति वृक्षात्पर्णंपततीत्यप्रयोगात्।गतिंविनात्ववधिनानापायइतिकथ्यतइतिहर्युक्तेश्च।अवध्यन्वययोग्यविभागंविनेतितदर्थः तत्रमानमुक्तम्। वृक्षस्यपर्णंपततीत्येवंभाष्येनिदर्शितमिति।तत्रहिवृक्षःपर्णविशेषणमिति अपायस्याविवक्षणात्षष्ठीभाष्येउक्तेतिहेलाराजः।धावतोश्वात्पततिकुड्यात्पततोश्वात्पततीत्यादौपततीत्युपात्तक्रियानाश्रयत्वेनतांप्रत्यश्वस्यापादानत्वमक्षतम्। तदुक्तंहरिणा अपायेयदुदासीनंचलंवायदिवाचलम्।ध्रुवमेवातदावेशात्तइति।परेतुएवंसतिधावतःपततीत्यादावपादानत्वंकथमित्याशङ्क्याध्रौव्यस्याविवक्षितत्वात्ततोप्यविवक्षाभवतीतिसमाधानपरंभाष्यासङ्गतिः।पतधात्वर्थव्यापाराश्रयत्वरूपस्यत्वदुक्तध्रुवत्वस्यात्रासत्वेनसतोऽध्रौव्यस्याविवक्षेत्यस्यासङ्गतेः।तस्माद्वधिभावोपगमातिरिक्तावधित्वोप

योगिव्यापाराश्रयत्वे सतीति वक्तव्यम्। अयमेव ध्रुवपदार्थः। अपायेगम्ये विशेषे संयुक्तं ध्रुवत्ववदपादानमिति सूत्रार्थः। आ
सादेरवधिभावोपयोगित्वाभिमानेन शङ्कारसात्सर्पमित्यादौ तदभावान्नतस्य तदुपयोगिता प्रकृते विद्यमानस्यापि त
स्य तत्त्वेनाविवक्षितत्वान्न तदुपयोगित्वं तस्येत्युत्तरमित्याहुः। न चाद्यपक्षे परस्परस्मान्मेषावपसरत इत्यत्र दोष इति
वाच्यम्। तत्र मेषपदोपात्तयोरेव क्रियाश्रयत्वं परस्परपदोपात्तयोर्विभागाश्रयत्वमेवेत्यदोषात्। अत एव देवदत्तयज्ञदत्ता
वन्योन्यमाश्लिष्यत इत्यादौ तयोः कर्मत्वसिद्धिः। अन्यथापरत्वात्कर्तृत्वमेव स्यात्। आत्मानमात्मना हन्तीत्यादावन्तः क
रणाद्युपाधिभेदवत् प्रकृते शब्दरूपोपाधिभेदेन भेदः शब्दाल्लिङ्गितार्थस्यैव भानात्। स्पष्टा चेयं रीतिः कर्मवत्कर्मणेति
सूत्रे भाष्ये। हरिणा तु उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके। विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते इति तत्तद्व्यक्तित्वेन
विभागस्य बुध्या प्रविभागे तत्तद्विभागानुकूलक्रियावत्त्वस्यापरत्राभावादुभयोरपि ध्रुवत्वमित्यर्थः। तदेवोक्तं मेषान्त
रक्रियापेक्षमवधित्वं पृथक्पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथगि ति। अत्र वदन्ति। वस्तुतस्तत्तन्निष्ठयो
र्भेदेऽपि स्वधातुनानिवृत्तभेदस्यैवोपादानाद् उभयोरपि तत्क्रियाश्रयत्वेन परत्वात्कर्तृत्वापत्तेरत एवैकशेषसूत्रे भा
ष्ये उक्तम्। न वै तिङन्तान्येकशेषं प्रयोजयन्ति क्रियाया एकत्वादिति। अपसरणं विभागपूर्वकं पृष्ठतो गमनमित्यन्यत्र

ल·मं· विस्तरः।धात्वर्थेप्रकृतत्वंचनशब्दोपात्तत्वंकिंतुविवक्षितत्वमात्रमतएवधनुषाविध्यतीत्यत्रापादानसंज्ञांबाधित्वा
१०७ करणसंज्ञाइतिभाष्यंसंगच्छते।शरनिःसरणंप्रत्यवधिभावोपगमेनैवव्यधनेकरणताभ्युपगमेनोभयोरपिनिमित्त
निमित्तिभावेनस्थित्यायुगपद्विवक्षायांविप्रतिषेधोपपत्तेः।एवमन्यत्रापिबोध्यम्।कंसपात्र्यामन्नंभुङ्क्तेइत्यस्यतं
त्रस्थितमन्नंततउत्सृत्यभुङ्क्तेइत्यर्थइतितत्राप्युभयविवक्षाअपादानत्वशक्त्याश्रयएवावधिरित्युच्यते।यत्तुविभा
गःपञ्चम्यर्थः।आश्रयत्वंप्रकृतिप्रत्ययार्थयोःसंसर्गः।विभागस्यचजन्यजनकभावेनधात्वर्थेऽन्वयः।यद्वा।विभागआ
श्रयश्चपञ्चम्यर्थइति।तन्न।वृक्षापादानकेत्येवंबोधानुभवात्।वृक्षाद्विभजतेइत्यादौविभागस्यबोधारस्यापत्तेश्च।
तत्रापादानस्यैवपञ्चम्यर्थत्वेकिमर्धजरतीयेन।आद्येप्रकृत्यर्थविभक्त्यर्थयोस्तत्कृतस्याभेदान्वयस्यत्यागापत्ति
श्च।वृक्षात्पर्णंपतति।पतेर्विभागजन्यःसंयोगोऽर्थः।तत्रविभागेपञ्चम्यर्थोविशेषणंप्रकृत्यर्थश्चप्रत्ययार्थे।वृक्षरूपापा
दानकविभागेत्यादिरीत्याबोधः।वस्तुतोऽपादानवृक्षीयंपर्णकर्तृकंपतनमितिबोधः।वृक्षात्पर्णंभूमिंपततिअत्रविभागज राम
न्यसंयोगानुकूलव्यापारोधात्वर्थःविभागश्चफलतावच्छेदकः।वृक्षंत्यजतीत्यादौविभागानुकूलोव्यापारोऽर्थइतिकर्म
त्वमेव।वृक्षात्फलंत्यजतीत्यादौविभागजन्यसंयोगानुकूलव्यापारोऽर्थः।स्यन्देर्नविभागोऽर्थइतिवृक्षेस्यन्दतेइत्येव। १०७

चलतेस्त्वासनाच्चलितइतिप्रयोगादस्त्येवविभागार्थत्वम्। वृक्षाद्विभजतेइत्यादौविभागजन्यपूर्वदेशसंयोगनाशोर्थः।बला
हकाद्विद्योततेविद्युदित्यत्रविद्योततेर्विभागजन्यसंयोगानुकूलक्रियारूपनिःसरणपूर्वकविद्योतनेवृत्तिः। बलाहकापा
दानकविभागजन्यसंयोगानुकूलक्रियोत्तरकालिकंविद्युत्कर्तृकंविद्योतनमितिबोधः। इदमुपात्तविषयमित्युच्यते
।बलाहकोनामधूमज्योतिःसलिलमरुतांसङ्घातः। ततोवयवभूतज्योतिषोभेदविवक्षयाविभागविवक्षणात्सावधिः
।यदातुतेजसआधारत्वेनसविवक्ष्यते।तदाबलाहकेविद्योततइतिसप्तमी। यदात्वभेदेनविवक्षातेजोमयत्वात्प्रकाशन
सामर्थ्येउदकधूमादेस्तत्प्रकाशप्रतिबन्धकत्वाविवक्षणात्। तदाबलाहकोविद्योततेइति। यदातुप्रत्यक्षसिद्धमागमनं
मनसिनिधायकुतोभवानितिप्रश्नेपाटलिपुत्रादितिउत्तरयतितत्राकाङ्क्षावादोक्तरीत्यावाक्यैकदेशन्यायेनबोधः।एत
दपेक्षितक्रियमित्युच्यते।वृक्षात्पततीतितुनिर्दिष्टविषयम्। घटाद्भिन्नइत्यादावप्यनेनैवापादानत्वम्। सूत्रेऽपाय
शब्देनभेदस्यापिग्रहणम्। पञ्चमीविभक्तेइत्यत्रविभक्तशब्देनैव।तन्मूलकसंबन्धविवक्षायांघटीयोभेदइतिअपि।
भिदिर्विदारणइत्यत्रभेदज्ञानविषयत्वमपिविदारणम्। एकत्वेनगृहीतस्यतथाबोधेबुद्धिविदारणस्यतत्रापिसत्त्वादित्य
न्यत्रविस्तरः।अधर्माज्जुगुप्सते।अत्रानिष्टसाधनताज्ञानरूपानिन्दाजुगुप्सतेरर्थः।विषयतापञ्चम्यर्थः।जुगुप्साविराम

प्रमादार्थानामुपसंख्यानमितिवार्तिकात्। अनिष्टसाधनताज्ञानपूर्वकंवतोनिवर्त्ततइत्यर्थइतिभाष्यकृन्मतम्। तेनध्रुवमपायेइत्येवापादानत्वमाश्रित्यवार्त्तिकप्रत्याख्यानात्। धर्माद्विरमति। प्रागभावसाधारणकृत्यभावानुकूलोव्यापारोविरमतेरर्थः। योगक्षेमसाधारणीचानानुकूलता। सचव्यापारोधर्मविषयोपेक्षाविशेषएव। तदुक्तंभाष्येयएषमनुष्योनास्तिकबुद्धिर्भवतिसपश्यतिनेदंकिंचिद्धर्मोनामनैनंकरिष्यामीतिसबुध्वासंप्राप्यततोनिवर्त्ततेइतितेनहिकदापिधर्मानाचरणेपितथाप्रयोगइतिलभ्यते। एतेनजीवनकालावच्छिन्नःकृत्यसमानाधिकरणकृतिध्वंसोविरमतेरर्थः। कृतिश्चसर्वत्रैकविषयैव। जीवनमपिकर्तृसंबन्ध्येव। सामानाधिकरण्यंचसमभिव्याहृतकर्तृपदबोध्यशरीरजातीयशरीरघटितम्। चैत्रादिपदैःशरीरविशिष्टात्मबोधनात्। साजात्यंचचैत्रादिपदोपस्थापितचैत्रत्वादिजात्यैव। तेनभाविदेहान्तरावच्छेदेनधर्मकरणेपिवर्त्तमानशरीरावच्छिन्नेचरमकृतिध्वंसमादायविरमतिप्रयोगसिद्धिः। युवशरीरावच्छेदेनधर्मंकुर्वत्यपिबालशरीरावच्छिन्नकृतिध्वंसमादायनविरमतीतिप्रयोगः। नापिपूर्वपरकालयोर्धर्मकरणेमध्येमुहूर्त्तमात्रमकरणेविरमतीति प्रयोगः। तत्कृतिध्वंसस्यकृतिसमानाधिकरणत्वात्। पञ्चम्यर्थोविषयतेतिपरास्तम्। धर्माद्विरतोपिपुनःप्रवृत्तइत्यादेरनापत्तेश्च। धर्मात्प्रमाद्यति। अत्रेष्टसाधनेवस्तुनिसमानदेशत्वसमानकालत्वाभ

यसंबन्धेनाधिकारविशिष्टेष्टसाधनत्वाभावज्ञानमनिष्टसाधनत्वज्ञानं वाधात्वर्थः। पञ्चम्यर्थो विषयत्वं ज्ञानान्वयि। जुगुप्सादीनां यद्विषयत्वेन विवक्षा तदपादानम्। तत्पूर्वकनिवृत्तिपर्यन्तं सर्वत्र धात्वर्थ इति तद्भाष्यमतम्। चोराद्बिभेति। त्रायते वा। अनिष्टज्ञानं भयम्। अनिष्टपरिहारस्त्राणम्। अनिष्टहेतुरत्रापादानम्। भीत्रार्थानां भयहेतुरिति सूत्रात्। चोरापादानकानिष्टज्ञानं तदपादानकानिष्टपरिहार इति बोधः। सूत्रे भयहेतुरित्यस्य भयैकदेशानिष्टहेतुरित्यर्थः। यज्जन्यं भयमेव न प्रसिद्धं तत्र पञ्चमी न भवत्येव। तस्माद्दुष्टत्वेन तु हेतुत्वारोपेण सा। एवमेवान्तरिसे न जुहोति परमाणुं न पश्यतीत्यादेरुपपत्तिः। आरोपितस्यैव निषेधाद्बोधाच्च। भाष्यात्तु भयपूर्विका त्राणपूर्विका च निवृत्तिर्निवर्तना चानयोरर्थः। बुद्धिप्राप्तचोरापादानिकाप्रत्यासत्त्या तद्भयपूर्विका निवृत्तिस्तदपादानिकानिष्टपरिहारफलिका निवर्तनेति च बोध इति लभ्यते। चोरमध्यगतोपि तत्संपर्कफलवधादिति वर्तनात्तेभ्यो निवर्तत इत्युच्यते। एतद्विषयेपि हेतुत्वापादानत्वाविवक्षायां षष्ठी भवत्येवेति बोध्यम्। अध्ययनात्पराजयते। कृत्यसाध्यत्वधीसमानाधिकरणस्तद्विषयकोत्साहाभावो धात्वर्थः विषयोत्रापादानम्। पराजेरसोढ इति सूत्रात्। अध्ययनापादानको देवदत्तकर्तृक उत्साहाभाव इति बोधः। तत्पूर्विका निवृत्तिरिति वा। शत्रून् पराजयते इत्यत्र तिरस्कारानुकूलो व्यापारो धात्व

र्थः। आद्येअनिष्टंधात्वर्थअध्ययनजन्यमनिष्टमितिबोधइतितुनयुक्तम्। तथाबोधाननुभवात्। असोढशब्देनतद्
र्थालाभाच्च। प्रेक्षापूर्वकारीमनुष्योध्ययनस्यदुःखत्वदुर्धरत्वादिपर्यालोच्यबुद्ध्याप्राप्यततोनिवर्ततेइतिभाष्येण
सर्वथाध्ययनाप्रवृत्तावप्यस्यप्रयोगस्येष्टतयातत्रानिष्टस्याध्ययनजन्यत्वासंभवाच्च। यवेभ्योगांवारयति। अ
ग्नेर्माणवकंवारयति। कूपादन्धंवारयति। भक्षणसंयोगादिजनकव्यापाराभावानुकूलोव्यापारोधात्वर्थः। अभाव
प्रतियोगिव्यापारजन्यफलाश्रयोऽपादानम्। वारणार्थानामितिसूत्रात्। वारणार्थधात्वर्थफलाश्रयत्वमत्रेप्सि
तत्वम्। तेनभक्षणसंयोगाद्याश्रयत्वाद्यवादीनामपादानत्वम्। अनुकूलताचात्रयोग्यतारूपैव। तेनप्रतिषिद्धेगवि
भक्षयत्यपिअयंवारयतितथापिननिवर्ततइतिप्रयोगसिद्धिः। अप्रवृत्तवारणेप्ययंप्रयोगः। यदीमागावस्तत्रगच्छ
न्तिध्रुवंसस्यनाशस्तन्नाशेधर्मोराजभयंचबुद्ध्याप्राप्यनिवर्तयतीतिभाष्यात्। उक्तव्यापाराभावानुकूलानिवर्त
नाचतन्मतेधात्वर्थः। अन्धेभिमुखदेशगमनत्वेनान्धस्यकूपपतनमिच्छाविषयः। एवंनान्तरीयकविषभोजनप्र
सक्तौतद्वारणकर्तरिचैत्रंविषाद्वारयतीतिप्रयोगोभवत्येव। विषस्यविषत्वेनेच्छाविषयत्वाभावेपिभक्ष्यत्वेनेच्छा
विषयत्वात्। मातुर्निलीयतेकृष्णः। कृष्णकर्मकदर्शनाभावप्रयोजकदेशविशेषस्थितिर्धातोरर्थः। धात्वर्थदर्शने

कर्त्तात्रापादानम्। तत्पूर्वकनिवृत्तिर्धातोरर्थः। तत्र मातुरपादानत्वेनान्वय इति भाष्यमतम्। दर्शने मातृकर्तृकत्वं प्रत्यासत्तिगम्यम्। उपाध्यायादधीते। उच्चारणोत्तरकालिको नियमपूर्वको ग्रन्थस्वीकारानुकूलो व्यापारो धात्वर्थः। उच्चारणाश्रयोत्रापादानम्। अपादानत्वेनैव बोधः सर्वत्र। उपाध्यायान्निःसरन्तं ग्रन्थमधीत इत्यर्थः। अतिप्रसङ्गस्त्वानभिधानाद्वारणीय इति भाष्यमतम्। ब्रह्मणः प्रजाः प्रजायन्ते। उपादानकारणमत्रापादानम्। जनिकर्तुः प्रकृतिरिति सूत्रात्। सूत्रे प्रकृतिरुपादानकारणम्। ब्रह्मापादानिका प्रजाकर्तृकोत्पत्तिरिति बोधः। ब्रह्मणो निःसरमाणा जायन्त इत्यर्थः। निःसरणं लोकप्रसिद्ध्याश्रयं यद्यस्माज्जायते ततो निर्गच्छतीति लोकव्यवहारात्। स च व्यवहार उपादानकारणविषय एवेति भाष्यमतम्। पुत्रात्प्रमोदो जायते इत्यादावुपादानत्वारोपेणापादानत्वं बोध्यम्। हिमवतो गङ्गा प्रभवति। प्रथमप्रकाशोत्र धात्वर्थः। तदाधारो हिमवदादिरत्रापादानम्। हिमवदपादानको गङ्गाकर्तृकः प्रथमः प्रकाश इति बोधः। हिमवतो निःसरमाणा प्रकाशत इति वार्थः। प्रासादात्प्रेक्षते इत्यादौ वाक्यैकदेशन्यायेन बोधः। पञ्चम्यर्थः ल्यबन्तार्थक्रियाकर्म। आसनात्प्रेक्षते इत्यादावुपविश्येत्याद्यर्थोधिकरणं पञ्चम्यर्थः। प्रासादादितो निःसरता चक्षुषा तद्दृश्यं वा प्रेक्षत इत्यर्थः। प्रासादस्थपुरुषान्निष्क्रमणमेव प्रासादावधिकत्वेनोपच

र्यत इतिभाष्यमतम्। वनाद्ग्रामो योजने योजनं वा। अत्राव्यवहितोत्तरत्वं पञ्चम्यर्थः। स्वाव्यवहितोत्तरवृत्तित्वं प्रथमासप्तम्योरर्थः। एवं च वनाव्यवहितोत्तरयोजनाव्यवहितोत्तरदेशवृत्तिर्ग्राम इति बोधः। कार्तिक्या आग्रहायणी मासे इत्यत्र स्वावयवकत्वं पञ्चम्यर्थः। स्वाव्यवहितोत्तरकालवृत्तित्वं सप्तम्यर्थः। कार्त्तिक्यवयवकत्रिंशत्तिथ्यात्मकमासाव्यवहितोत्तरकालवृत्तिराग्रहायणीत्यर्थः। वनान्निःसृत्य योजने गते ग्राम इत्यतः प्राप्य इत्यध्याहारेण बोधः। निःसृत्येति परावरयोगे चेति क्त्वा। वनावधिकविभागानुकूलव्यापारसंबद्धे योजने गते ग्रामः प्राप्य इति बोधः। योजनमित्यस्य प्रथमान्तत्वे गतं चेदिति शेषः। कार्तिक्या इत्यादेरपि ततः प्रभृति गते मासे आग्रहायणीत्यर्थ इति भाष्यमतम्। अत्र सर्वत्र भाष्यसंमत एवार्थे साधुत्वं यथोत्तरं मुनीनां प्रामाण्यात्। सर्वत्र तत्तत्कारकत्वाविवक्षायां षष्ठ्याः साधुत्वमिष्टमेवानभिधानं वेति तत्त्वम्। घटादन्य इत्यादौ स्वप्रतियोगिकभेदसंबन्धः पञ्चम्यर्थस्तेन प्रकृत्यर्थस्यान्यस्मिन्नन्वयः। एतेन घटादितरो व्याख्यातः। अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्त इति पञ्चमी। अन्य इत्यर्थग्रहणमिति तु भाष्यानुक्तत्वादितरग्रहणाच्चायुक्तमित्यन्यत्र निरूपितम्। घटाद्भिन्न इत्यादौ तु गतिरुक्ता। वनादारात्। आरा दूरसमीपयोः। ऋते कृष्णान्नोत्पद्यते सुखम्। अत्रर्ते शब्दार्थः संसर्गाभावः।

प्रतियोगित्वंपञ्चम्यर्थः। कृष्णशब्दस्तद्भक्तिलाक्षणिकः। कृष्णभक्तिप्रतियोगिकाभावप्रयोज्यःसुखकर्तृकोऽस्यभावइतिबोधः। कृष्णादृतेदुःखम्। अत्रऋतेशब्दार्थस्यसामानाधिकरण्येनेतरत्रान्वयः। कृष्णभक्त्यभावसमानाधिकरणंदुःखमितिबोधः। कृष्णादृतेनरःशोच्यः। अत्राभाववान्तदर्थः। कृष्णभक्त्यभाववान्नरःशोच्यइतिबोधः। कृष्णादृतेनधनुर्धरइत्यत्रभेदवान्तदर्थः। कृष्णभिन्नोनधनुर्धरइतिबोधः। एतद्योगेद्वितीयापि। यथाऋतेवातंवृक्षःपततिवाताभाववान्वृक्षःपततीतिबोधः। वृक्षपतनेवातजन्यत्वाभावलाभस्त्वार्थः। पूर्वोग्रामात्। उदयाचलसन्निहितदेशःपूर्वपदार्थः। पञ्चम्यर्थोवधित्वम्। पूर्वत्वंचतदपेक्षोखण्डोपाधिः। एवंपरत्वाद्यपि॥ ग्रामावधिकपूर्वत्ववान्इत्यादिक्रमेणान्वयः। चैत्रात्पूर्वःफाल्गुनः। प्रतियोगितद्ध्वंसानधिकरणकालभावःपूर्वपदार्थः। तत्तदवधिबोधकपदसमभिव्याहारवशाच्चतद्रूपप्रतियोगितद्ध्वंसानधिकरणकालस्यतत्त्वेनभानम्। चैत्रावधिकपूर्वकालभवःफाल्गुनइतिबोधः। प्रतियोगितद्ध्वंसानधिकरणकालत्वस्यशक्यतावच्छेदकत्वेगौरवम्। प्रत्येकखण्डशःशक्तौशक्यानन्त्यम्। चैत्ररूपप्रतियोगिचैत्रध्वंसेतदुभयानधिकरणचैत्रावधिककालभवःफाल्गुनइतिबोधाङ्गीकारेएकस्यचैत्रस्यानेकधान्वयाङ्गीकारेगौरवमव्युत्पत्तिश्चैवमन्यत्रापिबोध्यम्।

CC-0. In Public Domain. Digitization by eGangotri

कालस्यक्रियामात्रपरिच्छेदकत्वात् तद्भवपर्यन्तंपूर्वादिशब्दानामीदृशेषुलक्षणा। लक्षणाभावेतुचैत्रात्पूर्वंफाल्गुनइत्येवप्रयोगः। अस्तीत्यादेरध्याहारः। पूर्वमित्यधिकरणशक्तिप्रधानम्। चैत्रात्पूर्वोमाघइत्यादौतात्पर्यवशाद्यथायथंत्रिंशद्दिनव्यवहितस्योक्तकालस्यतत्वेनभानम्। चैत्रात्परः। अत्रतत्तदवधिसमभिव्याहारवशात्तद्ध्वंसाधिकरणकालः परशब्दार्थः। कृष्णात्परोऽर्जुनइत्यत्रकृष्णोत्पत्तिकालध्वंसाधिकरणकालः परत्वेनपरशब्दार्थः तत्रैवकृष्णस्यावधित्वंतथाव्यवहारात्। प्रयागादुत्तरंकाशीत्यादौसंयुक्तसंयोगवद्देशउत्तरत्वेनोत्तरमित्यधिकरणशक्तिप्रधानाव्ययार्थस्तस्यचपूर्वदक्षिणपश्चिमादेस्तात्पर्यवशात्तत्वेनतत्तत्प्रयोगेषुभानम्। गृहाद्गङ्गाममपराकाश्याः सैवापराममेत्यादौविप्रकृष्टदेशस्थः सन्निकृष्टदेशस्थश्चपरत्वादिनापरापरशब्दार्थः। अवधिःपञ्चम्यर्थः। गृहावधिकमत्संबन्धिकपरत्ववतीगङ्गेत्यादिक्रमेणबोधः। ममेत्यत्रतुनपञ्चमी। प्रत्यासत्त्यायस्ययत्रोत्थिताकाङ्क्षातद्वाचकादेवतत्तन्निमित्तविभक्तिस्वीकारात्। परादिपदंचावधावेवलियताकाङ्क्षंनसंबन्धिनीतिस्पष्टमेव। प्राक्प्रत्यग्वाग्रामादितिपूर्वादिशब्दैर्व्याख्यातम्। भवात्प्रभृतिआरभ्यवासेव्योहरिः। अत्रप्रभृतीत्यारम्भेत्यर्थकमव्ययम्। तदर्थयोगेपञ्चमी। अपादानेपञ्चमीतिसूत्रेयतश्चाध्वकालनिर्माणंततःपञ्चमीकार्तिक्याआग्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हायणीमासेइतिवार्तिकप्रत्याख्यानायभाष्येउक्तमिदमत्रप्रयोक्तव्यंसन्नप्रयुज्यतेकार्त्तिक्याःप्रभृत्याग्रहायणीमा
सेइति।तेनैतदर्थयोगेपञ्चमीतिवचनसत्त्वंसूचितम्।अतएवतदप्रयोगेपिपञ्चमीसिद्धिः।अवधिमादायेतितद
र्थः।आरभ्येत्यस्यचैतदर्थकतापि।तस्यावधित्वंचसमभिव्याहृतपदार्थापेक्षम्।यथाप्रकृतेमरणान्तकालस्यभवोव
धिः।मरणान्तकालावधिभवकालमादायतावत्कालंहरिःसेव्यइतिबोधः।आरभ्येत्यस्यगृहीत्वेत्येतन्मात्रार्थकत्वआ
द्यक्षणमारभ्येत्यादौकर्मत्वाद्द्वितीया।प्रभृतिशब्दस्यतुअधातुत्वेनतदर्थस्याक्रियात्वात्नतद्विशेषणेद्वितीया।तदर्थक
स्यारभ्येत्यस्यापिवाक्यैकदेशन्यायेनतदर्थकतेतिनतद्विशेषणस्यतत्वम्।यञ्चाभवावधिकेमरणान्तकालेभवका
लमादायहरिःसेव्यइतिबोधः।तत्रगम्यमानक्रियापेक्षभवस्यावधित्वमित्यपादानत्वादेवात्रपञ्चमी।तच्चावधि
मादायेत्याद्यर्थयोगेनतद्बोधकप्रभृत्यादियोगेनचगम्यते।अप्रयोगेपिवाक्यैकदेशन्यायेनतत्प्रतीतिःपञ्चमीबलादे
वतात्पर्यवशाच्च।एवंकार्त्तिक्याआग्रहायणीमासेइत्यतोपिकार्त्तिक्यवधिकेआग्रहायणीघटितेमासेकार्त्तिकीमादा
यगतेसतिआग्रहायणीतिबोधइत्यलम्।यद्वात्वारभ्येत्यस्यप्रथमक्रियारूपमारम्भंकृत्वाइत्यर्थस्तदातद्योगेसप्त
मीपि।आरभ्य[illegible]स्यांदशमींतुयावत्संपूजयेदितियथा।ग्रामाद्बहिः।बहिःशब्देनसमभिव्याहृतपदार्थतावच्छेदका

नधिकरणस्तत्सन्निहितदेशस्तत्स्थवस्तु च बहिष्ठे नोच्यते बहिर्योगे पञ्चमी समासविधानसामर्थ्यात्तद्योगे पञ्चमी। बहिष्ठं च नियतमवध्याकाङ्क्षमिति स पञ्चम्यर्थः। अपहरेः परिहरेः संसार इत्यत्रापपरी कृते शब्दसमानार्थौ। हरिशब्दस्तु भक्तिपरः। आमुक्तेः संसारः। अत्र मर्यादाङोऽर्थः। तत्र मर्यादा द्विविधा। कालरूपा देशरूपा च। कालगतमर्यादात्वं स्वस्वोत्तरकालोभयप्रागभावाधिकरणकालभवो यः समभिव्याहृतपदार्थस्तदनधिकरणत्वम्। मुक्तिपरं तत्कालपरम्। मर्यादामर्यादिभावसंबन्धः आङ्द्योत्यः पञ्चम्यर्थः आङ् मर्यादाभिविध्योरिति सूत्रस्वरसात्। मुक्तिमर्यादकः संसार इति बोधः। संसारे मुक्तिकालप्रागभावाधिकरणनिरूपिततद्भिन्नकालावृत्तित्वविशिष्टव्यापकताबोधस्त्वार्थः। एतदर्थद्योतकयावच्छब्दयोगे तु ततोऽन्यत्रापि दृश्यत इति द्वितीया। कार्त्तिक्या यावच्छीतमिति यथा। प्रभृत्यर्थयोगे पञ्चमी। कार्त्तिकीप्रभृति वैशाखीमर्यादकं शीतमित्यर्थः। शीते कार्त्तिक्यादिवैशाखीपूर्वतिथ्यन्तकालनिरूपिततद्भिन्नकालावृत्तित्वसमानाधिकरणव्यापकताबोधस्त्वार्थः। व्यापकत्वमन्यत्रोक्तदिशोह्यम्। प्रयागात्प्रभृत्याकाश्या वृष्टो देव इत्यादौ देशो मर्यादा। देशगतमर्यादात्वं च स्वस्वोत्तरदेशयोः प्रयागतदाद्यन्तरालदेशवृत्तिसमभिव्याहृतपदार्थवृष्ट्याद्यनधिकरणत्वम्। प्रयागादिकाशीमर्यादकवृष्टिकर्त्ता देव इति बोधः। वृष्टे प्रयागादिका

शीपश्चिमदेशनिरूपितस्वभिन्नावृत्तित्वसमानाधिकरणव्यापकताबोधस्त्वार्थः। आसकलाद्ब्रह्म॥ आङ्द्योत्योऽभिविधिरूपःसम्बन्धःपञ्चम्यर्थः। सकलव्यापकंब्रह्मेतिबोधः। सोऽपिद्विविधः। कालिकोदैशिकश्च। आद्योयथा। कार्त्तिक्याश्चैत्रंयावच्छीतम्। कार्त्तिकीप्रभृतिचैत्रान्तकलव्यापकंशीतमितिबोधः। चैत्रपदंतदन्त्यकालपरम्। अन्त्यंयथा। काशीतःपाटलिपुत्रंयावद्वृष्टोदेवः। काशीप्रभृतिपाटलिपुत्रान्तदेशव्यापकत्वंवृष्टेःप्रतीयते। अनयोस्तात्पर्यवशात्कदाचिद्व्यापकत्वंतद्भिन्नकालावृत्तित्वविशिष्टंतद्भिन्नदेशावृत्तित्वविशिष्टंचप्रतीयतइतिबोध्यम्। प्रद्युम्नःकृष्णात्प्रति। सदृशःप्रत्यर्थः। कृष्णसदृशइतिबोधः। तिलेभ्यःप्रतियच्छतिमाषान्। अत्रग्रहणपूर्वकंप्रत्यर्पणंप्रतिसमभिव्याहृतयच्छतेरर्थः। तिलग्रहणपूर्वकंमाषप्रतिदानमितिबोधः। शताद्बध्यः। हेतुर्हेतुमद्भावःपञ्चम्यर्थः। शतहेतुकबन्धनकर्मेतिबोधः। एवंजाड्याद्बद्धइतिबोध्यम्। धूमादग्निमानित्यादौज्ञाननिष्ठजन्यजनकभावस्यविषयेआरोपोबोध्यः। पृथग्विनानाना॰रामंरामाद्रामेणवा। पञ्चम्यादीनांप्रतियोगित्वमर्थः। पृथक्त्वंगुणविशेषइत्येके। भेदइत्यन्ये। अन्त्येइमौभ्रातरौपृथग्जातावितिव्यवहारोगौणः। विनानानाकृतेशब्दसमानार्थे। स्तोकेनस्तोकाद्वामुक्तः। करणमत्रविभक्त्यर्थः। स्तोकशब्दःस्वप्रवृत्तिनिमित्ताल्पत्वधर्मपरः। शुक्लादिवदेतेकेवलधर्मपराअपि। एवंचासत्त्ववचनता॥

व्यु·सं·
११३

सत्त्वत्वं च सर्वनामपरामर्शयोग्यत्वम्। करणत्वं च तस्य परंपरया। ईदृशार्थ एव साधुत्वम्। करणे च स्तोकाल्पकृच्छ्रक
तिपयस्यासत्त्ववचनस्येति सूत्रात्। तेन ह्यत्र तृतीयापञ्चम्यौ। एवं कृच्छ्रादियोगेऽपि। ग्रामस्य दूरात् दूरेण दूरं वा ग
तं अत्र पञ्चम्याद्यर्थः प्रातिपदिकार्थे। दूरदेशवृत्तिदूरशब्दार्थः। षष्ठ्यर्थः संबन्धः। ग्रामसंबन्धिदूरदेशवृत्तिगमनमि
ति बोधः। एतेन ग्रामस्यान्तिकादि स्याद्व्याख्यातम्। समीपदेशवृत्त्यन्तिकार्थः। इति पञ्चमी। अथ षष्ठी॥ षष्ठ्यर्थः संब
न्धत्वेन तत्तद्रूपेण च स्वस्वामिभावादिः संबन्धः संबन्धत्वेन क्रियाकारकभावश्च। अत एवानेकसंबन्धसत्त्वेऽपि स्वत्वा
दिसंबन्धविशेषतात्पर्येण चैत्रस्य नेदं वास इति प्रयुज्यते। अत एवैकशतं षष्ठ्यर्था इति षष्ठी स्थानेयोगेति सूत्रस्य
भाष्यं संगच्छते। द्वितीयादितश्च क्रियाकारकभावस्य तत्तद्रूपेणैव बोधः तथैवानुभवात्। मातुः स्मरतीत्यादौ च तत्त
द्रूपेण बोधे द्वितीयादीनां बाधिकानां सत्त्वात् संबन्धत्वेनैव बोधः। मातृसंबन्धिस्मरणमिति नव्याः। प्राञ्चस्तु अत्रापि क्रि
याकारकभावमूलकं विशेषणत्वरूपं विषयत्वमेव निमित्तत्वमेव वा तत्त्वेन संबन्धत्वेन वा विवक्षितम्। अत एव हरि
णा। संबधः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः। श्रुतायामश्रुतायां वा क्रियायामभिधीयते इति। क्रियाकारकपूर्वकत्व
मेव संबन्धस्योक्तम्। क्रियाकारकभावसंबन्धः कारणं शेषसंबन्धस्तु फलभूतः। यथा राज्ञः पुरुष इत्यत्र राजपुरुषो

राम·
११३

कर्तृसंप्रदानरूपावभूतांराजापुरुषायददातीति।तन्मूलकस्वस्वामिभावप्रतीतौकर्त्रादिविशेषरूपतानवगमः।कारकशब्देनचश्लोकेकरणत्वादिशक्तयउच्यन्ते अश्रूयमाणादानादिक्रियासंबन्धलक्षणकार्यानुपपत्त्यानुमीयमानासन्निहितेति तन्मुखेनसमन्वयः।सिद्धस्वभावानांद्रव्याणांतांविनापरस्परसंबन्धाभावात्।क्रियाहिनिःश्रयणीवसंबन्धंकरोति।एवंचसंबन्धिनोरप्यनुमीयमानक्रियानिमित्तत्वरूपंकारकत्वमस्ति।मातुःस्मरतीतिश्रुतायाम्।तत्रहिक्रियाकर्मत्वमूलकउक्तःसंबन्धः।सामीप्याद्यपिबुद्धिस्थैकदेशाधिकरणकस्थितिक्रियाकर्तृत्वनिमित्तकमित्याद्यूह्यम्।अतएवपर्वतस्यवृक्षादितिन।वृक्षपर्वतयोराधाराधेयभावमूलकसंबन्धाभावात्।संयोगादिनाधाराधेयभावमूलकोविपरीततस्यैवतन्मूलकत्वात्।किंचसंयोगोनसंबन्धः।संबन्धस्यपदार्थयोजनामात्रहेतुत्वात्।संयोगस्यस्वतःपदार्थत्वात्।सांसर्गिकविषयतयातस्याभानाच्च।संबन्धश्चषष्ठ्यादिभिरेवोच्यते।संबन्धपदेनापिसांसर्गिकविषयतावत्त्वेननोच्यतइतिसंबन्धःसर्वथापदागम्यः।संयोगस्तुनकदापिषष्ठ्यादिभिस्तयाविषयतयोच्यते।इमौसंयुक्तावित्येवतत्रव्यवहारात्।तत्रसंबन्धव्यवहारस्तुउभयाश्रितत्वरूपसंबन्धधर्मवत्त्वाद्गौणः।अतएवमतुप्सूत्रेवृक्षवान्पर्वतइत्याद्यर्थेसप्तम्युपादानंगोमान्देवदत्तइत्याद्यर्थेचषष्ठ्युपादानमितिभाष्यउक्तम्।षष्ठ्यर्थस्यसांसर्गि

कविषयतयैवभासते।अतएवषष्ठीशेषइतिसूत्रेभाष्येराज्ञःपुरुषइत्यत्रराजाविशेषणंपुरुषोविशेष्यइत्युक्तम्।अन्यथासंबन्धंविशेष्यतयाविशेषणतयावाब्रूयादित्याहुः॥राज्ञःपुरुषइत्यत्रस्वस्वामिभावःषष्ठ्यर्थःसचस्वामित्वसमूहरूपः।यत्तुस्वामित्वंस्वत्वंवाषष्ठ्यर्थइतितन्न।तस्यैकमात्रवृत्तितयासंबन्धत्वायोगात्।संबन्धोहिसंबन्धिभ्यांभिन्नःउभयसंबन्धी।नचतद्व्येकत्राश्रयतयापरत्रनिरूपकतयास्त्येवेतिवाच्यम्।निरूपकत्वस्यवृत्त्यनियामकतयोभयत्रसंबन्धवत्त्वप्रतीत्यनापत्तेः।उक्तंचहरिणा।द्विष्ठोप्यसौपरार्थत्वाद्गुणेषुव्यतिरिच्यते।तत्राभिधीयमानश्चप्रधानेप्युपयुज्यतेइति।परार्थत्वाद्गुणानांपरंप्रतिविशेषणत्वेनविवक्षितत्वादित्यर्थः।अयंभावः।भेदेसतिविशेषणतयाविवक्षितस्यसंबन्धंविनाविशेषणत्वासंभवेनतदाकाङ्क्षितत्वात्तत्रसंबन्धोव्यतिरिच्यतेउद्भूततयाप्रतीयतेइतितत्रैवषष्ठीविशेष्यस्यतुपदान्तरासमभिव्याहारेस्वार्थनिरूपितविशेष्यत्वेनभासमानत्वरूपेस्वनिष्ठत्वादेवनविशेष्यतानियामकसंबन्धाकाङ्क्षा।तत्रविशेषणेशब्देनषष्ठ्यादिनांऽशतःप्रतीयमानःप्रधानेप्युपयुज्यते।तस्यद्विष्ठत्वस्वभावत्वात्।राजादिनिरूपितविशेष्यतायाराजादिपदसन्निधानेप्रतीयमानायाउपकारकोभवतीतिअर्थः।राज्ञइत्यादेस्तुपदान्तरसमभिव्याहारंविनाप्यध्याहृतसंबन्धिसामान्यनिरूपितविशेषणत्वप्रतीतिरि

तिविशेषः। राज्ञइतिहिस्वामित्वमवगम्यमानमन्यथानुपपत्त्यैवपुरुषेस्वत्वमवगमयति। अतःसंबन्धस्यबहिरङ्गत्वात्पुरुषादन्तरङ्गाप्रथमैव। एवंचराजस्वामिकमितिततोबोधः। अतएवाग्रेकिंतदितिविशेषजिज्ञासापुरुषादिपदैश्चतन्निवृत्तिः। एवंचसर्वत्रसंबन्धिद्वयवृत्तिधर्मसमूहः संबन्धिनोर्भेदेसंबन्धः। स्पष्टंचेदंयस्मादधिकंयस्यचेश्वरवचनमितिसूत्रेभाष्ये। तत्रहिअधिब्रह्मदत्तेपञ्चालाइत्यत्रानेनब्रह्मदत्तेसप्तम्यांपञ्चालाइहितीयाप्राप्नोतिअधेर्द्योत्यस्यब्रह्मदत्तनिष्ठस्यसंबन्धस्यसप्तम्योक्तत्वेपितद्द्योत्यस्यपञ्चालनिष्ठसंबन्धस्यतयाऽसंप्रत्ययाद्इत्युक्तम्। उपपदविभक्तेः कारकविभक्तिर्बलीयसीतिसमाहितमित्यन्यत्। विशेष्यपदात्षष्ठीवारकयुक्त्यापितदूरक्षाबोध्यम्। अतएवस्वस्वामिभावेऽवयवावयविभावआधाराधेयभावः प्रतियोग्यनुयोगिभावः विशेषणविशेष्यभावसंबन्धइत्यादिर्व्यवहारः। तत्राभावप्रतियोगिनोः प्रतियोग्यनुयोगित्वसमूहः संबन्धः। घटाभावभूतलयोस्त्वाश्रयाश्रयिभावः संबन्धः। एवंकालादेरपि। एवंचषष्ठ्यासंबन्धोविशेषणत्वंचार्थइतिविशेषणादेवषष्ठी। अतएवराज्ञः पुरुषइत्यत्रराजपदसान्निधानेप्रतीयमानंपुरुषेविशेष्यत्वरूपमाधिक्यंवाक्यार्थः राज्ञिप्रतीयमानतत्प्रतिद्वन्द्विविशेषणत्वंतुपदान्तरासमभिव्यवहारेपिराज्ञइत्येतावन्मात्रेणप्रतीतेःषष्ठ्यर्थइतिउक्तंषष्ठीशेषइतिसूत्रेभाष्ये।

र. मं.
११५

किंच राज्ञ इत्युक्ते तत्तत्संबन्धाकाङ्क्षोत्थित्या तदुत्थापकस्वामित्वादिशक्तिरपि षष्ठ्यर्थ इत्यपि भाष्ये स्पष्टम्। यदा तु पुरुषस्य विशेषणत्वविवक्षा तदा पुरुषस्य राजेत्यपि इत्यन्यत्र विस्तरः। ननु मम भ्रातेत्यादौ कः षष्ठ्यर्थः एकस्माज्जन्मेति चेत्। एकत्रस्थानेउषितानां पान्थानामपि संबन्धापत्तेरिति चेत्सत्यम्। एकोदरशायित्वमात्रेण व्यवहारनियामकः काल्पनिकोवयवावयविभावः सः यथानयोरर्धं तृतीयमित्यादावेकप्रदेशावस्थाननिमित्तकः काल्पनिकोवयवावयविभाव इत्यदोषात्। इदम नेकमन्यपदार्थे इति सूत्रे भाष्यकैयटयोः स्पष्टम्। एतेन सामानाधिकरण्यं न संबन्ध इति सूचितम्। अन्नस्य हेतोर्वसति। हेतुहेतुमद्भावः षष्ठ्यर्थः हेतुशब्दोत्रैव तात्पर्यग्राहकः। अन्नहेतुको वास इति बोधः। कृष्णस्य कृतिरित्यत्र कर्त्ता जगतः कर्त्तेत्यत्र कर्म षष्ठ्यर्थौ। कर्तृकर्मणोः कृतीति सूत्रात्। यत्त्वनयोरर्थयोर्लक्षणाग्राहकं सूत्रमिति तन्न। शक्तिग्राहकत्वस्यैवौचित्यात्। लाक्षणिकार्थानुशासनस्य क्वाप्यभावात्। गङ्गायां घोष इत्यादौ आरोपिताधारत्वादिमतोप्यधिकरणादिसंज्ञा इति तत्र सप्तम्याः शक्तिरेव। आधारोधिकरणमित्यादावारोपिताधारादेरपि ग्रहणमन्यत्रोक्तम्। कृत्प्रकृत्यर्थे कस्येत्येव कर्माकाङ्क्षाप्रदर्शनमनुशासनेन तत्र तस्या एव साधुत्वात्। अत एव पचन्नित्यादौ शत्रादिप्रकृत्यर्थे किमित्येवाकाङ्क्षाप्रदर्शनं षष्ठीनिषेधात्। एतेन विजातीयाकाङ्क्षा

रामः
११५

CC-0. In Public Domain. Digitization by eGangotri

प्रदर्शनात् तिङ्प्रकृत्यर्थे कर्मत्वात् कृत्सकृत्यर्थकर्मत्वं विजातीयमित्यपास्तम्। कृतपूर्वी कटमित्यादौ तु न कर्तृकर्मणो
रिति षष्ठी। तत्र कृतीत्येतत्सामर्थ्येन कृदन्तशक्तिज्ञानसहकारेणोपस्थितकृत्प्रकृत्यर्थक्रियायाः कर्तृकर्मणोः षष्ठीति
तदर्थात्। अन्यथा तिङ्योगे निषेधेन कृद्योग एव षष्ठीसिद्धौ तद्वैयर्थ्यं स्पष्टमेवेत्यन्यत्र विस्तरः। प्रकृते च कृतइत्यत्र न
कर्मणि क्तः द्वितीयानापत्तेः। किन्तु फलांशे आहार्याभावारोपमात्रेणास्याकर्मकत्वं स्वीकृत्य भावे क्तः कार्यः। यद्वा कर्म
विशेषस्य तत्तद्रूपेण प्रागन्वया विवक्षयाऽकर्मकत्वाद् भावे क्तः सच कृतपूर्वी अधीतीत्यादि वृत्तिविषय एव। तदुक्तं
भाष्ये यदा वाक्यं न तदा प्रत्ययः यदा प्रत्ययः सामान्येन तदा वृत्तिरिति॥ न तदा प्रत्ययः न तदा भावे प्रत्ययः सकर्मकत्वात्
। यदा प्रत्ययः। भावे इति शेषः तदा वृत्तिरेव। सा च न कदापि कर्मक्तान्तेनेत्याह सामान्येनेति। उक्तरीत्या कर्महीनार्थक
धातुप्रकृतिकक्तान्तेनेत्यर्थः। अनेन तादृशक्तान्तस्य वाक्ये न प्रयोग इति स्पष्टमेवोक्तम्। किं च योसौ कृतकटयोर
भिसम्बन्धः सामानाधिकरण्यरूपः स उत्पन्ने तद्धितप्रत्यये निवर्त्तत इति च भाष्ये उक्तम्। तेन तद्धितेः कृते कृतः कट
इत्येवेति ध्वनितम्। अत एव घटं क्रियत इति न। ततः पूर्वं कृतमनेनेत्यर्थे पूर्वादिनिरिति तद्धिते कृते पश्चात्फलस्याश्र
याकाङ्क्षायां कटमित्यादेर्विशेषकर्मणोऽन्वयः। एतेनासामर्थ्यात् तद्धितो न स्यादित्यपास्तम्। तदुत्पत्तिकाले साम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्थ्याभावात्कारकान्वयोगुणीभूतक्रियायामपीतिस्पष्टमेव। तदुक्तंहरिणापि। विशेषकर्मसंबन्धेनिर्भुक्तेपिकृतादिभिः।
विशेषनिरपेक्षोन्यः कृतशब्दः प्रवर्त्तते। अकर्मकत्वेसत्येवंक्तान्तेभावाभिधायिनि। ततः क्रियावताकर्त्रायोगोभवतिक
र्मणाम्। अविग्रहागतादिस्थायथाग्रामादिकर्मभिः। संबध्यतेक्रियातद्वत्कृतपूर्व्यादिषुस्थितिरिति। निर्भुक्तेभाते
वाक्येइतिशेषः। विशेषकर्मनिरपेक्षोन्यः भावक्तान्तः प्रवर्त्ततेवृत्तिघटकोभवति। सामान्यकर्मतुनान्तरीयकत्वा
द्अविवक्षितंतदाह। अकर्मकत्वेइत्यादि। ततः वृत्तेःअनन्तरंक्रियाद्वारकसंबन्धेनतद्धितार्थकर्त्राकटमित्यादेःसंब
न्धः। प्रकारान्तरमाह। अविग्रहेति। कर्त्तुः पृथग्ग्रहणरहितेत्यर्थः। एवंचप्रधानार्थकर्त्रासंसृष्टयापिक्रिययाकारका
णामन्वयइतितदर्थः। प्रकृतेचकृधातुक्तप्रत्ययपूर्वशब्देनिप्रत्ययशक्तिज्ञानसहकृततद्धितान्तशक्त्यैवपूर्वकाल
क्रियाकर्त्तॄणांपरस्परविशिष्टानांबोधोनतुकृदन्तशक्तिज्ञानमपितत्रसहकारि। अन्यत्रकृतःक्तस्यभावार्थक
त्वाभावेनतदन्तमात्रस्यपृथक्शक्तिग्रहेमानाभावात्। चतुर्णामेकार्थीभावेद्वयोरपिसोस्त्येवेतिनात्रकृतोसाधुत्व
म्। तण्डुलानांपाचकतरइत्यादौतुनदोषः। तत्रपाचकादिशक्तिज्ञानसहकारेणैवसमुदायादुपस्थितेः। एतेननिष्ठा
न्तत्वात्तत्कृद्ग्रहणाभावेपिषष्ठीनिषेधेनतदप्राप्तिरित्यपास्तम्। निष्ठान्तपदशक्तिज्ञानसहकारेणोपस्थितक्रिया

न्वयिनोरेवतेननिषेधात्॥ इति षष्ठी॥ अधिकरणसप्तम्याअधिकरणत्वशक्तिमानर्थः। सप्तम्यधिकरणेचेतिसूत्रात्। सा
शक्तिः कर्तृकर्मद्वाराक्रियाश्रयनिष्ठा। आधारोधिकरणमितिसूत्रबलात्। इत्यन्यत्रनिरूपितम्। तदुक्तंहरिणा। कर्तृकर्म
व्यवहितामसाक्षाद्धारयत्क्रियाम्। उपकुर्वत्क्रियासिद्धौशास्त्रेधिकरणंस्मृतमिति। लोकेद्रव्यगुणक्रियाविषयमधिकर
णम्। अत्रशास्त्रेकारकाधिकारात्क्रियाविषयमेवतत्। साक्षात्क्रियाश्रययोःकर्तृकर्मणोस्तेसंज्ञेबाधिकेअतस्तद्व्यव
हितामिति। यद्यपिकालःसाक्षात्क्रियाधारः। तथापिकारकाधिकारेतरतमयोगोनास्तीतिपरंपरयाक्रियाधारस्यापिग्र
हणम्। किंचतस्यतत्त्वविवक्षायांकालःपचतिभूतानीतिवत्कर्तृत्ववत्त्वात्। व्यवहितामित्युक्तेप्यसाक्षादित्युक्तिर्लो
कानुसारेणान्वयोपिपरंपरयैवेतिसूचनाय। कटेआस्तेस्थाल्यांपचतीत्यादौअधृतेकर्तृकर्मणीक्रियांनसंपादयतइ
त्यधिकरणंक्रियाधारउपकुर्वत्तत्स्थांक्रियामुपकरोतीत्यर्थइतिहेलाराजः। यद्यपितण्डुलंपचतीत्यादौधात्वर्थफलरू
पकर्मद्वाराक्रियाश्रयत्वंतण्डुलादेरस्तितथापिव्यापारजन्यफलाश्रयत्वस्यसत्त्वेनपरयोःकर्मसंज्ञयाबाधान्नदोषः। फल
स्यस्वभिन्नक्रियाश्रयत्वाभावेनतण्डुलस्यसुतरांतदाश्रयत्वाभावाच्च। नचमोक्षेइच्छास्तीतिवत्मोक्षेइच्छतिभवती
त्यस्यापत्तिः। अन्तरङ्गत्वेनपरत्वेनचकर्मत्वस्यैवप्रवृत्तेः। मोक्षेइच्छेत्यादौप्रत्ययोपात्तसिद्धेच्छाद्वाराःस्तिक्रियायाम

न्वयस्य विवक्षितत्वेनाधिकरणत्वम्। प्रकृत्यर्थसाध्येच्छाद्वारा तत्रान्वये तु कर्मत्वात् षष्ठ्येव बोध्या।। अधिकरणं त्रिधा। औपश्ले-
षिकं वैषयिकमभिव्यापकं चेति। तदुक्तं हरिणा। उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु। उपकारास्तु भिद्यन्ते संयोगिसमवा-
यिनाम्। अविनाशो गुरुत्वस्य प्रतिबन्धे स्वतन्त्रता। दिग्विशेषादवच्छेद इत्याधारभेदहेतवइति। औपश्लेषिकवैषयिकाभिव्यापके-
षु त्रिष्वपि उपश्लेषोऽस्त्येव। उपकारः संबन्धः तद्भेदात्तु त्रित्वेन व्यवहारः। कटे आस्ते इत्यादौ संयोगिन्याधारे कतिपयावयवव्या-
प्त्यैव संबन्धः। तिलेष्वित्यादौ समवायिनि समस्तावयवव्याप्त्या सः। खे शकुनय इत्यत्राकाशस्य तात्त्विकावयवाभावेन कल्पित-
देशत्वाद् वैषयिकं कल्पितदेशापेक्षया चात्राप्युक्तान्यतर उपश्लेषः। गुरौ वसतीत्यत्र शिष्यस्य गुर्वधीनायां वृत्तौ वैषयिक-
मधिकरणं गुरुः। उपश्लेषोऽत्र बौद्धः। युद्धे सन्नह्यतीत्यत्र युद्धोद्देशेन कवचादिसंनहनप्रवृत्तेर्युद्धं विषयः। गङ्गायां घोष इत्य-
त्र गङ्गाशब्दः सामीप्याद्देशवृत्तिरित्यौपश्लेषिकमेवैतत्। अत्र गङ्गायां सामीप्याद्देशवृत्त्यधिकरणत्वारोपो बोध्यः। श-
त्रोरभावे सुखमित्यादौ बौद्धमेतत्। उपकारानाह। अविनाश इत्यादि। अविनाशस्तिलस्त तउपकारस्तैलस्य तिलविनाशे हि तैलं
विकीर्णं नश्येत्। पर्यंके शेते इत्यादौ शयितृगुरुत्वस्य प्रतिबन्धे पर्यंकस्य स्वतन्त्रतोपकारः। खे शकुनय इति आदौ दिग्विशेष-
संबन्धात्स्वापरिवर्त्तनमुपकारः गुरुणा शिष्यस्य संस्कार इत्येवमाद्युपकारा ऊह्या इति हेलाराजः। केचित्त्वौपश्लेषिक-

मित्यस्योपसमीपे श्लेषः संबन्धस्तत्कृतमित्यर्थः। तत्रच दीयते कार्यमिति सूत्रे भाष्ये यन्मासेति कान्ते दीयते तस्य मास औपश्लेषिकमधिकरणमित्युक्तेः। तदस्मिन्नधिकमिति सूत्रे संहितायामिति सूत्रे च भाष्ये स्पष्टमेतत्। तत्रोपश्लिष्टपदाध्याहारेण सप्तमीत्यपि तत्रैव भाष्ये स्पष्टम्। यत्किंचिदवयवावच्छेदेनाधारस्याधेयेन व्याप्तिरप्युपश्लेषः। यथा कटे आस्ते इति। एवमेव गङ्गैकदेशे तरन्तीषु गोषु कूपैकदेशस्थिते गर्गकुले गङ्गायां गावः कूपे गर्गकुलमित्यादौ बोध्यम्। वैषयिकं तु अप्राप्तिपूर्वकप्राप्तिरूपसंयोगसमवायेतद्भिन्नसंबन्धेन यदधिकरणं तत्। यथा खे शकुनय इत्यादि। अन्त्यं तु यत्र सर्वावयवावच्छेदेन व्याप्तिस्तद्यथा तिलेषु तैलं दध्नि सर्पिरिति। अन्त्यमेव मुख्यमधिकरणम्। आचार्यः किमधिकरणं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्त इति स्वरितेनाधिकारः साधकतमं करणमिति सूत्रभाष्योक्तेः। अस्य न्याय्यत्वं च प्रकृत्यर्थतावच्छेदकविशिष्टे तद्भानात्। न चैकदेशः तद्विशिष्टः। आद्ययोस्तु गौणमाधारत्वं तत्रैव भाष्ये उक्तम्। अव्यवहितसामीप्यमेवाधारत्वनियामकं न तु व्यवहितमिति संहितायामिति सूत्रे भाष्ये ध्वनितम्। व्यवहितसामीप्ये गङ्गायां घोष इत्यादौ गङ्गाशब्दस्य तीरे लक्षणा। तदपि गौणमेवाधारत्वं सर्वावयवावच्छेदेन तीरस्य घोषसंबन्धाभावात्। कारकाधिकारे गौणाधारादीनामपि स्वरितगुणपाठेनाधिकरणसंज्ञादिबोधनात् सर्वत्र तत्र विभक्तेः शक्तिरेवेति बोध्यम्। वर्णा

CC-0. In Public Domain. Digitization by eGangotri

नांसांख्यादिमतेद्रव्यत्वात्संयोगवत्पूर्वपरयोर्बीह्याधारस्याप्युपश्लेषनिरूपितस्यस्वीकारेणइकोयणचीत्यादावौपश्लेषि
केऽधिकरणेसप्तमीतिसंहितायामितिसूत्रस्थभाष्यसङ्गतिः। कटेशेतेइत्यादौकटाधिकरणकंशयनमित्यादिक्रमेणबोध
इत्याहुः। परेतुअधिकरणस्यकर्त्राद्यन्वयएव। कटेशेतेइत्यादौकटाधिकरणकचैत्रकर्तृकंशयनमित्यादिरीत्याबोधः। तद्
द्वारकमेवास्यक्रियान्वयित्वम्। कारकाणांभावनान्वयव्युत्पत्तिरपिएतच्छास्त्रबलादीदृशपरंपरयान्वयविषयापि।
अतएवाक्षेषुशौण्डइत्यादौसमासः। अतएवभाष्येतत्रासामर्थ्यशङ्कानकृता। एवंचात्रान्तर्भूतक्रियाद्वारासामर्थ्यमि
तिकैयटाद्यश्चिन्त्याएव। अक्षशौण्डोऽक्षप्रवीणइत्यादौदध्योदनादाविवक्रियान्तर्भावेणबोधस्याननुभवात् अक्षविष
यप्रावीण्यवानित्येवप्रतीतेर्ध्वनितंचेदंहरिग्रन्थेपीत्युक्तमित्याहुः। मूलेवृक्षः कपिसंयोग्यस्तीत्यादावव्याप्यवृत्तिधर्म
वत्कर्तृकक्रियासमभिव्याहारेमूलाधिकरणककपिसंयोगविशिष्टवृक्षकर्तृकासत्तेतिबोधेऽन्यत्रावयवेतद्विशिष्टवृ
क्षाभावप्रतीतेः कपिसंयोगेतदवच्छेद्यत्वंफलतीतिबोध्यम्। शिरसिमेवेदनेत्यादौअवच्छेदकतासंबन्धस्याप्याधार
तानियामकत्वान्नदोषः। ग्रामंप्रविशतीत्यादौकर्मणोग्रामस्यनकटाद्यधिकरणत्वम्। परयाकर्मसंज्ञयाबाधात्।
कर्तृद्वाराक्रियाश्रयत्वविवक्षायाः संयोगरूपफलाश्रयत्वंविनाऽसंभवात्। एवंग्रामंगच्छतीत्यादावपि। इदंचाकडा

CC-0. In Public Domain. Digitization by eGangotri

रसूत्रेहद्युभ्यांचेतिसूत्रेचभाष्येस्पष्टम्। अधीतीव्याकरणे। अत्रकर्मसप्तम्यर्थः। क्तस्येन्विषयस्यकर्मण्युपसंख्यानमि
तिवार्त्तिकात्। अत्रापिकृतपूर्वीवद्भावक्तान्ताद्अधीतशब्दादिष्टादिभ्यश्चेतीनिः। व्याकरणकर्मकाध्ययनकर्त्तेतिबो
धः। चर्मणिद्वीपिन मित्यादौफलंसप्तम्यर्थः। चर्मणःफलत्वंचहननक्रियायास्तल्लाभादिविषयकेच्छाधीनत्वादिति
बोध्यम्। ब्राह्मणेष्वधीयानेषुगतः। गोषुदुह्यमानासुगतइत्यत्रयस्यचभावेनभावलक्षणमितिसूत्रेणसप्तमी। यस्य
भावेनक्रिययाक्रियान्तरंलक्ष्यतेततःसप्तमीतितदर्थः गोपददुह्यमानादिपदयोरुभयोरपितद्वाचकत्वादुभाभ्यामपि
सप्तमी। निर्ज्ञातदेशकालाक्रियाअनिर्ज्ञातदेशकालक्रियासंबन्धिदेशकालपरिच्छेदकत्वेनलक्षणमितिबोध्यम्। एतेन
भूयोदर्शनाश्रयत्वाद्ज्ञाप्यज्ञापकभावस्योदितेआदित्येतमोनष्टं मित्यादावेवस्याद्नत्वत्रकदाचिद्गोषुदुह्यमान
स्वसौगतइत्यपास्तम्। तत्रकाचित्क्रियास्वाधारकालेनान्यांपरिच्छिनत्तियथागोषुदुह्यमानास्वित्यादौ। काचित्तु
स्वाधारकालाव्यवहितपूर्वकालेन। यथागोषुधोक्ष्यमाणास्वित्यादौ। काचित्स्वाधारकालानन्तरकालेन। यथागोषुदु
ग्धास्वित्यादौ। ज्ञापकत्वंचतत्तच्छब्दबोध्यत्वेनविवक्षितमेवैतच्छास्त्रप्रवृत्तौनिमित्तंनतुतस्यमानान्तरेणनियमतोग्र
हणापेक्षेतिनेदंभूयोदर्शनाश्रयम्। देशोदाहरणंसतिगुणेद्रव्यत्वमस्तीत्यादि। ज्ञाप्यज्ञापकभावःसप्तम्यर्थः। अस्यच

क्रियायामेवान्वयेसाधुत्वं। उक्तसूत्राद् अधीयानानांब्राह्मणानांदुह्यमानानांचगवांशब्दतःप्रतीयमानंलक्षकत्वंविशेष
णीभूताध्ययनादिक्रियाकालद्वारकंविश्राम्यति। अधीयानब्राह्मणज्ञापककगमनाश्रयइतिक्रमेणबोधः॥ गोषुधो
क्ष्यमाणास्वित्यादौभविष्यद्दोहनादेरपिबुद्ध्युपारूढस्यस्वपूर्वकालादिद्वारकंज्ञापकत्वंबोध्यम्। इदंसूत्रंयत्रमानान्तर
सिद्धस्यार्थस्यकालविशेषसंबन्धादिप्रतिपादनायप्रयोगस्तत्रैवप्रवर्त्ततेतथैवसूत्रभाष्यस्वरसात्। विवाहेनान्दीमुखं
कुर्यादित्यत्रविवाहपदेनतत्प्राक्कालोलक्ष्यतेअधिकरणेसप्तमी। राहूपरागेस्नायादित्यत्रराहूपरागादिपदेनतदाश्रयः
कालउच्यते। गवांदोहेआगतइत्यत्राप्येवमेव। अवच्छेदकावच्छेदेनान्वयस्यौत्सर्गिकत्वाद्राहूपरागकालावच्छे
देनस्नानविधानेतस्यनिमित्तत्वंफलति। एवमेवाङ्गादिदेशगमनस्यपुनःसंस्कारनिमित्तता। यत्तुराहूपरागपदंतत्कालला
क्षणिकम्। सतीत्यध्याहाराद्यस्यचभावेनेतिसप्तमी। राहूपरागादेःनिमित्तत्वंतुसिद्धसाध्यसमभिव्याहारेसिद्धंसाध्या
योपदिश्यतेइतिन्यायेनफलतीति। तन्न॥ प्रवर्त्तनारूपविधिविषयत्वंक्रियायाएवनद्रव्यादेरितिदध्नाजुहोतीत्यादौदध्नः
कथंविधेयत्वमित्याशंक्यानेनन्यायेनविधेयत्वमुक्तंन्यायविद्भिःसिद्धंसाध्यायोपदिश्यतेइत्यस्याज्ञातंज्ञाप्यतेइ
त्यर्थश्चव्याख्यातः। एवंचतेनन्यायेनद्रव्यस्याज्ञातज्ञाप्यत्वरूपंविधेयत्वंस्वक्रियोपरागेणचप्रवर्त्तनाविषयत्व

सुक्तमितिप्रत्युक्ते तन्न्यायविषयाभावात्। स्नानस्य मानान्तरादप्राप्तेरेतत्सूत्राप्राप्तेश्च। राहूपरागस्यनिर्ज्ञातकालत्वाभावाच्च। भिद्यते हृदयग्रन्थिश्छिद्यन्तेसर्वसंशयाः। क्षीयन्तेचास्यकर्माणि तस्मिन्दृष्टेपरावरेइति। अत्रपरंहिरण्यगर्भाद्यवरं यस्यतद्ब्रह्मणिदृष्टेतद्विषयेदर्शनेदर्शनोत्तरकालेकर्मादिक्षयइत्यर्थः। क्षीयन्तेइत्यादिकर्मकर्त्तरिरूपम्। कर्मस्थक्रियारूपस्यशरीरादिगतावयवापचयरूपक्षयादेः कर्मस्वारोपात्। हृदयग्रन्थिशब्देनाविद्यारागभयद्वेषशोकवासनाः। यद्वादर्शनेइतिचर्मणिद्वीपिनमितिवत्सप्तमी तेनतद्दर्शनार्थंतदपरोक्षार्थंतत्वपरोक्षज्ञानादविद्यादीनांशिथिलीभावोभिद्यतेइत्यादिनोच्यते। व्याख्याद्वयमपिशाङ्करभाष्यादिषुस्पष्टम्। रुदतिरुदतोवाप्राव्राजीदित्यत्रज्ञाप्यज्ञापकभावः षष्ठीसप्तम्योरर्थः। धातोश्चानादरविशिष्टंप्रव्रजनमर्थः। अत्रषष्ठ्यादितात्पर्यग्राहकम्। अनादरश्चप्रत्यासत्त्यापुत्रादिविषयकएव। वैशिष्ट्यंचसामानाधिकरण्यस्वोत्तरकालिकत्वाभ्याम्। एवंचरोदनकर्त्तृपुत्रादिज्ञाप्यमनादरविशिष्टंप्रव्रजनमितिबोधः। नृणांनृषुवाद्विजः श्रेष्ठइत्यादौयतश्चनिर्धारणमितिसूत्रेणषष्ठीसप्तम्यौ। यतः स्वेतरेभ्यः स्वघटितसमुदायघटकेभ्योव्यावृत्तेनधर्मेणसमुदायादेकदेशस्यजातिगुणक्रियासंज्ञाविशिष्टस्यपृथक्करणरूपंनिर्द्धारणंततः षष्ठीसप्तम्याविति तदर्थः। पृथक्करणंचव्यावृत्तधर्मप्रकारकज्ञानविषयीकरणम्। अस्तिचनराणांविप्रःश्रेष्ठइत्या

दौविप्रत्वादिविशिष्टस्यविप्रघटितनरसमुदायघटकविप्रेतरव्यावृत्तश्रेष्ठत्ववत्तयाप्रतीतिः।एवंचनिर्धारकधर्मनिर्धारणावध्योर्व्यावृत्तत्वाख्यःसंबन्धोनिर्धारणविभक्तेरर्थः।नरादिपदंचसामान्यरूपेणविप्रतदितरनरादिघटितसमुदायोपस्थापकम्।तद्व्यावृत्तश्रेष्ठत्ववान्इतिक्रमेणबोधः।नराणांक्षत्रियेशौर्यमित्यत्रक्षत्रियेतरनरघटितसमुदायव्यावृत्तक्षत्रियवृत्तिशौर्यमितिबोधः।उद्भूतावयवभेदविवक्षयातद्विषयेबहुवचनमेवसाधु।स्पष्टंचेदंकारकइतिसूत्रेभाष्ये।तत्रहिनिर्धारणेकारकेष्वितिब्रूयाद्इत्युक्तम्।मिदचोन्त्यादित्यादिस्तुसौत्रःप्रयोगः।द्वन्द्वःसामासिकस्यचेत्यत्रसमूहेऽचित्तेतिठक्।समाससमूहस्यमध्येऽहंद्वन्द्वइत्यर्थइतिकश्चित्।परेतुअत्रनसूत्रस्वारस्यंननिर्धारणइतिसूत्रेणनिर्धारणस्यविभक्त्यर्थघटकत्वबोधनात्।यतःस्वसजातीयघटितसमुदायादेकदेशस्यजात्यादिभिःपृथक्करणरूपंनिर्धारणंततःषष्ठीसप्तम्यावित्यर्थः।सूत्रस्यनिर्धार्यमाणनिर्द्धारणावध्योःपरस्परमन्वयःनिर्द्धारणावधिस्वेतरसमुदायघटकव्यावृत्तकरणकनिर्द्धारणविषयविषयिभावरूपोवयवावयविभावरूपश्चसंबन्धोविभक्त्यर्थःनृसमुदायावधिकद्विजेतरनरव्यावृत्तश्रेष्ठत्वकरणकनिर्द्धारणविषयोनृसमुदायावयवोद्विजःश्रेष्ठइतिबोधः।संसर्गघटककरणंचश्रेष्ठत्वरूपमेवप्रत्यासत्तेः।नृणांमध्येद्विजःश्रेष्ठइत्यादौतुमध्ययोगेषष्ठीनेयम्।नृषुमध्येइत्यसाध्वेव।

नृसमुदायमध्यवर्तीद्विजःश्रेष्ठइतिबोधः।श्रेष्ठत्वादौद्विजेतरनराद्यवृत्तित्वबोधस्तुमानसोदेवदत्तोवामेनाक्ष्णापश्यतीत्युक्तेदक्षिणेननपश्यतीतिवत्।गोमण्डलेवर्त्तमानायाकृष्णागौःसाबहुक्षीरेत्याधारसप्तमीघटितवाक्येपिउक्तन्यायेनतथाप्रतीतिः।ननुजलपृथिव्योर्जलेस्नेहवदित्यादौजलभिन्नयोर्जलपृथिव्योरप्रसिद्धेर्जलपृथिव्युभयव्यावृत्तत्वस्यस्नेहेबाधेनचनिर्द्धारणासंभवइतिचेन्न।तत्रापिसमूहेजलभेदस्यतद्व्यावृत्तत्वस्यस्नेहेचाबाधात्समूहावयवयोश्चभेदाभेदावितिनपञ्चमीविभक्तइतिअस्यात्रप्रवृत्तिः।इतरेतरद्वन्द्वेपिसमूहएवविशेष्यइत्यग्रेवक्ष्यते।एतेनसांकाश्यकानांपाटलिपुत्रकाणांचपाटलिपुत्रकाअभिरूपतमाइतिभाष्यप्रयोगोव्याख्यातः।तत्समूहेपाटलिपुत्रकभेदस्यसत्त्वेनवस्तुतोऽवयवाभेदस्यचतत्रसत्त्वेनपञ्चम्यप्राप्तेः॥समुदायोवयवाभिन्नइतिसिद्धान्तात्।निर्द्धारणावधिनिर्धार्यमाणनिर्धारणहेतूनांसन्निधानएवनिर्धारणप्रतीतिरितितत्रैवनिर्धारणविभक्तिःसमासनिषेधश्च।तेनपुरुषाणामुत्तमइत्यादौशेषेषष्ठीतिपुरुषोत्तमइत्यादौसमासोभवत्येवेतिद्विवचनविभज्येतिसूत्रेकैयटइत्याहुः॥माथुराःपाटलिपुत्रकेभ्यआढ्यतराइत्यत्रनिर्धार्यमाणनिर्धारणावध्योर्भेदस्यैवसत्त्वेनपञ्चमीविभक्तइत्यनेनपञ्चमी।अत्रनिर्धारणावधिव्यावृत्तकरणकनिर्धारणविषयविषयिभावरूपःसंबन्धःपञ्चम्यर्थः।पाटलिपुत्रकावधिकतद्व्यावृत्ताढ्यतरत्वकरणकनिर्धारणविषयामाथुराआलु

ऊ·मं· तरादितिबोधः॥आख्यकृतस्तु माथुरपाटलिपुत्रकयोराढ्यत्वेनसाम्यंज्ञातवान्ह्येतस्त्रगुड्क्तेतत्रबुद्धिकृतभेदरूपविश्ले
१२१ षसत्वेनविभक्ताइत्यध्याहारेणापादानएवपञ्चमीविभक्तेर्भेदः।पाटलिपुत्रावधिकभेदवन्तोमाथुराआढ्यतरादितिबो
धः॥भेदप्रयोजकंचाढ्यतरत्वमेवोपस्थितेः।गवांकृष्णेत्यादौतुसंपन्नक्षीरत्वेज्ञातेपिगोत्ववत्तानुद्यानिवृत्तेः नविश्लेष
प्रतीतिः।अत्रनामार्थान्वयविवक्षयाषष्ठीतुनअनभिधानात्।एवमपादानत्वाविवक्षायामपिषष्ठीनततएव॥अत्रपक्षे
आढ्यतरत्वेपाटलिपुत्रकव्यावृत्तत्वमार्थमित्याहुः।मूलेनावाहयेद्देवींश्रवणेनविसर्जयेत्॥मूलेश्रवणेवा॥अत्रमूलश्रव
णशब्दौतत्तन्नक्षत्रयुक्तकालबोधकौआधाराधेयभावः संबन्धोविभक्त्यर्थः॥मूलनक्षत्रयुक्तकालाधारकंदेवीकर्मक
मावाहनमित्यादिक्रमेणबोधः॥ अद्यभुक्त्वायंद्व्यहेद्व्यहाद्वाभोक्ता।अत्रविभक्त्यर्थःस्वानन्तरकालवृत्तित्वम्।एतद्दिवसा
धिकरणकभोजनोत्तरकालिकमेतद्दिवसानन्तरद्व्यहानन्तरकालवृत्तिभोजनाश्रयइत्यर्थः॥द्व्यहेएतद्दिवसानन्तर
त्वंसमभिव्याहारबललभ्यम्।इहस्थोयंक्रोशेक्रोशाद्वालक्ष्यंविध्येत्॥अत्रस्वानन्तरदेशवृत्तित्वंविभक्त्यर्थः॥एत राम
द्देशाधिकरणकस्थित्याश्रयकर्तृकमेतद्देशानन्तरक्रोशानन्तरस्थितलक्ष्यकर्मकंव्यधनमितिबोधः॥इतिसप्तमी
समाप्ता॥ एषांसुपामेकवचनत्वादिनातत्तद्रूपेणवाएकत्वद्वित्वबहुत्वव्याप्यरूपसंख्याप्यर्थः।द्व्येकयोर्द्विवचनैक १२१

वचने बहुषु बहुवचनमिति शास्त्रात्॥ तत्र संख्या प्रकृत्यर्थगता बुध्यते। संपन्नो व्रीहिरित्यादौ व्रीहित्वादिगतसंख्याया व्री
हिष्वारोपेणैकवचनप्रयोगः। प्रकृत्यर्थतावच्छेदके संख्यान्वय इति तु न युक्तम्। लुप्तस्य प्रत्ययार्थे प्रकृत्यर्थविशेषान्व
यित्वस्यस्यागेभानाभावात्। वेदाः प्रमाणमित्यादौ प्रमाणपदेन प्रमाणत्वगतसंख्यारोपवतामेव प्रतीतिस्तत्फलमेक
जातीयप्रमाणत्वोपपादनमेव। एवमेव गावो धनमित्यादावपि। तदुक्तं पङ्क्तिविंशतीति सूत्रे भाष्ये गावो धनमित्यादौ प्री
तिहेतुर्धनमेको गुणः स च प्राधान्येन विवक्षितो तो द्रव्याणां बहुत्वेपि न धनशब्दाद् बहुवचनमिति। समुदायस्य प्रीतिहे
तुत्वाद् धनत्वं न त्वेकैकस्य पिण्डस्येति धनमेकं गोभिर्विशेष्यत इति कैयटः॥ तत्र गुणस्य प्राधान्यं नाम न विशेष्यता सामाना
धिकरण्यानापत्तेस्तस्माद्यथा लोके यो यस्य धनादिना धनादिफलं लभते तस्य तदपेक्षया गुणत्वं धनिकस्य प्राधान्यं तथा ध
नत्वादिगतसंख्यया तदाश्रयस्यैकत्वादिव्यवहारात् तस्य प्राधान्यमाश्रितसंख्याविशेषगोपिण्डानां विशेषणत्व एव स
मुदाये एकजातीयप्रीतिहेतुत्वावगम इति तत्रैकवचनम्। आरोपितैकत्वे न बहुत्वस्य विरोधाभावाद् विरुद्धविभक्ति
राहित्येनाभेदान्वयोपपत्तिः। यदा तु स्वगतसंख्यावैशिष्ट्येन भानं तदा गावो धनानीत्यपि। यद्वा धर्म्यभेदेन जातेः प्राधा
न्यमिति न सामानाधिकरण्यानुपपत्तिः। द्व्यादयो द्रव्याभेदेनैव संख्याबोधकास्तद्भेदादेव तद्गतसंख्याविशिष्टसंख्यारू

पधर्मप्रतिपादकाः। यद्यपि भेदेन तथापि स्वाश्रयद्रव्यगतसंख्याविशिष्टमेव धर्मं प्रतिपादयन्ति। अतएव किंसंबन्ध्येकत्वे किंसं
बन्धिद्वित्वे किंसंबन्धिबहुत्वे इत्यर्थे कस्यैकस्मिन्कयोर्द्वयोः केषां बहुष्विति प्रयोगो बहुषु बहुवचनमिति सूत्रे भाष्ये। संख्य
याऽव्ययेति सूत्रभाष्योक्तमादशतः संख्याः संख्येये इति तु प्रायोवादः॥ द्व्येकयोरित्यादौ समासे आरोपितसंख्याभाने माना
भावेन धर्माणां प्रत्येकमेकत्वाद्द्विवचनमेव। एवमेवाक्षेजस्रीत्यादिप्रयोगोपपत्तिः॥ दारा इत्यादौ त्ववयवगतारोपितब
हुत्वाश्रयं बहुवचनमेव न तु स्वनिष्ठैकत्वाश्रयमेकवचनं कोशादिप्रामाण्यात्। प्रेमादिना प्रत्येकं सर्वेष्ववयवेषु दारत्वारो
पात्। यत्र कोशादावुदासीनं तत्र यथेच्छमेकस्मिन्नप्याचार्या आगता आचार्य आगत इत्यादिप्रयोगात्॥ यत्तु दारा इत्यादौ सा
धुत्वार्थं बहुवचनमिति तन्न॥ अनुशासनाभावात्॥ तत्र गौणी मुख्या चोत्तरा संख्या पूर्वां संख्यां बाधते न हि द्विपुत्र आनीय
तामित्युक्ते त्रिपुत्र आनीयते इति छादेर्घ इति सूत्रभाष्यात्। कैयटश्च संख्यान्तरोपजने आश्रयाविनाशेऽपि पूर्वसंख्याविनाशः।
संख्याशब्दानामेष स्वभावो यत्संख्यान्तरस्योत्तरस्य गौणस्य मुख्यस्य वा विषयेन प्रवर्त्तते इति अइउण्सूत्रे अचः परस्मि
न्नित्यत्र च भाष्ये ध्वनितमेतत्। आद्ये अकारादीनामेकत्वपक्षे घटेन तरति घटिक इत्यत्र द्व्यज्लक्षणष्ठनोऽप्राप्तिमाशङ्क्याव
र्त्तिसंख्यानात् सिद्धमित्युक्तम्। अन्त्ये पूर्वविधिग्रहणस्य नैधेय इति प्रत्युदाहरणं दत्तं निपूर्वाद्धाञः किप्रत्यये आतो लोपे

[illegible]स्त्वानि त्रित्वेन त्र्यत्वेन द्वित्वाभावात्तदाश्रयोऽग्रस्यादिति तद्भावः॥ अत एव द्व्यादिषु सत्सु एकोऽस्तीत्यादिर्न प्रयोगः बाध
श्च पूर्वसंख्यानाशेन विभक्त्या व्यवहारप्रयोजकत्वं वा द्वितीयाद्यपसारणे द्व्यादिसंख्यानाशादिवत्॥ शते पञ्चाशदस्ती
त्यादि तु ततोऽधिकान् शतसंख्यारोपादकान् पदार्थान् अबुद्धिस्थान् कृत्वा तेषामबुद्धिस्थत्वं तु तेष्वाहार्यभावप्रतियोगि
त्वारोपेण। एवमेव द्वादशकपालस्तुत्यर्थः भग्नकपालाद्यनुवाद इति बोध्यम्॥ बहुत्वं तु त्र्यादिपरार्धान्तसंख्याव्यापको ध
र्मविशेषः। नचैवं कपिञ्जलानालभेतेत्यादौ चतुरादीनामप्यालम्भापत्तिः पर्यग्निकृतानारण्यानुत्सृजतीत्युक्तेर्हिंसाप्रसक्त्यभा
वाच्चालम्भेन कृतार्थशास्त्रं हिंसाभिया नाधिकालम्भनं बोधयतीति वक्तुमशक्यमिति वाच्यम्॥ यावत्कपिञ्जलव्यक्त्यालम्भ
संभवे न क्वचिद्विश्रान्तौ स्वीकर्त्तव्यायां प्रथमातिक्रमे कारणाभावेन व्यक्तित्रयस्यैवालम्भनात्। तदुक्तं जैमिनिना प्रथमं
वा नियम्येत कारणादतिक्रमः स्यादिति॥ न च चतुराद्यालम्भे फलविशेषस्तत्कल्पकाभावात्। अत एव यत्र ब्राह्मणभोजना
द्यावधिकब्राह्मणभोजने फलविशेषः श्रुतस्तत्र ब्राह्मणान्भोजयेदिति नोदनायां व्यक्तित्रयभोजनेन शास्त्रार्थनिष्पत्ता
वपि फलविशेषार्थमधिकभोजनं भवत्येव॥ लोकेऽप्योदकान्तमनुव्रजेदित्यादौ कारणाभावे प्रथममुदकान्तमेव गच्छन्ति
स्नेहादिरूपकारणसत्त्वे द्वितीयं तृतीयं चोदकान्तं गच्छतीति प्राग्रीश्वरादिति सूत्रे भाष्ये स्पष्टम्। व्याकरणे तु व्याप्ति

CC-0. In Public Domain. Digitization by eGangotri

न्यायस्यैवाश्रयणम्॥ निजांत्रयाणामितिसूत्रेत्रयाणांग्रहणाद्द्व्याद्युदात्तश्चेत्यादावादिग्रहणाच्चेतिबोध्यम्॥ पशुना
यजेतेत्यादौपश्वन्तरालम्भेप्रयोगप्राशुभावबोधेनयागवैगुण्यापत्त्यागुणानुरोधेनप्रधानयागावृत्तौप्रधानत्वभङ्गाप
त्त्याचयावत्पशुयागासंभवेनचोपस्थितविभक्त्यर्थविशिष्टस्यैवविधानमितिनदोषः विभक्तेः संख्याबोधकत्वस्यशा
स्त्रसिद्धत्वाद्विभक्त्युत्पत्तयेआश्रितसंख्यायाविधिविषयतायाएवौचित्यात्॥ किंचयथाकृतगर्भाधानार्थसंस्कारा
याःपुनःसंस्कारोऽनर्थकः तथैकेनपशुनाक्रियासिद्धौपश्वन्तरस्यानर्थक्यंतदुपादानेचतत्साधनंतत्क्रियान्तरमेव
।किंचपशुनेत्यस्यविधेयसमर्पकतयात दुपस्थितानांमध्येकस्यचित्त्यागेमानाभावः प्रकृतिप्रत्ययाभ्यांविशिष्ट
स्यैवबोधेविशिष्टविधिसंभवेनवाक्यभेदः॥ तदुक्तंसार्वधातुकेयगितिसूत्रेभाष्येपच्यमानइत्यत्रकर्त्तरिशानच्कर्म
णियगस्तुइत्याशङ्क्यप्रकृतिप्रत्ययौप्रत्ययार्थंसहब्रूतइति शास्त्रवासनयातत्तच्छक्यत्वेनप्रतीयमानमर्थंतौस
हब्रूतोनभेदेनेतितदर्थः एवंचैकस्यधातोर्युगपद्विरुद्धार्थप्रत्ययाभ्यामर्थबोधनेसहायत्वासंभवेनैतद्व्युत्पत्तिविरो
धाद् नतथेतिभावः॥ पृथगुपस्थितौहिराज्ञःपुरुषोऽश्वश्चेत्यादाविवस्यादेवैकस्यविनिगमनाविरहादुभयान्वयः
॥एकोपस्थितौहिराजपुरुषोऽश्वश्चेतिवद्नतथाप्रयोगः॥एकविशेषणत्वेनोपस्थितस्यान्यविशेषत्वायोगात्॥व्याक

रणं तु यौगिकस्थले कल्पितावयवशक्तिबोधन द्वारा विशिष्टशक्तेरेवबोधकम्। समर्थानामिति सूत्रे च भाष्ये किं पुनः सम
र्थमभिधानेयच्चोक्तं किं पुनस्तत् कृतवर्णानुपूर्वीकं पदं सोऽस्मिति रित्युक्तम्॥ अन्यथादीर्घाभावेपि स्तुशब्द उपस्थितशब्द
यौः स्वार्थोपस्थापकत्वस्य तद्दुर्वारतया कृतवर्णानुपूर्वीकस्यैवाभिधानशक्तत्वोक्त्यसङ्गतिः॥ संख्याया अतिशद
न्ताया इति सूत्रे भाष्येपि न हि लोके केवलेन प्रत्ययेनार्थो गम्यते केन तर्हि सप्रकृतिकेनेति॥ वा सरूपसूत्रेपि भाष्ये उक्त
म्। तद्धित प्रकृतिः षष्ठ्यादियुक्ता प्रकृत्यर्थे वर्त्तते अन्येन च शब्देन प्रत्ययार्थोभिधीयते कृत्स्न कृति नैकेवलप्रकृत्यर्थे वर्त्त
ते नान्यः शब्दोस्ति यस्तमर्थं अभिदधी‾तेति॥ प्रकृतं विप्रत्ययसमुदाये प्रयुज्यमाने अन्वयव्यतिरेकाभ्यां प्रकृतिः प्रकृ
त्यर्थे वर्तते प्रत्ययस्तु प्रत्य‾यार्थे इत्युच्यते। अनुत्पन्नप्रत्यया तु न केचिदर्थं गमयति केवलायाः प्रकृतेः प्रत्ययार्थस्य
वा स्वार्थमात्राभिधाने सामर्थ्यं नास्ति इति च कैयटः। अर्थवतो ग्रहणमित्यादि तु शास्त्रवत् कल्प्यान्वयव्यतिरेकगम्य शा
स्त्र कल्पितार्थवत्त्वस्य शास्त्रव्यवस्था हेतुत्वेन नासङ्गतम्॥ कुत्सित इति सूत्रे कैयटे च स्फुटमेवैतत्। विभक्त्यन्ते एकार्थी
भाव व्यवहारस्तु न लोके पृथगुपस्थापकतया दृष्टानां समुदायशक्ति सहकारेणैकोपस्थितिजनकानां तत्स्वीकारा
त् न हि विभक्त्यन्तस्थले पृथगुपस्थापकत्वं दृष्टम्। पचति देवदत्त इत्यादौ देवदत्तादेः पचत्यर्थविशेषणत्वेनोपस्थिते

कर्त्तादावर्थेन्वयः कारकाणांक्रियाविशेषणानां चगुणभूतक्रियायामिवकारकाविशेषणा नामपिक्रियाविशेषणका
रकेष्वप्यन्वयस्वीकारात्सामान्यरूपेणैव कर्त्रादेराख्यातार्थतयातत्रनियमेन विशेषाकाङ्क्षायाः सत्वेनतथास्वीकारात्॥ प्र
त्ययार्थकर्त्तुर्विशेषणेनसंबन्धवत् क्रियान्तरेण पुनःसंबन्धः प्रत्ययानांस्वप्रकृत्यर्थ एवान्वयेनतत्रन्वितस्यान्वया
नाकाङ्क्षिततयादोषात्॥ एतेनपचतिपटन्नीत्यादावेककर्तृकपाकक्रियासंबन्धिकर्तृकर्तृकाभावक्रियेति बोधोपपत्ति
रित्यपास्तम्॥ स्पष्टंचेदंकुत्सने चसुपीत्यत्रकेयटे॥ इदंचप्रथमान्तवाच्यकर्त्रादेः प्रत्ययान्तवाच्यकर्त्रादिविशेषणत्व
मितिवादिनां मते क्रिययैवाभेदान्वय इति मते तु न काप्यनुपपत्तिः। एतेनसमानप्रत्ययोपात्तत्वप्रत्यासत्त्या विभक्त्यर्थकार
कसंख्यान्वयः तत्रारुणाधिकरणन्यायेनप्रथमंविभक्त्यर्थस्य क्रियान्वयः पश्चात् प्रकृत्यर्थेन॥ एवंचयस्त्वेकत्वोभयक
रणकोयागइतिबोधः पशुरेकइतितुपाष्टिकोबोधः। एवंचएकत्वस्ययागाङ्गत्वान्नानेकपशुभिर्यागइत्यपास्तम्॥ प्रकृ
त्यर्थं विहाय प्रत्ययार्थस्यान्यान्वये साधुत्वात्। किंचस्वादित्सूत्रस्यकर्मणिद्वितीयेत्यादिभिः संख्यावाक्यैकस्यां प्रा
स्तयद्दिकादेकस्मिन्कर्मणिद्वितीयैकवचनममित्यादिक्रमेणार्थः एवंचसंख्यायाः क्रियायांकारकत्वेनान्वयेविभक्ते
रसाधुत्वस्पष्टमेव। किंचभिन्नपदोपस्थितक्रियान्वयापेक्षया समानपदोपात्तत्वेनप्रथमंप्रकृत्यर्थान्वयस्यैवौचित्यंतद्

न्वितस्यैषक्रियाकाङ्क्षादर्शनात्केवलप्रत्ययात्तदनुपस्थितेश्च नहिनापदमात्रेणातदुपस्थितिः॥ प्रातिपदिकात्कर्मणिएकत्वे च एकवचनमित्यर्थेति प्रत्यासत्त्या प्रकृत्यर्थान्वय एवोचितः॥ ० किंच प्रकृतेस्त्वार्थे प्रत्ययो भवतीत्युक्त्या प्रत्यासत्त्या परस्परसंबन्धार्थबोध एव तत्तच्छास्त्रेण तयोः साधुत्वबोधनं एतन्मूलिकैव प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिः॥ ताभ्यां परस्य संबद्धार्थस्यैव बोधो न केवलस्येति तदर्थः। विभक्त्यर्थस्य प्रकृत्यर्थत्वे विशेषणतैव स्तुपर्यादितम्। कर्मणि वर्त्तमाने एकत्वे इत्यर्थेपि तस्य धर्मत्वप्रतीतेः॥ षष्ठ्यन्ताद्यसमभिव्याहृतपदोपस्थिते धर्मिणि धर्मस्य विशेषणताया एव दृष्टत्वात् तस्य प्रकृत्यर्थं प्रति विशेषणतैवोचिता एवं च प्रकृतिसुबर्थयोराकाङ्क्षाकार्यकारणभावविचारः परेषामस्मदादीनां च भ्रममूलक एवेति ध्येयम्॥ सर्वथा संख्यायाः कर्मत्वेनान्वयो न युक्तः तस्मात्पशुना इत्यादौ विशिष्टविधिसंभावात् नैकत्वविवक्षायामपि वाक्यभेदः स्पष्टं चेदं हेलाजीये नन्वेवमेकत्वस्य पशुविशेषणतया यागाङ्गत्वाभावात् तदभावेपि यागावैगुण्यात् तदविवक्षितमेव स्यात्। तदुक्तं जैमिनिना। तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वादिति इति चेन्न। विशिष्टस्य श्रुत्याङ्गत्वबोधनेन पशुत्वादिविशेषणवैकल्य इव तद्विशेषणवैकल्ये सत्यपि विशिष्टाननुष्ठानात् तद्वैगुण्योपपत्तेः॥ पशुत्वादिवच्छब्दबोध्यस्यास्यापि विशेषणभूतस्य यागाङ्गत्वोपपत्तेः

।तदप्युक्तंजैमिनिना॰शब्दवतूपलभ्यतेतदागमेहितद्दृश्यतेतस्यज्ञानंयथान्येषामिति॰शब्दवत्शब्दवाच्यंय
थाभवतितथोपलभ्यन्तेएकत्वंहियतस्तदागमेएकवचनागमेदृश्यते।तस्तस्याङ्गत्वज्ञानंयथान्येषांविशेषणानां
पशुत्वलौहित्यादीनामपि तदर्थः।एवंचजैमिनेरपिसंख्याविशिष्टप्रकृत्यर्थबोधएवतात्पर्यम्॥हरिरप्याह।यजेतप
शुनेत्यत्रसंस्कारस्यापिसंभवे।यथाजातिस्तथैकत्वंसाधनत्वेनगम्यतेइति।नकेवलाप्रकृतिरितिन्यायात्।विभक्ते
संस्कारार्थसंभवेपिजातिवदेकत्वमपिक्रियासाधनविशिष्टस्यैवोपस्थितेः इत्यर्थइतिहेलाराजः।अपिचसंख्याया अ
मूर्तत्वात्करणत्वासंभवः॥नचपरंपरयातस्याःकरणत्वम्।अयोग्यतयापरंपरयाक्रियान्वयकल्पनापेक्षयोक्त
युक्तिभिःप्रकृत्यर्थान्वयस्यैवकल्पयितुमौचित्यात्॥अरुणयेत्यादौतुगुणस्यापितृतीयाप्रकृत्यर्थत्वात्॥परंपरयाक
रणत्वमुचितम्।एवंचविधेयविशेषणंसर्वमविवक्षाकारणाभावाद्विवक्षितमितिसिद्धम्।ग्रहंसंमार्ष्टीत्यादौउद्दे
श्यग्रहगतमेकत्वंअविवक्षितंतथाहिप्रजापत्यानवग्रहाइत्यादिवाक्यविहितग्रहोद्देशेनसंमार्गोविधीयतेतत्रैक
त्वविवक्षायांग्रहोत्पत्तिवाक्यगतसंख्ययाएतद्वाक्यगतैकत्वस्यविरोधात्तयोर्वाक्ययोर्भेदापत्तिः॥यत्तुपरस्प
रानपेक्षैकविधनानाकारकान्वयःक्रियायामव्युत्पन्नःएकत्वस्याश्रयविधयाग्रहाकाङ्क्षत्वेपिग्रहोत्पत्तिवा

कयतोनिर्ज्ञातसंख्यतया तदनपेक्षत्वादिति। तन्न। अश्वेनयथादीपकमाव्रजतीत्यादौ साधकतममितिसूत्रस्थकैयटादिसंमतेप्रयोगेतद्दर्शनात्। एवंचानुवादवाक्येउत्पत्तिवाक्यगतधर्मविरुद्धंविशेषणमविवक्षितम्। अतएवव्रीहीनवहन्तीत्यादौउद्देश्यविशेषणमपिबहुत्वंविवक्षितमेव।। नचग्रहानुवादेनसंमार्गः संमृज्यमानग्रहानुवादेनचैकत्वंविधेयमस्त्वितिवाच्यम्।। एकपदार्थेयोरुद्देश्यविधेयभावेमानाभावात्संमार्गस्यानुवाद्यकोटावलाभाच्च।। वाक्यभेदापत्तेश्च। किंचोत्पत्तिवाक्येबहुत्वादिसंख्याश्रवणाद्विधेयगतत्वेनतदादिशब्दोपात्तत्वेनचतस्याविवक्षणात्।। तत्रतत्संख्याविशिष्टानामेवानुभावाद्ग्रहशब्देनतेनरूपेणस्मृतेषुविभक्त्यैकत्वबोधनेउपक्रमस्थस्यबाधइत्यस्यमीमांसकोक्तवाक्यभेदपदार्थत्वंस्पष्टंचेदंहेलाराजीये। पशौतुनतथाविरुद्धसंख्यायाश्रवणंतस्मात्तुस्वविशिष्टस्यैवसंख्यांविशिष्टस्यैवतत्रविधानम्। अपिचग्रहमितिद्वितीययाग्रहस्यसंस्कार्यत्वंलक्षणंप्राधान्यंप्रतीयते एवंचप्रतिप्रधानंगुणावृत्तिरितिन्यायाद्विनिगमनाविरहाच्चसोमावसेकनिर्हरणफलकसंमार्गस्यसर्वग्रहेष्वपेक्षणाच्चविधेयपश्वादिविशेषणवत्क्रियांगत्वाभावेनतद्वैकल्यप्रयुक्तक्रियावैकल्यप्रसक्तेश्चसर्वत्रग्रहेसंमार्गसिध्याविवक्षाफलाभावेनतदविवक्षा। अपिचोत्पत्तिवाक्यगतसंख्याग्रहस्यपरिच्छिन्नत्वात्परिच्छेदकाका

ङ्क्षाभावे तद्विवक्षा॥ तदुक्तं जैमिनिना एकत्वयुक्तमेकस्य श्रुतिसंयोगादिति पूर्वपक्षे सर्वेषां हि लक्षणत्वादविशिष्टं हि लक्षणमिति। सर्वेषां संमार्गः कार्यः ग्रहत्वजातेर्द्रव्यलक्षणत्वाद् द्रव्यबोधकत्वाद् लक्षणं द्रव्यबोधनं अविशिष्टं यत इत्यर्थः। भगवता शबरस्वामिना तु प्रौढिवादेन संख्याया अपि कारकत्वेन क्रियान्वयः पश्चात्सङ्कृत्यर्थेन पाणिनिकः संबन्ध उक्तस्तथा ग्रहं संमार्ष्टि तेनैकमित्यादिरीत्या वाक्यभेदः संख्याविवक्षायां दर्शित इति न तत्र तस्य भारः। नव्यमीमांसकैस्तु स एवार्थो वास्तवत्वेन गृहीतः वाक्यार्थविचारार्थमेव तच्छास्त्रस्य प्रवृत्त्या पदार्थविचारस्य तत्रानुचितत्वात्पदार्थविचारप्रयुक्तव्याकरणशास्त्रनिर्णीतपदार्थस्यान्यथाकरणे प्रौढेरेव निमित्तत्वात्। तं विना जैमिनिवाक्यानुपपत्त्यभावाच्च एकत्वयुक्तमिति जैमिन्यक्षरास्वारस्याच्चेत्यलम्॥ इदं शब्दसंस्कारार्थतयोपात्तविशेषविषयमेव ईदृशे विषये जातावेकवचनं बोध्यम्। यद्वा न केवला प्रकृतिरिति न्यायात् शब्दसंस्कारार्थमेव संख्याविवक्षा न तु प्रकृत्यर्थावच्छेदाय यत्तु अनान्तरीयकं शब्दोपात्तं तद्विवक्षितमेव यथा प्रकृते ग्रहत्वं यथा च द्वाभ्यां सनति चतुर्भिरादत्ते पञ्चभिर्हरति इत्यादौ द्वाभ्यामित्यादि यस्योभयं हविरार्तिमिच्छेत्स पञ्चशरावमोदनं निर्वपेदित्यादावयवद्वयारब्धः स हि उभयशब्दवाच्यो न तु संख्येयेकावयवनाशेपि समुदायस्य नाशात् निर्वापः क्रियत एवेति हरिग्रन्थे स्पष्टं अपादानसंज्ञासूत्रे भा

CC-0. In Public Domain. Digitization by eGangotri

ष्ये तु धावतः पतित इत्यादाव ध्रुवत्वादुपादानत्वाभावमाशङ्क्य सतोप्यविवक्षा भवति तेन पदोपात्तमपि धावनमविव
क्षितं इत्युक्तं इदं तु दर्शपूर्णमासाङ्गसान्नायप्रकरणे पठ्यते ॥ तत्र हि सायंप्रातर्दोहात्मकं दधिद्रव्यम् । कल्पसूत्रकारास्तु प्रसेक
नाशे पृथक्प्रायश्चित्ताम्नानाद् द्वैविध्यस्यापि नाशद्वये प्रायश्चित्तमित्युभयत्वं विवक्षितमेवेत्याहुः । यत्तूभयत्वविवक्षायां
वाक्यभेदः तथा हि नाम पदानां परस्परमसंबन्धानामाख्यातान्वयोऽरुणाधिकरणसिद्ध इति हविरार्तौ निर्वपेत् ॥ तच्च हविरु
भयमिति ग्रहैकत्वन्यायेन तु न गतार्थता पृथक्पदोपात्तत्वादिति तन्न । पदोपादानवैयर्थ्यात् ॥ न ह्यर्थलाघवानुरोधेन तदुपा
दानस्य यथाकथंचित् अनुवादकत्वकल्पना युक्ता ॥ अकर्तृके वेदे वक्तुरिच्छा रूपे विवक्षाविवक्षे आरोपिते बोध्ये । वस्तुतः
परस्परासंबद्धानां नामार्थानामाख्यातान्वयो न व्युत्पन्न इत्यग्रे वक्ष्यते उपेयिवाननाश्वाननूचानश्चेत्यादावुपेसस्याविव
क्षा नञो विवक्षा तु लक्ष्यानुसारादेव क्वचिदुद्देश्यगतविभक्त्यर्थसंख्याविवक्षैव यथा गर्गाः शतं दण्ड्यन्तामित्यादौ गर्गा इति
बहुत्वग्रहैकत्वस्येवाविवक्षाबीजाभावात् ॥ एतदेवाभिप्रेत्य संख्यायां गुणस्येति सूत्रे गुणस्येति संख्याविवक्षिता इत्युक्तं भा
ष्ये अत एवात्र समुदाये वाक्यपरिसमाप्तिरिति वृद्धिसूत्रे भाष्यम् । किं चैकवचनेनैवोपपत्तौ बहुवचनकरणेन बहुत्वसंख्या
विवक्षिता अत एव वृक्ष्याँ छिनत्ति परशू नन क्ति अग्नीनादधीतेत्यादावुद्देश्यगतमपि बहुत्वं विवक्षितमेव एवं विधेयविशेषणम
पि अविवक्षाबीजसत्त्वे विवक्षितमेव ॥ यथाम्रफलमेनं भोजयेति फलविधेयतापरनोदनायां भोजनफलस्य तत्सैकफल

लं॰ मं॰
२७

भोजनेः संभवात्तात्पर्यानुपपत्त्याविधेयगतैकत्वस्याविवक्षा। क्वचिच्छब्दोपात्तस्यापि अनुवाद्यविशेषणस्याविवक्षाय
थैतौ वैद्यावितौ स्यातां देयं स्यादिदमौषधं स्यादित्यादौ रदाभ्यां निष्ठातो नः पूर्वस्य च द इत्यत्र न द्वित्वैकत्वविवक्षायामपि
चकारेण वाक्यभेदकल्पनायाः स्थाने प्रत्येकमेकैकनकारलाभः। अस्य मूलस्य कटं कुरु अस्य मूलस्य कटं कुर्वित्यादौ वाक्य
भेदे नैककटकरणकप्रतीतिवद् आद्गुण इत्यादौ तु पूर्वपरयोरिति द्वन्द्वनिर्देशे नैकवाक्यतयैवोभयोः स्थाने एकगुणविधाना
द् नस्थानिभेदेनानेको गुणः विधेयगतसंख्याया अविवक्षायां बीजाभावात्। यथानयोः मूलयोः कटं कुर्वित्यादौ एकवाक्य
तयैव बोधात् उभयसंबन्धिनः एककटस्यैव करणप्रतीतिरित्येकः पूर्वपरयोरिति एकग्रहणं भाष्ये प्रत्याख्यातम्॥ ननु य
था आधानेनाग्निं संस्कुर्यादित्याद्यर्थकं वसन्ते ब्राह्मणोऽग्निमादधीतेत्यादिवाक्यं अग्न्यादिसंस्कारमात्रफलकं प्रतिब्राह्म
णं सकृदेव स्वविषये प्रवर्त्तकं चात एव पुनःपुनर्नाधानादिसंस्कारः। तथा आद्गुण इत्यादेः व्याकरणस्यावर्णादचि पूर्वप
रयोर्गुणो भवति गुणवच्छब्दरूपं साधु भवति तच्च प्रयोक्तव्यमित्येतत्पर्यन्तं व्यापारेऽपि तच्छास्त्रं प्रतिपुरुषमेकवाक्यतया
सकृदेव बोधकमिति तत्संस्कृतस्यैकस्य खट्वेन्द्रस्य प्रयोगेण शास्त्रार्थस्य करणान्मालेन्द्रादिप्रयोगो न स्यात्॥ अतस्त
त्तल्लक्ष्यविषयकभिन्नसूत्रोपप्लवेन वाक्यभेदो वाच्यः तद्वत्पूर्वपरविषयेऽपि स्यादित्येकपदमावश्यकमिति चेन्न॥ एत
च्छास्त्रबोध्यस्य तच्च प्रयोक्तव्यमित्यंशस्य नित्यकाम्यत्वेन नित्यनैमित्तिककाम्यधर्मोपदेशकशास्त्रस्येवासकृत्प्रवृ

राम॰
२७

त्तिसंभवात्॥ स्वाभावे पापजनकं नित्यम्। यथाब्राह्मणहिंसातद्बोधकं नब्राह्मणं हन्यादिति ब्राह्मणमात्रविषयम्। नैमित्तिकं राहूपरागादि स्नानं तद्प्यकरणे दोषश्रवणाद्राहूपरागमात्रविषयम्॥ काम्यं ज्योतिष्टोमादि तद्बोधकं वाक्यं कामानामानन्त्यात् आवृत्त्या वाक्यभेदेन पुनः पुनः प्रवर्त्तते। एवमर्थबोधनाय प्राप्ते शब्दप्रयोगे साधुभिर्भाषितव्यं नासाधुभिरित्यनेनासाधुप्रयोगे पापश्रवणान्नित्यसमत्वम्। साधुप्रयोगस्य एकः शब्दः सम्यक् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गेलोके कामधुक् भवतीति भाष्यपठितश्रुत्या स्मृत्या वा काम्यत्वमप्यास्यानेन प्रयुक्तिलाघवात् अर्थबोधनाय प्राप्ते एव प्रयोगे फलसंबन्धबोधनं दर्शपूर्णमासयोरिव॥ एतेनैकस्यैव पुनः पुनः प्रयोगेणानेककामनाफलसिद्धिरिति अपास्तम्॥ अत्र सम्यक् ज्ञातकोपि अर्थबोधनाय सुप्रयुक्तः शिक्षायुक्तमार्गेण प्रयुक्तः कामधुक् भवति किं वक्तव्यं सर्वेपीति सर्वेषां तथा प्रयोगः कार्य इति बोधनात् सर्वशब्दानां आवृत्त्या वाक्यभेदेन शास्त्रविषयता सूचिता॥ शास्त्रान्वित इत्यनेन शास्त्रस्मरणपूर्वकप्रयोगे धर्मः सूचितः॥ तत्तल्लक्ष्यविषयोपप्लुतवाक्ये गुणो भवतीति अंश आधानादिवद्लक्ष्यसंस्कारक एवेत्यावृत्तौ मानाभावात् नैकलक्ष्ये पूर्वपरादिभेदेन पुनः पुनःस्तस्य वृत्तिः तस्य प्रयोक्तव्यमित्याशङ्क्य नित्यकाम्यबोधकस्य तत्तल्लक्ष्यविषयकानन्तवाक्योपप्लवेन सजातीयानां च पुनः पुनः प्रयोगसिद्धिरिति बोध्यम्। एवं पशुना यजेतेत्याद्योपि नैमित्तिका एव भाविनोपिधानस्य बुद्ध्यारूढत्वेन निमित्तत्वं इति विध्यावृत्त्या प्रतियोगमेकैकपशुलाभः। एत

देनपठ्यते संग्राहकवाक्याल्लस्यसंस्कारकाणि वाक्यान्युपप्लुवन्त इति प्रतिप्रधानं गुणावृत्तिच। अतएव विधिवाक्यात्तेन पुरुषेण स्वस्वप्रवृत्त्यनुकूलव्यापारविषयत्वस्य स्वीय स्वीयप्रयोगे ग्रहात्तत्र मदिष्टसाधनत्वस्य मत्कृतिसाध्यत्वस्य ग्रहे तत्तत्प्रवृत्त्युपपत्तिः व्याकरणे च बालान्प्रति प्रतिप्रयोगं तत्तत्प्रयोजनं कार्यमिति व्यवहारात् आवृत्तिः सिद्धे वा। भूवादयो धातव इत्यादौ प्रत्येकं धातुत्वपर्याप्तिबोधनाय बहुवचनम्। हरिरप्याह। एकं ग्रहणकं वाक्यं सामान्येनाभिधीयते। कर्त्तरीति यथा त्वपभ्यादिषु विभज्यते। एकरूपमनेकार्थं तस्मादुपनिबन्धनम्। यो निर्विभागवाक्यानां तेभ्योनन्यद्विवस्थितमिति। ग्रहणकवाक्यत्वाभावे यत्किंचिद्योगेन परिक्षीणशक्तित्वात् अन्येन प्रत्ययविधायकेन कर्त्तरि कृदित्यानेन संबध्येत। अतएव न पश्नौ कर्तरीत्याद्युपपद्यते।। उपनिबन्धनं बहूनां वाक्यानां निबन्धनं स्थानं तेभ्यो विभागवाक्येभ्यः अनेकार्थे यथा ण्वुल् कर्त्तरि अण् कर्तरीत्याद्यनेकार्थबोधकमिस्पर्थे पुन् जराजः। एवंच विभक्त्यर्थसंख्यारूपमनुवाद्यविशेषणं विरोधे सत्यर्थापरिच्छेदकमेव। अविरोधे तु तत्परिच्छेदकतया तत्रान्व य्येव एतेन सुप्सुपेत्यादावेकत्वं विवक्षितत्वेन सुबन्तसमुदायेन न समास इति कैयटाद्युक्तमपास्तम्। किंच तत्रैकत्वविवक्षायां सर्वसुबन्तैः समासालाभः सर्वप्रातिपदिकाच्च प्रत्ययालाभः। किंच सुबुत्पत्तिवाक्ये तेषां बहुत्वसंख्यावगमेन तद्विरोधात्त्रैकत्वविवक्षा न युक्ता ग्रहैकत्ववत्। सुबन्तसमुदायेन समासस्तु भाष्यकृतेत्यं वारितः। सुप्सुपेति वर्त्तते तत्तु चभोः आकृतौ शास्त्राणि प्रवर्त्तन्ते प्रातिपदिका

त्सुप्सुपेत्सुक्तेन्यस्मादन्यस्माच्चप्रत्ययःक्रियतेऽन्येनान्येनसुबन्तेनचसमासःक्रियते।नैषदोषः।आकृतिस्सुप्प्रत्येकंसमा
प्यतेऽवयवेतत्समाप्यतेप्रातिपदिकादितिसुप्सुपेतिचतावतःप्रत्ययोऽसत्यातावतासमासेनभाव्यंप्रत्येकंचसमाप्यतेप्रा
तिपदिकादितिद्वयोश्चैतत्समाप्यतेसुप्सुपेतीति।आकृतावित्यस्यतज्जात्यस्य।श्रयेसर्वत्रेत्यर्थः।अतएवसरूपसूत्रेभाष्ये
जातेःपदार्थत्वेगौरनुबन्ध्यइत्यत्रसर्वानुबन्धनाभावेकर्मवैगुण्यमाशङ्क्ययद्यपितत्पक्षेनवयवेनसाकल्येनचो
द्यतेतथापिजातिःप्रत्येकंसमाप्यतेइत्येकानुबन्धनेपिकर्मवैगण्यमुक्तम्।नतुजातावुक्तंकार्ययत्रक्वचिद्व्यक्तौकर
णेनशास्त्रस्यकृतत्वाद्व्यक्त्यन्तरेनप्रवर्ततेतिउक्तम्।तथानित्यवीप्सयोरितिसूत्रेव्याप्तिप्रतिपियादपिषारूपवीप्सोपा
दानेकिंप्रयोजनमितिप्रश्नेसाकल्येनद्रव्याणांक्रियागुणादिसंबन्धप्रतिपादनरूपमनवयवाभिधानंतदुपादानेप्रयोजन
मित्युक्त्वायद्येवंजात्याख्यायांद्विर्वचनंप्राप्नोतिव्रीहिर्यवइतिजातौपदार्थेसाकल्येनसर्वद्रव्यप्रतिपत्तिरितिचकैयटः।नचैका
र्थत्वाज्जातेरनेकार्थाश्रयाचवीप्सेतिपरिहृतमित्यन्यत्।अयंभावः।यथास्वाङ्गत्वस्यजनपदत्वस्यचप्रत्येकंसमास्यास्वाङ्गस
मुदायजनपदसमुदाययोर्नस्वाङ्गग्रहणेतज्जनपदग्रहणेनचग्रहणंतथाप्रातिपदिकादिपदप्रवृत्तिनिमित्तप्रातिपदिकत्वसुबन्तत्वा
दीनांप्रत्येकंसमाप्त्यानतत्समुदायस्यताभ्यांपदाभ्यांग्रहणमिति।नचस्वाङ्गोदित्यादौएकत्वविवक्षयातदर्थलाभः।तत्रत्यैकत्व
स्यसत्त्वबोधकप्रत्ययप्रकृत्यर्थस्वाङ्गवाचकशब्दान्वितत्वेपिस्वाङ्गान्विततत्पैकस्वाङ्गवाचकादित्यर्थलाभेनसुन्दरपाणि

पादेत्यादौ ङीषवारणासंभवात्स्वाङ्गवाचकपाणिपादशब्दस्यैकत्वात्। किंच ङ्याप्प्रातिपदिकादित्यादौ समासे संख्याया अभावेन प्रातिपदिकसमुदायात्प्रत्ययो दुर्निवारः। श्रूयमाणविभक्त्यर्थैकत्वं तु तत्र समुदायान्वयि तस्मात् भाष्योक्तं समाधानमेव युक्तम्। किं चैवं स्त्रीभ्यो ढगित्यादेः स्त्रीप्रत्ययान्तसमुदायादापत्तिः यथा च बहुवचनसत्त्वेप्येकैकस्त्रीप्रत्ययान्तादेव प्रवृत्तिः न तत्समुदायादेवमन्यत्रापि। पशुना यजेतेत्यादौ त्वविरोधादेकत्वस्य प्रकृत्यर्थान्वयित्वं इत्येतावता विवक्षाव्यवहारः। केचित्तु तद्यागव्यक्तिविषयेणानेन पश्ववयवसाध्यसकलयागव्यक्त्युद्देशेन पशोर्विधानं तत्र यावति पशुत्वं समाप्यते प्रत्येकं तस्य विधानं प्राप्नोति अनेकयागानामुद्देश्यत्वात्। तद्वारणायैकत्वविवक्षा अन्यथा रद्राभ्यामित्यादाविवोद्देश्यानेकत्वेनानेकपशुविधानं स्यात्। यद्यपि एकेनैव सकलावयवलाभात् वृथा पशुवधभिया नैवानेकपशोर्विधानं तथापि तदविवक्षायां मांस लोभेनाज्ञानेन वानेकपशुकयागकरणे कर्मवैगुण्यं न स्यात् पशुत्वपर्याप्तिकरणेन तदनुष्ठानादतस्तद्विवक्षा न चात्रैकत्वविवक्षायामेकपशोरेव यागः स्यान्न पश्वन्तरस्येति शङ्कापि प्रतियागसमुदायात्मकयागव्यक्तिएकैकपशोर्विधानात् यागत्वावच्छेदेनैकपशोर्विधानासंभवादित्याहुः। एवं लिङ्गस्यापि विवक्षाविवक्षे बोध्ये॥ इतिसुबर्थविचारः॥ ॥ ॥ ॥ ॥

श्रीगणेशायनमः॥ अथवृत्तिविचारः॥ तद्विषयंसमर्थः पदविधिरितिसूत्रम्। सामर्थ्यंचात्रैकार्थीभावः। पृथगर्थानामेकार्थीभावः सामर्थ्यंराज्ञःपुरुषइतिवाक्ये पृथगर्थानिराजपुरुषइतिसमासे एकार्थानीतिभाष्यात्। एवंचयत्किंचित्पदजन्यपृथगुपस्थितिविषयार्थकत्वेनलोकदृष्टानांविशिष्टविषयैकशक्त्यैकोपस्थितिजनकत्वमेकार्थीभावइतिफलितम्। तेषांतत्वंतुसाहस्याद्बोध्यम्। कार्यंशब्दमन्वतांवाक्यादेववृत्तिनिष्पत्तिबुद्धेर्वा। एकार्थीभावइतिद्विनिर्देशोगौणमेकार्थत्वंसमासघटकपदानांबोधयितुम्। यथापदानामसत्वात्तत्सत्ताव्यवहारोगौणः तथातेषामेकार्थत्वव्यवहारोपीतिबोध्यम्। विभक्त्यन्तेएतद्वारणायदृष्टानामित्यन्तंतेषांलोकेतत्वेनादृष्टत्वात्। औपगवादौप्रत्ययानांतथादृष्टत्वाभावेनयत्किंचित्पदजन्येत्युपस्थितिविशेषणम्। अपत्यरूपार्थस्योपगोरपत्यमस्त्रीत्यादौतथादर्शनसत्वात्। विभक्त्यर्थस्यतुनतथात्वम्। तद्वाच्यार्थवाचकस्यशब्दान्तरस्याभावादितिनिरूपितम्। विशिष्टविषयैकशक्त्येतिहेतुवचनम्। अतएवकैयटः। अन्यएवावयवार्थान्वितःसमुदायार्थःप्रादुर्भवतीतितदपेक्षयैकार्थीभावउच्यतेषांसूदकवदविभागापन्नत्वादिति। अयंभावः। वाक्येयथापदैःपृथक्पदार्थानांबोधेप्याकाङ्क्षामूलकवाक्यशक्तिवशाद्विशेष्यविशेषणभावापन्नविशिष्टार्थप्रतीतिर्नैवंवृत्तौ। किंत्ववयवशक्तिभ्यामाकाङ्क्षामूलकसमुदायशक्तिसहकृताभ्यांनियतोद्बोधकवशात्पदार्थबोधएवजायमानोविशेष्यविशेषणभावापन्नविशिष्टविषयोभवति। तत्रवि

शिष्टशक्तिग्रह इत्यम्। राजपुरुषादिपदं राजसंबन्धवत्पुरुषादौ शक्तमिति। तत्र सा विशिष्टशक्तिः प्राप्ताप्राप्तविवेकन्यायेन संबन्धां
शे विशेषणत्वाद्यंशे च पर्यवस्यति। राजादेः कृत्स्नावयवशक्त्यैवोपस्थितिसंभवात्। आकाङ्क्षामूलके विविशेषणाद्द नित्यघट इ
त्यादेर्नैकार्थीभावेन साधुत्वम्। विशेषणत्वेनोपस्थितघटत्वादेः स्वविशेषणाकाङ्क्षाभावाद् अतो नित्यो घट इत्यादिवाक्यमपि न।
अत एव राजपुरुषैकदेशे राज्ञि वाक्य इव ऋद्धस्येत्यादिविशेषणान्वयो न। तस्य पदार्थैकदेशत्वात्। यद्यपि तस्य राजपदार्थत्वम
स्ति। तथापि विशेषणान्वये विशेष्यस्येतरविशेषणत्वविषयकशक्तिग्रहाविषयत्वस्य तत्त्वेनेतराविशेषणत्वेन ज्ञातस्य त
त्त्वेन वा दोषाभावः। एतन्मूलिकैव पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिः। दर्शनीयाया माता दर्शनीयामाता
इत्यादौ एकविशेष्यकप्रतीतिजनकत्वरूपसामानाधिकरण्यसत्त्वेपि न पुंवत्त्वम्। वृत्तेः पूर्वमपि यत्र सामानाधिकरण्यं तत्रैव पुं
वत्त्वप्रवृत्तेर्भाष्यसंमतत्वात्। राज्ञि विशेषणानन्वयरूपविशेषस्यैकार्थीभावकृतत्वं भाष्ये दूषितम्। एकार्थीभावसत्त्वेपि देवदत्त
स्य गुरुकुलमित्यादौ तदभावात्। इदमुपलक्षणम्। घटादिपदे एकार्थीभावाभावेपि तदेकदेशघटत्वादौ विशेषणान्वयाभावादि
त्यपि बोध्यम्। राज्ञः पुरुषोऽश्वश्चेति वद्राजपुरुषोऽश्वश्चेत्यप्यत एव न। एकत्र विशेषणत्वेन गृहीतशक्तिकस्य ज्ञातस्य वापरत्र
विशेषणत्वायोगात्। घटः पटश्च द्रव्यमिति वत् तदर्थे द्रव्यपदस्य घटरूपविशेषपरतायां द्रव्यं पटश्चेत्यप्रयोगात्। एवं राज्ञः

पुरुषोभार्यायाश्चेतिवद्राजपुरुषोभार्यायाश्चेतिन।एकविशेषणवैशिष्ट्ये नगृहीतशक्तिकेज्ञातेवाविशेष्येतत्सजातीयसंबन्धे नविशेषणान्तरसंबन्धस्याप्युत्पत्तेः।घटोद्रव्यमित्यर्थेघटोद्रव्यत्वस्येत्यप्रयोगात्।तदुक्तंभाष्येराजापुरुषंस्वाम्यन्तरेभ्योनिवर्त्तयतिपुरुषोपिराजानंस्वान्तरेभ्योनिवर्त्तयतीति।राजसंबन्धविशिष्टेभार्यायाःप्रीतिविषयत्वादिसंबन्धबोधकोराजपुरुषोभार्याया इतिप्रयोगास्तुराजपुरुषःसुन्दरइतिवदिष्टः तत्रसुन्दरनिष्ठप्रकारतानिरूपितपुरुषनिष्ठविशेष्यतायाअवच्छेदकंपुरुषत्वमेवनतुराजसंबन्धोपीत्यभिप्रायेणप्रधानस्यसविशेषणत्वेपिवृत्तिरितिव्यवहारः।एवंसर्वत्रविशिष्टविषयकज्ञानेविशेष्यतावच्छेदकत्वादिविशेष्यनिष्ठधर्मएवेतिबोध्यम्।विशिष्टस्यविशेष्यानतिरेकात् इतिकर्मधारयप्रकरणेस्फुटीभविष्यति।एकार्थीभावबलादेववृत्तावुपसर्जनपदार्थेसंख्याबोधकप्रातिपदिकाभावेएकत्वादिरूपसंख्याविशेषानवगतिस्तेनद्विपुत्रादौनदोषः।मासजातादावपिशब्दान्नतद्बोधः।किंत्वनेकमासजातेद्वित्रिशब्दादिपूर्वमासजातस्यैवप्रयोगादेकमासजातविषयएवायंप्रयोगइतिनिश्चयः।त्वत्पुत्रोयुष्मत्पुत्रइत्यादावपिप्रयोक्तुरहंकारएनास्मदचैत्रपुत्रइत्येवबोधः।विग्रहवाक्यीयैकवचनत्वारोपेणादेशः।अयंत्वारोपोनबोधफलकः किंतुशास्त्रप्रवृत्तिमात्रफलकः।वृत्तेस्तथाबोधेभाष्यकृताःसाधुत्वबोधनात्।यत्तुआदेशतदभावाभ्यांतत्रसंख्याविशेषावगतिःभाष्येतात्पर्यग्राहकाभावेसतीतिपूरणीयमिति।तन्न।तद्विधायकशा

स्याज्ञानवतः तद्बोधानापत्तेः। विग्रहेद्विवचनबहुवचनान्तत्वेपिएकार्थीभावबलाद्वृत्तौतद्बोधः अतएवप्रगृह्यसंज्ञासूत्रभाष्यप्रयुक्तेकुमार्योरगारं कुमार्यगारमित्यादौद्विवचनान्तेनविग्रहेपिवृत्तौद्वित्वाबोधः किंतुकुमारीत्वादिनैवकुमारीद्वयबोधः। अन्यथासिद्धान्तेप्रगृह्यत्वाभावेनद्वित्वव्यञ्जकाभावादस्यप्रयोगस्यासाधुत्वेनासाधुप्रयोगेभगवतोऽश्रद्धेयतापत्तिः एवंचवृत्तौसंख्यानवगमेपिअनेकार्थप्रतीत्यातथाविग्रहेबाधकाभावः। अतएवसंख्याविशेषानवगतिरेवोक्तानत्वनेकार्थानवगतिरुक्ता। चित्रगुरित्यादौगोत्वेनैवशब्दतोऽनेकगोव्यक्तिबोधः नतुबहुत्वेन। तन्मध्यइत्यादौतत्वेनैवव्यक्तिद्वयबोधोनतुद्वित्ववत्वेनैवमन्यत्राप्यूह्यम्। अतएवकुक्कुटेन्दुगोपवाचकगोपुचरवर्षासुजादौबहुवचनसत्वेपिनसंख्याविशेषबोधः। अत्रतादृशस्यैवरूढत्वाद्बहुवचनान्तेनैवविग्रहः। एवंचात्रारोपितबहुत्वाश्रयोबहुवचनरूपः संस्कारोनतुप्रकृत्यर्थान्वयियथाचघटाद्यादितोबहुत्वेनैवकदाचित्त्रयाणांकदाचित्चतुरादीनांभानंनतुकदाचिदपित्रित्वचतुष्ट्वादिनातथावृत्तौराजत्वादिनैकानेकव्यक्तिभानंतात्पर्यवशान्नत्वेकत्वद्वित्वादिना। दन्तोष्ठस्यदन्ताः स्निग्धतराइत्यादौचसंख्यायाअभानाद्दन्तत्वेनोष्ठत्वेनदन्तोष्ठलक्षणार्थद्वयस्यप्रतीतेस्तत्वेवअनेकव्यक्तिसत्वेपितासामनेकत्वेनशब्दतोभानाभावादितिबोध्यम्। एतदुक्तौकाश्यामुक्तद्त्यादावलुकिनसाधु। अनभिधानादितिस्पष्टंभाष्ये। जातौबहुवचनमितिकैयटोक्तंतुनयुक्तम्। जात्याख्यायामित्येतत्सूत्रप्रत्या

चक्षाणेनभाष्यकृताजातौपदार्थेबहुवचनस्यासाधुत्वबोधनाद्यथोत्तरंमुनीनांप्रामाण्यात्।अतएवभाष्यकृतःस्वविशेषस्योपसर्जनविशेषणाभावरूपविशेषस्यगुरुकुलमित्यादाविवमासजातादावव्यापकत्वेनोक्तंसंख्याविशेषानवगतिरेवैकत्वसंख्यापदेनोच्यते।भेदसहत्वरितद्वित्वादेरेकत्वस्यचाभानमितितदर्थः।संख्याविशेषप्रतीतौपृथगुपस्थापकपदज्ञानंकारणमितितत्प्रतीत्यभावस्यैकार्थीभावकृतत्वमन्यथाघटोघटपटावित्यादौघटत्वादेरपिसंख्याविशेषावगत्यापत्तिः।तदुक्तंहरिणा।वाचिकाद्योतिकावापिसंख्यानांयाविभक्तयः।तल्लुक्यवयवेवृत्तौसंख्याभेदोनिवर्त्ततेइति।यत्त्वत्रअभेदैकत्वसंख्याभासतेपरित्यक्तविशेषसंख्यासामान्यमेवाभेदैकत्वसंख्यायथैकत्वद्वित्वादीनांनिमित्तंतथेदमभेदैकत्वंसर्वेषामेकत्वादीनांनिमित्तमितिसापिसंख्येत्युच्यतेद्वित्वाद्यनुस्यूतैत्वादेकस्वभावत्वेनाभिन्नमिवेतितेनपदेनोच्यतइतिहेलाराजः।यथादूराद्रूपमात्रंगृह्यतेनतुशुक्लकृष्णादिविशेषएवंराजपुरुषइत्यादौसत्वभूतत्वात्संख्यावानत्रार्थइत्येतावत्प्रतीयतेनत्वस्यार्थवद्संख्योनापिघटादिवद्विशेषसंख्यावच्छिन्नइति।विशेषपरित्यागश्चतदभानमेव।यद्वाराजपुरुषइत्युक्तेराजद्वयादिसंबन्धिनोपिभानात्सर्वविशेषाणांसामान्यरूपेणभानंमधुनिरस्तानामिव।अतएवतत्रराज्ञोराज्ञांवेतिजिज्ञासा।विशेषजिज्ञासायाःसामान्यज्ञानपूर्वकत्वनियमात्सतितुनिमित्तेमासजातादौतत्प्रतीतिर्भवत्येव।उक्तंभाष्यंतुराजपुरुषइत्यादिप्रयोगविषयमेव।तदुक्तंहरिणा।अभेदैकत्वसंख्यावातत्रान्ये

वोपजायते। संसर्गरूपं संख्यानामविभक्तं तदुच्यते। वृत्तावुपसर्जनपदार्थानामपि सत्त्वभूतत्वात्संख्यायोगावश्यकत्वेन विशेषसंख्याभावेन च सामान्यसंख्यारूपं सर्वसंख्याविशेषाणां संसर्गरूपं तदिति तदर्थः। यथौषधिरसाः सर्वे मध्वाहितशक्तयः। अविभागेन वर्त्तन्ते तां संख्यां तादृशीं विदुरित्यनेन यद्वेति पक्ष उक्तः। आद्यमाह। भेदानां वा परित्यागात्संख्यात्मा स तथाविधः। व्यापनाज्जातिभागस्य भेदापोहेन वर्त्तते। पूर्वं समस्तभेदसंसर्गरूपं तदित्युक्तमिदानीं तु समस्तभेदानुगतं भेदापोहरूपं तदिति विशेषः। अर्थस्य सामान्यविशेषरूपानेकधर्मवत्त्वेपि विचित्रत्वाच्छब्दशक्तीनामुपसर्जनपदे सर्वविशेषसंसर्गभानं सर्वविशेषाणां संख्यात्वेन वा भानम्। अगृहीतविशेषेण यथारूपेण रूपवान्। प्रख्यायते न शुक्लादिभेदरूपं तु गृह्यत इति तन्न। तथा बोधाननुभवात्। द्रव्यस्य संख्याव्यभिचारेण तज्ज्ञानसंभवात्। तत्र तादृशजिज्ञासायाः स्वरसतः सिद्धत्वाभावेन स्ववासनाकल्पितत्वाच्च। अत एव हेलाराजेनैतन्मतद्वयोपपादकहरिकारिकामतान्तरमाहेत्यवतारिता। तस्य चारुचिग्रस्तत्वं ध्वन्यते भाष्यस्य संकोचेन व्याख्यां कुर्वता गोषुचरार्थे प्रत्याख्यातमपि जात्याख्यायामिति सूत्रमावश्यकमिति वदता हरिणा कैयटेन च बोधितम्। न च तत्प्रत्याख्याने द्व्याभिप्रायेणैव बहुवचनस्य साधुत्वं वाच्यं तत्रैकार्थमेकशेषसूत्रारम्भे गौरवमिति वाच्यम् द्वन्द्वेऽपि पदार्थैतत्प्रत्याख्यानस्य भाष्ये कृतत्वेनासत्तेः॥ निरूपयिष्यते चेदमुपरिष्टात्। अत एव भाष्येऽभेदैकत्वसंख्येति व्यवहारो भासत इति च

नास्ति।वृत्तौसंख्याविशेषोनभवतीत्येतावदेवसमर्थसूत्रभाष्यान्तेनरूपेणसंख्याभानस्यान्यत्रादृष्टत्वाच्च।अतएवकालाःपरिमाणिनेतिसूत्रेएकवचनान्तानामुपसंख्यानंमासोजातस्येत्याद्यर्थेमाभूदितिवार्त्तिकमनभिधानान्नेत्युक्तमितिप्रत्याख्यातमेवमलुक्सूत्रेपिभाष्येद्विवचनबहुवचनान्तानामसमासोनभिधानादित्युक्तम्।अनभिधानादित्यस्यसमासेनद्वित्वादिसंख्यावैशिष्ट्येनानेकव्यक्त्यनभिधानादित्यर्थः।द्विवचनेत्यादेश्चद्वित्वादिवैशिष्ट्येनबोधकानामित्यर्थः।किंचार्द्धंनपुंसकमितिसूत्रेऽर्द्धंपिप्पलीनामित्यर्थेसमासमाशङ्क्यैकाधिकरणेनेत्यनुवृत्त्यासमाहितम्।तत्रतूपसर्जनपदार्थैकत्वस्यैवाङ्गीकारेणसमासप्रसङ्गएवनास्ति।ममतुपिप्पलीत्वेनानेकव्यक्तिभानेसमासाशङ्कोचितैव।किंचात्रपक्षेगोषुचरेजात्याख्यायामभेदैकत्वेबहुत्ववदतिदेशाद्बहुवचनमुक्तास्तोकाःसुक्तइत्यादावेकवचनमुत्सर्गइत्येकवचनमित्युक्तंतत्परस्परविरुद्धंतदेकत्वेबहुत्वातिदेशवदेकवचन स्यापिप्राप्तेरितिदिक्।एवंचकारयोगोवाक्येराज्ञोगौश्चाश्वश्चपुरुषश्चेत्यादौभवतिनतुराज्ञोगवाश्वपुरुषाइत्यादौसमासे।वृत्तौसमूहलक्षणैकार्थप्रादुर्भावाद्भेदस्यनिवृत्त्याभेदनिबन्धनसमुच्चयरूपस्यद्योत्यस्याभावेनद्योतकस्याप्यप्रयोगइतिकैयटः।।पृथगुपस्थितयोरेवसमुच्चयस्यद्योत्यस्तथाचप्रयोगाभावस्यापिसमासेएकार्थीभावकृतत्वम्।लोकेपिपृथक्कृतयोरेवैकदेशत्वेसमूहव्यवहारात्।नचसमासेनचार्थस्याभिहितत्वात्तदप्रयोगःसमासेनसत्वभूतस्यविशे

ष्यतयाभिधानेपिअसत्वभूतस्यविशेषणतयाबोधार्थेचप्रयोगस्यदुर्वारत्वात्।चार्थेद्वन्द्वइतितुसादृश्यात्स्वार्थत्वारोपेणनेयमि
तिदिक्।अन्येत्वेकार्थीभाववशादपृथगुपस्थितेर्वृत्तौनोद्देश्यविधेयभावेनान्वयःपृथगुपस्थितेस्तथान्वयेतन्त्रत्वात्।अविमृ
ष्टविधेयांशदोषनिरूपणावसरेयत्रोद्देश्यविधेययोःपदाभ्यांपृथगुपस्थितिस्तत्रतथान्वयः।नचसमासेपदात्पृथगुपस्थि
तिरपृथगुपस्थितौचनतथान्वयस्फूर्तिरितिकाव्यप्रदीपाद्युक्तेरतएवचतुर्थीचाशिषीतिसूत्रविहितचतुर्थ्यानसमासः।आशीर्विष
येहिउद्देश्यविधेयभावोगम्यतेसमासेतदवगमाभावादितिहरदत्तादयः।अयमेवैकप्रसरताभङ्गोनामयद्विशिष्टैकोपस्थितिज
नकत्वरूपसामर्थ्यभङ्गः।उद्देश्यविधेयभावेनान्वयेपृथगुपस्थितेस्तन्त्रत्वेनतथान्वयेतद्भङ्गादिति।तन्नभाष्यकृतानुक्तत्वात्।किं
चोद्देश्यत्वविधेयत्वेयच्छब्दतच्छब्दोपबन्धव्यङ्ग्येवृत्तौक्षद्भूत्वादिवत्तदन्वयासंभवान्नतथान्वयःएकार्थीभावाभावेपिघटमि
त्यादौतथान्वयाभावेनअभ्यासलोपश्चेत्यादौसमासेपितथान्वयेनचतस्यतत्कृतत्वाभावाच्च।तथान्वयाभिप्रायेणसमासप्रयो
गेपिप्राप्तत्वाप्राप्तत्वादिपर्यालोचनोत्तरंलोहितोष्णीषाइत्यादौतथाबोधोभवत्येवेतिनासाधुतेत्याशयेनायंभाष्येनोक्तः।विशे
षणंविशेष्येणेतिसूत्रेउभयविशेषणत्वादुभयोश्चविशेष्यत्वादुपसर्जनाप्रसिद्धिरितिवार्तिकेउभयमुद्दिश्यविशेषणत्वस्य
विधेयताप्रतीतेश्च।अतएवप्रकाशकृतेदृशसमासवाक्यानिच्युतसंस्कृतिदोषेनोदाहृतानिकिन्त्वविमृष्टविधेयांशएव।एवंच

CC-0. In Public Domain. Digitization by eGangotri

पृथगुपस्थितयोस्तथान्वयद्त्वुत्सर्गस्यत्यागेनसहृदयहृदयस्यवैमुख्यंतस्यदूषकताबीजम्।प्रदीपेपितत्रतथान्वयद्त्वस्यउत्सर्गेणेतिशेषः।आशीर्विषयचतुर्थ्याद्यन्तेतुन — समासः।विप्रायभद्रंभूयादित्यादौविप्रभद्रार्थयोरुभयोरपितिङन्तार्थान्वयेनपरस्परमसामर्थ्यात्।चतुर्थीचाशिषीत्यस्यचाशीर्विषयार्थान्वयार्थकात्तद्वाचकभद्रादियोगेचतुर्थीषष्ठ्यावित्यर्थात्।भद्रकर्तृकंविप्रसंबन्ध्याशंसाविषयोभवनमित्यादिक्रमेणबोधः।राजकुलयशुभंभूयादितितुसाध्वेव।किंचसमासादावपितथाव्युत्पन्नस्यतद्बोधोदुर्वारः।नचासाधुत्वम्।भाष्याद्यनुक्तेः।विशिष्टोपस्थितावपिविशेषणादौप्रकारतादिस्वीकारवदुद्देश्यतादिस्वीकारेबाधकाभावादधिकमग्रेवक्ष्यामः।अतएवकैश्चिदुद्देश्यत्वादिप्रकारत्वादिरूपमेवोक्तमन्यैस्तुतत्समानाधिकरणम्।किंचअन्वादेशस्यकिंचित्कार्यंविधातुमुपात्तस्यकार्यान्तरविधानायपुनरुपादानरूपस्यसमासेत्वदुक्तरीत्यासंभवाभावेनएतद्वितकद्त्वादौएनाद्यादेशाशङ्काअप्रयुक्तत्वेनतत्समाधान   परस्यद्वितीयाटौस्वेनइतिसूत्रस्यभाष्यस्यासङ्गतिरित्याहुः।यत्तुनिष्कौशाम्बिर्गोरथोघृतघटोगुडधानाःकेशचूडःस्वर्णालङ्कारोद्विदशाःसप्तपर्णोगौरखरदूत्यादिषुक्रान्तयुक्तपूर्णमिश्रसङ्घातविकारसुच्प्रत्ययलोपवीप्साजातिविशेषाद्यभिधानमेकार्थीभावकृतमित्युक्तंतन्न।भाष्याद्यनुक्तत्वात्।निरादिपूर्वपदानांक्रान्ताद्यर्थवृत्तितयोक्तार्थानामितिन्यायेनतदप्रयोगसिद्धेश्चगौरखरादेश्चसमुदायस्यजातिविशेषेरूढिस्वीकारेणनदोषःपङ्कजादिवत्।

एकोपस्थितिजनकत्वरूपैकार्थीभावकृतत्वस्यक्रान्तादिलोपेसंभवाभावाच्च।अतएवसंख्ययाव्ययेतिसूत्रेसमासेनाभिहितःसु
जर्थइतिकृत्वासमासेसुज्नभविष्यति।किंचभोऽसुजर्थइतिसमासउच्यतेनखलुसुजर्थइत्युच्यतेगम्यतेतुसुजर्थइतिभाष्येउ
क्तम्।तत्रसमासेनेत्यस्यसमासघटकपूर्वपदेनेत्यर्थःपूर्वपदस्यतदर्थत्वद्योतकश्चसमासइतिसमासेनोक्तइत्युक्तिः।द्योतक
विषयेपिउक्तार्थानामितिन्यायोस्त्येव।अतिप्रसङ्गस्त्वनित्यत्वात्परि—हरणीयः।द्रष्टुंगतश्चैत्रःकृष्णंश्रितौगुरुकुलंमैत्रइत्यादौन
समासःकृष्णश्रितयोःपरस्परमसंबन्धेनाकाँक्षामूलकैकार्थीभावस्यासंभवात्।विशिष्टशक्तिस्वीकारादेवसमासस्यार्थवत्त्वात्प्रा
तिपदिकत्वसिद्धिः।अतएववृत्तौविशिष्टएवार्थोराजपुरुषपदाभ्यामभिधीयतइतिकैयटः।भाष्येचैकार्थीभावपक्षेसंसृष्टार्थंसम
र्थमितिसमर्थपदव्युत्पत्तिरुक्ता।विशिष्टबुद्धिंप्रतिचविशेषणविषयकस्यैवहेतुत्वमितिनविशिष्टबुद्धौविशेषणज्ञानस्यकार
णत्वेव्यभिचारःअतएवघटपदाद्घटत्वविशिष्टज्ञानोपपत्तिः।यत्तुनविशिष्टेशक्तिःकिंत्ववयवशक्तिज्ञानसहकृतावृत्तिरूप
पदश्रवणरूपादुद्बोधकाद्राजसंबन्धीपुरुषश्चित्राणांगवामयमित्यादेर्विग्रहवाक्यतोनुभूतस्यविशिष्टार्थस्यस्मरणमयमेवैका
र्थीभावोनामातोनोक्तदोषाः।अतएवभट्टपादैस्तेषामेवविग्रहत्वंस्वीकृतम्।स्वावयववृत्तिज्ञानसहकारेणार्थोपस्थापकत्वस्याप्य
र्थवत्सूत्रेग्रहणात्समासस्यप्रातिपदिकत्वम्।यद्वावाक्यवत्समासेपिपृथगुपस्थितयोरेवपरस्परान्वयः।अयन्तुविशेषः।वृत्तिघटक

पदोपस्थितयोः प्रथमं परस्परमेवैकरूपेणान्वयो वृत्तिस्वभावात् तेन तत्र विशेषणान्वयादिकं वाक्ये तु पदैर्विशेष्यराज्ञोऽन्वयस्तदैव राज्ञि ऋद्धत्वान्वयः तदास्यैकदेशत्वज्ञानाभावात् एकरूपेणेत्युक्तेर्नोद्देश्यविधेयभावेनान्वयः। यद्वा विशिष्टलक्षणया वृत्तौ विशिष्टोपस्थितिरिति षष्ठीतत्पुरुषलक्षणायाः संबन्धिरूपाधिकविषयत्वेन षष्ठीतत्पुरुषात्कर्मधारयस्य लघुत्वं बोध्यमिति तन्न। आद्ये तादृशविग्रहवाक्यमजानतां विशिष्टोपस्थितेः शक्तिं विनोपपादयितुमशक्यत्वात्। द्वितीये वृत्तिपदन्तादृशबोधकारणमिति ज्ञानस्य तद्बोधकारणत्वकल्पनापेक्षया शक्तिकल्पनाया लघुत्वात्। बोधकारणत्वस्य संबन्धं विनानुपपत्त्या शक्तिसिद्धेश्च। किं चैवं समासादीनां वृत्तित्वासिद्धिः वृत्त्याश्रयत्वेनैव तेषां वृत्तित्वव्यवहारात्। तृतीये बोध्यज्ञानं विना बोध्यसंबन्धरूपलक्षणाया अज्ञानेन तया विशिष्टोपस्थितेर्वक्तुमनौचित्यात्। किं च पङ्कजपदादेरपि पद्मत्वविशिष्टे लक्षणाया एवापत्तौ रूढिशक्त्युच्छेदः। बाधादिप्रतिसंधानं विनापि बोधात्तत्र शक्तिसिद्धिश्चेत्प्रकृतेऽपि समम्। किं च कर्मधारये शक्यान्यबोधाभावेन लक्षणा न युक्ता। शक्यसंबन्धस्य शक्यार्थबोधो हि सर्वत्र लक्षणया दृश्यते विशेष्यविशेषणभावस्तथेति चेद्वाक्येऽपि तद्बोधेन तत्राप्येकोपस्थित्यापत्तेः। एवं च प्रथमं भक्ष इत्यादौ त्वदसंमतस्योद्देश्यविधेयभावेनान्वयस्यापत्तिरित्यलम्। इदं वृत्तेर्विशिष्टशक्तिमत्त्वं लोकसिद्धमेव। शास्त्रेऽर्थविधानाभावात्। अचतुरेत्यादावदर्शनात्। वृक्षादीनामर्थाविधानाच्च। चार्थे द्वत्यादि तु चार्थे वृत्तिमनूद्य द्वन्द्वसंज्ञामात्रविधायकम

न्यथानेकं सुबन्तं चार्थे वर्तते तच्च द्वन्द्वसंज्ञकमिति वाक्यभेदापत्तेः। किं च स्वसमानार्थकवाक्यानिवृत्तये विभाषाधिकारस्यापूर्वस्य करणे गौरवम्। मम तु एकार्थीभावे समासो ऽपेक्षायां वाक्यमिति शास्त्रकल्पितसिद्धार्थानुवाद एव सः। इत्थं चैकार्थीभावोपपादिका विशिष्टशक्तिः समर्थाश्रितः पदविधिरित्याद्यर्थकसमर्थः पदविधिरिति शास्त्रबलाद् अलौकिके विग्रहेप्यारोप्यते। अत एव तत्र समाससंज्ञायामर्थवत्त्वनिबन्धनप्रातिपदिकत्वे विभक्तिलुक्सिद्धिः। षष्ठीत्यादिशास्त्रबलेन भेदोपस्थितिनिबन्धनषष्ठ्यादिनिर्वाहाय पृथगर्थत्वमप्यारोप्यते। उभयोरपि काल्पनिकत्वेन विरोधाभावः शास्त्रप्रामाण्यात्। नन्वेकार्थीभावनिर्वाहकविशिष्टशक्तिवादे बहुव्रीहेस्तत्पुरुषोन्तरङ्ग इत्यादिव्यवहारोच्छेदः। बहिर्भूतपदार्थविषयकबोधजनकत्वं हि बहुव्रीहेबहिरङ्गत्वम्। न चात्र पक्षे तदस्ति अन्यपदार्थेपि प्रत्येकातिरिक्तविशिष्टशक्यत्वसत्त्वेन स्वपदार्थत्वस्यैव सत्त्वादिति चेन्न। स्वघटकपदघटितवाक्यदृष्टार्थमात्रविषयकतत्पुरुषीयशक्तिग्रहापेक्षया बहुव्रीहिसंज्ञकपदसमुदायीयशक्तिग्रहस्य स्वघटकपदघटितवाक्यदृष्टार्थातिरिक्तार्थविषयकत्वेन बहिरङ्गत्वाप्तेः। एवमेव षष्ठीतत्पुरुषात्कर्मधारयस्य लघुत्वं बोध्यं कर्मधारयसंज्ञकपदसमुदायजशक्तिग्रहापेक्षया षष्ठीतत्पुरुषसंज्ञकतज्जन्यशक्तिग्रहस्य षष्ठ्याद्यर्थरूपाधिकविषयत्वेन गुरुत्वात्। एवं च निषादस्थपत्यादिशब्दानां षष्ठीसमासकर्मधारयबहुव्रीहिभिन्नार्थत्वेन क्व तात्पर्यमिति संदेहे शक्तिग्रहलाघवानुरोधात्कर्मधार

यार्थेतात्पर्यंकल्प्यतेसंभवतिसामानाधिकरण्येवैयधिकरण्यस्यान्याय्यत्वात्तदुक्तंजैमिनिनास्थपतिर्निषादःस्यात्शब्दसामर्थ्यात्इतिनिषादस्थपतिशब्दस्यान्तरङ्गत्वेननिषादरूपस्थपतौशीघ्रोपस्थितिजनकत्वानुकूलात्सामर्थ्यात्शक्तिरितितदर्थः। अतएवबहुव्रीह्यर्थकोनसः। अन्यथाबहुव्रीहौमीमांसावार्त्तिककारैःशक्तिकथनेननिषादपदस्यतत्रालाक्षणिकत्वेनचतद्भावस्यसूत्रतोनलाभःस्यात्। एतेनशब्दसामर्थ्यादित्यस्यनिषादशब्दस्यनिषादबोध एवसामर्थ्यात्शक्तेःषष्ठीतत्पुरुषेतुपूर्वपदस्यलक्षणेतिनतस्यग्रहणंजघन्यत्वादितिशाबरस्वामिकृतं व्याख्यानंप्रौढ्यैववक्ष्यमाणेभाष्यसंमतेस्यपेक्षावादेतत्रापिलक्षणाभावाच्चेतिदिक्। ननुस्थपतिशब्दःस्वामिश्रेष्ठान्यतरपर्यायइतितस्यगुणशब्दत्वान्निषादस्यजातिशब्दत्वात्कर्मधारयेस्थपतेःपूर्वनिपातापत्तिः। किंचस्थपत्यर्थस्यसंबन्धिनिनित्यसाकाङ्क्षत्वात्षष्ठीसमासएवन्याय्योनरपत्यादिष्विवेतिचेन्न। लिङ्गदर्शनाच्चेतिजैमिनिसूत्रेणहेत्वन्तरोक्तेरदोषात्। लिङ्गंचदृश्यतेकूटंचदक्षिणेति। कूटंहिनिषादानामेवस्वमितिशाबरस्वामिनः। एवंचराजदन्तादित्वात्कर्मधारयेस्थपतेःपरनिपातःसंबन्ध्याकाङ्क्षानिवृत्तिरप्यर्थतोनिषादानामेवतत्वलाभादुपपन्ना। लिङ्गंचानेकार्थस्यशब्दस्यार्थनियामकंदृष्टम्। तस्मादनेकार्थनिषादस्थपतिशब्दस्यार्थनियामकंशीघ्रोपस्थितिजनकशक्तिकत्वंलिङ्गंचेत्येवसूत्रतात्पर्यंवक्तुंयुक्तम्। किंचषष्ठीतत्पुरुषेपिऐश्वर्यस्योत्सर्गतोनिरूपकसजातीयनिष्ठ

समासेन कर्मधारयाद् विशेषः। अत एव च नरपतिसुरपत्यादिशब्दतो नरसुरयोरैश्वर्यत्वेन प्रतीतिः अश्वपतिगजपत्यादौ त्व
गत्या तात्पर्यानुपपत्त्या चोत्सर्गस्य त्यागः अत एव शंकरभगवत्पादैर्दहराधिकरणे ब्रह्मलोकशब्दे कर्मधारयसमासः सर्वाः प्रजा अ
हरहर्गच्छन्त्य एनं ब्रह्मलोकं न विन्दन्तीति लिङ्गेन साधितमित्यलम्। तत्र स्वाभाविकत्वपक्षे श्रोक्रियादिवदखण्डा निरवयवा नि
त्याः शब्दास्तदन्वाख्यानाय कल्पिते रेखागवयस्थानीये शास्त्रप्रवृत्तिः। तदुक्तम्। अबुधं प्रत्युपायाश्च विचित्राः प्रतिपत्तये। शब्दान्तर
त्वादत्यन्तं भेदो वाक्यसमासयोरिति। अत एव गोरथादौ युक्तादीनां लोपविधानम्। गवां रथ इत्येव वाक्यस्य कल्पनात्। क्रिया
मन्तरेणानन्वयात्तत्र तदवगतिः गोयुक्तो रथ इति लौकिकं तु समासस्य पर्यायरूपम्। तथा पदं यथैव रसादिविशिष्टेष्वव
स्थितम्। नीलोत्पलाद्यपि पदं भागाभ्यां वर्ततेतयेति। भागाभ्यां कल्पिताभ्याम्। सादृश्यमूलकस्तु वाक्यस्येतरत्रस्यानामभेदभ्रमो वा
लानात्त्वमूलक एवैकार्थीभावव्यवहारोऽत्र पक्षे वास्तवः। खण्डास्तु नात्र पक्षे पदानां पृथगर्थत्वस्वभावत्वेन स्वभावभङ्गापत्तेः
तथा रूढरूढिविभागोऽपि क्रियते प्रतिपत्तय इति। शास्त्रकृद्भिरबुधानामिति शेषः। पङ्कजादि पदं योगरूढं सप्तपर्णादि पदं रू
ढं राजपुरुषादि यौगिकमित्यादिरपि काल्पनिकः प्रतिपादनोपाय एवेति तदर्थः तत्र वाक्यार्थानुगमाद्राजपुरुषादिर्यौगिकः
सप्तपर्णादौ क्वचिदर्थानुगमेऽपि शीर्णपर्णे तदभावाद्रूढिरेव पङ्कजादौ वाक्यार्थानुगमादर्थान्तराननुगमाच्च योगरूढिरिति दिक्प

रेतु वाक्याद्वृत्तिः शास्त्रनिष्पाद्या। अर्थाभिधानमपि शास्त्रकृतमेव। एवं चानेकं सुबन्तं चार्थे वर्त्तते चार्थे वर्त्तमानं च द्वन्द्वसंज्ञकमित्यर्थात् घटकपदानामेव चार्थे वृत्तेरुक्तार्थत्वाच्चकाराप्रयोगः सिद्ध इति नैकार्थीभावस्य फलं सः न च तन्मते शब्दवदर्थोपि शास्त्राधीनः शास्त्रकार्यतया शब्दानां लोकतोर्थज्ञानासंभवादिति वृत्तिमत्समुदायत्वं वृत्तित्वमित्यस्य वक्तुमशक्यतया किं वृत्तिलक्षणमिति वाच्यम्। परार्थाभिधानं वृत्तिरित्यस्य भाष्य एवोक्तत्वात्। परस्य शब्दस्योपसर्जनार्थकस्य यत्र शब्दान्तरेण प्रधानार्थकपदेनार्थाभिधानं विशेषणत्वेन ग्रहणं सा वृत्तिरिति तदर्थः। यद्वा परार्थस्य प्रधानार्थस्याप्रधानपदे यत्र स्वार्थविशेष्यत्वेन ग्रहणं स वृत्तिरित्यर्थः राजपुरुष इत्यत्र पुरुषपदेन वाक्यावस्थायामनास्कन्दितो राजार्थो राजपदेन वा पुरुषार्थ आस्कन्द्यते तत्स्वं वलितः स्वार्थ उपस्थाप्यत इति यावत्। एतावतैवैकार्थीभाव इति व्यवहारः बहुव्रीहावपि प्रधानं पदं समुदाय एव घटके पदे चाप्रधाने तत्र प्रधानपदेनावयवार्थास्कन्दनेनैव स्वार्थबोधनम्। अवयवैर्वा तदर्थास्कन्दनेन। समुदायस्य प्राधान्ये चावयवा प्रतिपाद्यप्रधानभूतान्यपदार्थबोधकत्वात्। द्वन्द्वेपि प्रधानपदसमुदायोपस्थाप्य साहित्यस्यावयवार्थास्कन्दनेन बोधः अवयवाभ्यां वा तदर्थास्कंदनेन बोधः समाहारेतरेतरयोरुभयोरपि साहित्यं समूहो विशेष्यमात्रे तु उद्भूतावयवभेदोन्यउद्भूतावयवभेद इति विवक्ष्यते। न चेदमसंभवि अप्रधानेन सर्वथा स्वार्थत्यागे तद्योगे वा असंभवात्। अन्त्यं तेनैवार्थबोधे सिद्धे प्रधानेन

तदभिधानासंभवात् यद्वास्वार्थबोधनस्याग्रस्यपरार्थाभिधायकत्वासंभवात् किंचाद्येशब्दार्थसंबन्धानित्यतापत्तिःराजपुरुषा
दितःपुरुषादिमात्रबोधापत्तिश्चेतिवाच्यं उभयथाप्यदोषात् नचान्त्येराजादिपदैःस्वार्थस्यविशेष्यत्वावच्छिन्नस्यबोधनात्कथ
मितरविशेषणतयोपस्थितिरितिवाच्यंगुणभूतपदेप्रधानपदार्थविशेषणत्वेनोपस्थितिविरोधिनःस्वार्थभूतस्यराजांधर्मग
तविशेष्यत्वस्यत्यागेनजहत्स्वार्थत्वाङ्गीकारेणादोषात्। यद्वासर्वथोपसर्जनपदेनस्वार्थस्यत्यागःवृत्तौराजपदसंबन्धमात्रेणा
पुरुषपदमेवराजसंबन्धिपुरुषबोधकमामोदान्वयमादायचंपकपुट इत्यादिव्यवहारवद्राजपदार्थःपुरुषविशेषणमि
त्यादिव्यवहारः अत्रपक्षेएकार्थीभावोनामपदद्वयबोध्ययोरेकपदबोध्यत्वंरूपअलौकिकेतुप्रागवदेवासावारोपितः अतएव
जहत्स्वार्थापदस्यजहत्सुपसर्जनपदानिस्वार्थंयस्यांसेत्यर्थउक्तोहेलाराजेनयद्वाभेदसंसर्गोसामर्थ्यम्। तथाहिवृत्तौराजपदसं
निधानात्पुरुषपदेनैवराजसंबंधवतीराजान्यस्वामिसंबंधाभाववतीचयापुरुषव्यक्तिःसोपस्थाप्यतेऽतोनराज्ञःस्वान्तरे
णसंबन्धःराजपदस्यार्थाभावाद्नापिपुरुषस्यस्वाम्यन्तरेणसंबंधःयश्चवेदान्तिनामखण्डार्थबोधोलक्षणवाक्यादौतद्वत्।
अखण्डार्थत्वंचपदार्थसंसर्गानवगाहिप्रतीतिजनकत्वम्। यथाकश्चन्द्रइतिप्रश्नोत्तरेप्रकृष्टप्रकाशश्चन्द्रइतिवाक्येप्रकृष्टप्रका
शपदार्थजानतस्तदाश्रयस्यत्वभुत्सितचन्द्ररूपस्यवस्तुनश्चन्द्रत्वेनचन्द्रपदवत्वेनचबोधः नतुप्रकृष्टप्रकाशवैशिष्ट्यविष

यकः मानान्तरसिद्धस्याप्युपात्तस्यैव व्यक्तिविशेषनिर्द्धारणोपायत्वमतस्तदुपादानम् । एवं प्रकृतेपि राजपदप्रयोगः शक्तिग्रहो
पि राजपदयुक्तं पुरुषपदं पुरुषत्वेनोक्तव्यक्तिविशेषे शक्तमित्याकारः एवं प्रकारत्रयं भाष्ये स्पष्टं अन्त्ययोर्महाराजइत्यादौ पूर्व
पदे आत्वादिभूतपूर्वगत्यार्थवत्वमादाय बोध्यं यद्यपि भेदसंसर्गौ भेदः संसर्गो वा सामर्थ्यमिति भाष्ये उक्तं तथापि वृत्तौ सामर्थ्यस्य
लक्षणत्रये भेदवदर्थोपस्थापकत्वं संसर्गवदर्थोपस्थापकत्वं वोभयवदर्थोपस्थापकत्वं वेति भेदवदित्यादावधारणमाद्ययोर्वी
जं भेदसंसर्गयोः समनैयत्यात् । विनिगमनाविरहस्तृतीये बीजम् । को भेदः संसर्गो वेत्युपक्रम्य भाष्य उक्तम् । वाक्ये प्रसक्तं सर्वस्व
न्निर्दिश्यते राज्ञः पुरुषोश्वश्चेत्यादि तथा प्रसक्तः सर्वः स्वामी च प्रयुज्यते राज्ञः पुरुषो भार्यायाश्चेति राजपुरुषइत्युक्ते राजा पुरुषं स्वा
म्यन्तरान्निवर्त्तयति पुरुषो राजानं स्वान्तरान्निवर्त्तयति एवमुभयस्मिन्परस्परेण व्यवच्छिन्ने पदे स्वार्थं जहातिराजपदन्तदा का
र्मं जहात्विति स्वाम्यन्तरादित्युक्त्या राजरूपस्वामितोऽनिवृत्तिलाभेन तत्संसर्ग उक्तः अनेन च तयोस्तत्तद्रूपेण बोधाविषयत्वमुक्तं
बोधविषयत्वे राजपदार्थस्य भेदसंसर्गस्य प्रतियोगितयान्वयावश्यकत्वे तत्यागकल्पनासङ्गतिः अर्थस्य बोधाविषयत्वमेव
हिस्त्यागः तस्मादुक्त एवार्थो भाष्यसंमतः यत्तु अर्थवत्सूत्रे कैयटे समासग्रहणं तुल्यजातीयानां नियमार्थं सुबन्तानामिति भाष्यप्र
तीकमुपादाय सुबन्तानामित्युपलक्षणं भेदसंसर्गद्वारकार्थवत्तायुक्तानान्तेन कुम्भकारेत्यादि समाससंग्रह इत्युक्तं तत्र वाक्ये

पदार्थयोर्विभागेनापिबोधेसतिइतरसंसर्गाकाङ्क्षाभेदसंसर्गःसद्वारभूतोयस्यविशिष्टार्थस्यतद्युक्तानामित्यर्थइतिनतद्विरोधः
हरिरपिभेदसंसर्गशक्तीहिशब्दस्यैतेव्यवस्थितेइतिभेदशक्त्यापृथग्भानंसंसर्गशक्त्यैकभानमितितदर्थःएतद्द्वयपक्षेभेदसंस
र्गौवाच्यौराजसंबन्धीअराजकीयभिन्नःपुरुषइतिबोधःयद्वाभेदएववाच्योऽराजकीयभिन्नःपुरुषइतिबोधःएतद्विरोधादेव
राजपुरुषोभार्याया इतिन।संसर्गस्त्वनुमेयःयद्वासंसर्गएवशक्योराजसंबन्धीतिबोधःअराजकीयभेदस्त्वनुमेयइतितन्नानुभ
वविरोधात्।गौरवाच्च।द्वन्द्वेभेदादेर्वाच्यतायाउपपादयितुमशक्यत्वाच्च।किंचभेदसंसर्गयोर्भानेतयोःप्रतियोगिनिरूप्यत्वा
त्पूर्वपदार्थस्यापिबोधविषयत्वावश्यकत्वेनानेनप्रकारेणपूर्वपदेजहत्स्वार्थत्वोपपादनपरभाष्यविरोधात्।किंचराजंनिष्ठ
योरपिभेदसंसर्गयोर्भाष्येदर्शितत्वेनतयोरपिवृत्तिजबोधविषयतापत्तिरितिदिक्।यद्वोपसर्जनपदेष्वजहत्स्वार्थैवभिक्षुकोद्विती
यांभिक्षामासाद्यनपूर्वांजहातिसंचयायैवप्रवर्ततइतिभाष्यात्।अयंभावःस्वस्मिन्स्वपदार्थभूतायांविशेष्यतायांसत्यामेवेतरनिरू
पितांविशेषणतामङ्गीकरोतिविशिष्टशक्तिबलात्तत्रसाविशेषणताराजादिपदोपस्थाप्येसंपूर्णा।अविशेषात्।एवंचस्वपदार्थभू
तविशेष्यतायाअपिविशेषणत्वेनैवभानेन तत्रविशेषणान्वयःस्वरूपतोविशेष्यत्ववैशिष्ट्येनोपस्थितएवतदन्वयात्।वाक्येतुप
दजन्योपस्थितौस्वरूपतोविशेष्यत्ववैशिष्ट्येचभानमितितदन्वयसिद्धिरित्याहुः।यत्तुसखण्डाःशब्दाइतिपक्षेप्यवयव

शक्तिं तल्लक्षणां चाजानतां बालानां समुदायशक्त्यैव बोधस्य सर्वानुभवसिद्धत्वेनावश्यकल्प्यत्वात्तथैव राजविशिष्टपुरुषबोधो
पपत्तौ तयोस्तद्बोधकत्वं न कल्प्यम्। वृषभादिपदे वृषादेरिव। आनुपूर्व्यन्तरघटकत्वाभावविशिष्टानुपूर्व्या एव शक्ततावच्छेदक
त्वात्। अत एव रामादिपदान्नाग्निनारायणादीनां बोधः। वाक्ये तु पदान्यर्थवत्स्वेव राजसंबन्धी पुरुष इत्यर्थे राज्ञः पुरुषः पुरुषो राज्ञ
इत्यनयोः शक्तिकल्पनापेक्षया पदशक्तेर्लघुत्वात्। आरोपितार्थमादाय विग्रहवाक्ये प्रत्येकं विभक्त्यादिपदत्वं च। वृत्तिप्राग्वर्त्य
र्थारोपेणैव सुपन्यादृत्यादावात्वादीति तन्न। आरोपितेनैवार्थवत्त्वस्य ततो बोधस्य च दुर्वारत्वात्। प्रातिपदिकादीनां सर्वत्रारोपित
मेवार्थवत्त्वम्। कस्यचिद्विशिष्टशक्तिग्रहमात्राद्बोधस्त्ववयवानां नानर्थकत्वं साधयितुमीष्टे वाक्यादपि कस्यचित्तथा बोधेन तत्रा
प्यवयवानर्थक्यापत्तेः केवलशास्त्रप्रक्रियोपयोगिविचारवतां तदज्ञानस्य विशिष्टशक्तिग्रहमात्राद्बोधस्य च वक्तुमशक्यत्वाच्च।
तदुक्तं वृद्धैः। जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनीति। रूढिः समुदायशक्तिर्यत्रावयवार्थविरोधिनी तत्रैव सा यथा रथंतरशालि
पर्णीगौरखरादाविति तदर्थः। तत्र पदद्वयस्यानेकार्थक्येऽपि रथकरणकतरणकर्तृत्वादिकस्याहार्यारोपेण प्रक्रियानिर्वाहो बोध्यः।
त्वया तु राजादिपदे आहार्यार्थारोपो वक्तुमशक्यः तदर्थबाधाभावात्। किं च राजपुरुष इत्यादावुत्तरपदार्थत्यागे न फलम्। किं चैषा
जहत्स्वार्था न भाष्यसंमता। यदि जहत्स्वार्था पुरुषमात्रस्यानयनं प्राप्नोतीति भाष्यासङ्गतेः। उभयोरप्यनर्थकत्वे कस्याप्यानयनं न प्रा

प्रतीतीति वक्तव्यं स्यात्। एवं च वृत्तावानुपूर्व्यन्तरघटकत्वाभावविशिष्टानुपूर्वीशक्ततावच्छेदिकेति न नियमः पूर्वपदेप्यनर्थकत्व
मेकार्थीभावोपपादनाय शास्त्रकल्पितमेव प्रकृत्यादेरर्थवत्। बहुव्रीहिद्वन्द्वयोस्तु उभयोरपि उपसर्जनत्वेनोक्तरीत्यै वज
हत्स्वार्थत्वं वक्तुं युक्तं जहत्स्वार्थविकल्पे च सर्वार्थत्यागमिच्छता बहुव्रीहिपदार्थस्य त्यागः सर्वस्य दर्शित इति हर्युक्तेः एतेन जह
त्स्वार्थे तै वैकार्थीभावोऽजहत्स्वार्थायां च व्यपेक्षैवेति भूषणोक्तमपास्तम्। भाष्ये संख्याविशेषाभावं च योगाभावरूपमेकार्थीभावकृ
तविशेषमुक्त्वा अथैतस्मिन्नेकार्थीभावकृते विशेषे किं स्वाभाविकं शब्दैरर्थाभिधानमाहोस्विद्वाचनिकमिति विकल्प्य स्वाभाविक
त्वपक्षं व्यवस्थाप्य अथ ये वृत्तिं वर्तयन्ति किन्त आहुः परार्थाभिधानं वृत्तिरिति ग्रन्थेन वाचनिकमिति पक्षमुक्त्वा अथ तेषामेवं बु
वतां किं जहत्स्वार्था वृत्तिरुताजहत्स्वार्थेत्युक्तं तद्विरोधात्। अनेन हि एकार्थीभावमुपक्रम्योक्तेस्तत्रैव पक्षद्वयमिति लभ्यते। वा
प्यर्थे संज्ञायामिति समासे जहत्स्वार्था सुप्सुपेति समासे त्वजहत्स्वार्थेत्याशयेनेदूतौ च सप्तम्यर्थे इति सूत्रे तत्र जहत्स्वार्थाऽजह
त्स्वार्थे द्वे अपि भाष्यकृतोक्ते इति न तद्विरोधः। यद्वा पूर्वपदे जहत्स्वार्थत्वमात्रेण तदुपपत्तिरित्यलम्। व्यपेक्षावादिनस्तु परस्परा
काङ्क्षारूपा व्यपेक्षैवात्र सामर्थ्यं न त्वेकार्थीभावः। तदुक्तं भाष्ये। परस्परव्यपेक्षासामर्थ्यमेके संप्रेक्षितार्थसमर्थमिति चेति। अयं भा
वः। राज्ञः पुरुष इत्यादौ परस्परसाकाङ्क्षयो राजपुरुषयोः संबन्धस्य राजादिपदोत्तरविभक्तिर्वाचिका राजपुरुष इत्यादावपिष

थगुपस्थितयोस्तयोः परस्पराकाङ्क्षयोः संबन्धो राजा सुन्दर इत्यादौ विशेष्यविशेषणभाववत्समुदायशक्यो न त्वयं विशिष्टे कोपस्थितिनियामकः उपास्थितयोराकाङ्क्षान्तरमेव तत्प्रतीतेः शक्तिग्रहश्चोपस्थितयोरवयवार्थयोः संसर्गेदं शक्तमित्याकारः सप्तम्यर्थसंबन्धस्य विशिष्टशक्यत्वादेव वाप्यश्व इत्यादौ वापीपदस्य सप्तम्यर्थे वृत्तेर्न प्रगृह्यत्वम्। अतएव समुदायस्य प्रातिपदिकसंज्ञासिद्धिः अयमपि पक्षो वृत्तिवर्त्तनवादिन एवेति भाष्ये स्पष्टतया वाक्यादेवेयं वृत्तिर्निष्पन्नेति मन्यमानस्य वृत्तावपि वाक्यतुल्याकाङ्क्षया एव सत्वेन भेदसंबन्धबोधः पदभेदेन व्युत्पत्तिभेदादाकाङ्क्षावशेनैव तत्तद्व्युत्पत्तिकल्पनात्। अतएव विभक्तेर्लुक् तदर्थस्यान्वतएव प्रतीतेरतएवात्र न संख्याविशेषावगतिः वाक्यदृष्टविरुद्धविभक्तिकत्वस्यात्राप्यनुसन्धानान्न नामार्थयोरभेदान्वयव्युत्पत्तिविरोधः अतएव दधिद्रष्टेत्यादौ भेदान्वयः विभक्तिलोपमजानतोपि तज्ज्ञानकृतोपदेशाल्लोकव्युत्पत्त्या तथा बोधः तदभावे तु तद्व्युत्पत्तेरप्यज्ञानान्न दोषः विभक्त्यर्थस्य च प्रकृतिबोध्यार्थेन्वयाद्राजपुरुषं पश्येत्यादौ विशिष्टे कर्मत्वधीः। यत्तु राजपदस्य राजसंबन्धिनि लक्षणा अतएव राज्ञि न विशेषणान्वयः भेदसंबन्धेनान्वये तु ओदनः पचतीत्यादावन्वयबोधवारणाय भेदसंसर्गकनामार्थप्रकारकशाब्दबोधे तद्विहितप्रत्ययजोपस्थितेर्हेतुत्वावश्यकत्वेन न तदसंभवः। प्रत्ययत्वं संकेतविशेषसंबन्धेन प्रत्ययपदवत्वं जातिविशेषो वा। न चैवं कर्मधारयत्वापत्तिरिति वाच्यम्। समासघटकपदार्थस्य विशेष्यत्वे सति यदलौकिके विग्रहे पदद्वयेपि एकवि

भक्तिनिर्देशस्तत्रैवकर्मधारयत्वस्वीकारात्।ससन्तेनचित्रगुःपञ्चपूलीत्यादेर्व्यावृत्तिरितितन्न।कण्ठेकालोदास्याःपुत्रइत्यादौल
क्षणायांमानाभावेनतत्रविशेषणान्वयापत्तेः।नचतत्रापिदासीपदस्यतत्संबन्धिनिलक्षणा।दासीसंबन्धिसंबन्धीतिबोधानुभवात्।
विभक्त्यन्तस्यतुनलक्षणा।तस्यतत्रशक्त्यभावात् विभक्त्यर्थस्यसंसर्गतयैवभानाच्च।भेदसंसर्गकनामार्थप्रकारकबोधेचसंसर्गबोध
कत्वेनगृहीतपदज्ञानस्यकारणत्वेनादोषाच्च।ओदनादिपदस्यलक्षणयासंसर्गबोधकत्वमेवनानभिधानाद्रूढिप्रयोजनयोरभावाच्च।
पराङ्ग·वद्भावानुरोधाच्चात्रापिव्यपेक्षैवसामर्थ्यमन्यथापराङ्ग·वद्भावेएतत्समासादावेकार्थीभावइतिवाक्यभेदःस्यात्तत्रपरिभाषा
प्रवृत्त्यभावेतुऋतेनमित्रावरुणावृतावृधावृतस्पृशेत्यादौऋतेनेत्यादेःपराङ्ग·वत्त्वेआमन्त्रितस्यचेत्याद्युदात्ततापत्तिःतत्रवृत्तौतुऋ
तेनमित्रावरुणावित्यनयोरानशाथेइत्यर्थकेनाशाथेइत्यनेनान्वयेनपरस्परमसामर्थ्यान्नदोषः।मित्रावरुणावित्येतच्चसंबोधनप्र
थमान्तम्।स्पष्टंचेदं भाष्ये।कर्मधारयेपिविशेष्यविशेषणभावेनान्वयोव्यपेक्षासाध्यः।उपकुम्भमित्यादावव्ययीभावेनञ्तत्पुरु
षेचनिपातानांवाचकत्वेनपूर्वोत्तरपदयोर्व्यपेक्षानिपातानांवाचकत्वस्याप्यङ्गीकारात् निष्कौशाम्बिरित्यादौक्रान्ताद्यर्थस्याकाङ्क्षा
वशादेवपदैकदेशन्यायेनभानंनह्याकाङ्क्षावशात्संसर्गस्यैवभानंनान्यस्येत्यत्रमानमस्ति।वाक्यदृष्टाकाङ्क्षातुल्यायाआकाङ्क्षायावृ
त्तौजायमानत्वेनतद्वशाद्वाक्यैकदेशन्यायेनान्यत्रेवात्रापिबोधः।द्विदशाइत्यादौसुजर्थस्यसप्तपर्णोवीप्सायाश्चैवमेवबोधः।बहुव्रीहा

वपिसमुदायवाच्येनान्यपदार्थेनचित्रगोपदार्थयोराकाङ्क्षयापरस्परान्वितयोरन्वयःअन्यपदार्थस्यसमुदायवाच्यताचानेकमन्यपदार्थेइतिशास्त्रबलात्द्वन्द्वेपिचार्थेद्वन्द्वइतिशास्त्रबलात्साहित्यंसमुदायशक्यमितिवदन्तितन्न।उक्तानामेकार्थीभावकृतविशेषाणांविशेषणेसंख्याविशेषानवगमविशेषणसंबन्धाभावादीनांवचनसाध्यत्वेनगौरवात्।दधीत्यादौलुक्यपिसंख्याविशेषावगमेतस्यतदनवगमप्रयोजकत्वाभावात्द्वावित्यादावन्यतोबोधेपिलुगभावाच्च।किंचसमानार्थकवाक्यस्यानिवृत्तयेऽपूर्ववावचनारम्भेतवगौरवम्।किंचयत्रयुगपदुभयसंबन्धविवक्षापरत्वादिनाचक्रमेणवृत्तिद्वयंयथाऽब्राह्मणत्वमित्यादौनञर्थभावार्थयोर्युगपद्विवक्षायांपरत्वात्त्वप्रत्ययेततःसमासस्तत्रविशेष्येविशेषणंतत्रचविशेषणान्तरमितिविषयताशाल्येवबोधःतत्रैवयदापूर्वेनञर्थसंबन्धविवक्षाततोभावार्थविवक्षातदाविशिष्टस्यवैशिष्ट्यमितिविषयताशाल्येवबोधःयदातुपूर्वंभावार्थविवक्षातदाविशिष्टेवैशिष्ट्यमितिविषयताशाल्येवबोधइत्येतत्सर्वंतादृशतादृशविषयताशालिबोधेविशिष्टशक्तिस्वीकारादेकार्थीभाववादेऽक्लेशेननिर्वहतिनव्यपेक्षावादे।स्पष्टंचेदंतस्यभावइतिसूत्रेभाष्ये।किंचाकाङ्क्षितसंबन्धस्यनसमुदायशक्यत्वंमानाभावात्किन्तुशिष्यमाणंलुप्यमानार्थाभिधायीतिन्यायेनपूर्वपदशक्यत्वमेवोचितम्।एवंचवाप्यश्वइत्यादावपिप्रगृह्यत्वापत्तिःसोमोगौरीअधिश्रितइत्यनेनसमत्वात्।किंचैवंसमुदायस्यार्थवत्त्वाभावात्प्रातिपदिकत्वानापत्तिः।न

चार्थवत्त्वमर्थबोधकत्वमिवावयववृत्त्यार्थबोधकत्वमपीतिव ऽमूअशब्दार्थत्वात्। यत्तु समासे सर्वत्र उत्तरपदे लक्षणा प्रातिपदिकत्वमपि तस्यैवेति तन्न। तन्मात्रस्य प्रातिपदिकत्वे पूर्वपदस्य सुपो लुगनापत्तेः। उत्तरपदमात्रस्य प्रत्ययान्तत्वेन तदसंभवाच्च। पराङ्गवद्भावे तु न समर्थपरिभाषोपस्थितिः आमन्त्रितार्थस्य यन्निमित्तं तदेव पराङ्गवदित्यर्थकेन तन्निमित्तग्रहणेन ऋतेनेत्यादेः पराङ्गवत्त्ववारणात्। अत एव भाष्ये सूत्रेणाग्ने स्वास्त्रुः संरभस्वेत्यादौ सूत्रेणेत्यादेः पराङ्गवत्त्वं माभूदिति तन्निमित्तग्रहणं कर्त्तव्यमित्युक्तं समर्थपरिभाषोपस्थाने ह्यसामर्थ्यादेवाप्राप्तौ भाष्यासङ्गतिः स्पष्टैव। क्रियाद्वारकमत्र व्यपेक्षालक्षणसामर्थ्यमिति कैयटोक्तं तु न युक्तम्। परस्परव्यपेक्षायाः सर्वभाष्ये सामर्थ्यपदार्थत्वेनोक्तत्वात्। किं चैवं सति कृतः सर्वौ मृत्तिकयेत्यादौ समासापत्तिः तादृशसामर्थ्यस्य तत्र ग्रहणे फलाभावश्च। वेदभाष्यं तु फणिभाष्यविरोधादनादेयमेवेति दिक्। यत्तु समर्थ इति सूत्रे इतरैर् निरपेक्षमपि सामर्थ्यपदविधिशब्देन पदत्वसंपादको विधिः कर्तृकरणयोरित्यादिश्च। तेन पदविधिविधेयम् इतरनिरपेक्षत्वार्थबोधक इत्यप्यर्थ आवृत्त्या सूत्रस्य तेन व्रीहिर्यजेतेत्यादावितरनिरपेक्षैर्व्रीहिभिर्यजेतेत्याद्यर्थसिद्धिरितरव्यासजातीयमेव गृह्यते तेन दण्डेन चक्रेण घटं करोतीत्यादीनां नासाधुतेति तन्न। भाष्यानुक्तेः। पश्य मृगो धावति पचति भवतीत्यादौ वदुक्तसामर्थ्यप्रत्यायकाभावेऽपि विशेषणस्यान्ययोगव्यवच्छेदफलकत्वेन न्यायत एवेतरनिरपेक्षकर्मत्वादिबोधस्यैव व्री

CC-0. In Public Domain. Digitization

हिभिरित्यादावपितस्यसंभवेनफलाभावाच्चेतिदिक्।नन्वेवंदेवदत्तस्यगुरुकुलमित्यादावेकदेशेगुर्वादौदेवदत्ताद्यन्वयोन
स्यादितिचेन्न।ससंबन्धिकपदार्थस्थलेचैत्रस्यनप्तेत्यादाविवैकदेशान्वयस्याप्यङ्गीकाराद्नप्तृत्वंहिस्वजन्यजन्यपुंस्त्वन्तदेक
देशेजन्यत्वेचैत्रस्यान्वयात्।यद्वातत्रापिस्वजन्यजन्यपुंस्त्वसंबन्धेननसर्वै वान्वयः।एवंगुरुद्वारकेणस्वगुरुत्वाद्यत्वरूपे
णसंबन्धेनदेवदत्तस्यकुलेएवान्वयः।घटादन्यइत्यादावपिस्वप्रतियोगिकभेदसंबन्धेनान्यस्मिन्नेवान्वयोस्त्वत्रतुनेदंप्रकार
इयमनभिधानाद्यत्रनेष्यतेयत्रत्विष्यतेतत्रशिवभागवतादौभवत्येवशिवोभगवान्भक्तिरस्येतितदर्थः।एवंचसंबन्धिशब्दः
सापेक्षोनित्यंसर्वःसमस्यते।स्वार्थवत्साव्यपेक्षाहिवृत्तावपिनहीयते।इतरसापेक्षस्वार्थस्यैवतैःप्रतिपादनादित्यर्थः।समुदाये
नसंबन्धोयेषांगुरुकुलादिना।संसृष्टस्यावयवास्तेतुयुज्यन्तेतद्वतासहेतिकारिकार्थः।संबन्धिशब्दइत्युपलक्षणम्।तस्माद्गम
कत्वेभवतिविशेषणसंबन्धोऽगमकत्वेतुनेतितत्त्वंगमकत्वंतथाबोधजनकत्वमित्यलम्।तत्रवृत्तिश्चतुर्धासमासतद्धित
कृत्सनाद्यन्तधातुभेदात्।तत्रसमासत्वंसंकेतविशेषसंबन्धेनसमासपदवत्त्वंयत्वर्थबोधायानुसन्धीयमानविभक्तिकपू
र्वपदकनामसमुदायत्वंतदितिचेन्न।दधिमधुरमित्यादावतिव्याप्तेस्तत्रलुप्तविभक्त्यनुसन्धानेनबोधइतिचेद्राजपुरुषादा
वपितुल्यम्।लोपमजानतोबोधइत्यप्युभयत्रसमंश्रुतेरिवार्थमित्येतद्घटकेइवार्थमितिसमुदायेतिव्यासेधः।पर्यभूषद्

पचतभृज्जतेतितिङन्तघटितसमासेऽव्याप्तेश्च।समासोद्विधाविशेषसंज्ञाविनिर्मुक्तः सुप्सुपेतिविहितस्तत्पुरुषश्च· अन्यश्चतुर्धा अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वभेदात्।तत्पुरुषत्वादिसंकेतविशेषसंबन्धेनतत्पुरुषादिपदवत्त्वम्।तत्राद्योदाहरणपूर्वंभूतोभूतपूर्वः सुप्सुपेतिसमासः पूर्वमितिक्रियाविशेषणंपूर्वकालवृत्तिपरं भूधातोः सत्तोत्पत्तिर्वार्थः पूर्वकालवृत्तिसत्ताश्रयइत्यादिर्बोधः द्विर्बद्धमितिन्यायेनपूर्वशब्देनोक्तेपिअतीतत्वेक्तः एवंविस्पष्टंपटु विस्पष्टपटुः विस्पष्टपटुत्ववानितिबोधः विस्पष्टमितिपटुत्वविशेषणतयानपुंसकम्।अथाव्ययीभावः हरौइत्यधिहरिभक्तिः हर्यधिकरणिकाभक्तिरितिबोधः अधिः सप्तम्यर्थवाचकः उपकृष्णमित्यादावुपः समीपवाचकः कृष्णसमीपमित्यर्थः।अत्राव्ययानांवाचकत्वादेवपूर्वपदार्थप्रधानाव्ययीभावइत्युत्सर्गस्यनिर्वाहः।द्योतकत्वेहिद्योत्यार्थस्यविशेषणतायाएवन्याय्यत्वात्तद्बाधः स्पष्टएव।स्पष्टंचेदमत्रैवभाष्ये।एतेनकुम्भादिपदानांतत्समीपेलक्षणोपादितास्यर्थग्राहकमित्यपास्तम्।द्योतकस्यप्रजयतीत्यादौद्योत्यार्थविशेषणकबोधेप्रकृतेचतद्विशेष्यकबोधेकारणत्वेनकार्यकारणभावद्वयकल्पनेगौरवात्।निद्रासंप्रतिनयुज्यतेइत्यतिनिद्रंयुजसमाधावितिदिवादेरकर्मकस्ययुज्यतइतिरूपम्।अत्रनिद्राकर्तृकवर्तमानयुक्तत्वाभाववदितिबोधः।अतेः संप्रतिनयुज्यतइत्यर्थः अतिनिद्रमासीदित्यादौतथाव्यवहारविषयेलक्षणाइतिहरि।हरिशब्दः शब्दस्वरूपपरः इतिः प्रकाशवाचीहरिशब्दप्र

काशइतिबोधः। रूपस्ययोग्यमनुरूपम्। सतृणमत्तिसाहित्यंसमभिव्याहृतक्रियाकारकवृत्तिसाकल्यंचसहार्थः तृणसहितंसक
लंभोज्यमत्तीतिबोधः तृणसाहित्यंत्वत्रारोपितंप्रतीयतेनवास्तवंशब्दशक्तिस्वभावात्। सकलभोज्यभोजनप्रतिपादनेएवतात्प
र्याच्च। सूत्रेसाकल्येतिप्रवृत्तिनिमित्तनिर्देशः। एवंसादृश्यपदेपि। साग्निअधीते। अग्निग्रन्थसहितंतदन्तग्रन्थकर्मकमध्ययन
मितिबोधः यावत्श्लोकमच्युतप्रणामाः परिमाणपरिच्छिन्नत्वंयावदर्थः श्लोकपरिमाणसंख्यापरिच्छिन्नाः प्रणामाइतिबोधः
एकपरिविपरीतवर्त्तनंपरेरर्थः एकहेतुकंविपरीतवर्त्तनंपराजयइतियावत्। सप्तगङ्गमुन्मत्तगङ्गमित्यादौसप्तगङ्गासमाहा
रउन्मत्तगङ्गाधिकरणमित्यादिक्रमेणवाबोधः एतेनपूर्वपदार्थप्रधानत्वमव्ययीभावलक्षणमित्यपास्तंउन्मत्तगङ्गमित्यादाव
व्याप्तेः उत्सर्गस्त्वङ्गीक्रियतएव। इत्यव्ययीभावः। कष्टश्रितः कष्टकर्मकश्रयणकर्त्तेत्यादिरीत्याबोधः मासप्रमितः प्रतिपच्चन्द्रइ
त्यत्रमाससंबन्धिपरिच्छेदारम्भकर्त्तेतिबोधः आदिकर्मणिकर्त्तरिक्तः धान्येनार्थोधान्यार्थः हेतौतृतीयाअर्थशब्दोधनवाचीधान्य
हेतुकंधनमितिबोधः मासेनपूर्वोमासपूर्वः अवध्युत्पत्तिकाला वधिमदुत्पत्तिकालयोर्मासस्यव्यवधायकत्वेयंप्रयोगः पूर्वसद
शेतिसमासविधानादूनार्थकलहमिश्रयोगइवपूर्वयोगेपितृतीया माषोनमून शब्दार्थः पूर्णत्वसंपादकवस्त्वभाववान्कलहः
क्रोधपूर्वकोव्यापारः वाक्कलहः वाग्रूपः सइतिबोधः दध्योदनः दध्युपसिक्तओदनः वृत्तिस्वभावलभ्यउपसेकः। सूपदारु। सूपरूप

ल·मे·
१४

विकारोपकारकं दार्विति बोधः अश्वघासादयः षष्ठीतत्पुरुषा इत्यन्यत्र विस्तरः पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः स्नानो
त्तरकालिकानुलेपनाश्रय इति बोधः एवमादिः समानाधिकरणपदस्तत्पुरुषः कर्मधारय इत्युच्यते।उपमानोपमितसमासयोर्य
दुक्तं तन्निपातार्थप्रसङ्गे उक्तम्।प्रसन्नेन दृगब्जेनेत्यादौ मयूरव्यंसकादिसमासः पूर्वपदार्थप्रधानता परवल्लिङ्गता च तत ए
व।राजान्तरमित्यादौ तद्विहितसमासस्यापि पूर्वपदार्थप्रधानत्वात्।न तूपमितं व्याघ्रादिभिरिति सामान्यधर्मप्रयोगात्।न चानुपा
त्तधर्मेणात्र सादृश्यम्।धर्मोपादाने उपात्तधर्मेणैव सादृश्यमित्यर्थस्य प्रकाशे दशमे स्फुटत्वात्।पुरेन्दुः सकलकल इत्यादावुपात्त
धर्मातिरिक्तधर्मेण सादृश्यस्याभावाच्च।किं चेदं सूत्रं समानलिङ्गवचनत्वे एव प्रवर्त्तते अत एव परवल्लिङ्गमिति सूत्रे तत्पुरुषश्चा
पिकः प्रयोजयति यः पूर्वपदार्थप्रधान एकदेशिसमास इति भाष्यं द्वन्द्वैकदेशिनोरिति न्यासेन तत्पुरुषग्रहणप्रत्याख्यानपरं
भाष्यं च सङ्गच्छते।अन्यथा दृगब्जेनेत्यादेः पूर्वपदार्थप्रधानस्य दृश्यमानपरवल्लिङ्गस्य सत्त्वेन तदसङ्गतिः स्पष्टैव।दृगब्ज
स्य वीक्षणान्वयस्तु तस्य पूर्वपदार्थप्रधानत्वान्निर्बाधः।मुखचन्द्र इत्यादावपि मयूरव्यंसकादिसमास एव तस्य पूर्वपदा
र्थप्रधानत्वात् चन्द्ररूपकव्यवहारः परवल्लिङ्गतापि तत एव।एतेनोत्तरपदार्थप्रधानत्वं तत्पुरुषलक्षणमित्यपास्तं दृ
गब्जेनेत्यादावव्याप्तेः सूपप्रतीत्याद्यव्ययीभावेऽतिव्याप्तेश्चोत्सर्गस्याद्रियत एव।नीलं च तदुत्पलं च नीलोत्पलम्।अत्र वाक्ये

५

एमः
१४

चकारप्रयोगेणप्रवृत्तिनिमित्तो त्पलत्वन्नीलत्वयोर्वक्ष्यमाणरीत्यानीलोत्पलयोर्वासाहित्यंभासते।अतएवात्रद्वन्द्वमाशङ्क्यान
वकाशेनकर्मधारयेणबाधान्नेतिभाष्येउक्तं।एवंचनीलत्वोत्पलत्वसमूहवन्नीलमुत्पलमितिबोधःनीलसमानाधिकरणंतदभि
न्नमुत्पलमितिवातत्रवाक्यइववृत्तौचशब्दाप्रयोगायैकार्थीभावःएतेनकर्मधारयेवयवशक्त्योपस्थितयोरर्थयोर्विशेष्यविशेष
णभावसंभवान्नतत्रैकार्थीभावइत्यपास्तम्।केचित्तुपण्डितोब्राह्मणःदधिरुचिकारीत्यादिवाक्यइवपण्डितब्राह्मणइत्यादिवृत्ता
वुद्देश्यविधेयभावेनान्वयवारणायैकोपस्थितयेसः।अतएववषट्कर्तुःप्रथमभक्षइत्यत्रभक्षान्तरविधिरेवनतुहोतृचमसइ
तिसमाख्याबलात्प्राप्तवषट्कर्तृसंबन्धिभक्षानुवादेनप्राथम्यविधिरितिमीमांसकाः।यद्वृत्तयोगप्राथम्येउद्देश्यतानियामके
पश्चात्त्वतद्वृत्तयोगौविधेयतानियामकाविति तुनयुक्तम्।प्रथमोभङ्गःपण्डितोब्राह्मणइत्यादौतथाबोधदर्शनेनतस्यव्यभिचारा
त्।अपृक्तएकाल्प्रत्ययइत्यादिसूत्रेषुव्यभिचाराच्च।अतएववररुचेरपियद्वृत्तयोगःप्राथम्यमित्याद्युद्देश्यलक्षणमित्यत्रादिपदो
पादानेनास्यानैयत्यंसूचितम्।नचविशेष्यतयोपस्थितिर्विधेयतयान्वयेनियामिकेतिवाच्यम्।पदाद्विशेष्यतयैवोपस्थितेःविशे
ष्यतासमानाधिकरणैवविधेयतेत्यपिनयुक्तम्।अज्ञातार्थस्यैवविधेयत्वेनतस्यविशेष्यत्ववद्विशेषणत्वस्यापिसंभवेननियमेमा
नाभावात्।नचतथाशाब्दबोधंप्रतिउद्देश्यविधेयवाचकघटितैकसमस्तपदभिन्नपदजन्योपस्थितिर्हेतुरितिपूर्वोक्तेपीतवासा

श्चतुर्भुजइत्यादौचनदोषइतिवाच्यम्।सकलवृत्तिभेदघटितगुरुतरकार्यकारणभावकल्पनापेक्षयैकार्थीभावस्वीकारस्यलघुत्वादि
त्याद्युक्तत्वान्नतथान्वयाभिप्रायेणसमासप्रयोगेप्राप्तत्वादिपर्यालोचनोत्तरंबोधस्येष्टत्वात्।अतएवालंकारिकैरुद्देश्यानन्तर्याभावे
पिविधेयाविमर्शउक्तोन्यक्कारोह्ययमित्यादौ।तत्रविलम्बेनतथाप्रतीतिस्तादृशोत्सर्गपरित्यागात्सहृदयवैमुख्यंवादुष्टिबीजंत
थाप्रकृतेपिविलम्बेनप्रतीतिःसमासेतथाप्रतीतिरित्युत्सर्गपरित्यागेनसहृदयोद्वेगोवादुष्टिबीजन्तद्वदेवचास्यापिनासाधुता।
अष्टक्तएकालुप्रत्ययोभ्यासलोपश्चेतिसौत्रप्रयोगात्।अतएवसप्तदशारत्निर्वाजपेयस्ययूपोभवतिलोहितोष्णीषाऋत्विजः
प्रचरन्तीत्यादौवाजपेययूपारत्न्युष्णीषत्वानूपसप्तदशत्वलौहित्यादिविधिरितिमीमांसकाःनचात्रयूपारत्न्युष्णीषयोर
तिदेशप्राप्ततयातिदेशादुपदेशस्यबलवत्त्वेनपूर्वमेतैरेवविशिष्टविधिरितिवाच्यम्।यूपऋत्विजामप्यतिदेशप्राप्ततयातत्प
र्यालोचनोत्तरमेवास्यविधेःप्रवृत्तेःप्रथमतोविशिष्टविधिरेव।प्राप्ताप्राप्तविवेकेतुविशेषणेपर्यवसानमित्यस्याप्ययमेवा
र्थः।आपाततःप्रतीतावपिप्राप्तत्वादिपर्यालोचनेतथातात्पर्यग्रहाच्छाब्दबोधइति।उच्चारितशब्दस्यतावत्पर्यन्तंतात्पर्याद्वा
क्येपिप्राप्तत्वादिपर्यालोचनमेवतथान्वयेतात्पर्यग्राहकम्।अतएवपण्डितोब्राह्मणइत्यादौयस्यैवाप्राप्तत्वंतस्यैवविधेयता
पर्यायेणदृश्यते।यद्वृत्तयोगादिकमपिप्राप्तत्वादेरेवगमकमेवंचसमासेतथान्वयेएकप्रसरताभङ्गः·नासामर्थ्यात्समासाना

पत्तिरिति मीमांसकनव्योक्तमपास्तम्। प्रथमभक्षद्त्वन्त्र तु समाख्यापेक्षया वाक्यश्रुत्योर्बलवत्त्वेन प्रथमतो नेनैव भक्षान्तरवि
धिरिति न दोषः नन्वेवं कटोपि कर्मभीष्माद्योपीति भाष्योक्तपक्षे परमेण कारकेण कृतं परमकारकेण कृतमित्यादौ तत्पुरुषे
तुल्यार्थैति सूत्रभाष्योक्तस्य परिनिष्ठितविभक्त्या समासस्यानुपपत्तिः। विशेषणविशेष्ययोर्द्वयोरपि तत्र पक्षे करणत्वेन क्रियाया
मन्वयेन सामर्थ्याभावात्। न च यद्यत्क्रियया प्राप्तुमिष्टतमं तत्तत्स्वैकर्म। यद्यत्क्रियायां साधकतमं तत्तत्करणं द्रव्यं गुणश्च न ह्यसौ कट
मात्रेण सन्तुष्यति एवं च सर्वेषां क्रियायां प्रत्येकं कारकत्वात्सर्वेभ्यः कर्मादावेव तत्तद्विभक्तिरिति हि तस्य बीजं तद्युक्तमासनस्न
नादि क्रियोपयोगित्वाद्द्रव्यस्येप्सिततमत्वेपि गुणादेस्तत्त्वाभावादिति वाच्यम्। कारकान्तरापेक्षयैव प्रकर्षस्य विवक्षणात्। न तु स्वकस्या
यामप्यन्यथात्वेन यथा दीपिकया व्रजतीत्यादौ सर्वेषां करणत्वानापत्तेः। न च पार्ष्णिकपरस्परान्वयेन सामर्थ्यमिति वाच्यम्। त
स्य दुर्वचत्वात्। तथा हि स न शाब्दः शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्। न च गुणादेः परिच्छेद्याकाङ्क्षासत्त्वेन द्रव्यस्य च परिच्छे
दकाकाङ्क्षासत्त्वेन प्रथमं द्रव्यगुणयोः श्रौतक्रियासंबन्धेपि पश्चादुक्ताकाङ्क्षावशात्परस्परं विशेषणविशेष्यभावेन विशिष्टस्य
क्रियासंबन्धविषयो बोधः आकाङ्क्षावशादेव पुनरनुसन्धानं शाब्दस्य। कारकस्य क्रियान्वय इति च श्रौतप्रथमबोधेनोपपन्नम्।
द्वितीयमादाय च सामर्थ्यमिति वाच्यम्। एवं हि श्रौतसंबन्धस्य बलवत्त्वात्तत्र च प्रत्येकं साधुत्वबोधाच्च श्वेतं छागमालभेतेत्या

द्विषयेष्वेतच्छागाभावे कृष्णच्छागे नैव येन केनचिच्छ्वेतेनापि यागस्य साङ्गत्वापत्तेः। किं च तत्तद्विभक्त्यन्तस्यानुसन्धाने का
रकत्वेन द्व्यान्वयायोगात्। न च विभक्तिरहितस्यानुसन्धानं तस्याबोधकत्वात् न केवला प्रकृतिरिति निषेधाच्च। न च समस्त
पदानुसंधानम्। यत्र समासात्प्राक्परस्परान्वयस्तत्रैव समासाभ्युपगमेन तदनुसन्धानासंभवात्। किं च समस्तपदानुसन्धाने
न सामर्थ्यैव वर्णनं सामर्थ्यज्ञानाधीनश्च समास इत्यन्योन्याश्रयापत्तिः। किं चैवं सति वाक्ये परस्परमुद्देश्यविधेयभावेन परस्परान्व
यस्य दौर्लभ्यापत्तिः समस्तपदे परैस्तथान्वयास्वीकारात्। न च यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमित्यभियुक्तवाक्ये प्र
थमं क्रियान्वयरूपमेव प्राथम्यमन्यादृशस्यातिप्रसक्तत्वात्। एवं च तयोरुद्देश्यविधेयत्वाभ्यां क्रियान्वय आवश्यकः। न हि
समासपदैकदेशस्याख्यातेनान्वयसंभवः आदौ समासघटकपदार्थान्वये एव तस्य साधुत्वाङ्गीकारादयमेव समासादावेका
र्थीभावो नामातो न समस्तपदे तथान्वयः। प्रकृते तु आदावुपात्तासमस्तपदयोः क्रियान्वयसंभवेन पश्चादनुसंहितसमस्तप
देपि तथान्वयसंभवदिति वाच्यम्। पूर्वमनुसंहितासमस्तपदे तथान्वयसंभवेनोपात्तसमस्तपदेपि तथान्वयापत्तेः। किं चोद्देश्य
त्व विधेयत्वाभ्यां तयोः क्रियान्वय इत्युक्तिमात्रं रमणीयम्। तयोः परस्परनिरूपितत्वेनोद्देश्यविधेययोरेव तद्रूपेणान्वया
त्। किं च नीलमुत्पलमस्तीत्यादौ सत्तायामुत्पलस्योद्देश्यत्वेनान्वये तस्याविधेयत्वं वाच्यं नीलस्य विधेयत्वेनान्वये च तस्या

उद्देश्यत्वं वाच्यम्। न चेदमावृत्तिं विना संभवति वैरूप्यात्। वाक्यभेदश्च नैवं विधेर्विषयेऽनुभवसिद्धः किं चाभियुक्तोक्तित उ
द्देश्यस्य प्राथम्यलाभेपि विधेयस्य न तल्लाभः तद्धचयोगाः पश्चात्त्वस्याद्विधेयस्य लक्षणमिति तच्छेषात्। किं चैकोयणित्यादा
विकइति षष्ठ्यन्तस्यादौ क्रियान्वयासंभवः स्यान्यादेशाभावसंबन्धस्य षष्ठ्यर्थत्वेन तस्य क्रियायामभावात्। एवं राज्ञः पुरुष
इत्यादौ स्वस्वामिभावसंबन्धाद्यर्थकषष्ठ्यामपि तथान्वयासंभवः किं च भवदुक्तं प्राथम्यमप्यसङ्गतम्। अभियुक्तोक्तवाक्यशे
षविरोधात् न्यक्कारो ह्ययमित्यादावुद्देश्यस्य प्राथम्याभावेनाविसृष्टविधेयांशतेति प्रकाशोक्तेरसङ्गतेश्च। अपि च वृद्धिरादै
सूत्रभाष्ये पूर्वोच्चारितः संज्ञी परोच्चारिता संज्ञेत्यादिग्रन्थेन पूर्वोच्चारितत्वरूपप्राथम्यस्यैवोक्तत्वात्। उक्त एकार्थीभावोपि नि
मूलः तत्तत्प्रत्ययविधायकशास्त्रीयप्रत्यासत्तिन्यायमूलिकया प्रकृतिप्रत्ययौ सहार्थं ब्रूत इति भाष्यसंमतव्युत्पत्त्यैव प्रकृति
प्रत्यययोस्तल्लाभेन तद्धितविधौ समर्थपरिभाषोपस्थितेर्भाष्योक्ताया वैयर्थ्यापत्तेः अस्मदुक्तैकार्थीभावस्यैव समर्थपदार्थ
पदार्थताया भाष्ये उक्तेश्च। न च मानसः पार्ष्णिकबोध इति वाच्यम्। शब्दयोरर्थद्वारकपरस्परान्वयाभावेनासामर्थ्यस्य तद
वस्थत्वात्। किं च नीलमुत्पलं पश्येत्यादौ दर्शनकर्मत्वस्य साक्षादेव गुणे सत्वेनाकाङ्क्षाभावेन पार्ष्णिकबोधे मानाभावात्तत्र स
मासानापत्तिः यत्र गुणवाचकानां स्वपरिच्छेद्यद्रव्यद्वारा क्रियाकारकत्वं तत्र परिच्छेद्यं द्रव्यं किमित्याकाङ्क्षायामुपात्तमे

वेत्यरुणाधिकरणवार्त्तिकोक्तेः।किंचनीलादिपदार्थानांपरिच्छेद्याकाङ्क्षायांद्रव्यमुपात्तगुणवदेवगुणउपात्तद्रव्यवृत्तिरेवेतिभे
दसंसर्गविषयकस्यापिपार्ष्ठिकस्यलाभेननियमतोऽभेदविषयकपार्ष्ठिकबोधालाभेनसामानाधिकरण्यनिमित्तसमासानापत्ति
स्तन्निमित्तपुंवत्वानापत्तिश्च।दर्शनीयामातेत्यादौतद्वारणायवृत्तौवृत्तेःप्राक्यत्रसामानाधिकरण्यंतत्रैवपुंवत्वप्रवृत्तेः।एतच्चब
हुव्रीहिप्रकरणेस्फुटीभविष्यति।एतेनसमासघटकीभूतंगुणिपरमित्यपास्तमितिचेदत्राहुः।भीष्मंकटंकुर्वित्यादौभीष्मादि
गुणविशिष्टकटस्यकरोतिक्रिययेप्सितत्वात्कर्मत्वन्तच्चकटपदोत्तरद्वितीययाविशिष्टस्यप्रधानानतिरिक्ततयाप्रधानगतस्य
तस्योक्तौविशिष्टगतंतदभिहितमेवेतिभीष्मादिभ्योद्वितीयानस्यादित्याशङ्क्यभाष्येविशिष्टगतकर्मत्वस्यसमानविभक्तिकवि
शेषणंविनाप्रत्याययितुमशक्यत्वेनभीष्मादीनामपिकर्मत्वशक्तिमत्वादुक्तत्वेपिद्वितीयेत्येकंसमाधानंकृतंतस्यायंभावः
विशिष्टस्यकर्मत्वेविशेषणस्यापितत्वमन्यथाविशिष्टंकर्मेत्युक्तिव्याघातः।कुण्डलीपण्डितइत्यादौकुण्डलादेःपण्डितत्वप्रमा
तुन।शिखीध्वस्तइत्यादौविशेष्येबाधेविशेषणगतस्यतत्रारोपेणप्रतीतिवत्अत्रविशेषणेबाधेविशेष्यगतस्यारोपेणोपपत्तेः।
एवंचतदंशेभ्रमत्वंज्ञानस्ययत्रत्वबाधस्तत्रनांशेपितत्वम्।विशिष्टगतैककर्मत्वप्रतिपादनंचनोभयत्रद्वितीयांविनेतिवि
शेषणादपिसा।प्रत्ययानांप्रकृत्यर्थान्वयित्वमिवविशेषणविशिष्टस्वप्रकृत्यर्थान्वयित्वमपिअत्रविशेषणपदात्कर्मत्वाद्य

CC-0. In Public Domain. Digitization by eGangotri

नालिङ्गितैवतदुपस्थितिर्विशेष्यस्यतुतद्विशिष्टेप्रतीतेर्विशिष्टस्यैककर्मत्वबोधः तथाबोधेविशेषणोत्तरद्वितीयापिसहकारिणी
—त्यत्रसामर्थ्येनानुपपन्नम्। ततोयवाकटोपिकर्मभीष्माद्योधीत्युक्तम्। तस्यायंभावः उभयोरपिकर्मत्वात्कटपदोत्तरद्वितीय
याकटगतकर्मत्वोक्तावपिविशेषणगतकर्मत्वप्रतिपादनायविशेषणाद्पिद्वितीयातत्रोत्पत्तिरपिगुणस्यद्रव्यद्वारैववा
च्यादानादिकर्मताचद्रव्यद्वारैवेतिसाक्षात्फलाश्रयादेरिवद्रव्यद्वाराफलाश्रयादेरपिकर्मत्वादिकमेवंचविशेषणंपृथ
क्कर्मादिशक्तिवैशिष्ट्येनैवबोधकम्। द्रव्येणाभेदात्तुतस्याः शक्तेर्वाक्यार्थबोधेविशिष्याग्रहः अत्रापिपक्षेविशेषणविशेष्ययोः
परस्परान्वयपूर्वकमेवक्रियान्वयः नचकारकाणांभावनान्वयेअनियमहानिःसाक्षात्क्रियाजनकानांसाक्षादेवतदन्वयः इतर
द्वाराकारकाणांतुतदन्वयद्वारकएवक्रियान्वयइतिनियमेनतदहानेः एतेनगुणानांचपरार्थत्वादसंबन्धः समत्वात्स्यादिति
न्यायविरोधः परस्परान्वयेदूसपास्तम्। उक्तरीत्यासमत्वाभावात्। एवमेवयुक्तंज्ञानद्वयकल्पनेगौरवात्। अननुभवाच्च। किंच
कारकविभक्तिसाधुत्वायप्रथमंक्रियान्वयः समासस्यपार्ष्णिकान्वयमादायसाधुत्वमुत समासस्यैवप्राथमिकपरस्परान्व
येनसाधुत्वंविभक्तेस्तुपार्ष्णिकेनेत्यत्रविनिगमनाविरहात्। द्वितीयोपपत्त्यर्थमेवैषाकल्पनाभाष्यकृतः सूत्रकृतः प्रकृत्यादि
विभागकल्पनावन्नत्वत्रबोधेविशेषः कैयटस्याप्यत्रैवतात्पर्यमितिनिरूपितंभाष्यप्रदीपोद्योते। एवंचात्रापिसामर्थ्याविवि

घातःस्पष्टएव।नचतत्रापिश्वेतंछाग मित्यादौश्वेतच्छागा भावेयेनकेनचिच्छ्वेतेनापियागसाङ्ग·ताकृतोनेतिवाच्यम्।जातेः
शब्देनकथमपिभेदास्पर्शेनद्रव्यात्मकत्वान्नतत्त्यागः नहिभवतिशाबलेयस्यगौरिति।गुणस्यतुघटस्यशुक्लइतिभेदेनप्रतीत्या
द्रव्येसत्येवगुणापगमेनचविप्रकृष्टत्वेनतस्यत्यागात्‌जातेस्त्यागेसर्वथैवसाधनभेदात्क्रियान्तरमेवस्यात्। मन्मतेतुसादृश्या
त्खदिरबुद्धेरनपगमइत्यदोषात्।अतएवनङि·संबुध्योरितिसूत्रेभाष्येसंबुध्यन्तानांराज‾ वृन्दारकेत्यादौनसमासःइहत
वर्त्तमानार्थेनवाक्येनभवितव्यंसमासेनचयश्चेहार्थोवाक्येनगम्यतेनासौजातुचित्समासेनगम्यतेअवयवसंबोधनंवाक्येनग
म्यते समुदायसंबोधनंसमासेनेत्युक्तम्।पृथगवयवार्थयो
रभिमुखीकरणेपरस्परस्यैकार्थीभावलक्षणसामर्थ्यायोगादितिकैयटः संबोधनविभक्त्यर्थस्यानुवाद्यतयाविधेयान्वयित्वे
नोभयोरपिक्रियान्वयित्वेनपरस्परान्वयाभावान्नैकार्थीभावइतितद्भावः तवतुनीलमुत्पलमित्यादौपार्ष्णिकान्वयेनसामर्थ्य
वदत्रापिवक्तुंशक्यत्वेनभाष्याद्यसङ्ग·तिःस्पष्टैव। तस्मान्मदुक्तरीत्यानीलमुत्पलमित्यादौप्रत्येकंकर्मत्वेपिविशिष्टस्यैवे
तरान्वयादस्तिसामर्थ्यंसंबोधनस्थलेप्रत्येकमभिमुखीभावएवोभयत्रसंबोधनविभक्तिरितिनतस्याःविशेषणविभक्तितुल्यत्वमि
तिनतत्रास्यप्रकारत्रयसंभवः प्रत्येकंसंबोधनविभक्तौकदापिविशिष्टसंबोधनाप्रतीतेर्यश्चेहार्थइत्यादिनाभाष्येणस्पष्टमेवा

स्यवाक्यस्यविशिष्टाबोधकत्वमुक्तमिहेत्यनेनचअन्यत्रवाक्यस्यसमाससमानार्थबोधनसामर्थ्यंचदर्शितमितिभाष्यविदोविभा
वयन्तुकटएवकर्मेत त्सामानाधिकरण्याद्भीष्मादिभ्योद्वितीयेतितृतीय—पक्षेतुतस्यकर्मत्वाभावेपिस्वविशेष्यगतक
र्मत्वेनतत्रद्वितीयाः।यथेश्वरसुहृदःस्वयंनि र्धनाअपितद्धनेनैवधनफलभाजस्तद्वत्त देकयोगक्षेमत्वादितिकैयटः
अयंभावःसामानाधिकरण्यंनामैकार्थबोधकत्वंयदिभिन्नशक्तिकत्वंस्यात्तदाशक्तिभेदेनार्थभेदादेकार्थत्वभङ्गस्तस्माद्विशेष्यसमान
शक्तिकत्वंतद्भिन्नविशेषणानामितितत्समानविभक्तिकत्वमेवफलाश्रयत्वादिवत्तद्वत्सामानाधिकरणत्वमपितत्तच्छक्तौ
नियामकमिति।एवंचपूर्वोत्तरपक्षैकवाक्यतयामध्यमपक्षेप्युक्तरीत्यैवबोधउचितः।अरुणाधिकरणसिद्धान्तोप्येवमेवअर्थैक
त्वेद्रव्यगुणयोरैककर्म्यनियमःस्यादितिजैमिने।सिद्धान्तसूत्रात्।द्रव्यगुणवाचकशब्दयोरर्थैकत्वेपरस्परमभेदान्वयेनैका
र्थबोधकत्वेसतिएककर्म्याद्विशिष्टैकस्यैकक्रियासंबन्धान्नियमःपरस्परावच्छेदरूपइतिसदर्थात्लोकसिद्धयाआरुण्यवि
शिष्टैकहायन्याःक्रियानुवादेनविधानान्नवाक्यभेदःगुणवचनानांसन्निहितविशेष्यपरत्वंतद्वत्लिङ्गादिग्राहित्वंचेत्येषह्येतद
धिकरणसिद्धान्तद्वयत्वम्।ननुचैवंरीत्यानीलघटमानयेत्यादौसमासेकृतेनीलादिपदोत्तरंद्वितीयाद्यापत्तिरुक्तरीत्याकर्मत्वसत्वा
द् इतिचेन्नज्ञातविभक्तेःसुपोधात्वितिलुकाऽस्ततःसमासाद्विशिष्टस्यैवोपस्थित्याविशिष्टोत्तरविभक्त्यैवतद्वत्तस्यतस्यैकत्वा

त्वेत्याहुः।अभेदान्वयेचसमानविभक्तिकनाम्नोरेवसाधुत्वमितिसर्वादिसूत्रेभाष्येस्पष्टम्।नामपदेनचविभक्त्यन्तमितिनिरूपिततद्धिपश्येत्यादावपिलुप्तविभक्त्यन्तत्वम्।विभक्तिलोपमजानतस्तद्व्युत्पत्त्यज्ञताच।उपदेशतउभयज्ञानमपिसुलभं राजपुरुषइत्यादौलुप्तविभक्त्यैवविरुद्धविभक्तित्वम्।विशेषणविभक्तिरभेदार्थेतितुनयुक्तंमानाभावाल्लक्षणयाविभक्त्यावभावाच्च।विशेषणविभक्तिःसाधुत्वार्थेत्यपिचिन्त्यमेवतथानुशासनाभावात्।समानविभक्तिकत्वंसमानार्थकविभक्तिमत्वं तेनराज्ञःसुतस्यधनमित्यादौनदोषःएकत्रषष्ठ्याजन्यत्वार्थत्वेनापरत्रस्वत्वार्थत्वेनतत्वाभावात्।समानवचनत्वसमानलिङ्गत्वेचनाभेदान्वयेतन्त्रे।वेदाःप्रमाणंगोदौग्रामाःतेनतुल्यंक्रियाचेत्।शैत्यंहियत्साप्रकृतिर्जलस्येत्यादौव्यभिचाराद्मुख्यं सामानाधिकरण्यंतुवचनलिङ्गैक्येएवेत्याहुः।कर्मधारयविधायकेविशेषणंविशेष्येणबहुलमितिसूत्रेविशेषणविशेष्यत्वेविषयताविशेषरूपेनिविष्टनतुपरिच्छेद्यत्वपरिच्छेदकत्वे।तथासतिनीलमितिसामान्योपक्रमेउत्पलस्यपरिच्छेदकत्वेनविशेषणत्वादुत्पलनीलमित्याद्यापत्तेः।अतएवेतरस्यप्रधानत्वादितरस्यविशेषणत्वादितिप्रधानशब्देनविशेष्यंभाष्येव्यवहृतंतत्रविशेष्यभूतेनाप्युत्पलेननीलस्याश्रयान्तरव्यवच्छेदःक्रियतेयथाराजपुरुषइत्यत्रविशेष्यभूतोपिपुरुषोराजानं स्वान्तरेभ्योव्यवच्छिनत्तिएतेनपरिच्छेदकत्वरूपंभेदकत्वंविषयताविशेषरूपविशेषणतासमनियतमित्यपास्तम्।अत्रसा

मानाधिकरण्यंविशेषणविशेष्यत्वंचार्थयोरेवसूत्रेतुतत्प्रतिपादकशब्देलक्षणाविशेषणादिशब्दानांनचोभाभ्यामेकद्रव्य
स्यैवाभिधानाद्वेदाश्रयविशेषणविशेष्यभावानुपपत्तिरितिवाच्यम्।धर्मभेदेनद्रव्यभेदात्निरुपाधिकंद्रव्यंवाधिष्ठानंचैतन्य
रूपन्तयोराश्रयइतिसामानाधिकरण्यमप्युपपन्नंविशिष्टशक्तिग्रहकालेतदुपलक्षितेष्वद्वैपिशक्तिग्रहः।अतएवकर्मधारय
विषयेभाष्योक्तंद्वन्द्वापादनेसङ्गच्छते।नीलसमानाधिकरणंनीलमुत्पलमितिबोधः।उक्तंचहरिणा।द्रव्यात्मानस्तयस्तस्माद्
द्वौनानाव्यवस्थिता।आश्रयाश्रयिभावेनेत्यस्यपूर्वेभ्यआगमइति।यत्तुप्रवृत्तिनिमित्तयोरेकद्रव्यवृत्तित्वंसामानाधिकर
ण्यम्।विशेष्यविशेषणभावस्तुप्रागवदेवेतितन्नविशेषणेनसमानाधिकरणेनेतिसूत्रविरोधात्।अन्येतुशब्दयोरेवैकविशे
ष्यभूतार्थप्रतिपादकत्वरूपंसामानाधिकरण्यंविशेषणविशेष्यत्वमपितद्रूपार्थप्रतिपादकत्वरूपंतयोरेवेत्याहुः।तत्रजाति
शब्दसंज्ञाशब्दार्थस्यगुणक्रियासमभिव्याहारेविशेष्यतैवस्वभावात्।यद्वाजातिसंज्ञाशब्दघटितेवाक्येकृष्णादयोद्रव्यवचना
अपिसमासेगुणादिमात्रबोधकाःतादात्म्येनगुणादिविशिष्टद्रव्यप्रतीतेश्चगुणादयोविशेषणंस्पष्टंचेदंहरिग्रन्थे।गुणयोःक्रि
ययोर्गुणक्रिययोश्चानियमएवातोनीलोत्पलमितिव्यवस्थितएवप्रयोगः।खञ्जकुब्ज कुब्जखञ्जइत्यादावव्यवस्थितएवव्या
प्यव्यापकभावानापन्नजात्योरनियमएव।यथाभूतमूर्त्तयोः।व्याप्यव्यापकभावापन्नयोस्तुव्यापकस्यविशेष्यतैवतेनशिंशपा

वृक्षदित्येव। नैतयोरावश्यकः समावेश इति भाष्यादेतत्प्रयोगाभाव एवेत्यन्ये। एवं च डित्थसोमयाजीत्याद्यसाध्वेव। क्वचिदन्यदे
वेत्यर्थकाद्बहुलग्रहणाद्वा साधु सर्वं चेदम्भाष्यस्येष्टमित्यलम्। अन्यो राजा राजान्तरं मयूरव्यंसकादिसमासस्तत एव परवल्लिङ्गता
भिन्नवाच्यन्तरशब्दस्य नपुंसकत्वात् तदर्थस्य पूर्वपदार्थविशेषणमत्र पूर्वपदजन्यबोधप्रकाराश्रयबुद्धिस्थयत्किंचित्प्रतियो
गिकत्वं च तदर्थभेदेप्युत्पत्तिविशेषलभ्यम्। पूर्वकायोर्धपिप्पलीत्यादौ कायसंबन्धी पूर्वो भाग इत्यादिप्रकारेण बोधः। एकदेशि
समासप्रत्याख्यानात् भाष्यमते कायादिशब्दानां तदवयवपरतया कायावयवरूपः पूर्वो भाग इत्यादिक्रमेण बोधः। मासो जातस्य
मासजातः अत्र विग्रहे वृत्तौ चोत्तरपदार्थप्रधानत्वम्। न च विग्रहे तत्त्वे जातस्य षष्ठ्यनुपपत्तिः। विशेषणादेव तद्विधानादिति वाच्यम्।
तस्य वृत्त्यर्थबोधकत्वविवक्षाया तद्व्यासेपि पूर्वजातसंस्कारानिवृत्तेरित्यग्रे निरूपयिष्यामः मासपरिच्छेद्यो जात इति बोधः
जातस्य परिच्छेद्यत्वं तु परिच्छेद्यजननाश्रयत्वेन। अस्य जातस्य कियान्काल इति प्रश्ने मासजात इत्यस्यार्थमुत्तरत्वं बोध्यम्। नञ्स
मासे बोधस्तु नञर्थनिर्णये निरूपितः। कर्मधारयान्नञ्तत्पुरुषाच्च न मत्वर्थीयः मत्वर्थीयान्तेन च न तौ वृत्तिद्वयकल्पने गौरवे
ण तत्र बहुव्रीहेरेव साधुत्वात्। क्वचित्तु शिष्टप्रयोगानुरोधेन लाघवानादराद्भवत्येव यथा दण्डी अपुच्छी अवाग्मी एकदेशिन्न
इत्यादि प्रगत आचार्यः प्राचार्यो निष्क्रान्तः कौशाम्ब्या निकौशाम्बिरित्यादौ प्रनिरादीनां गतक्रान्ताद्यर्थे वृत्तिः। इति तत्पुरुषः। चित्र

गुः चित्रा गावो यस्येति विग्रहः चित्रगोसंबन्धीति समासार्थः यत्संबन्धिन्यश्चित्रा गाव इति विग्रहे बोधः वृत्तौ विशेष्यविशेषणभावव्यत्यासः। यत्तु बहुव्रीहावन्यपदार्थे उत्तरपदस्य लक्षणा नच गोपदेनैव गोस्वामिलक्षणया तत्र चित्रपदार्थानन्वय एकदेशत्वादिति वाच्यम्। चित्रपदस्य तात्पर्यग्राहकतया गोपदेनैव चित्रगोस्वामिलक्षणान्न दोषः। एवं प्राप्तोदको ग्राम इत्यादौ उदककर्तृकप्राप्तिकर्मीभूतो लक्ष्यते प्राप्तपदं तात्पर्यग्राहकम्। प्राप्तिकर्त्रभिन्नमुदकमिति बोधोत्तरं स्वकर्तृकप्राप्तिकर्मत्वसंबन्धेन तत्संबन्धिग्रामे लक्षणेति तु न युक्तम्। उदककर्तृकप्राप्तिकर्म ग्राम इति विवक्षितार्थानिर्वाहात्। प्राप्तेति क्तस्य कर्त्रर्थकस्य कर्मणि लक्षणा। प्राप्तौ चोदकस्य कर्तृतासंबन्धेनान्वय इत्यपि न युक्तम्। उदकरूपकर्तुरनुक्तत्वेन ततस्तृतीयायां वैयधिकरण्याद् बहुव्रीह्यनापत्तेः उदककर्तृकप्राप्तिरिति बोधोत्तरं तत्कर्मग्रामो लक्ष्य इत्यपि न युक्तम्। प्रत्ययार्थप्राधान्यस्य नाम्नः सत्त्वप्राधान्यस्य च भङ्गापत्तेः। विशेषणे कर्तरि एकदेशत्वेनोदकान्वयासंभवाच्चेति नव्यन्यायविदस्तन्न। उत्तरपदे एव लक्षणायां विनिगमकाभावात्। न च प्रत्ययानां संनिहितपूर्वपदार्थगतस्वार्थबोधकत्वव्युत्पत्तिरुत्तरपदे तत्करणे विनिगमिका राज्ञः पुरुष इत्यादौ षष्ठ्यर्थस्य पुरुषे ऽन्वयवारणाय पूर्वपदार्थे —न्वावाच्यम्। सर्वक इत्यादौ व्यभिचारात्। दधीयद्दा— तीत्यादौ दध्निवत्वर्थान्वयापत्तेश्च। दधि बहु पटु ददातीत्यादौ दध्नि बहुजर्थान्वयाप्रवृत्तेः। पटावनन्वयापत्तिश्च। किं चैवमन्यपदार्थे वर्तमानानेकसुबन्ता

भावेन बहुव्रीहेरेवानापत्तिः। अपि चैवं घटादिपदेष्वपि चरमवर्णस्याच्प्रत्ययरूपस्य लक्षणयैवोपपत्तौ विशिष्टशक्तिकयोश्छे
दापत्तिः। अवयवतल्लक्षणाद्यजानतामपि बोधात्तत्र सा चेत्प्रकृतेऽपि तुल्यम्। कुत्रचिदवयवलक्षणाज्ञानाद् बोधेऽपि न तत्साधु
त्वं सूत्रविरोधात्। सूत्रे लाक्षणिकार्थान्वाख्यानस्यादृष्टत्वात्। व्याकरणस्य शक्तिग्राहकत्वभङ्गापत्तेश्च। किं चैवं प्रातिपदिकात्क
र्मत्वादौ स्वादय इति शास्त्रतः प्रत्यासत्त्या लब्धायाः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेस्तल्लब्धस्य परस्परं प्रकृति
प्रत्ययार्थान्वय एव तयोः साधुत्वस्य च भङ्गः। उत्तरपदमात्रस्याप्रकृतित्वात्। प्रकृतित्वं च प्रत्ययविधानावधित्वम्। तज्जन्यज्ञा
नविशेष्यत्वं च प्रकृत्यर्थत्वे। एतेन प्राप्तोदको ग्राम इत्यादौ यदुक्तं तदप्यपास्तम्। किं च स्ववाच्यार्थघटितलक्षणायां तात्पर्यग्रा
हकत्वस्य चित्रगुरित्यादौ क्लृप्तस्य भङ्गापत्तिः। व्युत्पत्त्यन्तरस्वीकारे विशिष्टशक्तिरेवोचिता। एवमूटरथ्यादावपि विशिष्टशक्ति
वादिनां तु न कश्चिद् व्युत्पत्तिविरोधः। सर्वव्युत्पत्तीनां भिन्नोपस्थितिजनकशब्दविषयत्वात्। तत्र विशेष्यविशेषणभाववैपरी
त्यान्तर्भावेणैव संसर्गेऽन्यपदार्थे च शक्तिकल्पना। चित्रगुरित्यादौ स्वामिभावादिसंबन्धेन चित्रगोविशिष्टः समासार्थस्तत्राश्र
यः स्वस्वामिभावादिः संबन्धश्चेत्युभयं समासार्थः। षष्ठ्या संसर्गरूपो विभक्त्यर्थ एव बहुव्रीहिशक्यः। न च विभक्त्यर्थस्यासत्त्व
रूपतया लिङ्गसंख्याकार्यानुपपत्तिरिति वाच्यं गुणवचनवत्स्वद्रव्याश्रितोऽसौ संबन्धस्तल्लिङ्गसंख्याभ्यान्तस्य योगाङ्गीका

रात्। एवं च समासेनाभिधीयमानः संबन्धः संबन्धितादात्म्येनैवाभिधीयते तत्र द्विष्ठत्वेपि संबन्धस्य संबध्यन्तरस्य विशेषणतया शब्देनैवोपात्तत्वात् प्राधान्याच्च स्वामिन एवाश्रयत्वमवस्थाप्यत इति तद्गतलिङ्गसंख्ये भवतः संबन्धसंबन्धिनोः स्वरूपातिरिक्तसंबन्धाभावेन संबन्धितादात्म्ये एव पर्यवसानं बोध्यम्। शब्दशक्तिस्वभावाच्च परस्य शुक्ल इत्यत्रेव न भेदेनात्र विवक्षा वाक्ये तु भेदेनैव विवक्षेत्यन्यत्। पक्षद्वयमपीदं भाष्ये स्पष्टमिति बहवः। परे तु एवं सति प्राप्तादिपदेपि विशेषणविशेष्यभावव्यत्यासकल्पने गौरवं बहुव्रीह्युपजीव्यस्यैकधर्मिबोधकत्वरूपसामानाधिकरण्यस्य भङ्गश्च। प्राप्तभार्य इत्यादौ पूर्वोत्तरपदयोरेकविशेष्यकप्रतीतिजनकत्वरूपसामानाधिकरण्याभावात्तुंवत्वानापत्तिश्च। किं चालौकिकविग्रहे एकार्थीभावरूपसामर्थ्यकल्पनयां तत्र तन्मूलके विशेषणत्वव्यत्यासे पदयोः सामानाधिकरण्याभावेन समासशास्त्राप्राप्तिः स्वघटकार्थघटितैकार्थीभावस्य चित्रग्वादौ क्लृप्तस्य भङ्गश्च। तस्मात्प्राप्तिकर्त्रुदककर्मेत्यादिप्रकारेण बोधः। उदके च निरूपकत्वबाधेन तु विशेषणभूतप्राप्तौ तत्पर्यवसानम्। स्वर्गोध्वस्त इतिवत्। अत एव विशेष्यविशेषणभावव्यत्यासस्यैकार्थीभावकृतविशेषोऽनुक्तिर्भाष्ये विभक्त्यर्थस्य प्राधान्येपि धर्मिबोधकत्वमुक्तरीत्यैव। यत्तु मीमांसकाः। बहुव्रीहौ चित्राणां गवामयमिति विग्रह उचितो न तु चित्रा गावोऽस्येति। वृत्तिविग्रहयोर्भिन्नार्थत्वस्यानौचित्यात्। प्राप्तोदक इत्यादेरपि प्राप्तस्योदकस्यायमिति विग्रहः। प्राप्तोदकसंबन्धीति बोधः संबन्धश्च स्वक

र्तृकप्राप्तिकर्मत्वादिरितितन्न। एवंविधविग्रहस्यसत्वेबहुव्रीहिः कर्तृकर्मवचनेनाप्रथमायाः अप्रथमाविभक्त्यर्थेबहुव्रीहिः शेषोबहुव्रीहिस्त्रिकृतः शेषद्वत्वादिषुनिवचन विरुद्धत्वात् नचालौकिकेप्रथमान्तानामेवप्रवेशेननतद्विरोधइतिवाच्यम्। अलौकिकेप्रविष्टानामेवपक्षान्तरेसमा साभावेपरिनिष्ठितानांतदर्थबोधनायप्रयोगसंभवेउपस्थितपरित्यागेनानुपस्थितपदघटितलौकिकविग्रहवाक्यकल्पनायाअनौचित्यात्। किंचनकेवलमर्थबोधनायैवतद्वाक्यप्रयोगः। किंतुसमासादेर्वैकल्पिकत्वप्रदर्शनायापितद्दर्शकंचोक्तरीत्याचित्रागावोयस्येत्याद्येवनत्वदीयमतएवाविग्रहोनित्यसमासइतिवृद्धाः। अन्यथाकुम्भकारइत्येतत्समानार्थकस्यकुम्भस्यकर्तेत्यस्यसंभवेनतस्यनित्यसमासत्वंभज्येत। कर्तृपदस्यनसमासघटकतेतिचेद् लौकिकसमासवृत्त्याचित्राणामित्यादेरपितद्घटत्वंतुल्यम्। नचचित्रागावोयस्येत्यपिविग्रहोस्तुतद्वैकल्पिकत्वबोधकः। अर्थनिर्णयार्थंतुमदुक्तोपिसमासघटकपदघटितवाक्यासंभवएवनित्यसमासत्वमितिनबहुव्रीहेस्तत्वमितिवाच्यम्। फलद्वयार्थंयुगपद्वाक्यद्वयप्रयोगापत्तेः। किंचसमसनमेकीभावइत्यर्थकसमासेपदप्रतिद्वन्द्विविग्रहपदस्यसमासघटकपदानांविभिन्नत्वेनग्रहइत्यर्थकस्यत्वदुक्तेप्रयोगासंभवात्। अनेनहिवृत्तिघटकपदानांभेदेनस्वरूपज्ञापकस्यविग्रहत्वंलभ्यते। नचत्वदुक्तेतद्स्तीत्यलम्। वृत्त्यर्थप्रदर्शनार्थंकल्पितेचित्रागावोयस्येत्यादावपिविशेष्यविशेषणभावव्यत्यासाच्चित्रगोसंबन्धीत्येवबोधः। व्यस्ता

सबोधनायैवचित्रागावोयस्यसचित्रगुरितिप्रदर्श्यतेवृद्धैः।सर्वनामसंज्ञासूत्रभाष्येपिसर्वआदिर्येषांतानीतिविग्रहोदर्शितःस
र्वेनाम्नामुत्सर्गतःप्रधानपरामर्शित्वात्सचित्रगुरित्यनेनस्वामिप्राधान्यंप्रदर्श्यतइतिकैयटः।अतएवमासजातइत्यादेर्मासोजा
तस्ययस्यसइतिविग्रहंप्रदर्शयन्ति।चित्रागावोयस्यसचित्रगुरितिवाक्येचित्रगुपदंतत्पदबोध्यपरंचित्रगोसंबन्धीयोभवति
सचित्रगुपदबोध्यइतिबोधः।पचतीतिपाचकइत्यादेःपाचकपदंपचतीत्येतत्समानार्थमितिबोधः।पचतिपाकंकरोतीत्यतोपिपच
तिपदमेककर्तृकपाकक्रियाबोधकमितिबोधःएवमन्यत्रापि।एवंचवृत्तिविग्रहयोःसमानार्थतास्पष्टैव।विग्रहश्चवृत्त्यर्थेवृत्तिवैक
ल्पिकत्ववृत्तिघटकपदस्वरूपबोधनोद्देशेनप्रवृत्तंवाक्यम्।तेनलोकेस्वातन्त्र्येणार्थबोधार्थप्रयुक्तेयथास्थितएवविशेष्यम्।विशेषण
भावः।तदुक्तंहरिणा।क्वचिद्गुणप्रधानत्वमर्थानामविवक्षितमित्युपक्रम्यास्मात्तंतद्धितार्थस्यकिंचिदुपदर्शकंगुणप्रधानभाव
स्यतत्रदृष्टोविपर्ययइतिदीव्यतीत्याद्यर्थेविहिततद्धितानांसाधनप्रधानत्वेन।सूत्रस्थेदीव्यतीत्यादौविग्रहवाक्येचगुणप्रधा
नभावोविपरीतोदृष्टोन्यथावृत्तिविग्रहयोःसमानार्थत्वंभज्येतेतितदर्थः।यत्तुतत्रतद्धितेविपर्ययोदृष्टइत्यर्थेवर्णनंभावप्रधानम
तिङन्तार्थेविहितस्यापिसत्त्वप्रधानतेत्याशयइतितन्न।असरस्वारस्यानुगुणंयत्तद्परामृष्टस्यप्रधानस्यैवतच्छब्देनपरामर्शात्।ए
कत्राधिकरणेपूर्वदृष्टगुणत्यागपूर्वकंगुणान्तराङ्गीकारस्यैवविपर्ययपदार्थत्वाच्च।अतएवैतद्व्याख्यायांतेनदीव्यतीत्यादौनि

दैशेगुणप्रधानभावोनविवक्षितइत्याहपुन्नाएजः।अनेनतुल्यन्यायात्सर्वत्रवृत्त्यर्थेप्रदर्शनायप्रवृत्तेवाक्येवृत्तिवाक्ययोःसमा
नार्थत्वाय विशेषणत्वादिव्यत्यासइतिसूचितम्।तथाचतद्वहतीतिसूत्रेभाष्यंवहत्यर्थेरथादिभ्यःप्रत्ययविधिरनर्थकस्त
स्येदमितिविहितत्वादित्युक्त्वावह तीत्यस्यक्रियाप्रधानत्वेनवोढेत्यस्यसत्वप्रधानत्वेनशब्दभेदान्नप्राप्नोत्यन्यःशब्दोरथंव
हतिअन्योरथस्यवोढेतीत्याशङ्क्य र्थसामान्यात्सिद्धंयएवार्थोरथं वहतिसएवार्थोरथस्यवोढेतीतितद्वैयर्थ्यंदढंकृत्वाद्वि
रथ्यइत्यादौयतोलुगभावार्थेतदितिसिद्धान्तितम्।यएवचार्थेइत्यादेःरथ्यइत्यस्यविग्रहभूतेरथंवहतीत्यत्रयोसएवतद्विग्रर्थः
हभूतेरथस्यवोढेत्यत्रेत्यर्थः।एवंचतद्व्यत्यासस्तत्रैवस्पष्टमुक्तः।एवंचवृत्तिविग्रहयोर्विषयतापिसमाना।अतएवसमर्थसूत्रेभाष्येम
हत्कष्टंश्रितइतिविग्रहेकष्टश्रितयोःसमासःकृतोनेत्याशङ्क्य इहसमानार्थेनवाक्येनभवितव्यंयश्चेहार्थोवाक्येनगम्यतेमहत्क
ष्टंश्रितइतिनजातुचित्समासेनासौगम्यतइत्युक्तम्।तत्रपदार्थानांवाक्येसमासेचप्रतीति स्तुल्यैवतथापिमहत्कष्टंश्रितइतिवा
क्येकष्टपदार्थोविशेषणत्वानाक्रान्तस्वनिष्ठविशेष्यतयाबुध्यतेसमासेतुश्रितनिरूपितविशेषण त्वाक्रान्ततयैवेतिनमहत्त्व
दार्थस्यतत्रविशेषणत्वम्।एवंचविषयताविशेषस्यवाक्येभासमानस्यसमासेनकथमपिभानमितितदर्थः।एतदेवाभिप्रेत्यकैय
टः।स्पःकष्टंश्रितःसमहत्कर्मकरोतीत्यादिप्रतीयेतनतुमहतःकष्टविशेषणत्वमिति।एवंचालौकिकइववृत्तिविग्रहभूतेलौकिके

एकार्थीभावारेपर एतद्भाष्येण बोधितइत्यपि केचित्। युक्तं चैतत्। अन्यथा कष्टं श्रितइत्यस्यापि विग्रहत्वं न स्यात्। तद्देवविषय
ताभेदात्। विशेषणसमभिव्याहारे तु तत्संबन्धानुपपत्त्यानश्रितादिरूपप्रधाननिरूपितविशेषणतयोपस्थितिस्तद्समभिव्या
हारे तु तथैवोपस्थितिरेवं सर्वत्र द्रष्टव्यम्। समासतद्घटकपदमात्रघटितविग्रहयोः समानार्थत्वे एतद्भाष्यतात्पर्यम् अतएव का
लाः परिमाणिनेति सूत्रे किंप्रधानोऽयं समास उत्तरपदार्थप्रधानइत्युक्तं नायं प्रश्नः समासमात्रविषयउचितः तत्पुरुषस्योत्तर
पदार्थप्रधानतायाः अव्ययं विभक्तीत्यादिसूत्रे भाष्ये उक्तत्वेन मासजातो द्व्यहजातामित्यादौ जातस्यैव कार्यसंबन्धदर्शनात्प्राधान्य
निश्चयेन च तन्मात्रविषयप्रश्नोऽनुपपत्तेः। तस्माद्वृत्तिविग्रहयोः समानार्थत्वनिर्वाहमपश्यतो विग्रहसमासोभयविषयः प्रश्नउत्त
रं चेति भाति। समासपदं च समासविग्रहोभयपरम्। न च विग्रहेऽपि जातस्य प्राधान्ये जातस्य मासइति षष्ठ्यनुपपत्तिर्विशेषणा
देव षष्ठीविधानादिति वाच्यम्। वृत्तिविग्रहयोः समानार्थत्वानुरोधेन तस्य वाक्यस्य वृत्त्यर्थबोधकत्वरूपविग्रहत्वविवक्षायां
विशेषणविशेष्यभाववैपरीत्येऽपि पूर्वजातसंस्काराऽनिवृत्तेः। एवं च विग्रहे तदुत्तरषष्ठ्येव मासविशेषणकसंबन्धप्रतीतिवत्स
मासेऽपि विशिष्टोत्तरषष्ठ्या तत्प्रतीतिसंभवइत्याशयेन यथैवमन्येषूत्तरपदार्थप्रधाने तथैवासावुत्तरपदे प्रधानेऽन्तर्वर्त्ति
नी विभक्तिस्तस्याः समासेऽश्रवणं भवति यथा राज्ञः पुरुषो राजपुरुषइति इह पुनर्वाक्ये षष्ठीसमासे प्रथमा केनैतदेवं भवति इ

त्याशङ्क्य योसौ मासजातयोरभिसंबन्धः स समासे निवर्त्तते अभिहितः सोर्थोन्तर्भूतः प्रातिपदिकार्थः संपन्न इति प्रातिपदिकार्थे प्रथमेति अन्यथा विशेषणविभक्तेः षष्ठ्याः प्रधानबोधकसमासादापत्यसङ्गतेः। कैयटोपि वृत्तिविग्रहयोः समानार्थत्वन्याय्यमत्र तु वाक्ये जातो विशेषणं समासे तु मासजातो दृश्यतामित्यादौ जातस्यैव कार्यसंबन्धावगमात्प्राधान्यमन्योत्तरपदार्थे प्रधानवैधर्म्यं च लक्ष्यते इति मत्वा पृच्छतीति प्रश्न इत्याशयं वदन्नुत्तरेण तयोः समानार्थत्वमभिप्रैति। तत्र संबन्धस्य समासे निवृत्तिः षष्ठ्यनिमित्तत्वेन तत्र हेतुः अभिहितः समासेनात एवान्तर्भूतः संबन्धिविषयकोपस्थितिविषयत्वमन्तर्भावः। अत एव प्रातिपदिकार्थः संपन्न इति प्रथमोत्पत्तिनिमित्तकथनं षष्ठ्यभावनिमित्तकथनं च कारकप्रातिपदिकार्थव्यतिरिक्तस्य शेषत्वात्। न च मासस्य जात इत्येव विग्रहोस्तु एवं च वृत्तिवाक्ययोः समानार्थतापि भवति षष्ठीप्रसक्तिश्च न। षष्ठीतिसूत्रेण सिद्धे कालाः परिमाणिनेत्येतत्तु कालाः परिमाणिना समस्यन्ते न तु परिमाणी कालेनेत्यर्थेन जातमास इत्येतन्निवृत्त्यर्थमितिवाच्यम्। एतद्भाष्यप्रामाण्येन परिच्छेद्यपरिच्छेदकसमभिव्याहारे परिच्छेद्यादेव षष्ठीस्वीकारेण तथाविग्रहासंभवात्। एवमवयवावयविसमभिव्याहारेऽवयवत्वादिसंबन्धेवयविवाचकादेव षष्ठीति बोध्यम्। तन्तूनां पट इत्यादौ तु जन्यजनकभावसंबन्धे षष्ठी विशेषणत्वादिव्यत्यासे च शब्दस्वभाव एव बीजम्। यस्त्वेकार्थीभावबलाद्वृत्तौ विशेषणत्वा

द्व्यत्वासदितितन्न।एकार्थीभावपक्षेतुभाष्येस्यागणनाद्वृत्तिविग्रहयोःसमानार्थत्वभङ्गापत्तेश्च।एवमेवबहुव्रीहिवाक्येपिषष्ठीस्थितिर्बहुव्रीहौप्रथमादीत्यपिबोध्यमित्यन्यत्रविस्तरइत्याहुः।बहुव्रीहिर्द्विधातद्गुणसंविज्ञानोतद्गुणसंविज्ञानश्च।लम्बकर्णमानयेत्यादावाद्यःतस्यान्यपदार्थस्यगुणानांविशेषणानांकार्यान्वयितयासंविज्ञानंयत्रेत्यर्थात्।चित्रगुमानयेत्यादावन्त्यःविधेयानन्वयित्वघटकावयवार्थकत्वंचतत्त्वम्।लम्बकर्णभोजयेत्यादावप्ययमेव।यदिविधेयान्वयित्वमेवविधेयक्रियाकालेसंनिहितत्वमपितद्गुणसंविज्ञानत्वमित्युच्यतेतदालम्बकर्णभोजयेत्यादावप्याद्यएव।संयोगसमवायान्यतरसंबन्धेनसंबन्धीयत्रान्यपदार्थस्तत्रतद्गुणत्वंप्रायोन्यत्रान्यइत्यलम्।बहुव्रीहौविशिष्टशक्तिस्वीकारादेवारुणाधिकरणमुपपद्यते।तत्रह्यरुणयापिङ्गाक्ष्यैकहायन्यासोमंक्रीणातीतिवाक्येज्योतिष्टोमप्रकरणपठितेकिमरुणिमावाक्याद्भित्वाप्रकरणेसर्वद्रव्येषुनिविशतेउतक्रीणातिनासंबध्यतदङ्गमेकहायन्यांनिविशतइतिसंशयः तत्रगुणस्यामूर्तत्वात्स्वरूपक्रियासाधनत्वासंभवेनपृथग्मूर्त्तोऽविशेषात्प्राकरणिकद्रव्यमात्रेनिविशते।अरुणादिशब्दाश्चगुणवचनाएव।ननुतदाक्षिप्तद्रव्यस्यैकस्यसाधनत्वसंभवोन्यथाप्रकरणेपिनिवेशोनस्यात्।अमूर्तत्वात्क्रियाभिःकारकत्वाच्चद्रव्यैःसंबन्धासंभवादितिचेन्न।श्रौतैकहायन्यवरोधेनक्रयेतदन्वयासंभवात्।नचसत्यपिबलाबलेद्रव्यस्यवस्तुतएकत्वेनविरोधाभावादयुक्तमेतत्।अन्तरङ्गबहिरङ्गभावेनक्रमेणान्व

येद्वैक्यस्यैवाभावात्। एवं चाविशेषादरुणापदलक्षितन्तदाक्षिप्तंवा द्रव्यं प्राकरणिकं सर्वमेवेति पूर्वपक्षः सोऽयुक्तः स्यात्। एकहायनीति समस्तस्यापि लाक्षणिकत्वेन श्रौतत्वाभावात्। निरपेक्षो हि रवः श्रुतिः। इतरपदार्थान्वयानुपपत्तिज्ञानसापेक्षप्रतीति किं हि लाक्षणिकमन्यथारुणापदलक्षितं द्रव्यमपि श्रौतमेव स्यात्। न च लक्षणादिकं विनैव प्रकरणकल्पितश्रुतानुमितैकदेशनिष्पन्नेनारुणयाज्योतिष्टोमापूर्वसाधनीभूतद्रव्यपरिच्छेदं भावयेदित्याकारेण वाक्येन प्राकरणिकसर्वद्रव्याङ्गत्वमिति वाच्यम्। द्रव्यपरिच्छेदं भावयेदित्यंशस्य प्रकरणतोऽप्यलाभात्। तस्माल्लक्षणया प्रकरणे निवेश इति वृद्धोक्तमेव ज्यायस्तत्र चानुपपत्तिरेव अरुणयेति टाब्निर्देशस्तु छान्दस इति पूर्वपक्षी मन्यते। आश्रयलिङ्गग्राहित्वादिवद्गुणवचनानां पूर्वपक्षी न जानीते। आश्रयानिर्णयाच्च न च स्त्रीद्रव्यलक्षणायां टाप्। अरुणापदलक्षितन्द्रव्यमित्यस्यासङ्गतेः प्राकरणिकद्रव्यमात्रे निवेश इत्यसङ्गतेश्च। यत्तु टाप् साधुत्वार्थ इति तन्न। एकवचनात्यन्तस्वार्थिकप्रत्ययातिरिक्तप्रत्ययानां साधुत्वमात्रार्थताया भाष्यकारादिभिरनभ्युपगमात्। किं च समासशक्त्यनङ्गीकारे एकहायनीपिङ्गाक्षीपदयोरप्यरुणापदतुल्यतया तत्र पूर्वपक्षाद्यकरणे बीजानापत्तिः। मीमांसावार्त्तिककृतोऽप्येवमेव सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते न हि संबन्धवाच्यत्वं संभवत्यतिगौरवादिति तदुक्तेः तन्मात्रवाच्यत्वमित्यर्थः संबन्धस्य सांसर्गिकविषयतयैव वाच्यत्वे तस्य संबन्ध्यन्तरभानं विना भानायोगात्। विशेषणं च गा

वोत्रनसंबन्धः कथंचनेतितदुक्तेः।अत्रचित्रगुरित्यादौसंबन्धस्यसखण्डत्वेनतत्रवाच्यत्वंकल्प्यंसंबन्धिनस्त्वाक्षेपाद्वानेत्थीकार्यमित्यर्थोतिगौरवादित्यस्यशक्तिमदवयवकत्वेसतिसंसर्गबोधकशब्दत्वंयौगिकशब्दत्वम्।शक्तिमदवयवकत्वंचराजपुरुषादौलोकसिद्धंपाचकादौशास्त्रसिद्धंजातेस्त्वन्वयभेदेनगोपदादिभ्योभानमितिअजेत्यादौटाप्सिद्धिः।अतएवशावलेयस्यगौरितिकदापिन।सिद्धान्तस्त्वस्यगुणितादात्म्येनगुणबोधकत्वम्।गुणिद्रव्यंचवाक्येश्रुतत्वेनसन्निहितत्वादेकहायन्येवेतिविशिष्टविधिरयम्।अतएवटाप्न्यायेनतस्मिन्संभवतिच्छान्दसत्वकल्पनायाअयुक्तत्वात्।अतएवगुणेशुक्लादयःपुंसिगुणिलिङ्गास्तुतद्वतीतिकोशःसङ्गच्छते।भेदेनभानेप्याश्रयलिङ्गग्राहितावागुणवचनानामाश्रयतोलिङ्गवचनानीत्युक्तेः।एकहायनीचगौरेवक्रमप्राप्तत्वात्।गवातेक्रीणानीतिमन्त्रलिङ्गात्।एतदभिप्रायेणैववार्त्तिकेउक्तंगुणस्यैवास्यद्रव्यपरिच्छेदद्वाराक्रयसाधनत्वमित्यरुणादीनांयोग्यत्वाद्द्रव्यपरिच्छेदएवव्यापारस्तत्रैषांकर्तृत्वादितरत्रकरणत्वंभविष्यतीतिनारुणापदादेतदवगतम्।किंचिद्द्रव्यंपरिच्छिन्दतारुणगुणेनक्रयःसाधयितव्यइतिएकहायन्यपिकेनचिद्गुणेनमेपरिच्छेद्यःकार्यद्वयेतावदुपेक्षतेउभयापेक्षालक्षणश्चसंबन्धःशीघ्रतरंनिवर्त्ततेतेननष्टाश्वदग्धरथवत्तयोरेवविनापिषष्ठींसंबन्धइतिसंनिहितातिक्रमेकारणाभावाच्चैवमेवज्ञायतइति।परिच्छेदश्चस्वतादात्म्येनग्रहणंस्वाश्रयत्वेनग्रहणंवाएतदधिकरणसिद्धान्तसूत्रमपिकदंभीष्मकुर्विस्थे

ल·मं· तदनुत्पादनावसरेतत्पुरुषप्रकरणेउक्तंव्याख्यातंचेतिदिक्·अतएवैन्द्रपीताधिकरणंसङ्गच्छते।तथाहि।प्रातःसवनस्यगाय ५
२६ त्रच्छन्दसइन्द्रपीतस्योपहूतस्योपहूतोभक्षयामीतिमन्त्रइन्द्रदेवत्यसोमभक्षणएवनान्यदेवत्यसोमभक्षणे।इन्द्रपीतस्येति
लिङ्गात्।नचैन्द्राग्नेतुलिङ्गाभावात्स्यादितिसूत्रात्डित्थकपित्थयोर्मातरिडित्थमातृत्ववदिन्द्राग्निपीतेइन्द्रपीतत्वरूपलिङ्गस्य
सत्त्वेनैन्द्राग्निदेवत्यसोमभक्षणेमन्त्रापत्तिरितिवाच्यम्।अग्नौभस्मीकृतस्यपानासंभवेनेन्द्रपीतशब्दस्यतृतीयातत्पुरुषेण
सोमपरत्वस्याप्रयुक्तत्वेनदानलक्षणयासाधनंकृतेतिचतुर्थीतत्पुरुषेणसोमपरस्येन्द्रोद्देशेनदत्तस्येत्यर्थकतयैन्द्राग्न्युद्देश्य
कस्येन्द्रोद्देश्यकत्वाभावेनादोषात्।यत्तुइन्द्राग्निविषयेइन्द्रस्याग्निसापेक्षत्वेनासामर्थ्यादिन्द्रपीतइतिसमासोनस्यादिति
शबरस्वामिनोक्तंतत्प्रौढ्या।उपात्तपदजप्रतीतिविषयसापेक्षएवसापेक्षमसमर्थवदित्यस्यप्रवृत्तेःपतञ्जलिनोक्तत्वात्।विशे
षणस्यायोगान्ययोगव्यवच्छेदफलकत्वेनव्रीहिभिर्यजेतेत्यादाविवेन्द्रायैवदत्तस्येत्यर्थेनैन्द्राग्निदेवत्येमन्त्राप्रवृत्तेश्चतथाच
सूत्रमेकस्मिन्वादेवतान्तराद्विभागवदिति।एकेन्द्रदेवत्यएवायंमन्त्रःयथादेवतान्तरसोमादस्यविभागोऽसंबन्धस्तद्वदित्यर्थइ
तिपूर्वपक्षेसोमपरत्वेहुतशिष्टस्यभक्षणार्थमुद्धृतस्येन्द्रपीतत्वाभावेनतत्संबन्धिलक्षणासोमपरोपहूतशब्देनव्यधिकरणा रामः
न्वयोवास्यात्।एतच्चाबन्तस्यैवदेवतायैदानेनसर्वस्येतिभाष्यमतेस्पष्टमेव।इन्द्रायवसुमतेगृह्णामीतिमन्त्रलिङ्गादिन्द्रस्यस २६

मुदायसंबन्धबोधनात्सर्वस्यैवदानं प्रक्षेपस्यांशस्यांशान्तरस्येत्यन्योविनियोगोवचनबलादितिवार्त्तिकमतेप्येतदावश्यकम्।अवशिष्टमात्रस्यतद्वत्त्वाभावात्।नचसमुदायदानेवयवस्यापिदानान्नलक्षणादिअन्यथासमुदायदानेततः पुनर्दातुरेकदेशस्वीकारेप्रत्यवायोनस्यादितिवाच्यम्।इन्द्राग्न्यादेर्दानोद्देश्यत्वस्यसमुदायेपर्याप्तिवत्तत्कर्मत्वस्यापिसमुदायेएवसत्त्वात्।स्वस्वत्वध्वंसपरस्वत्वोत्पत्त्याश्रयत्वेनक्रियोद्देश्यतायाः।समुदायेएवसत्त्वात् नान्तरीयकेपुनःस्वत्वनिवृत्तिस्वत्वोत्पत्तीअवयवेष्वपीत्येकदेशस्वीकारेप्रत्यवायोपपत्तिःनान्तरीयकमादायश्रौतव्यवहारस्तुननान्तरीयकदानोद्देश्यत्वस्यापिप्रत्येकंसत्त्वेनेन्द्राग्निदेवत्येसोमभक्षणेतवमन्त्रापत्तेः।यत्तुस्वीकारेपाधातोर्लक्षणासचलाघवादैन्द्राग्नादिविषयेउभयनिरूपितएकएवनप्रत्येकनिरूपितइति।तन्नइदंममेत्याद्याकारकबुद्धिविषयत्वरूपस्यतस्यबुद्धेःप्रत्येकवृत्तितयोभयनिरूप्यत्वाभावात्निर्वापप्रभृतिप्रतिपत्तिपर्यन्तममुकदेवतासंबन्धीदमितियाज्ञिकव्यवहारस्तुदेवतोद्देशेनोपकल्पितत्वमात्रेण।उपकल्पननिरूपितोद्देश्यताचप्रतिपत्तिनाश्येतिनतदुत्तरंतथाव्यवहारः।तस्माद्बहुव्रीहिरिन्द्रेणपीतोयस्मिन्नितिप्रातःसवनस्येत्यधिकृतंप्रातःसवनमन्यपदार्थः। नचकर्मसमुदायाधारकालरूपस्यतस्यभक्षणासंभवइतिवाच्यम्।तेनतत्संबन्धिहविषोलक्षणायाउपहूतस्येत्याद्यन्वयायतत्वाप्यावश्यकत्वात्।सवनीयंहविरन्यपदार्थइतितुनयुक्तम्।तस्मिन्हुतशिष्टइन्द्रपीतस्याभावेनतस्यतदधिकरणत्वाभावात्। अती

तासुगोषुचित्रगुरितिव्यवहाराभावदिन्द्रेणपीतस्यनष्टत्वेनतमादायहविषंद्रन्द्रपीतइतिबहुव्रीहिणाऽव्यवहाराच्च।नचपूर्वपदप्रकृतिस्वरेणैवबहुव्रीहित्वनिर्णयइतितदर्थमधिकरणारम्भोवृथेतिवाच्यम्।इन्द्रेणपीतइतितृतीयातत्पुरुषेपितृतीयाकर्मणीत्यनेनपूर्वपदप्रकृतिस्वरस्यैवसत्वात् देवानामग्निमुखत्वेनेन्द्रायस्वाहेत्यादिमन्त्रेणाग्नौदाहस्यैवेन्द्रकर्तृकपानत्वान्नतदनुपपत्तिः।अतःपाधातोर्दानेनलक्षणेत्याश्रयात्।पूर्वपक्षेदानलक्षणायामपिचतुर्थ्यर्थेबहुलंछन्दसीतितृतीयान्तेनैवसमासाच्चप्रकारान्तरेणापिपूर्वपक्षोपपादनस्यकृतत्वाच्च।किंचदानलक्षणायामपीन्द्रायपीतइतिचतुर्थीसमासोदुर्लभः चतुर्थीतदर्थार्थेतिसमासस्यप्रतिपदोक्ततादर्थ्यचतुर्थ्यैवप्रकृतिविकृतिभावएवचप्रवृत्तेर्भाष्यसंमतत्वात्।साधनंकृतेत्यपिनचतुर्थीतदर्थेतिसूत्रेरक्षितग्रहणेनचतुर्थ्यन्तस्यतेनसमासाभावबोधनात्।तादर्थ्यचतुर्थ्याकारकविभक्तित्वाभावेनतत्रतेनसमासस्यदुर्लभत्वाच्च।किंचतेनसमासेपूर्वपदप्रकृतिस्वरेणैवबहुव्रीहित्वनिर्णयेऽधिकरणोच्छेदः।नचचतुर्थीतदर्थइत्यनेनतत्रापिपूर्वपदप्रकृतिस्वरइतिवाच्यम्।तस्यस्वरस्यापिप्रकृतिविकृतिभावएवप्रवृत्तेर्भाष्यसंमतत्वात्।प्रतिपदोक्ततादर्थ्यचतुर्थ्यन्तसमासएवतत्प्रवृत्तेश्च।प्रकृतेतुनतादर्थ्येचतुर्थीउपपदविभक्तेरितिन्यायात्।क्तेचेत्यत्रापितदर्थेइत्यनुवर्त्ततेगोरक्षितमित्येवतदुदाहरणंनतुगोहितमित्यन्यत्रनिरूपितम्।अतएवचतुर्थीतदर्थेत्यस्यप्रकृतिविकृतिभावएवप्रवृ

तौ सक्ते चेति ज्ञापकं भाष्योक्तं सङ्गच्छते। समासे शक्तिमनङ्गीकुर्वतां बहुव्रीहावप्यन्यपदार्थे लक्षणा व्यधिकरणत्वात्। लट्टीत्वा पूर्वपदस्य विभक्त्यर्थान्तर्भावेण लक्षणेति तत्पुरुषाद्विशेषः। न च दानार्थकपाधातोर्भावक्तान्ताद् दृष्टे अद्य विपीतइन्द्रोऽस्येति बहुव्रीहिर्दानसंबन्धीन्द्रसंबन्धिन इति बोधः आहिताग्न्यादित्वात्पीतशब्दस्य परनिपात इति न बहुव्रीहौ लक्षणा इयमिति वाच्यम्। धातोः सकर्मकस्य भावे क्तस्यासंभवात्। अनुपपत्तिप्रतिसंधानमूलकत्वयेवं विधेष्वपि दूषकस्य नायालक्षणातोऽपि दुष्टत्वाच्च। तदुक्तं जैमिनिना। सर्वेषां वैकमन्त्र्यमैतिशायनस्य भक्तिपानत्वात्सवनाधिकारो हीति भक्तिपानत्वादित्यनेन तत्पुरुषनिराकरणं दानलक्षणानिराकरणं च। सवनाधिकारो हीत्यनेनान्यपदार्थप्रदर्शनम् अतस्तत्सवनसंबन्धिनां सर्वेषामैन्द्राणां अनैन्द्राणां च हविषां समन्त्रकं भक्षणं यथाम्नानमेक एव च मन्त्रः सर्वत्रेति तदर्थ इति तन्त्राष्यादौ स्पष्टमित्यलम्। उपदशाः दशानां समीपे ये सन्तीति विग्रहः अत्रायं समीपसंख्यावत्परः दशपदार्थस्य स्ववृत्तिदशत्वसमीपसंख्यासंबन्धेनान्वयः दशसमीपसंख्यावन्त इति बोधः ईदृशसंबन्ध एवास्य साधुत्वं शब्दशक्तिस्वभावात् संख्ययाव्ययेत्यादिसूत्रबलाच्च। अतएव नवैकादशवा नेन प्रत्याख्यानेन तु दशानां रक्षादीनां समीपे येगवाद्यस्ते प्रत्याख्यन्ते एवं नासन्नाविंशादूरात्रिंशा इति व्याख्यातम्। द्वौ वा त्रयो वा द्वित्राः अत्र वा शब्दो विकल्पार्थकः अत्र कार्यो विकल्पो न तु शब्दादौ येऽतः शब्दान्नियमेन बहूनामुपस्थिते नित्यबहुवचनान्तता अत्रापि एककालं समभिव्याहृतान्वयिपदार्थसंबन्धत्वरूपो विरोधो भासते प्रायोयमेव सर्वत्र विरोधो वार्थः क्वचिदेकाधिकरणावृत्तित्वरूपः यथा शब्दो नित्यो न वेति विप्रतिपत्ति-

वाक्ये।तस्यशब्दोनित्यत्वविरुद्धानित्यत्ववानित्यर्थः क्वचिदेककालावृत्तित्वरूपोविरोधोयथाव्रीहिभिर्यजेतयवैर्यजेतेत्यादौवा
शब्दंविनापितात्पर्यवशाद्देवदत्तोवामेनाक्ष्णापश्यतीतिवदेकविशेषविधेर्विशेषान्तरनिषेधफलकत्वान्निरपेक्षत्वलाभेनस
मुच्चयासंभवाद्विकल्पोबुध्यतेसचसमभिव्याहृतकारकविशिष्टक्रियायांभिन्नकालिकत्वरूपः अत्रव्रीहिभिर्यवैर्वायष्टव्यमितिप्र
श्नवाक्यंयागत्वावच्छेदेनयवनिरपेक्षव्रीहिकरणकत्वव्रीहिनिरपेक्षयवकरणकत्वसंशयपरमुत्तरमपितथैवपरन्तुतद्यागत्व
सामानाधिकरण्येनतत्परमित्याहुः।अन्येतूत्तरेवाशब्दोन्यतरार्थः एवंचद्वयोरपियागसाधनत्वादिच्छयैकतरग्रहणादैच्छिको
विकल्पः।इदमेवाभिप्रेत्यप्रश्नेवाशब्दःसर्वात्मनापक्षान्तरप्रतिक्षेपार्थः उत्तरेतुस्वप्राप्तिपक्षेतत्प्रतिक्षेपार्थइतिप्रवादः।द्वित्राइत्य
त्रापिद्वित्वमन्यतरद्वस्यर्थः अन्यतरत्वमुपात्तेतरव्यावृत्तैकत्वरूपंतच्चक्वचिद्व्यक्तिगतंक्वचिद्धर्मगतंतात्पर्यवशात्।यत्तुस्वभिन्नभे
दस्यवान्यतरत्वमितितन्न।घटपटान्यतरमानयेत्यादितःकदाचिदुभयस्याप्यानयनापत्तेः तद्भिन्नभेदस्यप्रत्येकंघटपटयोरिवसमु
दितयोरपिसत्त्वादित्याहुः।तन्नधर्मगतमेकत्वमितिपदार्थः पदार्थेनेतिन्यायविरुद्धमितिद्वित्वमन्यतरेत्यर्थकथनमसङ्गतम्।किंच
द्वित्राइत्यादौनित्यबहुवचनान्तत्वानापत्तिः अन्यतरत्वेनानेकबोधेतुघटपटान्यतरमानयेत्यादौद्विवचनाद्यापत्तिरित्यन्ये।क्वचित्तू
द्देश्यतावच्छेदकावच्छेदेनपाक्षिकःसमभिव्याहृतार्थप्रतियोगिकाभावोपिवार्थः यथादीर्घोस्यदान्ताद्वेत्यादौ।शास्त्रीयव्यवस्थि

तविकल्पेतुउद्देश्यतावच्छेदकसामानाधिकरण्येनभावाभावबोधोलक्ष्यानुसाराद्व्यवस्था।स्थाणुर्नवेत्यादौसंशयात्मकज्ञानजन
केएकाधिकरणावृत्तित्वरूपोविरोधोवार्थः अन्यतरकोटेः सर्वथाबाध्यत्वात् अनेककोट्युपस्थितिरपिवाशब्दसमभिव्याहारादे
व।स्थाणुर्नेत्युक्तेस्थाणुभिन्नइत्येवप्रतीतेः।क्वचित्त्वेकाधेयानधिकरणत्वरूपोविरोधोवार्थः यथाघटेपटेवासौद्रव्यमित्यत्र।केचि
त्तुद्वित्राइत्यादौसंशयविषयत्वंवार्थः संदेहविषयद्वित्वत्रित्ववन्तइतिबोधः त्रित्वेनापिसंदेहविषयत्वाद् बहुवचनं शब्दोनि
त्योनवेत्यस्यापिनित्यत्वादिसंदेहविषयइत्यर्थःस्वसंशयज्ञापनायचतथोक्तिरित्याहुः।अपरेतुवाशब्दसमभिव्याहारेपरस्परप्रति
क्षेपकानेकधर्मवत्त्वंधर्मिणिगृह्यतेतदेवविषयनिष्ठंसंशयत्वं तदेववाशब्दवाच्यमिदमेवविकल्पितरूपतद्विषयकत्वाच्च
ज्ञानंसंशयः एवंचस्थाणुर्नवेत्यादौस्थाणुतदभावरूपः संशयइतिबोध्यम्।द्वित्राइत्यादौद्वित्रिरूपसंशयसाधनिकाक्रियेत्यादि
येत्याबोधः अतएवभवेद्यदाबहूनामानयनं तदाबहुवचनमुपपन्नम्।यदाद्वावानीयेतेतदानसिद्ध्यतीत्याशङ्क्य द्वौवेत्युक्तेत्र
योवेतिगम्यते।त्रयोवेत्युक्तेद्वौवेतिगम्यतेसेयापञ्चाधिष्ठानावागितिभाष्येउक्तम्।अन्येतरार्थोवाशब्दइत्याशङ्काशयः।कैय
टोपिविकल्पोवार्थइतिद्वित्रशब्दःकदाचिद्द्वयोर्वाचकइतिशङ्काशयमुक्त्वा संशयोत्रवार्थः नतुविकल्पः विरुद्धानेकविषय
त्वाद्विमर्शस्यपर्यायस्थितद्वित्वत्रित्वाधारवस्तुसंकलनयापञ्चाधिष्ठानत्वमुच्यतइतिआह। अनेकविषयत्वाद्अनेकवि

ग्रहरूपत्वात् विमर्शस्य संशयस्येत्यर्थः तत्र क्वचिद्द्वित्वस्य प्रमाणे नैका कोटिर्बाध्यैव। यत्र तु न तथा बाधकन्तत्रैव द्विकं पाक्षिकानु
ष्ठानं क्वचित् यथा व्रीहियवविषयो क्वचिद्व्यवस्थयेत्युक्तं संशयत्वस्य विषयनिष्ठत्वादेव संशयलक्षणपरे गोतमीये सूत्रे तद्वार्त्ति
ककृता संशयपदे विरुद्धत्वात् संशय्यते विषयोऽनेनेति करणव्युत्पत्तिर्दर्शिता विषयोऽत्र विशेष्यभूतः। अत एव प्रमाणप्रमेयेति
सूत्रे विषयभूतपदार्थेषु संशयस्य पाठः अत एव प्रमादयोर्ज्ञानभेदा न तत्रोक्ताः मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्याद
मुदाहरन्तु सेव्या नितंबा किमु भूधराणां किं वा स्मरस्मेरविलासिनीनामिति पद्ये च संशयो वाच्यो निश्चयो व्यङ्ग्य इति प्रकाशे उ
क्तम्। ससंदेहालङ्काराद्विकल्पालङ्कारश्च न तेन पृथगुक्तः। निश्चयान्तससंदेहालङ्कारेण गतार्थत्वादित्याहुः। द्विरावृत्ता दश द्विद
शः अत्र सुजर्थान्तर्भावेणावृत्तिक्रियान्तर्भावेण च द्विशब्दस्य वृत्तिविषये वृत्तिः आवृत्तिजन्मगणने च द्विशब्दो द्वित्वसंख्यावि
शिष्टोत्पत्तिकावृत्तिविषयाद्दशेति बोधः अन्यथा द्वित्वान्वयो न स्यात्। दशत्वसंख्यायाः संख्येयं प्रत्युपसर्जनत्वादेकत्वाच्च न त
स्यां तदन्वयः संख्येयेष्वपि न। विरोधात् न हि दश द्वौ भवन्ति। तदुक्तं हरिणा। न संख्यायां न संख्येये द्वौ दशेत्यस्ति संभवः। भेदाभावा
न्न संख्यायां न विरोधात्तदाश्रये इति। केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं केशाकेशि। अत्र क्त्वाप्रत्ययोऽध्याहृतस्थित्यादिक्रिया
मादाय बोध्यः ग्रहणकर्मत्वं च प्रत्यासत्त्या केशादिविशिष्टपुरुषयोरेव परस्परग्रहणादिरूपः कर्मव्यतिहारः समुदायशक्यो।

युद्धादिरूपक्रियायाः एवं च परस्परकेशाधिकरणकतद्धस्तरूपकर्मकग्रहणोत्तरकालिकस्थितिकर्तृपुरुषकर्तृकाक्रियेति बोधः। क्रियायुद्धादिरूपेति क्वचित्प्रकरणात्क्वचिद्युद्धादिवाचकपदसमभिव्याहारान्निर्णेयम्। यथा मुष्टं किमच्छत्रकदण्डताण्डवं भुजाभुजिक्षोणिभृतां दिदृक्षस इत्यादौ। एतेन कर्णाकर्णि प्रथितमयश इति व्याख्यातम्। कर्णाभ्यां कर्णाभ्यामाकर्ण्येदं प्रथितमित्यर्थः। एतेनायं समासो युद्धक्रियायामेवेत्यपास्तम्। इति बहुव्रीहिः। धवखदिरावित्यादावितरेतरयोगद्वन्द्वे उद्भूतावयवभेदः समूहः समासार्थः अत एव चार्थे द्वन्द्व इति सूत्रे भाष्ये चार्थे विधीयमानस्य द्वन्द्वस्य तद्वदेवालिङ्गसंख्यतासाम्यं च शब्दशक्तिस्वभावेन गुणवचनानामिवाश्रयतो लिङ्गवचनानीत्यनेन वा परिहृतम्। बहुव्रीहावन्यपदार्थस्येवात्रापि चार्थस्यैव प्राधान्यौचित्यात्। अत एव गोस्त्रियोरिति सूत्रभाष्ये कुक्कुटमयूर्यावित्यत्र द्वसमार्थैक्यद्वन्द्वे प्रतिषेधो वक्तव्य इत्युक्तं समासार्थेऽवयवार्थस्याप्राधान्यात्प्रथमानिर्दिष्टत्वाच्चोपसर्जनत्वमिति कैयटेनोक्तं प्रमाणप्रमेयेत्याद्यसूत्रे न्यायभाष्यकारोऽपि चार्थे द्वन्द्वः समास इति। अतः सर्वे एते प्रमाणाद्यो विज्ञेया इति सिद्धमिति वार्त्तिकं च। तेन हि समासस्य चार्थे वृत्तिः स्पष्टमुक्ता। तेन च समूहस्य ज्ञेयत्वलाभः अन्यथा समासान्तरे इव चकारघटितवाक्ये इव चात्रापि समासे कथं सर्वेषां ज्ञेयत्वलाभः अन्यथा समासान्तरे इव चकारघटितवाक्ये इव चात्रापि समासे कथं सर्वेषां ज्ञेयत्वलाभः स्यात्। एवं च पदाबोध्ये

CC-0. In Public Domain. Digitization by eGangotri

र्थेसमासस्यशक्तिरित्युक्तमेवेतिदिक्।पाणिपादमित्यादिसमाहारेत्वनुद्भूतावयवभेदःसमूहोविशेष्यइतिबोध्यम्।उद्भूतावयव
भेदत्वंचावयवगतसंख्याद्यारोपवत्वन्तद्विपरीतमनुद्भूतावयवभेदत्वमुभयत्रापिद्वन्द्वेसमूहोनावयवव्यतिरिक्तः।धवखदि
रंधवखदिरावितिस्वशब्दैरेवाभिधानात्अवयवातिरिक्तस्तुयूथंवनमितिशब्दान्तरेणैवोच्यते।एतेनेतरेतरयोगेतदनतिरेकेणभा
नंसमाहारेतुतदतिरेकेणेतिभेदइत्यपास्तम्।यत्तितरेतरयोगेसाहित्यंविशेषणंतच्चसमुदायशक्यंउत्तरपदलभ्यमितितुबहु
व्रीह्युक्तरीत्यानिरसनीयम्।समुदायलभ्यमितितुनयुक्तम्।उपपत्तिप्रतिसंधानंविनापिप्रतीतेः।समाहारेतुतद्विशेष्यंसाहित्यस्ये
तरेतरयोगद्वन्द्वेऽभानेतुद्वित्वाद्यन्वययोग्यतावच्छेदकसाहित्यमन्तरातदन्वयोदुर्लभःस्यात्।ननूपस्थितेर्योग्यएवतदन्वयनि
यमोनतुयोग्यतावच्छेदकोपस्थित्यपेक्षा।अतएवघटेनजलमाहरेत्यादौछिद्रेतरस्यैवयोग्यतयान्वयोनतुछिद्रेतरत्वप्रका
रकोबोधः नचघटाकाशादित्वादेःप्रत्येकावृत्तेःसमुदायावृत्तित्वेनाकाशेपिसत्वेनाकाशपदाद्द्विवचनाद्यापत्तिवारणायसं
ख्यायाअन्वयितावच्छेदकव्याप्यत्वविशिष्टसमवायसंबन्धेनप्रकृत्यर्थेन्वयेतेषांसाधुत्वमवश्यंवाच्यम्।अतएवैकोनद्वावित्या
द्युपपद्यते।द्वित्वान्वययोग्यतावच्छेदकोभयवृत्तिधर्मव्याप्यसमवायस्यप्रतियोगितावच्छेदकसंबन्धत्वात्।अन्यथाकेवलस
मवायस्यैकस्मिन्नपिसत्वेनतदनुपपत्तिः।समवायस्तुनानातस्यैकत्वेतुतद्व्याप्यत्वविशिष्टापर्याप्तिःसंबन्धोस्तु।एवंचधवखदि

रावित्यादौ साहित्यभानमावश्यकम्। अन्यथान्वयितावच्छेदकधवत्वखदिरत्वादिव्याप्यद्वित्वद्वयादिप्रतीत्यापत्तिस्तथा चैकै
कखदिरादितात्पर्येण तथाप्रयोगानुपपत्तिरिति वाच्यम्। घटद्वयवृत्तिद्वित्वस्य घटत्वव्याप्यसंबन्धेनान्वये एकघटाभिप्रायेणापि घ
टावित्यापत्तेस्तस्माद्द्वित्वं द्वयोरेव पर्याप्तमेको न द्वावित्यादिप्रतीतिबलात्पर्याप्तेः प्रत्येकावृत्तेरपि समुदायवृत्तित्वं स्वीकार्यं प्रत्येका
वृत्तेरपि वनत्वादेः समुदायेवृत्तित्ववत्। अन्तःकरणविशिष्टब्रह्मरूपजीववृत्तिजीवत्वस्य प्रत्येकावृत्तेरेव विशिष्टवृत्तित्ववच्चायं द्वा
द्वित्वादिसमवायस्यैव तादृशत्वमेको न द्वाविति प्रतीतेः समवायविषयताया एवानुभवाद् द्वित्वादिसमवायस्यैव च पर्याप्तिरिति
नामान्तरम्। अन्यथा साहित्यभानाङ्गीकारेऽपि तत्र प्रत्येकधर्मयोरेव संबन्धितावच्छेदकतया साहित्यद्वयबोधापत्तिरिति चेन्न। घट
द्वयादौ विभक्त्युपस्थाप्यसंख्यायाः प्रकृत्यर्थतावच्छेदकव्याप्यत्वदर्शनाच्चदुपस्थाप्यसंख्यात्वावच्छेदेनैव तत्त्वकल्पनेन द्वन्द्वे
तद्बोधकस्य पदार्थतावच्छेदकस्य साहित्यस्यावश्याभ्युपेयत्वात्। किं चान्वययोग्यतावच्छेदकधर्मवत्त्वेनोपस्थित एव द्वित्वादेः
साकाङ्क्षत्वात्तज्ज्ञानमावश्यकम्। किं च दत्तचैत्रौ पचत इत्यादावाख्यातोपात्तद्वित्वान्वयेऽन्वयितावच्छेदकत्वाभाय तज्ज्ञानमावश्यकमास्तु
नुपात्तद्वित्वमेव तथेति तु न युक्तं चैत्रो मैत्रश्च गच्छत इत्यादावनन्वयापत्तेः। चशब्दस्तु न द्वित्वबोधकः कोशभाष्यादावनुक्तेः। चार्थे द्वन्द्ववि
धानेन द्वन्द्वाच्चशब्दस्यैव द्विवचनस्याप्यनापत्तेश्चेति तन्न। प्रकृत्यर्थतावच्छेदकानेकधर्मावच्छिन्नान्वयेऽपि द्वित्वादेराकाङ्क्षायोग्यत

योःसत्त्वेनासत्तेःक्वचित्तस्याप्यप्रकृत्यर्थेतावच्छेदकव्याप्यत्वेपिसर्वत्रतत्त्वकल्पनेमानाभावात्त्वममतुनदोषः द्वित्वादिसंबन्धस्यप्र
त्येकावृत्तेरेवसमुदायवृत्तितास्वीकारात्समूहस्यविशेष्यतयाभानाङ्गीकारेणद्वित्वादेःसमूहएवभानात्।घटावित्यादावेकशेषेपि
द्वन्द्ववत्समूहएवविशेष्येतदन्वयः।किंचसाहित्यस्यविशेषणत्वेप्रमाणप्रमेयेत्यादौसर्वस्यज्ञेयत्वासिद्धिरेवसहितद्वित्यादिज्ञाने
पिशास्त्रार्थसिद्धेःपरस्परसहितानांसर्वेषांज्ञेयत्वमित्यस्यसमूहस्यविशेष्यत्वएवसिद्धेःएकस्याप्यज्ञानेसमूहाज्ञानात्।समूहस्यवि
शेषणत्वेप्येवमेवनह्यनेकघटपटराशौअस्यराशेर्घटंपटमानयेत्युक्तेदूमंसभिमानयेत्यतद्वसकलघटाद्यानयनंनियमेनप्रती
यते।अतएवसमासस्यालिङ्गासंख्यत्वादिशङ्कापरमुक्तभाष्यंसङ्गच्छते।तत्रत्वेतद्भाष्यंसमाहारविषयंतस्यवाचनिकलिङ्गैकवच
नयोःसत्त्वात्तस्याश्रयगतलिङ्गसंख्याग्राहित्वाभावाच्च।इतरेतरयोगपदेनचसमूहएवतस्याश्रयगतलिङ्गसंख्याग्राहित्वोक्त्याऽ
वयवतादात्म्येनभानंस्पष्टमेवोक्तम्।एतावतैवोभयपदार्थप्रधानोद्वन्द्वइतिव्यवहारःसमूहस्यावयवेभ्योभेदेनाप्रतीतेः।किंचदश
साध्योत्थापनकभारोत्थापनक्रियातत्कर्तृत्वंचप्रत्येकसंबद्धमपीतरसाहित्येनैवबुध्यतेतएवैकोनोत्थापयतिसमूहउत्थापय
तीतिचप्रयोगः।तत्राद्येएकशब्दोसहायपरः।एवंद्वित्वादिकमपिप्रत्येकसंबद्धमेव।इतरसाहित्यरूपसमूहबुद्धिश्चतद्व्यञ्जि
काइतरसाहित्यबुद्धिरेवापेक्षाबुद्धिःअपेक्ष्यते सापेक्षासमूहस्तद्विषयाबुद्धिरित्यर्थः।लोकेद्वावित्यादिप्रयोगेचैकशेषंविनापि

द्व्यादिशब्दानां समूहबोधकत्वमत एव द्वन्द्वैकशेषयोश्चार्थसमूहभानाङ्गीकारस्तद्ज्ञाने तद्बोधात्स्पष्टं चेदं सरूपसूत्रे भाष्ये। तस्य पूरणे इति सूत्रे भाष्येप्युक्तमन्योन्यं वाच्यमाश्रित्य सर्वस्मिन् द्व्यादयः प्रवर्त्तन्ते इति। अन्योन्यम्। अन्योन्यसापेक्षम्। वाच्यं संख्येयमाश्रित्य पूरणप्रत्ययान्तपञ्चमादिप्रकृतयः पञ्चादयः सर्वस्मिन्प्रत्ययवाच्यसहिते वर्त्तन्ते तत्र तत्संख्याश्रयसमूहस्य प्रकृतिवाचकास्तदन्तर्गतस्यैकदेशस्य प्रत्ययो वाचको यथा वार्क्षी शाखा वृक्षस्यावयव इत्यर्थः अनेन हि तत्तत्संख्यावत्वेन परस्परसापेक्षसमूहप्रतीतिः स्पष्टमेवोक्ता सर्व एव द्व्यादयोन्योन्यमपेक्षन्त इति च तत्रोक्तम्। तत्र समूह उद्भूतावयवभेद एव वाच्यः अत एव पञ्चादयो नित्यं बहुवचनान्ता एव ननु द्वित्वादियोनिरेकत्वं भेदास्तत्पूर्वका यतः। विना तेन न संख्यानामन्यासामस्ति संभवः। एकत्वेन विना द्वित्वादीनामुत्पत्त्यसंभवाद्द्वित्वादीनामेकत्वं योनिः कारणं तेन विनान्यासामसंभवं दर्शयितुं भेदा इति तत्पूर्वकाः अभेदमूलकैकत्वपूर्वका इत्यर्थः। तस्मादेकत्वमाद्यं द्वित्वादयस्तु पदार्थान्तरसंनिधौ तत्पूर्वका जायन्ते। तदेवाह एकत्वे बुद्धिसहिते निमित्तं द्वित्वजन्मनि। एकत्वाभ्यां समुत्पन्नमेवं वा तत्प्रतीयते। एकत्वद्वयविषया बुद्धिर्द्वित्वादेः कारणं तत्र द्रव्यस्यैव समवायिकारणत्वात्प्रत्यासत्त्यभावाच्चासमवायिकारणत्वासंभवेन तस्या निमित्तकारणत्वमेव। समवाय्यसमवायिकारणभिन्नसामान्यसमाख्यया निमित्तमित्युच्यते। यद्वैकत्वाभ्यामेव द्वित्वमुत्पन्नमेकत्वद्वयबुध्या तु तज्ज्ञानमेतदेव मीमांसकमतम्। द्वित्वादिस्वरूपे मतभेदमाह एकत्व

CC-0. In Public Domain. Digitization by eGangotri

समुदायोवासापेक्षेवापृथक्पृथक्।द्व्येकयोरितिनिर्देशेप्राप्तेरामस्तथासति।एकत्वाभ्यांनापूर्वंद्वित्वमुत्पाद्यतेकिन्तुतयोःसमु
दायएवद्वित्वम्।तत्रावयवाश्रयोभिन्नाकारावभासःसंघाश्रयश्चैकाकारावभासःयथावृक्षसमुदायोवनशब्देनोच्यतेतथैकत्वस
मुदायोद्वित्वशब्देनोच्यते।यद्वापरस्परापेक्षएकत्वेरावद्वित्वम्।अन्त्यंदूषयति   एकत्वद्वित्वपरेद्व्येकयोरितिनिर्देशे
एकत्वत्रयस्यद्वन्द्वविषयत्वाद्बहुवचनापत्तिस्तथाङ्गीकारेइत्यर्थः।तस्मादेकत्वाभ्यांजनितमन्यदेवसमुदायरूपेद्वित्वमेवंत्रि
त्वादयोपिइत्येवन्याय्यम्।ननुद्वित्वादेरेकत्वाद्द्वयोर्द्विवचनमित्याद्यनुपपन्नम्।तत्रोक्तम्।एकोपिगुणभेदेनसंघोभेदंप्रकल्पयेत्।
गुणाः   समूहावयवास्तेषांभेदेनस्वात्मनेएकस्यापिद्वित्वादर्भेदइतितदुपपत्तिरितिहरिणोक्तम्।ननुपङ्क्तिविंशतीतिसूत्रेभाष्येविंश
त्यादिषुप्रकृतिप्रत्यययोस्तदर्थयोश्चाज्ञानमितिप्रश्नेद्विशब्दादयंदशदर्थाभिधायिनःशतिच्प्रत्ययोद्वौदशतोविंशतिःविंशत्या
दयोदशदर्थेचेत्सामानाधिकरण्याभावेनविंशतिगवमितिसमासानापत्तिः।विंशतिर्गावइत्यस्यचासिद्धिः।दशतोर्द्वित्वात्द्विवच
नंचप्राप्नोतीत्युक्तेसिद्धान्तिनोक्तंसमुदायेएतेविंशत्यादयोभविष्यन्तिकथंसङ्घइतिवर्त्ततेनचप्राणिसमूहःसङ्घइतिवृक्षाणांविं
शतिरितिनसिद्ध्येत्।सङ्घःसमूहःसमुदायइत्यनर्थान्तरंद्वयोर्दशतोःसङ्घोविंशतिरिति।नचविंशकोगोसङ्घइतिनस्यात्।विंशतिश
ब्देनैवगोसङ्घस्योक्तत्वात्तत्रपरिमाणिनोड्वनानापत्तेरितिवाच्यम्।द्रव्याणान्द्रव्यसङ्घस्यदशतांदशत्सङ्घस्यदशतोगवांचपार

Nepal Sanskrit University, Balmeeki Campus Kathmandu

मार्थिकोभेदोनास्तिकेवलंबुद्ध्यापरिकल्प्यतेबुद्धिव्यवस्थापितार्थनिबन्धनाश्चशब्दाबुद्धिमेवार्थाकारामुपजनयन्तोऽसत्यपि
वास्तवेभेदेभेदमवगमयन्तीत्यदोषात्।दशतोःसङ्ख्येयत्वाद्विंशतिशब्दाद्व्यसङ्ख्ये·परिमाणिनिड्वुन्सिद्धेःवास्तवमभेदमादाय
सामानाधिकरण्यंचसिद्धंविंशतिर्गावइतिगवांदशतश्चतात्त्विकभेदाभावाद्गवामपिदशतसङ्ख्यागुणित्वेनगुणिनागुणविशेषणे
गवांविंशतिरितिषष्ठी·समुदायाभिधानेसमुदायस्यैकत्वादेकवचनंसिद्धम्।सामानाधिकरण्येपिविंशतिर्गावइत्यादौविंशति
संख्यासमुदितद्रव्यसमवायिनीनतुप्रत्येकंसमाप्तेतिगावोधनमित्यादिवत्तद्गतैकत्वस्यविशेष्येआरोपेणैकवचनसिद्धिरतए
वद्रव्यगतलिङ्गसंख्याननुवृत्तिः।प्राक्शतादेषांस्त्रीलिङ्गत्वमेकवचनान्तत्वंच।शतस्यतुनपुंसकत्वम्।विंशतीविंशतयइ
त्यादित्वेकशेषेसाध्येचेतिकैयटः।तदुक्तंभाष्येतएतेविंशत्यादयःसमुदायेसन्तोभाववचनाभवन्तिभाववचनाःसन्तोगुणवच
नाभवन्तिगुणवचनाःसन्तोऽविशिष्टाभवन्त्यस्मैगुणवचनेषुकदाचिद्गुणोगुणिविशेषकोभवतियथापटःशुक्लइतिकदाचि
द्गुणिनागुणोविशेष्यतेपटस्यशुक्लइतीतिभाववचनत्वंसंहननक्रियावचनत्वात्।गुणवचनाद्त्वस्यतत्त्वादृश्यात्तच्छब्दव्यव
हार्याइत्यर्थः।गुणवचनाःसन्तइत्यादिनातत्त्वादृश्योपपादनात्।अतएवगोविंशत्यादिषुषष्ठीसमाससिद्धिः।गुणवाचित्वेहिपूर
णगुणेतिनिषेधःस्यात्।मुख्यगुणत्वेनकैयटादिकृतोव्यवहारस्त्वसङ्गतएव।भाष्यविरोधात्।एवंचविंशतिद्रव्यसमुदायएवविंशति

त्वमिति भङ्ग्यन्तरेण प्रकृतिप्रत्ययविभागबोधनायोक्तम्। तथा च द्व्याद्योपि तत्तद्द्व्यसमूहवचना इत्युक्तमेव। असमूह एव चैकत्वम्। आहीत्सूत्रे भाष्येपि भेदमात्रं संख्या आहेत्युक्तं भेदो वैलक्षण्यमिति कैयटः एकत्वस्याभेदबोधकत्वाच्च याव्याख्यातम्। तदुक्तं हरिणा भेदाभेदविभागोपि लोके संख्यानिबन्धन इति द्वित्वादिभेदव्यवहारकृदेकत्वमभेदव्यवहारकृदिति हेलाराजः। विलक्षणविलक्षणसमूहरूपत्वं च द्व्यादेरप्याहुः। असमूहरूपत्वं चैकशब्द आह एवं च हरिणा कथमेकत्वं समुदायरूपत्वमुक्तमिति चेत्सत्यम्। परमतेन तथाभिधानात्। अत एवोपक्रमे संख्यावान्सत्त्वभूतोर्थः सर्व एवाभिधीयते। स धर्मो व्यतिरिक्तो वा तेषामात्मैव वा तथेत्युक्तम्। स धर्मः संख्यारूपो धर्मः व्यतिरिक्त इति वैशेषिकमते। तेषां हि द्रव्याश्रिता गुणरूपा संख्या। स्वमतमाह तेषामात्मैवेति तेषां सत्त्वभूतार्थानां समूहस्य समूहिभिरत्यन्तभेदाभावादात्मैवेत्युक्तं तस्मात्संख्यात्ववान्। असमूहरूपमेकत्वं समूहरूपं द्वित्वादि। तत्रैव संख्यात्वस्याप्यङ्गीकारेण समूहप्रत्ययापेक्षया विलक्षणः प्रत्यय उपपन्नः। एतेन पदार्थमात्रादनुपाधेर्विलक्षणप्रत्ययानापत्तिरित्यपास्तम्। संख्यात्वस्य समूहरूपत्वस्य चोपाधित्वाद्द्वित्रिपुञ्जराजादयः। तत्र द्व्यादावनुद्भूतावयवभेदः स संख्या तद्विपरीतस्तत्तदाश्रयः। यद्वा समूहत्वेनाधारता द्वित्वत्वेन चाधेयता संख्यागतैकत्वस्य तु विशेष्येनारोपः शब्दशक्तिस्वभावात्। दशशब्दस्य दशसंबन्धिसमूहबोधकः अनुद्भूतावयवभेदः सविशेष्यः समूहत्वेन च विशेष्यता संख्या च सर्वपदार्थभेदिका। त्वस्यापि भेदिका गुणक्रियादि

भेदिकाच। क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिकेत्युक्तेः एकविंशत्याद्योपि संख्यान्तराण्येव न संख्यासमूहः संख्याकार्याना
पत्तेः स्वाङ्ग-समुदायादौ स्वाङ्गादिकार्याभाववदित्यलम्। एवं चेतरेतरयोगे साहित्यं विशेषणमिति सूत्रभाष्याद्यसंमतम्। एतेनोप
स्थितधवखदिरयोरेव द्वित्वान्वयः एकक्रियान्वयित्वस्यैकबुद्ध्यवच्छिन्नत्वरूपस्य वा साहित्यस्य पश्चादेव भानेन तत्रवृत्तिकल्पनाया अ
नौचित्यात्। अन्यतरस्यान्यतरत्रान्वयविवक्षायां परस्परधवखदिरौ छिन्धीति तु न असामर्थ्येन समासाप्राप्तेः एकरूपेणैकविशेष्यान्व
यित्वरूपसामर्थ्यस्यैव द्वन्द्वनिमित्तत्वात् द्वित्वरूपैकधर्मावच्छिन्नयोरेकत्रान्वयस्यैवौचित्याच्च। कुतः सर्वो मृत्तिकेत्यादावेवंरी
त्या समासो नानभिधानात्। किं च नात्र द्वन्द्वः एकरूपेण तथान्वयाभावात् नापि तत्पुरुषस्तत्र तथासामर्थ्यग्रहणे मानाभावात्। चार्थे
द्वन्द्व इत्यस्य चार्थे सति यथा विशेष्यान्वयस्तथा विशेष्यान्वये सति द्वन्द्व इत्यर्थः। समर्थसूत्रे च तन्त्रेणोभयविधसामर्थ्यग्रहणं परं त्वव्य
वस्थितसमुच्चयान्वाचययोस्तु न समासोनभिधानात्। सोमेव सानावग्निमाद्धीयातामित्यादौ सहितयोरधिकारलाभस्तु यत्क चैकं
तदनया सहेति वाक्यादित्यपास्तम्। तदुक्तसूत्रार्थस्याशाब्दत्वाच्च। धवखदिरावित्यादौ प्रत्ययानां प्रकृत्यर्थान्वयित्वेन विभक्त्यर्था
नन्वयापत्तेश्च। संनिहितार्थबोधकत्वमिति तु बहुव्रीहिप्रकरणे दूषितम्। धवे द्वित्वानन्वयापत्तेश्चानुशासनिकसन्निधानग्रह
णेन यदुत्तरं यः प्रत्ययोनुशिष्टः स तद्घटकार्थतदर्थैतदन्यतरगतस्वार्थबोधक इति धवेप्यन्वयोस्मतादेर्नियामकत्वाच्चार्थेपि

CC-0. In Public Domain. Digitization by eGangotri

ल·मं· ष्यलौ राजपुरुषं पश्येत्यादौ न दोष इति वाच्यम्। युष्मदन्तरकल्पने गौरवाद् एकरूपेणैकक्रियान्वयित्वसमनियतस्य समस्यमान ५
३४ पदार्थसमूहभानानुरोधेन वृत्तेरावश्यकत्वाच्च। अत एवात्र विग्रहवाक्ये इव चादिप्रयोगो नेत्युक्तम्। चार्थे द्वन्द्व इत्यनेकमन्यप
दार्थ इतिवच्छक्तिग्राहकमेव। एतेन चार्थे द्वन्द्वस्यैकक्रियान्वयित्वरूपसाहित्ये सति द्वन्द्व इत्यर्थ इत्यपास्तम्। एकक्रियान्वयित्वे चश
ब्दशक्तेरभावाच्च। अग्नीषोमावित्यादौ समुदितस्य देवतात्वाद्यव एव सङ्गच्छते। न च चैत्रमैत्रौ गच्छत इत्यादावाख्यातोपात्तसंख्या
न्वयाय चार्थसमूहस्याविशेष्यत्वाय च सत्तद्वाचकत्वं वाच्यम्। एवं च चैत्रस्य मैत्रस्य च समूह इत्यत्रेव षष्ठ्यापत्तिरिति वाच्यम्। तदा
त्मकत्वेन समूह प्रतीत्या भेदनिबन्धनषष्ठ्यप्राप्तेः। स च समूहः क्वचिद्वास्तवः क्वचिद्बौद्ध इत्यन्यत्। पुष्पवन्तादिपदेऽपि समूहः शक्यो
त एव द्वित्वान्वयः। पुष्पवन्तावित्यस्य प्रकृतिस्थान्ताः दन्त्वावा एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरावित्यमरे द्वन्द्वेन पर्यायप्रदर्शना
त्पुष्पवन्तावित्यत्र द्विवचनोच्चारणाच्चैकयोक्त्येत्युक्तेश्च। समूहस्य शक्यतायाः स्पष्टमेव लाभात्। पुष्पवन्तपदं चन्द्रसूर्यसमूहे शक्तमि
त्याकारः शक्तिग्रहो। तेन न तत एकतरमात्रबोधो नापि शक्यानन्त्यम्। यत्तु भेदस्यार्थ इति तन्न। तद्बोधाननुभवात्। चेन क्वापि तदर्थप्रती
तेश्च। चार्थः साहित्यं परं भिन्नानामित्यन्यत्। शिवरामयोरभेद इत्यादौ तत्तदुपाधिकृतभेदवतोरेवोपाधिनिर्मोकेऽभेदप्रतिपादनान्न वि रा·म·
रोधः। समूहश्च समूहिभ्यो भिन्नाभिन्न इति निरूपितम्। सहिताभ्यां कृतमित्यादेः समूहबुद्धिविषयाभ्यां कृतमित्यादिक्रमेणार्थः। एव ३४

खदिरौ छिन्धि इत्यादौ क्रियान्वय एव समूहस्य क्रियोत्पत्तिस्तु समूहेऽसंभवात्प्रत्येकमेव। एवं पित्रो श्राद्धं कुर्यादित्यादावपि। द्वन्द्वे वाभिप्रेत्य तुल्यवदेकक्रियान्वयित्वं साहित्यमिति यथा तुल्ययोरेककालमेकधर्मसंबन्धानिमित्तकं तुल्यत्वं तद्विना तुल्यत्वासंभवात् तथैककालमेकक्रियान्वयित्वनिमित्तं साहित्यं समूह इत्यक्षरार्थः। समुच्चयान्वाचययोस्तु न समासः ईश्वरं गुरुं च भजस्वेत्यादौ समुच्चये एकस्यान्यसहितस्यान्वयित्वनिमित्तसाहित्येऽप्येकस्य केवलस्यैवैकधर्मावच्छिन्नेनान्वयेन चार्थेनैकसुबन्तस्यत्वस्यभावात्। एकधर्मावच्छिन्ने इत्युक्ते वस्तुतो भजनस्य भिन्नत्वेऽपि न दोषः। अत्रैकस्य केवलस्य क्रियान्वयोत्तरमपरस्यान्यसहितस्यावृत्त्या तदन्वयः स च विशेष्यतया विशेषणतया वा आद्ये देवः पचति हसति चेत्यादौ। अन्त्यस्तूक्ते समुच्चये चैत्रो मैत्रश्च पचतीत्यादौ नित्यमेकवचनान्ताख्यातप्रयोग एव। चरहितस्य केवलस्यैवान्वयात् चसहिते माप्यनुद्भूतावयवभेदसमूहस्यैव प्रतीतेः। किं चात्र समासे एकपदोपस्थाप्यसमूहस्यैक— कालमेवेतरान्वयस्य पुष्पवन्तादौ क्लृप्तत्वेन समुच्चयत्वस्यैव भङ्गापत्तिः। अत एव भिक्षामट गां चानयेत्यन्वाचयेऽपि न समासः। अत्र चकारसमभिव्याहृते आनुषङ्गिकत्वमितरसाहित्यं च भासते आनुषङ्गिकत्वं चान्यनिष्पादकयत्ननिष्पाद्यत्वमेवं च तद्व्याप्यत्वं फलति। एवं चानुषङ्गिकं भिक्षाटनसहितं गवानयनमिति बोधः प्रायेणान्वाचयश्च स्वक्रियान्वये भवति। यत्र तु क्रियान्वयेऽपि चद्वयं यथा पचन्ति च हसन्ति चेत्यादौ तत्र परस्परसाहित्यावगमान्नानुषङ्गिकत्वप्रतीतिः। ए

वंसमुच्चयेचसमभिव्याहृतस्यकिंचित्प्राधान्यंप्रतीयतेततएवसमकक्षयोरेकस्यसमुच्चेयत्वेदुःखंदृश्यते।इतरेतरयोगेतुमिलितस्यै
कधर्मावच्छिन्नेतरान्वयः।धवखदिरौछिन्धीत्यादौतथैवानुभवात्।मेलनंचसमूहरूपताअतएवतद्विग्रहवाक्येचद्वयप्रयोगः।तेनह्य
न्योन्यस्मिन्नन्योन्यसाहित्यङ्गम्यतेतेनसमूहरूपतासिद्धिः।अतएवचैत्रश्चमैत्रश्चपचतइत्यादौनित्यंद्विवचनाद्यन्ताख्यातप्रयोगएव।ए
कैकत्वेनद्वित्वादेर्विरोधेपिसमूहबुद्धिविषयगतनानैकत्वैरविरोधात्।एकधर्मावच्छिन्नेसुकेरजांग्रामंनयतीत्यादौनसमासः।क्वचि
देकचकारप्रयोगेपिप्रकारान्तरगृहीततात्पर्यवशात्परस्परसाहित्यावगतिर्भवत्येव।यथासांकाश्यकानांपाटलिपुत्रकाणांचपाटलिपु
ज्योप प इद्द
त्रकाअभिरूपतमाइत्यादौ।स्पष्टंचेदंद्विवचनविभक्त्येत्रेभाष्यकैयटयोः।एवंक्वचिच्चकाराभावेपितत्प्रतीतिर्यथाहरहर्नयमानोगाम
श्वंपुरुषंपशुमित्यादावहरहःपदसमभिव्याहारात्तत्प्रतीतिः।क्वचित्तुचद्वयसत्वेपिनतत्प्रतीतिःवाक्यालङ्कारमात्रार्थत्वात्तयोःय
थायदग्नयेचप्रजापतयेचेत्यादौ।मन्त्रलिङ्गेनतत्रप्रत्येकंदेवतात्वस्यैवप्रतीतेः।समाहारेतुद्वित्वावयवभेदःसमूहोविशेष्योतएवत
त्रैकवचनंसिद्धंद्वन्द्वश्चप्राणीत्यादिप्रकरणंतुनियमार्थमितिभाष्येस्पष्टम्।पाणिपादंवादयेत्यादौवादनकर्मत्वन्तुवस्तुतस्तस्यपाणि
पादाभिन्नत्वाद्बोध्यम्।यत्तुअत्रसमाहारोनभासतेद्विवचनादिस्यनुशासनेनासाधुत्वबोधनान्नेतितन्नसर्वत्रतद्बोधकानुशासनाभा
वात्।एकवचनविधायकाभावात्समाहारद्वन्द्वगर्भेतरेतरयोगेद्विवचनानापत्तेश्चेत्यलम्।स्यादेतदहरहर्नयमानोगामश्वंपुरुषंपशु

CC-0. Public Domain. Digitization by eGangotri

मित्यादौ इन्द्रो वरुणस्त्वष्टादित्य एते लोकपाला इत्यादौ च चार्थसंप्रत्ययेँ द्वन्द्वः प्राप्नोति चार्थे च शब्दस्य द्वन्द्वस्य चेत्युभयोरेव साधुता द्वन्द्वः शास्त्रेण बोधनात् आद्ये हरहरित्यनेनान्त्ये लोकपाला इत्यनेनेतरेतरयोगप्रतीतेः न तु युगपद्धिकरणवचने द्वन्द्व इति न्यासेन न दोषः अधिकरणं वर्त्तिपदार्थौ तयोर्युगपद्वृत्त्येनाभिधाने द्वन्द्व इति तदर्थः एवं च रामकृष्णावित्यादौ रामपदेन रामकृष्णयोः कृष्णपदेन च तयोरभिधानाद्भवति द्वन्द्वः। गामश्वमित्यादौ तु गवादयो भिन्नैः शब्दैरेकैकरूपा एव पृथक्प्रत्याय्यन्त इति न दोषः विरूपाणामित्येकशेषस्तु नात्र द्वन्द्वविधिः सामर्थ्येन समानार्थानामिति सामर्थ्ये न च युगपदधिकरणतां विनापि समानार्थतायामेवैकशेषात् पद्वीमृद्यावित्यत्र पुंवत्त्वमपि न वृत्तेः प्रागपि तत्र सामानाधिकरण्यं यतन्नैव तत्प्रवृत्तेः सहभूतयोरेव युगपदर्थद्वयबोधसामर्थ्यमिति नान्यतरवैयर्थ्यं द्वन्द्वविषये चैतदतः केवलरामपदाद्रामं कृष्णं चेति वाक्यघटकाच्च नोभयबोधः। वेदे तु क्वचिद्वाक्येपि सा द्यावा ह क्षामेत्यादौ। एकैकेनार्थद्वयाभिधानेपि तिष्यपुनर्वस्वोरिति सूत्रस्य बहुवचनस्येत्यनेन सर्वो द्वन्द्वो विभाषैकवद्भवतीति ज्ञापनात् पक्षे धवखदिरमित्यादिसिद्धिरिति चेन्न। सेयं युगपदधिकरणवचनता दुःखादुरुपपादा चेत्यादिना भाष्ये एव तस्या दूषितत्वात्। तत्र दुःखत्वं प्रतीतावनुपारोहात्। तथा हि वृद्धव्यवहाराद्धि शब्दार्थनिर्णयः न च प्लक्षशब्दस्य न्यग्रोधाभिधायित्वं लोके दृश्यते न च प्लक्षशब्दस्य लक्षणा न्यग्रोधशब्देनैव तल्लाभाद्द्विवचनाद्यन्तप्रयोगस्यान्यथासिद्धेश्च समूहस्यावयवापेक्षत्वादिमतः समुदायाप्रतीतेः दुरुपपादत्वस्य दुष्टत्वं निःसारमुपपादनं च

स्याः सा निष्क्रमाणेत्यर्थः। नन्वघा वा हस्ता मेत्यादौ व्यासे दर्शनात्समासेपि सेति वाच्यम्। तस्य च्छान्दसत्वेन तत्र सुपां सुपद्‌स्येव सिद्धेः। न च समा
साद्द्विवचनबहुवचनोत्पत्त्यर्थं तदावश्यकता। पूर्वमुपपादितत्वात्। समुच्चयान्वाचययोः समासाभावार्थमपि न सा। उक्तरीत्याऽसामर्थ्ये
नैव तत्र समासवारणात्। आङ्ग·श्च वाङ्ग·श्च कालिङ्ग·श्चेति अङ्ग·वङ्ग·कलिङ्गा इत्यादौ तद्राजस्य बहुषु तेनैवास्त्रियामिति लुक्तु तद्राजप्र
त्ययार्थसमूहगतबहुत्वविवक्षायां तद्राजप्रत्ययस्य लुगित्यर्थोक्तं विनापि सिध्यतीति चेत्सत्यम्। चेन कृतस्यार्थस्याभावात्समासाप्राप्ते
रिति भाष्य एव समाधानात्। यत्र विग्रहे चेन बोध्यं साहित्यं तत्रैव द्वन्द्वो न चात्र तथा। अहरहरादिपदसमभिव्याहारेण तस्य तत्र बोधेपि
चकारबोध्यत्वात्। उक्तार्थत्वाच्च तत्र चकाराप्रयोग इति दिक्। उपदशं दन्तोष्ठम्। दशसमीपे दन्तोष्ठसमाहार इति बोधः समाहारे दशस
मीपत्वं च स्वरवृत्तिदशत्वसंख्यासमीपसंख्यावदवयवकत्वेन। अत्र बहुव्रीहेर्नानुप्रयोगस्तस्य नित्यबहुवचनान्तत्वेन दन्तोष्ठमित्यने
नान्वयायोग्यत्वात्। इति द्वन्द्वः। घटावित्यादावपि घट इत्यादिसमूहो घटशब्दाद्यर्थः एकशेषात् एकशेषविधायकं च सरूपाणामेक
शेष एकविभक्ताविति सूत्रम्। तच्च द्वन्द्वे इत्यनुवर्तनाद्द्वन्द्वविषयम्। तेन तत्र शिष्टस्य शिष्यमाणं लुप्यमानार्थाभिधायीति न्यायेन
लुप्यमानार्थवृत्तिता समूहवृत्तिता चात एव तत्र द्वित्वाद्यन्वयः। ननु तन्त्रेणैवेदं सिद्धं तथाहि द्विविधं तन्त्रं शब्दतन्त्रमर्थतन्त्रं चात
त्र केचिद् अर्थभेदाच्छब्दभेद इति मते सकृत्ताल्वोष्ठपुटव्यापारादिनिगमनाविरहेणानेकशब्दानां भेदापह्नवेनोच्चारणमित्याद्यः। तन्त्रत

दर्थान्वयिसमभिव्याहृतैकपदप्रयोगे तत एव तात्पर्यग्राहकात्प्रायः प्रातिपदिकानामेव तन्त्रमिति श्रोतुरप्येकवृन्तगतानेकफ
लन्यायेनानेकशब्दैकानुसंधानेन कर्मत्वादिविशिष्टैनानेकार्थसमूहबोधः यथा ग्रान्यघ्नेत्यादौ। विद्वन्मानसेत्यादावेकशब्दस्यैका
नुसंधानेनैवानेकार्थबोधः समस्ततयैकदेशस्यानेकस्यैकानुसंधानासंभवात्। यद्वा तत्राप्यस्त्वनेकस्यैकानुसंधानमेव। विद्वन्मान
समानसेति। यत्र तु सुखिते दुःखिते चेतसि दवदहनराशिस्तुहिनदीधितिरित्यादावेकानुसंधानेन विरुद्धार्थयोर्युगपद्बोधासंभवस्त
त्र वक्त्रा श्रोतुः शब्दद्वयानुसंधानद्वयं भवत्विति तात्पर्येणैकोच्चारणेऽपि श्रोतुरनुसंधानद्वयेन क्रमेण बोधादावृत्तिरिति व्यवहारः। एवं च
तत्र श्रोतुः शब्दावृत्तिर्वक्तुस्तु तन्त्रेणोच्चारणमिति बोध्यम्। एवं चेदृशे विषये तन्त्रावृत्त्येकशेषाणामन्यतममस्त्विति ग्रन्थास्त्रयाणामै
च्छिकविकल्पपरतया प्रवृत्ताश्चिन्त्या एव। घटं पटं चानयेत्यादावपि समुच्चयार्थकचशब्देन क्रमेण बोधे तात्पर्यात् श्रोतुरावृत्तिरेव।
अक्षा भज्यन्तां भक्ष्यन्तां दीव्यन्तामित्यादौ समभिव्याहृतानेकपदप्रयोगरूपात्तात्पर्यग्राहकाद्विभक्त्यन्तानामेव तन्त्रं बहुत्ववतान्त
तत्कारकशक्तिमतां भिन्नभिन्नक्रियान्वयितया बोधेन श्रोतुरनेकानुसन्धानाद्बोधदृष्ट्यावृत्तिरेव। प्रातिपदिकतन्त्रमेव तु नात्र एक
क्रियाद्यन्वये एव तस्य सत्त्वात्। तदुक्तं वृद्धैः सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति सकृदर्थमित्यादेरेकवारमेव प्रतीतिं जनयतीत्यर्थः सा च
प्रतीतिरेकार्थविषयानेकार्थविषया वेत्यन्यत्। गङ्गायां मीनघोषावित्यादावनेकार्थस्य युगपदुपस्थितेः यत्तु सकृदर्थमित्यस्यैकमर्थं

बोधप्रतीत्यर्थइतितन्त्र।क्रियाभ्यावृत्तिगणनइत्यधिकारेएकशब्दात्सुच्तस्यसकृदादेशश्चेत्यर्थेकेनेकस्यसकृच्चेतिसूत्रेणनिष्पन्नस्यसकृच्छब्दस्योक्तार्थकत्वाभावात्।एकवारमित्यर्थकत्वाच्च।अतएवसर्वादिसूत्रेतेनसूत्रेणसर्वादीनांसर्वनामसंज्ञाविधीयतेयेसर्वादयस्तेसर्वादयइतिगणपाठश्चविशेष्यतेइत्युक्तासकृदुच्चरितइतिव्युत्पत्तिमूलकतयाकथंपुनरेकेनयत्नेनोभयंलभ्यमित्याशंक्यैकशेषनिर्देशादितिसमाहितम्।वक्त्रैकशेषेणोच्चारणादित्यर्थकेनैकशेषनिर्देशादित्यनेनवक्तुःशब्दद्वयस्यबुद्धिस्थतयाबोद्धुःश्चैकशब्दद्वयज्ञानंभवत्वितिवक्तृतात्पर्यंदर्शितंत्वस्यलक्ष्यानुसारात्।श्रोतुर्ग्रहदृशितद्बलेनपुनरनुसन्धानादर्थद्वयप्रतीतिरितितदाशयः।एतेनसतितात्पर्येएकशब्दज्ञानेनापिसमूहालम्बनविधयोपस्थितानेकार्थानामनेकैःसंबन्धिभिःसमूहालम्बनात्मकोन्वयबोधइत्यक्षाभज्यन्तामित्यादौविनाप्यावृत्तिंबोधइत्यपास्तंतथानुभवाभावात्।उक्तभाष्येएकेनाप्युभयंलभ्यतइतिसमाधानानुक्त्यातथारीत्याबोधेउक्तप्रयोगस्यासाधुत्वबोधनाच्च।शब्दसारूप्यंचतन्त्रबीजम्।अर्थभेदेपिशब्दैक्यमितिनयेताल्वोष्ठपुटव्यापारप्रकाशितैकशब्देनैकवृत्तिगतानेकफलन्यायेनानेकार्थसंबद्धेनानेकार्थबोधादर्थतन्त्रमित्याहुः।वस्तुतस्तुअक्षादिस्थलेउपपत्त्याशब्दभेदेऽपिलोकानांनभेदप्रतीतिःपटादिरूपस्यापिनभेदःअर्थभेदाभावात्।बोद्धृभिरनेकशब्दज्ञानाननुभवाच्च।एवंचमतभेदेनशब्दतन्त्रार्थतन्त्रयोरुपपत्तिर्नयुक्तातस्मान्मतद्वयेपिशब्दस्यपरिवृत्त्यसहत्वेशब्दान्वयव्यतिरेकावादायशब्दतन्त्रंतस्यपरिवृत्तिसहत्वे

CC-0. In Public Domain. Digitization by eGangotri

र्थंतच्चम्।उभयत्रापिसकृदनुसंहितैकशब्देनयुगपदनेकार्थबोधः।अक्षान्पश्येत्यादावाद्यंपदान्पश्येत्यादावन्त्यम्।अक्षाभज्यन्ताभक्ष्यन्ता
मित्यादावावृत्तिः।किंचप्रत्यर्थंशब्दनिवेशेनेकार्थबोधनायानेकशब्दप्रयोगेप्राप्तेएकशेषारम्भइतितत्सामर्थ्यादेकस्यानेकार्थत्वंवाच्य
म्।एवंचलोकतएवैकस्यानेकार्थत्वेसिद्धेशास्त्रंव्यर्थंनह्यसतीबोधकत्वशक्तिःशास्त्रेणोत्पाद्यतेइतिशक्यंवक्तुम्।नचैवंप्रत्यर्थंशब्द
निवेशहानिःस्वस्वार्थप्रत्यायनेनैवप्रत्यर्थंशब्दनिवेशस्वीकारात्।अर्थावर्थौप्रत्यअर्थानर्थान्प्रतियत्तदपिप्रत्यर्थमेवेतिभाष्यात्।अर्थ
भेदाच्छब्दभेदइत्यस्यापिस्वस्वार्थभेदात्तच्छब्दभेदइत्येवार्थः यथार्थद्वयबोधकवृक्षादिशब्देभ्योबह्वर्थप्रतिपादकवृक्षादिशब्दाभि
न्नाःसर्वथैकशेषसूत्रंव्यर्थमितिचेन्न।अर्थमर्थंप्रतियत्तस्यापिप्रत्यर्थत्वेनघटघटावित्यादिवारणार्थंसरूपाणांद्वन्द्वविषयेएकशे
षएवेतिनियमार्थत्वात्।द्वन्द्वविषयेइत्युक्तेर्व्यपेक्षायांचकारगर्भवाक्यसिद्धिः।एवंचप्रातिपदिकतन्त्रंसहविवक्षाविषयमेवतन्त्रै
कशेषव्यवहारोमुख्यःअसहविवक्षाविषयेविभक्त्यन्ततन्त्रेएकशेषव्यवहारोगौणःयथासर्वादिसूत्रेभाष्ये।एकशेषविषयेतुद्भूता
वयवभेदसमुदायस्यनकदापिविशेष्यतानभिधानात्।अतएवनपुंसकमनपुंसकेनेतिसूत्रेएकवच्चास्यान्यतरस्यामितिचरिता
र्थद्वन्द्वस्यानभिधानमाश्रित्यतुसूत्रंप्रत्याख्यातमाकरेएतदेवाभिप्रेत्यतन्त्रत्वमेकरूप्येणभवेत्तुल्योपकारतः।उपकारान्यथात्वे
तुभवेदावृत्तिलक्षणमितिमीमांसकाः।तत्रशब्दविषयेतुल्योपकारतइत्यस्यतुल्यकालमुपकारतोन्वयतइत्यर्थः।विद्वन्मानसेत्या

ल॰सं॰ दौपरस्परान्वयेपिमानसाभिन्नमानसाधिकरणकहंसेतियुगपदेवबोधात्तदुक्तिः कदाचित्तत्र पृथक्प्रयोगोपि विद्रुमानसमा ५
३८ नसेति सारवसारवोर्मिजइतिवत्। उपकारान्यथात्वंभिन्नकालमन्वयस्तेनक्रमेणबोधेआवृत्तिरित्यर्थः एकरूप्येणेत्यनेनशाब्दसारू
प्यंतत्त्वबीजमुक्तम्। क्रिययोरपिसारूप्यमेवतत्त्वबीजंक्रियाविषयंतत्त्वादेरेवेदंलक्षणमित्यन्ये। नब्राह्मणंहन्यात् घटमानयेत्यादौ
जातेः प्राधान्येनानेकव्यक्तिबोधेप्येकवचनम्। एकशेषवृत्तिव्यवहारस्तुवृत्त्यपवादत्वेनगौणः पृथगर्थानामेकार्थीभवनरूपैका
र्थीभावस्यात्राभावात्। शुद्धव्यक्तौस्वसंबन्धेनव्यक्तिप्रकारकएवशक्तिग्रहस्तस्याएवचशब्दतोबोधइतिमतेएकशेषसूत्रस्योक्तिसं
भवोबोध्यः। जातिः शब्दार्थस्तदुपलक्षितंद्रव्यंशाब्दार्थइत्यादिमतेतुतज्जात्यनुगतीकृतानेकव्यक्तिबोधस्यैकस्मादपिसंभवेनानेकश
ब्दप्रयोगाप्राप्त्यासूत्रस्योक्तिसंभवएवनास्ति। अक्षाइत्यादौजातिष्वपिजात्यन्तराङ्गीकारेणतस्याएवशब्दवाच्यत्वेननदोषएतेनडि
त्थाइत्यपिव्याख्यातम्। यद्वानेकेष्वक्षशब्देष्वक्षशब्दत्वंनामसामान्यमभिन्नप्रत्ययाभिधानहेतुस्तच्चशब्दार्थयोः सोयमित्यभेदाध्यव
सायाद्व्यस्ताक्षशब्देषुसंज्ञिषुवर्ततइतितद्वैशिष्ट्येनानेकप्रतीतिः। एवमेवगोत्वाश्वत्वेसामान्येइत्यपिसिद्धम्। सकलसामान्येषुसा
मान्यत्वंजातिरूपमस्ति। निःसामान्यानिसामान्यानीतिचतार्किकदर्शनंननियोगतोवैयाकरणैरास्थेयमितिकैयटः। अभावाश्वत्वार रास॰
इत्यादावपिनिरूपाख्यत्वंतत्त्वमनियतमभावत्वंवासामान्यंबोध्यम्। सूत्रारम्भेप्येषैवबोधप्रक्रियातोनप्रत्याख्यानेफलभेदः। ब्रा ३८

ह्मणश्च ब्राह्मणी च ब्राह्मणावित्यादौ पुमान् स्त्रियेत्यादिनैकशेषः अत्र च पुंस्त्वस्त्रीत्वाभ्यां ब्राह्मणत्वजात्याश्रययोर्बोधः न च तत्रापि तज्जा
तिसत्त्वे ब्राह्मणीवधेऽपि ब्रह्मवधोक्तप्रायश्चित्तापत्तिरिति वाच्यम्। उत्कृष्टापकृष्टब्राह्मणवधे द्वैतद्वधे तस्य वाचनिकत्वात्। एवं शिवौ
भ्रातरौ पुत्रौ श्वशुरावित्यादौ द्रष्टव्यमिति केचित्। भाष्यानुसारिणस्तु स्वस्रादिष्वप्येकशेषविषयभ्रातृत्वं द्रष्टव्यमिति भ्रातृपुत्रावि
ति सूत्रभाष्योक्ते भ्रातरावित्यादौ भ्रातृत्वेनैव स्वस्रादिबोधस्तस्यान्तत्वारोपात्। पितरावित्यादौ पितृत्वादेर्मातर्यारोपेण पितृत्वादिनै
व मात्रादिव्यक्तेर्बोधः प्रकरणादिवशाच्च विशेषावसायः कदाचित्पितृद्वयस्यापि ततः प्रतीतेः। गार्ग्यावित्यादावपि यूनि गर्गगोत्रत्वा
रोपेण तेनैव रूपेण यूनोऽपि बोधः ब्राह्मण्यावित्यादितौ ब्राह्मणत्वेनैव ब्राह्मणीबोधस्तद्रूपारोपात् न तु तत्तद्रूपेणानुभवविरोधात्। ए
कत्र क्लृप्तशक्तिकस्यार्थान्तरे वृत्तिकल्पने गौरवाच्च। पिताभ्रातेत्यादितस्तु न तथा बोधः। एकशेषविषय एव तेषां स्वप्रवृत्तिनिमित्ता
रोपेण मात्रादिबोधकत्वस्य शब्दशक्तिस्वभावसिद्धत्वात् भाष्यात्तथैव लाभाच्च। सूत्रमतमप्येवमेव। सूत्राणि तु द्वन्द्वनिवृत्त्यर्थानी
त्याहुः॥ इत्येकशेषः॥ घटमिच्छति घटीयति देवदत्त इत्यादौ क्यजर्थ इच्छा, एकदेवदत्तकर्तृका स्वसंबन्धिघटकर्मिकेच्छेति
बोधः स्वसंबन्धित्वादिभानं शब्दशक्तिस्वभावात् महान्तं पुत्रीयतीत्यादि तु न असामर्थ्यात्। सुप आत्मनः क्यजिति सूत्रेणैषि
तृसंबन्धीच्छा कर्मवाचकादिच्छायां क्यजित्यर्थकेनात्र क्यचूतस्य पदविधित्वं स्पष्टमेव। पुत्रकाम्यतीति काम्यजन्तेऽप्येवमेव। विस्तू

ल·मं·
३९

यतिद्विजमित्यादौउपमानवाचकात्कर्मणआचारेक्यजित्यर्थकेनोपमानादाचारइत्यनेनक्यच्उपमानत्वमत्राचारनिष्ठमेवप्रत्या ५
सत्तेः।चैत्रकर्तृकोद्विजकर्मकोविष्णुकर्मकाचारसदृशआचारइतिबोधःतत्रप्रत्यासत्याविष्णुकर्मकाचारोपिचैत्रादिकर्तृकएव।कृष्णा
यतेचैत्रइत्यत्रकृष्णइवाचरतीत्यर्थेक्यङ्·अत्रकृष्णकर्तृकाचारसदृशश्चैत्रकर्तृकआचारइतिबोधःविष्णुद्विजयोःकृष्णचैत्रयोश्चोप
मानोपमेयभावआर्थः।अन्येतुउपमानत्वंकर्माद्यन्तरनिरूपितंकर्मत्वादिचाचारनिरूपितंप्रत्यासत्तेस्ततएवचाचारस्यसाधारणध
र्मत्वम्।तदुक्तंसुपआत्मनइत्यत्राकरेआचारक्यजन्ताद्युपमानकर्माद्यन्तर्भूतमुपमेयकर्मादिनासकर्मकत्वंसकर्तृकत्वंचेति।एवंचो
पमानविष्णुकर्मकआचारउपमेयद्विजकर्मकइत्यादिरीत्याबोधइत्याहुः।सुपर्वभिःशोभितंत्रिविष्टपंभारतायतेइत्यादौश्लेषेणाभेदबु
द्धेरिवशब्दरूपसाधर्म्येणसादृश्यबुद्धेरप्युपपत्तिर्बोध्या।अत्रसर्वत्रपद्विधित्वेनैकार्थीभावसामर्थ्यएवसाधुत्वात्सुन्दरःकृष्णायतइ
त्यादिन।शब्दशक्तिस्वभावाच्चप्रकृत्यर्थस्यापिसाध्यत्वेनभानात्।व्याकरणस्यसूत्रंकरोतीतिवाक्येसंबन्धेनान्वितस्यापिव्याकरणस्यव्या
करणंसूत्रयतीत्यादौकर्मत्वंहेतुमतिचेतिसूत्रेइहव्याकरणस्यसूत्रंकरोतीतिवाक्येषष्ठीव्याकरणंसूत्रयतीतिद्वितीया।केनैतदेवंभव
तियोसौसूत्रव्याकरणयोरभिसंबन्धःसउत्सन्नेप्रत्ययेनिवर्ततेस्तिचकरोतेर्व्याकरणेनसामर्थ्यमितिभाष्यात्।मुण्डादिसूत्रेकेषांचिद्ग्र रामः
हणंसापेक्षेभ्योपिविधानार्थमित्याकराः।प्रातिपदिकप्रकृतिकणिचोपिसमर्थादेवोत्पत्तिःअतएवमहान्तंघटयतीत्यादिन।नचसूत्रम ३९

ब्दार्थस्य साध्यत्वेन भानेपि तदाश्रयेण कथं व्याकरणस्य कर्मत्वमिति वाच्यम्। सूत्रणानुकूलव्यापारार्थकस्य सूत्रयतेरखण्डत्वात्। मुण्डिसूत्र्यादयोसद्भिर्भागैरनुगताइव विभक्ताः कल्पितात्मानो धातवः कुड्डिचर्चिवद् इति हर्युक्तेः। विभक्ताः अन्वाख्याताः कल्पितात्मानः। वस्तुतः कुड्डिप्रभृतिवदखण्डा एवैते अयं त्वन्वाख्यानोपाय एवेति भावः। तदाह। पुत्रीयतौ न पुत्रोस्ति विशेषेच्छा तु तादृशी। विनैव पुत्रानुगमाद्यापुत्रेप्यवतिष्ठते। प्राणैर्विना यथा धारिर्जीवतौ प्राणकर्मकः। न चात्र धारिर्न प्राणा जीवतिस्तु क्रियान्तरम्। तथा विनेषिपुत्राभ्यां पुत्रीयायां क्रियान्तरम्। क्रियान्तरत्वमित्यर्थः। अन्वाख्यानाय भेदास्तु सदृशाः प्रतिपादका इति। भेदाः प्रकाराः सदृशाः पृथग्भूतपुत्रादिसदृशाघटिताः प्रतिपादकाः अखण्डधात्वन्तरस्येति शेषः। अन्वाख्यानाय। तस्यैव बोधनाय कल्पिता इति शेषः। तदुक्तम्। अर्थस्यानुगमं कंचिद्दृष्ट्वा च परिकल्पितम्। वाक्ये पदं पदे धातुर्धातौ भागश्च मुण्डिवत्। यथैव डित्थे डयतिः पाचकेपि पचिस्तथा। डयतिश्च पचिश्चैव द्वावप्येतावनर्थकाविति। माणवकमात्मनः पुत्रमिच्छतीतिवन्माणवकं पुत्रीयतीत्यादि तु नानभिधानात्। तदुक्तं सुप आत्मन इत्यत्र भाष्ये। मुण्डयति माणवकमित्यत्र यथोभयोः करोतियुक्तत्वं यथा वा मुण्डीयति माणवकमित्यत्रोभयोराचारेण योगस्तथा माणवकं पुत्रीयतीत्यादावुभयोरिषियोगोपि स्यादित्याशङ्क्य नात्र व्यापारोनुगन्तव्योगमकत्वाद्भविष्यतीति। अगमकत्वादिच्छाक्यजन्ते तथा प्रयोगो नेति कैयटः। एवं च ओदनं पाकीयति ओदनस्य पाकीयतीत्याद्यप्यगमकमिति बोध्यम्। एवं प्रातिपदिकप्रकृतिकक्विबन्तेपि सः कर्तुः क्यङ् इति सू-

त्रेउपसंख्यानेनतत्साहचर्यात् अतएवसुंदरः कृस्तीत्यादिना। सन्नन्तेष्वेकार्थीभावसत्त्वेबीजमुक्तंप्राक्कृदन्तेष्वुपपदनिमित्तके
पदोद्देश्यकविधित्वेनैकार्थीभावः। अतएवतत्रोपपदमित्यत्रभाष्यउक्तम्। महान्तंकुम्भंकरोतीत्यत्राण्प्राप्नोतीतिनैतदस्ति। उपपदमिति
महतीसंज्ञाक्रियतेउपोच्चारितंपदमुपपदंयावताचेदानींपदगन्धोस्तिपदविधिरयंभवतिपदविधिश्चसमर्थानांभवतितत्रासाम
र्थ्यान्नभविष्यतीति। पाचकादावपिसः पाचकादिशब्दानांक्रियाप्रवृत्तिनिमित्तकत्वस्यभाष्येव्यवहारात्। अतएवव्यापारान्वयविव
क्षायामादिः पचतीतिवदादिः पाचकइतिन। फलविशेषणानांत्वेकदेशेपिफलेन्वयोभवत्येव। पूजनात्पूजितमितिसूत्रभाष्येदारुणा
ध्यापकइत्यत्रसमस्ताध्यापकपदार्थैकदेशेफलेदारुणपदार्थान्वयस्वीकारात्। फलावच्छिन्नव्यापारस्यधात्वर्थत्वेनशोभनंपचती
त्यादौसर्वत्रैकदेशेफलएवतदन्वयस्वीकाराच्च॥ उपगोरपत्यमौपगवइत्यादौतस्यापत्यमित्येवंजातीयसूत्रैर्विहितप्रत्ययानामपत्या
दिरर्थःषष्ठ्याद्यर्थश्चसमुदायगम्यः। उपगुसंबंध्यपत्यमित्यादिरीत्याबोधः अत्रापिसुंदरस्योपगोरपत्यमुपगोर्देवदत्तस्यचापत्यमितिव
त्सुन्दरस्यौपगवऔपगवोदेवदत्तस्येत्यादिवारणायैकार्थीभावआवश्यकः। सुबन्तात्तद्धितोत्पत्तेःपदविधित्वात्। नचतद्धितेएकार्थी
भावाङ्गीकारेपर्वतोवह्निमान्धूमादित्यादौधूमादित्यस्यवन्हावनन्वयापत्तिरितिवाच्यम्। विशिष्टपर्वतेएवान्वयात्। ज्ञानगतहेतुहेतुमद्भा
वस्यविषयेआरोपेणहेतावत्रपञ्चमी। अतएवन्यायसूत्रभाष्यवार्त्तिककारैः प्रज्ञापनीयधर्मविशिष्टोधर्मीसाध्यइत्युक्तम्। तास्यदेवतेत्य

CC-0. In Public Domain. Digitization by eGangotri

स्योदाहरणे आग्नेयादौ केचित् देवताविशिष्टं देयं प्रत्ययार्थः प्रकृत्यर्थः प्रत्ययार्थैकदेशेऽभेदेन विशेषणम्। यद्वा देवताप्रदेययोर्भिन्नैव प्रत्ययस्य शक्तिः अग्न्यभिन्नदेवतासंबन्धीति बोधः प्रदेयं च संबन्धित्वेनैव प्रत्ययार्थः प्रदेयदूतिमन्त्रस्याप्युपलक्षणं आमिक्षादिपदैश्च संबन्धित्वेन बुद्धस्यैव प्रदेयस्य विशेषसमर्पणं क्रियते। इन्द्रादिपदैर्देवताया लाभेऽपि देवतात्वेनालाभात्तेन रूपेण लाभाय देवतायां शक्तिरित्याहुः। अन्ये तु चतुर्थ्यादौ प्रकृत्यर्थस्य प्रकृत्यैव लब्धस्य चतुर्थ्योद्देश्यत्वमात्रं यथोच्यते एवमत्रापि देवतात्वं प्रदेयं च प्रत्ययार्थस्तत्र प्रदेये देवतात्वस्य निरूपकतासंबन्धेनान्वयः अग्निवृत्तिदेवतात्वनिरूपकमिति बोधः। नन्वेवं तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः देवतासङ्गतिः। तत्र दुर्बलं तु परं परमिति मीमांसकोक्तदौर्बल्यं कथमिति चेदित्थम्। चतुर्थ्या वाक्याद्देवतात्वसंबन्धलाभस्तद्धिते समानपदोपादानश्रुत्येति श्रुतिवाक्यबलाबलाधीनं तत्। देवतात्वस्य संबन्धिद्रव्यसापेक्षत्वेन चतुर्थ्या द्वितीयसंबन्धिनः पृथक्पदोपात्तत्वेन वाक्याच्च लाभः प्रकृते तु संबन्धिद्रव्यस्याप्येकपदोपस्थाप्यत्वात् श्रुत्या तल्लाभः। यद्वा प्रदेयमेव प्रत्ययार्थः स्ववृत्तिदेवतात्वनिरूपकत्वसंबन्धेन प्रकृत्यर्थस्य प्रत्ययार्थेऽन्वय इत्याहुः। देवतात्वं च दिवेरैश्वर्यकर्मणो देवतेति देवात्तलिति सूत्रभाष्यात् मन्त्रकरणको यो हविस्त्यागस्तज्जन्यस्वर्गातिरिक्तफलाश्रयत्वेन तदुद्देश्यत्वं मन्त्रस्तुत्यत्वं च। अत एवैन्द्रं हविरैन्द्रो मन्त्र इत्यादिसिद्धम्। देवतानिष्ठं फलं चास्येदं फलं भवत्वितीच्छारूपा प्रीतिरेव कोदादित्यादिमन्त्रप्रयोज्यस्वामित्वभागिनि प्रतिग्रहीतर्यतिप्रसङ्गवारणाय मन्त्रकरणकेति हविस्त्यागविशेषणम्। स्वर्गाश्रयत्वेनोद्देश्ये यागकर्त्तर्यतिप्रसङ्गवारणाय

स्वर्गातिरिक्तेतानयोषिद्भ्यः पृथग्दद्यादित्यादितः श्राद्धे मृतपत्नीनां मृतानां हविः संबन्धात्तद्वारणायोद्देश्यत्वमिति। शूद्रकर्तृकश्राद्धादा
वपि नमस्कारो मन्त्रोस्त्येव। अनुमतोस्य नमस्कारो मन्त्र इति गौतमस्मृतेः। उद्देश्यता च मन्त्रोक्तशब्दशरीरोभयावच्छिन्नेश्वरचैतन्यस्यात
देव च मन्त्रोक्तमिन्द्रादिपदवाच्यम्। इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरि
श्वानमाहुरिति मन्त्रवर्णात्। आहुर्मन्त्रा इति शेषः। एष उ ह्येव सर्वे देवा इति श्रुतेश्च। तेन लोमादीनां देवतात्वं सिद्धं पर्यायान्तरेणोद्देशे च न दे
वतात्वमिन्द्रादीनां स्मर्यमाणमश्वमेधाद्यनुष्ठानं च नासंङ्गतमिन्द्रादिपदैरेवेश्वररूपदेवतोद्देशेन तैरपि हविस्त्यागोपपत्तेः। इदं च यागा
नुष्ठानन्तत्वज्ञानात्पूर्वमेव तदुत्तरमपि वा लोकानुग्रहायेति बोध्यम्। अत एव इन्द्रः सहस्राक्षो गोत्रभिद्वज्रबाहुरित्याद्यर्थवादप्रदर्शित
विग्रहहविर्भोजनैश्वर्यतृप्तिफलदातृत्वानां न बाधः। शुद्धार्थस्य देवतात्वे पर्यायान्तरप्रयोगापत्तिः अग्नये शुचये इत्यादौ पौनरुक्त्याप
त्तिश्च। शुद्धशब्दस्य देवतात्वे बोद्धस्य शरीरस्य वा संनिधेरभावादावाहनमन्त्राणां शुद्धादृष्टार्थत्वमात्रापत्तिः। गङ्गाशालग्रामादौ नित्यसं
निधानादावाहनमन्त्रानपठनीयादित्यादेस्तत्पाठं विनाप्यदृष्टसिद्धिरित्यत्र तात्पर्यं च कल्प्यं स्यात्। तिर्यगधिकरणेन देवताः कर्मस्वधि
क्रियन्ते इन्द्रादेर्हविस्त्यागोद्देश्यस्येन्द्रान्तरादेरभावात्वात्मने संकल्प्यमानद्रव्यस्य स्वत्वत्यागासंभवेन कर्मानिष्पत्तेरित्यर्थकेन न देवतादे
वतान्तराभावादिति सूत्रेण शब्दातिरिक्तदेवताया जैमिनिनाप्यङ्गीकाराच्च। न च देवताया अपि यागाङ्गत्वमाग्नेय इत्यादितद्धितादिभिर्बो

ष्यते। अनुष्ठेयमुपकारकं वाङ्गं भवति न च देवता यागमध्ये स्वरूपेणानुष्ठातुं शक्या नापि क्लृप्तिजामिवतासामुपकारकत्वमिति वाच्यम्। तद्वाचकशब्दोच्चारणस्यैवानुष्ठेयत्वात्। वाचकशब्दद्वारैव तासामुपकारकत्वात्। शब्दस्योपस्थितत्वादग्न्यादिरेव। तदुक्तं शबरस्वामिभिः शब्द एव हविषा संबध्यते तत्संबन्धादर्थो देवता भविष्यतीति। आवाहनमन्त्रैश्चानेकयागेषु संनिधानमयं यागो मदर्थ इति तद्बुद्धिविशेष एवेति न घालादिभङ्गः नाप्यनेकेषु संनिधानानुपपत्तिः। योगिवद्दूतानां तद्रूपत्वेनेच्छया भूतान्यधिष्ठाय अनेकैः सूक्ष्मतरैः शरीरैस्तत्र संनिधाने बाधकाभावाच्चान्तर्धानशक्तियोगाच्च परैरदर्शनम्। ईश्वरस्यैव देवतात्वे तु नानुपपत्तिलेशोऽपि। किंच देवैर्नारदादीनां संवादः पुराणेषु श्रूयते स विग्रहवत्त्व एवोपपद्यते। एवंच तेनैवोपबृंहणेनार्थवादानां वाक्यार्थबोधविषयीभूतविग्रहेऽपि स्तुताविव तात्पर्यं तत्र स्तुतौ मुख्यं तात्पर्यं विग्रहे तु तदुपयोगितया। एवंच ध्यानविधयो देवतासायुज्यसालोक्यादिफलनिर्देशा अप्युपपन्नाः। अत एव सत्सूत्रे भाष्ये सर्वस्य पदार्थस्य चेतनावत्त्वं शृणोत ग्रावाण इत्यर्थवादबलेनोक्तम्। ईश्वरोऽपि श्रुत्या श्रुतिलब्धबलानुमानेन श्रुत्यनुग्राहकेण अन्तर्यामितया जगत्कारणतया च सिद्ध इति वेदान्तेषु प्रसिद्धं चेतनस्यैक्यमेव लाघवात्। भेदप्रतीतिस्त्वौपाधिकीत्यपि तत्रैव स्पष्टम्। चरके पतञ्जलिरप्याह। देही सर्वगतो ह्यात्मा विभुत्वमत एवास्य यस्मात्सर्वगतो महान् इत्युपक्रम्य नित्यानुबद्धमनसा देहकर्मानुपातिना। सर्वयोनिगतं विद्यादेकयोनावपि स्थितमिति। देहनिर्वर्तककर्मणोऽनुपातः संबन्धो

यस्यतादृशेनमनसान्तःकरणेननित्यसंबद्धंचेतनंसर्वयोनिगतमपिएकयोनौस्थितंविद्यात्।तदन्तःकरणकर्मारब्धेदेहेएवतदन्तःकरणधर्मान्गृह्णातिनान्यान्तःकरणधर्मान्नान्यदेहेइत्यर्थंतद्व्याख्यातारः।योनिर्देहः।एवंचानेकेविभवआत्मानइतिपरास्तम्।एकवचनेनात्मनएकत्वस्यनित्यानुबद्धमित्यादिनाऔपाधिकभेदस्यचस्पष्टमेवाभिधानात्।परामार्थसारेपिपतञ्जलिराहयद्वद्दिनकरएकोविभातिसलिलाशयेषुसर्वेषुतद्वत्सकलोपाधिष्ववस्थितोभातिपरमात्मेति।गीतायामपिसर्वभूतेषुयेनैकंभावमव्ययमीक्षते।अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्त्विकम्।पृथक्त्वेनतुयज्ज्ञानंनानाभावान्पृथग्विधान्।वेत्तिसर्वेषुभूतेषुतज्ज्ञानंविद्धिराजसम्।यत्तुकृत्स्नवदेकस्मिन्कार्येसक्तमहैतुकम्।अतत्त्वार्थवदल्पंचतत्तामसमुदाहृतमिति।तत्राद्येनसर्वभूतेषुव्यष्टिसमष्टिरूपेषुविभक्तेषुपृथगवस्थितमप्येकमव्ययंजन्मादिहीनंभावंचेतनमविभक्तमव्यावृत्तंयेनज्ञानेनेक्षतेतज्ज्ञानंसात्त्विकमित्यर्थकेनचेतनैक्यमुक्तंयदितितृतीयार्थेयेनज्ञानेनपृथक्त्वेनभेदेनस्थितेषुदेहेषुभावान्चेतनान्नानाभिन्नान्पृथग्विधान्परस्परविलक्षणान्वेत्तितद्राजसमित्यर्थकेनद्वितीयेनापितदेवदृढीकृतमन्त्येनापिबहुषुभूतकार्येषुसत्सुएकस्मिन्तत्कार्येदेहेन्तःकरणेवाप्रतिमादौवाकृत्स्नवत्सक्तम्।परिपूर्णवत्स्थितंएतावानेवात्मेश्वरोवानातःपरंकिंचिदस्तीत्याकारंहेतुहीनमतत्त्वभूतार्थविषयकमल्पंनित्यत्वाद्यग्रहात्।एवंज्ञानंतामसमित्यर्थकेनतदेवदृढीकृतमेवंचतत्प्रतिपादकशास्त्राणांपुराणानांचतत्त्वंदर्शि

तस्मिंस्त्वन्यत्रविस्तरः।एवंतदस्यांप्रहरणमितिक्रीडायांणः।सोऽस्यनिवासः।साऽस्मिन्पौर्णमासीत्येवंजातीयकेषुसास्यदेवतेत्स्वुदाहरणेष्ववबोधनिर्णयोबोध्यः।तेनप्रोक्तम्।नन्वत्रकिंप्रोक्तत्वम्।नचाध्यापनेनप्रकाशितत्वम्।सुशर्मणाध्यापितेकाठकेसौशर्मणमित्यप्रयोगात्।नचकृतत्वम्।कृतेग्रन्थइत्येवसिद्धेः।यद्यप्यर्थोनित्योयात्वसौवर्णानुपूर्वीसाऽनित्यातद्भेदाच्चैतद्भवतिकाठकंकालापकमितिभाष्यात्।प्रलयेषूच्चारयितृपुरुषाभावादानुपूर्वीविनाशेनपुनरुत्पद्यऋषयःसंस्कारातिशयाद्वेदार्थंस्मृत्वाशब्दरचनांविदधतिआनुपूर्वीभेदादेवह्यर्थाभेदेऽपिकेषुचित्काठकादिव्यवहारस्ततश्चकठादयोवेदानुपूर्व्याःकर्तारःप्रवक्तारश्चेतिकैयटोक्तेश्चकृतत्वास्तेः।अर्थोऽत्रईश्वरःतत्रैवमुख्यतयासर्ववेदतात्पर्यात्।वेदैश्चसर्वैरहमेववेद्यइतिगीतोक्तेः।सास्यदेवतेतिसूत्रोक्तमन्त्रवर्णादिभ्यश्च।यत्तुज्योतिष्टोमादिरूपोऽर्थःसमाननामरूपत्वान्नित्यःआनुपूर्वीतुभिन्नरूपत्वादनित्येत्यर्थइति।तन्न।कृतेग्रन्थइत्येवसिद्धेतेनप्रोक्तमितिव्यर्थमितिशङ्कायांननुचनित्यानिछन्दांसितेनतेषांकृतत्वाभावात्तेनासिद्धिरित्येकदेशिनोक्तेयद्यप्यर्थोनित्यइत्याद्युक्तम्।अर्थस्याकृतत्वेऽपिवर्णानुपूर्व्याःकृतत्वात्तेनैवसिद्धमितितदाशयः।तद्रीत्याव्याख्यानेतुतादृशानित्यत्वेऽपिकृतत्वाबाधात्तदुल्लेखोनिष्फलएवस्यात्।अनित्यानिछन्दांसीत्येवंवदेत्यात्वसौवर्णानुपूर्वीत्यनेनसर्वबोध्यार्थानुपूर्व्याअपिसंग्रहः।अनित्यत्वस्याप्यभेदेनतैर्द्रुढपतितद्भेदाच्चेति।स्वरेतुनकिंचिन्निरूपितोभेदःसर्वरूपत्वात्तस्येतिचेन्न।माधुरेणप्रकाशितायांतदकृतायांवृत्तौमाधुरीत्यस्यसिद्ध्य
इ

र्थमस्यावश्यकत्वात्। प्रोक्तशब्देन स्वकृतं परकृतं वा यत्प्रथमप्रकाशितं तदुच्यते। नच सुशर्मादयस्तथाप्रकाशकाइत्यदोषः त
त्रकठादयः संस्कारातिशयाद्वेदार्थं तद्बोधकवैदिकशब्दानुविद्धमेव स्मरन्त्यतस्तच्छान्दसशब्दाविच्छेदः आनुपूर्व्यंशस्यवान्यत्वंय
द्यपीदानीमानुपूर्वीव्यत्यासेनाप्यदृष्टहानिस्तथापि तत्तपोमाहात्म्यात्तत्कृतानुपूर्वीव्यत्ययो नादृष्टहानिकरः भाष्ये वर्णानुपूर्वीत्यत्र
वर्णशब्देन पदमुच्यते आनुपूर्वीमात्रभेदोक्त्या पदानि तान्येवेति सूचितम्। तथा च स्मृतिः प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते इति
स्वयंभूरेष भगवान्वेदो गीतस्त्वया पुरा। शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाइति। युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः। ले
भिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवेति च। तत्राद्यास्मृतिरानुपूर्वीभेदादुपपन्ना अन्त्ये चार्थनित्यत्वादुपपन्ने। तथा व्यासस्मृतौ। सृष्ट्या
दौ ब्रह्मणो वेदा मुखेभ्यश्च विनिर्गताः। तत्रैव च लयं यान्ति प्रलये समुपस्थिते इति। विष्णुपुराणेऽपि। द्वापरे द्वापरे विष्णुर्व्यासरूपी म
हामुने। वेदमेकं स बहुधा कुरुते जगतो हितः। वीर्यं तेजो बलं चाल्पं मनुष्याणामवेक्ष्य वै। हिताय सर्वभूतानां वेदभेदान्करोति सः। द्वा
परे इत्यस्य द्वापरे वृत्ते तत्सन्ध्यंशेष्वित्यर्थः। द्वापरे तु पुरावृत्ते मनोः स्वायंभुवेऽन्तरे। ब्रह्मा मनुमुवाचेदं वेदान्व्यस्य प्रजापते इति वायू
क्तेः। आद्यो वेदश्चतुष्पादः शतसाहस्रसंमित इति। शतशब्दोऽत्रानन्तवाची अनन्ता वै वेदा इति श्रुतेः। चतुष्पादः ऋग्यजुःसामाथर्ववे
दरूपः तदाद्ये वेदे परस्परं श्लिष्टमिति तदाशयः। इति शाखाः प्रसंख्याताः शाखाभेदास्तथैव च। कर्तारश्चैव शाखानां भेदहेतुस्तथोदित

इतिचतत्रोक्तम्।अतएवदेवीपुराणेस्वयंभूरेषभगवानित्यादिकमुक्त्वाकथंदेवीवेदमाताएतत्कौतूहलंममेतिमनुप्रश्नेइच्छाज्ञा
नक्रियाशक्तिर्देवीरूपाप्रकीर्त्तिता।मातृकातुक्रियाशक्तिःक्रियासातमरूपिणी।संप्रसूताश्चवर्गास्तुस्वरवर्णविभेदतः।क्रियारूपाभ
वेद्देवीवेदमाताततोभवदितिब्रह्मणउत्तरेणवर्णानांजन्यत्वेन्तद्द्वारावेदस्यजन्यत्वंचस्पष्टमेवोक्तम्।अतएवोंकारप्रभवावेदाइत्यपित
त्रोक्तंतदप्योंकारस्यसर्ववर्णसमष्टित्वादुपपन्नम्।उर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययम्।छन्दांसियस्यपर्णानीतिगीतावाक्याद
पिछन्दसामनित्यत्वंस्पष्टंसंसारवृक्षावयवत्वेनतेषांवर्णनात्।ईश्वरप्रतिपादकपुराणानान्तुवेदतएवज्ञात्वाबुद्धिपूर्वंरचनमिति
विशेषः।तस्मात्तपस्तेपानाच्चत्वारोवेदाअजायन्तेत्यादौजनेःप्रादुर्भावमात्रमर्थोनत्वभूतप्रादुर्भावः।योवैब्रह्माणंविदधातिपूर्वंयोवै
वेदांश्चप्रहिणोतितस्माइतिश्रुतेःप्रदानंचतदर्थानुसन्धानानुकूलशक्तिदानमेवात्रबोध्यम्।अतएवसर्वेषान्तुसनामानिकर्माणिच
पृथक्पृथक्।वेदशब्देभ्यएवादौपृथक्संस्थाश्चनिर्ममेइतिवेदेभ्यएवसर्वज्ञानपूर्विकासृष्टिरुक्तासङ्गच्छते।कठादीनांपुनरु
त्पत्तिरपितन्नामकत्वमात्रेणकल्पेकल्पेविनश्यन्तितन्नामानोभवन्तिचेतिदेवीपुराणात्।अतएवव्यासादीनान्तत्तदधिकारान्तेमुक्ति
श्रवणेननविरोधः।अन्येतुपदानांज्योतिष्टोमाद्यर्थस्यचनित्यत्वंसमतयाप्रवाहनित्यत्वेन।तथाचव्याससूत्रंसमाननामरूपत्वाच्चा
वृत्तावप्यविरोधइति।आवृत्तौआनुपूर्व्याःपुनःपुनरुत्पत्तावपिवेदस्यनित्यत्वेनाविरोधःसमाननामरूपत्वात्।नाम्नांपदानांरूपा

णामर्थानां च समानत्वादिति। एवं च नामरूपप्रवाहानुच्छेद एव नित्यत्वमिति तद्भावः वेदोपि मायापरिणामविशेष एवेत्याहुः। ईश्वरनिर्मितत्वेपि तन्निर्मितहिरण्यगर्भवद्वेदास्य स्वयंभूत्वं बोध्यम्। एवं च वक्तृपुरुषकलङ्कशङ्काराहित्येन वेदः प्रमाणमेव। किं च तदुक्तस्य धर्माधर्मफलस्य तत्फलतारतम्यस्य च लोके प्रत्यक्षतः कस्यचित्सुखित्वं कस्यचिद्दुःखित्वं कस्यचिल्लोकपालत्वं कस्यचित्स्वकुलपालकत्वमित्येवंरूपेणानुभूयमानतया प्रामाण्ये सिद्धे आयुर्वेदाद्यंशे चानुभवेन प्रामाण्ये सिद्धे इतरांशेपि प्रामाण्यमेवासिध्यति तस्य किंचिदज्ञपुरुषाज्ञेयत्वाच्च न पौरुषेयत्वम्। योगिसामर्थ्यमपीन्द्रियविषये एवातिशयजनकं न धर्माधर्मादिप्रत्यक्षजनकं किं त्वतीतधर्माधर्मजनकक्रियाविषयमेव तेषां प्रत्यक्षं तत्र तत्र स्मर्यते। किं च निर्दुष्टसर्वज्ञेश्वरश्वासप्रश्वासरूपत्वान्न तत्राप्रामाण्यशङ्का। अपौरुषेयत्वं त्विदं मया कर्त्तव्यमिति बुद्धिपूर्वकं यत्नेनाकरणात् एतावतैवाकर्तृकत्वव्यवहारः वेदजनकत्ववदेव च जगज्जनकत्वमीश्वरस्येति बोध्यम्। शाक्याद्यागमास्तु नैवं तेषां बुद्धिपूर्वं मोहनार्थत्वेन कृतत्वस्मरणात्। तदुक्तं सूतसंहितायाम्। श्रुतिः सनातनी साध्वी सर्वमानोत्तमोत्तमा। प्राह चाद्वैतनैर्मल्यं निर्विकारत्वमात्मनः। ततः सर्गादि चाप्याह चेतनाचेतनस्य च। अतीन्द्रियार्थविज्ञाने मानं नः श्रुतिरेव हि। श्रुतिः सनातनी शंभोरभिव्यक्ता न संशयः। शंकरेण प्रणीतेति प्रवदन्त्यपरे जनाः। यदाम्नानादिभूतैव तदा मानमतीव सा। स्वतश्च परतो दोषो नास्ति यस्माद्द्विजर्षभाः। अस्ति चेद्व्यवहारस्य लोप एव प्रसज्यते। परत

स्य न दोषोस्ति परस्याभावतो द्विजाः। स्वतो दुष्टोपि शब्दस्तु मानमत्रा प्रसङ्गमात्। इति वार्त्ता तु वा नैव मुनीन्द्राः सूक्ष्मदर्शनाः। स्वतो दुष्टः कथं मानं भवत्यन्यस्य सङ्गमात्। अन्ययोगेन यो भावो यस्य प्राज्ञाः प्रसिध्यति। स तस्य भ्रान्त एव स्यान्न स्वभावः कथंचना। जपाकुसुमलौहित्यं विभाति स्फटिके भृशम्। तथापि तत्र लौहित्यं भ्रान्तमेव न वास्तवम्। अन्यत्रान्यस्य धर्मस्तु प्रतीतो विभ्रमो मतः। आप्तापेक्षस्तथा शब्दः प्रमाणं न स सर्वथा। अनाप्तयोगाच्छब्दस्य प्रामाण्यं मुनिपुङ्गवाः। तिरोभूतं स्वतः सिद्धं स्वनाशायैव केवलम्। यदा सा शंकरेणोक्ता तदापि श्रुतिरास्तिकाः। प्रमाणं सुतरामाप्ततम एव महेश्वरः। सर्वदोषविहीनस्य महाकारुणिकस्य च। सर्वज्ञस्य च शुद्धस्य कथं दोषः प्रकल्पते। सर्वदोषविशिष्टस्य निर्घृणस्य दुरात्मनः। अल्पज्ञस्य च जीवस्य दृष्टा नास्ति हि सत्तमाः। अतः पक्षद्वयेनापि वेदो मानं न संशयः। वेदो नादिः शिवस्तस्य व्यञ्जकः परमार्थतः। अभिव्यक्तिमपेक्ष्यैव प्रणेतेत्युच्यते शिवः। ईश्वरस्य स्वरूपे च जगत्सर्गादिषु द्विजाः। अतीन्द्रियार्थेष्वन्येषु मानं तु श्रुतिरेव हि। श्रुतिसहायरहितमनुमानं न कुत्रचित्। निश्चयात्साधयेदर्थं प्रमाणान्तरमेव वा। मुने वेदो महेशोक्तः प्रमाणं सर्ववस्तुनि। अन्यथा न जडः शब्दोतीन्द्रियार्थस्य साधकः। अत्यन्तमलिनानां तु प्राणिनां वेदमार्गतः। पञ्चरात्रादयो मार्गाः कालेनैवोपकारका इति। तत्र वेदप्रामाण्यं साधयितुं शब्दमात्रस्य प्रामाण्यं साधयन् शब्दस्य स्वतो दोषो नास्तीत्याहास्ति चेदिति। स्वतो दुष्टस्यैवाप्तसंबन्धात्तद्गतप्रामाण्येन प्रमाणत्वमित्यसङ्गतमित्याह स्वतो दुष्टोपीत्यादि। तद्

ल·सं· तप्रामाण्यस्यभ्रमविषयत्वेनवस्तुसिध्यानियामकतापत्तिरितिभावः।किंचासापेक्षेशब्दस्यप्रमाणत्वेतदासत्त्वंकेनचिद्मानेनज्ञातव्यं ५
४५ तत्प्रामाण्यमपिमानान्तरेणेत्यनवस्थातस्मात्स्वतःसिद्धमेवशब्दस्यप्रामाण्यमनाप्तबुद्धिप्रभवत्वरूपकारणदोषेणतिरोभूतंक्रिय
तेइतिनवञ्चकादिवाक्यस्यप्रामाण्यमितिभावः।ईश्वरोभोक्तातद्रूपमेवईश्वरस्याप्तत्वेमानमाहसर्वदोषविहीनस्येति।ततएवसर्वज्ञत्वन्तद्धीनत्वंचकेना
पितद्दोषापसासात्कारात्।शंकरकृतत्वंखण्डयति।ईश्वरस्यस्वरूपेचेत्यादि।ईश्वरश्चित्स्वरूपस्तन्निर्मितंजगत्तद्रूपमेव।जगत्त
द्रोग्यंतथाप्रपञ्चोबाध्य ईश्वरज्ञानन्तद्बाधकं परस्परंचबाध्यबाधकभावःतच्चविरुद्धकारित्वस्वभावमायावशात् इत्याद्यर्थेषुश्रुतिरेव
मानमेवंचतत्कृतत्वेनप्रामाण्यसिद्धिस्तस्यप्रमाणत्वेचतत्कृतेश्वरसिद्धिरित्यन्योन्याश्रय इत्यर्थः।अतएवदेवीपुराणे।सुहितःप्राणि
मात्रस्यशिवेनपरमात्मना।खड्गांजिघांसतावत्सआयुर्वेदःप्रकाशितइतिशिवस्यतत्प्रकाशकत्वमेवोक्तम्।खड्गं खड्गासुरम्। शु
द्धानुमानात्तत्सिद्धिर्नेत्याहश्रुतिसाहाय्येति।कुतर्कशंकाकलंकग्रासादितिभावः।श्रुतिविरुद्धत्वेनुमानमनुमानाभासएव।यस्तु
नरनुमानंप्रत्यक्षागमविरुद्धंन्यायाभासःसइतिन्यायभाष्योक्तेः।वेदमार्गतःसार्वविभक्तिकस्तसिःवेदमार्गेणेत्यर्थः।हीनानामि
तिशेषः।पाञ्चरात्रादयइत्यादिनाशाक्यादयःतेनैतेषांवेदतुल्यतानिरस्ता।अत्यन्तमलिनानामित्यनेनोदितानुदितहोमवदधिका रामः
रिभेदेनप्रामाण्यव्यवस्थोक्ता।।शाक्याद्यागमानामप्यात्मज्ञानोपयोगितयात्यन्तमलिनान्प्रतिप्रामाण्यमस्त्येवेतिविरोधेत्वनपेक्षस्या ४५

रित्यधिकरणेभट्टपादैरप्युक्तम्।किंचवेदोक्तार्थेबाधनिश्चयाभावेनगुरुतरत्वेनचाप्रामाण्यकल्पनापेक्षयाप्रामाण्यकल्पनैवोचिता
प्रामाण्यस्यस्वतोग्राह्यत्वाच्च।एवंमानमात्रेपितस्यचमायापरिणामस्यवेदस्यसमायोभगवानीश्वरोधिष्ठातातेनचान्तर्यामितयाख्या
पुःसइत्यस्माच्छब्दादेतदर्थबोधोभवत्वितिमायावृत्तिरूपातदिच्छापितत्रान्तर्भूतेतिविवक्षाविवक्षयोर्निर्वाहः।सुनेवेदोमहेशोद्धइत्या
दिसूतसंहितोक्तेः।ग्रहाधिकरणवार्त्तिकेपि।शब्दब्रह्मात्मनोप्येवंसर्ववेदानुसारिणः।विवक्षावाऽविवक्षावावक्तव्याविधिशक्तितइति।
शब्दब्रह्मवादाभ्युपगमेतुब्रह्मणोपिसर्ववेदात्मकदेहाधिष्ठातृत्वाद्विवक्षाविवक्षेवक्तुंशक्येतेचविधिशक्तितोज्ञायेतेइत्यर्थइतिग
णककृता।प्रघट्टकान्तरेपि।शब्दब्रह्मेतियच्चेदंशास्त्रंवेदाख्यमुच्यतेतदप्यदधिष्ठितसर्वमेकेनपरमात्मना।तेषामन्तर्गतेच्छानांवा
क्यार्थप्रतिपादने।विवक्षाचाविवक्षाचज्ञायतेशब्दशक्तितइति।सन्सूत्रेभाष्येप्युक्तंसर्वचेतनावदिति।यादृशीचानुपूर्वीकठादिकृ
तातत्कालीयमेवाध्ययनंधर्महेतुः।अन्यथावाग्वज्रतयानर्थहेतुः।एतदभिप्रायेणैवंश्रुतिरव्यभिचरितस्वरवर्णानुपूर्वीकाइत्याहुः।
अथात्मस्ययाच्चपुरुषस्यास्वातन्त्र्यंवेदे।सर्वदानुपूर्व्याप्येकैवकेनाप्यकृतैवेतिनव्यमीमांसकश्रद्धाजाड्यन्तुतदर्थकस्यतदीयार्षव
चसोनुपलम्भान्महाभाष्यकारादिवचनविरोधाच्च।नादेयंवेदत्वन्तुसतिसंभवेशब्दार्थयोःपर्याप्तस्तोभाक्षरेष्वर्थादर्शनात्सतिसं
भवेइत्युक्तं।नित्यानिछन्दांसीतिपूर्वपक्षेयद्यप्यर्थोनित्यइतिमहाभाष्योक्तेः।वैदिकोर्थोवैदिकःशब्दइतिव्यवहारस्तुतद्घटक

त्वाद्बोध्यः तत्रपठत्यादिसमभिव्याहारेवेदशब्दादुपस्थितयोःशब्दार्थयोर्मध्येशब्देर्थोविशेषणम्।क्वचिदर्थेशब्दोविशेषणंयथा
वेदंव्याचष्टइत्यादौक्वचिदुभयंसमंयथावेदंजानातीत्यादौ।इदमेवाभिप्रेत्यशब्दार्थौकाव्यमितिप्रकाशकारैरुक्तम्।अतएव
शब्दमात्रतात्पर्यकेतदनुकरणेनवेदत्वमितिमतौच्छइतिसूत्रेभाष्येउक्तम्।अर्थभेदादन्यत्वनिश्चयइतिचकैयटेनोक्तम्।अत
एवानुकरणेनशुच्यादिदेशस्वाध्यायादिकालनियमः नापिशूद्राणामनुकरणश्रवणेप्रायश्चित्तम्।बालैःपठ्यमानेवेदेशब्दमात्रता
त्पर्यकत्वाभावेनवेदत्वमस्त्येव।अतएवदेशकालनियमस्तत्रशिष्टानाम्।अनुकरणेतुशब्दमात्रतात्पर्यकत्वेनतदर्थबोधाभावे
तात्पर्येणचनदोषः अतएवनकस्याप्यनुकरणादर्थबोधः मूर्खाध्यापकबालादीनांचव्युत्प

त्त्यभावान्नार्थबोधोनैतावताबालैःपठ्य
मानेर्थासंविधानंव्युत्पत्तस्यततोर्थबोधात्।केचित्तुअर्थभेदेनशब्दभेदवत्वेदमन्त्राणांविनियोगभेदेनापिभेदएवंतदुक्तमन्यासंस्का
रगायत्रीकर्मण्यन्याप्रयुज्यते।अन्याजपप्रबन्धेसासात्वेकैवप्रतीयतेइति सादृश्यादेकत्वबुद्धिरित्यर्थः वेदेतुसर्वेषांतन्त्रेणोच्चा
णमित्याहुः वेदत्वमखण्डोपाधिः प्रमाणशब्दत्वार्थबोधकत्वघटितत्वन्तुनवेदत्वम्।तत्रप्रमाणशब्दत्वमनङ्गीकुर्वतांबौद्धानांवेद
त्वव्यवहारात्स्तोमाक्षरेषुअभियुक्तानांवेदत्वव्यवहाराच्च।यत्किंचिच्छब्दानुविद्धतदर्थस्ययोगबलेनज्ञानान्निबध्यमानास्मृतिरि

तिभेद इत्यलम्। तेन दीव्यतिखनतिजयतिजितमित्यनेनाक्षैर्दीव्यत्याक्षिक इत्यादाविकप्रत्ययः अत्र तद्धितेन भासमानमपि देवनं नकारकान्वययोग्यक्रियारूपं अतएवाक्षिको देवदत्तमिति न। तदुक्तं भट्टैः। यादृशी भावनाख्याते धात्वर्थश्चापि यादृशः। नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः क्वचिदिति। अतएव कर्तृकर्मणोरिति सूत्रे कृतीत्यस्य शत्य इति न प्रत्युदाहृतं भाष्ये। धातोः कर्तृकर्मणी तस्मात्तद्वये प्रत्ययास्तिङः कृतश्च तत्र तिङ्योगे न लोकेति निषेधात्कृद्योग एव सिद्धेः कृद्ग्रहणवैयर्थ्यंच शङ्कितम्। अधिकाखारी द्रोणेनेत्यत्र तु हेतौ तृतीया अध्यारूढखारी द्रोणेनेत्यत्रैव क्रियायोगाभावात् कर्तृत्वाभावेऽपि हेतुत्वसत्त्वात् सूत्रस्थविग्रहस्ये च दीव्यतीत्यत्र कर्तृविशेष्यको बोध इति बहुव्रीहिप्रकरणे निरूपितम्। एवन्तदधीते तद्वेदेत्यादावूह्यम्। तेन तुल्यं क्रिया चेद्वतिः। उपमेयस्य क्रियात्वे उपमानवाचकात्तृतीयान्तात्तुल्यमित्यर्थे वतिरित्यर्थः ननु एवं ब्राह्मणवदधीत इत्यादौ न स्यात् ब्राह्मणसादृश्यस्याध्ययनेऽभावात् इति चेन्न ब्राह्मणादिशब्दानान्तत्कर्तृकाध्ययने लाक्षणिकत्वात्। सौष्ठवादिश्च साधारणो धर्मः न च ब्राह्मणादिपदलस्याध्ययनस्य विभक्त्यर्थान्वयित्वेन सत्त्वरूपतया न क्रियात्वमिति वाच्यम्। तुल्यस्य क्रियात्वे तृतीयासमर्थादिति रित्यनेन तृतीयासमर्थस्य सामर्थ्यात् क्रियोपमानत्वयोग्यार्थकत्वलाभेऽपि क्रियात्वलाभे मानाभावात्। स्यातव्येन तुल्यं गच्छतीत्यादावपि तृतीयार्थान्वयेन तस्य सत्त्वरूपतैव न मुख्यं क्रियात्वन्तिङन्तार्थस्य तु नोपमानत्वं न वै तिङन्तेनोपमानम

स्तीतिसन्सूत्रस्थभाष्यात् एवंचास्यक्रियान्वये एवसाधुत्वम्। अरविन्दवत्सुन्दरंमुखमित्यादौभवतिक्रियाध्याहारः अरविन्द
पदेनसुन्दरारविन्दभवनंलक्ष्यते। एवंचसुन्दरारविन्दभवनसदृशंसुन्दरमुखभवनमितिबोधः अरविन्दमुखयोःसौन्दर्यधर्मि
कसादृश्यंतुल्यज्ञनयाबुध्यतेअतएवब्राह्मणेनतुल्यमस्यरूपमित्यादौनवतिः। तत्रतस्येवेतिसूत्रंद्रव्यगुणादितुल्यार्थमित्य
न्यत्रनिरूपितम्। मथुरावत्पाटलिपुत्रेप्राकारः मथुरायामिवेत्यर्थः मथुरावत्पाटलिपुत्रस्यविस्तारः मथुराया इवेत्यर्थः किंचेवा
र्थस्योपमानविशेषणतयातुल्यपदार्थस्यतद्विशेष्यतयाबोधेभेदः अत्रप्राकारयोरुपमानोपमेयभावः वृत्तौमथुरादिपदानान्तद
धिकरणकतत्संबन्धिप्राकाराद्यन्तर्भावेणवृत्तिरितिकेचित् परेतुषष्ठ्यर्थेसप्तम्यन्तात्षष्ठ्यन्ताच्चायंसाधुः अधिकरणसप्तम्यन्ता
त्तुनायमसामर्थ्यादतएवतत्रतस्येवेतिसूत्रस्यतत्रग्रहणस्येवशब्दयोगेषष्ठ्यर्थेसप्तमीज्ञापकतोक्ताभाष्येदेवेष्विवमनुष्येषुनामे
स्येदाहृतंचातत्रैवदेववन्मनुष्येषुनामेतिसाधुउपमानदेवसंबन्धिनामाभिन्नंमनुष्यसंबन्धिनामेतिबोधः मथुरावत्पाटलिपुत्रेप्रा
कारइत्यत्रोपमानमथुरासंबन्धिप्राकाराभिन्नः पाटलिपुत्रसंबन्धीप्राकारइत्येवंबोधेसाधुत्वंअस्मादेवज्ञापकादिवयोगेउपमानविशेष
णादुपमेयविशेषणाच्चषष्ठ्यर्थेसप्तमीनचाधिकरणकारकस्यकर्त्रादिद्वारैवक्रियान्वयइतिनासामर्थ्यमितिवाच्यम्। एवंह्यस्तीत्यध्याहारा
वश्यकत्वेनक्रिययोरेवतुल्यत्वेनतेनतुल्यमित्येवसिद्धावस्यवैयर्थ्यापत्तेः अतएवद्रव्यगुणतुल्यार्थोयमारम्भइतिभाष्येध्वनितं

कैयटेन च स्पष्टमुक्तमित्याहुः। मथुरापाटलिपुत्रयोः सादृश्यंत्वार्थम्। विधिवत्पूज्यते इत्यादौ विधिविषययोग्यताकर्तृ हरिकर्मकं देवदत्तकर्तृकं पूजनमिति बोधः विधिशब्देन तदुक्तः प्रकारः विधिमर्हतीति विग्रहः तदर्हमिति सूत्रेण वतिः यथावद्विहिताध्वराय यथावत्स्यावृत्तायेत्यादौ यथाशब्दो वृत्तिविषये शास्त्राद्युक्तप्रकारवाची। शास्त्रोक्तप्रकारकर्मकार्हतावद्विधानकर्तृभूताध्वरसंबन्धिनेतीत्युक्तप्रकारकर्मकार्हतावत्स्यातिकर्तृवृत्तसंबन्धिनेइत्यादिप्रकारेण बोधः राजवद्वृत्तमस्येत्यादौ राजयोग्यमेतद्वृत्तमिति बोधः न तु राजयोग्यमिति त्वर्थः प्रतीयते। एवं विनीतवदागमनं चिच्छेद कृतहस्तवदित्यादौ विनीतयोग्यमागमनं कृतहस्तानामिदं योग्यं छेदनमिति बोध इत्यलम्। घटत्वमित्यादौ प्रकृत्यर्थसंबन्धिप्रवृत्तिनिमित्तत्वादि वाच्यमिति सिद्धान्तः। अत्र केचित् संज्ञाशब्दे केवलं द्रव्यमेव शक्यं एवं च तत्र प्रवृत्तिनिमित्तरूपप्रत्ययार्थो दुर्वच इति मन्वानाः प्रकृतिलक्षणया शब्दपरात्तद्रूपेण प्रकारत्वाद्यर्थः स च प्रवृत्तिनिमित्तरूप एव जन्यबोधप्रकारत्वं तद्विषयसंसर्गत्वं च संसर्गः गोत्वमित्यादौ गोशब्दजन्यबोधप्रकारो गोत्वमित्यर्थः राजपुरुषत्वमित्यादौ तज्जन्यबोधविषयः संसर्ग इति बोधः शाब्दबोधे शब्दस्य भानमिति मतेऽपि शब्दस्य न प्रवृत्तिनिमित्तत्वमिति गोत्वमित्यादौ न गोशब्दप्रतीतिः प्रवृत्तिनिमित्तत्वं यज्ज्ञानाच्छब्दस्यार्थे प्रवृत्तिस्तत्त्वमित्युक्तम्। तच्च घटादिषु जातिः शुक्लादिषु गुणस्तद्गतजातिश्च पाचकादिषु क्रियातत्संबन्धो वा राजपुरुषौपगवादिषु संबन्धः डित्थादिषु द्रव्य

स्यैव विषयताद्रूप्येन भानाद्द्रव्यमेव प्रवृत्तिनिमित्तं तस्यैव प्रकारतावैशिष्ट्येन भावप्रत्ययार्थत्वमिति प्रकृतिप्रत्ययार्थयोर्भेदः सुवचः प्रकृतेः शब्दपरत्वात्पूर्वोक्तसंबन्धस्य वचनानुपपत्तिरिति वदन्ति। सर्वत्र शब्दः शब्दार्थौ वा प्रवृत्तिनिमित्तमिति मते तदेव त्वाद्यर्थ इति बोध्यम्। अपरे तु भाष्यमते गुणसमुदायो द्रव्यमिति निरूपितम्। तत्र शब्दशक्तिस्वभावात्क्वचिज्जात्यतिरिक्तसमुदायो विशेष्यो जातिर्विशेषणं क्वचिद्गुणाविरिक्तो विशेष्यः यथा शुक्लादिपदे। गुणस्तु तत्र विशेषणं संज्ञाशब्दे कुशब्दादौ कादिव्यक्तिरेव शक्या कलादीनुपलक्षणीकृत्य यः शुक्लवासाः स देवदत्त इत्यादाविव शुद्धव्यक्तौ शक्तिग्रहः न चैवं कुत्वमित्यादौ त्वाद्यनुपपत्तिः प्रकृत्यर्थातिरिक्तप्रत्ययार्थाभावादिति वाच्यम्। तत्र शब्दपरादर्थरूपे भावे प्रत्ययेनादोषात् एवं च कुकुत्वशब्दौ पर्यायौ अतएव तत्स्वभाव इति सूत्रस्याभिप्रायादिष्वतिप्रसङ्गमाशङ्क्य यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलावित्युक्तास्तस्यापि न्यासस्य डित्थादिष्वव्याप्तिः ततो व्यक्त्यतिरिक्तधर्माभानादित्याशङ्क्य व्यक्तेरेव विषयताद्रूप्येन भानात् प्रकारत्वावच्छिन्नव्यक्तिरेव त्वाद्यर्थ इत्येकं समाधानं कृत्वा यद्वा सर्वे शब्दाः स्वेनार्थेन भवन्ति स तेषामर्थस्तदभिधाने त्वतलावित्यनेन समाधानान्तरमुक्तम्। शब्दस्य द्विविधोऽर्थो वाच्यः प्रवृत्तिनिमित्तभूतश्च तदन्यतराभिधाने त्वप्रत्यय इति तदर्थः तत्र घटत्वमित्यादावन्त्यः तत्र प्रकृतिरर्थपरैव। आद्यः कुत्वपिण्डस्यत्वमित्यादौ। तत्र प्रत्ययार्थानुपपत्त्या प्रकृतिः शब्दपरा न त्वेतावता सर्वत्र प्रकृतिः शब्दपरा मानाभावात् लक्षणायां मानाभावाच्च तत्स्वभावइ

स्यत्र तच्छब्दस्य शब्दमात्रपरत्वे गुणवचनेति सूत्रे शब्दाधिकारापत्तेश्च तद्धितप्रकरणे सर्वत्र तस्यापत्यमित्यादावर्थपरताया र
वसत्वाच्च। एवं च प्रकृतिजन्यबोधप्रकारः प्रवृत्तिनिमित्तभूतो घटत्वादिधर्मस्तेन त्वाद्यर्थः प्रकृत्यर्थो व्यक्तिश्च स्वेतरासंबन्धित्वावच्छि
न्ननिखिलस्वसंबन्धिस्वसंबन्धेन प्रकारः तस्य भाव इति सूत्रात्। एवं च घटत्वमित्यादितो घटसंबन्धी धर्म इत्यादिरीत्या बोधः घटत्वत्व
मित्यादौ घटत्वसंबन्धी धर्म इति। घटत्वत्वं चाविद्यकधर्मविशेषरूपम्। यद्वा। व्यक्तिरेव घटत्वपदजन्यबोधे प्रकार इति सैव घटत्वत्वम्। य
तु घटेतरासंबन्धित्वे सति निखिलघटसंबन्धित्वमेव घटत्वत्वमित्यादेरर्थ इति तत्त्वस्यन्तगौरवग्रस्तं रूपादिभ्यो गुणवृत्तिजातौ त्वा
द्यः शुक्लादिभ्यो गुणिपरेभ्यो गुणे गुणपरेभ्यो जातौ अण्वादिभ्यो नित्यं परिमाणिवृत्तिभ्यः परिमाणरूपे गुणे। परिमाणं चतुर्धा अणु मह
ह्रस्वं दीर्घं चेति त्वण्वादिवृत्तौ त्वर्थकम्। जातिमात्रपरगवादिभ्यः शब्दस्वरूपे भावप्रत्ययः शब्दार्थयोरभेदाध्यासेन तस्यैव प्रवृत्ति
निमित्तत्वादिति कैयटः। शावलेयस्य गौरिति तु न तथा व्यवहाराभावेन तत्र जातिपरत्वाभावात् गौर्नित्येतीष्टमिति तदाशयः षत्वं णत्व
मित्यादौ वर्णानां वास्तवस्यौपाधिकस्य वा भेदस्य सत्त्वाज्जातिः सूपपादा। उपाधिरूपमेव वा तत्। परे तु जातिपरगवादिभ्यो नैव प्रत्ययो
नभिधानाद् गोत्वत्वमिति वद्धा ततो बोधः षत्वमित्यादौ कु त्व शब्दवदर्थ एव प्रत्ययः पद इत्येवार्थ इत्याहुः नानात्वं यौगपद्यमित्यत्रा
पि नानादिशब्दजन्यबोधप्रकारो सहभावो युगपद्भावश्चार्थः पाचक औपगवो राजपुरुष इत्यादौ क्रियाकारकभावस्य विभक्त्यर्थ

संबन्धस्यचवृत्तौप्रवेशाच्छब्दप्रवृत्तौतस्यैवनिमित्तत्वाच्चतत्रैवत्वादयः।उक्तंचहरिणाकृत्तद्धितसमासेभ्योभावप्रत्ययेनसंबन्धाभि
धानमिति। पाचकादौक्रियाभेदस्यैवनियमेनप्रतीतेर्व्यभिचाराच्चक्रियासंबन्धज्ञानादेवशब्दस्यद्रव्येप्रवृत्तिः जातिगुणयोस्तु
लोकनिरूढेनसो यमितिप्रत्ययेनभेदनिबन्धनसंबन्धस्यतिरोधानान्नतस्यप्रवृत्तिनिमित्तत्वम्। सर्वत्रसमासादौसंबन्धएवभा
वप्रत्ययार्थंवदताहरिणाविभक्त्यर्थमात्रस्यषष्ठ्यर्थवत्संबन्धतयाभानमितिसूचितम्। राजपुरुषादावपिराजादिसंबन्धज्ञानादेव
शब्दस्यप्रवृत्तिरित्यूह्यम्। इदमपिप्रायिकंकृत्स्नसर्पत्वंपटेशुक्लत्वंसत्त्वेत्यादौजातिगुणप्रकारकबोधस्यैवानुभवात्। तदुक्तमन्य
त्ररूढ्यभिन्नरूपाव्यभिचरितसंबन्धेभ्यइतितत्रकृत्स्नसर्पत्वमित्यादौरूढिः शुक्लत्वमित्यभिन्नरूपंपटःशुक्लइतिव्यवहारा
त्सत्त्वेतितृतीयंनहिसत्त्वसत्तयोःसंबन्धःकदापिव्यभिचरितइतिबोध्यम्। नीलघटत्वमित्यादौनीलघटादिवृत्तिधर्मोघटत्वादिक
मेवत्वाद्यर्थः तदेवचनीलघटादिशब्दानांप्रवृत्तिनिमित्तंनीलादिविशेषणवलाच्चतेनरूपेणनीलादिव्यक्तीनामेवभानेननीलसमा
नाधिकरणघटत्वादेवप्रवृत्तिनिमित्तत्वेनभासतेउपाधिभेदाच्चघटत्वादीनामपिभेदः नत्वत्रसंबन्धोभावप्रत्ययार्थः अभिन्नरूपत्वे
नपूर्वोत्तरपदार्थयोर्विशेष्यविशेषणभावातिरिक्तस्यतस्याभावात् एतेनप्रवृत्तिनिमित्तगुणजात्याद्योःसामानाधिकरण्यंतदुत्तरभाव
प्रत्ययार्थइत्यपास्तंमूलस्थत्वप्रत्ययप्रकृतितोभानाभावात् भानसत्त्वेपितस्यविशेष्यावृत्तितयाप्रवृत्तिनिमित्तत्वाभावेनभावप्रत्ययवा

च्यत्वेमानाभावात् नीलघटत्वसमुदायः प्रवृत्तिनिमित्तमित्यपि केचित् धवखदिरत्वमित्यादौ जातिसमुदायस्तद्वाच्यस्तत्रतस्यानुद्
भूतावयवत्वे एकवचनमुद्भूतावयवत्वे द्विवचनाद्यपि येप्यपेक्षावादिनो दण्डीत्यादाविनो द्रव्यमात्रवाचित्वं प्रकृत्यर्थस्य च तत्रा
न्वयः संबन्धश्च वाक्यार्थविधया लभ्यः एवं पाचकइत्यादावपि प्रकृत्यर्थत्वेनानुगतीकृतं दण्डाद्युप लक्षणीकृत्य अनन्तेषु
पि द्रव्येषु शक्तिग्रहसंभव इति वदन्ति तन्मतेपि संबन्धस्यैव शब्दप्रवृत्तावुक्तरीत्या निमित्तत्वात्तत्रैव भावप्रत्ययः सुलभः। संबन्धस्य
विभक्तिवाच्यत्वात्प्रकारतयाभानमिति तु नयुक्तम्। संसर्गिकविषयतयाभासमानेएव संबन्धपदप्रयोगात्। वाच्यस्यापि ष
ष्ठ्यादिभिः संसर्गतयाभानस्य सर्वसंमतत्वात्। यत्तु तत्तद्रूपेण धर्माणां शक्यतेति। तन्न। शक्त्यानन्त्यापत्तेः किंच तस्यापत्य
मित्यादिशास्त्राद्यथोपगवादीनामुपगवपत्यत्वेनैव बोधकता न तु तत्तद्रूपेण। तथा तस्य भाव इति शास्त्रबलादस्यापि धर्मत्वे
नैव बोधकतेत्यस्यौचित्यात्। अत एव घटवृत्तिर्धर्म इति बोध इत्ययुक्तम्। घटे घटत्वमित्यादेरनापत्तेश्चेति प्राहुः। पञ्चानां पू
रणः पञ्चमः पञ्चसंबन्धिपञ्चत्वसंख्यापूरण इति बोधः उद्भूतावयवभेदः समूहः प्रकृत्यर्थः अवयवः प्रत्ययार्थः वृक्षस्यावय
वो वार्क्षी शाखेतिवत्। तदस्यास्त्यस्मिन्निति मतुप्। वर्त्तमानकालोत्र विवक्षित इति भाष्ये स्पष्टम्। अत एव गवामतीतत्वेनागतत्वे
वा मतुपो न साधुत्वम्। यद्यपि बुद्धिसत्तासमाविष्टस्यैव शब्देन बोधात्सार्थेष्वव्यभिचारिणी तथाप्यस्तीत्युपादानसामर्थ्यादत्र

बाह्यसत्तैवास्तिपदेनोच्यते।नचसाऽसिद्धाबुद्धिसतएवबहिःसत्तातद्भावप्रत्यायनायवृत्तोस्तिनास्तीत्यादिप्रयोगात्।एवंचगोमानित्यतोवर्त्तमानसत्ताश्रयगोसंबन्धीतिबोधः।गोमानासीद्भवितेतितुबाह्यसत्ताविशिष्टगोसंबन्धरूपायागोमदवस्थायानाशेनभावित्वेनवातादृशावस्थाविशिष्टस्यगोमतोतीतत्वेनभावित्वेनवानेयम्।यद्वा।तादृशावस्थागतातीतत्वादेर्गोमत्यारोपः।एवमेवजीवत्येवतस्मिन्नीश्वरोयमासीत्।शिखीनष्टइत्यादेरुपपत्तिः।यत्रतुगवाङ्गोमतश्चातीतत्वन्तत्रयद्यपिगोषुवर्त्तमानसत्ताश्रयत्वंनास्तिअतीतेसंबन्धिनिवर्त्तमानगोसंबन्धश्चनास्तितथापिज्योतिष्टोमयाज्यस्यपुत्रोभवितेत्यादौयथायागगतातीतत्वस्यागोभावित्वप्रतीतिश्चभवितेत्येतत्समभिव्याहारात्तथाप्रकृतेगोसत्तायांवर्त्तमानत्वस्यागोतीतत्वादिप्रत्ययस्येत्यदोषः।यद्वासर्वत्रतथाव्यवहारविषयेगोमत्पदस्यलक्षणेतिकेपरेस्पष्टम्।यद्वेतिपक्षएवात्रयुक्तः।एवंचसंबन्धआश्रयश्चेत्युभयंसमुदायशक्यंसंबन्धएवप्रवृत्तिनिमित्तम्।यद्वाआश्रयाभेदमापन्नःसंबन्धएवशक्यः।नचसंबन्धस्यशक्यत्वेदण्डसंबन्धसंबन्धीतिबोधापत्तिरितिवाच्यम्।संसर्गविधयैवतस्यशक्यत्वात्।येगुणगुणिनोःसमानरूपाएवलोकेप्रयुज्यन्तेशुक्लादयस्तेभ्योमतुपोलुगुक्तोवार्त्तिककृतागुणवचनेभ्योमतुपोलुगिति।यत्तुसंसर्गिभेदकंयद्यत्तस्यापारंप्रतीयतेगुणत्वंपरतन्त्रत्वात्तस्यशास्त्रेउदाहृतमितितत्तुयस्यगुणस्यभावाद्द्रव्येशब्दनिवेशस्तदभिधानेत्वतलावित्यादावुपयुक्तम्।तदर्थस्तुसंसर्गिआधारेणसंबद्धंभेदकंस्या

अयस्येतरतोभेदकं सव्यापारमवच्छेदकत्वेन प्रतीयमानम्। तेनावच्छेद्यद्रव्यनिरासः। यद्यदितिवीप्सया जात्यादेरप्येवंभूतस्य गुणत्वमुक्तम्। परतन्त्रत्वादित्यनेन तद्व्यवहारप्रयोजकमुक्तं परतन्त्रो हि लोके गुण इत्युच्यते यद्यपि गुणगुणिनोः सोयमित्यभेदाध्यवसायेन लुकं विनापि शुक्लः पट इत्यादिसिद्धिः। तथापि पटस्य शुक्ल इति भेदव्यवहारस्यापि सत्त्वात् शुक्लवानित्येतद्व्यावृत्त्यर्थं लुग्वचनमेवं चास्य गुणिनि यौगिकत्वात्सर्वलिङ्गत्वं रूढत्वे तु गुणगुणिनोरुभयोरपि सर्वलिङ्गत्वं नियतलिङ्गत्वं वा स्यात् अयञ्च लुग् द्रव्यवाचकसमभिव्याहार एव प्रकरणादिना तदवगतौ वा। ध्वनितं चेदं पूरणगुणेति सूत्रे भाष्ये। गुणिलिङ्गास्तु तद्वतीति कोशस्य मतुब्लुकाऽभेदेन वा तद्वति वर्त्तमानादित्यर्थः। यदि त्वनभिधानादेव ततो मतुबाद्यनुत्पत्तिः सर्वलिङ्गत्वमप्यभिधानस्वभावादेव तदा व्यर्थं लुग्वचनम्। जातेस्तु घटादिशब्देभ्यो न कदापि द्रव्याद्भेदेन बोधः। शावलेयस्य गौरिति प्रयोगाभावादिति न तेभ्यो द्रव्ये मतुबादीत्याकरे स्पष्टम्। प्रकारवचने थाल्। प्रकारोऽत्र न सादृश्यमन्यथा सर्वथेत्यादौ तदप्रतीतेः किन्तु सामान्यस्य भेदको विशेषः प्रकारः बहुभिः प्रकारैर्भुङ्क्ते इत्यतो बहुभिर्विशेषैरित्यर्थप्रतीतेर्यथा हरिस्तथा हर इत्यादौ यद्विशेषधर्मवान् हरिस्तद्विशेषधर्मवान् हर इति बोधः। हरिसदृशो हर इति तु फलति। यत्तद्भ्यां तयोः प्रकारयोरैक्यावगतौ तादृशैकधर्मेण निमित्तेन मानसस्य तथा बोधस्याङ्गीकारात्। वचनग्रहणाच्चात्र जातीयर्विधौ स्थूलादिभ्यः प्रकारवचने कनित्यत्र च प्रकारवान् प्रत्ययार्थः थालाजातीयरादेर्बोधस्तु न तथा जाती

ल॰मं
५१

पचकइत्यादिभाष्यप्रयोगात् एकधातुकुर्वित्यादेरेकप्रकारंकुर्वित्यादिप्रकारेणबोधः अनेकराशेनैकध्यंकुर्वित्यत्रैकत्वसंख्याविशिष्टंकुर्वितिबोधः सहितंकुर्वितिफलतिवैयाकरणपाशः कुत्सितवैयाकरणत्ववानित्यर्थः एकदेशसंबन्धोत्रशब्दशक्तिस्वभावात् एवमन्यत्रापिप्रवृत्तिनिमित्तकुत्सायामेवायम्। अयमेषांशुक्लतमइत्यादावतिशायनेतमबिष्ठनौ। अतिशायनंप्रकर्षः सचेतरस्यन्यूनीकरणरूपोभिभवस्तत्रवर्त्तमानात्स्वस्यइत्यर्थः तेनाभिभवकर्त्तृत्वद्योतकोय इतराभिभवकर्त्ताशुक्लइत्यादिरीत्याबोधः यद्यपिद्रव्येनस्वतःप्रकर्षस्तथापिप्रवृत्तिनिमित्तभूतगुणादिगतप्रकर्षेणपरंपरयाद्रव्यस्यापिप्रकर्षः पाचकतरइत्यादौप्रवृत्तिनिमित्तसंबन्धप्रतियोगिक्रियागतप्रकर्षेणप्रकर्षोबोध्यः अयमेवचद्रव्यप्रकर्षउच्यतेअतएवोच्चैस्तरस्तरु रित्यादावाम्नमेचैस्तमामित्यादौत्वधिकरणशक्तिप्रधानतयातस्याएवप्रकृत्यर्थगुणप्रकर्षेणप्रकर्षइत्याम्भवत्येवाद्रव्यप्रकर्षसत्त्वात् तत्रशुक्लगुणानांनानात्वेएकनिष्ठस्यापरगुणाभिभावकत्वंस्पष्टमेव। सर्वाश्रयेष्वेकोगुणःसावयवइतिमतेक्वचिदाश्रयेल्पं

क्वचिदधिकमितिस्वाश्रिताल्पत्वाधिकत्वाभ्यांभेदारोपेणतदुपपत्तिः एकंनित्यंनिरवयवंचेतिमतेपिऔज्ज्वल्यादिगुणान्तरेणमिश्रणात् शुक्लस्यप्रकर्षः कृष्णादिमिश्रणेत्वपकर्षः यथाजात्युत्पलादिवासितमल्लिकायागन्धप्रकर्षः एवंरसगन्धस्पर्शादिष्वपिगोध्यमगोतरइत्यादौप्रवृत्तिनिमित्तभूतजातेःप्रकर्षाभावेपितत्सहचरितवाहदोह्यादिगतातिशयमादायप्रत्ययोयथाप्रयोगं

५

एमः
५१

दो। ध्यः। द्व्यादिभ्यस्तु न प्रत्ययस्तदर्थे प्रकर्षाभावात्। बहुशब्दात्तु भवत्येव संख्याधिक्यकृतातिशयस्य तत्र वक्तुं शक्यत्वात्। बहूनां मध्ये एकस्यातिशये तमबादिः। द्वयोरेकस्यातिशये यद्रूपप्रतिपादकशब्दे उपपदे तरबादिः। यथायमनयोः पटुतरः अस्माकं च देवदत्तस्य च देवदत्तोऽभिरूपतर इति। बह्वर्थके विभागप्रतियोगिन्युपपदे तरबादिरेव उदीच्याः प्राच्येभ्यः पटुतरा इति। यथा सांकाश्यकानां पाटलिपुत्रका अभिरूपतमा इत्यत्र बहूनामेव प्रतीतेस्तमप्। राश्यपेक्षं द्वित्वं तु न शब्देनोपात्तम्। पटु भवान्पटुरासीत्पटुतरश्चैषम इत्यादावेकस्यैव द्रव्यस्य गुणभेदेन भेदमारोप्य तरब् गुणान्तरयोगेऽन्यो भवान्संवृत्त इति व्यवहारात्। क्वचित्प्रकृत्यर्थगतप्रकर्षे तरप्। यथा नतरामित्यादौ। तत्र हि प्रतियोग्यसमानाधिकरणत्वरूपमात्यन्तिकत्वमभावगतः प्रकर्षः। एवमेव घटस्य शुक्लतरो रूपमित्याद्युपपत्तिः। प्रकृत्यर्थविशेष्यगतप्रकर्षासंभवे तु प्रवृत्तिनिमित्तादिगतप्रकर्षे तरप्। एवं द्योत्यार्थप्रकर्षद्योतकात्तरब् नितराङ्गच्छतीत्यादौ। गुडकल्पा द्राक्षा बहुगुडो द्राक्षेत्यादौ गुडादिशब्दानां सादृश्याद् द्राक्षायां वृत्तिस्तत्र सादृश्यप्रयोजकस्य माधुर्यादेरीषदसमाप्तिर्गम्यते तेनेषत्सादृश्ये प्रत्ययाभावः अत्र सर्वत्रोपमा गम्या। गुडगतमाधुर्याश्रयेण द्राक्षायां गुडत्वारोपात् गुडत्वजात्यभावाच्चेषदसमाप्तं गुडत्वं द्राक्षायामिति गुड इयं द्राक्षा गुडकल्पा द्राक्षेति प्रयोगद्वयमन्ये। न च सादृश्यरूपेषदसमाप्तिः प्रत्ययार्थ एवास्तु गुणगुणिनोर्नियमतोऽभेदोपचाराच्च पटुकल्पश्चैत्र इत्यादिसिद्धिरिति वाच्यम्। सादृश्यस्य द्राक्षाश्रयत्वे बहुगुड इत्यस्यानाप

तेः गुडाश्रयत्वे तु भेदविरोधाद् गुडकल्पेत्यादिप्रयोगासिद्धेश्च। स्वार्थिकत्वे तु प्रकृतितो लिङ्ग-तदतिक्रमौ सिद्धौ। उपमानगुडाभिन्ना
द्राक्षेति बोध इति परे। याचकक इत्यादौ कुत्सिते इति कः। कुत्सितयाचकत्ववानित्यर्थः। प्रवृत्तिनिमित्तकुत्साया असंभवेऽश्वक इत्या
दौ तत्सहचरितधर्मान्तरगतकुत्साश्रयः प्रत्ययः। कुत्सितक इत्यादौ यदा कुत्सितत्वं कुत्स्यते नास्य सम्यक् कुत्सितत्वं किं तु शत्रुभि
र्द्वेषेणारोपितमिति तदा प्रत्ययः। यद्वाऽनिर्धारितधर्मविशेषनिबन्धना कुत्सा प्रवृत्तिनिमित्तं ब्रह्महत्यादिनिबन्धना यान्तस्यां प्रत्य
यः। यथा प्रकृष्टतम इति प्रकर्षस्य प्रकर्षे तरप्। यद्वा नियमेन कुत्सासंबन्धं प्रतिपादयितुं प्रवृत्तिनिमित्तकुत्सायामेव पुनः प्रत्य
यः। किं च शब्दः स्वार्थजात्यादिविषयाभिधाग्रहविषयीभूत्वेतरानपेक्ष एव तत्संबद्धं द्रव्यमाह ततः संख्याद्यपेक्षयाऽन्तरङ्गत्वाद्द्रु
तं लिङ्गमाह। तत एव तद्बोधकं टाबादि पूर्वं ततः क्रियापेक्षकारकापेक्षयान्तरङ्गत्वात् संख्यामाह ततः कारकमित्येवं कल्पितक्र
मेण शास्त्रप्रक्रियानिर्वाहः। एवं चैतत्सकलबोधकविभक्त्यन्तस्यैव प्रियकुत्सितादौ वृत्तिरित्युपस्थितलिङ्गादिगततयापि कुत्सा
दिबोधनं प्रत्ययेन। तत्र स्वार्थकुत्सा यथा। पण्डितक इति। द्रव्यकुत्सा यथा। शुक्लकं रूपमित्यादौ। लिङ्गकुत्सा यथा। प्राप्य गाण्डीवध
न्वानं विद्धि कौरवकान् स्त्रियः इति। संख्याया यथा पुत्रकः। शतं शतभरणे यद्दुःखन्तदेकस्यैव भरणे इति एकत्वसंख्याकुत्सेति दि
क्। अश्व इवाश्वकः इवे प्रतिकृताविति कन्। उपमानाश्वाभिन्न इति बोधः। पूज्यप्रतिमाचित्रनरध्वजप्रतिमासु शिवाभेदबुद्धिरे

वनत्विवार्थप्रतीतिरितिनतत्रप्रत्ययः।स्पष्टंचेदंरसनिरूपणेप्रकाशे।काकतालीयंकाकइवतालमिवेतिविग्रहेसमासाच्चतद्विषया
दितिच्छः।तत्रामाण्यादिवार्थेपिसुप्सुपेतिसमासः।तत्रपूर्वपदमुपमानकाकागमनपरम्।उत्तरपदंचोक्तपूर्वपदार्थसमानाधिकरणो
पमानतालपतनपरम्।समुदायश्चोपमेयपरः।एवंचोपमानकाकागमनसमानाधिकरणोपमानतालपतनाभिन्नंदेवदत्तागमनसमा
नाधिकरणंचोरपतनमितिबोधः।तत्तदुपमेयबोधेतत्तदुपमेयवाचकसमभिव्याहारस्तन्त्रम्।ततस्तद्धितेसमासार्थोपमानप्रयोज्यो
पमानभूततालकृतकाकवधाभिन्नःसमासार्थोपमेयप्रयोज्यश्चौरकृतदेवदत्तवधइतिबोधः।एतेनपरस्परसंबन्धाभावेनासामर्थ्या
द्वृत्तिद्वयमपिदुर्लभमित्यपास्तम्।यत्तुकाकागमनसदृशसमानाधिकरणकाकागमनसमानाधिकरणतालपतनसदृशप्रयोज्य
तत्
तालकृतकाकमरणसदृशंदेवदत्तमरणमितिबोधइतिँतुनिपातवादेदूषितम्।उपमानोपमेयभावश्चाकस्मादुपनतत्वेनउपमेय
वाचकतत्तत्पदसमभिव्याहारेणप्रयोज्यतयाकदाचित्काकमरणस्यकदाचित्काककृतोपभोगस्यभानम्।उपमानतावच्छेदकरू
पेणबोधकाभावाच्चच्छप्रत्ययोपमायास्तुपमा नलोपइत्यालंकारिकाः।पञ्चकृत्वोभुङ्क्ते पञ्चशब्दः पञ्चत्वसंख्योत्पत्तिकपरः तस्य
चक्रियायामन्वयः।संख्यायाःक्रियाभ्यावृत्तिगणनेकृत्वसुजितिसूत्रात्।तत्राभ्यावृत्तिःपुनःपुनर्जन्म।पञ्चसंख्योत्पत्तिकाभुजिक्रि
येतिबोधः।प्रत्ययस्तुस्वार्थेकर्त्तृबहुत्वेतुपञ्चकृत्वोभुञ्जतइतिबहुवचनमपि।त्रिरावृत्तादशेत्यादावावृत्तिक्रियाजन्मगणनेएवसु

चू। अत्र क्रिया न श्रूयते तत्र भवति क्रियाध्याहारो बोध्यः। पञ्चकृत्वः पाचकः पक्त इत्यादीष्टमेव। कृत्वसुजर्थीनान्तथाश्रयक्तामपि। रूढिनिष्ठा घञादीनां धातुः साध्यस्य वाचक इति हर्युक्तेः। अत्र हेलाराजः। इत्यादियोगे कृत्वसुजादयो भवन्त्येवेत्याह कृत्येत्यादिको नपुंसकविषयः। रूढिशब्दास्ताच्छीलिकाः। घञादयः भावकर्मादिविहिता आदिना तृजादयः। द्विः शयितव्यं द्विः सुकरो द्विर्हसितं द्विर्दत्तवान् द्विः कर्त्ता द्विः पाको द्विर्भुक्तो गत इत्युदाहरणानीति। अत एव द्विः प्रयोगो द्विर्वचने चिर्द्विवद्धं सुवद्धं भवतीत्यादि सङ्गच्छते। अतिप्रसङ्गस्त्वनभिधानाद्वारणीयः। तत्प्रकृतवचने मयट्। प्रकृतशब्देनात्र प्रचुरम्भावे ल्युट् तेन प्रचुरार्थबोधकात्प्रथमान्तात्स्वार्थे मयट्। यथा घृतमयं वर्त्तते प्रचुरघृतमित्यर्थः। यद्वा। अधिकरणे ल्युट्। प्राचुर्यवदन्नादिबोधकादधिकरणेर्थे मयट्। यथान्नमयो यज्ञः प्रचुरान्नवानित्यर्थः। आनन्दमयो ब्रह्म विकार्यं ब्रह्मेत्यादावयमेव मयट्। प्राचुर्यन्तु तत्र निर्धर्मकत्वमेव व्यावहारिकमपरिच्छेद्यत्वं च। अनन्तत्वप्रतिपादकश्रुतेः। न च प्राचुर्यस्य स्वसमानाधिकरणविरोध्यल्पतासापेक्षत्वेन दुःखानुवृत्तेरपि प्रतीत्यापत्तौ तस्य ब्रह्मत्वहानिरिति वाच्यम्। वैपुल्यरूपप्राचुर्यस्य तदपेक्षत्वेप्य परिच्छेद्यत्वरूपस्य तस्य तदनपेक्षत्वात्। सत्यं ज्ञानमनन्तं ब्रह्मेति तैत्तिरीयश्रुतावनन्तत्वोक्तेः। प्राणमयादावप्ययमेव मयट्। विकाररूपार्थस्याज्ञस्येनोपपत्त्यभावात् तदवच्छिन्नत्वेन तद्विकारत्वस्यादृष्टत्वात्। न हि घटमय आकाश इति भवति। किं चानन्दमयेन ब्रह्मानन्दविकारत्वम्। तस्याविकारित्वात्। नापि वृत्त्या

नन्दविकारत्वम्।तद्विषयविज्ञानस्यततआन्तरत्वेनतस्यविज्ञानमयान्तरत्वानुपपत्तेः।प्रव्रज्याहोमेन्नमयप्राणमयमनोमयविज्ञा
नमयानन्दमयामेशुध्यन्तामितिमन्त्रेशुद्धिस्तद्विषयावरणनाशरूपेतिनविरोधइतिव्याससूत्रवृत्तिकृतः।ह्लादैकमयीमितिप्रकाशप्र
योगेप्ययमेवमयट्एकपदप्रयोगाद्स्वनिरूपणोक्तरीत्याचतत्राप्यपरिच्छेद्यत्वरूपप्राचुर्यस्यैवभावात्।ब्रह्मणआनन्दरूपत्वं
न्तुआनन्दोब्रह्मेत्यादिश्रुतिबलात्।नचदुःखज्ञानकालेसुखानुभवाभावेनसुखज्ञानयोर्भेदादेकस्यात्मनउभयरूपत्वंनयु
क्तं।श्रुतावानन्दशब्दस्तुदुःखाभावेगौणःस्पष्टंचेदंसांख्यसूत्रेइतिवाच्यम्।इष्टनाशस्थलेसुखनिवृत्त्यैवतद् दुःखव्यवहारो
पपत्तौतस्यापिदुःखजनकत्वानापत्तेः।सर्वत्रतत्तदुपादेयवस्त्वभावकृतदुःखनिवृत्त्यैवतत्तद्वस्तुलाभेसुखव्यवहारोपपत्तौ
सुखपदार्थविलयापत्तेश्च।तस्मादिष्टनाशस्थलेदुःखकार्यस्यसोरस्ताडनरोदनादिरूपस्योपलम्भेनचिरविरहिपीडितस्यका
न्तालाभेविरहजदुःखनिवृत्तिवन्निरवधिसुखस्याप्यनुभवेनबलवदनिष्टनाशस्थलेदुःखनिवृत्तेरिवसुखस्याप्यनुभवेनचला
घवात्दुःखनिवृत्तिसामग्रीत्वेनसुखप्राप्तिजनकतासुखनिवृत्तिसामग्रीत्वेनदुःखप्राप्तिजनकतावाच्या।एवंचतत्त्वज्ञानस्यापि
दुःखनिवृत्तिसामग्रीत्वेनसुखप्राप्तिजनकताप्राप्तातत्रमुक्तिकालेऽन्तःकरणलयेनवृत्तिरूपकार्यसुखप्राप्त्यसंभवाद्आत्मसुख
प्राप्तिरेवतथेतितस्यसुखरूपत्वसिद्धेः।तस्याःसामग्र्याःसुखजनकत्वमितिमते प्यावरणभङ्गादिनिष्ठजन्यत्वस्यतत्रारोपात्तदो

ल.सं. क्ष।एतदेवाभिप्रेत्याचार्यैर्द्वन्द्वइतिसूत्रेभाष्येसुखप्रतिघातेनदुःखंदुःखप्रतिघातेनसुखमितिविप्रतिषिद्धावेतावित्युक्तम्।तेनहिसुखप्र ५
५४ तिघातेनेत्यादितृतीयाबलात्सुखप्रतिबन्धिकायास्तन्नाशिकायाश्चसामग्र्यादुःखजनकत्वंदुःखप्रतिबन्धिकायास्तन्नाशिकायाश्चसु
खजनकत्वंस्पष्टमेवोक्तम्।ननुदुःखार्तस्यदुःखनिवृत्तिमात्रफलकतयाविषभक्षणेप्रवृत्तिर्दृश्यतेतद्भक्षणस्यदुःखनाशकत्वेपिसुखजन
कत्वाभावेनव्यभिचारःस्पष्टंचेदंतथाप्युक्तमितिसूत्रेभाष्यकैयटयोरितिचेन्न।अतःपरम हंसुखीत्यनुभवेनतत्राप्याभिमानिकसुखस
त्त्वात्।अतएवभाष्येऽन्यानिदुःखान्यनुनिशम्यविषभक्षणमेवज्यायोमन्यतेइत्युक्तम्।तत्रज्यायइत्यस्यप्रशस्यतरमित्यर्थः।तत्त्वंचसुख
साधनत्वज्ञानादेव।एतेनभारोत्तीर्णस्याहंसुखीत्यादिव्यवहारोगौणइत्यपास्तम्।किंचदुःखाभावस्यात्मरूपत्वेदुःखज्ञानकालेतद्भा
वज्ञानाभावादाद्योदोषस्तथापिदुःखज्ञानकालेआनन्दानुभवसुकल्पितानन्दत्वांशेआवरणात्।नह्यस्माकंनिर्धर्मकतज्ज्ञानसं
भवः।किंचशृङ्गारकरुणादिरसानुभवकालेसुखानुभवसत्त्वात्तत्रचान्यसुखासंभवाद्ब्रह्मसुखमेवभासतइतिप्रकाशादौस्पष्टम्।त
थाचश्रुतिःरसोवैसः।रसंह्येवायंलब्ध्वानन्दीभवतीति।एवंचरसानुभवोपिब्रह्मणःसुखरूपत्वेमानम्।अतएवगीतायामुक्तम्।अभ्यासाद्र
मतेयत्रदुःखान्तंचनिगच्छति।यत्तदग्रेविषमिवपरिणामेमृतोपमम्।तत्सुखंसात्त्विकंप्रोक्तमात्मबुद्धिप्रसादजमिति।यत्रसमाधौभास एम:
मानसुखेतत्रसुखेरतौदुःखनाशप्राप्त्युक्त्यातत्सुखस्यतदतिरिक्तत्वंस्पष्टमेवोक्तम्।अग्रे समाध्यभ्यासकालेःसात्त्विकत्वंसत्त्वाविर्भा ५४

वप्राप्यत्वात्। तदेवाहात्मबुद्धिप्रसादजमिति प्रसादजाताभिव्यक्तिकमित्यर्थः। दीधितिकारोपि नित्यसुखाभिव्यक्तिर्मुक्तिः न च तत्र मा
नाभावः आनन्दं ब्रह्मणो रूपं तच्च मोक्षे प्रतिष्ठितमिति श्रुतेस्तत्वादित्याह। सार्वभौमोपि। सुखं नित्यानतिशयं तत्साक्षात्कार एव च। मोक्षस्ते
नोपपद्यन्ते श्रुतयोपि यथाश्रुताः। स्वप्रकाशसुखव्यक्तिरेव मुक्तिस्तु वस्तुतः। व्यापकं सर्वजीवानामानन्दमयमैश्वरम्। रूपं श्रुतिबलादि
ष्टं तत्साक्षात्कार एव च। तद्भेदोपि जीवानामिष्टएवेति दृश्यतामितीत्यलम्। अकृत्स्नः कृत्स्नः संपद्यते तथा करोति कृत्स्नीकरोति। यत्र प्र
कृतिरेव विकारसादृश्यमापद्यमाना विवक्ष्यते तत्र च्विप्रत्ययः। कृभ्वस्तियोगे संपद्यकर्त्तरि च्विरभूततद्भाव इति वक्तव्यमिति सूत्रवा
र्त्तिकतद्भाष्यबलात्। अतथाभूतस्य तथाभावे कृभ्वादियोगे संपद्यकर्त्तृत्वेन विवक्षितार्थवाचकाच्च्विरिति तदर्थः। विकारवाचकात्स्व
सादृश्येन प्रकृतेर्वर्त्तमानादयं प्रत्ययः। करोत्यादिक्रियाकारकत्वं प्रकृतिभूतस्यैव विकारसादृश्यं प्राप्तस्येति बोध्यम्। अतएव संघीभ
वन्ति ब्राह्मणाः त्वद्भवति देवदत्त इत्यादौ वचनपुरुषव्यवस्था। तदुक्तं हरिणा। पूर्वावस्थामविजहत् संस्पृशद्धर्ममुत्तरम्। संमूर्छित
इवार्थात्मा जायमानोभिधीयते। पूर्वावस्था कारणावस्था। उत्तरं धर्मम्। कार्यावस्थाम्। एवं चावस्थाद्वयावच्छिन्नमेकं वस्तु पूर्वावस्थानुगुण्ये
नोत्तरावस्थाप्राप्त्युन्मुखं विकाररूपमिव प्राप्तं जायते इत्यभिधीयते। असंघः संघो भवतीत्यादौ। अतएव प्रकृतिविकृत्योः सामाना
धिकरण्यम्। न त्वेवमुभयोः कर्त्तृत्वापत्तिः। अतउक्तम्। सव्यापारतरः कश्चित्कश्चिद्धर्मैः प्रतीयते। संसृज्यन्ते च भावानां भेदवन्त्योपि शक्त

यद्लि। लक्ष्यानुसाराद्वाक्ये विकृतेरेव साक्षात्कर्तृत्वं वृत्तौ तदीयलौकिके च प्रकृतेरेव साक्षात्कर्तृत्वम्। अत्वं त्वं संपद्यते इत्यर्थे त्वद्भवतीत्येव भवितव्यमिति युष्मद्युपपद इति सूत्रभाष्योक्तेः। अयमेव प्रकर्षस्तरपोक्तः संसर्गः कर्तृशक्त्योरेकवृत्तित्वरूपः। अत एवात्वं त्वं भवति त्वद्भवतीत्यादौ प्रकृतेः कर्तृत्वात् प्रथमपुरुषः। त्वमत्वं भवसीत्यर्थे त्वद्भवसीत्येव। वाक्ये तु साम्याद्विकारस्यैव। सुवर्णपिण्डः खदिराङ्गारसदृशे कुण्डले भवत इति पस्पशायां भाष्यप्रयोगे विकृतेः कर्तृत्वदर्शनात्। किंच च्व्यन्ते तद्वाक्ये च प्रकृतिरूपमनारोपितं विकाररूपं त्वारोपितम्। आरोपितानारोपितसमभिव्याहारे नारोपितस्यैव कर्तृत्वप्रतीतिः। आरोपितस्यावस्तुत्वेन क्रियाजनकत्वरूपकारकत्वाभावात्। द्वयोरपि वस्तुत्वे तु विकारस्यैव मुख्यतया जायमानत्वादिना तस्यैव साक्षात्कर्तृत्वं प्रकृतेस्तु तदभेदेन तद्द्वारा कथंचिदिति न कदापि सुवर्णपिण्डाग्र्या विभक्तिरिति बोध्यम्। एवं च्विविकृतेःऽप्रकृतेर्वापि वाचकः प्रकृतेः संख्यां गृह्णाति विकृतेर्नेत्विति प्राचीनप्रवादः च्विप्रत्ययविषयक एवं च्विप्रत्ययान्ते सादृश्यमूलाभेदाध्यवसायेन विकाराभेदमापन्नप्रकृतेः कर्तृत्वेनोभयोरप्युक्तत्वम्। महद्भूता ब्राह्मणीत्यादौ सामानाधिकरण्यं गौणत्वं चेति बोध्यम्। एवं च कारणीभूतो दण्ड इत्यादौ च्विप्रत्ययो साधुरेव। सादृश्यमूलकविकाराभेदप्रतीतावेव तत्प्रवृत्तेः। ध्वनितं चेदमोत्सूत्रे भाष्ये इत्यन्यत्र निरूपितम्। ब्रह्मीभवन्तीत्यादिप्रयोगे छान्दसत्वादत्यन्तस्वार्थिकश्च्विरिति बोध्यम्। इति तद्धिताः॥ वृक्षं वृक्षं सिञ्चति। अत्र वीप्सायां द्वित्वम्। अत्र स्वप्रकृत्यर्थनिष्ठव्याप्यत्वं तन्निरूपितं व्यापकत्वं च शाब्दबोधविषयः

व्याप्तिमवबोधयिषोरिदंवाक्यमित्यवगमाद्वीप्साप्रयोक्तृधर्मएव। व्यापकत्वंचबहुशः प्राग्दर्शितदिशानिर्वाह्यम्। तच्चद्विर्वचनेनपृथक्संख्यायुक्तानांनानाद्रव्याणान्तदाबुद्धिस्थानांप्रत्येकरूपेणगुणक्रियाद्रव्यैर्युगपदन्वयेभवतितत्रैवव्यापकत्वप्रतीतेः। पृथक्संख्यायुक्तानामित्यनेनैब्राह्मणोनहन्तव्यइत्यादौजात्यभिप्रायेणप्रयोगेन। द्वित्वम्। एकशेषविषयेचन। अतएवगर्गाःशतंदण्ड्यन्तामित्यादौनप्रत्येकंशतंदण्डनंतथासतिवीप्साविषयापहारःस्यात् प्रत्येकंशतदण्डनेसंख्यान्तरोपजननाच्छ्रुतसंख्याश्रवणंचविरुद्धंस्यात् वृषलेनंप्रवेष्टव्यमित्यादौप्रत्येकंसमुदायेचवाक्यसमाप्तिः ब्राह्मणैःप्रवेष्टव्यमित्यादौच। ब्राह्मणाभोज्यन्तामित्यादौभोजनस्यतृप्तिफलकत्वाद्न्नरूपत्वाच्चप्रत्येकमेवसमाप्तिर्नसमुदाये संभवात्। युगपद्ग्रहणाच्चक्रमविवक्षायांनतत्रानेकप्रयोगस्यैवदर्शनात्। तदाबुद्धिस्थानामित्यनेनजगतीतलवर्तिसर्ववृक्षसेचनाभावेपितथाप्रयोगःप्रकरणादेःसंकोचकस्यसत्त्वात्। यत्रतुसङ्कोचकंनास्तितत्रासङ्कोचदृष्टएव। जातोजातोनिधनमुपैतीतियथा। व्यापकत्वंचतदर्थस्ययेनसंबन्धेनेतरान्वयस्तत्संबन्धेबुध्यतेसंबन्धश्चविभक्त्यर्थएवं चं चतादृशव्यापकत्वविशिष्टस्यसंसर्गतयाभानमत्रैवद्विर्वचनन्तात्पर्यग्राहकमेवंचब्राह्मणायब्राह्मणायशतंदेहीत्यादौबुद्धिस्थयावद्ब्राह्मणोद्देश्यकंशतकर्मकन्दानमितिबोधःब्राह्मणव्यापकंशतदानमितितुफलति। संबन्धेएकसंबन्धिव्यापकत्वबोधस्यापरसंबन्धिनितद्व्यापकताबोधफलकत्वात्। एवमन्यत्राप्यूह्यम्। यद्यप्युद्देश्यविधेययोरन्यतरस्यवीप्सयाप्रयोगेणोभयत्रापिव्याप

मं कत्वबोधोभवत्येवतथापिक्वचित्स्फुटप्रतीतयेक्वचिदावश्यकत्वद्योतनायोभयत्रापिद्वित्वंयथाब्राह्मणायब्राह्मणायशंतंशतंदेहीत्या ५
६ दौ।एकैकस्यशतंशतमित्यादौच यत्रयत्रधूमस्तत्रवह्निरित्यादौयद्व्यापकाधिकरणत्ववत्त्वाधूमसत्तातद्व्यापकाधिकरणतावत्त्वावह्नि
मत्तेतिबोधः।एवंहिवह्निधूमयोर्व्याप्यव्यापकताफलति।गजेगजेनमौक्तिकमित्यादौगजव्यापकाधिकरणतावत्कमौक्तिकसत्ताभावइति
बोधः।सर्वाधिकरणतायांगजव्यापकत्वरूपविशेषणाभावमादायपर्यवस्यतिशेषेशेषेनभृङ्गमित्यत्रतादृशाऽभावस्यविशेष्याभावप्रयु
क्तस्यबोधः।राज्ञोराज्ञःपुरुषइत्यादौबुद्धिस्थयावद्राजस्वामिकःपुरुषइतिबोधः।ग्रामोग्रामोरमणीयइत्यादौविशेष्यविशेषणभावस्यैवसंस
र्गतयारमणीयनिष्ठविशेषणतानिरूपितग्रामव्यापकविशेष्यतावान्ग्रामइतिबोधः।अत्रवनेरमणीयोरमणीयःप्लक्षइत्यादौरमणीयव
व्यापकविशेषणतानिरूपितविशेष्यतावान्प्लक्षइतिबोधः।योयोधूमवान्सोऽग्निमानित्यत्रयच्छब्दोधूमवानित्यर्थकएवयथायंचन्द्रइ
त्यतिशयोक्ताविदंपदार्थश्चन्द्रएवेतिदशमेप्रकाशेउक्तम्।यच्छब्दप्रयोगस्तुलघुभूतेद्विरुक्तप्रयोगायरमणीयोरमणीयइत्यत्रेवबोधः।धूमवह्न्यो
र्व्याप्यव्यापकभावस्तुफलति।यत्तुअत्रधूमव्यापकत्वस्यवह्नौबोधः।धूमवान्धूमव्यापकवह्निमानितितन्न।अनेकव्युत्पत्तिविरोधात्।जातोजातोनिध
नमुपैतीत्यादौजातव्यापकविशेषणतावत्कर्त्तृकानिधनप्राप्तिरितिबोधः।क्वचित्तुव्याप्यव्यापकभावसंबन्धएवविभक्त्यर्थः।यथावृक्षंप्रतिसिंचतीत्या राम:
दौ।अत्रद्विवचनप्रतिपाद्यौतात्पर्यग्राहकौ।सर्वान्घटानानयेत्यादौनद्वित्वंकार्त्स्न्यस्यसर्वशब्देनोक्तत्वात्।एकंएकमित्यादौबहुवचनन्तेनप्रत्येकनिष्ठैक ५६

त्वस्यैवतत्रभानात्।ब्राह्मणायशतंदेहीत्यादौचप्रत्येकंशतदानप्रतीतिरेकशेषेतुनैवम्।ब्राह्मणेभ्यःशतंदेहीत्युक्तेनियमेनप्रत्येकंशतदानाप्रतीतेः।यदा
नुपरिगृहीतद्वित्वानांवीप्सातदाब्राह्मणोब्राह्मणोपूजयद्वाभ्यांद्वाभ्यांत्रिभ्यस्त्रिभ्यइत्यादिभवत्येव।अत्रेदंबोध्यम्।यत्रयत्पदे[illegible]ज्ञातत्रतत्पदेनसा।य
त्पदेपुंद्वित्वेनयत्पदार्थसंसर्गेयच्छब्दार्थतावच्छेदकव्यापकत्वेबोधितेविनापिद्वित्वंतत्पदार्थसंसर्गेतच्छब्दार्थतावच्छेदकव्यापकत्वबोधात्।कार
कंचेद्विज्ञानीयाद्यांयांमन्येतसाभवेदित्यकथितंचेतिसूत्रभाष्येप्रयोगात्।व्यञ्जनानियस्ययस्यावःकार्यमुच्यतेतन्तंभजन्तइत्यज्झदेरितिसूत्रस्यभा
ष्यप्रयोगात्स्पष्टत्वायक्वचित्तत्पदेपिवीप्साद्वित्वम्।यत्तुनात्रद्विर्वचनंकिंतुभिन्नौयतच्छब्दौभिन्नरूपेणैवबुद्धिस्थपदार्थपरामर्शकावितितन्न।ब
हुर्थप्रतिपिपादयिषायांबहुयच्छब्दप्रयोगापत्तेः।द्वाभ्यामेवसर्वप्रतीतिरितिचेदेकेनैवसर्वप्रतीत्युपपत्तौद्वितीयप्रयोगस्यापिवैयर्थ्यापत्तेरित्य
लम्।इतिवीप्साः।एवंप्रकृतिप्रत्ययाद्यर्थबोधनद्वाराशास्त्रंविशिष्टस्यपदपदार्थस्यबोधनद्वारावाक्यार्थस्यबोधकंसल्लोकेव्यवहारोपयोगियद्यपिशा
स्त्रज्ञानंविनाप्रकारान्तरेणापिपदार्थज्ञानंलोकेदृश्यतेतथापिशास्त्रीयप्रकृतिप्रत्ययव्युत्पादनपूर्वकंविजातीयतज्ज्ञानपूर्वकप्रयोगस्यचित्तशुद्धिद्वाराप
वर्गसंपादकत्वेनशास्त्रज्ञानस्यावश्यकत्वात्।तदुक्तंहरिणा।तद्द्वारमपवर्गस्यवाङ्मलानांचिकित्सितमिति।एवंलघुनोपायेनसर्वशब्दप्रतिपत्तौचशा
स्त्रस्योपयोगोबोध्यइतिशिवम्।अधीत्यफणिभाष्याब्धिंसुधीन्द्रहरिदीक्षितात्।न्यायतन्त्रंरामरामाद्वादिरक्षोघ्ररामतः।याचकानांकल्पतरोररिकक्ष
हुताशनानांशृङ्गवेरपुराधीशरामतोलब्धजीविकः२सर्वतन्त्रार्थतत्त्वज्ञःसर्वतन्त्रनिबन्धकृत्।वैयाकरणनागेशःस्फोटायनऋषेर्मतम्।परिष्कृत्यो
क्तवांस्तेनप्रीयतामुमयाशिवः३दृढस्वर्केष्वनाभ्यासइतिचिन्त्यंनपण्डितैः।दृषदोपिहिसन्तीर्णाःपयोधौरामयोगतः४शब्देन्दुशेखरंपुत्रंमञ्जूषांचै
वकन्यकाम्।स्वमतौसम्यगुत्पाद्यशिवयोरर्पितोमया ॥५॥ इतिश्रीवैयाकरणसिद्धान्तमञ्जूषाख्यःस्फोटवादःसमाप्तः ॥

CC-0. In Public Domain. Digitization by eGangotri

विद्योदयो निराकुर्यादविद्यातिमिरं सदा

इतिमञ्जूषा

सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

8025

॥श्री काशीजी मे महल्ला घुघुरानासामा की गली श्री पुनवावू हरखचंद्जी के वाडे मे दु
र्गाप्रसाद कटारे के गणेशयंत्रालय मे ग्रंथ करी टीका छापी गयी लिखा महेश पांडे छाप
नेवाला रामफल जिस्को लेना होय उसे चांदनी चौक मे कुंज गली के पश्चिम फाटक के।
॥पास दुर्गाप्रसाद कटारे के दुकान पर मिलैगा॥

टी.
शांकरी·
१

॥श्रीगणेशाय नमः॥ आद्गुरिति॥ यद्यपि परिभाषादेशो विधिशास्त्राणामुपस्थितौ गुणो भेदकस्तेनेन पदैकवाक्यता अन्यथा इको
यणचीत्यादौ न तद्विधीनां व्यवहिताव्यवहितसाधारणप्रवृत्तौ पश्चात्परिभाषैकवाक्यतायामपि जाततन्निवृत्त्ययोगात् भुक्तवंतमि
तिन्यायबाधापत्तेश्च॥ प्राचीनोक्तवाक्यैकवाक्यताकर्तुमशक्या। संज्ञाशास्त्राणां तु मृजेर्वृद्धिरित्यादौ वृद्धिपदश्रुत्योपस्थितवृद्धि
रादैजित्यस्य तदर्थज्ञानाय वृद्धिपदाभिन्ना आदैच इति बोधे मृजेरिकः स्थाने वृद्धिपदाभिन्ना आदैचो भवंतीत्येतावतैव वा।
कैकवाक्यताव्यवहार इति नोक्तदोषः तत्रैकवृद्धिपदानर्थक्यं तु नोपस्थापकतया चारितार्थ्यात्॥ तथाप्युक्तषष्ठीस्थाने
इति सूत्रभाष्यं तु प्राचीनैर्लपपितुशक्यं॥ तथाहि कार्यकालपक्षे प्रदेशैकवाक्यतास्वबुधिजननवशाद्यथोद्देशस्वदेशे वाक्या
र्थस्य सद्भावेन तत्तदर्थोपस्थित्यैव सर्वप्रकाशकत्वस्य संज्ञाशास्त्रवत्सत्वात्॥ किंच भाष्ये एकदेशस्थत्वमनुपपन्नं यथा व्यव
हर्तृणां तत्तद्देशगमनेन तद्देशीयत्वव्यवहाराभावेपि तत्स्वभावार्थप्रत्ययान्तत्वात्तत्तद्देशस्थत्वव्यवहारस्य दुर्वारत्वेन तद्वत्प्रकृते
पि सत्वादेवं च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं स्पष्टमेव॥ परं तु परिभाषाणामुभयपक्षेपि पदैकवाक्यता लाघवादादर्तव्या संज्ञाशास्त्रा
णां यद्यपि अदसो मादिति सूत्रभाष्यप्रामाण्यात्कार्यकालपक्षे प्रदेश एव वाक्यार्थबोधस्तत्र सपरत्वेन पूर्वत्वेन चाविप्रतिषेधसूत्रप्र
वृत्तिः पूर्वत्रासिद्धमित्यस्य च प्रवृत्तिरिति लभ्यते॥ तथाहि मुत्वासिद्धत्वात्प्रकृतिभावो न प्राप्नोतीत्याशंक्य सामर्थ्यान्न भावः इत्युक्त

ऽणोऽप्रगृह्यस्येत्यनेनास्य इतिप्रतिषेधेन कार्यकालपक्षे सार्थक्यमिति संरंभः॥ एवं तर्हि इह तावत्प्रयोजनं स्यात्तत्रैवायं ब्रूयादणोऽप्रगृह्यस्यादसोनेत्युक्तम्॥ अग्रेपि मुत्वस्यासिद्धत्वाद्यादीनां प्राप्तिमुद्भाव्यपरैवमप्रगृह्यसंज्ञेति समाहितं॥ तथापि न तद्युक्तिमत् तस्मिन्निति सूत्रस्थभाष्यस्वारस्येन तत्सत्त्वेपि पाठकृतपरत्वस्यैव तत्रापि लाभात्॥ पदपदार्थोपस्थितौ वाक्यार्थबोधप्रतिबंधकाभावाच्च॥ संज्ञापरिभाषयोरेकवाक्यत्वलाभे वैरूप्यकल्पनस्यायुक्तत्वाच्च॥ विरोधस्य कार्यज्ञानाधीनत्वेन सार्वधातुकार्धधातुकयोरित्यत्र गुणपदश्रुत्यपेक्षया लिंगस्य दुर्वलत्वेन तन्निमित्तैकपरिभाषापदैकवाक्यतयाऽन्वयवत्यंतरंगास्थानषष्ठीत्वनिर्णये उपस्थितालोंत्यपरिभाषावाक्यैकवाक्यतयान्वय इति वहिरंगासेतिशब्दैरलासंगतेश्चांतरंगपरिभाषाया अपि विरोधे सत्येव प्रवृत्त्या तत्ज्ञानस्य तद्बोधोत्तरकालिकत्वेन तदानीं विरोधाभावेन तदसंगतिः अदसोमादित्येतद्भाष्ये वैरैवेत्यस्य तत्प्रयुक्तप्रकृतिभाव इत्येवार्थः आशयानभिज्ञस्याग्रे प्रश्नः कथं कार्यकालमितीत्याद्येकदेश्युत्तरं। एवं च न तद्विरोधः। तत्रापि स्वगृहे वाक्यार्थबोधः पूर्ववत्। अत एव भाष्ये संज्ञापरिभाषयोरविशेषणैकदेशस्थत्वमुक्तम्॥ कश्चित्परिभाषास्व इति कैयटोक्तं न युक्तं। परार्थत्वेन परिभाषाणामिव संज्ञानामपि तत्सत्वात्। अत एव सर्वशास्त्राणां प्रयोगार्थत्वेन प्रयोगरूपैकदेशस्थत्वेनापि परत्वादिकं संगच्छते। क्ङिति चेति सूत्रस्थकैयटोक्तरीत्या विधिसूत्राणां परिभाषादेशे संनिधानेपि परत्वाद्

कं संगच्छते॥ एवं चाकडारसूत्रस्थभपदादिषखेच्छाव्यवहार एव अत एव ष्यङः इति सूत्रस्थभाष्यसंगतिः। अशांतरप्रामाण्ये
न तस्यैकदेशयुक्तित्वेपि सर्वांशस्यैकदेशयुक्तित्वे मानाभावात्। अत एवोद्योतपरिभाषेंदुशेखरादिभिर्न विरोधः अन्यथा वाह
उदूत्सूत्रस्थशेखरस्यादसोमादित्यत्रत्योद्योतस्यैकदेशविकृतमनन्यवदिति व्याख्यानस्य परिभाषेंदुशेखरस्य चासं
गतिः स्यात्॥ अत्रत्यग्रंथस्य सर्वस्य सिद्धांतत्वेपि अशांतरस्यासिद्धांतत्वमिति सूचयितुं केचिदित्याहरित्युक्तम्॥ एवं सं
ज्ञापरिभाषाणामेकरूप्यमेव फलितम्। एतावानेव विशेषः ष्यङ्सूत्रभाष्यादीदूत्सूत्रभाष्याच्च संज्ञाशास्त्राणां वाक्यैक
वाक्यता परिभाषाणां तु लाघवात् सदैकवाक्यता एतदेव ध्वनयन्नाहाल्पमिति। अनुबंधपदार्थमाह॥ इत्संज्ञका इति
अनेन पूर्वसंगतिः सूचिता॥ अन्यथा विधीयमानपदस्य भावित्वेन पूर्वं तद्विवरणासंगतिः इत्संज्ञाप्रयुक्तभावाभावकार्य
भाज इति परमार्थस्तेनोच्चारणार्थेषु नातिप्रसंगः विधेये कदाप्यदर्शनादिति। ननूपस्थाप्येऽनवयवत्वं साध्यते उतोपस्था
पके नाद्यः हलन्त्यमित्यत्र लक्षणाया निर्वीजत्वापत्तेः नांत्योपि विधेये कदाप्यदर्शनादिति हेतोरसंगत्यापत्तेः नहि शरीराव
यवस्य हस्तादेर्हस्तादावदर्शनेनावयवत्वं शक्यते वक्तुमिति चेन्न प्रायः श्यामादावुपस्थापके दृष्टस्यावयवस्योपस्थाप्येपि दर्श
नवत्प्रकृते तदभावेन तस्योपस्थापकानवयवत्वमित्याशयात् यद्यपि त्रयाणां वचनरूपाणामकारेणानवयवत्वयुक्तं लाघवात्

तथापि न हि वर्णाभिव्यक्तिजनकं कंठाद्यभिघातगौरवमेवादर्त्तव्यमिति न्यायेन तत्रोपन्याससरूपस्य ज्ञानजनकमनोव्या
पारगौरवस्यापि सत्वेन न्यायसिद्धावयवत्वस्यैव न्याय्यत्वाद्रूच नतपानावश्यकत्वस्याभाव्यत्तो लाभाच्चेत आह॥ वस्तुतस्ति
नन्वेतन्मतेनुवंधानामेकांतत्वे पचतिभवतीत्यादौ तास्यानुदात्तेदिति स्वरापत्तिः अकारांतो यदिश्यमानत्वाभावात्तभाष्ये
स्वरविधौ तत्रैव सिद्धांतितत्वात्— तएव हन्तो हथ्रूत्यादौ नानुदात्तत्वं शुद्धाकारेनुव्यपदेशिवद्भावो वोध्य इति चे
न्नानानुवंधकृतमनेकांतमिति परिभाषायामनेकांतपदस्यानकारांतत्वस्याप्युपलक्षणत्वात्। अन्यथानेकमुदाह
रणमिति न्यायेन तास्यनुदात्तेश्चिनुङिआदिरसेववदेदिति भावः। छिद्ग्रहणं व्यर्थमिति। नन्वित् संज्ञालोपयोरंतरंगत्वे
ऽनुत्पत्तिपक्षेपि अनुवंधविनिर्मुक्तपदार्थोपस्थितेरौपगवादौ नानेकाल्त्वमिति चेन्न। सूत्रोपात्तस्यैव स्थानित्वमिवा
दिष्टत्वमपि तस्यैवांगीकारादित्याशयात्। छिद्ग्रहणेनानुवंधानामकृत्वव्यवहाराभावो ज्ञाप्यते तेनेयं सिद्धेति स्था
निवत्सूत्रे शेखरे। तएव प्रदीव्येत्यादौ स्थानिवत्वात्कित्वातिदेशेन गुणाभावः यदि तु नेत्सपीति विशेषणापेक्षज्ञापकमा
श्रित्य प्रदीव्येत्यादिसिद्धिः सूत्रोपात्तस्यादेनात्वं फलाभावान्नांगीक्रियते। औणादावपि भूतपूर्वनिकालत्वादेव सिद्धिः
पीडाणलादेरपि आनुपूर्व्यात्सिद्धिः आवर्णरस्यादौ तूगित्कार्यार्थं तथा चारितार्थ्येनानेकाल्त्वाभावो दिरउदित्यादौ तूक्ता

टी·
शांकरी·
३

रणार्थत्वेन न दोषः अन्यथा सामर्थ्यादप्रत्ययत्वेपि तपरस्यादिति ध्वनितश्चायमर्थो नेकालसूत्रे स्पष्टश्चायमर्थस्तत्रैव कौस्तुभ इत्युच्यते तदैकांतत्ववादिनापि नांगीकर्तव्यैषाभिद्ध्रहलांच न कर्तव्यं। एवचानेकाल्त्वात्सर्वादेशः डादेश इति प्रक्रियात्रय आनुपूर्व्या सिद्धिरिति मनोरमायंस्थः परिभाषेंदुशेखरग्रंथश्च स्वरसत उपयघातनाल्लुटः प्रथमस्येति सूत्रभाष्यं तु सूत्ररीत्यातिबोध्यं किंचार्वणस्तृ इत्यादौ उकारानुबंधकरणेपि निर्वाहः एतेन दिव उदित्यत्र नकारोच्चारणं स्यभाव्यमानोप्युकारः सवर्णान्न गृह्णातीत्यर्थज्ञापनायावश्यकत्वेन न तकारादुभयतोङकारकरणेन तस्येत्संज्ञालोपेन स्यातामित्ययासंनैकमुदाहरणमिति न्यायेन प्रयोजकस्यैवाभावात् अदसोसेरित्यत्र उ इति समाहारेण निर्देशाच्च। असंदेहायत्तत्रैव उ इति निर्देशेन सर्वेष्टसिद्धेः परिभाषीस्वीकारे सनाशंस इत्यादावतिप्रसंगादूदुपधायागोह इति भाष्यविरोधाच्चेत्यन्यत्रविस्तरः अवदातंमुखमिति आत्वे कृते पल्लोपेन वानुमानिकस्थान्यादेशभावेन दावित्यस्य दा इत्यादेशे स्थानिवत्वेन दात्वं। सुलभं पूर्वं पकारलोपे तु देवित्यस्य स्थानिवत्वेपि तत्र दापूत्वादत्तस्य देवोपपादयन्ति पल्लोपोत्तरमात्वकृते इति॥ न च पल्लोपोत्तरमुपदेशत्वाभावात्कथमत्रात्वमिति वाच्यम्॥ दोदद्घोरित्यत्र द इत्युपादानं नानुबंधलोपोत्तरमपि उदेशत्वकल्पनात् उदीचामाङ इति। माङ् मान इति तु न गृह्यते। ज्ञापकपरभाष्यप्रमाण्यादपूर्वकालार्थकत्वात्क्त्वाप्रत्ययप्रसक्तौ अनभिधानात्तु भाष्ये

नुपायांतरप्रदर्शनेनाप्यस्यानावश्यकत्वंसूचितंतथाहिनायंदेङ्दिवादिषुदापशोधनइतिपठितःदापयतीत्यत्रस्वरभेदस्तु
नोभयथाप्यंतोदात्तत्वात्॥ताच्छीलिकेचानुप्रदायमानइत्यत्रापिनस्वरभेदश्श्नाप्रास्वरस्याप्युदात्तस्यसतिशिष्टत्वेपि
अन्यत्रविकरणेभ्यइतिइत्युक्तेःउभयथाप्यंतोदात्तत्वस्यैवसत्वात्।प्रणिदापयतीत्यादौप्रतिषेधाभावापायिदित्यन्या
सोपिदर्शितःदाधाघ्विदितिसूत्रेभाष्येउदीचामाङइत्यत्रप्रकृतानुबंधलोपस्यमेङआत्वस्योपलक्षितोच्चारणार्थोङका
रइतितदाशयःइदातिदधात्योरितिवासरूपसूत्रेभाष्येरूपाणांतरदर्शनमपितत्रहिसूत्रेसासूच्यमौपदेशिकप्रायोगिकं
वेतिप्रश्नेऔपदेशिकग्रहणेसरूपमप्यपेवाध्यबाधकभावेनासारूप्यतायाएवसत्वेनसरूपग्रहणानर्थक्यात्प्रायो
गिकमिहगृह्यते॥नचप्रायोगिकग्रहणेग्रामणीःग्रामण्यक्विपोदर्शनरूपत्वेनवर्णेसरूपस्यैवाभावेनक्विनस्यात्ता
मितिवाच्यंअसरूपइत्यस्यसरूपाभावइत्यर्थेनादोषादित्युक्तंएवंचतत्पक्षेवचनकर्तव्यतायाअनावश्यकत्वमिति
एतेनानुबंधकृतमसारूप्यमितिकर्तव्यमेवंकरणेवाक्यार्थबाधोत्तरंप्रत्ययलक्षणानंतरदुत्तरमित्संज्ञेतिबोध्यमित्यपा
स्तंनन्वध्यत्तेतिक्तिनीतिनिमित्तसप्तमीतन्निमित्तग्रहणंकर्तव्यमितिवार्तिकानुभाष्यकृतात्वोक्तेकित्वेनतत्संसाध्यवार्ति
कप्रत्याख्यानाच्चअतएवभिन्नमित्यादौनगुणस्तद्भावितामाश्रयणेइहनिमित्तत्वेअतएवचक्रतुरित्यादिसिद्धिःद्वित्वे

टी.
धा.वृ.टी.
४
८

सोर्निमित्तत्वेऽचोपि तत्सत्त्वान्न यद्यपि श्नाविनेति इकारस्य कार्यित्वेन शीङ्गुणनिषेधो दुर्वारस्तथाप्यर्थवसेव स्थान्यादेशभाव
इति चेत्स्यान्ता द्विश्नि इस्य कार्यित्वलाभात् । अरिरिषतीत्यत्रेवावयवद्वारा समुदाये तत्सत्त्वाच्च ऊर्णुनविषतीत्यत्र तु सन्नन्तस्ये
दृश्यत्वेपि नन्वेवात्रापि समुदायद्वारावयव'' प्राप्तकार्यित्ववारणाय कार्यमनुभवन्निति द्वित्वविधौ सन्यङोरिति षष्ठी न
तु सप्तमी । अन्यथा प्रतीविषिषतीत्यत्र सनो द्वित्वं न स्यात् यदि तु क्ङितीत्यधिकरणे सप्तमी कारकविभक्तेर्बलवत्त्वात्कौ
कित्त्वे नैकव्यवधानं सत्त्वमिति भिन्न इत्यादौ न गुणः द्विर्वचनेऽचीत्यत्रापि द्विरुच्यतेऽस्मिन्निति व्युत्पत्त्या रिरिषतीत्यत्र न
दोषस्तत्र न ह्यीकारे परे द्विरुच्यते किंतु नदेव ऊर्णुनविषतीत्यत्रेकारे परे द्विरुच्यत इतिमवेत्येव स्थानिवत्त्वमित्युच्यते तद्दे
षानिष्फलायधेन दतिरिक्ते फलं नेति बोध्यं वस्तुत इति । नन्ववयवावयविनोः संबंधस्य समवायत्वमित्यनुभवाल्लोके नि
मित्तकारणस्य दंडस्य समवायीकारणमृत्तिकायाश्च भेद इति वक्तुं शक्यते प्राक्त्वेन तथाश्रयतोऽप्रमाणाभावः । वर्णानां प्रस
ज्यप्रसंजकसंबंधसत्त्वेपि अवयवावयविभावाभावात् ननु श्नापिते तत्र श्नीत्येतत्समवेतगुणरूपकार्यसंपन्ने निमित्तका
रणस्य श्नेरस्त्यत्र सत्त्वेन तत्संभव इति वाच्यम् एवमप्य ध्येतेत्यादौ नदसंभवादिति चेन्न श्नापितरीति ज्ञापकसाध्यत्वेनादो
षात्प्रकृतग्रंथस्तत्त्वाननुसारीति किंचित् ध्वनितेषनि यद्यपि भाष्ये एतत्परिभाषाभावस्यैव ध्वननं तथा हि जेघ्रीयते

दृध्नीयत इत्येतद्ग्रहणव्यावर्त्यं तत्र च कार्य्यातिदेशे तदानर्थक्याद्रूपातिदेशे तौ घ्राध्मोरितौ लस्य निहृत्यानिष्टापत्तिरि
त्युक्तम्। तत्र च नटभार्यावद्धंजनानि भवंतीति षाष्ठभाष्यसिद्धांते द्वितीयाजवधिकस्य द्वित्वे पङो निमित्तत्वानापत्त्योर्द्वि
षभावेन भाषासंगतिः तथापि स्वरांतरे व्यंजनान्युत्तरस्येति पातिशाख्यमनुसृत्योक्तम पक्षे रिरिषतीत्यत्र रिशब्दस्य द्वि
त्वपरिकारस्य द्वित्वानुभवेन तन्निमित्तत्वाभावान्न दोष इति बोध्यं एतेन कृतेप्यज्ग्रहणे रिरिषतीत्यादौ गुणस्य स्थानिव
त्वेन सशब्दस्य द्वित्ववारणेनैषा ध्वनितेत्यपास्तं॥ सत्यसति च तस्मिन्नत्र दोषस्य दुर्वारतया तस्याज्ग्रहणव्यावर्त्याभा
वादज्ग्रहणस्य किं व्यावर्त्यमिति प्रश्नेऽरिरिषतीत्युत्तरस्यायोग्यत्वाच्च। इत्थं ग्रंथकृता कृते भाष्ये कार्यातिदेशे चकुरित्या
दौ अनकाराभ्यासत्ताघ्राघ्रीतीत्याद्यंकाग्ग्रहणेन रूपातिदेशे ज्ञापितं उक्तदोषवारणकृते अग्रेऽधिजगे इत्यत्र इवर्णाभ्या
सत्ताघ्राघ्मोतीति रूपातिदेशे दूषणमभिधाय गाङ् लिटीत्यत्र ह्रिलकारको निर्देश इति लिटि लकारादावित्युक्तम् एवं वा
तृग्रहणस्यैतदेव व्यावर्त्यमित्याशयः एवं चाधिजगे इतिवद्रिरिषतीत्यत्र दोषानुपन्यासेन भगवता ध्वनितैवेति विभा
वयेत्तु आर्धधातुकीयाः सामान्येन भवंतीति पक्षेपि तद्भावितामात्रेणैव तद्बुद्धिभाविनामात्रेणापि निमित्तत्वमित्यंगीका
राद्धिजगे इत्येतस्य तद्व्यावर्त्यत्वं बोध्यम्। इह शानिमित्तत्वाश्रयणे लिंगत्वजग्रहणमेवेत्यन्यत्र विस्तरः ननु पूर्वधा

टी.
प्राकरी
५

तुरुपसर्गेणयुज्यतेपश्चात्साधनेनेतिसिधांताघ्वोदेशेदाप्शब्देप्रवृत्तायाअवारणान्णत्वंसलभंनचकार्यकालपक्षे
दोषएवंतथाहितत्रपक्षेदसोमादितिसूत्रभाष्यप्रामाण्येनसंज्ञाशास्त्रस्यस्वदेशेवाक्यार्थाभावेनघुसंज्ञायाणत्वप्र-
त्रैकवाक्यत्वेनत्रिपादीस्थतयासिद्धत्वात्साधनकार्यकृतेदारूपाभावादितिवाच्यम् अदसोमादित्सूत्रस्थोक्तरीत्यापरिभा
षावृत्संज्ञाशास्त्रस्यापिस्वदेशेवाक्यार्थसत्वेनाष्टाध्यायीपाठकृतपरत्वाश्रयणेनचांतरंगत्वात्घुसंज्ञायांसाधनका
र्यकृतेप्यत्रपक्षेणत्वंदुर्वारमितिचेन्न। पूर्वंधातुरुपसर्गेणयुज्यतेततःसाधनेनेत्यस्यग्रंथकृतैवायुक्तत्वेनसाधनका
र्यकृतेदाप्रूपस्यदारूपत्वाभावादवयवस्यानर्थकेनणत्वविधौयत्क्रियायुक्ताःप्रादयस्तंप्रत्येवोपसर्गमित्यर्थस्यसा-
त्वेनगदादिनिरूपितोपसर्गत्वाभावेनत्वदुक्तशंकायाःगगनकुसुमायमानत्वात्। नचैवमपिकार्यकालपक्षेप्राग्युक्तोघोन
रीत्यांतरंगायांघुसंज्ञायांबहिरंगस्ययुक्तोसिधत्वादंगीकृत्यादोष्ठतेऽनानासिकप्रतिबंधायप्रगृह्यत्ववदाप्शब्देदाबुध्या
प्रवृत्तस्याघुसंज्ञयाणत्वंसुलभमेवेतिवाच्यम् ष्यङः इतिसूत्रभाष्यप्रामाण्येनसंज्ञायाकैकवाक्यत्वलाभेपिशतानीत्यत्रश
तशब्दवत्षट्संज्ञासूत्रस्थशेखरोक्तरीत्याक्तन्नेजंतसूत्रशेखरोक्तरीत्याचविधिनिमित्तकत्वस्यलोकसिद्धत्वेपिप्रधानस्य
संज्ञाशास्त्रलाभेनोपसर्गनिमित्तकत्वेमानाभावेनपरंपरयाबहिरंगत्वमितिग्रंथेननविरोधः। असिद्धपरिभाषाज्ञापनरमा

ब्यादिना यथा न विरोधस्तथा तत्रैव स्फुटीकरिष्यते। एवं च प्रकृते सर्वथा नदादिसिद्धिरेवेत्यत आह ननु प्रणिदापयती
ति। अदाविति प्रतिषेधस्तु नं ते नहि वांतस्य प्रतिषेधेपि पांतस्याप्रतिषेधात्॥ सूत्रेऽदाविति चर्त्वेन निर्देशादिति दाधा
घ्विति सूत्रे भाष्ये स्पष्टं किंच पकारेत्संज्ञकदारूपस्य ग्रहणेनादोषः॥ न च प्रायोगिकासंभवे औपदेशिकग्रहणमिति वाच्यं
देवः मित्त्वसामर्थ्यात्पकारेत्संज्ञकस्यैव ग्रहणात्। असंजातविरोधिन्यायेन पूर्वमेवेत्संज्ञाप्रवृत्तेः श्रवणार्थ एव दैप पका
र इति न वाच्यं किंत्वदाविति प्रतिषेधार्थमेव लोकस्तदर्थोल्लाभेपि तदनित्यत्वेनैत — मौत आह। यमुद्दिश्येति। अन्यथा
रेफस्योरमिति शास्त्रेणाकारावयवत्वबोधेनावयवावयवस्य समुदायावयवत्वस्य लोकसिद्धत्वेन दावयवत्वस्य रेफे
सत्त्वेन प्रणिदापयतीत्यादौ दोषः स्यादिति भावः न चायं न्यायः शास्त्रेनाश्रीयत इति वाच्यं। हलंतात तदादेः परस्यापृक्तस्य
हलो लोप इत्यर्थकहल्ङ्यादिसूत्रस्याविभरित्यादावप्रवृत्त्यापत्तेः। गीरित्यादौ रेफस्यापदांतत्वेन विसर्गानापत्तेः कुर्व
न्छभुरित्यत्र तु किलकारस्यापदांतत्वापत्तेः अत एव दीधीवेवीटामिति सूत्रे इग्ग्रहणं चरितार्थं। अन्यथा इकारा
स्य शास्त्रेणामसयावयवबोधनेपि अंगानचयवत्वात्। गुणाप्रवृत्तौ न वैयर्थ्यं स्पष्टमेव॥ एतेन पठितेत्यादावं वंस
तिडीवापतिरित्यपास्तम्॥ अनुबंधविनिर्मुक्तपदार्थोपस्थितिरिति सिद्धांतादेकांतत्वपक्षेप्युपदेश एवेत्संज्ञालोपा

CC-0. In Public Domain. Digitization by eGangotri

भ्यामयहारादिकारस्याप्यवयवत्वाभावेनयदित्परवाच्यत्वाभावात् । यत्रेत्संज्ञा तत्र प्रयोजनाभावात्सामर्थ्यादुपस्थाप्येतत्का
र्यानुमानेपिअन्यत्रतदनुमानेमानाभावः तन्मध्यपतितन्यायेनापिइद्ग्रहणचारितार्थ्यंसूपपादमितिचिंसभवितेभवितत्वा
दौत्विकःप्रत्ययावयवत्वात्समुदायावयवत्वंसुलभमितिबोध्यंयदुपदेशप्रयुक्तेत्संज्ञेत्यादिनास्त्रीलिंगप्रकरणेस्पष्टम्ए
तेनघुघुलोष्टित्करणेनकश्चितदनाश्रयणमितिवदंतोपिपरास्ताःमुग्विधानसामर्थ्यादिति । ननुसवर्णदीर्घबाधिते ङि
तइतितस्यात्मुग्विधानेनतत्रकौंडिन्यनयेनसोपिबाध्यतेनचकृतेपिमुक्यनयासदुर्वारएवेतिवाच्यम्सर्वथानिरवका
शत्वेनवायरमायामित्यादौपुनरुत्सर्गप्रवृत्तावपितत्रकौंडिन्यन्यायेवाधेतदप्रवृत्तेः स्वीकारात् अस्मिर्थप्रकृतेतद्विषय
ताद्रूप्यादेशेकृतेपिआनुमानिकस्थान्यादेशेनस्थानिवत्त्वेनमुक्प्रवृत्तेःसत्वात्सवर्णदीर्घेणनैवंतदुत्तरंमुकोचितार्थ्यात् य
नुमुकिकृतेनैपादेशोतइतितपरेकरणादितितन्नपचमानइत्यत्रादुपदेशप्रयुक्तस्वरसाधकपरभाष्यमाण्येनपदाग
मलध्वसतपरत्वेनाव्यावृत्तेःअविशेषाद्धिविशिष्टत्वातिदेशवन्मात्रिकत्वस्याप्यतिदेशाच्चेतिचेन्नतावन्मात्रस्यप्रयोज
कत्वेआतोङितइसनंतरंनानस्येत्येववदेत् । अर्धमात्रालाघवएवउत्तरत्रइदासइत्यादौव्यत्ययकल्पनावश्यकत्वस्य
चसत्वात् नन्वेवमपिमुग्विधानंसफलंपंचम् आनइत्यवस्थायांसानुनासिकनिरनुनासिकयोःस्थानेजायमान

स्याकारस्यांतरतम्यादुभयगुणकस्ययुगपत्संभवाभावेपिपूर्वपरयोः प्रत्येकंस्थानितयापर्यायेणास्यात्।अन्यथास्थानि
गुणकनिरनुनासिकमेवस्यात्।नचामइत्यत्रात्वातिदेशात्कण्ठ्यत्वातिदेशस्यसत्वेओदौतोःकण्ठ्यत्वोष्ठ्यत्वयोरेकत्रद
र्शनेनातिदिश्यमानधर्मविरुधधर्मत्वाभावेनमकारेस्वाश्रयस्यौष्ठ्यत्वस्यापिसत्वेनोभयांतरतम्याद्गुणापवादेनसव
र्णदीर्घेणोभयगुणकयोरेकारौकारयोरेवप्राप्त्यापचोनःपचौनपचौनइतिरूपस्यसत्वात्आकारःप्राप्तइतिवाच्यम्।नह्ल
विसुपलक्ष्यणमेवसर्वस्यतस्यानुनासिकत्वादर्शनादितिप्रोखरोकरीस्याअनुनासिकत्वाभावात्भंजोआमर्दनइत्या
दौतथादर्शनेपिस्वराणामुष्मणांचैवविवृतंकरणंस्मृतमितिशिक्षोक्तेरोकारस्यविवृतत्वप्रतीत्यातस्यचविवृतेनाका
रेणसाम्याभावेपिइषत्सदृशस्यप्राप्तावपिनेतावतामुकविधानस्यफलंकेनचिदपगतमितिचेन्नविधानस्यैतावत्प्रयो
जनत्वेमात्रालाघवेनप्रक्रियालाघवेनचअनस्थोइतिन्यासपरसूत्रक्लकुतोनकुर्यात्एवंचादेःपरस्येत्यनेनाकारस्यसा
नुनासिकेउकारेकृतेआद्गुणइत्यनेनसानुनासिकांतरतम्यात्सानुनासिकोगुणःनिरनुनासिकांतरतम्यातादृगेवेतिपचोन
पचौनइतित्वदभीष्टसिद्धमेवकिमियताप्रयासेनएतेनएचइगितिसूत्रभाष्यप्रदर्शितभूयसाव्यपदेशेनप्रकृतेकंठस्थानि
नोबाहुल्येनसवर्णदीर्घआकारएवभविष्यतिनौकारादयइत्यपास्तम्।एवअन्तरतमह्रस्वाभावेनावयवांतरतमेनतद्व

वस्थायनेऽनियमप्रसक्त्या उत्तरभागबाहुल्येन व्यवस्थायाः सत्त्वेपि संभवति समुदायान्तरतम्येन तदाश्रयणे भानाभाव
दनिष्टापत्तेश्च अत एव खट्वाऌकार इत्यादाववर्णभागबाहुल्येपि नाकारो वृद्धिः ध्वनितं श्चायमर्थ एज्वर्णयोरवादे
शे वर्णप्रतिपत्तिरित्यादिना स्थानेन्तरतम इति सूत्रशेषे भाष्ये कैयटेन स्पष्टमेवोक्तमिति दिक् दिदीप इति युड्विधा
नवैयर्थ्यं तु नलोपस्य पाक्षिकत्वेन तस्य यत्र यश्च वर्णोऽर्थवत्त्वात् ॥ ननु नायं दोषं वुक्युटावितिवार्तिकारंभात् एवं चानेका
च्त्वरूपेण तदप्रतियोग्ये युटा चारितार्थ्यात् पृथगर्थकविधानमिति केऽनेकाल्त्वाभावेपि इयङः प्राप्तिसत्त्वादित्यरुचेराह ज
हारेत्यादावति आदिना भूपालामित्यादौ ॥ आर्धधातुकत्ववलादित्वयोरतिदेशेन प्राप्तस्येटः परिग्रहः श्रीणामित्या
दौ नुड्विशिष्टस्याम आदित्यादिदेशेन आः सुपीति प्राप्तस्य यणादेशस्य च परिग्रहो बोध्या ननु यमुद्दिश्य विहित इत्युक्तौ ए
धिषीष्टेत्यादौ सुटः सकारस्य प्रत्ययावयवत्वाभावात् षत्वं न स्यात् तकारोद्देशेन सुटो विधानात् न च तकारे प्रत्ययाव
यवत्वसत्त्वेन तत्त्वं सुलभमिति वाच्यं ॥ उद्देश्यतावच्छेदकधर्मसमानाधिकरणधर्मस्य प्रत्ययावयवत्वस्याविशिष्टेति दे
शेपि सकारे तदभावादिति चेन्न तन्मध्यपतितन्यायेन सीयुड्विशिष्टस्य प्रत्ययत्वलाभेन सकारे तदवयवत्वाक्षतेः ॥ क्वचिद्विशे
षणग्रहणे नापि आगमविशिष्टाग्रहणं ॥ अत एव बहुवचनस्य वस्नसावित्यत्र पदस्य पदादित्यधिकारादुपस्थितसमर्थप

रिभाषाबाधायपदत्वेनसुबंत्वेनवासाक्षादुद्देश्यतातत्रैवास्याःप्रवृत्तिरित्युक्तंसमर्थसूत्रेशेखरेविशेषणेउद्देश्यताभा
वेनुसाक्षादित्युक्तिरसंगतास्यात्तेनश्रोरतेहत्रेहच्छत्रमित्यत्रतद्विशिष्टस्यसार्वधातुकत्वात्तद्विशिष्टस्यकारकत्वात्त
शीङःसार्वधातुकइतिगुणःसिध्यतिगतिकारकोपपदादितिसरश्चावर्णग्रहणइतितद्वतिधर्मातिदेशेतद्घटितधर्मा
निर्देशेवेत्यर्थःअतएव——लम्पइतिसूत्रेभाष्येरुदिहीत्यादौघित्वव्यावृत्तयेहलादेरित्यनुवर्त्यहलादेर्हेरितिव्याख्या
तंअन्यथाऽनयाहलादित्वातिदेशेनतत्संगतिःस्पष्टैवअतएवभूयासामित्यादौवलादित्वाभावेनेडितितेनदिदीयेह
रीणामित्यादौयुडादौकृतेयणादिकंनेतिवो ङममतेतिफलितार्थकथनंसूत्रार्थस्तुह्रस्वात्परस्यपदावयवस्यङमोऽ
मुङजादौपदइतिबोध्यःएतेनावृत्तिकालेगौरवेणास्यभाष्यस्यैकदेश्युक्तित्वमित्यपास्तंपूर्वोक्तत्वकथनेनैकदेश्यु
क्तित्वमित्यन्यत्रयत्तुमिदचोंत्यादितिसूत्रभाष्यविरोधेनैकदेश्युक्तिसमस्येतितत्रहिमितःपरादित्वेहियंतपइत्यत्रमा
नुस्वारोनस्यात्पदांतत्वादित्युक्तं।आगमानामागमिधर्मवैशिष्ट्यबोधनेहितत्संगतिरितिचेन्नासंयोगात्तस्यलोपेकृतेऽ
नुस्वारस्यसुलभत्वेनतस्यैकदेश्युक्तित्वस्यत्वयापिवक्तव्यत्वात्।नन्वेवंकुतःसोर्थउपस्थितइतिचेन्नालोकानुभवविरोधा
त्फलाभावात्हरीणामित्यादौनुटःसुमेननांतस्यपदत्वेनपदांतस्येतिणत्वनिषेधप्रवृत्त्यादौषवाहुल्याच्चसिस्वांना

CC-0. In Public Domain. Digitization by eGangotri

संगतिरिति। नन्वेवमपि भाष्ये संगतिः पाघ्रेति सूत्रे विशिष्टरूपोपादानसत्त्वेनोपस्थितार्थस्य शब्दं प्रति विशेषणतया
न्वयसंभवेनार्थवतः पाशब्दस्यादेशविधानेनागमसमभिव्याहारं विशिष्टस्यैवार्थवत्वे च निर्दिश्यमानरूपस्यार्थवत्वाभा
वादिति चेन्न। आदेशविधावंगाधिकारसत्वेनार्थवत्पाशब्दोत्तंपदंगांतदवयवस्य निर्दिश्यमानस्यादेशा इत्यर्थसत्वेन
पदांगमा इति न्यायेन प्रकृतेऽर्थवत्पाशब्दः अपा इति तदंतमपि व्यपदेशिवद्भावेन तस्यैव सत्वेन तदवयवपाशब्दे निर्दि
श्यमानत्वात्प्रसक्तेरिति भाष्याशयः स्थानषष्ठी — देशादिति एवं शब्दानिसत्ववारणाय पठितवाक्यस्य लक्षणा समुदायादेशपर
त्वेऽपि न समुदायार्थस्याग इत्य च परस्मिन्नित्यादे — संगतिरिति बोध्यं। ननु स्थानिवत्सूत्रेनानुमानिकस्यादेशग्रहणमित्युक्तं
तत्कथमिहोच्यते तस्य स्थानिवत्सूत्रे ग्रहणाननदोष इति आदेशग्रहणसामर्थ्यादिति चेत्समं प्रकृतेपीति चेन्नोहनो वधे
तिवदहरिति निर्देशेना — ध्यापी बोधितस्थान्यादेशभावसत्वेपि श्रौतस्थान्यादेशभावे शवानां नित्यत्वानुपपत्त्या कल्प्यमानस
मुदायादेशस्यादेशपदेन ग्रहणेपि श्रौतत्वं दृष्टानामिति बोध्यम्। नन्वेवमुदस्थादिति यदागमेति न्यायेनादेश्यतावच्छेदकसमा
नाधिकरणयावत्त्वमी अतिदिश्यंते तेन स्थात्वमुपपन्नमत्र चेदं भाष्यमपि मान अपिस्य इत्यादिभाष्योदाहरणादध्याहृतनिर्दि
श्यमानपदे लक्षणयार्थद्वयमित्याह अवयवरूपमेवेति यद्यपि अतिस्य इत्यत्रांत्यबाध इत्येव सिस्यं तत्रैतराव्यवधानं च ज्ञाप

नि
ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तस्यसजातीयविषयत्वादव्यवधानं अत एव वशिरांसीत्यादौ नदोषस्तथाप्यतिपूपमित्यादौ विश्वाहोविदुषीत्यादौ चद्वि
तीयार्थफलंवाध्यंनिरूपितत्वस्यतृतीयार्थत्वादाहस्थाननिरूपितेतिसचनिवर्त्यनिवर्तकभावः यथाइकोयणचीत्यादौत
त्रवेकोनिवर्तकोपलभवतिप्रसंगेसतीत्यर्थः सचार्यातिस्यैवेतिवोध्यंजातिपक्षइतिनत्विदमयुक्तंजातेःस्वतोनिर्दिश्य
मानत्वाभावेनव्यक्तेरुच्चारणस्यावश्यकत्वेनोक्तनिर्दिश्यमानत्वाभावादितिचेन्नातस्यापंभावः निर्दिश्यमानत्वंनोचार्य
माणसजातीयत्वंवक्ष्यमाणहयवरट्सूत्रभाष्यविरोधान् नाप्युचार्यमाणपदवोध्यत्वंउचार्यमाणस्यस्यापावोध्यत्वं
स्यागमविशिष्टेसत्वेनोदस्थादपिवदित्युदाहरणपरभाष्यविरोधात्।येनविधिरितिशास्त्रप्रमाण्येनविशेषणस्य
तदंतवोधकत्वेनउचार्यमाणविसर्जनीयपदवोध्यत्वस्यतदंतेसत्वेनोक्तभाष्यविरोधापत्तेश्च· तस्मादेतच्छास्त्रीयसंके
तग्राहकासहकारिणोच्चार्यमाणपदवोध्यत्वंतदितिवाच्यम् आलिचोदस्थादपिवदित्यत्राद्यंतौटकितावितिशास्त्रस
हकारःसुपदइत्यत्रयेनविधिरितिसहकारश्चविसर्जनीयस्यसइत्यत्रतुतदंतस्ययेनविधिरित्यनेनसहकारेपिविसर्ज
नीयस्यतदभावात् यद्यपिसरूपमितिसंकेतग्राहकसत्वेनैतच्छास्त्रसनुपपन्नंतथापिभाष्येतस्यप्रत्याख्यानात्सत्वे
तुतस्यतदतिरिक्तविशेषणतोनादोषाच्च। इहशेनिर्दिश्यमानत्वंग्रथकृतोप्यभिप्रेतमेव अन्यथाव्यक्तिपक्षेशंकायाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातिपक्षेण समाधानासंगतिः तत्र जातेर्निर्दिश्यमानत्वेतु तद्युक्त्या व्यक्तिपक्षेप्यणुदित्सूत्रगृहीताष्टादशव्यक्तीनां निर्दिश्यमा
नत्वसंभवात् ज्ञापकाश्रयणेन संगतिश्च। अत एव रीङ·रीङोङि·त्वं स्पष्टार्थमिति वक्ष्यमाणग्रंथसंगतिः अन्यथा तद्दोषः।
सावित्यत्रानुवृत्तस्य त्यदादीनामित्यस्यैव तद्विधावनुवृत्तागस्य तत्संभवादित्यादेशत्वायत्तस्यावश्यावश्यकत्वेन तदसंगतिः म
मतुं अंगस्य एतच्छास्त्रीयसंकेतितत्वेन तदंतस्य च तथात्वेन तत्संगतिस्स्पष्टैव। नन्वेवमपि पूर्वापरविरोधः॥ इयङ·वङोङि·त्वे
धात्वादीनामपि निर्दिश्यमानत्वादित्यादेशत्वापेक्षणे न धातोरप्येतच्छास्त्रसंकेतवलादिति चेत् ग्रंथकृतोन्याभिप्रायकत्वात्
तथाहि धातोरादि धातुरादिर्ययोरिति तद्गुणसंविज्ञानो बहुव्रीहिश्च धात्वादिश्च धात्वादयस्तेषामिति षष्ठीतत्पुरुषबहुव्री
हिगर्भेकशेषेण भ्रूस्त्रीणां निर्दिश्यमानत्वादित्यादेशत्वापेक्षाश्रयणात्॥ अत एव आनमुगिति मुग्विधानस्य यदागमेति न्या
यानित्यत्वज्ञापकत्वं संगच्छते अन्यथा यदागमेति लब्धस्योक्तरूपनिर्दिश्यमानत्वाभावे तदसंगतिः अत एव येनविधिरित्या
त्रभाष्ये प्रत्ययग्रहणं चापञ्चम्या इत्यस्य दृषत्तीर्ण इत्युदाहरणं संगच्छते इत्यादिक् अनया परिभाषयेति येनविधिरित्यस्यैव
पदागमेत्यस्यापि संज्ञात्वबोधकत्वेनोक्तरूपनिर्दिश्यमानत्वं तयोर्नास्तीति भावः लोकेनाप्यंगाधिकारसंज्ञासंज्ञिभावस्यैव बो
धनात् न चैतच्छास्त्रीयसंकेताभावात् तत्सुलभमिति वाच्यं आद्यंतौ टकितावित्यादिसंज्ञासंज्ञिभावस्यैव लाभात् अत एव त्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कारस्यगुणवृद्धीअगागावेवेतिसंगच्छतेअतिदेश्यतथात्वाभावेननतद्बोधितस्यनिर्दिश्यमानत्वमेव।अतएवोक्ततिसृणा
मितिभाष्यसंगतिःलिगविशिष्टपरिभाषायाअपिअतिदेशत्वेननतद्बोधितस्यापिनिर्दिश्यमानत्वमेवअतएवसुखीसुप
थीत्यादिविभक्तौलिंगविशिष्टग्रहणमितिपरिभाषोदाहरणंसंगच्छतेअतएवमहतीप्रियायस्येतिबहुव्रीहिलिंगविशि
ष्टपरिभाषयामहतइतिनुममाशंक्यानित्यत्वेनसमाहितंभाष्येनचैवंतदोःससावित्यत्रभाष्यशेखराद्यसंगतिःतत्रहि
तोरितितुनोक्तं।अनेवसादेनस्याप्यापत्तिरित्युक्तमतिस्यइत्यादौतद्वारणायतत्रपरिभाषाप्रवृत्तेरावश्यकतयापदाग
मतिबाधितस्यस्थानित्वस्याप्यनयाबाधादितिचेन्नविरोधाभावात्निर्दिश्यमानपदाद्यवयवस्यनकारेसत्वेनदोषध्रौव्यात्उ
दस्थादित्यत्रतुनिर्दिश्यमानस्योदःपरत्वाभावेनततःपरस्यनिर्दिश्यमानत्वाभावेनचविरोधःस्पष्टमेवेतिबोध्यम्एवंच
तन्मध्यपतितन्यायबोधितस्थानित्वस्यापिनेयंबाधिकातस्यस्थानिवद्भावतुल्यत्वात्।नचयदागमेत्यनेनास्यभेदाभावेन
स्थानिबुध्याकार्यजननादित्यस्योभयत्राविशिष्टत्वेनकथमेतदितिवाच्यम्।कादेशःखल्ववश्यंवक्तव्यःसाकच्कार्यःअश्रा
वचनंसाकच्चकार्थमित्यादिभाष्यादस्यन्यायस्यातिदेशत्वलाभाद्यदागमेतिउदस्थादितिनिर्दिश्यमानस्योदाहरणदानात्
संज्ञाबोधकइतिलाभेनतयोर्भेदस्यसुज्ञेयत्वात्अतएवजरायाइतिसूत्रस्थयेनविधिस्तदंतस्येत्यस्यतुसंज्ञासूत्रत्वात्सूत्रस्थ

जराशब्दो जराशब्दांतपर इति तदंते आदेशप्रवृत्तौ परिभाषाविरोधः स्पष्ट एवेति दिगिति शेखरः संगच्छते। न चोक्तभाष्याद्व्ययसर्व
नाम्नामित्यकच्विषये निर्दिश्येत्यस्याप्रवृत्तिरेवास्तु अत एव किमः क इति सूत्रशेखरोपादितमिंधकीत्यत्र सभाष्यविरोधो
नेति वाच्यमन्यायसिद्धोक्तभाष्याभ्याम् एतद्भाष्यस्यैकदेशयुक्तित्वात् अकचि कृते घित्वं न प्राप्नोतीति भाष्यस्य तन्मध्येति न्याये
नाकच्विशिष्टस्य घित्वे कचश्रवणं न प्राप्नोतीत्यापाद्य यमतानन्तापरत्वाद्धित्वं इति समाधानमेकदेशिना कृतम् अत एव भाष्ये
थवा हकारस्यैतद् शक्तिजेनेकारेण निर्देश इति। उक्तप्रायेण समाधानं कृतं तत्र सशेखरस्तु ह‾ लम्प इति सूत्रस्थकैयटानु
रोधेनेति बोध्यं एतेनाकच्विषयेनापं न्याय इति प्रतीकमुपादाय किमः कादेशे कर्तव्य इति शेष इति वदंतः परास्ताः उक्तभा
ष्ये हृयविरोधात् मयर्यं तस्य किं युवकाभ्यां प्रक्रियाविरोधाच्च एतेनाकच्विषये नायं नियमः स्यान्निबद्धावेनेव तन्मध्यपति
तन्यायेनापि नहुध्येव कार्यजननादिति वक्ष्यमाणग्रंथो यो हे वव्याख्यानादयत्त्यलम्॥ विरोधाभावादिति। राज्ञः कचेत्यादौ नि
र्दिश्यमानराजनशब्दांतस्य कादेशो भवतीत्यादिना समावेशसंभवादिति भावः। यद्यपि सति संभवे बाधनमिति भाष्यन्या
यः विरोधेपि बाधसंभवस्तथाप्यबाधेनैवोपपत्तौ बाधो न न्याय्य इति भावः यत्यादेः परस्येति। सपद इति भाष्योदाहरणदने
कालितिविषये स्याश्वारितार्थ्ये नपरत्वादाभ्यां बाध इति भावः॥ नापीति निर्दिश्यमानस्येत्यस्य षष्ठीस्थाने इस्येतदर्थभूतत्वे

नवाक्यार्थबोधात्पूर्वंप्रवृत्त्यांतरंगत्वंतस्यएतयोस्तुस्थानषष्ठीनिर्णयोत्तरंप्रवृत्त्याबहिरंगत्वमितिभावः कैयटइति अ
त्रहृच्चिवीजंतुअनयोर्निर्विषयत्वाभावः हरीणामित्यादौदीर्घस्यादेशत्वायअलोंत्यस्येतिचरितार्थंनामीत्यादौअचइ
त्यस्य संकेतवत्वान्निर्दिश्यमानत्वाभावादंतरंगप्रवृत्त्युत्तरंबहिरंगप्रवृत्त्याबाधकाभावाच्चअकन्विषयइति।। अत्रय
द्वक्तव्यंतस्यागेवोक्तं।निर्दिश्यमानपरिभाष्यायाउदाहरणांतराणिविदुषः वाराहीपुत्रः हदिहिरमायास्तुपदः स्मात्वाकाल
कंअपिवत अन्यत्रस्यमेतत्प्रत्याख्यानप्रकारस्तुदुरूपपादश्चिंत्यः १२ तमप्ग्रहणमेवेतिनन्वनेकविधांतर्याभावेपिस्था
नकृतांतर्यस्यसत्वेनतत्रैवातिशयत्वलाभार्थंतमप्ग्रहणंतत्तन्न्यूनानतिरिक्तस्थानकत्वंतेनहरीणामित्यादौओदौनौ
नलाकृतिरित्यादौवकारोयण्नेतिचेन्न। तदभावेहिपूर्वसूत्रात्स्थानेग्रहणानुवृत्त्याप्रसंगेसदृशीभवतीत्यर्थेसंपन्नेस्थानेऽन्
तरसूत्रेसामर्थ्यादेवातिशयलाभेनतमप्ग्रहणस्योक्तार्थतात्पर्यकत्वसत्वात्।। तेनहिअनेकविधांतर्यलाभप्रसंगेस्थानेनैवां
तरतमोभवतिसतिसंभवेइत्यर्थेजातेतमप्ग्रहणस्यातिशयत्वलाभार्थत्वमित्येतदितिबोध्यं समानवर्णपादादीनांतेइति
तेनचरणशब्दस्यपदादेशोनेतिभावः। यद्यपिचरणंपदशब्दयोःपर्यायतयास्थान्यादेशसत्वेपिनदोषस्तथापियदंघ्रिश्च
रणोस्त्रियामितिकोशेनचरणशब्दस्यनपुंसकत्वलाभेनतत्स्थानेतन्समानार्थकपदादेशेनुमिपंदीत्यस्यापत्तेरितिकेचित्।।

CC-0. In Public Domain. Digitization by eGangotri

ननुपदन्नितिसूत्रस्यनस्थान्यादेशविधायकत्वंकिंतुव्यवस्थार्थत्वंकिंचस्थानेन्तरतमइतिसत्रस्यतपाठस्यभाष्येदूषितत्वे
नासदृशादेशनिवृत्तिमात्रार्थकत्वेपितादृशस्थानिनिवृत्त्यर्थकत्वाभावेननेदमुदाहरणंयुक्तमित्यस्वरसादाहतृज्वत्क्रो
ष्टुरितिचेति१३।१४॥नन्वेवमपीतिअर्थवद्ग्रहणपरिभाषयासर्वथाऽनर्थकस्यवारणेपीत्यर्थःअमहान्महान्भूतःम
हद्भूतःच्व्यंतस्योर्यादिच्विडाचश्चेत्यनेनगतित्वंकुगतिप्रादयइतिसमासःगौणार्थबोधकत्वेनशब्दस्यतत्वंबोध्यंसं
ज्ञादिरितिअत्रकर्मणिआतश्चोपसर्गेकर्मण्यङ्·आदिनानुकरणपरिग्रहःयद्वासंज्ञाआदिःप्रथमोबोधकोयस्यस
संज्ञीत्यर्थःअत्रपक्षेऽपिरनुकरणसमुदायकोबोध्यःमहांतोबाहूयस्यसमहाबाहुरित्यत्रात्वायोपसर्जनत्वरूपगौण।
स्याग्रहणमावश्यकं।अतएवसमानाधिकरणोत्तरपदेआत्वविधानंसार्थकमुपसर्जनप्रतिषेधश्चएवंचेदंप्रयोजनंत्व
साधारणपदकार्यविषयत्वस्येतिहृदिनिधायाह।किंचेतियत्तुपदोद्देश्यककार्यमेवतत्कार्यमितितन्न॥आन्महतइ
त्यत्रोत्तरपदाधिकारेणपूर्वपदाक्षेपाद्यथाकथंचित्तत्सत्वेपिराजश्वशुराद्यदित्यादितद्धितविधौसुवंतात्तद्धितइत्यस्यस
त्वेपिस्वमतेघकालतनेष्वितिज्ञापकादुसघमानःप्रातिपदिकात्स्यप्ययःसुपःपरस्मादेवंचगार्गादिभ्यइत्यादौवलक्षणेन
र्थसत्वेनतद्धितानांपदोद्देश्यकत्वाभावेनश्वाशुरिरित्यादौपदापतेःगोभवदित्यादौप्रगृह्यत्वापत्तेश्चनापिपदसंबंधित्वंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वं श्वाशुरिरित्यादाववतरुक्तौ नापत्तेः त्वद्वतीत्यत्र त्वादेशानापत्तेश्च तस्माद्वस्तुतः परव्यपदेशरहितानिमित्तत्वं तत्त्वं तद्धि
तविधौ प्रातिपदिकाधिकारस्य सत्त्वेपि वस्तुतत्र परव्यपदेशरहितनिमित्तकत्वसत्त्वात् न चैवं प्रत्ययोत्तरपदयोश्चे
त्यस्यापि परकार्यत्वापत्तिस्तथा च त्वद्वतीत्यादौ त्वादेशो न स्यादिति वाच्यम् उत्तरपदे परव्यपदेश इति निमित्तकत्वेपि च्वि
प्रत्ययादौ वस्तुतः परव्यपदेशरहितानिमित्तकत्वाभावात् अत एव नत्रह्योपादानं त्वद्वतीत्यादौ च्विप्रत्यये त्वादिक्षि
तिपदत्वसत्त्वेपि सुबन्तत्वाभावात् सुप्तिङन्तमिह पदत्वं विवक्षितं तत्त्वपदस्याप्रयोगेणेत्यादिना ग्रन्थकृतैव ध्वनितं यदि तु
राजश्वशुराद्यादित्यादौ उपजनिष्यमाणनिमित्त इति न्यायेन प्रकल्प्य चेति न्यायेन च भविष्यत्त्वेन परत्वबाध इत्युच्यते न
हापदव्यपदेश इति विहाय सुबन्तव्यपदेश इति पाठो बोध्यः उपाजमित्यादीति एतेन विशेषणत्रयस्यापीदमेव कृत्यमि
ति ध्वनितं तथा हि यदुपात्तमत्र इति न तद्विशिष्टरूपं यद्विशिष्टरूपं प्रातिपदिकादिति न तद्विशिष्टव्याख्योपस्थापकं य
द्विशिष्टार्थोपस्थापकं श्वशुर इति न तदुपात्तमिति बोध्यम् नन्वेवमोत्सूत्रस्य भाष्यासंगतिः तत्र हि अदो भवद्भो भव
दित्यादौ प्रगृह्यत्वं गौणत्वेन पदेदित्वं निपातस्य प्रातिपदिकतुल्यत्वादत आह निपातपदं त्विति निपतन्त्याख्यातार्थं प्र
ति विशेषणीभवन्तीति व्युत्पत्त्या निपातपदस्य चादिषु योगरूढत्वमिति भावः प्रातिपदिकपदं तु शुद्धरूढमिति चेन्मं

Nepal Sanskrit ... Digitization by eGangotri

बोध्यंवस्तुतस्तुअनुगतव्यक्तिकानांसंज्ञानांव्यक्तिरेवप्रवृत्तिनिमित्तंडित्थादिषुव्यक्तिरेवपदार्थइतिनडित्थत्वडित्थयो
र्भेदःक्वादिसंज्ञानामपिव्यक्तिरेवतत्रएवचनिपातसंज्ञायाअनुगतव्यक्तिरेवप्रवृत्तिनिमित्तमितिचादित्वेनचादीनामु
पस्थितिःप्रातिपदिकशब्दस्यतुशब्दएवप्रवृत्तिनिमित्तमितिप्रातिपदिकपदत्वेनोपस्थितिरितियुक्तमेवानयोर्वैषम्य
घनितंचेदंकुत्वंकस्मान्नभवतिभत्वादित्यादिनावृद्धिसूत्रेभाष्येस्पष्टंचक्रत्वंतत्सूत्रेविवरणेसंज्ञाशब्दस्वरूपंवाप्रत्य
येस्त्वतलादिभिरित्युक्तिस्त्वननुगतविषयालक्षणयातथाव्याख्यानंपरंकैयटस्तुचिंत्यएवकुत्वंनेत्यस्यककारोनेत्य
र्थस्तुप्रकृताभिप्रायेणतत्रांतरतम्यात्तस्यैवप्राप्तेः एवंचणत्वंप्राप्तमित्यादावपिलक्षणांविनैवनिर्वाहइत्यलम्॥ननु
नापपदकार्यविषयःकिंतुविशिष्टरूपोपादानविषयोयथागांवाहीकमानयेत्यादावपित्वदुक्तहेतोःस्वत्वेनात्वादिप्रवृ
त्तावपिगांपाठयेत्यादौपाठनक्रियान्वयानुविभक्त्युत्पत्तेःप्रागेवगौणत्वप्रतीत्योक्तहेतोरत्राभावेनचात्वादिनस्या
त्स्वमतेतुविशिष्टरूपोपादानाभावान्नदोषइतिकौस्तुभोक्तंयुक्तमितिचेन्नतत्राहगांपाठयेत्यादावितिननुवाघृणोपदए
वतत्स्वरूपतावपिवक्तव्यंततःपूर्वमेवप्रतीतिसत्त्वेनविनिगमनाविरहाऽतआहभाष्यप्रयोगेत्वमादेशकरणेनचेतिसां
ततिदीर्घआदिशब्दार्थःक्वचित्तथैवपाठःतदनापत्तिरिति अतत्वंसंपद्यतेअमहान्महानतरस्तेतयआत्वाघनापति

रित्यर्थः त्वद्भवतीत्यत्रतुपदसंस्कारपक्षेपि दोषोबोध्यः एतत्सर्वंवक्तुस्तत्पूर्वमेवतथाबोधइत्यभिप्रेत्यवस्तुतः सएवेत्या
हकिंचेतिकर्तृक्रियेचानिर्दिष्टाविति पाठः पुमान्स्त्रियेत्येकशेषात् अतएवभाष्येतथैवपाठः गामेवत्यस्यतत्पद
वाच्यमेवेत्यर्थः भाष्यस्यानुकरणमिदं अन्यथागोरेवेतिवदेत् एवंचाग्रेदेवदत्तेवेतिपाठः भाष्येसंबुध्यन्तस्यदर्शना
नप्लुतत्वंतुनवाक्यांतत्वाभावात् भाष्येपिगामभ्याजदेवदत्तशुक्लामितिपाठेतस्यवाक्यांतत्वाभावाच्चेतिबोध्यं श्लोकइ
ति अभिव्यक्तपदार्थापिस्वतंत्रालोकविश्रुताः शास्त्रार्थस्तेषुकर्तव्यः शब्देषुनतदुक्तिषुइतिश्लोकइत्यर्थः आरभते
तिकाचित्कोपपाठः तस्यात्मनेपदित्वात् नन्वेवमात्सूत्रस्यभाष्यासंगतिरेवोक्तरीत्यान्यायस्यपदकार्यविषयत्वेलाभेचत
थैव वक्तव्येन्यथासमाधिकरणमनुचितंमस्तुतविशिष्टरूपोपादानविषयत्वमित्तोपलभ्यतइत्याह अर्थाश्रयइतिएवंच
न्यायस्यपदकार्यविषयत्वमितिस्पष्टमेवोक्तमितिभावः त्वयापिमदुक्तरीत्यैवभाष्यंव्याख्येयमित्याहगोतइतिएवंचत्वदु
क्तविशिष्टरूपोपादानसाधकंनेतिभावः तस्मात्सुबंतव्यपदेशरहितत्वानिमित्तककार्यंयत्रविशिष्यार्थोयस्यापकंविशि
ष्टरूपंतत्रैवन्यायइतिसिद्धमितिबोध्यंनन्वेवमगोमतीगोमतीभूताइतिप्रत्ययलोपइतिसूत्रभाष्यप्रयोगेस्त्रियाःपुंवदि
त्यस्यापत्तिः अमहतीमहतीसंपन्नाइत्यत्रेवतत्रविशिष्टरूपोपादानाभावादेवास्यन्यायस्याप्रवृत्तिरितिचेन्नगोमतीत्यस्य

CC-0. In Public Domain. Digitization by eGangotri

नदीत्यर्थेनाभावित् पुंस्कत्वेनादोषात् स्पष्टं चेदं प्रत्ययलोप इत्यत्र विवरणे यद्यपि कैयटेनच्छंते क्वचिद्वृत्तेः कर्तृत्वं क्वचि-
त्प्रकृतेरेव तथा गोमती संपन्ना इत्यत्र प्रकृतेः गोमतीत्यस्य भूतेत्यनेनवैयधिकरण्यसत्वादिति विवरणेन दूषितमिति दि-
क १५ सुपपाः सुस्रोता इत्यादाविति स्रुरीभ्यांतुट्चेत्यौणादिकोसिप्रत्ययः तुडागमश्च आगमसमभिव्याहारे विशिष्टस्यैवार्थ-
वत्वमिति नियमेनासोऽत्रानर्थकत्वमिति भावः ननु नेदं प्रयोजनमवयवस्यानर्थकत्वेपि विशिष्टस्य तद्ग्रहणेन ग्रहणा-
न्नानर्थकत्वं न च निर्दिश्यमानस्येत्यस्यावयवापेक्षायामपि ग्रहणान्निर्दिश्यमानासंतस्योपधापादीर्घ इत्यर्थेन ग्रहणात्तेनि-
र्दिश्यमानासम् अनर्थक एवेति वाच्यम् अपि वादित्यादावनर्थकेपि वाघादेशाकरणेन निर्दिश्यमानस्यार्थवत्तो ग्रहणे माना-
भावात् स्वमते उणादीनामव्युत्पन्नतया सुस्रोतसित्यस्याव्युत्पन्नमेवेत्यपि न वक्तुं शक्यः सुपया इत्यर्थवत्तु तस्योदाह-
रणादिति चेन्न। सुस्रोतसित्यस्य तसिप्रत्ययांतत्वेनादोषात् — — र्मेति भाष्ययादिमेवोदाहरणं दृष्टव्यं यद्यपि भाष्ये दंडीवा-
ग्मीसेवोपात्तं तथापि तत्तदुपलक्षणतया व्याख्येयं अन्यथा सौ चेति दीर्घस्य सत्वेना — यमस्यानुपयुक्तत्वेन च तदसंगतिः स्पष्टे-
चेति दिक् अंगादिति   परे इत्यनेनारुचिः सूचिता नहीजंतु विभाषे इत्यत्र र्थवत्त एव षीध्वमः संभवो नामर्थस्य कथं इट
इति न षीध्वमोर्विशेषणमसंभवात् इटोवयवत्वेन विशिष्टे तत्सत्वेपि तद्रहिते तत्वाभावेन तत्वस्य दुरुपपादत्वात् किंतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धकारविशेषणं। येननाव्यवधानन्यायेन नषीशब्दव्यवधानेसत्यपिभवतिवचनसामर्थ्यात्तु इणः परोयइट् ततः परस्येतत्संबधिधकारस्यमूर्धन्यादेशोभवतीतितदर्थः। एवंचतत्रार्थवतः संभवेनांगग्रहणस्योक्तार्थबोधकत्वंयुक्तमेवपरंतुअर्थवद्ग्रहणेइत्यत्रांशेतेनानित्यत्वबोधनेपिअनिनस्मन्नित्यस्यनतन्मूलकत्वंभाष्येवचनरूपेणैवतस्यपाठात्तस्यष्टश्चा।पमर्थः विभाषेटइतिसूत्रेशेखरइतिबोध्यं अस्यानित्यत्वमूलकत्वंचदत्तमेव विभाषेटइत्यत्रानर्थस्यैवतस्यसंभवेजात्रापितथाभ्रमःस्यादितिममतुनावश्यकंनदितिइत्युक्तम्।१६।१७।तावमाशेखरितत्वप्रतिज्ञावलवभ्यमिति अनेनोभयत्रेदमेववीजंसूचितं यद्यपिशब्दाधिकारार्थाधिकारावेवानयोर्वीजमितिकैयटेनोक्तम् तथापिवक्षातिरितिसूत्रेभाष्येकथंपुनरेकयोगनिर्दिष्टयोरेकदेशोनुवर्ततेएकदेशोनेत्युक्तम् एकयोगनिर्दिष्टानांपदानामप्युपदेशेजनुनासिकइत्यतोनुवृत्तिदर्शनेनार्थविदधातुरित्यतोर्थवसदानुवृत्तिदर्शनेनचयथाश्रुतभाष्यप्रश्नानुपपत्त्यासमासनिर्दिष्टानामित्यथतदर्थोवाच्यः ननुपरस्परान्वितानामितिसमासेहिवृत्तिस्वभावाद्राजपुरुषइत्येतत् घटकराजपुरुषपदयोरपिराजसंबधवत्पुरुषइत्यर्थेशक्तिरितिनिर्विवादात्तरावनामेकदेशेनामकरणमित्युदघोषः एवंचपाकमूलइत्येतत् घटकमूलपदस्यपाकमूलार्थकस्यार्थरहितस्यकथमनुवृत्तिरर्थाधिकारादितिप्रश्नः शब्दाधिकाराश्रयणेनसमाधिः ए

कत्रार्थेएकोपस्थितिरूपेयोगःप्रयुज्यमानसवर्त्यंयत्परंतेननिर्दिष्टानापदानांमध्येएकदेशोर्थरहितोप्यनुवर्ततेनु
वर्त्ततेनुमीयतेशब्दाधिकाराश्रयणादित्युत्तरार्थःसमुदायाभिधायिभिर्द्वंद्वनिर्दिष्टयोरितितुप्रकृताभिप्रायेणपूर्वपक्षभा
ष्यव्याख्यानपरतयाबोध्यमितिलभ्यते।तथापिनेदंयुक्तम्औतोमशसोरितिसूत्रेचिनवमित्यत्रव्यावृत्तयेवासुप्या
पिशलेरित्यतःसुपीत्यनुवर्त्यवाऽनुतिष्ठतिरुक्तन्यायेनाशंक्यालुगुत्तरपदेइतिदृष्टांतेनवारणपरभाष्यासंगतेर्नहिदा
ष्टांतेदार्ष्टांतिकेवासमासनिर्देशोस्तीतियेनत्वदुक्तिसमीचीनाभवेत्तस्मान्न्यायस्यमदुक्तमेवप्रवृत्तौनिवृत्तौचबीजम्एक
संबंधान्वितानापरस्परान्वितानामित्येवार्थःअतएवालुगुत्तरपदेइत्यस्यार्थवत्तेनोल्लेखःअतएवपूर्वत्रलोकदृष्टान्तोल्लेखश्च
संगच्छतेइत्यलम् १८ आदादीपसइतिनन्विदंज्ञापकंज्ञापितेपिचारितार्थ्याभावात्इकारस्याकारेवहोर्लोपइत्यनुवृत्यापी
कारस्यनिवृत्तौ‾ कारविधानसामर्थ्यादेवपररूपंबाधित्वादीर्घोभविष्यतीतिचेन्नअंगवृत्तपरिभाषायासिद्धान्तेसत्वेनाक्ष
त्सार्वेतिदीर्घव्यावृत्त्याकारस्यचारितार्थ्येनापवादत्वेनदीर्घंबाधित्वापररूपापत्तेरित्याशयात् १९ दिवउदितीति ननुचारि।
तार्थ्याभावाद्ज्ञापकमिदंअर्धमात्रिकव्यंजनस्येषत्सादृश्येनैकमात्रिकोकारेपिदीर्घाप्राप्तेःनचव्रश्चेतिसूत्रेछग्रहण
करणलाघवेनछ्वोरित्यत्रक्वितीत्यननुवृत्तौद्युभ्यामित्यादावुठिह्रस्वश्रवणार्थंनतन्नित्यत्वात्पूर्वंदिवउत्वंतुनआंगत्वात्त

स्येव प्राप्तेरिति वाच्यम् प्रतिपदविधित्वेन शीघ्रोपस्थित्यादि व इत्येव स्यादिति चेन्न। उठ्यपि वकारस्य तथात्वे वोभयोः स
मकत्वादित्याशयात् सहद्वयसाधारणमपि तदस्तीत्याह ऋत्नु उदितीति। न च तपरकरणं दुर्लोप इति दीर्घबाधनार्थमि
ति वाच्यम् सुपत्रवाजिता बाणाज्वलिता इव पन्नगाः नैकं तोरस्य भासं तसवितर भ्रमयो यथेति रामायणप्रयोगविरोधा
त् उरण् रपर इति सूत्रेऽण्ग्रहणाभावे उः रपर इति भाष्यविरोधाच्च स्पष्टं चेदं तत्रैव शेखरे धर्मिग्राहकमानादादेशविषप
र्यंतेन सन्नाप्रसंसतनादिकूर्त्यप्रइत्यादौ न दोषः यद्यपि दीर्घत्वार्थस्यानभिधानात् सिद्धानामेव शब्दानामन्वाख्यानमित्य
णुदि सूत्रस्य भाष्यान्न दोषस्तथापि लक्ष्यैकचक्षुष्कानस्मदादीन्प्रति प्रवृत्तं शास्त्रमिति बोध्यम् नन्वेवमृदुपधायागोह इ
ति सूत्रे दीर्घनिर्देशो व्यर्थः उदुपधायागोह इत्यनेनैवेष्टसिद्धेरिति चेन्न। दोषो णावित्यत्रैतदनुवृत्तावान्तरतम्यात् दूषयतीत्य
त्र द्विमात्रसिद्धये दोष इति विकृतनिर्देशस्य कर्त्तव्यतापत्तेस्तत्रत्यव्याख्यानपरभाष्यासंगतेश्च न च दुष इत्युक्तावपि गुणे द्विमात्र
सिद्धौ ह्रस्वकर्त्तव्यतेति वाच्यम् तत्र कौण्डिन्यन्यायेन तदुत्तरं चारितार्थ्येनोत्वेन गुणबाधापत्त्या दुषयतीत्यनिष्टापत्तेः न चैवैयर्थ्यं गु
णबाधनेन कृतार्थत्वात् न च तावन्मात्रप्रयोजनत्वे न धातुलोप इत्यनंतरपाठेनैव सिद्धावुकारकरणं व्यर्थमेवेति वाच्यं लाघवा
भावात्पाठस्याशोकवनिकान्यायेन चारितार्थ्याच्चाप्रतनु उदित्यनुवृत्तोऽस्यानंतरतम इत्यस्य प्राप्यमाणानामनंतरव्यावर्त्तकत्वे

CC-0. In Public Domain. Digitization by eGangotri

नाप्रवृत्तौ न दोषो नापि भाष्यासंगतिरिति बोध्यम् । एतेन उदुइति ह्रस्वदीर्घप्रश्लेषेण गोह इति विकृतनिर्देशप्रत्याख्यानेन
विरुध्येयमित्यपास्तम् उपधाया गुण इत्युक्तौ उक्तन्यायेगुणबाधकत्वायत्नो गुहतीत्याद्यमिष्टापत्तेश्च नच क्ङितिविषये कुति
चेति गुणनिषेधेत्र चारितार्थ्येनोक्तन्याप्रवृत्तौ परत्वाद्गुण इष्टसि द्धिरिति वाच्यम् निषेधेनापि तन्न्यायाप्तियोग्यतानपायात्
अत एव संबुद्धौ नलोपनिषेधेन रुत्वस्य चारितार्थ्येपि अपवादो रुर्नलोपं बाधिष्यत इति भाष्यसंगतिः उत्तरसूत्रेपि तत्प्रत्या
ख्यानस्य चिकीर्षितत्वेन तदर्थेपूत्नीं तरस्यावश्यकत्वापत्तेः प्रश्लेषे तु खरि चेति चर्त्वबलादनुवृत्तिसामर्थ्याच्चेष्टसिद्धिः यद्यपि
ह्रस्वोकारकरणेपि भाव्यमानोप्युकारः सवर्णान्न गृह्णातीत्यनेनेष्टसिद्धिर्भविष्यतीति उदुपधाया गोह इत्यत्र विवरणोक्तं
तथापि तदुक्तयुक्त्याऽस्वरसंग्रस्तमत एव तत्सूचकमाहरित्युमिति बोध्यं स्वातंत्र्येणैतत्प्रत्याख्यानप्रकारस्तु प्रयोजनानामसत्वे
न्यादसोसेरित्यत्र उ इति दीर्घपाठ इत्युक्तं प्रागित्यलं २० गवेहतमिति वाक्ये खसमासेपि – तोनेति भावः नलुमतेति निषेधस्तु प्र
त्यासत्त्या लुमत्प्रत्ययनिमित्तांगसंज्ञोद्देश्यकविधावेव तत्प्रवृत्तेरंगीकारात्स्थानिवत्सूत्रेणासिद्धेः ल्विध्यर्थमिदमिति अनृणाइ
त्यादौ आशीरित्यासेच तृणहइम्शासइदङ्हलोरिति च सिध्यंति सुदृषत्प्रसाद इत्यत्र सोर्मनसी अलोमोषसी इति सुरोत्व
संनसेति दीर्घश्च न भवति मनसाहचर्याच्च शुपमाणो संनसेव असुप एव वोभयत्र ग्रहणात्तल्लक्षणमित्येव सिद्धेः प्रत्यय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लक्षणग्रहणं प्रत्ययनिमित्तकमेवेत्यर्थोपि द्रष्टव्यः। तेन प्रत्ययस्येतरविशेषणत्वेन गोहितमित्यादौ अवादिनन वाद्यु
पस्थितस्यैवापादयो भवंतीत्यर्थेन प्रत्ययस्येतरविशेषणत्वमेवेति वाच्यं एवं हि सति सर्वनामस्थाने चासंबुद्धौ ह्रस्वस्य गु
णः त्रिचतुरोरित्यादिविधौ प्रत्ययलक्षणेनापत्तावनिष्टापत्तेः तस्मादितरविशेषणत्वमित्यस्य समानाधिकरणे विशे
षणत्वमित्यर्थो वाच्यः एवमप्यर्थे प्रकृते तत्त्वमस्त्येवेत्यर्थः वस्तुतो वार्तिकमते त्विष्यर्थमेव प्रत्ययलक्षणसूत्रारंभोऽन्या
स्थानिवत्त्वेनैवेष्टसिद्धिस्तत्रास्य प्रवृत्तेः फलाभावात् एवं च सर्वनामस्थाने इत्यादावस्याप्रवृत्तावपि क्षत्यभावेन समाना
धिकरणेत्यादेरनुपयोगादन्यथा सुप्तिङंतं पदं सनपदे सर्वस्य सुपीत्यादावागत्या तदर्थं यत्नांतरकर्तव्यतापत्तेश्चेति मैव
तिन तु नित्यं समासेनुत्तरपदग्रहणेन विशेषणांतरसत्त्वेपि तत्स्वीकारेणात एव नो रचेत्यादौ न दोष इति नेदं युक्ततरमिति चेदयं भावः विशे
षणांतरासत्त्व इत्यस्योपस्थिततरादीत्यस्य स्त्रीप्रत्ययश्चेति निषेधेनासत्त्व इत्यर्थः तेनातिराजकुमारीरित्यत्र ह्रस्वयकगोस्त्रियोरिति
सूत्रेण तदादेर्नियमाभावेपि तदंतविधौ ह्रस्वसिद्धिस्तत्रोपसर्जनस्येति तु न विशेषणं गोशब्देपि तदादिपत्तौ अतिसुगोरित्यादौ तदा
वत्तेपि तदंतेरित्युपस्थितविशेष्यमादाय तदंतविधिरित्यत्र तु शब्दरूपमिति वक्तुं युक्तं तथापि तदादीत्यस्यार्थोधिकारलाघवेन प्र
त्ययविधानावधिरूपस्य ग्रहणेन वनो रचेत्यादौ तेन सामानाधिकरण्याभावात् शब्दरूपं विशेष्यमादायैव तदंतयोरावश्यकत्वा

दित्याशयात् अत एव हल्ङ्यादिसूत्रे शेखरे न च बहुश्रेयसीत्यादौ लोपाय ङ्याब्भ्यामुपस्थिततदादौ तन्मते नान्वयमप्युपे
त्यशब्दरूपं विशेष्यमादाय तदन्तत्वं संसाध्य सप्तिसीत्येतदुपस्थिततदादौ त्येतत्त्वेन ङीप्। साधितः अत एव एङ्ह्रस्वादि
त्यत्र शेखरोक्तिः संगच्छते अन्यथा कुलेतीत्यादिसिपपि अधिकरणान्वयस्यावश्यकतया एकदेशविकृतन्यायेन करतर
दितिरेफान्तप्रकृतित्वसत्वेनाकारान्तेतदादित्वस्यापि लाभेन च हल्लोपापत्त्या प्राचोक्तरीतेरेव शरणीयत्वेन तदसंगतिस्स
द्धैव अत एव उतरादि प्रतिषेधप्रत्याख्यानपरं भाष्यमपि साधकमित्याहुः धर्मिग्राहकमानात्परिभाषायामपि प्रत्ययग्राह्या
वितस्य तदादेर्ग्रहणान्नो — दोष इत्यन्ये एतदर्थं तत्परिभाषेयप्रसिद्धिरिति निरस्तं विशिष्टरूपोपादानाभावात् न चैवमपि
सनाद्यन्ताधातव इत्यत्रोपस्थिततदादौ त्यस्यान्वयानर्हत्वादुक्तदोषस्तदवस्थ एवेति वाच्यं क्वचिदुपस्थिततदादेर्लक्षणप
त इति तत्परत्वेनादोषात् अत एव सुप्तिङन्तमित्यत्रापि दोषोन्यथा पदसमुदायपरत्वापत्तौ ग्राहयतीनदीत्यादेः पदसमु
दायस्य मा स्म हीति वाक्यार्थे वर्तमानस्य बहुव्रीह्यापत्तेरिति निर्दिकूपत्रप्रत्ययो निमित्तत्वेन आश्रीयत इति केणः लुङ्स्य
तासी सुपि च रो सुपीत्यादौ एवं च द्वे एते परिभाषे इति भावः। यद्यपि प्रत्ययग्रहणे चापंचम्या इत्यस्य विशिष्यतया वक्ष्यमाण
त्वेनात्रैतद् व्याख्यानं न युक्तं तथापि विशेषणविशेष्यभावस्याव्यवस्थितत्वेन तत्र तत्र तत्तल्लक्ष्यानुरोधेनैवेष्टसिद्धौ तन्निष्क

लमित्यभिधायकत्वेनास्य प्राचामनुरोधित्वात् प्रतिषेधस्य सर्वस्य व्यवस्थार्थत्वेन कृतार्थत्वादित्यन्यत्र स्पष्टं गर्गादिभ्यो य
जित्यादौ पूर्वविधानाभावात् प्रत्ययत्वाभावेन विहितेयं चम्याः कृतार्थत्वात् भावे पुनः प्रवृत्तौ मानाभावेन चास्या विहितप्रत्ययविशि
ष्टत्वं बोध्यं नन्वेवं प्रत्ययग्रहणे तदादिनियमेनाधिकव्यावृत्तिनन्यूनस्येति तेन यन्मात्रमित्यादौ वत्वं तास्वार्थे इति मात्रच्प्रसि
द्धिः अस्यापत्यमित्यत्र दत्ताद्यञिञोश्चेति फक्सिद्धिश्चनुपसर्जनादिति सूत्रविवरणेत्यास्वमतापरतेत्यादौ उपसर्गस्य पृथ
क्करणे न जातः समासाभावः कल्प्यते समासत्वं तत्करीत्या मनःशब्दस्येति न विशिष्टस्येति तत्रत्यशेखररीत्या च देवदत्तश्चि
कीर्षतीत्यादावधिकव्यावृत्तावपि चिकीर्षतीत्य तत्वापत्तावुक्तदोषापत्ति अत एव भाष्ये प्राकत्वादित्यादौ देवदत्तो गार्ग्यः पर
मगार्ग्येण इत्यादौ चाधिकव्यावृत्तिः फलमिति चेन्न देवदत्तस्यापत्यमिति विग्रहे वयवेपि एकार्थीभावांगीकारेण षष्ठ्यंकृतसंभ
वे रयत्यमित्यर्थे विधीयमानस्त्र शब्दादपि स्वद्वात्तःपुरुषत्तस्यत्रावयवस्य राजन्दत्यस्य षष्ठ्यंतत्वेन समासः स्याद्द्वद्वस्य रा
त्तःपुरुष इत्यादौ समुदायेत यावपि नन्वनेन तदभावात्तस्मादधिकव्यावृत्तिरिव न्यूनव्यावृत्तिरवश्यं वाच्या सा च मुख्यव्यवहार
विषय इयन्मात्रमित्यादौ त्वतिदेशेन तत्वमिति तत्र दोषः भाष्यन्नूपलक्षणतया नयमन्यथा समुदायव्यावृत्तिसिद्धावपि अ
वयवव्यावृत्तेरकरणेन तत्र तत्र न्यूनतापत्तेः। उद्योतादयस्तु तत्रत्यकैयटानुरोधिन इति न तद्विरोधः सुमनायत इत्यत्र उप

टी॰

श॰कं॰री

९२

सर्गस्य पृथक्करणेन तज्जातसमासाभावकल्पनेपि सुपः समुदायविहितत्वेन तेनाधिक्यव्याहतेरशक्यत्वात् तत्रत्यशेखर
स्तु चिन्त्य एव तस्मात्तत्र समुदायात्तदनुत्पत्तिरेव पृथक्करणेन बोध्यत इत्यलम् उगितश्चेति सूत्रभाष्ये इति ननु प्रत्ययाप्र
त्ययग्रहणेन तस्य वृत्तावपि वनोर चेत्यत्र वोगितश्चेत्यत्रापि उगिदंतादित्यर्थे निर्यवतीत्वादेन दोषः न च दादिदूतस्योपस्थि
तौ उगित्प्रातिपदिके तदादित्वाङीवनापत्तिरिति वाच्यम् प्रत्ययाप्रत्ययकोटिद्वयस्य सत्वेन तत्र वाक्यभेदेनांगिदंता
दिति व्याख्याते नोगित्प्रातिपदिके प्राप्तदोषादिति चेत् तर्हि फलाभावात्तदप्रवृत्तिरित्याशयात् । अत एव संज्ञाविधावपि
परिभाषाज्ञापक एवं सुप्तिङन्तमिति सूत्रस्थभाष्यसंगतिः तपः प्रातिपदिकात्तस्यादौ तदन्तविधिसत्वेन प्रत्ययमात्र
स्य परसंज्ञासत्वेपि ज्ञापकस्य चारितार्थ्येनासंगतिः तत्सामर्थ्यात्तद्देशे तद्भावस्तु प्रयुक्त इति विवक्ष्यते न लोपविधावपि धावपि वा
क्यभेदांगीकारे तु फलाभावस्तुल्य एवेति बोध्यम् पत्ववयववयवः समुदायावयव इति न्यायेन निर्यवमतिरित्यादिसिद्धौ प्रत्य
याग्रहणेनापि तस्य वृत्तौ स्वस्यभाव इति तन्न अवयवावयवत्वात् पूर्वपरावयवस्यावस्थानं तत्रैव तेन लोकसिद्धनग्रहणे वा
धनात् । नन्वेवं प्रत्ययाप्रत्ययग्रहणे एतदप्रवृत्तौ सनाद्यंता इत्यत्रापि प्रतीषितीति प्रतीकस्थशेखरोक्तरीत्या हान इत्यप्रत्यया
प्रत्ययग्रहणे नैव दत्तश्चिकीर्षतिरिति पूर्वोक्तोदाहरणसंगतिः तत्र हि अभ्यासान्तस्य सनीति दीर्घनिमवापनंतात्वात्तत्सि

घेस्मादावुनरखडे सात्यदाघो रितिवारणायतावेवसुसिद्धो यो ततः परो सेः वचप्रकृतिराद्यादिग्रहणं चकृतमित्यागंतुनामतेनिवेशारस्यथकैचोरेइति सूत्रस्य भाष्ये लोकारखंडसस नः प्रत्ययाधिकारस्थत्वाभावान प्रत्ययत्वाभावात् सनंतत्वं तु स्वरूपतोऽस्त्येवेति तदंतस्य धातुत्वं भवत्येव हि सन्यतइत्यस्यांगावयवाभ्यासस्यातइत्यस्यात् सनीत्यर्थे तत्वमपि सुलभमित्युक्तं षत्वे तु तत्रपूर्वत्रासिद्धमद्वित्वे इत्युक्तेः षत्वे कृते द्वित्वमित्याशयः नच सन्यङोरित्यत्र लिटिधातोरित्यतो धातोरित्यनुवृत्तेः पूर्वधातुत्वे सत्वेव द्वित्वप्रवृत्त्या प्रतीपइत्यवस्थायामेव सनाद्यंता इति शास्त्रस्य प्रवृत्तेः नच प्रत्ययाप्रत्ययग्रहणक्षितिवाच्यम् एवं हि सकृतद्वित्वस्य धातुत्वाभावेन ततो लडाद्यनुपपत्तेः प्राप्तद्वित्वस्य द्विरुच्चारणरूपत्वेन विकाराभावेन लक्ष्ये लक्षणस्येति न्यायाप्रवृत्त्या पुनर्धातुत्वेन प्रत्ययाप्रत्ययग्रहणस्यातीवसत्वादाह। वस्तुतः पूर्वधातुत्वे धातोरित्यस्यवादिविधौ विहितविशेषणत्वं नांतरं गत्वातिवादिउक्तं सन्नंतसमुदायस्य प्रथमेवाचत्वादादेः प्राश्वसापेक्षत्वेन द्वित्वप्रवृत्तेः लिटिधातोरित्यत्र धातुग्रहणं तिष्ठतु तावत् सान्यासिकमिति भाष्योक्तेधातोरित्यस्यानिवृत्त्या प्राव्हांतरं प्राप्तिकधातुसंज्ञा अप्रवृत्तेश्चेति चेन्न देवदत्तो गार्ग्यः परमगार्ग्यायणइत्यादेरविवक्षितत्वादादिपदादनेन सूचितएवेति।२३ प्रत्ययग्रहणे चापंचम्याइतियद्यपि भाष्येन तदंतविधिप्रयोजनकथनावसरे प्रत्ययग्रहणं चापंचम्याः प्रयोजनमित्येवोक्तं तथापि प्रत्ययग्रहणं चेति पूर्ववाक्येन प्राप्ततदंतविधिरेव

टी॰
शांकरी
१८

प्रत्यासत्त्यापंचम्या इत्यनेन निर्दिध्यत इत्यर्थे तोलब्धं विधेतुना स्योपयोगस्तत्रान्यथावारणस्य प्राग्युक्तत्वाद् इतः पर्यवसितार्थमाह परिगृह्यत इति अनुघत इत्यर्थः प्रयोजनांतरमाह यथेति। ननु चरितमित्यादौ वारणाय तत्र रदाभ्यामिति कारविशेषणान्निष्ठेति तन्त्रलुप्त षष्ठीकमिति नैकदेशान्वयः एवं च पंचम्यंतात् परप्रत्ययाश्रयणाभावादुक्तदोषस्तदवस्थ एवेति चेन्न प्रत्ययावयवेपि प्रत्ययत्वव्यवहारस्य प्रत्ययलोप इति सूत्रे प्रत्ययग्रहणेन ज्ञापितत्वात् अत एव आदेशप्रत्यययोरिदुपधस्यन्यादौ लक्षणेश्रयणेन्नसाप्यदाद्योरिति चरितार्थमिति बोध्यम् यद्वाग्नुत्रातिवैचित्रेण रदाभ्यामिति निष्ठायामित्येकदेशेपि विशेषणं यदागमपरिभाषया अनित्यत्वादुक्तेन दोषः लुप्तविभक्तिकं तत्वकल्पने गौरवं निर्दिश्यमानपरिभाषयानुनात्रनिर्वोढः निष्ठापरस्यैतच्छास्त्रसंकेतितत्वात् यद्यपि अंत्यविकारेत्यस्य देशस्येत्येवेदंसिधं तथापि तीर्णवानित्यादौ दोषः स्यादेवः न दोष इति न च तदंतग्रहणाभावेपि ङ्याभ्यांपरस्यापृस्य हल्लोलोप इत्यर्थे न दोष इति वाच्यम् अनयात दंतांशानुपस्थितावपि तदादीत्यंशोपस्थित्या तदादेः परो यो ङीत्यर्थे वृत्ते तु तिसीनामपि प्रत्ययत्वेनोपस्थिततद्विधानावधिभूततदादीत्येतद्विशेष्यतया ङ्यावंतात्तदादेरित्यर्थापत्तौ बहुश्रेयसीत्यादौ सुलोपानापत्तेः आदिना स्त्रीभ्यो ढगित्यादेः संग्रहो बोध्यः एतेन तदंतांशस्य निषेधेपि हलङ्याबित्यत्र न दोष इत्यपास्तम् प्रत्ययो निमित्तत्वेनाश्रीयते एवं पत्रापीसनयैव क्रोडीका

रोवोध्यः तत्र यत्र केणः सुपि च्चेत्यत्रादौ पंचम्यंततां तत्राध्याहृतयोर्यत्तत्पदमादाय निषेधो वोध्यस्तत्र प्रमाणमाह अत एवेति
तादृशात्तत्पदमादायापि तत्कृतेरंगीकारादेवेत्यर्थः २७८ कुमारी श्रमणारूपेति लौकिकवाक्यमिदं रूपं तु कुमारश्रमणा
रूपेति कर्मधारये पुंवत्वविधानात् यद्वा कुमारी श्रमणारूपा यस्यां नगर्यामिति वहुव्रीहिस्तत्र जातेश्चेति निषेधान्न पुंवत्व
म् । कुमारादिशब्दानां वैकल्पिकजातिकार्यमित्यस्य भाष्यादिसंमतत्वात्स्मथमस्मागेवीजं तु धर्मिग्राहकमानात् प्रत्यय
त्वतद्व्याप्यधर्मावच्छिन्नवाचकशब्दोपादाने एवैतत्प्रवृत्तिरूपम् अत एव रात्रैः कृतिविभाषेत्यत्र तु न निषेधः रात्रैस्तद
संभवस्तु न आचारक्विवंतात् आदौ तत्संभवात् उपसर्गस्य घञीत्यत्र तूपसर्गात् घञो संभवान्न निषेधः । कुमारश्रम
णानरेत्यत्र तु रूपादिसाहचर्येण हूस्वो वारणीयः संज्ञाविधावित्यनेन न तु न सिद्धिः । तत्र संज्ञाविधाविति यदि कर्मष
ष्ठ्या समासस्तर्हि तरप्तमपौ घ इत्यत्रासत्यपि तदंतविधौ प्रदेशे घरूपेत्यादौ तदंतग्रहणाद्दोषतादवस्थ्यात् अथवा कु
रणा तृतीयया समासः घसंज्ञायां तदंतविधौ प्रदेशे घरूपेत्यादौ प्रत्ययग्रहणाभावान्निषेधवैयर्थ्यप्रसंगात् अथवा संवं
धसामान्यषष्ठ्या समासः । संज्ञाया विधौ संज्ञया च विधाविति निष्ठेति पूर्वनिपातविधौ निष्ठामात्रस्य पूर्वनिपातापत्तिः न
च कर्मषष्ठ्या समासेन विधौ निषेध एवास्तु प्रदेशे तत्सामर्थ्यात् तदभावोस्त्विति शेखरे प्रतिपादितमेवेति वाच्यम् । प्रत्ययग्रह

CC-0. In Public Domain. Digitization by eGangotri

लोचापचप्याइत्यस्यतीर्लइत्युदाहरणेदानपरयेनविधिरितिसूत्रभाष्यविरोधापत्तेःरात्रेःकृतिविभाषेत्यत्रापितदभावा
पत्तेश्चनिषेधासत्त्वप्रदेशेतदंतह्रस्वेगौरपरमब्राह्मणितरेत्यत्रह्रस्वःप्राप्तोसत्त्वेतुतस्मिन्नविधौतन्निषेधप्रदेशेतदंतवि
धौगौरब्राह्मणितरेत्यत्रैवप्राप्नोतीतिफलभेदस्तस्ययेनविधिरित्यत्रकैपदेनैवोक्तत्वाच्चनिष्ठेत्यत्रोक्तदोषापपत्तेश्चतत्रत्यशा
स्वरस्यप्राचामनुरोधित्वमेवेतिबोध्यम् उत्तरपदाधिकारेइतितुप्रत्यासत्त्याउत्तरंपदविशेष्यतयाप्राप्ततदंतविधेरेव
निषेधिका अतएवस्वरूपेत्यत्रउत्तरपदाक्षिप्तपूर्वपदेनप्राप्तस्यननिषेधः अन्यथाभाषितपुंस्कादित्येतत्सामानाधिक
रण्येनानेकाचःभाषितपुंस्काघाङीतस्यह्रस्वइत्यर्थापत्तौयतीरूपेत्यादौह्रस्वानापत्तेः। इलःशातरिङीपिचरूपमेतत्अ
तएवष्यङः इतिसूत्रेष्यङंतस्यपूर्वपदस्येत्यर्थसिद्धिः। अन्यथायोग्यत्वात्तदाक्षेपाभावेनातिकारीषगन्ध्यापुत्रइत्यत्रापि
तदापत्तिः एतेनसुपिचेत्यादाविवयोग्यपंचम्यंतान्यत्वमादायप्रत्ययग्रहणेचापचप्याइत्यनेनेष्टसिद्धौइयेव्यर्थाइत्यपास्त
म् शब्दस्वरूपविशेष्यमादायप्राप्ततदंतस्यतेननित्यनिषेधेपिउत्तरपदेइत्यादिविशेष्यत्वेनप्राप्तस्यतदलाभाद्वरात्रेःकृ
तोस्यादावपितदापत्तेश्च। अतएवलेखग्रहणस्यज्ञापकत्वसंगतिः अन्यथानेननिषेधेलेखशब्देतदप्राप्तौविध्यर्थंतस्या
दितिनत्संगतिरितिदिक् २५ नन्वेवपरमकारीषगन्धीपुत्रइतिद्वयोर्भिन्नक्रमः एवंप्रत्ययग्रहणपरिभाषास्वीकारे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अतिकारीषगंध्यापुत्र इत्यत्रैवात्रापि स्यादित्यर्थः महद्वद्दुष्णीनरे वर्तनमिति वयथा तत्र न तथात्रापि नेति या वत्।
यद्यथाश्रुतमेव ष्यङः इति प्रत्ययग्रहणेन शब्दरूपविशेषमादाय तदंतविधौ उत्तरपदाक्षिप्तपूर्वपदमपि विशेष्य
ष्यङन्तांतदंत्यर्थस्य परमकारीषगंधीत्याद्यर्थमावश्यकत्वेन तत्रैवात्रापि स्यादित्यर्थः ननु विषयसप्तमीस्वीकारे प्रत्य
यगृह्यमाणे सत्यनुपसर्जनस्त्रीप्रत्ययविषये तदादिनियमेऽन्यत्र तु सतीत्यर्थे न तद्विषयकवाक्योपप्लवत्वे नानुपसर्जनविषय
कवाक्यस्य परमकारीषगंधीपुत्र इत्यादौ संप्रसारणं तथा सार्थवयेपि उपसर्जनं पत्तुष्यङः तदादितदंतस्य मूलवप ह्रस्व
संप्रसारणमित्युपसर्जनविषयकवाक्यस्यैवेयर्थ्यमेवता हृशलक्ष्याभावात् यद्यपि कारीषगंधायतिस्वामिनीयस्येति ब
हुव्रीहौ तत्संभवस्तथापि परिभाषायां प्रत्यासत्तेराश्रयणेन यस्य समुदायस्य स्त्रीप्रत्ययांतत्वमानेयं तदर्थं प्रत्युपसर्जन
त्व एव तदादिनियमांगीकारादिति चेन्न प्रतिलक्ष्यं लक्षणोप्लवस्य सर्वत्र सत्वेपि विप्रतिषेधे परमित्यादिना तत्तद्विषयकवाक्योपप्ल
वाभावबोधनमिवोपसर्जनविषये तदादिनियमो भवतीत्यनेन न तत्तद्विषयकवाक्यस्यैवाभावबोधनात् सामान्यतः प्राप्ततदादि
नियमस्यानुपसर्जनविषये निषेधमाह मात्रार्थकत्वेपि उपसर्जनविषयां तात्पर्याभावाच्च केचित्तु कारीषगंध्यामतिक्रान्ता का
रीषगंध्या विनापि प्रत्ययं पूर्वपदस्य लोपः तस्याः पतिरिति कारीषगंधीपतिरित्यत्र तत्संभवोप्यस्तीत्याहुः नन्वेवं दृष्टामालेत्यादौ

आवंतासुपूप्रवृत्त्यर्थं ज्याप् ग्रहणमावश्यकं तदादिनियमाभावादेव च तत्प्रत्याख्यानासंगतिः नत्वत्र लिंगविशिष्टपरिभाषावसरः। आप्रहितस्य दृष्टामाल इत्यादेः समुदायस्य प्रातिपदिकत्वाभावात् तत्तश्चाम् दृष्टामालादेवदन्तेत्यादावकांतरतापत्तिरिति चेत्सत्यं प्रत्याख्यानपरभाष्यप्रामाण्येन प्रातिपदिकसाहचर्येण च पृथगर्थोपस्थापकविभक्त्यनवपकङ्यावंतस्यैव ग्रहणात् प्रत्येकमविवदत्वसत्वेनैकांतरत्वाभावाच्चादोषादिति स्वपृङ्याप्सूत्रे शब्दरत्ने इयं वाचनिक्येवेति किंचित्तु प्रत्ययग्रहणे यस्मादिति परिभाषाग्राहके पूर्वोक्ते यस्मात्प्रत्ययविधिस्तदादीति योगविभागेन इयङुवङित्यतो स्त्रीत्यनुवर्त्यशब्दाधिकाराश्रयणादर्थवत्वं संपाद्य स्त्रीप्रत्यय इत्यर्थः। पूर्वत्रात्वतः स्त्र्याख्येत्यनुवर्त्यते तेन स्त्रीप्रत्ययस्यैव विशेषणात् प्रधानस्त्रीबोधकप्रत्ययभिन्नप्रत्ययग्रहणे तदादिविधिरित्यर्थादिपंलब्धेत्याहुः। तत्र भाष्यानुग्रहो विचार्यः यत्तु ष्यङः इति सूत्रेऽनुपसर्जनस्येत्येवास्तु तत्सामर्थ्यात्तदादिनियमाभावः एवं च ष्यङः तस्यानुपसर्जनत्वाव्यभिचारात्तष्यङ्विशेषणात्तत् अनुपसर्जनं यत्तदंतस्य संप्रसारणमित्यर्थेति कारीषगंध्यापुत्र इत्यादौ न दोषः गोस्त्रियोरित्यत्रापि शब्दरूपविशेष्यमादायलब्धं तदंतेनोपसर्जनस्य विशेषणात्स्त्रीप्रत्ययांतं यदुपसर्जनं तदंतस्य प्रातिपदिकस्येत्यर्थे राजकुमारीत्यादावपि न दोषः अतिकुमारीत्यादौ व्यपदेशिवद्भावो बोध्यः एवं च प्रयोजनानामन्यथासिद्धत्वे नैषा लक्ष्यसाधिकेति चेन्न। अतिगोवष्कपणीत्यादौ वकयणीशब्दस्य।

गुणाधावृत्वाल्लौकिकोपसर्ज्जनत्वेपितदंतस्यगौणस्त्रीयोपसर्जनत्वसत्वेनह्रस्वापत्तेः।नचस्त्रिङ्गा तेपितत्रतदंतह्रस्वबाधका
भावेनेष्टापत्तिरितिवाच्यम्।गोस्त्रियोरितिसूत्रभाष्येतिराजकुमारीत्यत्रह्रस्वत्वमाशंक्योक्तपरिभाषयाकृतसमाधानेनतद्बा
द्बाधकसत्वात्‌अन्यथापरिभाषास्वीकारेपित्वदुक्तरीत्यादोषस्यदुष्परिहारत्वेनतदसंगतिःस्पष्टैवउपसर्जनस्यविशेष्य
त्वेगौणत्वांशेमतदंतविधौशोभनागौःसुगौःअगौःनपूजनान्नञस्तत्पुरुषादित्वाभ्यांसमासांताभावः।परमासुगौरगौर्वीयम्
स्यपरमसुगोःपरमागोरित्यादावपितदापतेश्चससहायेव्यपदेशिवद्भावाग्रहत्याचित्रगुरित्यादावगतेश्चेत्यलम्॥२॥२७
कर्मणीकांतेइतिकेचेत्यनेनोक्तइतितृतीयाकर्मणीत्यतःकर्मणीतिचानुवर्ततइतिभावः।पदात्परत्वाभावेनचेतिननु
कुत्सनेचसुपीत्यतःप्राक्पदाधिकारइतिस्वयमेवपदादितिसूत्रेस्थापितत्वेनगतिरनंतरइत्यस्यततःपरत्वेनेदमसंग
तमितिचेन्नहितेनोचशब्दः।यतःपदादिस्थत्वमतःपदात्परत्वाभावइत्यर्थः।यत्रपादादिस्थत्वंतत्रपदात्परत्वाभावस्यानुमा
नंयत्रापादादिस्थत्वंतत्रतत्परत्वमितिनान्यत्रातिप्रसंगइतिभावः।एवंचाभ्युद्धृतमित्यस्ययदिपादादिस्थत्वंतदानंतर
ग्रहणस्यफलमितिनज्ञापकत्वमितिबोध्यम्।यद्यपिभाष्येऽनंतरग्रहणमनर्थकंगतिर्गतावितिवचनादित्युक्तंतथापितदेक
देश्युक्तमयुक्तयुक्तेः।अतएवाग्रेभवस्यैषापरिभाषाकृद्ग्रहणेगतिकारकपूर्वस्यापीतिपदमनंतरग्रहणंकरोतीत्युपसंहृत

मितिननेनतदधिकारबाधउचितइतिबोध्यम् ननुतस्मामाण्यातदनधिकारए वास्तु एवंचनाभ्युधृतमित्यनंतरग्रहणस्य
फलंभाष्यंत्वन्यथायोजनीयमित्याह वचेत्यादि अयंभावः बहुव्रीहौप्रकृत्येत्यतः पूर्वपदग्रहणमत्रानुवर्ततेउत्तरत्रानुवृत्त्य
र्थमन्यथामहत्कद्रुत्यापत्तिः एवंचाभ्युधृतशब्दस्याभितः समासेप्राप्तस्यसतिशिष्टथाथादिस्वरस्यापिबाधनार्थमनंतरस्या
पूर्वपदत्वेआद्युदात्तत्वाद्दात्तत्वायानंतरग्रहणंतत्परिभाषामंतरेणनसंभवतीतितज्ज्ञापकमितिभाष्याशयः एवंचभाष्ययो
रैक्यमेवनैकदेशयुक्तित्वकल्पनमपीतितन्नएवमभ्युधृतमित्यत्रैवहरादागतइत्यत्रापिप्राप्नोतिनचकारकाद्दत्तश्रुतयो
रित्यत्रकारकादितियोगविभागेनकारकात्परंगतिपूर्वपदंक्तांतमंतोदात्तमित्यर्थकेनाप्राप्त्याकृदुत्तरप्रकृतिस्वरेणा-
दात्तत्वसिध्यावनंतरग्रहणस्यज्ञापितेविअचरितार्थ्यात्भाष्यासंगतेश्चतस्मादुक्तन्यायाज्ञापकपरभाष्यप्रमाण्याच्चपूर्वभा
ष्यसैकदेशयुक्तित्वेनाभ्युधृतमित्यादावव्यवहितनिवृत्त्यर्थमेवज्ञापकंवस्तुतोभाष्येऽनंतरग्रहणस्यप्रयोजनत्रयमुक्तापका-
र्थमेवस्थापितंननत्प्रयोजनांतरमपीतितत्रव्यवहितनिवृत्त्यर्थंनतद्गतिर्गतावितिपरत्वाद्बाधात्तनाप्यपूर्वपरत्वेस्वार्थका
रकादितियोगविभागेनैवसिद्धेः तस्माज्ज्ञापकार्थमेवेतन्नान्यत्रेवात्रापिज्ञापकत्वंकिंतुबोधकमात्रमितिलभ्यतइतिबोध्य
म् यत्रेति ननुपञ्चगतिकारकसमभिव्याहृतंक्तदंतंतत्रतद्विशिष्टस्यैवग्रहणेदेवदत्तेनकृतमित्यादेःप्राप्तिःयदिक्तांतंतस्या

त्समुदायस्य तत्त्वेपि समासग्रहणकृतनियमेन परत्वा हूधाद्वयवस्य च कृदंतत्वाभावादिति चेन्न विध्युद्देश्यतावच्छेदका
क्रांतस्य तस्य समभिहारे दूसर्थात् अत एव गतिकारकोपपदानामित्यस्य सांकुदिनमिति फलमुक्तं भाष्ये अन्यथा स्वार्थिक
त्वे समास प्रवृत्तेः प्राक्प्रवृत्तावपि अनया परिभाषया विशिष्टादेवाणो सिद्धौ न तदसंगतिः स्पष्टं च तत्रापि प्रातिपदिका
धिकारेण वा कृत्स्यान्तत्वेन विशिष्टादिभ्यः त्वाभावात् परत्वादिति उत्कृष्टत्वादपवादत्वादित्यर्थः तक्रकौण्डिन्यन्यायादि
तिभावः। स्त्रीप्रत्यये चेति निर्विषयत्वाव-क्रोशीत्यादौ वारितार्थ्येपि तत्प्राप्तियोग्यतायास्तत्रापि सत्त्वात् यद्यपि लच:।
स्त्रियामित्यत्र तदादिनियमेन निषेधे समुदायादेव भविष्यतीति नास्य फलं तथाप्यवयवात्तस्याप्रवृत्तये फलस्य सत्त्वादिति
भावः अन्यथेति अत एव गतिकारकेत्यस्या एवमप्यवयवात्त्वापत्तिः प्राप्नोतीत्याशंक्यानया समाहितम् तत्फलत्वे ना
पीतियुक्ते इति स्वरविधायके अस्यानुपस्थित्या॥ ण्यात्त्रधार इत्यादौ स्वरसिद्धिरिति २९ तेनेष्टकचितमिति इष्टकेषीति
सूत्रे उत्तरपदाधिकारेण पूर्वपदाक्षेपात्तदंतविधिरिति भावः स चावश्यकोन्यथा पक्वाश्चेष्टकाश्च चिताश्चेति समाहारे पू
र्वपदत्वाभावेपि ह्रस्वापत्तेः पक्वेष्टकाचितमिति चेष्यत इति भावः। एतेन तदाक्ष्ये फलाभावादिति मन्दुः परास्तः २९ य
त्तु यापर्य्यवानिति आघतवदिति सूत्रे भाष्ये तत्प्रत्याख्यायाश्रितलोकसिद्धन्यायप्रयोजनमियायजहारेत्यादिप्रदर्शितं

तत्र कैयटेनेत्थं वर्णितं अर्थवान् यो धातुः तदवयव एकाजिति यद्यपि तत्र भेदाभावादवयवत्वासंभवस्तथाप्येतन्न्यायप्रवृत्त्या द्वित्वं तदस्तीति। इयायेत्यादावेकाच्त्वोपपत्तिर्गौणो अन्यपदार्थत्वेन विवक्षितेऽर्थस्योपादानमुक्तिपदार्थत्वेन विवक्षितेन तु त्यागः प्रतिलक्ष्यं लक्षणोपप्लवादनर्थकसमुदायविषये उर्णुनावेत्यादौ न दोषस्तद्विषयकलक्षणान्तरस्य कल्पनादिति कैयटाशयः मुख्यव्यवहारत्वादिति अयं भावः एवं हि सति इयायेति न्यायप्रयोजनं भाष्योक्तं विरुद्धं स्यात् एकपदाऋगित्यादाविवार्थविशिष्टधातोरन्यपदार्थतयाइकारादेर्वर्णस्य तदवयवतया च मुख्यव्यवहारस्य सत्त्वात् न च भाष्ये व्यवहारस्येयायेत्यादावुक्तरीत्यासंभवेन कुतो नाशिश्रियदिति वाच्यम् द्वित्वविधावर्थविशिष्टस्यान्यपदार्थत्वेनैकाजिति बहुव्रीहावनर्थके उर्णुनावेत्यादावगत्या तत्र प्रथमत्वस्याव्यतिदेशेनैव वाच्यतया चार्द्धजरतीयस्यानौचित्यादिति न तत्र मुख्यव्यवहारमद्रियादिति वाच्यम् एकपदागित्यत्र हि न्यायस्यास्य लोकसिद्धत्वप्रतिपादनावसरे यद्वर्णसमुदायः ऋगित्युच्यते एकस्मिन्नपि तत्प्रयुज्यते एकपदागित्युक्ता अर्थेन युक्तो व्यपदेशः पदं नामार्थः नाम इति प्रातिपदिकमर्थश्चान्यपदार्थ इति मुख्य एव व्यवहार इत्युक्तापुत्रेति दृष्टान्तेन न्यायः साधितो भाष्ये तत्रत्यकैयटस्तु क्रमप्रकारस्तु न युक्त इति स्वयं भाष्यार्थमाह नृत्कादेरिति असहाये इत्यस्यातिदिश्यमानधर्मवदसमभिव्याहारे इत्यर्थः ननु घटादिष्वपि जाग्र

रत्वाद्यतिदेशः स्याव्यपदेशहेतुत्वभावेनाविद्यमानव्यपदेशेन चेयायेत्यादाविव न्यायप्रवृत्तेरिति चेन्न स्वसजातीयावधि
व्यवहारस्य भेदनिबंधनस्य चानेनातिदेशात्। अत एव दृष्टांतद्वयोल्लेख अस्ति चेपायेस्यादौ एकाच्त्वावयवावयवित्वस्य प्र
थमत्वे संजातीयनिष्ठधर्मस्य चातिदेशः साजात्यं च तत्तद्बुद्धिविधेयकार्यनिरूपितोद्देश्यतावच्छेदकधर्माक्रांतसमुदायघ
टकत्वरूपमिति बोध्यम्। नन्वेवमपि स्वस्मिन् स्वाव्यवहितपूर्वत्वपरत्वस्यातिदेशः प्राप्नोति ततश्च दधि मध्वित्यादौ यण्।
दिः स्यादिति चेन्न तत्र तद्बुद्धौ तन्निमित्तोपादानवैयर्थ्येन तदनतिदेशादिति दिक्। ३ः।१।३४॥ ननु वान्तो यीत्यादाविति।
नन्वेवं तरेणविपरिभाषायां सामर्थ्यात् तदादेर्लाभः अन्यथा तदन्तविधौ पान्तेरस्योपपत्त्या सूत्रानर्थक्यं स्पष्टमेवेति चेन्न ना
श्विमागच्छितेत्यादौ अल्लोपे कृते यान्तप्रत्ययसम्भवात् न चाल्लोपस्य स्थानिवत्त्वेन कारे परे कुत्वविधानेन श्रोताव्यवधाने
नस्थेव यांते वांतविधानेनापि श्रोतयान्तत्वस्य विवक्षणात् न पदान्तेति निषेधस्तु ननः क्वौ लूतिनियमेनापदत्वादादेशस्य
परपदस्थत्वाभावाच्च किंच गोमयमतति गोमयाच्छि पतमाचष्टेलिच्वि टिलोपेः नलादेशत्वेन स्थानिवत्त्वाभावेन प्रत्ययस्य
यान्तत्वाक्षतेः अत एवाह यस्मिन् विधिरिति सप्तम्यन्तपदार्थकस्य स्वतंत्रस्य सर्वनाम्नो निर्देशः सति सप्तमी न त्वधिकरणे औ
पश्लेषिके वांतो यीत्यादौ तत्सम्भवपि नेड्वशीत्यादौ तदभावात्। यद्यपि तस्मिन् तथा नाश्रितः अल्ग्रहणेऽल्त्वस्याहि अधि

CC-0. In Public Domain. Digitization by eGangotri

करणेल्युटाअलउच्चारणेइतिनार्थःप्रत्याहारग्रहणेनतस्मान्नुडचीत्यादौदोषापत्तेःइकोचिव्यंजनेमाभूदित्यत्रव्यंजनादा
वितिव्याख्यानमरभाष्यविरोधापत्तेश्चकिंतुवाहुलकात्कर्मणिल्युट्अलःप्रतिपादकशब्देसतीत्यर्थःतदादावित्यत्र
तच्छब्देनसप्तम्यंतार्थःपरामर्शनीयःएवंचसप्तम्यन्तेविशेषणीभूतेल्प्रतिपादकशब्देसतियद्विधानेनतदादौबो
ध्यमित्यर्थःफलितइतिबोध्यम् यत्तुजपःपुंसीत्युक्तेरपवादइयमित्युक्तंवचनेननिर्वृत्तावाचनिकीइयंचेतितन्नार्द्ध
धातुकस्येड्वलीत्युक्तोसामानाधिकरण्याभा यस्मिन्नितिपरिभाषायाअप्रवृत्तौतस्मिन्नितिपरिभाषाप्रवृत्त्याचवलपरकस्या
धातुकस्येडित्यर्थेभविष्यतीत्यादावेवप्रा ति।ननुभवितेत्यादावपीतिनेड्वशीत्यादिनिषेधस्तुसुशर्मादेववदत्तइत्या
दौचरितार्थःएवंक्त्वादिग्रहणंसफलमितिचेन्नवहुलग्रहणस्यसंस्कारानुरोधेनतस्मान्नुडचीत्यस्येववलीतिसप्तम्याःषष्ठ्य
र्थत्वांगीकारेणतस्मिन्नित्यस्याप्रवृत्त्यासामानाधिकरण्यस्यापिसत्वेनपरिभाषाप्रवृत्ते र्निर्विघ्नत्वादित्याशयात्तेनङःसीति
ननुतदन्तविध्यभावापपदस्येत्यस्यवैयधिकरण्यावश्यकत्वेनसमानाधिकरण्याभावादेवनतदादिविधिरतएवश्रो
स्वेरयदावपवस्समस्येत्यस्थइतिव्याख्यानमन्यथातेननतदभावेपितदन्तविधिर्दुर्वारःस्यादितिचेत् अयंभावः।परस्येत्यधि
कारेपिश्रोतत्वादुकारेणसकारोविशेष्यते।तत्रतदादिविधौमदूसतइत्याद्यवकाशत्वेवितदन्तविधौशास्त्रीवाधिताजन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वहितहलसमुदायस्यसुङ्गियोरित्यादिनिर्देशेनसाधुत्वबोधेनेनसकारस्यसयोगान्तलोपेनचङकाराव्यवहितपरोयः
सकारस्तदन्तस्यपरस्येत्यर्थेसूत्रस्यचारितार्थ्येनसंयोगांतलोपेबाधायेस्याल्कृप्रस्यशुत्तान्वयस्यबाधायेस्याच्चमादुप
धायाइत्यादौसौकृतपदस्येत्यस्यावयवषष्ठीत्वस्यैवसामर्थ्यात्स्वीकारइत्यभिप्रेत्यैवप्रोस्तरेतथाव्याख्यातमितिबोध्यम्
केचित्तुचित्यमिदम्मूलस्यानुरोधेनशास्त्रप्रत्याख्यानस्याचमत्कारावहत्वेनादिग्रहणस्यावश्यकत्वात्ततमास्यर्थकमे
वतन्त्रादिग्रहणमित्यवक्तुंशक्यत्वात्।ङःसोधुडितिन्यासेनतत्रादोषाच्च।यथान्यासेपिअंतेऽडाविवाहश्चेदादावेव
कुतोनेतिन्यायेनान्ततोलस्यानुरोधस्यावश्यकत्वेनादावेवतत्स्वीकारेदोषाच्चतीषसहः।ससिचीत्यादावेकदेशान्वयक्ते
शेस्याप्यनावश्यकत्वाच्चनचतदाचाव्यवहितपरकेच्छत्यादेःपरस्यवलादार्द्धधातुकस्येत्यर्थेननैकदेशान्वयइतिवा
च्यम्एवंहिसतिवान्तोपीत्यादावप्युक्तरीत्यायकाराव्यवहितपरकयोरोरैतौवान्तादेशाव्यवहितप्रत्ययपरेइत्यर्थेघ्या
द्यादिप्रत्ययादिलाभेपरिभाषाच्छेदापत्तेःप्राचाहलादावित्यादिग्रहणेनपरिभाषानित्यत्वलाभेनङसीत्यादावदोषात्तु
एवमप्येकदेशान्वयाकरणेनलाघवम्।अतएवहुसल्भ्यइतिसूत्रस्थंभाष्यमपिस्वरसतस्संगच्छतइत्याहुःननुक्षिपाइ
तीतिक्षियोदीर्घादितिनत्वविधायकेशास्त्रेइत्यर्थेःननुक्षियइतिदीर्घविधायके।निष्ठायामण्यदर्थेइतिदीर्घविधाय

शां.करी. केच तत्र दीर्घान्तानुकरणस्याप्रयोजकत्वेन चिक्षियतुरित्यादौ अजादौ यङ्पं तस्य कृते यङ्कस्यानुकरणत्वात् ह्रस्वां
२४ न्तस्य तु नानुकरणं विराम्यां जेरित्याद्यविवपरत्वादियङं वाधित्वा गुणः स्यात् । न च तत्त्वविधावपि तथैवास्तु अत एव दी
र्घादिति सार्थकमन्यथा दीर्घान्तस्यैवानुकरणे तद्वैयर्थ्यमेवेति अत एव तत्र शेखरे सूत्रकृते यङ्कस्यानुकरणे दीर्घग्र
हणमन्यथानिर्देशेनैव सिद्धमित्युक्तमिति वाच्यम् दीर्घादित्यस्य सत्वे हि तत्र दीर्घान्तानुकरणं तदभावे कृते यङ्क
स्यानुकरणमित्यपि संभाव्येत तेन हि दीर्घान्तानुकरणत्वे स्यैव वोधनादित्याशयात् अतो न शेखरविरोधः तएवाह ।
ज्ञापक इति नत्वे विधायके क्षिप इति यङि दैशो ज्ञापक इत्यर्थः । एतेन तत्रापि कृते यङ्कस्यैवानुकरणात्तथ्य ज्ञापकमि
त्यपास्तम् इह ननुप्रमाविति यथोद्देशे तु नैतदुपयोगः तत्र भविष्यति किंचिदनेन प्रयोजनमिति न्यायेन नित्यमप्येकादे
शाम्बाधित्वा परनिमित्तकत्वेनान्तरङ्गत्वात्सदृत्वे एकादेशेऽपि आनुमानिकस्थानिवत्वेन तस्य सोऽलभ्यात् । अत एव हेरामेत्या
दौ यदत्वसिद्धिः अन्यथा नित्यत्वात्सुलोपे सुवं कृतस्याशास्त्रीयत्वेन विशेषणतयाऽऽश्रयणेन च स्थानिवत्वाप्रवृत्त्यातत्त्व
स्यात् तत्र सुविन्युक्तं परिमाणग्रहणेन न्यायाप्रवृत्तेः तत्र सामान्यतस्तद्सिद्धिर्नोक्ता कार्य्यकाले सुवन्तस्याशास्त्रीयत्वेन औ २४
वृत्तिसुप्स्यस्यस्थानिसम्बन्धत्वधर्म्मत्वेन च स्थानिवत्वाप्रवृत्त्या तदसिद्धिर्वा । यष्ठस्याकडाधिकारस्य भयदादि संज्ञाविष

यथायथोद्देशं एवेत्युक्तम् तथापि तत्स्वह्रूयप्रश्लेषाभावे वन्तत्रैवातिप्रसंगात् प्रकारान्तरमपि तत्रैव निरूपितम् वस्तुत इदं सर्वं प्र
चीनरीत्या स्वमते उभयत्र आश्रयणेऽपि तत्स्वीकारेणाभीपादित्यत्र व्यपवर्गाभावेनोपसर्गान्तरस्य इणो भावेन दोषाभावेऽपि
कृते यस्माद्धि रुहितमलद्वादितदन्तत्वस्य तेन लाभेन परत्वास्वतेः भाव्य उभयत्राश्रयणेनं नादिवदित्युक्ते स्वस्तु एकदेशिन इ
तिस्पष्टश्चैस्वरादौ स्वमते वतरणे त्वनुचिकीर्षति विवर्तिषतीत्यादौ उरदत्वे हलादिशेषः॥ सन्यतइ नीत्वं न स्यात्तु द्विरुक्तधातु
पूर्वभागत्वाभावेन पुनरभ्यासत्वाप्रवृत्तेः अभ्यासत्रीयत्वेन स्यात्ति वत्वाप्रवृत्तेरिति बोध्यम् गुडोदकमित्यत्रानेन इकारान्ते पू
र्वपदत्वेनैकादेशविशिष्टे उदकशब्दत्वेनोदके केवल इति स्वरासिद्धिर्न्नोस्य फलं उपसर्गस्येति लत्वे ह्रायते इत्यत्राचः परे
तिस्थानिकत्वेनैवात्रापि व्यपवर्गस्य सुलभत्वात् । अजीगणादित्यत्र इत्वगणेत्वपि नासाधारणं तत्रैतत्सामर्थ्येनापीत्वं सुल
भमित्येति बोध्यम् । अर्थस्यापमार्थः समाजः समुदायत्वेन ग्रहणं इति तं अर्थसमुदायान्तर्भूतमित्यर्थः श्वस्वप्रयोजको व्यवहा
र इत्यर्थः । अनुकरणमिति अष्टाध्यायान्तादित्य च्छुत्वस्यादर्शनादिति भावः एकदेशविकृतेति न्यायेन दीव्यतिशब्दैक
देशस्य तदर्थबोधकस्य दीव्यच्छुत्वस्योच्चारणमित्यर्थः यथाश्रुते तु न साधु अनुकरणस्य शब्दपरत्वेनार्थस्यावधित्वं न
स्यात् । इति स्पष्टमुद्योते । किमर्थमिदमिति । एवं हि लाघवात्साग्दीव्यतेरणा इत्येव वक्तव्ये तत्स्यत्का साग्दीव्यत इति निर्देशः

किमर्थइत्यर्थः ननु मालुसूत्रे अनुकरणं नानान्तस्यैवावधित्वमस्त्विति चेन्न अवध्यवधिमतोः साजात्यमिति नियमादर्थ
स्येष्टमवधित्वं न स्यात् तथा चाल इतिन्त्रालिङ्गोः पर्य्यायेण विधानं स्यादित्याशयात् अनेनैकदेशविकृतोप्यर्थबोधक
एवेति सूचितमिति बोध्यम् विकृतावयवेति अत एव मघवतः राजकीयमित्यादौ संप्रसारणल्लोपौ न अन्यथा तेन न्याये
नानंतत्वात् श्वयुवेति संप्रसारणं स्यात्। राज्ञकचेति कादेशेप्यनंतत्वात् ल्लोपौ न स्यात् मघवतश्छाद्रसलेनानन्तरस्यपकर्षणे
फलाभावेनत्वतन्न न दोष इत्यन्ये अकृपरिमाणेति लोके दृष्टस्य परिमाणत्वस्यात्रासंभवाच्छब्दानुपूर्वीविशेषरूपं गृहीत्वेने
उक्तयुक्तेरिति यथा लोके द्रोणादिशब्दाः परिमाणार्थवाचकाः न्यूनाधिकयोः प्रवृत्तिस्तेषां परिच्छिन्नपरिमाणार्थकत्वा
दुरूपपादा एवं सर्वाब्दानुपूर्वीविशेषोपादानेन क्रियमाणे सर्वनामसंज्ञा न्यूनेऽधिके वा सर्वकादेपन्नं विना दुरूपपादा इ
त्युक्तयुक्तेरित्यर्थः नन्वेवमंतादिवच्चेत्यनेन तत्र योजने गुडोदकमित्यादावुदके केवले इति पूर्वपरांतोदात्तत्वमनेन दकश
ब्दस्योदकशब्दत्वमाश्रित्य साधितं भाष्योक्तविरुध्येत तत्रोदक इत्युक्तपरिमाणग्रहणाभावादीव्यत इति सूत्रे दीव्यत इत्युक्तपरि
माणेनैतज्ज्ञापकपरभाष्यं विरुध्येत भाष्यान्तरं च नादृशं नोपलभ्यत एवेत्यत आह एतदिति तत्र हि यं च द्रोणादि दृष्टांतेनोक्त
स्थले तदभावमाशङ्क्य ज्ञापकेन तत्तन्नदेकदेशभूतमिति न्यायेन समाहितं यदि तन्त्रे तन्त्र वृत्तिस्तर्हि अधिकगंङ्गादिसत्वेपि श्रुनः

श्वत्वदरकृजधिकस्यसर्वकस्यसर्वशब्दत्वमस्तुतमेवेतिभाष्यासंगतिरतस्तथातदाकूतमितिभावः एतेनान्येनन्यायेनपूर्व
पदत्वंभाष्याभिप्रेतंननूदकशब्दत्वमितिनतद्विरोधइत्ययासम्। अंतादिवच्चेत्यत्रपूर्वांतत्वेएतत्प्रयोजनस्योक्तत्वेनतद
भिप्रेतत्वस्यस्तुमेरुशृंगारुढत्वात्। उकारांतेपूर्वपदत्वेउकारस्यैवतदायत्याफलभेदायतेश्चपरत्वादुदात्तत्वेनएकादे
शेननतत्सिद्धेस्तदुत्तरभाष्यएवस्पष्टत्वेनतस्यैकदेश्युक्तित्वाच्च अतएवतन्न्यायाश्रयणं अन्यथानेनैवगतार्थत्वात्त
दनर्थकमेवस्यात् यदागमइतितुनगतार्था आगमस्याविकारत्वात्। अतएवलोपागमसर्वतुविकारज्ञोहीतिभाष्येआ
गमस्यविकारात्पृथगुक्तिः घुसंज्ञायामक्तपरिमाणत्वाच्च एवंचयेनविधिरितिसूत्रभाष्यविरोधेनोदकेकेवलइतिसूत्रभा
ष्यमेकदेश्युक्तम्। ज्ञापकपरंभाष्यंतुन्यायेनदीव्यतीत्येतत्स्वरूपालाभेपिदेवनकर्तृरूपार्थलाभेनसुयोजमितिबोध्यम्।
उच्छृंखलास्तुयेनविधिरितिसूत्रभाष्यमेकदेश्युक्तिरेवोक्तहेतोः अंगसंज्ञासूत्रेअंगसंज्ञायाअप्यक्तपरिमाणत्वस्य
भाष्येउक्तत्वेनाचःपरेतिसूत्रेआयसाविन्यत्रानेनांगत्वातिदेशकरणेनतद्विरोधाच्चलोकन्यायेनैवसिद्धेज्ञापकानु
धावनपरभाष्यविरोधाच्चतदेकदेशभूतमितिन्यायेनलोकेआगमस्यापिविकारव्यवहारसत्वात्यदागमाइतिन्यायो
पिमास्तुअनेनैवगतार्थत्वादित्यपरमनुकूलमित्याहुः विकृतानलरूपेतिनयशब्दाशब्दाणिचिटिलोपेनेनासतत्वलाभे

शांकरी
२६

नस्थानिवत्वेनतत्वमाश्रित्यास्मायामेधास्रजोविनिरनिविनिसिधिः आभीयादित्वोक्ति अन्नस्यतत्वसर्वमदादिप्रकरणोक्तौ
रणेस्पष्टम्॥ इत्थान्नेवमभिधीयत्रेति नन्विदमनुपपन्नंतदभावेहेतोरनुक्तत्वात्पूर्वंसकृद्गतिन्यायोपन्यासस्यैवयुक्तत्वा
त् किंचतातङ्भावपक्षेभिधीयत्राधिभावस्यस्थानिवत्सूत्रेभाष्यसाधितस्यासंगतिस्तत्रध्यादेशेपितातङ्प्रवृत्तौतद
संगतिरेवा किंचतातङ्धीभावयोर्योगपद्यासंभवेनपरत्वात्तङ्यपितातङ्भावधिभावयोर्योगपद्यसंभवेनक्वविरोध
इतिचेन्न अयंभावः विप्रतिषेधसूत्रस्यनियमार्थत्वेवृक्षेभ्यइत्यादौवदंतोहेप्यताकांतयोः सुपिचबहुवचनेझल्येत्यनयोः
पर्यायप्राप्तायांप्राप्तायांविप्रतिषेधेपरमित्यनेनपूर्वशास्त्रस्यझलादिबहुवचनाविषयत्वंबोध्यते। अन्यथाशास्त्रद्वयप्रा
माण्याद्विकल्पापत्तेः इयंतुरित्यादावपिद्वित्वसंप्रसारणयोःपरंसंप्रसारणंभवतीत्यनेनौपदेशिकयजादिधातोःद्वित्व
विषयत्वंबोध्यतेतिसूत्रणमित्यत्रापिस्पर्धेकत्रिशब्दस्यत्यादेशाविषयत्वात् एवंचानायामेनैवसकृद्गतिन्यायसिद्धेस्ते
नाशीरर्थस्यहेध्यैविषयत्वेनभिंनादित्यत्रतातङावाधितोधिस्तदभावेनस्यादिति एवंचपुनःप्रसंगेतिन्यायेनतस्मात्स २६
तात्पर्यसंकोचस्याभावोबोध्यतेइतितेनपूर्वंतदनुक्तावपिनक्षतिरितिसूचितं। नचैवंभिंनादित्यत्रापिध्यादेशापत्तिः।
स्तद्विषयकेतातङ्शास्त्राप्लवानर्थक्यापत्तेस्तेनतद्विषयेसकृद्गतिन्यायएवलक्ष्यानुरोधादाश्रितइतिसूचितम्विक

त्वस्याभावांशेऽपि तासर्वसत्वेनोभयलक्ष्यकत्वादित्युक्तदोषस्याप्युक्तमेव बीजमन्यथा विभाषा श्वेरित्यत्र भावाभावाभ्यां
संप्रसारणस्य पाक्षिकत्वे लक्ष्ये न वेति विभाषेति सूत्रस्य लक्ष्यानुरोधमंगीकृत्य प्रत्याख्यानासंगतेः । मम तु विस्वपीत्यस्य
म्नरूत्यादौ चारितार्थ्येन विभाषा श्वेरित्यस्य शुशावेत्यादौ चारितार्थ्ये पिउभाभ्यां लिघनतरे संप्रसारणं साधितमर्थकाभ्या
संप्रसारणस्यैव विधानेन विरोधाभावान्नियमार्थविप्रतिषेधसूत्राप्रवृत्त्या वरिमाप्यान्त अत एवाग्रे वक्ष्यति एतन्नियमाद्वश्या
देव तल्लक्ष्यविषयकपूर्वशास्त्रानुपपत्त्वर एवेति । कैयटोक्तप्रकारस्तु न युक्तमिति स्पष्टं गदायाम् । द्वयोः कार्ययोरिति नाव
श्यं हि कार्ययोरेव विप्रतिषेधः किं तर्हि असंभवेऽपीति भाष्ये हि कार्ययोगत्वाभावे केवलेऽप्यसंभव इति हि नोक्तम् तथा
सुपि च बहुवचने झलीत्यनयोः वृक्षेभ्य इत्यादौ युगपदसंभवः यज्ञादि सुप्यनतहे दीर्घः साधुः सः झलादि बहुवचनात्
र एकारः साधुर्भवतीत्यर्थात् यद्यपि विधेयनिष्ठत्वात्तद्विशेषणत्वं दुरूपपादम् एवं च सुप्यनतस्य दीर्घ इत्यर्थे युगपम
त्संभवे नास्ति विरोध इति शक्यते वक्तुम् तथापि शब्दानां नित्यत्वाद्व्याकरणसाध्वनुशासनतया साधुत्वस्यैव विधेयत्वेनैव
मवोचितमिति स्पष्टमिको गुणेत्यत्र विवरणे शिष्टादित्यादावप्येवमेव यद्यपि त्रपादेशान्पूर्वं तदुत्तरं वाक्यानि वृत्वादिनास्त्वे
वस्वति मित्तानंतर्येन तथापि तत्त्ववृत्त्यवच्छेदककाले विरोधोऽस्त्येति वाच्यम् । अन्यतरस्य स्वनिमित्तानंतर्यसत्वेन्यतरास्यात्त

शांकरी
२७

दसत्वे नास्ति प्रतिषेधः। यथा राजेत्यादौ दीर्घस्य तन्निमित्तासत्वेपि हल्ङ्यादिलोपस्य सत्वेन न निषेधः किंतु प्रतिपदोक्तत्वा
दीर्घ एवेति स्पष्टम् क्रोष्टुशब्दे शब्दरत्ने यत्राप्येकमेव कार्यमुभाभ्यामपि विधीयते तत्रापि विरोधाभावान्न विप्रतिषेध इति स्पष्ट
संतु धो शाकल्यस्येति सूत्रे शब्दरत्ने यथानन्तरे नामि यत्रादौ सुपि चेति दीर्घः साधुर्भवतीत्यर्थकयोः सुपि चेति नामीत्यनयोः रामा
णामित्यत्र प्रवृत्तयोर्नास्ति विरोध इति तत्रैव शेखरे स्पष्टम्॥ विप्रतिषेधशब्दस्य विरोधार्थकत्वात्। परस्परतथावकाशयोरि
ति। फलितार्थपरं। अन्यतरानवकाशत्वऽपवादत्वापत्तेः एवमिधीत्यत्रेपि मिनद्रहीत्यत्रेत्यर्थः मितादित्रिलक्ष्य इति यावत्
यथाश्रुते तत्वसंगतिः स्पष्टैवेति बोध्यम्। एधत इति आर्धधातुके नियमस्य चानसिविकरणस्य चरितार्थ्येन परत्वमिति भावः।
ननु परत्वादित्ययुक्तम् कृताकृतप्रसंगत्वेन विकरणानात्रिसत्वादिति चेन्न। अनुदात्तङितः इत्यादीनामिदानीयमार्थत्वेन्नै
धतेरित्यादावनुपपत्त्यभावेपि एधतीत्यादिनिवृत्तिमात्रफलकत्वेन न तत्रैव नियमशास्त्रप्रवृत्तौ तद्रूपस्येवाभावेन न विकरणप्रा
प्त्या कृताकृतप्रसंगित्वाभावात् नङ्विधानमिति। ननु ज्ञापितेप्यचारितार्थ्यमेव विकरणपरिभाषामात्राबाधनेन चरि
तार्थ्येन सामर्थ्याभावेपि तक्रकौण्डिन्यन्यायेनापवादस्यायजनिष्यमाणत्वसत्वेपि तद्बाधपूर्वं विकरणे पुनः प्राप्तस्य नियम २७
स्य बाधनेन चरितार्थ्यं तदिति बोध्यम् तत्रकौडिन्यन्यायेन बाधितस्योत्सर्गस्य पुनरप्रवृत्तौ सामान्यशास्त्रेणोभयसिद्ध्या पुनर

पिविधेयर्थ्यस्यतद्वृस्यत्वात् अतएवदृष्टोविषयप्रथमयोःपूर्वसवर्णइतिसूत्रस्थकैयटोक्तरीत्यानाश्रयणमतएवस्यता
सीभ्यांतिवादिवाधेनेवचकथंचारितार्थमतआहविषयसप्तमीति।एवंचनियमवाधेनचारितार्थस्पष्टमितिभावः।विषय
सप्तमीस्वीकारेगौरवमत्रपक्षेतोलाघवमाह विकरणव्यवधानेपीति एवंनित्यत्वात्तरणयोरिति।अनयोःपल्यप्स्या
वलवत्वमपियोगपद्यासंभवेएववोध्यमित्यर्थः।विप्रतिषेधसूत्रेणपरस्यतत्रैवलवत्ववोध्यनेनतत्रानयोरपिअर्थाद्यौ
गपद्यासंभवोऽस्त्येवेतिभावः।अनयोःपरस्परवाधकत्वेइत्यर्थइतितुनयुक्तंमानाभावात् धनवनमित्यत्रार्थवद्भावेःतरंग
त्वाद्वयवानाप्रातिपदिकत्वेसुपिचकृतेसमुदायस्यप्रातिपदिकत्वात्तदवयवत्वेनसुपोलुगितिनतत्रसुपःश्रवणमित्य
र्थवत्सूत्रस्थशब्देन्दुविरोधाच्चेतिदिक्।असिद्धंवहिरंगमंतरंगेअंतःशब्दार्थमाह।मध्येइति।अधिकरणशक्तिप्रधानस्या
प्यंतःशब्दस्यवहिःशब्दस्यशक्तिमत्परत्वेनभूतशब्देनगतिसंज्ञकस्यसमासेनांतर्भूतशब्देनवावहुव्रीहि।तत्रंमध्यसत्वस्य
सापेक्ष्यत्वादाहवहिरंगेतिनिमित्तसमुदायसध्याहारलब्धम् एवंचयदीयनिमित्तसमुदायांतर्भूतांगकंशास्त्रंतदंतरंगए
वंयदीयमितिनसमुदायाद्बहिर्भूतांगकंशास्त्रंतद्बहिरंगमितिवाच्यार्थइतिनान्योन्याश्रयः।मूलंतुफलितार्थपरमितिवोध्यं
अतएवेति।अंतरंगत्वात्त्रयादेशेतस्यस्थानिवत्वात्त्रिशब्दत्वेनतिस्रादेशप्राप्तावपिततोपिपूर्ववदंतरंगत्वान्नुडिदीर्घेचल

शे॰का॰री॰ क्ष्ये लक्षणस्येति न्यायेन तिस्रादेशेपि दीर्घाप्राप्तौ निषेधवैयर्थ्यं स्पष्टमेवेत्यर्थः एतेन स्थानिवत्वाति आदेशेपि अंतरंगो दी

२८ र्घे न स्यात्सिद्धत्वेन न तद्वैयर्थ्यमित्यर्थ इति अपास्तम् असिद्धत्वस्याहार्यारोपबोधकत्वेन कार्यस्य स्थानिबुध्यादेशे प्रवृत्त्या

निषेधस्योज्जीवनात् विकारकृतत्वस्य भेदानाश्रयणस्यान्यत्र प्रपंचितत्वादिति बोध्यम् अपरनिमित्तकत्वेनेति अत एव

यवावेदमित्यादावन्नाचुभुप्रचणयोश्चु इतीत्वं नेति भावः इदमंतरंगत्वं च नापूर्वं तदीयनिमित्तांतर्भूतत्वेन तत्वं बोध्य

म् अत एव हेह्यानेत्यादौ नित्यत्वात्पूर्वरूपे कृते लोपसिद्धिः अन्यथाऽपरनिमित्तकत्वेनांतरंगत्वाल्लोपे नो गुण इति पररू

पे च न तत्सिद्धौ भाष्योक्तव्यधिकरणान्वयस्य तत्रत्यशेखरस्य चासंसंगतिः एतऐइइत्यत्र तदादेशिन्युपस्थितावपि तदीयनि

मित्तांनभूतत्वेन तत्वमा— संबुद्धौ परतः गुणो भवतीत्युक्ते कस्मादिति नियमाकांक्षामुपस्थितत्वाद्ग्गादिसम्यावधित्वेना

न्वयनसम्यं तत एतत्सूत्रस्थानिवत्सूत्रभाष्यप्रमाण्येन वर्णग्रहणेपि तत्प्रवृत्तेरमीकारणेन लाक्षणिकत्वादेष पचावेदा

मित्यादावदोषः प्रत्ययमस्य तु ट इत्येकयोग एव कर्तव्यो पृथक्प्रयोगकरणेन उत्तरक्वाचित्कत्वबोधनेन चकारमत्ययादि

त्वाभावाय प्रश्लिष्टयकारस्य वैयर्थ्यं नचुधुपादावप्यदोषेणेदृशांतरंगस्य फलमस्तीत्याहुः तस्याहि सत्यां वहिरंगप्र

सारणस्यासिद्धत्वाल्लघूपधगुणो न स्यादिति नन्यत्र वहिरंगत्वदुरूपपादमसत्त्राकृतत्वस्य केयटोक्तस्यानुपपन्नदं सूचितत्वेन

CC-0. In Public Domain. Digitization by eGangotri

भसंज्ञायावृषण्वस्वश्वयोरित्यादौशास्त्रसाधनपेक्षत्वेनाक्षिप्तस्यशाब्देनयाभावस्यस्वयंसिध्यतित्वेनचपरंपरानिमित्ताश्रयत्वेमाना
भावस्यानुपदोक्तत्वेनचभयदसंज्ञाविषययोर्यथोद्देशस्यैवाश्रयत्वेनचायुक्तमेतदितिचेन्नभाष्यएकदेशत्वोक्तयासंज्ञापरिभाषयोरे
क्यस्यान्यत्रस्पष्टतयैकवाक्यत्वलाभेनवहिर्भूतप्रासादितिनिमितत्वेननतस्यसुलभत्वात्स्थलविशेषेभाष्यप्रामाण्येनपरंपरानि
मितत्वागीकारात्।अतएवपदद्वयमितिकत्वसमासनिमित्तकत्वेनलुकोवहिरंगत्वमित्यंतरंगानपीतिज्ञापनपरसकलभा
ष्यादिसंगतिः अतएवाभ्यासनिमितत्वेनद्वित्वस्यवहिरंगत्वमितिह्रस्वइतिसूत्रभाष्येइयङ्वङोश्चवहिरंगत्वमिति।वाण
दागमितिज्ञापनपरदाश्वानितिसूत्रेचभाष्येस्पष्टम्।एतेनानेनसंज्ञाकृतत्वंसूचितम्इत्यपास्तमाहुःदीपकेयदोक्तरान्त्वागु
णस्यैववहिरंगत्वेनैवमप्यनुपपत्तेश्चनचैवमपिपरनिमित्तकत्वस्योभयत्रतुल्यत्वेनकथंनत्वसंप्रसारणीयनिमित्तान्तर्भू
तनिमितत्वस्यगुणेसत्त्वान्नचावेदमित्यादौतुप्रत्ययग्रहणेनोपस्थिततदादेःपडस्सलोडुतमस्यविधायमानस्यैत्वस्यगुणीयप
दद्वयनिमित्तान्तर्भूतनिमित्तकत्वेसत्त्वेननदोषइतिवाच्यमभसऊकावयवस्यनिर्दिश्यमानावयवस्ययणःसंप्रसारणनिमि
त्यर्थस्यविश्वाद्यवयवयणःतद्यादृत्यर्थमावश्यकत्वेनागत्वस्यचवाहात्तेसत्त्वेनगुणनिमित्तस्यतदंतर्भूतत्वेननतत्त्वमित्या
शयात्नचैवंषष्ठ्यान्तस्यनिमित्तत्वागीकारेप्रागुक्तयेनविधिरितिसूत्रभाष्यविरोधःतत्रहिउनञ्शब्दमाश्रित्ययणूशब्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

माश्रित्य गुण इत्यतरं गत्वा द्गुण एवस्यात्। इत्युक्तमत्वट्री त्यागुलोपीगत्तागस्यार्धधातुकस्यानिमित्तत्वेनोभयोस्समतद्दसं।
गतिरितिवाच्यम्। अर्थकथेवस्थान्यादेशविश्रान्तिरितिसिधान्तेनानुमानिकस्थान्यादेशस्यसतिसंभवेसर्वत्रसत्वेनसिद्धउ
त्वस्यस्थोनइत्यादेश इत्यर्थलाभेनचतस्यकार्यितयानिमित्ताभावादित्याशयात्। प्रकृतेतुनतथासूत्रेउच्चार्यमाणस्यवाहइ
त्यस्यार्थवत्वमस्त्वेनानुच्चारितागस्यस्थानित्वकल्पनेमानाभावेनचतस्यारजकतयेवव्याख्यानस्योचितत्वेनकार्यित्वाभावाद
त एवसन्यडोरित्यत्रसनतस्यादेश्यत्वेपिउर्णुनविषतीत्यत्रानुशब्दस्यैवद्वित्वरूपकार्यित्वेनइसोद्वित्वानिमित्तत्वसिध्य
ति। त्वदुक्तरीत्यायष्ठ्यंतस्यकार्यितयातट्टकस्यसोनिमित्तत्वाभावाद्द्विर्वचनेचीत्येतदप्रवृत्तौ इसंगतिरित्यलम्॥ ⁘ ॥
इतिआश्विनकृष्णशनौसप्तम्याम् सम्वत् १९ ३०॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इतिशांकरीटीकासमाप्ता॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu